श्री स्वामिनारायणो विजयतेतराम् ।

# श्रीमद् सत्सङ्गिजीवन शास्त्रम् ।

श्रीशतानन्दमुनि विरचितम्-गुर्जरानुवाद सहितम् ।

**શ્રી શતાનંદમુનિ વિરચિતમ્ ।**

# શ્રીમદ્ સત્સંગિજીવન શાસ્ત્રમ્

**પ.પૂ. સનાતન ધ.ધુ. શ્રી લક્ષ્મીનારાયણ દેવ પીઠાધિપતિ આચાર્યશ્રી ૧૦૦૮ શ્રી અજેન્દ્રપ્રસાદજી શ્રી નરેન્દ્રપ્રસાદજી મહારાજશ્રી (વડતાલ)ની આજ્ઞાથી સાધુ આનન્દસ્વરૂપદાસ (વેદાન્તાચાર્ય) સંશોધિત**

## तृतीय प्रकरणम् ।

**ગુજરાતી અનુવાદ સહિત**

## તૃતીય-પ્રકરણ

सुव्रत उवाच –

इत्थं निजान् दुर्गपुराधिवासान् देशान्तरस्थांश्च नरांश्च नारीः ।
अत्यर्थमानन्दयतो हि तस्य तत्र व्यतीयुः शरदोऽष्ट पुर्याम् ॥१॥

---

### અધ્યાય : ૧

**★ ઉત્તમ રાજાના પરિવારનો ભક્તિભાવ કહ્યો છે અને તેઓની ઉપર શ્રીહરિની પ્રસન્નતા કહી છે.**

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! આ પ્રકારે ગઢપુરમાં નિવાસ કરતા અને દેશાન્તરમાં નિવાસ કરનારા પોતાના ભક્તો સ્ત્રી અને પુરુષોને આનંદ આપતાં શ્રીહરિકૃષ્ણ ભગવાન ગઢપુરમાં સંવત્ ૧૮૬૧ ના માઘ સુદી એકાદશીથી આરંભીને સંવત્ ૧૮૬૯ના માઘ સુદી એકાદશી પર્યંત આઠ વર્ષ રહ્યા.

सम्पूर्णसर्वस्वमनोरथोऽथ जरन्नृपो भौतिकदेहमूर्जे । विहाय दिव्यं प्रतिपद्य देहं तद्धाम गोलोकमवाप भूप ! ॥२॥ तस्यात्मजः
सन्मतिरौर्ध्वदैहिकक्रियाविधौ साधुजनांश्च सर्वशः । श्रीकृष्णभक्तान्बहुशश्च वाडवानतर्पयत्स्वादुविचित्रभोजनैः ॥३॥
नृपासनस्थोऽपि स दास्यमेव स्वयं हरेश्चास्य सतां मुदैव । प्रीत्या चकारानुदिनं विनीतः श्रीकृष्णनिघ्नीकृतराज्यभारः ॥४॥
स साधुसेवादिगुणैश्च भक्त्या हरेश्च बुद्ध्या नृप ! विद्ययापि । ज्ञानेन धर्मेण तथा विरक्त्या कीर्त्या च तातादधिको बभूव
॥५॥ हरेः प्रसादाद्धनधान्यऋद्धिस्तस्याभवत्सर्वनृपाधिकैव । वासाद्धरेस्तत्र च पौरलोका आढ्या बभूवुः किल सर्वशोऽपि
॥६॥ तस्य स्वसारो जननीद्वयं च स्त्रियौ तथा द्वे कुमुदा जुहूश्च । दासीशता अप्यनुकालमीशं सिषेविरे दास्य इव स्वयं ताः
॥७॥ तदर्थमेता दलनं च कण्डनं चक्रुर्जलस्याहरणं च नित्यदा । तन्मन्दिरे मार्जनलेपनादि च प्रक्षालनं तत्परिधानवा-
ससाम् ॥८॥ इत्थं नृपस्यास्य च बान्धवानां श्रद्धां च भक्तिं दृढतां स्वधर्मे । मानक्रुधीर्ष्यादिविहीनतां च दृष्ट्वा तुतोषेश
उदारतां च ॥९॥ तेभ्योऽर्चनायानुदिनं स राधाकृष्णस्य मूर्तिं स्वसमाश्रितेभ्यः । पृथक् पृथक् च प्रददौ स्वदोष्णा
तेऽप्याददुस्तां विनयेन नत्वा ॥१०॥ प्राप्यापि साक्षाद्भगवत्करात्तां मनांसि तेषां तुतुषुर्न भूप ! । तल्लग्नसर्वेन्द्रियवृत्तिभाजां
तमेव तस्यामपि पश्यतां वै ॥११॥ स्वपूर्वरूपादपि वर्णिरूपे स्वस्मिंस्तु भावातिशयं तदीयम् । विबुध्य भूयोऽपि ददौ स
तेभ्यो मूर्तिं निजां चापि पृथक्पृथग् वै ॥१२॥ ततः प्रहृष्टः स्वसृभिः सहैव नृपः पुपूजानुदिनं हरिं तम् । तत्पूर्वरूपेण सहैव
भक्त्या भेदं तयोस्त्वात्मनि न व्यजानात् ॥१३॥ प्रत्यक्षकृष्णं प्रतिवासरं ते संसेवमाना अपि तस्य राजन् ! ।

---

હે રાજન્ ! શ્રીહરિ પ્રથમ ગઢપુરમાં પધાર્યા ત્યારથી નવમા વર્ષના, નવમા માસમાં સંપૂર્ણ પોતાની ઈચ્છાઓ પૂરી થઈ છે, તેથી જ નિર્વાસનિક થયેલા અને વૃદ્ધ અવસ્થાવાળા દાદા ખાચરના પિતાજી સંવત્ ૧૮૭૦ કારતક વદી પાંચમને દિવસે પંચભૌતિક દેહનો ત્યાગ કરી, ભાગવતી શરીર પામી, ભગવાનના ધામને પામ્યા. (૨) અભય રાજાના પુત્ર દાદા ખાચરે પોતાના પિતાની પારલૌકિક ક્રિયા કરી, અને શ્રીહરિ કૃષ્ણના ભક્તો, સંતો ને અનેક બ્રાહ્મણોને સ્વાદિષ્ટ વિવિધ પ્રકારનાં ભોજનોથી જમાડીને તૃપ્ત કરતા હતા. (૩) દાદા ખાચર રાજગાદીએ બેઠા હતા; તોપણ વિનયવાળા અને શ્રીહરિ કૃષ્ણ ભગવાનને આધીન થઈ, ભગવાન અને સંતોનું દાસપણું સ્વીકારી પ્રીતિપૂર્વક પોતે સેવા કરતા હતા. (૪) હે રાજન્ ! એ ઉત્તમ રાજા સાધુની સેવા આદિ સદ્ગુણોથી, અને શ્રીહરિની ભક્તિ, બુદ્ધિ, જ્ઞાન, ધર્મ, વૈરાગ્ય અને કીર્તિથી પોતાના પિતા કરતાં પણ વધારે ગુણવાન હતા. (૫) ઉત્તમ રાજાને ધનધાન્યની વૃદ્ધિ શ્રી નારાયણમુનિની કૃપાથી સર્વ રાજાઓ કરતાં વધારે હતી. ગઢપુરમાં શ્રીહરિના નિરંતર નિવાસથી સમગ્ર શહેરનાં જનો પણ ધન આદિકની સમૃદ્ધિવાળાં થયાં. (૬) ઉત્તમ રાજાની ચાર બહેનો, સુરપ્રભા અને સોમાદેવી : બે માતાઓ તથા કુમુદા અને જુહૂ (જસુબા) એ બે પોતાની પત્નીઓ - એ સર્વે પોતાને ત્યાં અનેક દાસીઓ હોવા છતાં શ્રીહરિની સેવા સ્વયં દાસીઓની માફક કરતાં હતાં. (૭) તે જયા વગેરે સર્વે સ્ત્રીઓ શ્રીહરિને માટે અન્ન દળવું, ખાંડવું, જળ લાવવું, ભગવાનના મંદિરમાં લીંપવું - વાળવું તથા શ્રીહરિનાં વસ્ત્રો ધોવાં વગેરે ક્રિયા હર્ષથી કરતી હતી. (૮) આ પ્રમાણે દાદા ખાચર અને તેમના પરિવારની શ્રદ્ધા, ભક્તિ, સ્વધર્મમાં દૃઢતા તથા માન, ક્રોધ, ઈર્ષ્યા આદિથી રહિતપણું અને ઉદારતા જોઈને શ્રીહરિ અતિ પ્રસન્ન થયા. (૯) શ્રીહરિએ પોતાના તે ભક્તોને નિત્ય પૂજન માટે રાધાકૃષ્ણની ધાતુની મૂર્તિ પોતાને હાથે પૃથક્ પૃથક્ આપી, અને તે સર્વે પણ શ્રીહરિને નમસ્કાર કરી, શ્રીહરિએ આપેલી મૂર્તિઓ આદરપૂર્વક ગ્રહણ કરતા હતા. (૧૦) હે રાજન્, તે સર્વે ભગવાનના કરકમલથી પ્રાપ્ત થયેલી મૂર્તિઓને સ્વીકારીને, ભગવાનની આજ્ઞાથી તેને પૂજતા, પરંતુ જયા આદિક સર્વે ભક્તો પોતાની સર્વ ઈન્દ્રિયો અને મનથી પ્રત્યક્ષ શ્રીહરિને જ ભજતાં હોવાથી (પ્રત્યક્ષ ભગવાનનું પૂજન કર્યા વિના) તેમનાં મન કેવળ તે મૂર્તિઓનું પૂજન કરવાથી સંતોષ પામ્યા નહિ. (૧૧) શ્રીહરિ પોતાના પૂર્વરૂપ શ્રીકૃષ્ણ થકી પણ હાલમાં પ્રકટ થયેલા વર્ણીરૂપ પોતાને વિષે ઉત્તમાદિ સર્વ ભક્તોને પ્રીતિવાળા જાણીને ફરીથી પણ પોતાની ધાતુની મૂર્તિ બીજી જુદી પૂજવા આપી. (૧૨) પછી બહેનો સહિત આનંદ પામેલા ઉત્તમ રાજા, રાધાકૃષ્ણની મૂર્તિ સહિત, શ્રીહરિકૃષ્ણ મહારાજની મૂર્તિને નિત્ય ભક્તિથી પૂજતા. તે બંને સ્વરૂપમાં પૃથક્ ભાવ પોતે મનમાં જાણતા ન હતા. (૧૩) હે રાજન્, તે ભક્તો પ્રત્યક્ષ ભગવાનને સેવતા, તોપણ તે ભગવાનની આજ્ઞાથી જ શ્રીહરિએ આપેલી બંને મૂર્તિઓને



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

यथार्हमानर्चुरुदारभावा मूर्तिद्वयं तस्य निदेशतो वै ॥१४॥ तत्रापि नित्यं निरुपाधिभक्त्या सर्वेभ्य आसील्ललिताऽधिकैव ।
तस्यै प्रसन्नः क्वचिदाह कृष्णो भद्रे ! वृणु त्वं वरमीप्सितं मत् ॥१५॥ सम्पूज्य कृष्णं प्रतिवासरं प्राक् राधावयस्या हि
यथा तथैव । पाकेन सम्भोजयितुं समुत्का कृतेन सा स्वेन जगाद किञ्चित् ॥१६॥ स्वामिन्विवक्षास्ति चिरं मनःस्था
तथापि शक्नोमि न वक्तुमेव । वर्णाश्रमाचारधृतिस्तवाद्य रुणद्धि वाचं मम दिव्यमूर्ते:॥१७॥ तदा हरिः प्राह हसञ्छुभास्ये
! बुद्धो मया ते हि मनोभिलाषः । मन्मूर्तियुग्मार्चनकाल एव मनोरथः सेत्स्यति वै तवैषः ॥१८॥ इत्थं हरेः प्राप्तवराऽतिहृष्टा
सा पूजयन्ती प्रतिमां तदीयाम् । प्रत्यक्षमेवाऽऽददतं स्वदत्तान्पूजोपहारांस्तमवैक्षताहो !! ॥१९॥ प्रमोदफुल्लान्तरवक्त्रपद्मा
साऽथान्वहं चारु विधाय पाकम् । न्यवेदयत्स्वप्रभुमर्चयन्ती तत्प्रीतयेऽसौ बुभुजे च राजन् !॥२०॥ दिनानि जग्मुः
कतिचिच्च तस्याः सुखं हरेरित्थमवाप्नुवत्याः । जनश्रुतिश्चास हरिर्हि भुङ्क्ते नैवेद्यमीशो ललितोपक्लृप्तम्॥२१॥
आश्चर्यमेतच्च निशम्य हर्षात्तस्या हरेः पूजनकाल एत्य । जयादयस्तां निकषैव तस्थुः स्त्रियस्तदीक्षास्थिरदीर्घनेत्राः ॥२२॥
नैवेद्यकालेऽथ चतुर्विधान्नं ताः सामिभुक्तं ददृशुः सचित्रम् । भोक्तारमीशं तु न नीलकण्ठं प्रशस्य तां ताश्च
ततोऽपसस्रुः ॥२३॥ भावं स्वकीयं भगवत्यवेत्य न्यूनं हि तस्यास्तत आप्ततापाः । तथाविधत्वाप्तय एव यत्ता निर्वासनत्वे
मनसो बभूवुः ॥२४॥ अनन्यभावा ललितावदेव कालेन चाल्पेन हि ता बभूवुः । राजापि तादृक्त्वमवाप
राजन्वर्णीन्द्रदास्यप्रसितत्वयोगात् ॥२५॥ मनोरथं पूरयितुं हि तेषां हरिः स्वकीयप्रतिमात्मनैव। तद्दत्तपूजोपहृतीः
प्रहर्षात्क्वचित्क्वचित्स्वीकुरुते स्म साक्षात्॥२६॥ ततोऽतिहर्षेण निरन्तरं तं सिषेविरे ते हि तदेकचित्ताः। तद्भक्त्यधीनोऽथ
न तांस्तु हित्वा गन्तुं शशाक प्रभुरन्यतो वै ॥२७॥ उवास तत्रैव सुखं ततोऽसौ देशान्तरीयैर्बहुभिर्नृपाद्यैः । स्वग्रामपुर्यागमनाय

ભક્તિપૂર્વક યથાયોગ્ય પૂજતા. (૧૪) તે સર્વ ભક્તોમાં પણ લલિતા (લાડુબા) કપટરહિત ભક્તિ કરનારાંઓમાં સર્વશ્રેષ્ઠ હતાં. તેથી જ લાડુબા ઉપર પ્રસન્ન થયેલા શ્રીહરિએ એક વખત કહ્યું : ‘હે ભદ્રે, તમે મારી પાસેથી વરદાન માગો.’ (૧૫) રાધાની સખી લલિતા જે રીતે કૃષ્ણ પાસેથી વરદાન માગતી હતી, તેવી રીતે લાડુબાએ પ્રત્યક્ષ શ્રી ભગવાનને કહ્યું : ‘ હે સ્વામિન્ !, લાંબા સમયથી મારા મનમાં એવી ઈચ્છા છે કે તમે મારું રાંધેલું જમો, પરંતુ હું આપને કેમ કહી શકું ? કારણ કે વર્ણાશ્રમના જે ધર્મો છે, તે મને આ વાત કહેતાં, વાણીને રોકે છે.’ (૧૬-૧૭) હે રાજન્, તે સમયે નારાયણ મુનિએ હસીને તેમને આ પ્રમાણે કહ્યું : ‘હે સુમુખી, તમારો સંકલ્પ મેં જાણ્યો. આ તમારો સંકલ્પ મારી આપેલી રાધાકૃષ્ણ અને હરિકૃષ્ણની જે મૂર્તિઓ છે, તેના પૂજન સમયે હું પૂરો કરીશ. (૧૮) હે રાજન્, નારાયણ મુનિથી વરદાન પામેલાં આનંદિત થયેલાં તે લલિતા, તે શ્રીહરિની પ્રતિમાને જ્યારે પૂજતાં અને તે પ્રતિમાને જે જે નૈવેદ્ય ધરતાં, તે સર્વ સામગ્રી મૂર્તિ દ્વારા શ્રીહરિ પ્રત્યક્ષ રીતે સ્વીકારતા. અહો! આ તે કેવું આશ્ચર્ય કહેવાય ? (૧૯) હે રાજન્, પછી આનંદથી પ્રસન્ન મનવાળાં અને પ્રફુલ્લિત મુખવાળાં લલિતા હંમેશાં શ્રીહરિની તે બંને પ્રતિમાઓને પૂજતાં અને સુંદર નવાં પકવાનો કરી મૂર્તિઓને જમાડતાં. શ્રીહરિ પણ દરરોજ પ્રત્યક્ષ રીતે અંગીકાર કરતા. (૨૦) આ પ્રકારે શ્રી હરિ દ્વારા સુખ પામેલાં લલિતાને કેટલાક દિવસો વીતી ગયા. ‘શ્રીહરિ, લલિતાએ અર્પણ કરેલાં નૈવેદ્યો પ્રત્યક્ષ જમે છે’ : આવી જાણ જનતાને થઈ. (૨૧) જયા આદિ આ આશ્ચર્ય સાંભળી આનંદથી શ્રીહરિની સેવા વેળાએ આવીને સ્થિર નેત્ર વડે લલિતાઅર્પિત ભોજન કરતા શ્રીહરિનાં દર્શન કરતી. (૨૨) પછી જયા આદિ સ્ત્રીઓ નૈવેદ્ય સમયે અર્ધું જમેલું ચાર પ્રકારનું અન્ન જમાતું આશ્ચર્યપૂર્વક જોતાં હતાં પરંતુ તે અન્ન જમનારા શ્રી પરમેશ્વરને જોતી નહોતી પ્રત્યક્ષ તો લલિતા જ જોતી હતી. પછી જયા વગેરે લલિતાની પ્રશંસા કરી પોતપોતાને ઘેર ગયાં. (૨૩) શ્રીહરિમાં પોતાનો ભાવ લલિતાથી અત્યંત થોડો જાણીને શ્રીહરિમાં પોતાનો ભાવ થોડો હોવાથી પ્રાપ્ત થયો છે અંતઃતાપ જેઓને એવી જયા આદિ સ્ત્રીઓ લલિતાની માફક શ્રીહરિમાં પ્રીતિ માટે પોતાના મનને નિર્વાસનિક કરવા ઉદ્યમે યુક્ત થતી હતી. (૨૪) હે રાજન્, જયા વગેરે સ્ત્રીઓ અલ્પ સમયમાં જ લલિતાની માફક શ્રીહરિમાં અનન્ય ભાવવાળી થઈ. ઉત્તમ રાજા પણ શ્રીહરિના દાસપણામાં તત્પર હોવાથી અનન્ય ભાવને પામ્યા. (૨૫) શ્રી સ્વામિનારાયણ ભગવાન જયા આદિ ભક્તોના મનોરથ પૂર્ણ કરવા માટે જયા આદિ ભક્તોએ અર્પણ કરેલા પૂજાના ઉપચારો પોતાની પ્રતિમા રૂપે જ ક્યારેક પ્રત્યક્ષ થઈ અંગીકાર કરતા હતા. (૨૬) પછી જયા આદિ ભક્તો શ્રીહરિમાં એકાગ્ર ચિત્તવાળાં અતિ હર્ષથી નિરંતર શ્રીહરિકૃષ્ણ ભગવાનની સેવા કરતાં હતાં. પછી ભક્તાધીન ભગવાન જયા-લલિતા આદિ ભક્તોનો ત્યાગ કરી બીજે જવા માટે સમર્થ થયા જ નહિ. (૨૭)

भक्त्या सम्प्रार्थ्यमानोऽपि मुहुः स्वभक्तैः ॥२८॥ व्रजे यथोवास पुरा स कृष्णः प्रीत्यै यशोदाव्रजराजयोश्च। स्वभक्तगोपालकगोपिकानां तथाऽवसत्तत्र च तत्प्रियार्थम् ॥२९॥ स्नेहोऽभवद्भूरितरो हरेश्च तस्मिन्नृपे भक्तिमति क्षितीश !। गेहं तदीयं तु स मन्यते स्म स्वकीयमेवेति च भक्तिवश्यः ॥३०॥ यो हरिं भजति दम्भवर्जितस्तं भजत्यपि हरिर्निरन्तरम् । भक्तदत्तमणुमात्रमप्यसौ वस्तु मेरुमिव मन्यते तथा ॥३१॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे उत्तमादिभक्त्युत्कर्षनिरूपणनामा प्रथमोऽध्यायः ॥१॥

राजोवाच-ब्रह्मन् ! कृष्णस्य चरितं मनःश्रवणयोः प्रियम् । शृण्वतोऽपि न मे तृप्तिर्जायते तत्र सर्वथा ॥१॥ निजभक्तापदां हर्तुः श्रीहरेः परमात्मनः । चरितं श्रोतुमिच्छामि नूतनं हि पदे पदे ॥२॥ सेवायामनिशं तस्य समवर्तन्त ये नराः । तेषां कः कश्च कां कां च सेवां चक्रेऽस्य तद्वद ॥३॥ वसन् दुर्गपुरे तत्र यद्यच्चरितमीश्वरः । चकार तत्तदखिलं वक्तुं चार्हसि मे मुने ! ॥४॥ सुव्रत उवाच-सेवां तदीयां सकलां प्रायशो वर्णिराड् नृप ! । मुकुन्दानन्दनामैव चकारानुसवं शुचिः ॥५॥ विशेषतोऽस्य स्नपनं पादसंवाहनं तथा । शयनास्तरणं चैष चकार जितमन्मथः ॥६॥ आजहारोदकं तस्मै शुचिर्ज्येष्ठा नृपस्वसा । जया तपस्विनी प्रीत्या प्रातः सायं च गालितम् ॥७॥
वर्णी नारायणानन्दस्तदीयाम्बुकमण्डलुम् । सोपपात्रं रक्षति स्म यथाकालं च तद्ददौ ॥८॥ कृष्णपूजनपात्राणां मज्जनं

માટે શ્રીહરિ દેશાંતરના રાજાઓ વગેરે અનેક પોતાના આશ્રિત જનોએ પોતાના ગામ, નગરમાં આવવા માટે ભક્તિપૂર્વક વારંવાર પ્રાર્થના કરાયેલા હોવા છતાં પણ ગઢપુરમાં સુખપૂર્વક નિવાસ કરતા હતા. (૨૮) શ્રીકૃષ્ણ પૂર્વે યશોદા અને વ્રજરાજ નંદજી તથા પોતાના ભક્ત ગોપો અને ગોપીઓની પ્રીતિ માટે ગોકુલમાં જેમ નિવાસ કરતા હતા તે પ્રકારે શ્રીહરિ જયા-લલિતા વગેરેનું પ્રિય કરવા માટે ગઢપુરમાં નિવાસ કરતા હતા. (૨૯) હે રાજન્ ! અત્યન્ત ભક્તિવાળા ઉત્તમ રાજામાં શ્રીહરિનો અતિશય પ્રેમ થયો. ભક્તાધીન શ્રીહરિ ઉત્તમ રાજાના ભવનને પોતાનું જ માનતા હતા. (૩૦)

જે ભક્ત દંભ રહિત શ્રીહરિને નિરંતર ભજે છે તે ભક્તને શ્રીહરિકૃષ્ણ પણ નિરંતર ભજે છે તેવી જ રીતે શ્રીહરિ, પોતાના અનન્ય ભક્તે અર્પણ કરેલું લગારેક વસ્તુ પણ મેરુની માફક અતિ મહાન માને છે. (૩૧)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે ઉત્તમાદિ ભક્ત્યુત્કર્ષનિરૂપણ નામા પ્રથમોઽધ્યાયઃ (૧)*

## અધ્યાય : ૨

## શ્રીહરિની સેવા વ્યવસ્થાના નિરૂપણમાં સેવા કરનારા મુકુન્દાનંદ વગેરેનાં નામો કહ્યાં છે.

**પ્રતાપસિંહ રાજા બોલ્યા :** હે સુવ્રત મુને ! મન અને શ્રવણ-ઈન્દ્રિયને પ્રિય શ્રીકૃષ્ણ ભગવાનનાં ચરિત્રો સાંભળવા છતાં પણ તેમના ચરિત્રના શ્રવણમાં સંતોષ સર્વ પ્રકારે થતો નથી. (૧) સ્વાશ્રિતોની આપત્તિઓને નાશ કરનારા પરમાત્માનું ચરિત્ર સાંભળવા ઈચ્છું છું કારણ કે પદપદમાં નવીન લાગે છે. (૨) હે મુને ! જે ભક્તજનો શ્રીહરિની સેવામાં રાત્રિદિવસ રહેતા હતા તેમાં કોણ કોણ ભક્ત કઈ કઈ સેવા કરતા હતા તે મને કહો. (૩) હે મુને ! સદા શ્રીહરિના નિવાસભૂત દુર્ગપત્તનમાં નિવાસ કરતા શ્રીહરિ જે જે ચરિત્ર કરતા હતા સમગ્ર તે તે ચરિત્રો તમે મને કહેવા માટે યોગ્ય છો. (૪)

**સુવ્રતમુનિ કહે છે :** હે રાજન્ ! પવિત્ર મુકુન્દાનંદ નામના વર્ણીરાજ ઘણું કરી શ્રીહરિની સમગ્ર સેવા સમય સમય પ્રમાણે કરતા હતા. (૫) જીત્યો છે કામ જેણે એવા મુકુન્દાનંદ વર્ણી શ્રીહરિને સ્નાન તથા ચરણારવિન્દ ચાંપવાની તથા શયન માટે પલંગ ઉપર ગાદલું પાથરવું વગેરે સેવા કરતા હતા. (૬) બાહ્ય અને આંતરિક પવિત્ર તપસ્વિની લલિતાની મોટી બહેન જયા પ્રાતઃકાલમાં અને સાયંકાલે ગાળેલું જળ શ્રીહરિ માટે ઉન્મત ગંગાથી લાવતાં હતાં. (૭)

નારાયણાનંદ વર્ણી પ્યાલા સહિત શ્રીહરિનું કમંડલ શ્રીહરિને પીવા યોગ્ય જલ ભરીને શ્રીહરિની સમીપમાં રાખતા હતા. પોતે રક્ષણ કરેલું જળ સમય પ્રમાણે આપતા હતા. (૮) હે રાજન્, ગોપાલાનંદ નામના વર્ણી શ્રીહરિની પૂજા માટે



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

प्रतिवासरम् । चकार वर्णी गोपालानन्दनामा हरेर्नृप ! ॥९॥ वासुदेवानन्दनामा वर्णी चन्दनघर्षणम् । चकार कृष्णपूजार्थं नियतं तस्य नैष्ठिकः ॥१०॥ नानाविधानि पुष्पाणि तुलसीं चानुवासरम् । उमाभयो नाथजिच्च भक्तावाजह्रतुर्वनात् ॥११॥ पूजोपहारान् सकलान् यथाकालं समाहितः । अखण्डानन्द आनीय तस्मै दत्ते स्म सत्वरम् ॥१२॥ अन्नं तस्मै च सघृतं तैलं दुग्धं सितादि च । ददौ विशोध्यानुदिनं ललिता नृपतेः स्वसा ॥१३॥ चकार तस्य पाञ्चाली पाकभूमेश्च लेपनम् । गृहसम्मार्जनं चक्रे नानी तस्योत्तमस्वसा ॥१४॥ नृपतेर्मातरौ तस्य सोमादेवीसुरप्रभे । गौरमृद्गोमयाभ्यां चक्राते गृहलेपनम् ॥१५॥ दयानन्दश्च गोविन्दानन्द एतौ हि वर्णिनौ । आजह्रतुर्वनात्तस्मै समिधश्च कुशाञ्छुभान् ॥१६॥ वाट्याः शाकांश्च पत्राणि तस्मै हरजिदुत्करौ । आजह्रतुश्च काष्ठानि मयजित् पाकसिद्धये ॥१७॥ रत्नजित् पाकपात्राणां चकार परिमञ्जनम् । हम्मीरजित्तदर्थं च मृत्तिकामानयच्छुभाम् ॥१८॥ उपाहरद्दन्तकाष्ठं तस्मै च गुरुमानजित् । शिवरामः पादुके च तस्यारक्षद्द्विजोत्तमः ॥१९॥ वाससां रक्षणं तस्य मयारामश्चकार च । यथाकालं ददाति स्म तानि तस्मै स शुद्धधीः ॥२०॥ प्रक्षालनं तद्वस्त्राणां प्रतिवासरमादरात् । जयानन्दाभिधश्चक्रे नैष्ठिको ब्रह्मचर्यवान् ॥२१॥ द्रव्यादानप्रदाने च लब्धाख्यो हरजित्तथा । नृपामात्यावुभावेतौ चक्रतुस्तस्य सन्मती ॥२२॥ गृहस्थानां तु सर्वेषां स्वधर्मस्थापनादिषु । हेमन्तसिंहो ववृते हरिशुश्रूषणे रतः ॥२३॥ उत्तमोऽपि स्वयं तस्य निर्मानो दासवत्सदा । यथावकाशं सकलामपि सेवां चकार च ॥२४॥ सर्वेषां सेवकानां च तत्तत्सेवाप्रवर्तनम् । रामदासो यथाकालं चक्रे भक्ताग्रणीर्हरेः ॥२५॥

---

વાસણ માંજતા; એ સેવા તેઓ હંમેશા કરતા. (૯) વાસુદેવાનંદ નામના નૈષ્ઠિક બ્રહ્મચારી શ્રીહરિને શ્રીકૃષ્ણપૂજા માટે ચંદન ઘસવાની સેવા અર્પતા હતા. (૧૦) ઉમાભાઈ અને નાથજીત્ આ બે ભક્તો વિવિધ પ્રકારનાં સુગંધી પાન-પુષ્પો બગીચામાંથી શ્રીકૃષ્ણની પૂજા માટે લાવતા. (૧૧) અખંડાનંદ વર્ણી સમગ્ર પૂજાના, અગાઉ વર્ણવેલા ભક્તોએ લાવેલા ઉપહારો-પદાર્થો, વ્યવસ્થિત રાખીને, સાવધાનતા પૂર્વક, શ્રીહરિને પૂજા સમયે તત્કાલ લાવી આપતા. (૧૨) અભયરાજાની બહેન લલિતા ઘી યુક્ત ઘઉંનો લોટ, દાળ, ચોખા,તેલ, દૂધ, સાકર, શાક, ફળો વગેરે શુદ્ધ કરી દરરોજ શ્રીહરિને રસોઈ માટે આપતાં. (૧૩) ઉત્તમ રાજાની બહેન પાંચાલી શ્રીહરિની રસોઈ કરવાની જગ્યાએ લીંપણકામની સેવા કરતી. અને તેમની નાની બહેન શ્રીહરિના નિવાસસ્થાનમાં વાળીને સાફસૂફ કરવાની સેવા કરતી. (૧૪) ઉત્તમ રાજાની બન્ને માતાઓ-સોમાદેવી અને સુરપ્રભા ધોળી માટીને છાણમાં ભેળવી શ્રીહરિના નિવાસસ્થાનમાં લીંપણ કરતી, અને ભીંતોએ ધોળ કરતી. (૧૫) આનંદાનંદ વર્ણી તથા ગોવિંદાનંદ વર્ણી શ્રીહરિને માટે હોમ કરવા માટે, ખાખરા વગેરેની સમિધાઓ, અને દર્ભ વનમાંથી લાવી આપતા. (૧૬) હરજી ભક્ત તથા ઉત્કર (ઉકા ખાચર) નામના ભક્ત શ્રીહરિ માટે વાડીમાંથી રીંગણાં વગેરે શાકભાજી તથા પત્રાવળા બનાવવા માટે કેળનાં તથા ખાખરા વગેરેના પાન લાવતા. મયારામ ભક્ત રસોઈ માટે લાકડાં લાવી આપતા. (૧૭) રતનજી ભક્ત રસોઈનાં વાસણો માંજીને શુદ્ધ કરતા. હમીરજી ભક્ત શ્રીહરિને હાથ ધોવા માટે માટી લાવી આપતા.(૧૮) મોટા માનજીત ભક્ત શ્રીહરિને માટે બાવળ વગેરેનાં દાતણ લાવી આપતા. શ્રેષ્ઠ બ્રાહ્મણ શિવરામ ભટ્ટ શ્રીહરિની પાદુકાનું ધ્યાન રાખતા. (૧૯) મયારામ ભટ્ટ શ્રીહરિના વસ્ત્રોનું રક્ષણ કરતા હતા. શુદ્ધ બુદ્ધિવાળા મયારામભટ્ટ સમય સમય પ્રમાણે શ્રીહરિને વસ્ત્રો આપતા હતા. (૨૦) જયાનન્દ નામના નૈષ્ઠિક બ્રહ્મચારી શ્રીહરિનાં વસ્ત્રો દરરોજ શ્રદ્ધાપૂર્વક પ્રક્ષાલન કરતા હતા. (૨૧) લાધા ભકત અને હરજી ભક્ત શ્રેષ્ઠ બુદ્ધિવાળા ઉત્તમ રાજાના મંત્રીઓ શ્રીહરિને માટે પૈસા લેવાદેવાનો વ્યવહાર કરતા હતા. (૨૨) શ્રીહરિની સેવાપરાયણ હેમન્તસિંહ રાજા (જુનાગઢના જીણાભાઈ) સમગ્ર ગૃહસ્થ ભક્તોને પોતાના ધર્મમાં સ્થાપન કરવા વગેરેમાં વર્તતા હતા. (૨૩) સ્વયં ઉત્તમ રાજા પણ દાસની માફક માન રહિત થઈને અવકાશ પ્રમાણે શ્રીહરિની સમગ્ર સેવા કરતા હતા. (૨૪) શ્રીહરિના ભક્તોમાં અગ્રેસર રામદાસ નામના સાધુ શ્રીહરિના સર્વ સેવકોને તે તે સેવામાં પ્રવર્તાવવાનું કાર્ય સમયાનુસાર કરતા હતા. (૨૫)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

इतिहासपुराणानि धर्मशास्त्रं च तत्पुरः । पौराणिको ह्यचकथद्धुजेरन्ते प्रयागजित् ॥२६॥ निशि भागवतं गीतां कार्ष्णीं नामसहस्रकम् । विष्णोश्च वासुदेवीयं नित्यानन्दस्त्ववाचयत् ॥२७॥ शुकानन्दोऽकरोत् पत्रलेखं पुस्तकरक्षणम् । हरे रतश्च सेवायां सदा सहचरो मुनिः ॥२८॥ हरिणा लेखितान्यष्ट सच्छास्त्राणि तदग्रतःशतानन्दो महाबुद्धिः शोधयामास चाञ्जसा ॥२९॥ य इदं विदधे प्रीत्या हरिलीलोपबृंहितम् । सत्सङ्गिजीवनं रम्यं जीवातुं हरिसेविनाम् ॥३०॥ सर्वेषामपि साधूनां धर्मसंस्थापनादिषु। गोपालानन्द आसीच्च सेवमानो हरिं सदा ॥३१॥ मुक्तानन्दस्तथा ब्रह्मानन्द एतौ महामती । अधीतशास्त्रौ कु शलौ गायने च कवी उभौ ॥३२॥ छन्दःप्रबन्धान्विविधान्प्राकृ तांश्चक्रतुश्च तौ । तस्यैव प्रीतये राजंस्तन्माहात्म्यप्रकाशकान् ॥३३॥ प्रेमानन्दो गानकलापटुर्वाद्ये चतुर्विधे । निपुणः प्राकृतांश्चक्रे प्रबन्धांस्तद्गुणाश्रयान् ॥३४॥ चकार निष्कुलानन्दः प्रबन्धान्प्राकृतान्कविः। ध्यानानन्दस्तथाऽन्ये च भक्ता : सुन्दरजिन्मुखाः ॥३५॥ दीनानाथो व्यरचयत्संस्कृतान्यस्य सत्पतेः। तुष्ट्यै विचित्रवृत्तानि श्रीहरेरष्टकानि च ॥३६॥ गोविन्दानन्दनामा चाभेदानन्दश्च बुद्धिमान् । गुणातीतानन्दऋषिः शिवानन्दश्च सन्मतिः ॥३७॥ प्रज्ञानन्दश्च पञ्चैते हरेरग्रत आदरात् । कृष्णकीर्तनपद्यानि कीर्तयन्ति स्म भूपते ! ॥३८॥ महानुभावानन्दश्चात्मानन्दः कृशविग्रहः। स्वयम्प्रकाशानन्दश्च त्रयः कार्यविशारदाः ॥३९॥ तदीक्षाया उपेतानां भक्तानां सर्वशो नृणाम् । मुनीनां चाचरन्नेते ह्यातिथ्यादि यथोचितम् ॥४०॥ निरञ्जनानन्दऋषिर्व्यापकानन्द आत्मवित् । सुखानन्दश्च परमचैतन्यानन्दनामकः ॥४१॥ गोविन्दानन्दनामान्यः कृपानन्दस्तथात्मदृक् । चैतन्यानन्दनामैते ऋषयः सप्त सद्धियः ॥४२॥ देशान्तराभ्युपेतानां जनानामग्रतोऽन्वहम् । विदधुर्भगवद्वार्तास्तत्प्रीत्यै परमादरात् ॥४३॥

પુરાણ આદિ સમગ્ર શાસ્ત્રવિશારદ પ્રયાગજીત શ્રીહરિની ભોજન ક્રિયા પછી મહાભારત અને શ્રીમદ્‌ભાગવતાદિ અને ધર્મશાસ્ત્રો વાંચતા હતા. (૨૬) નિત્યાનન્દ નામના મુનીંદ્ર તો શ્રીમદ્‌ભાગવત-શ્રીમદ્‌ભગવદ્ ગીતા - વિષ્ણુ સહસ્રનામસ્તોત્ર અને શ્રીવાસુદેવ માહાત્મ્યની રાત્રિના સમયે શ્રીહરિની આગળ કથા કરતા હતા. (૨૭) શ્રીહરિની સેવામાં હંમેશા પ્રીતિવાળા શ્રીહરિની સાથે રહેનારા શુકાનન્દમુનિ શ્રીહરિની આજ્ઞાથી દેશાન્તરમાં પત્ર લખવાની તથા પુસ્તકોનું રક્ષણ કરવાની સેવા સમય સમય પ્રમાણે કરતા હતા. (૨૮) મહાબુદ્ધિશાળી શતાનન્દ મુનિ શ્રીહરિએ લખાવેલાં વેદ આદિ આઠ શાસ્ત્રો શ્રીહરિની આગળ યથાર્થપણે શોધતા હતા. (૨૯) જે શતાનન્દ મુનિ શ્રીહરિની લીલાઓથી વૃદ્ધિ પામેલા-શ્રીહરિકૃષ્ણ ભગવાનના ઉપાસકોને જીવનની ઔષધિરૂપ-રમણીય આ સત્સંગિજીવન [હાલમાં મેં (સુવ્રતમુનિએ) તમારી આગળ કહેવાતાં સત્સંગિજીવન નામનાં] ગ્રંથને કરતા હતા. (૩૦) શ્રીનારાયણમુનિની હંમેશા સેવાપરાયણ શ્રી ગોપાલાનન્દ મુનીંદ્ર, સર્વ સાધુઓ તથા સર્વ-વર્ણીઓના ધર્મ-સંસ્થાપનાદિમાં વર્તતા હતા. (૩૧) મહાબુદ્ધિશાળી જેમણે શાસ્ત્રોનું અધ્યયન કર્યું છે અને ગાયનકલામાં પ્રવીણ કાવ્યકર્તાઓ મુક્તાનન્દ તથા બ્રહ્માનન્દ બન્ને મુનિશ્રેષ્ઠો (૩૨) હે રાજન્ ! શ્રીહરિના માહાત્મ્યનું પ્રકાશ કરનાર વિવિધ દેશોની ભાષાઓમાં અનેક પ્રકારના છન્દ-પ્રબન્ધોને શ્રીહરિની પ્રસન્નતા માટે કરતા હતા. (૩૩) ગાયનકલાની યુક્તિઓમાં પ્રવીણ, ચાર પ્રકારનાં વાદ્યોમાં નિષ્ણાત પ્રેમાનન્દ મુનિ શ્રીહરિનાં ચરિત્રોના આશ્રયવાળાં ભાષામાં રચેલાં પદ્યોના ગ્રંથો કરતા હતા.(૩૪) પ્રાકૃત ગ્રંથ રચવામાં કુશળ નિષ્કુળાનન્દ મુનિ પ્રાકૃત ગ્રંથો કરતા હતા; દયાનન્દમુનિ અને સુંદરજી વગેરે ભક્તો પ્રાકૃત ગ્રંથો કરતા હતા. (૩૫) દીનાનાથ ભટ્ટ નામના પંડિત વિપ્ર સત્પુરુષોના સ્વામી શ્રીહરિની પ્રસન્નતા માટે સંસ્કૃત ભાષામાં નાના પ્રકારના વૃત્તવાળાં અષ્ટકો રચતા હતા. (૩૬) બુદ્ધિમાન ગોવિંદાનન્દ મુનિ-અભેદાનન્દ-ગુણાતીતાનન્દ મુનિ-શિવાનન્દમુનિ અને પ્રજ્ઞાનન્દમુનિ આ પાંચ સાધુઓ શ્રીનારાયણમુનિ આગળ મુક્તાનન્દ આદિ કવિઓએ રચેલાં શ્રીકૃષ્ણનાં ચરિત્રો ને કીર્તનો શ્રદ્ધાપૂર્વક શ્રીહરિની આજ્ઞાથી ગાતા હતા. (૩૭-૩૮) મહાનુભાવાનન્દ-કૃશ શરીરવાળા આત્માનન્દ-સ્વયંપ્રકાશાનન્દ- આ ત્રણ મુનિઓ કાર્ય કરવામાં પ્રવીણ, શ્રીહરિનાં દર્શન કરવા દેશાન્તરથી આવેલા ભક્તો તથા મુનીઓને યથાયોગ્ય આતિથ્ય આદિ સત્કાર કરતા હતા. (૩૯-૪૦) આત્મદર્શી નિરંજનાનન્દ ઋષિ- વ્યાપકાનન્દમુનિ, સુખાનન્દમુનિ, પરમ ચૈતન્યાનન્દ મુનિ, બીજા ગોવિદાનન્દમુનિ તથા આત્મદર્શી કૃપાનન્દ મુનિ-ચૈતન્યાનન્દ સાધુ; સારી બુદ્ધિવાળા આ સાત મુનિઓ દેશાન્તરથી શ્રીહરિનાં દર્શન માટે આવેલા જે હરિભક્ત જનો તેમની આગળ શ્રીહરિની પ્રસન્નતા માટે શ્રદ્ધાપૂર્વક ભગવાનની વાર્તાઓ કરતા હતા. (૪૧-૪૨-૪૩)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**आनन्दानन्द इशस्य भक्तिरीतिं प्रदर्शयन् । दृढान्यकारयत्कृष्णमन्दिराणि महामतिः ॥४४॥ देवरामस्तथा नारायणो हीरश्च शिल्पिराट् । आधारानन्द इत्येते चित्रप्रतिकृतीर्व्यधुः ॥४५॥ देशान्तरागताभ्यश्च स्त्रीभ्यो वासस्थलादि च । माहेश्वरो ददौ दामोदरदासस्तथोचितम् ॥४६॥ तासामग्रे कृष्णवार्ता रमा चक्रे तपस्विनी । स्वधर्मज्ञानवैराग्यसम्पन्ना बालयोगिनी ॥४७॥ कृष्णदासो राजदास इत्युभौ नापितोत्तमौ । दीपिकाधारणं तस्य पुरतो निशि चक्रतुः ॥४८॥ करिमो द्वारपालत्वं वृद्धस्तस्याकरोत्प्रभोः । तद्दिदृक्षागतान्भक्तान्मुहुस्तस्मै निवेदयन् ॥४९॥ सोमः सूरश्च भृगुजिन्मानसिंहश्च केसरी । वीरोऽलयो लक्षजाल्मौ रवजिन्मानजित्क्रमः ॥५०॥ इत्याद्याः क्षत्रियाः शूरास्तद्भक्ताः शस्त्रपाणयः। अन्ववर्तन्त तं नित्यं सर्वत्र द्वे शते नृप ! ॥५१॥ संसेवनेन हि हरेर्निजमानुषत्वसाफल्यमेव हृदयेषु विदन्त एते। इत्थं तदीयमनिशं विदधुः प्रहृष्टा दास्यं यदस्ति ननु दुर्लभमेव मुक्तेः ॥५२॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे हरिसेवनव्यवस्थानिरूपणनामा द्वितीयोऽध्यायः ॥२॥

सुव्रत उवाच-**अथ राजोत्तमो धीमान् पित्रुद्देशेन वाडवान् । साधूंश्च भोजयामास प्रतिमासं सहस्रशः ॥१॥ संवत्सरे व्यतीतेऽसौ वासितस्य स्ववेश्मनि । प्रीत्यै हरेः स्वपितृवदचिकीर्षन्महोत्सवान् ॥२॥ जयाललितयोः पार्श्वमेत्य ते मानयन्स च । उवाच विनयानम्रः कार्याकार्यविचक्षणः ॥३॥**

---

વિશાળ બુદ્ધિશાળી આનન્દાનન્દમુનિ શ્રીહરિની ભક્તિની રીત બતાવતા થકા દૃઢ શ્રીકૃષ્ણનાં મન્દિરો કરાવતા હતા. (૪૪) ચિત્ર આદિ કલાઓમાં શ્રેષ્ઠ દેવરામ તથા નારાયણ તથા હીરજી આ ત્રણ ભૂજનગરના સુથાર ભક્તો તથા આધારાનંદ મુનિ આ ચાર જણ શ્રીકૃષ્ણની ચિત્રપ્રતિમાઓ અને ધાતુઓની પ્રતિમાઓ કરતા હતા. (૪૫) વરસ્થલી(વંથલી)ના રહેવાસી માહેશ્વર વિપ્ર દેશાન્તરથી શ્રીહરિનાં દર્શન માટે આવેલાં સધવા અને વિધવા સ્ત્રીઓને શ્રીહરિની આજ્ઞાથી નિવાસસ્થાન વગેરે આપતા હતા. તે જ પ્રકારે શ્રીનગરના દામોદરદાસ વૈશ્ય ભક્ત પણ સ્ત્રીઓને નિવાસસ્થાન વગેરે આપતા હતા. (૪૬) તીવ્ર તપમાં નિષ્ઠાવાળી સ્વધર્મ, જ્ઞાન, વૈરાગ્યથી સમ્પન્ન ભક્તિયુક્ત બાલયોગિની રમા દેશાંતરથી આવેલી ભગવાનની ભક્ત સ્ત્રીઓની આગળ કૃષ્ણની વાર્તા કરતાં હતાં. (૪૭) કૃષ્ણદાસ અને રાજદાસ આ બન્ને ઉત્તમ, નાપિતો (વાળંદો)રાત્રિમાં શ્રીહરિની આગળ દીપિકા ધારણ કરતા હતા. (૪૮) સરધારપુરના વૃદ્ધ કરીમ ભક્ત શ્રીહરિનાં દર્શન માટે આવેલા ભક્તોનું વારંવાર નિવેદન કરતા સતા શ્રીહરિનું દ્વારપાલપણું કરતા હતા. (૪૯) હે રાજન્ ! સોમલા ખાચર, સુરા ખાચર, માનસિંહ, કેસરીસિંહ, વીરસિંહ, અલયો અને લાખો, જાલમસિંહ, રવજીત, માનજીત, કમો ભીમો વગેરે શૂરવીરો હાથમાં ધારણ કરેલાં શસ્ત્રોવાળા બસો ક્ષત્રિયો શ્રીહરિના ભક્તો સર્વ સ્થાનોમાં શ્રીહરિની સાથે રહેતા હતા. (૫૦-૫૧)

આ પ્રમાણે નારાયણ મુનિની પરિચર્યાથી પોતપોતાના મનમાં પોતાના મનુષ્યપણાની સફળતા જાણતા સતા જ પૂર્વે કહેલા મુકુંદાનંદ આદિ ભક્તો આનંદપૂર્વક નિરંતર દાસભાવથી સેવા કરતા હતા; જે દાસપણું મુક્તિથી પણ દુર્લભ છે જ. (૫૨) *ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીયપ્રકરણે હરિસેવનવ્યવસ્થાનિરૂપણ નામા દ્વિતીયોऽધ્યાયઃ (૨)*

## અધ્યાય : ૩

## શ્રીહરિએ ઉત્સવોમાં વ્યવસ્થા પ્રમાણે જયા અને લલિતાનું મુખ્યપણું સ્થાપન કર્યું તે કહ્યું છે.

**સુવ્રત મુનિ બોલ્યા :** હે રાજન્ ! પછી બુદ્ધિમાન ઉત્તમ રાજા પોતાના પિતાને ઉદ્દેશીને દરેક માસે હજારો બ્રાહ્મણો અને સાધુઓને જમાડતા હતા. (૧) એક વર્ષ વીતી ગયું ત્યારે ઉત્તમ રાજા પોતાના ગૃહમાં નિવાસ કરનારા શ્રીહરિની પ્રીતિ માટે પોતાના પિતાની માફક મહોત્સવો કરવા ઈચ્છતા હતા. (૨) કાર્ય અને અકાર્યમાં પ્રવીણ ઉત્તમ રાજા પોતાની બહેનો જયા અને લલિતાની સમીપમાં જઈને બન્ને બહેનોને સન્માન કરતા વિનયથી નમ્ર થઈને બોલ્યા. (૩)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

उत्तम उवाच-युवां भगिन्यौ ! निपुणे हरेर्भक्तौ च लौकिके । व्यवहारेऽपि भवथस्ततः प्राप्तोऽस्म्यहं हि वाम् ॥४॥ हरिः स्वाम्यत्र कृपया स्थितोऽस्त्यस्मासु पत्तने । तस्यैव च प्रसादान्नः सम्पदेषाऽस्ति लम्भिता ॥५॥ अतस्तदर्थमेवैषा व्ययं नेया न चान्यथा । पित्रापि नः कृतं हीत्थं तथाहं कर्तुमुत्सहे ॥६॥ जन्माष्टमीमुखान्सर्वानुत्सवान्वार्षिकानहम् । पितृवत्कर्तुमिच्छामि यथाकालं पृथक् पृथक् ॥७॥ साहाय्यं तत्र मे कार्यं भवतीभ्यां महाव्रते ! । उह्याऽस्त्येषाऽवश्यमेव युवाभ्यामेव धर्मधूः ॥८॥ सम्पदेषा च दासाद्या भवतीसान्मया कृताः । आहारयिष्याम्यखिलान् पदार्थान्वामपेक्षितान् ॥९॥ पाकक्रियाव्यवस्थात्र भवतीभ्यां यथोचितम् । कार्या देशान्तरायातस्त्रीणां सम्भावना तथा ॥१०॥ सुव्रत उवाच-इत्युक्ते ते तु संहृष्टे कृष्णसम्प्रीणनोत्सुके । ऊचतुर्भ्रातरं राजन्प्रशंसन्त्यौ महामती ॥११॥ जयाललिते ऊचतुः-सम्यगेतत्त्वया भ्रातर्हृदि व्यवसितं निजे । विधेहि त्वं यथावित्तं हरिप्रीत्यै महोत्सवान् ॥१२॥ पित्राश्रिते हि सन्मार्गे स्थेयं पुत्रेण धीमता । कृपापात्रं भगवतस्त्वं तु तद्वेत्सि सन्मतिः ॥१३॥ त्वमानयस्व सम्भारानावां पाकादिकाः क्रियाः । यथावत्कारयिष्यावस्तच्चिन्तां त्यज सर्वथा ॥१४॥ सुव्रत उवाच – स्वसृभ्यामेवमुक्तोऽसौ प्रहृष्टो हरिमेत्य तत् । कथयामास नृपतिः स्वचिकीर्षितमानतः ॥१५॥ तमाह भगवान् प्रीतो धन्योऽसि नृपते ! यतः । भक्तावेव हि कृष्णस्य मतिस्ते दृढतां गता ॥१६॥ तपस्विन्यौ भगिन्यौ ते कार्येऽस्मिन् स्तो विचक्षणे । तदुक्तरीत्याऽतः सर्वान्कुरु कृष्णमहोत्सवान् ॥१७॥ तत्र स्वसारौ मुख्ये ते साम्प्रतं भवता कृते। उचितं तत्कृतं नूनं तदर्हे स्तो यतो हि ते ॥१८॥ तथापि मुख्यतैकस्मिन्नुत्सवे नोचिता द्वयोः । एकस्मिन्मुख्यतैकस्या भवेदिष्टफलप्रदा ॥१९॥

---

**ઉત્તમ રાજા બોલ્યા** : હે બહેનો ! તમો શ્રીહરિની ભક્તિમાં અને લૌકિક વ્યવહારમાં પણ નિપુણ છો માટે હું તમારી પાસે આવ્યો છું. (૪) સકલ ઐશ્વર્યસંપન્ન શ્રીહરિ આપણી ઉપર કૃપા કરીને આ ગઢપુરમાં રહેલા છે. આપણી સંપત્તિ શ્રીહરિના અનુગ્રહથી જ પ્રાપ્ત થઈ છે. (૫) માટે આ સંપત્તિ શ્રીહરિની પ્રસન્નતા માટે જ વાપરવી; બીજા પ્રકારે વાપરવી નહિ. આપણા પિતાએ પણ મારા આ કહ્યા પ્રમાણે જ કરેલું છે. તે પ્રકારે હું પણ કરવા ઈચ્છું છું. (૬) હું જન્માષ્ટમી વગેરે સર્વ વાર્ષિક ઉત્સવો સમય સમય પ્રમાણે જુદા જુદા, પિતાની માફક કરવા ઈચ્છું છું. (૭) હે મહાવ્રતે ! તમો બન્ને તે ઉત્સવોમાં મારી સહાય કરજો. તમારે ધર્મ-કાર્યનો ભાર અવશ્ય વહન કરવાનો છે જ. (૮) મારી આ સમગ્ર લક્ષ્મી અને સેવકો વગેરે તમારે આધીન કરેલા છે. તમારે બન્નેને ઉત્સવ - કાર્યમાં જોઈતી વસ્તુઓ લાવી આપીશ. (૯) તમો બન્નેએ આ ઉત્સવોમાં પાક કરવાની યથાયોગ્ય વ્યવસ્થા કરવી તથા દેશાંતરથી શ્રીહરિનાં દર્શન માટે આવેલી સ્ત્રીઓની સંભાવના કરવી. (૧૦)

**સુવ્રત મુનિ કહે છે** : હે રાજન્ ! આ પ્રમાણે પોતાના ભાઈએ કહેલા, શ્રીકૃષ્ણને પ્રસન્ન કરવામાં ઉત્સાહ યુક્ત મહાબુદ્ધિશાળી જયા અને લલિતા ઉત્તમ રાજાની પ્રશંસા કરી બોલતા હતા : (૧૧) હે ભાઈ !, તમોએ પોતાના મનમાં સારો નિશ્ચય કર્યો છે. તમો શ્રીહરિની પ્રીતિ માટે પોતાના ધનને અનુસરીને મહાઉત્સવો કરો. (૧૨) બુદ્ધિશાળી પુત્રે પિતાએ આચરણ કરેલા સન્માર્ગમાં રહેવું જ જોઈએ. શ્રીનારાયણ મુનિના કૃપાપાત્ર શુદ્ધ બુદ્ધિવાળા તમો તો બધું જાણો છો. (૧૩) તો ઉત્સવોમાં ઉપયોગી સામગ્રીઓ લાવો; અમો બન્ને પાક વગેરે ક્રિયાઓ યથાયોગ્ય કરાવીશું, તેની ચિંતા કરશો નહિ. (૧૪) હે રાજન્, આ પ્રમાણે પોતાની જયા અને લલિતા બન્ને બહેનોએ કહેવાયેલા ઉત્તમ રાજા પ્રસન્ન થઈને શ્રીહરિની સમીપમાં જઈ પ્રણામ કરી પોતે કરવા ઈચ્છેલું શ્રીહરિને કહેતા હતા. (૧૫) રાજાનું આવું ઉત્સવ સંબંધી વાક્ય સાંભળીને પ્રસન્ન થયેલા શ્રીહરિ તે ઉત્તમ રાજાને આ પ્રમાણે કહેવા લાગ્યા : હે રાજન્ ! તમે ધન્ય છો, કારણ કે તમારી બુદ્ધિ શ્રીકૃષ્ણની ભક્તિમાં જ સ્થિરતાને પામેલી છે. (૧૬) પ્રશસ્ત તપમાં નિષ્ઠાવાળી તમારી બન્ને બહેનો આ ઉત્સવ કાર્યમાં વિચક્ષણ છે માટે તેમના કહ્યા પ્રમાણે સર્વ ઉત્સવો કરો. (૧૭) તમોએ હાલમાં જયા અને લલિતા બંને બહેનોને મુખ્ય કરેલાં છે તે યોગ્ય જ નક્કી કર્યું છે કારણ કે બન્ને ઉત્સવને યોગ્ય છે જ. (૧૮) તો પણ એક ઉત્સવમાં બેની પ્રધાનતા યોગ્ય નથી. એક ઉત્સવમાં એકની પ્રધાનતા ઈચ્છિત ફલ આપનારી થાય. (૧૯)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

इत्युक्त्वा तं ततस्ते द्वे आहूयाऽऽह हरिः स्वयम् । शृणुतं मद्वचो भद्रे ! श्रुत्वा तत्कुरुतं तथा ॥२०॥ उत्सवाः शुक्लपक्षीया ये स्युः कृष्णस्य तेषु तु । जये ! तवैव मुख्यत्वं पाकादीनां विधापने ॥२१॥ कृष्णपक्षीयोत्सवेषु ललिते ! तव मुख्यता । युवाभ्यां ते विधातव्या देशकालानुसारतः ॥२२॥ भवत्योः कृष्णसेवायामुत्साहो वर्तते महान् । देवीनामपि दुष्प्रापः सफलः स भविष्यति ॥२३॥ इत्युक्ते ते भगवता शीर्ष्णाऽऽदाय च तद्वचः । प्रणम्य तं निजस्थानं जग्मतुर्जगतीपते ! ॥२४॥ कृष्णपूजोत्सवं चक्रे सर्वास्वेकादशीष्वथ । उत्तमः सर्वशः साधून्प्रतिद्वादश्यभोजयत् ॥२५॥ जन्माष्टम्यां महान्तं हरिरखिलगुरुः कारयामास तेन क्षोणीपालेन राजन्महमखिलनृपैर्दुष्करं मुख्यकल्पम् । मुख्या पाकक्रियादौ प्रभुमिह ललिता सेवयाऽतोषयत्तं नानादेशीयभक्तैः पृथुमहसुखितैर्वर्ण्यमानातिभक्तिः॥२६॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे उत्सवेषु जयाललितयोर्मुख्यत्वस्थापननामा तृतीयोऽध्यायः ॥३॥

सुव्रत उवाच-पुरे नृपैवं सकलानचीकरत्कृष्णोत्सवानुत्तमसद्मनि प्रभुः । वदामि तत्रैकतमं समासतस्ततोऽनुमेया इतरे तथैव हि ॥१॥ इषाख्यमासे विजयादशम्यां स सर्वधारिण्यथ वत्सरेऽस्य । मनोरथं पूरयितुं नृपस्य महोत्सवं रम्यमचीकरच्च ॥२॥ मुख्याऽभवत्तत्र जयोत्तमस्य स्वसैव पाकादिविधापने च । सम्भावने सर्वश एव नानादेशागतानां वनिताव्रजानाम् ॥३॥

---

હે રાજન્, સ્વયં શ્રી નારાયણ મુનિએ આ પ્રમાણે ઉત્તમ રાજાને કહીને પછી જયા અને લલિતાને બોલાવડાવીને કહ્યું : હે ભદ્રે ! મારું વચન સાંભળો અને પછી તેમ જ મારા કહ્યા પ્રમાણે તમો બંને કરો. (૨૦)

હે જયા ! પ્રત્યેક માસના શુક્લ પક્ષના જે શ્રીકૃષ્ણના ઉત્સવો હોય તે ઉત્સવોમાં તો પાક વગેરે કરાવવામાં તમારું જ મુખ્યપણું થાઓ. (૨૧) હે લલિતા ! કૃષ્ણ પક્ષના ઉત્સવોમાં તમારી પ્રધાનતા થાઓ. તમો બન્નેએ પોતપોતાના પક્ષના ઉત્સવો દેશકાલને અનુસરીને કરવા. (૨૨) તમારા બન્નેનો શ્રીકૃષ્ણની સેવામાં અતિશય ઉત્સાહ વર્તે છે. દેવાંગનાને પણ દુર્લભ ઉત્સાહ સફલ થશે. (૨૩) હે રાજન્ ! આ પ્રમાણે શ્રીહરિએ કહેવાયેલી જયા અને લલિતા શ્રીહરિનું વચન સાંભળી મસ્તકથી અંગીકાર કરી શ્રીહરિને પ્રણામ કરી પોતપોતાના નિવાસસ્થાનમાં ગયાં. (૨૪) પછી ઉત્તમ રાજા સર્વ એકાદશીઓમાં શ્રીકૃષ્ણના પૂજનનો ઉત્સવ કરતા હતા. દરેક દ્વાદશીઓમાં સાધુઓને જમાડતા હતા. (૨૫)

હે રાજન્ ! સર્વ જનોને ધર્માદિકનો ઉપદેશ કરનારા શ્રીહરિ સંવત્ ૧૮૭૨ માં શ્રાવણ વદી અષ્ટમીને દિવસે ઉત્તમ રાજા પાસે સમગ્ર રાજાઓએ દુષ્કર, મુખ્ય વિધિને અનુસરી મહોત્સવ કરાવતા હતા. આ જન્માષ્ટમીના ઉત્સવમાં પાક-ક્રિયા વગેરેમાં પ્રધાનભૂત, તેમજ મહોત્સવમાં સુખી થયેલા; નાના પ્રકારના દેશથી આવેલા ભક્તજનોએ વર્ણન કરાયેલી છે અતિશય ભક્તિ જેમની એવાં લલિતા શ્રીહરિને સેવાથી અતિ પ્રસન્ન કરતાં હતાં. (૨૬)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે ઉત્સવેષુ જયાલલિતયો મુખ્યત્વસ્થાપન નામા તૃતીયોऽધ્યાયઃ (૩)*

### અધ્યાય : ૪

## ઉત્તમ રાજાએ અન્નકૂટનો ઉત્સવ કરવા માટે શ્રીહરિની આજ્ઞા પ્રીતિપૂર્વક ગ્રહણ કરી, તે વિગતે કહ્યું છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! શ્રીહરિ આ પ્રમાણે ગઢડામાં ઉત્તમ રાજાના ભવનમાં શ્રીકૃષ્ણના સર્વે ઉત્સવો ઉત્તમ રાજા પાસે કરાવતા હતા. તે સર્વમાંથી એક અન્નકૂટનો ઉત્સવ સંક્ષેપમાં કહું છું. એક ઉત્સવના વર્ણન ઉપરથી, બીજા ઉત્સવો કેવી રીતે થતાં, તેનું અનુમાન કરી લેવું. (૧) શ્રીહરિ સર્વધારી નામના સંવત્સરમાં સંવત્ ૧૮૭૩ના આસો સુદી દશમને દિવસે ઉત્તમ રાજાનો મનોરથ પૂર્ણ કરવા રમણીય મહોત્સવ કરાવતા હતા. (૨) વિજયાદશમીના ઉત્સવમાં પકવાન વગેરે કરાવવામાં અને દેશોદેશથી આવેલા સર્વ સ્ત્રીસમૂહના સત્કારમાં મુખ્યત્વે ઉત્તમ રાજાની બહેન જયા હતાં. (૩)

देशान्तरेभ्यो बहवः समीयुस्तत्रोत्सवे भक्तजनाः सहर्षम् । वर्णिव्रजास्त्यागिगणा नराश्च नार्यश्च नारायणदर्शनोत्काः ॥४॥ ते चन्दनेनाथ सुगन्धपुष्पैर्वस्त्रैरनर्घ्यैश्च विभूषणैश्च । तं पूजयामासुरुदारभावाः श्रीवासुदेवं नरमूर्तिमीशम् ॥५॥ स त्यागिनां तत्र नृपश्च भक्त्या वृन्दानि पक्वान्नविचित्रशाकैः । सम्प्रीणयामास जनांस्तथान्यान् यथोचितं सर्वश एव सुज्ञः ॥६॥ एकान्तिकं धर्ममथानुशास्य तेभ्यः सुखं स्वस्य दिनानि सप्त । दत्त्वा हरिस्तान् परितोष्य भक्तान् प्रस्थापयामास पुनः स्वदेशान् ॥७॥ मार्गे प्रशंसन्त ऋषिप्रवीरास्तथा गृहस्थाः पुरुषाश्च नार्यः । बुद्धिं नृपस्यास्य शुभं स्वभावं हरौ च भक्तिं प्रययुः स्वदेशान् ॥८॥ व्रजत्सु तेषूत्तम आदरेण विप्रान्प्रभाशङ्करदाजिमुख्यान् । विप्राश्च गङ्गाप्रमुखाः स्वगेहे न्यवासयत्कर्तुमिहान्नकूटम् ॥९॥ पाकक्रियादौ निपुणाश्च ते ताः प्रीत्यै हरेतस्य च भक्तिभाजाम् । तत्रावसंस्तत्परिचर्ययैव स्वजन्मसाफल्यविदो नरेश ! ॥१०॥ विसर्जयित्वाथ स तत्र सर्वशः समागतान्भक्तजनान्निजाङ्गणे । वितर्दिकायां परिमेयपार्षदैर्वृतो हरिः पीठ उपाविशत्स्वके ॥११॥ तस्मिन् दिने च ललिताऽभयराजकन्या भक्तौ हरेश्च निपुणा व्यवहारकार्ये। प्रष्टुं जयां किमपि सा वयसा वरिष्ठां सम्मानयन्त्युपययौ मुखमन्दहासा ॥१२॥ तत्रोपविश्य च जगौ भगिनि ! त्वयाऽद्य सन्तोषितो हि भगवानुरुसेवनेन । इच्छामि सम्प्रति तथाविधमन्नकूटे कर्तुं हि सेवनमहं तव सम्मतेन ॥१३॥ इत्युक्ता सा जया प्राह भगिनीं तां कनीयसीम् । तोषितो हि त्वया भद्रे ! जन्माष्टम्यां हरिर्भृशम् ॥१४॥ हरेः सम्प्रीतये तत्र त्वया सेवा कृता भृशम् । दीपोत्सवे पुनः कुर्याः कृष्णपक्षागते शुभे ! ॥१५॥ अन्नकूटोत्सवे सेवां शुक्लपक्ष उपागते । करिष्याम्यहमित्थं हि मर्यादा हरिणा कृता ॥१६॥ इति श्रुत्वा जयावाक्यं प्राह सा सस्मिताननना । युक्तिवाक्येषु निपुणा ललिता ललितं वचः ॥१७॥

તે ઉત્સવમાં શ્રીનારાયણમુનિના દર્શન માટે ઉત્સાહવાળા અનેક ભક્તજનો, વર્ણી-સમૂહો, મુનિ-સમૂહો, સધવા અને વિધવા સ્ત્રીઓ વગેરે આનંદપૂર્વક આવતાં હતાં. (૪) પછી મહાપ્રીતિવાળાં ભક્તજનો, મનુષ્યરૂપે વિચરતા શ્રીવાસુદેવ પરમેશ્વરને પૂજતા હતા. શ્રીહરિએ આ વેળાએ ચન્દન, સુગંધી ફૂલો, અમૂલ્ય વસ્ત્રો અને અલંકારો ધારણ કર્યાં હતાં. (૫) વિચક્ષણ એવા ઉત્તમ રાજા આ વિજયાદશમી ઉત્સવમાં પકવાનો અને વિવિધ શાકભાજી વડે વિવિધ સાધુ-મંડળોને ભક્તિ ભાવપૂર્વક તૃપ્ત કરતા હતા. અને સર્વ હરિભક્તોને યથાયોગ્ય પ્રસાદ લેવડાવતા હતા. (૬) પછી શ્રીહરિ સાત દિવસ સુધી એકાંતિક ધર્મનો ઉપદેશ આપીને તથા દર્શનનું સુખ આપીને, તથા વાતો કરીને ભક્તોને સંતોષ પમાડી ફરીથી પોતપોતાના દેશમાં મોકલતા હતા. (૭) મુનિવરો તથા ગૃહસ્થ પુરુષો અને સ્ત્રીઓ ઉત્તમ રાજાની શ્રેષ્ઠ બુદ્ધિ, નિર્દોષ સ્વભાવ અને હરિ-ભક્તિની વાતો, પ્રશંસા કરતાં કરતાં પોતાના દેશમાં જતા હતા. (૮) તે ભક્તોમાંથી ઉત્તમ રાજા આ આસો માસમાં જ અન્નકૂટોત્સવ કરવા માટે પ્રભાશંકર તથા દાજીભાઈ વગેરે બ્રાહ્મણો તથા શ્રીનગર નિવાસી ગંગા વગેરે બ્રાહ્મણ સ્ત્રીઓને સન્માનપૂર્વક પોતાને ઘેર નિવાસ કરાવતાં હતાં. (૯) હે નરેશ ! પાક રાંધવામાં નિપુણ બ્રાહ્મણો તથા બ્રાહ્મણીઓ, શ્રીહરિની સેવાથી અને હરિભક્તોની પ્રસન્નતાથી પોતાનો જન્મ સફળ થયો છે, તેમ માનીને ઉત્તમ રાજાના ભવનમાં ઉતારાની જગામાં રહેતાં હતાં. (૧૦) પછી શ્રીસ્વામિનારાયણ ભગવાન, ઉત્સવિયા સર્વ ભક્તોને વળાવીને, થોડાક પાર્ષદોથી વીંટળાયેલા, ઘર-આંગણામાં ઓટા ઉપર, સિંહાસન ઉપર બેઠા. (૧૧) આસો વદી પ્રતિપદાને દિવસે અભય રાજાની પુત્રી, શ્રીહરિની ભક્તિમાં તથા વ્યવહારકાર્યમાં નિપુણ લલિતા એક વર્ષથી મોટાં એવાં પોતાની બહેન જયાને કંઈ પૂછવા માટે મંદ હાસ્યવાળી સતી જયાની સમીપમાં આવી. (૧૨) લલિતા જયાની સમીપમાં બેસીને જયાને કહેવા લાગી : હે બહેન ! તમોએ હમણાં વિજયાદશમીનાં ઉત્સવમાં જેવી ભગવાનની સેવા કરી તેવી હું અન્નકૂટોત્સવમાં શ્રીહરિની સેવા કરવા ઈચ્છુ છું. (૧૩) હે રાજન્, આ પ્રમાણે લલિતાએ કહેલી જયા નાની બહેન લલિતાને કહેવા લાગી : હે ભદ્રે ! તમોએ જન્માષ્ટમીમાં શ્રીનારાયણ મુનિને અત્યન્ત પ્રસન્ન કરેલા છે જ. (૧૪) જન્માષ્ટમીના ઉત્સવમાં તમોએ શ્રીહરિની પ્રસન્નતા માટે અત્યન્ત સેવા કરી. હે શુભે, આસો માસમાં દીપોત્સવમાં ફરીથી તમો સેવા કરશો. (૧૫) કારતક સુદી પડવાને દિવસે અન્નકૂટના ઉત્સવમાં હું શ્રીહરિની સેવા કરીશ. જે માટે આ પ્રકારે શ્રીહરિએ મર્યાદા કરેલી છે (૧૬) હે રાજન્, આ પ્રમાણે જયાનું વાક્ય સાંભળીને મંદ હાસ્યવાળી યુક્તિ વાક્યોમાં નિપુણ લલિતા સુંદર વચન કહેવા લાગી : (૧૭)

ललितोवाच-ज्येष्ठे ! भगिनि ! सत्यं हि त्वया प्रोक्तमिदं वचः । आवाभ्यां पालनीयाऽत्र मर्यादा भगवत्कृता ॥१८॥ दीपोत्सवान्तर्गतोऽसावन्नकूटो न वै पृथक् । अयि ! त्वया नारदोक्तिर्व्रतखण्डे श्रुता न किम् ॥१९॥ संलग्नमेव कर्तव्यं दीपावल्या दिनत्रयम् । पृथक्कृतौ महान्दोष इति तत्र श्रुता मया ॥२०॥ अत एव यथायुक्तं त्वमाज्ञापय मां स्वसः ! । आज्ञायामेव ते नित्यं वर्तितव्यं मया किल ॥२१॥ रुचिश्चेत्तव तर्ह्यद्य गृहाणाज्ञां महाप्रभोः । सम्भारांश्च ततः कर्तुं त्वमाज्ञापय सेवकान् ॥२२॥ युक्तियुक्तमिदं वाक्यं ललिताया निशम्य सा । ऋजुबुद्धिर्जया प्राह त्वमेव कुरु तच्छुभे ! ॥२३॥ अथोत्तमं समाहूय जया प्राह शुभं वचः । अन्नकूटोत्सवायाज्ञां गृहाण भ्रातरीशितुः ॥२४॥ इत्युक्तः सोऽतिहर्षेण जगाम हरिसन्निधौ । तिष्ठतः स्म च दूरे ते उभे सदसि योषिताम् ॥२५॥ उत्तमश्च हरिं नत्वा बद्धाञ्जलिपुटस्ततः । तस्थौ तदग्रेऽवसरं प्रतीक्ष्य स्वस्य भाषणे ॥२६॥ तं विवक्षुं हरिर्ज्ञात्वा प्रोवाच प्रहसन्वचः । किं कार्यमस्ति भो राजन्नित्युक्तः सोऽब्रवीत्प्रभुम् ॥२७॥ विज्ञाप्यमस्ति भगवन्मम किञ्चिदेव सम्प्रीणनाय तव तत्कृपया शृणु त्वम् । आज्ञा भवेद्यदि तव प्रियभक्त ! तर्हि प्रीत्याऽन्नकूटमहसम्भृतिमाहरेम ॥२८॥ निश्छद्मवाक्यमिति तस्य निशम्य हृष्टो नारायणो निजजनप्रियकृज्जगाद । आलोकयन्निजवचःश्रुति दत्तकर्णे दूरस्थबद्धकरसम्पुटतद्भगिन्यौ ॥२९॥ श्रीभगवानुवाच-भूरिव्ययः कृतोऽस्त्येव युष्माभिर्नृप ! दुष्करः । जन्माष्टम्यां च विजयादशम्यां द्वादशीषु च ॥३०॥ आगतो नातिदूरे च प्रबोधन्या महोत्सवः । भवतां धनसम्पत्तिर्नाविज्ञाताऽस्ति मे किल ॥३१॥ द्रव्यसम्बन्धि यत्कार्यं तद्द्रव्येणैव साध्यते । न तु ज्ञानेन भक्त्या वा न नामस्मरणादिभिः ॥३२॥ आनीयेतस्ततो द्रव्यं ये धर्ममपि कुर्वते । उत्तमर्णोपद्रवेण क्लिश्यन्ति ज्ञानिनोऽपि ते ॥३३॥

---

હે મોટી બહેન ! તમોએ આ વચન સત્ય જ કહ્યું છે કે, આ ઉત્સવ કરવામાં શ્રીહરિએ બાંધેલી મર્યાદા તમારે અને મારે પાલન કરવી જોઈએ. (૧૮) હે બહેન ! આ અન્નકૂટનો ઉત્સવ દીપોત્સવની અંદર જ આવેલો છે તે જુદો નથી. તમોએ વ્રતખંડમાં નારદજીનું વચન સાંભળ્યું નથી શું ? (૧૯) દીપાવલીનો ઉત્સવ ત્રણ દિવસ સાથે જ કરવો. જુદો કરે તો મહાન દોષ છે એમ મેં તે વ્રતની કથામાં સાંભળ્યું છે. (૨૦) હે બહેન ! જે માટે ઉત્સવ જુદો કરવાથી દોષ લાગે એમ સાંભળેલું છે. માટે જે પ્રકારે યોગ્ય હોય તે પ્રમાણે તમો આજ્ઞા આપો. મારે તમારી આજ્ઞામાં જ હંમેશા વર્તવું છે. (૨૧) તમારી આ ઉત્સવમાં પ્રીતિ હોય તો આજે જ શ્રીહરિની આજ્ઞા ગ્રહણ કરો. પછી સામગ્રીઓ એકત્ર કરવા માટે તમો સેવકોને આજ્ઞા આપો. (૨૨) હે રાજન્, ન્યાયયુક્ત લલિતાનું વચન સાંભળી સરલ મતિવાળાં જયાએ 'હે શુભે ! શાસ્ત્ર વચન હોવાથી તમો જ અન્નકૂટોત્સવ કરો' એમ કહ્યું. (૨૩) પછી જયાએ પોતાના ભાઈ ઉત્તમ રાજાને બોલાવીને શુભ વચન કહ્યું : હે ભાઈ ! અન્નકૂટનો ઉત્સવ કરવા માટે શ્રીહરિની આજ્ઞા ગ્રહણ કરો. (૨૪) હે રાજન્ , આ પ્રકારે જયાએ કહેવાયેલા ઉત્તમ રાજા મહાઆનંદપૂર્વક શ્રીહરિની સમીપમાં ગયા તથા જયા અને લલિતા શ્રીહરિનાં દર્શન કરનારી સ્ત્રીઓની સભામાં દૂર ઊભાં હતાં. (૨૫) પછી બંને હાથ જોડી ઉત્તમ રાજા શ્રીહરિને નમસ્કાર કરી પોતાને બોલવાના અવસરની રાહ જોતા થકા શ્રીહરિની આગળ ઊભા રહ્યા. (૨૬) શ્રીહરિ ઉત્તમ રાજાને બોલવાની ઈચ્છાવાળા જાણી હાસ્ય કરતા બોલ્યા : હે રાજન્! શું કામ છે ? આ પ્રમાણે પુછાયેલા ઉત્તમ રાજા બોલ્યા : (૨૭) હે ભગવન્ ! તમારી પ્રસન્નતા માટે મારે જણાવવાનું છે તે વિજ્ઞાપન તમો કૃપા કરીને સાંભળો. 'હે ભક્તપ્રિય, જો તમારી આજ્ઞા હોય તો અતિ પ્રસન્નતાથી અન્નકૂટની સામગ્રીઓ અમો લાવીએ.' (૨૮) હે રાજન્ ! આવું કપટ રહિત વચન સાંભળી પ્રસન્ન થયેલા શ્રીહરિ પોતાના વચનના શ્રવણમાં પ્રેરણા કરી છે કર્ણની વૃત્તિઓ જેમણે એવાં બંને હાથ જોડીને દૂર ઊભાં રહેલાં ઉત્તમ રાજાની બહેનો જયા અને લલિતાને જોતાં થકા બોલ્યા. (૨૯)

**શ્રી ભગવાન બોલ્યા** : હે રાજન્ ! તમોએ જન્માષ્ટમીના ઉત્સવમાં વિજયાદશમીના ઉત્સવમાં, અને સર્વે દ્વાદશીઓના ઉત્સવોમાં રાજાઓએ પણ દુષ્કર ખર્ચ કરેલો છે. (૩૦) કારતક સુદી એકાદશીનો મહોત્સવ સમીપમાં જ આવે છે. તમારી ધનસંપત્તિ મારી અજાણી નથી. (૩૧) દ્રવ્ય સંબંધિત કાર્ય તે દ્રવ્યથી જ થાય. આત્મા-પરમાત્માના જ્ઞાનથી થાય નહિ. ભક્તિથી અથવા નામસ્મરણથી સિદ્ધ થતું નથી. (૩૨) જે પુરુષો જ્યાં ત્યાંથી દ્રવ્ય લાવીને ધર્મ કરે છે, તે મનુષ્યો જ્ઞાની હોય તો પણ જેના થકી ધન લીધું હોય તેનાથી અનેક પ્રકારનાં કલેશને પામે છે. (૩૩)

अर्थानर्थोपदेशेन न भक्त्या बोधनेन वा । उत्तमर्णो गृहाद्याति विना द्रव्यं हि कर्हिचित् ॥३४॥ प्राणापदं विना क्वापि ऋणं कार्यं न कुत्रचित् । नोत्तमर्णसमं दुःखमन्यत्किञ्चन विद्यते ॥३५॥ पञ्चमेऽहनि षष्ठे वा शाकपत्राशनं वरम् । नतूत्तमर्णकदनं नृपतेरपि कर्हिचित् ॥३६॥ प्रीयते भावशुद्ध्यैव भगवान्न तु भूयसा । धनेनेति स एवाह गीतायामर्जुनं प्रति ॥३७॥ पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति । तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥३८॥ भक्त्यैकान्तिक्या हीनो यः करोत्यच्युतार्चनम् । महद्भिरुपचारैस्तत्प्रीत्या गृह्णाति न प्रभुः ॥३९॥ बहुद्रव्यार्थयत्नोऽतः पूजार्थमपि सत्पतेः । न कार्यः कार्य एकान्तभक्त्याप्त्यै तस्य सर्वथा ॥४०॥ एकान्तिकेषु भक्तेषु यादृशोऽकिञ्चनेष्वपि । आदरो दृश्यते तादृगृद्धाभक्तेषु न प्रभोः ॥४१॥ यस्यान्यवासनायुक्तं भक्तस्यापि भवेन्मनः । तस्मान्निर्वासने भक्ते प्रीतिरस्त्यधिका हरेः ॥४२॥ समृद्ध्यैश्वर्यसम्पन्ना देवा इन्द्रादयो हरिम् । महोपचारैरर्चन्ति भक्त्या नित्यमतन्द्रिताः ॥४३॥ किन्त्वन्यवासनायुक्तं मनस्तेषां हि वर्तते । अत एकान्तिभक्तेषु लभन्ते गणनां न ते ॥४४॥ न्यूनैश्वर्या अपि ततो विरक्ताः सनकादयः । सन्त्येकान्त्यग्रगण्या वै हृत्स्थहर्येकवासनाः ॥४५॥ पत्रपुष्पादिभिस्ते च कुर्वन्तोऽप्यच्युतार्चनम् । प्रीणयन्त्येव नितरां राधिकारमणं प्रभुम् ॥४६॥ तस्माद्गृहस्थैर्मद्भक्तै र्धर्मोऽपि स्वीयशक्तितः । कर्तव्यो न त्वृणं कृत्वा केनचिन्नृप ! कर्हिचित् ॥४७॥ अन्नकूटोत्सवस्तस्माद्यथाशक्त्येव साम्प्रतम् । क्रियतां न तिथिः शून्या भवेद्भगवतो यतः ॥४८॥ नारायणो वासुदेवो गोलोकाधिपतिस्तु यः । वसुदेवगृहे जातः स कृष्णो व्रजमागतः ॥४९॥ तेन प्रवर्तितोऽस्त्येष गोवर्धनमहोत्सवः । अतस्तदीयैरस्माभिः कर्तव्योऽसाविति ध्रुवम् ॥५०॥

ધનનો સ્વામી દ્રવ્ય વિના; અર્થમાં અનર્થના ઉપદેશથી અથવા ભક્તિ અને જ્ઞાનથી ક્યારેય પાછો જતો નથી. (૩૪) પ્રાણની આપત્તિ વિના ક્યારેય પણ કોઈ પણ કાર્યમાં દેવું કરવું નહિ, કારણ કે દેવા સમાન બીજું કોઈ દુઃખ નથી. (૩૫) હે રાજન્, પાંચમે દિવસે અથવા છઠ્ઠા દિવસે શાકનાં પાંદડા મળ્યાનું ભોજન શ્રેષ્ઠ છે પરંતુ ધન દાતાએ કરેલી પીડા તે રાજાઓને પણ ક્યારેય શ્રેષ્ઠ નથી. (૩૬) શ્રીકૃષ્ણ ભગવાન તો અંતઃકરણની શુદ્ધિ યુક્ત ભક્તિથી પ્રસન્ન થાય છે, પરંતુ ઘણા ધનથી પ્રસન્ન થતા નથી એમ શ્રીકૃષ્ણે અર્જુનને ગીતામાં કહ્યું છે : પત્ર, પુષ્પ, ફળ અથવા જળ જે ભક્ત મને પ્રેમથી અર્પણ કરે છે; મારામાં મનવાળા તે ભક્તનું ભક્તિપૂર્વક અર્પણ કરેલું તે પત્રપુષ્પાદિ હું જમું છું. (૩૭-૩૮) એકાંતિક ભક્તિથી રહિત જે ભક્ત ઘણા ઉપચારોથી શ્રીકૃષ્ણનું પૂજન કરે છે તેનું પૂજન ભગવાન પ્રસન્ન મનથી ગ્રહણ કરતા નથી. (૩૯) માટે શ્રીકૃષ્ણની પૂજા માટે પણ ઘણા દ્રવ્યની પ્રાપ્તિ માટે પ્રયત્ન કરવો નહિ. શ્રીકૃષ્ણની એકાંતિકી ભક્તિ માટે સર્વ પ્રકારે પ્રયત્ન કરવો. (૪૦) નિર્ધન એવા એકાંતિક ભક્તોમાં પણ શ્રીહરિનો જેવો આદર જણાય છે તેવો એકાંતિકી ભક્તિ રહિત ધનવાન ભક્તોમાં જણાતો નથી. (૪૧) જે ભક્તજનનું મન અન્ય વાસના યુક્ત હોય તે ભક્તજનથી નિર્વાસનિક ભક્તમાં શ્રીહરિની અધિક પ્રીતિ છે. (૪૨) ધન-સંપત્તિ અને ઐશ્વર્યસંપન્ન ઈંદ્ર આદિ દેવો આળસ રહિત થઈને મહાઉપચારોથી શ્રીકૃષ્ણને હંમેશાં પૂજે છે. પરંતુ ઈંદ્ર આદિ દેવોનું મન અન્ય વાસના યુક્ત વર્તે છે માટે તે ઈન્દ્ર આદિ દેવોની એકાંતિક ભક્તોમાં ગણના થતી નથી. (૪૩-૪૪) તીવ્ર વૈરાગ્યવાળા, હૃદયમાં એક ભગવાનની જ વાસનાવાળા સનકાદિ; ઈન્દ્ર આદિ દેવોથી ન્યૂન ઐશ્વર્યવાળા છે તો પણ એકાંતિક ભક્તોમાં અગ્રગણ્ય છે. (૪૫) સનકાદિ પત્રપુષ્પો આદિથી શ્રીકૃષ્ણનું પૂજન કરે છે તો પણ શ્રીકૃષ્ણ તેમના ઉપર અત્યંત પ્રસન્ન થાય છે. (૪૬) હે રાજન્ ! માટે ગૃહસ્થ એવા મારા ભક્તોએ ધનના વ્યયથી સાધ્ય ધર્મ પોતાની શક્તિને અનુસરીને કરવો. કોઈ પણ ગૃહસ્થે ક્યારેય પણ ઋણ કરીને ધર્મ કરવો નહિ. (૪૭) માટે આ ઘણા ધનના ખર્ચવાળો અન્નકૂટનો ઉત્સવ હાલમાં પોતાની શક્તિ પ્રમાણે તમો કરો જેથી ભગવાનની તિથિ - ઉત્સવ દિવસ (અન્નકૂટ કર્યા વિના) શૂન્ય ના થાય. (૪૮) નારાયણ, વાસુદેવ શ્રીકૃષ્ણ, વસુદેવના ગૃહમાં દેવકી થકી પ્રાદુર્ભાવ પામીને પ્રભુ વ્રજમાં આવ્યા. તે શ્રીકૃષ્ણે આ ગોવર્ધન મહોત્સવ પ્રવર્તાવ્યો છે માટે તેમના ઉપાસક આપણે આ ઉત્સવ ચોક્કસ કરવો. (૪૯-૫૦)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच-**आज्ञप्त एवं हरिणा स तूर्णं प्रणम्य तं पार्श्वमगाद्भगिन्योः । श्रीकृष्णसेवारहितः क्षणोऽपि ययोर्न चित्ते क्वच रोचते वै ॥५१॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे अन्नकूटोत्सवे भगवदाज्ञाग्रहणनामा चतुर्थोऽध्यायः ॥४॥

सुव्रत उवाच-**इङ्गितज्ञे हरेस्ते तु तद्दत्तनयनश्रुती । उत्तमागमनात्प्राग्वै बुबुधाते तदीहितम् ॥१॥ हरिदास्येन साफल्यं जानत्यौ निजजन्मनः । अतिहर्षभृतोरस्के भगिन्यौ ते बभूवतुः ॥२॥ तावदागत्य सोऽप्याह यथावद्वचनं प्रभोः । योषितां मध्यगे स्वस्य स्वसारौ नृपनन्दनः ॥३॥ क्रियतामिति वाक्श्रुतिस्तदा पृथुहर्षं हि तयोः सुचेतसोः । हृदि जातममान्तमन्तरे बहिरस्त्रावयदस्त्रकैतवात् ॥४॥ अथ ते झटिति स्वकेतनं प्रभुमानम्य मुदा समेत्य च । लघु साधयितुं चतुर्विधं प्रयतेते स्म सदन्नमञ्जसा ॥५॥ प्रथमं शुभशालिकण्डनं सितगोधूमसुसूक्ष्मपेषणम् । बहुभिर्वनिताभिरादराद्धरिभक्ताभिरकार्यत द्रुतम् ॥६॥ नितरामभवन्महोत्सवो हरिनिघ्नीकृतहृद्धनात्मनाम् । परिचारकयोषितां तदा सततं निष्कपटान्तरात्मनाम् ॥७॥ पुरि तत्र गृहे गृहेऽभवद्वनितानां दलनादिकर्मसु । दिवसेषु निशासु चाच्युतो हरिगीतध्वनिरेव मङ्गलम् ॥८॥ चतुरा ललितानिदेशतः शुचयो ब्राह्मणयोषितस्तदा। वटिकाः सितसूक्ष्मसेविकाः पृथुलान् पर्पटकांश्च चक्रिरे ॥९॥ वटिकागुलिका निधाय काचिज्जपमालामणिसङ्ख्यया तदानीम्। विदधेऽन्यतदालिभिः स्वकीयं जपमालाविधिमेव नैत्यकं च ॥१०॥ सितनिर्मलकांस्यपात्रपृष्ठे विदधाना पृथुपर्पटं च काचित्। सहसा स्फुरितं हरिं समीक्ष्य प्रहसन्त्युद्धतवेल्लणैव तस्थौ ॥११॥**

---

હે રાજન્ ! આ પ્રકારે શ્રીહરિએ આજ્ઞા આપેલા ઉત્તમ રાજા શ્રીહરિને પ્રણામ કરી તત્કાલ જયા અને લલિતાની સમીપમાં ગયા. જે બન્ને બહેનોના ચિત્તમાં શ્રી હરિકૃષ્ણની સેવા રહિત ક્ષણ વાર પણ ક્યારેય પ્રીતિવાળો થતો જ નથી. (૫૧)

ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે અન્નકૂટોત્સવે ભગવદાજ્ઞાગ્રહણનામા ચતુર્થોડધ્યાયઃ (૪)

## અધ્યાય : ૫

## ભક્ત પુરુષો અને સ્ત્રીઓએ અન્નકૂટના ઉત્સવની સામગ્રી ભેગી કરી અને મુનિઓના સમુદાયોને બોલાવ્યા એ કહ્યું છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! શ્રીહરિના હૃદયના અભિપ્રાયને જાણનારા, શ્રીહરિના મુખારવિંદમાં બંને નેત્ર અને શ્રવણ અર્પણ કરનારાં જયા અને લલિતા તો ઉત્તમ રાજાના આગમનથી પહેલાં જ જાણતાં હતાં. (૧) હંમેશા શ્રીહરિની પરિચર્યાથી પોતાના જન્મની સફળતા જાણનારી જયા અને લલિતા બંને બહેનો અતિશય હર્ષથી પરિપૂર્ણ અંતઃકરણવાળી થઈ. (૨) તે સમયમાં અભયનંદન ઉત્તમ રાજા પણ સભામાં સ્ત્રી ભક્તોની મધ્યે રહેલાં પોતાનાં બંને બહેનોની પાસે આવીને કહેવા લાગ્યા. (૩) અન્નકૂટોત્સવ શક્તિ પ્રમાણે કરો : આ પ્રકારની ઉત્તમ રાજા થકી સાંભળેલી શ્રીહરિની વાણીથી તે સમયે નિર્મલ અન્તઃકરણવાળી જયા અને લલિતાના મનમાં ઉત્પન્ન થયેલ અતિશય આનંદ હર્ષના આંસુ સ્વરૂપે બહાર વહેવા લાગ્યો. (૪) પછી જયા અને લલિતા પ્રભુને નમસ્કાર કરી તત્કાલ પોતાના ભવનમાં જઈ ચાર પ્રકારનાં સુંદર અન્નો તત્કાલ તૈયાર કરવા માટે આનંદથી પ્રયત્ન કરતાં હતાં. (૫) પ્રથમ સારી સુગંધવાન ડાંગરનું ખાંડવું, ધોળા ઘઉંને સૂક્ષ્મ દળવા વગેરે કાર્ય શ્રીહરિની ભક્ત એવી ઘણી સ્ત્રીઓ દ્વારા આદરપૂર્વક કરાવતાં હતાં. (૬) તે સમયે શ્રીહરિને આધીન કર્યા છે તન, મન અને ધન જેમણે એવી અને કપટે રહિત અંતઃકરણવાળી, સેવાપરાયણ સ્ત્રીઓને નિરંતર મહોત્સવ થતો હતો. (૭) દુર્ગપત્તનમાં દરેક ભવનમાં હરિભક્ત સ્ત્રીઓનો દળવા વગેરે ક્રિયામાં મંગલસ્વરૂપ શ્રીહરિનાં કીર્તનોનો શબ્દ દિવસે અને રાત્રિમાં અખંડ થતો હતો. (૮) તે સમયે પાક ક્રિયામાં ચતુર પવિત્ર બ્રાહ્મણની સ્ત્રીઓ શ્વેત સૂક્ષ્મ સેવો તથા ગોળ ચંદ્રમાં સમાન મોટા પાપડોને લલિતાની આજ્ઞાથી કરતી હતી. (૯) શ્વેત -સ્વચ્છ કાંસાના પાત્રના પૃષ્ઠભાગમાં વિશાળ પાપડ કરતી કોઈ ભગવાનની ભક્ત સ્ત્રી એકદમ સ્ફૂરાયમાન થયેલા શ્રીહરિને જોઈને હાસ્ય કરતી પાપડ થકી ઊંચું કર્યું છે વેલણ જેણે એવી ઊંચા હાથવાળી થઈને સ્થિર જ રહી. (૧૦-૧૧)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

हरिमेव जले स्थले काचित्परिपश्यन्त्यथ सेविकाविधाने । स्फुरितं तमवेक्ष्य तैलमर्दं विदधानेव बभौ गतस्मृतिः सा ॥१२॥ हसिता हरिणा पुरा भृशं तद्धृदि संस्मृत्य मुहुर्जहास काचित् ॥१३॥ कलमानवहन्तुमिच्छती हरिमालोक्य च कण्डनीमुखे । स्फुरितं सहसाभवत्स्थिरा मुसलं दोषणि कापि बिभ्रती ॥१४॥ सकला अपि योषितस्तदैवं निजभावानुसृतेः समीक्षमाणाः। सकलास्वपि ताः क्रियासु साक्षाद्धरिमासन्नधिकाः समाधिभाग्भ्यः ॥१५॥ इति तासु सहर्षमुद्यतासु प्रभुसम्प्रीणनमेतदित्यवेत्य। घृतपूर्णकुतूः सिताढ्यपेटाः शतशो ह्यानयति स्म चोत्तमोऽपि ॥१६॥ अनयञ्छतशोऽम्बरिषकन्दून्विततस्थालकटाहदीर्घदर्वीः। कलशीर्मणिकाञ्छरावकुम्भान्नृपपद्राः पिठरांश्च कुण्डतर्दून् ॥१७॥ रजनीं मरिचानि जीरकं च त्वचकुस्तुम्बुरुशृङ्गवेर चिञ्चाः। लवणं दधितक्रराजिकादीन्नृपपत्न्यौ मुदिते स्म साधयेते ॥१८॥ शुचिवाससा आहरंस्तदानीं करकक्षान्तरगर्गरीघटांश्च । सधवा विधवाश्च विप्रयोषा व्रतशुष्यत्तनवोऽपि गाङ्गमम्भः ॥१९॥ तपः क्रियाभिः कृशशुष्कगात्रा अपि श्रमं भूरि दिवा च रात्रौ । ताः कुर्वतीः स्त्रीस्तु समीक्ष्य धात्रा तदाबलानामधृता ललज्जे ॥२०॥ अथ द्विजान् कान्दविकांश्च पृष्ट्वा तत्सूदशालामुचितामचीकरत् । नृपः स्वसृप्रेरित आशु शाकान्याहारयामास पुरान्तराच्च ॥२१॥ आस्तां शुभे तत्र महानसे द्वे स्त्रीणां च पुंसां पृथगेकमेकम् । पुंसां प्रभाशङ्कर आस मुख्यो गङ्गा च योषास्विह पाककार्ये ॥२२॥ ये पाचकास्तत्र पुमांस आसंस्तान्मानजित्कृष्णजिदम्बरामाः । शाकान्नकाष्ठानयनादिकृत्यैरनुक्षणं पर्यचरंस्तथाऽन्ये ॥२३॥ शाकेन्धनाद्याहरणे तु योषाः स्त्रीभ्यः प्रसक्ता हरिरत्नवत्यौ । रामाऽन्यगङ्गा रजनी च

જળ અને પૃથ્વીમાં શ્રીહરિને ધ્યાનાભ્યાસથી જોતી કોઈ સ્ત્રી સેવો કરતી હતી ત્યારે સેવો કરવાની પાટલીમાં પ્રત્યક્ષ જણાતા શ્રીહરિને જોઈને સ્મૃતિએ રહિત તે સ્ત્રી શ્રીહરિના અંગમાં તેલ મર્દન કરતી હોય તેમ શોભતી હતી. (૧૨) ચાળણીમાં ઘણો લોટ મૂકીને બન્ને હાથોથી તત્કાલ ચાળતી કોઈ સ્ત્રી પ્રથમ શ્રીહરિએ હસાવેલી તેનું પોતાના હૃદયમાં સંસ્મરણ કરી વારંવાર હસતી હતી. (૧૩) ઉત્તમ પ્રકારની ડાંગરને ખાંડવા માટે ઈચ્છતી કોઈ ભક્ત સ્ત્રી ખાણિયાના મુખમાં એકદમ આવિર્ભાવ પામેલા શ્રીહરિને જોઈ હાથમાં સાંબેલુ ધારણ કરતી સ્થિર થઈ ગઈ. (૧૪) તે સમયે આ પ્રકારે સમગ્ર અન્નકોટની સામગ્રી કરવામાં તત્પર સ્ત્રીઓ સમગ્ર ક્રિયાઓમાં પોતપોતાના પ્રેમને અનુસરીને પ્રત્યક્ષ શ્રીહરિને જોતી સતી યોગીઓથી પણ અતિ શ્રેષ્ઠપણાને પામી. (૧૫) આ પ્રમાણે 'આ અન્નકૂટ ઉત્સવ નિમિત્તે પાકવિધાનનું કાર્ય પ્રભુને પ્રસન્ન કરનારું છે' એમ જાણીને લલિતાની પ્રેરણા મુજબ ભક્તસ્ત્રીઓ તેમાં આનંદપૂર્વક ઉદ્યમવાળી હતી. ઉત્તમ રાજા પણ ઘીથી ભરેલાં કુલ્લાં તથા સાકરથી ભરેલા પટારાઓ લાવતા હતા. (૧૬) ઉત્તમ રાજાના સેવકોએ ઘણાં વાસણો કાઢ્યાં; અંબરીષ (ઊંડા કઢાયા) ઝારા, મોટી કાથરોટો, તાંસડા, છાછરો, (મોટા કઢાયા) મોટા હાથાના કડછા, ગોળીઓ, માણો, શરાવ(શકોરા-રામપાતર), ઘડાઓ, હાંડલા, કૂંડાં તથા લાકડાના હાથલા (તવેથા) લાવતા હતા. (૧૭) ઉત્તમ રાજાની પત્નીઓ આનંદપૂર્વક હળદર, મરચાં, જીરું, તજ, ધાણા, કેસર, એલચી વગેરે સાફ કરતાં હતાં તથા આદું, આંબલી, કાળીજીરી, લવણ, દહીં, છાશ, રાઈ પણ સાફ કરતાં હતાં (૧૮) તે સમયે શુદ્ધ વસ્ત્રોવાળી, હાથમાં અને બગલમાં ગાગરો અને ઘડાઓ જેમને છે એવી સધવા અને વિધવા વિપ્ર સ્ત્રીઓ વ્રતોથી કૃશ શરીરવાળીઓ હોવા છતાં પણ ઉન્મત્ત ગંગાનું જળ લાવતી હતી. (૧૯) તપથી કૃશ અને સુકાયેલા શરીરવાળી હોવા છતાં પણ દિવસે અને રાત્રિમાં ઘણો શ્રમ કરતી સ્ત્રીઓને જોઈ તે સમયે 'અબલા' આ પ્રકારનું સ્ત્રીઓનું નામ પ્રવર્તાવનાર બ્રહ્મા લજવાઈ ગયા. (૨૦) પછી પોતાની બહેનોએ પ્રેરણા કરેલા ઉત્તમરાજા કંદોઈ બ્રાહ્મણોને અને રસોઈ કરનાર બ્રાહ્મણોને પૂછીને યોગ્ય પાક કરાવતા હતા અને શાકો તત્કાલ મંગાવતા હતા. (૨૧) ઉત્તમ રાજાના ગઢમાં પાક કરવા માટે યોગ્ય પ્રદેશમાં (બ્રાહ્મણો માટે) એક સ્ત્રીઓનું રસોડું અને એક પુરુષોનું રસોડું સ્વચ્છ કરતા હતા. આ પાક કાર્યમાં પુરુષોના રસોડામાં પ્રભાશંકર પિપળાવ ગામનાં બ્રાહ્મણ મુખ્ય હતા અને સ્ત્રીઓના રસોડામાં પૂર્વે કહેલાં ગંગા નામનાં બ્રાહ્મણી મુખ્ય હતા. (૨૨) તેમાં જે વિભાગમાં પુરુષો રાંધનારા હતા તે બ્રાહ્મણોને માનજીત-કૃષ્ણજીત-અમ્બારામ-રામદાસ, આ ભક્તો તથા બીજા દરજી વગેરે ભક્તો શાક-અન્ન-લાકડાં વગેરે તથા ઘી તેલ વગેરે લાવવામાં ક્ષણેક્ષણે તેઓની સેવા કરતા હતા. (૨૩) જેમાં સ્ત્રીઓ રાંધનારી હતી ત્યાં હરિબા-રત્નવતી-રામા-બીજી ગંગા-રજની-



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

नाथी वीज्या च कल्लूप्रमुखा बभूवुः ॥२४॥ सम्भारसंसाधन एव पुंसु सक्तेषु हर्षाद्वनितासु चेशः । आकारणाय त्वरितं मुनीनां दूतानटाट्यान् दिश आदिदेश ॥२५॥ ते गत्वा तत्र तत्राशु मुनीनाहुर्निजप्रभोः । आज्ञा धनत्रयोदश्यां स्वेक्षणस्यास्ति वः किल ॥२६॥ इत्युक्तास्ते तु मुनयो भगवद्दर्शनोत्सुकाः । नत्वा हृदा प्रभुं सद्यो निर्ययुर्दुर्गपत्तनम् ॥२७॥ पुस्तकादीन्यपि स्वानि यत्र तत्र निधाय च । ग्राम्यान् पौरानपि जनाननापृच्छ्यैव निर्ययुः ॥२८॥ यथालब्धं क्वचिद्भैक्षं फलपत्रादि वा क्वचित् । भुक्त्वाप्युपोष्य वा क्वापि ते चलन्ति स्म वर्त्मनि ॥२९॥ तत्र तत्र हरेर्भक्ताः पुरुषा योषितोऽपि च । दर्शनावसराभिज्ञा ययुः सद्यः सहर्षिभिः ॥३०॥ पाश्चात्यपञ्चालजना मुनियूथानि सर्वतः । देशान्तरीयलोकांश्च साश्चर्यं ददृशुर्बहून् ॥३१॥ दृष्ट्वा ते सत्वरगतीनागच्छत ऋषीञ्जनान् । प्रतिक्षणं यूथशस्तान्बहुधैव व्यतर्कयन् ॥३२॥ निभृता मुनिभिः किन्नु महानौका उपागताः । उद्वेलः किमभूदेष समुद्रो वा जनात्मकः ॥३३॥ आश्चर्यमित्थं लोकानामतत्तत्त्वविदां पथि । जनयन्त उपाजग्मुर्मुनयो दुर्गपत्तनम् ॥३४॥ यथायथा हरेर्धामसान्निध्यं पथि लेभिरे । तथातथातिवेगास्ते बभूवुरश्रमा इव ॥३५॥ न ते दैह्यं सुखं दुःखमनुसन्दधुरध्वनि । धावदश्वाधिरूढं स्वं पश्यन्तः प्रभुमग्रतः ॥३६॥ दिग्भ्योऽष्टभ्यः समायाता मुनयः साङ्ख्ययोगिनः । साधवो वर्णिनश्चासन्नभितो दुर्गपत्तनम् ॥३७॥ दूरदेशस्थिता ये च मुनयो गृहिणस्था । बोधन्यागमना वर्षे तेऽपि तत्राययुस्तदा ॥३८॥ स्वस्वयूथैः सहैवैते त्यागिनो गृहिभिः सह । शाखापुराण्युपाश्रित्य तस्थुर्वै द्वादशीदिने ॥३९॥ ते दुर्गपुरदत्ताक्षाः सर्वे भक्तजना नृप ! । दर्शनोत्का अपि हरेर्वाग्रुद्धास्तत्र संस्थिताः ॥४०॥ सङ्कुलानि जनैः

---

નાથી-વિજ્યા કલ્લુ વગેરે ભગવાનની ભક્ત સ્ત્રીઓ, પાક કરનારી સ્ત્રીઓને શાક લાકડાં-મસાલા વગેરે જે જે જોઈએ તે લાવવામાં તત્પર હતી. (૨૪)

પુરુષો આનંદથી ઉત્સવોપયોગી સામગ્રી તૈયાર કરવામાં આસક્ત થયા તથા સ્ત્રીઓ પણ વાનગીઓ બનાવવામાં તત્પર થઈ ત્યારે પરમેશ્વર શ્રીહરિ મુનિઓને દેશાન્તરથી બોલાવવા માટે શીઘ્ર ગતિવાળા, સંદેશો લઈ જનારા પુરુષોને દશ દિશાઓ તરફ મોકલતા હતા. (૨૫) તે દૂતો તે તે દિશાઓમાં જઈને સાધુઓને કહેવા લાગ્યા : 'તમોને ધનતેરસના દિવસે શ્રીહરિએ પોતાના દર્શનની આજ્ઞા કરી છે.' (૨૬) હે રાજન્! આ પ્રકારે દૂતોએ કહેલા મુનિઓ શ્રીહરિના દર્શનમાં ઉત્સાહવાળા પોતાના મનથી શ્રીહરિને નમસ્કાર કરી દુર્ગપત્તન પ્રત્યે તત્કાલ જ નીકળતા હતા. (૨૭) મુનિઓ પોતાનાં પુસ્તકો વગેરે વસ્તુઓ પણ જે કોઈ સ્થાનમાં મૂકીને ગામનાં કે પુરનાં નિવાસીજનોને પૂછ્યા વગર જ નીકળતા હતા. (૨૮) તે મુનિઓ માર્ગમાં ક્યારેક જે પ્રમાણે મળેલું ભિક્ષાન્ન જમીને, ક્યારેક ફળ-પાંદડાં વગેરે જમીને અથવા ઉપવાસ કરીને પણ ચાલતા હતા. (૨૯) તે તે ગામ અથવા નગરમાં રહેલા સત્સંગીજનો અને સ્ત્રીઓ 'શ્રીહરિનાં દર્શનનો આ સમય પ્રાપ્ત થયો છે' એમ જાણતા સતા સાધુઓની સાથે તત્કાળ ચાલતા હતા. (૩૦) પશ્ચિમ પંચાલ દેશમાં રહેલાં જનો સર્વ દેશોથી આવતાં મુનિઓનાં મંડળો અને દેશાન્તરના લોકોને આશ્ચર્યપૂર્વક જેમ હોય તેમ જોતાં હતાં. (૩૧) તે જનો શીઘ્ર ગતિવાળા ક્ષણે ક્ષણે ભેગા મળીને આવતા સાધુઓ અને લોકોને જોઈ ઘણા પ્રકારે તર્ક કરતા હતા. (૩૨) મુનિઓથી ભરેલી મહાનૌકા દેશાન્તરથી આવેલી છે કે શું ? અથવા મનુષ્યરૂપી સમુદ્ર ઊભરાયો છે કે શું ? (૩૩) આ પ્રમાણે માર્ગમાં મુનિઓ અને લોકો શ્રીહરિનાં દર્શને જાય છે એમ યથાર્થ ભાવ નહિ જાણનારા લોકોને આશ્ચર્ય ઉત્પન્ન કરાવતા મુનિઓ દુર્ગપત્તન પ્રતિ ચાલતા હતા. (૩૪) મુનિઓ માર્ગમાં જેમ જેમ નારાયણ મુનિની સંનિધિ પામતા હતા તેમ તેમ પરિશ્રમે રહિત હોય ને શું ? એમ અતિ તીવ્ર વેગવાળા થયા. (૩૫) મુનિઓ શીઘ્રગતિવાળા અશ્વ ઉપર બેઠેલા શ્રીહરિને પોતાની આગળ ધ્યાનથી જોતા છતાં પોતાના દેહ સંબંધી સુખદુઃખનું સ્મરણ કરતા નહોતા. (૩૬) આઠ દિશાઓથી આવેલા સાંખ્ય-યોગવાળા સાધુઓ, ત્યાગીઓ અને બ્રહ્મચારીઓ દુર્ગપત્તનની ચોતરફ આવેલા હતા. (૩૭) દૂર દેશમાં રહેલાં માટે જ દરેક વર્ષે પ્રબોધિનીના ઉત્સવમાં આવનારા મુનિઓ તથા ગૃહસ્થો તે પણ તે સમયે ગઢપુરમાં આવતાં હતાં. (૩૮) આ સાધુઓ ગૃહસ્થોની સાથે પોતપોતાનાં મંડળો સહિત જ ગઢપુરનાં શાખાનગરોનો આશ્રય લઈ બારસને દિવસે (આ દિવસે એકાદશી તિથિ પણ સંયુક્ત હોવાથી એકાદશી તિથિ યુક્ત બારસને દિવસે) રહ્યા હતા. (૩૯) હે રાજન્! ગઢપુર તરફ દૃષ્ટિવાળા તે સર્વ ભક્તજનો શ્રીહરિના દર્શનમાં ઉત્સાહવાળા હતા તોપણ ધનત્રયોદશીને દિવસે જ આવવું એવી શ્રી હરિની આજ્ઞા હોવાથી રોકાયેલા હતા. (૪૦) જેઓને શ્રીહરિ પ્રિય છે એવા ત્યાગી અને ગૃહસ્થોથી

**शाखानगराणि हरिप्रियैः । उद्वेलसागराभानि बभूवुर्द्वादशीनिशि ॥४१॥**

**स्मरन्त एते हृदि भक्तिनन्दनं सङ्कीर्तयन्तश्च गुणांस्तदाश्रितान् । स्वास्थ्यं न तत्र प्रतिपेदिरे हरेः प्रत्यक्षवीक्षाहृतमानसत्वतः ॥४२॥**

इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे अन्नकूटोत्सवे मुनिमण्डलाकरणनामा पञ्चमोऽध्यायः॥५॥

सुव्रत उवाच- **दुर्गे पुरेऽथ निजभक्तमनोभिरामो नारायणः कपटमानवनाट्यधारी । पक्वान्नपुञ्जमपि कारयति स्म युक्त्या भक्तान् स्तुवन्प्रतिदिनं द्विगुणाभिवृद्ध्या ॥१॥ पाकक्रियाभिरततामनुवेलमीशः स्त्रीणां नृणां च समबुध्यत गुप्तदूतैः। तेषामविश्रममहर्निशमुद्यमं तं ज्ञात्वाऽऽप विस्मयमसौ परमां मुदं च ॥२॥ स्त्रीभ्यश्च पाचकनरेभ्य उतेशवाक्यं चत्वार एव गदितुं ह्यनुवेलमासन् । खटाङ्ग आदिम उमाभयनाचिकेतौ तुर्यश्च तत्र मयराम इमे ह्यकामाः ॥३॥ तत्रापि निष्कटभावविशुद्धचित्तो दीर्घारवोर्ध्वकरदर्शितकार्यशैघ्र्यः । खट्वाङ्ग आत्मपरमात्मयथार्थरूपवेत्ता कृतात्मवसतिर्हरिपार्श्वे आसीत् ॥४॥ निर्मानवृत्तिपरितोषित वासुदेवौ धीरौ यथोक्तवचनस्य निवेदकौ च । आस्तां महानस उमाभयनाचिकेतौ पार्श्वे विभोश्च हरिभक्तजनानुकूलौ ॥५॥ वार्धक्यबद्धकटिदत्तकरो नतांसः कल्याणमस्त्विति वचोर्थनहासितेशः । सद्यःक्रियो जवनिवेदितकार्यभारस्तत्रानिशं हरिपुरो मयराम आसीत् ॥६॥ पक्वान्नसिद्धिमथ वीक्षितुमच्युतोऽपि स द्वादशीनिशि वृतः परिमेयपन्द्रैः। कृष्णाख्यनापितपुरोधृतदीपिकाभाद्योतत्तनुद्युतिरियाय च पाकशालाम् ॥७॥**

---

વ્યાપેલાં શાખાનગરો દ્વાદશીની રાત્રિમાં મર્યાદાને ઉલ્લંઘન કરનારા સમુદ્રની માફક જણાતાં હતાં. (૪૧)

પોતાના મનમાં ભક્તિપુત્ર શ્રીહરિને સ્મરણ કરતાં અને તેમનાં ચરિત્રોનું ગાન કરતા સાધુઓ અને ગૃહસ્થો પ્રત્યક્ષ દર્શનમાં આકર્ષિત થયેલાં મનવાળા હોવાથી શાખાનગરોમાં સ્થિર ચિત્તવાળા થયા નહિ. (૪૨)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીયપ્રકરણે અન્નકૂટોત્સવે મુનિમંડલાકરણનામા પંચમોઽધ્યાયઃ (૫)*

## અધ્યાય : ૬

## શ્રીહરિએ પોતાના ભક્ત પુરુષો અને સ્ત્રીઓને સુખ કરનાર પાકશાળાનું અવલોકન કર્યું તે કહ્યું છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! ગઢપુરમાં રહેલાં પોતાના ભક્તોનાં મનને આનંદ આપનારા દિવ્ય મૂર્તિ હોવા છતાં મનુષ્યનાટ્યધારી શ્રીહરિ પણ પાક કરનારાં જનોની પ્રશંસા કરતા સતા દરરોજ બમણી વૃદ્ધિ થાય તેમ યુક્તિથી પકવાનનો સમુદાય કરાવતા હતા. (૧) શ્રીનારાયણ મુનિ સ્ત્રીઓ અને પુરુષોની પાકક્રિયામાં પ્રીતિને ગુપ્ત દૂતો દ્વારા ક્ષણેક્ષણે જાણતા હતા. શ્રીહરિ તેમનો રાત્રિ-દિવસ વિશ્રામ વગર ઉદ્યમ જાણીને આશ્ચર્ય અને હર્ષ પામ્યા. (૨) પાક કરનાર સ્ત્રીઓ અને પુરુષોને પણ શ્રીહરિના સંદેશ વચન ક્ષણેક્ષણે કહેવા માટે નિષ્કામ ભક્તો, ખટ્વાંગ-ઉમાભય-નાચિકેત અને મયારામ આ ચાર જણ તત્પર રહેતા હતા. (૩) તેઓમાં પણ કપટે રહિત ભાવવાળા અને નિર્મળ અંતઃકરણવાળા આત્મા અને પરમાત્માના સ્વરૂપને યથાર્થ જાણનારા ખટ્વાંગ રાજા ઊંચા સ્વરથી શ્રીહરિની આજ્ઞાને જેમ હોય તેમ ઊંચા હાથથી કાર્યાન્ત શીઘ્રતા જણાવનારા હતા. તથા શ્રીહરિની સમીપમાં જ જેમણે પોતાનો નિવાસ કર્યો છે એવા હતા, (૪) નિર્માન વૃત્તિથી પ્રસન્ન કર્યા છે પ્રત્યક્ષ શ્રીહરિ જેમણે એવા, ધૈર્યવાળા, જે પ્રમાણે કહેલું હોય તે પ્રમાણે જ નિવેદન કરનારા, હરિભક્તોને અનુકૂલ વર્તનારાં, સ્ત્રીઓ અને પુરુષોનાં રસોડામાં અને શ્રીહરિની સમીપે ઉમાભય અને નચિકેતા સેવામાં રહેતા હતા. (૫) વૃદ્ધપણું હોવાથી બાંધેલી કેડ્ય ઉપર પોતાના બંને હાથ જેમણે મૂક્યા છે, નમેલા ખભાવાળા 'કલ્યાણમસ્તુ' આવાં વચન સાથે જે કાર્યની પ્રાર્થનાથી હાસ્ય યુક્ત કર્યા છે શ્રીહરિ જેણે એવા, તત્કાલ સર્વ કાર્ય કરનારા મયારામ પાકશાળામાં તત્કાલ નિવેદન કર્યા છે કાર્યસમૂહ જેણે એવા છતાં રાત્રિ-દિવસ શ્રીહરિની આગળ રહેતા હતા. (૬) પછી શ્રીહરિ પણ પકવાનની સિદ્ધિ જોવા માટે આસો વદી બારસની રાત્રિમાં થોડા પાર્ષદોની સાથે કૃષ્ણદાસ નામના નાપિતે આગળ ધરેલી મશાલની કાન્તિથી પ્રકાશમાન શરીર-કાન્તિ જેમની છે એવા પાકશાળામાં ગયા. (૭)

दोष्णैककेन स दधत्तनु वैत्रयष्टिमालम्बमान इतरेण कटिं च दोष्णा । तूर्णाञ्चनप्रचलदुत्तमहारराजिर्व्यालोल-दीर्घनयनेक्षितभक्तसङ्घः ॥८॥ आन्दोलयन्निजजनार्पितशेखरालिं तूर्णक्रमाच्चटचटायितपादुकाङ्घ्रिः । धावत्पदातिगणसंश्रितपृष्ठदेशः प्रापत्सिताम्बरधरश्च महानसं सः ॥९॥ तेज आकस्मिकं वीक्ष्य ज्ञात्वा भगवदागमम् । त्यक्तान्यवाचस्तत्रत्याः प्रणेमुस्तं द्विजोत्तमाः ॥१०॥ प्रभाशङ्करशर्माथ दयारामश्च पाकवित् । दाजिद्वयं बर्हिचरो रामचन्द्रश्च लालजित् ॥११॥ नन्दुस्तथा नन्दलालो गङ्गादत्तो नरोत्तमः । लक्ष्मीदत्तो दयारामः कृपाशङ्कर ईश्वरः ॥१२॥ काशीरामश्च तुलजारामश्च शिवयाज्ञिकः । देवरामस्तथा जीवो विप्रो लीलाधरस्तथा ॥१३॥ पीताम्बरोऽनूपरामो रेवाशङ्करनामकः । बालो विजयरामश्च द्वावम्बारामसंज्ञितौ ॥१४॥ तथा नारायणजयप्रमुखास्ते ससंभ्रमम् । प्रणम्य तं प्राञ्जलयस्तस्थुः सर्वे तदग्रतः ॥१५॥ लौहान् पृथून्कटाहांस्तु रिक्तान् दृष्ट्वाथ तत्र सः । हरिः कान्दविकान् प्राह युष्माभिः क्रियतेऽत्र किम् ॥१६॥ तमाहुस्ते वयं स्वामिन्नद्यैव निखिलान्यपि । न्यदीधपाम पेटासु पक्वान्नानि विधाय वै ॥१७॥ चुल्लीभ्योऽप्यधुनैवेते कटाहा भुवि सत्पते ! । उत्तारिताः सन्त्यस्माभिरन्यच्चेत्कार्यमुच्यताम् ॥१८॥ भक्ष्यकारवचः श्रुत्वा ज्ञात्वा तत्करलाघवम् । सविस्मयं तान्संस्तुत्य प्राह चान्धसिकान्प्रभुः ॥१९॥ आगमिष्यन्ति हि प्रातर्मुनियूथानि सर्वतः । तस्मादोदनसूपादिसाधने सन्तु तत्पराः ॥२०॥ आज्ञाप्य पाचकानित्थं योषारसवतीगृहम् । जगाम भगवानेकः संस्थाप्य स्वानुगान्बहिः ॥२१॥ दृष्ट्वा तमागतं नाथं सद्य उत्थाय योषितः । आसनार्थं ददुस्तस्मै पट्टकं हेमभूषितम् ॥२२॥

---

જમણા હાથથી નાની નેતરની સોટી ધારણ કરતા, ડાબા હાથને કેડ્ય ઉપર ધારણ કરતા, ઉતાવળી ચાલથી ડાબા અને જમણા તરફ હાલતાચાલતા ઉત્તમ પુષ્પોના હારોની પંક્તિવાળા, ખંજન પક્ષીની માફક ચંચળ દીર્ઘ નેત્રોથી જોવાયો છે ભક્તસમુદાય જેમણે એવા શ્રીહરિ પાકશાળામાં આવ્યા. (૮) પોતાના ભક્તજનોએ અર્પણ કરેલા, મસ્તકમાં ધારણ કરેલા મોળિયામાં તોરાઓની પંક્તિને ઉતાવળી ચાલ દ્વારા હલાવતા ચટ ચટ શબ્દનું આચરણ કરતી પાદુકાઓ જેમના ચરણકમળમાં છે એવા શીઘ્ર ગમન કરતા પાર્ષદોના સમૂહથી આશ્રય કરાયો છે પૃષ્ઠ ભાગ જેમનો એવા અતિ શ્વેત વસ્ત્રો ધારણ કરનારા શ્રીહરિ મહાનસમાં પધાર્યા. (૯) એકદમ ઉત્પન્ન થયેલા તેજને જોઈ શ્રીહરિનું આગમન જાણી બીજી વાતોનો ત્યાગ કરી ત્યાં રહેલા કંદોઈ બ્રાહ્મણોએ શ્રીહરિને પ્રણામ કર્યા. (૧૦) પાક ક્રિયામાં નિપુણ પ્રભાશંકર-દયારામ, બે દાજીભાઈ તેમાં એક પ્રભાશંકરના ભાઈ આ ત્રણ પીપળાવના ભાઈઓ હતા. બીજા દાજીભાઈ બાંધણીના હતા. બેચર, રામચન્દ્ર, લાલજી આ ત્રણ ગઢપુરના હતા; (૧૧) તથા નન્દુ, નન્દલાલ, ગંગાદત્ત, નરોત્તમ, લક્ષ્મીદત્ત, દયારામ, કૃપાશંકર, ઈશ્વર આ આઠ જણ ઉમરેઠના હતા. (૧૨) કાશીરામ દોરાગામના, તુલજારામ વેડીના, શિવયાજ્ઞિક હળવદના, દેવરામ ભાડેરના, જીવો પીઠવડીના, લીલાધર ઉમેરેઠના; (૧૩) પિતામ્બર, અનુપરામ, બે મહેમદાવાદના, રેવાશંકર વિરાટનગરના, વસોના વિપ્ર વાલા ધ્રુવ, વિજયરામ સંજાયા ગામના, બે અંબારામ તેમાં એક મહેમદાવાદના, બીજા સૂરતના (૧૪) નારાયણજય વગેરે વિરાટનગર (ધોળકા) ના તે સર્વે બ્રાહ્મણો ઉતાવળા એકદમ શ્રીહરિને પ્રણામ કરી બન્ને હાથ જોડી શ્રીહરિની આગળ ઉભા રહ્યા. (૧૫) પછી શ્રીહરિએ મહાનસમાં ખાલી લોઢાનાં કઢાયાં જોઈને તમો સર્વે જનો આ રસોડામાં શું કરો છો ? એમ કંદોઈ બ્રાહ્મણોને કહ્યું. (૧૬) હે રાજન્ ! તેઓએ શ્રીહરિને કહ્યું : હે સ્વામિન્ ! હાલમાં જ અમોએ સમગ્ર પકવાનો કરી પટારાઓમાં મૂક્યાં. (૧૭) હે સત્પતે ! અમોએ આ કઢાયા ચૂલાઓ ઉપરથી હાલમાંજ ઉતારેલા છે. જો બીજું કાર્ય હોય તો કહો. (૧૮) હે રાજન્! શ્રીહરિ તેઓનું વચન સાંભળીને તેઓના હસ્તથી તત્કાળ કાર્ય કરવાનું લાઘવ જાણી આશ્ચર્યપૂર્વક તેઓની પ્રશંસા કરી, દાળ-ભાત કરનારા બ્રાહ્મણોને કહેવા લાગ્યા. (૧૯) હે બ્રાહ્મણો ! પ્રાતઃકાળમાં મુનિઓના સમુદાયો સર્વ દેશોથી આવશે જ માટે ભાતદાળ વગેરે તત્કાળ કરવામાં તત્પર થાઓ. (૨૦) હે રાજન્! આ પ્રમાણે શ્રીહરિ રાંધનારા બ્રાહ્મણોને આજ્ઞા આપીને પોતાના પાર્ષદોને બહાર ઉભા રાખી પોતે એકલા શ્રીહરિ બ્રાહ્મણ સ્ત્રીઓના રસોડામાં ગયા. (૨૧) પકવાન કરનાર બ્રાહ્મણની પત્નીઓએ પકવાન જોવા માટે આવેલા પોતાના આત્માના સ્વામી શ્રીહરિને જોઈ તત્કાલ જ ઊભી થઈ સુવર્ણજડિત બાજોઠ શ્રીહરિને બેસવા માટે આપ્યો. (૨૨)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

बद्धाञ्जलिपुटा नत्वा तं तस्थुस्तत्र योषितः । गङ्गा रेवा च यमुना यतिनी लहरि तथा ॥२३॥ मौना रूपा दुर्लभा च नाथी रामाऽमृताऽमरी । गुलाला पुत्तली लाडुर्जीवा मिठ्ठीश्च जाह्नवी ॥२४॥ मान्योदयकुमारी च काशी जयकुमारिका । उमा कुमारी कुशला हेतुर्वाणी सुखा तथा ॥२५॥ एता अन्याश्च बहवो विप्रयोषा दिवानिशम् । पाककर्मप्रसक्तास्ता हरिः प्राह हसन्वचः ॥२६॥ पच्यते साम्प्रतं किन्नु ? भवतीभिर्महाव्रताः ! । इत्युक्तवन्तं तं प्राह ललितैत्य प्रणम्य च ॥२७॥ खाजकादीनि पूर्वेऽह्नि कृतान्यद्य तु फेणिकाः । कृत्वा श्वो भक्ष्यभोज्यानि कुर्वन्त्येताः सतां प्रभो ! ॥२८॥ वयं च क्षत्रियादीनां त्वद्दर्शन उपैष्यताम् । भक्तानां तु कृते कुर्म : पाकमस्मद्गृहे पृथक् ॥२९॥ जया रमा च पाञ्चाली नानी फुल्लजया रतिः । अमरी चामला क्षेमा यमी देव्यजवा तथा ॥३०॥ अदिती रेवती सातिर्मेना मल्ली च जाह्नवी । इत्याद्याः कुर्वते पाकं तत्र क्षत्रस्त्रियो हरे ! ॥३१॥ इति तस्या वचः श्रुत्वा हरिः सञ्जातविस्मयः । पुम्भ्योऽधिकं श्रमं जानन्नस्तौत्ता धूनयञ्छिरः ॥३२॥ आत्मना कथनीयं यत्तत्तु ताभिः स्वयं कृतम् । इति तूष्णीं प्रभुः प्रायात्प्रसन्नः स्वस्य मन्दिरम् ॥३२॥ निष्कुलानन्दमाहूय मुनिं तत्र ततो नृप ! । लब्धाख्यं च नृपामात्यमूचे हरजितं च सः ॥३४॥ आयास्यन्त्यत्र मुनयः प्रातःकाले सहस्रशः । देशान्तरीयाश्च नरा योषितश्च महाव्रताः ॥३५॥ वासस्थानानि सर्वेषां तेषामद्य पृथक्पृथक् । यथोचितं कारयन्तु भवन्तो ह्यत्र पत्तने ॥३६॥ इत्याज्ञप्तास्त्रयस्ते तु गत्वा पुरि यथोचितम् । स्थानानि कारयामासुर्हरेराज्ञानुसारतः ॥३७॥

રસોડામાં રહેલી સ્ત્રીઓ શ્રીહરિને નમસ્કાર કરી બંને હાથ જોડી ઊભી રહી. ગંગા, રેવા, આ બે શ્રીનગરના નિવાસી હતા; યમુના, યતિની આ બે વસોનાં હતાં. લહરી ભુજનગરનાં હતાં. (૨૩) મૌના, રૂપા આ બે ઉમરેઠનાં હતાં, દુર્લભા વડનગરનાં, નાથી ઉમરેઠનાં, રામા, અમૃતા, અમરી એ ત્રણ જણ દુર્ગપુરનાં, ગુલાબ ગાંફનાં, પુત્તલી પીઠવડીનાં,લાડુ, જીવી, મીઠી આ ત્રણેય આખા પીપલાણાના, જાહ્નવી, માની આ બે ત્રાપજ ગામનાં, ઉદયકુમારી વિશનગરનાં, કાશી મહેમદાવાદનાં, જયકુમારી ઉંઝા ગામનાં, ઉષા શ્રીનગરનાં, કુમારી શિયાણીનાં,કુશલા ઉમરેઠનાં, હેતુ પિપળાવનાં, વાણી ઉમરેઠનાં, તથા સુખા મહેમદાવાદનાં, આ અને બીજી ઘણી બ્રાહ્મણ સ્ત્રીઓ રાત્રિદિવસ પાક કરવામાં તત્પર હતી. તે બ્રાહ્મણ સ્ત્રીઓને શ્રીહરિએ હસતા છતાં વચન કહ્યું. (૨૪-૨૫-૨૬) હે મહાવ્રતવાળી! તમો હાલમાં શું કરો છો ? આ પ્રમાણે કહેતા શ્રીહરિને લલિતાએ આવી પ્રણામ કરી કહ્યું. (૨૭) હે પ્રભો ! ખાજાં વગેરે આ સ્ત્રીઓએ કાલે કરેલાં છે. આજે સુતરફેણી કરીને આવતા દિવસે મુનિઓ માટે ભક્ષ્ય-ભોજ્ય વગેરે આ બ્રાહ્મણીઓ કરે છે. (૨૮) અમો ક્ષત્રિયોની સ્ત્રીઓ તમારા દર્શન માટે આવશે એવા ક્ષત્રિયો વગેરેને માટે અમારા ગૃહમાં જુદો પાક કરીએ છીએ, (૨૯) જયા, રમા, પાંચાલી અને નાની એ પ્રસિદ્ધ છે; ફૂલ્લજયા ધોલેરાનાં,રતિ,અમરી, અમલા, ક્ષેમા, યમી, દેવી, આ છ દુર્ગપુરનાં તથા અજવા ધોલેરાનાં, (૩૦) અદિતી જુનાગઢનાં, રેવતી કુંડલનાં, શાંતિ નાગડકાનાં, મેના કરિયાણાનાં, મલ્લી અને જાહ્નવી આ બે સ્થલીગામનાં, હે હરે ! આ વગેરે ક્ષત્રિય સ્ત્રીઓ અમારા ગૃહમાં પાક કરે છે. (૩૧) હે રાજન્! આ પ્રકારે લલિતાનું વચન સાંભળી નવાઈ પામેલા શ્રીહરિ પુરુષોથી પણ અતિશય પરિશ્રમ જાણતા પોતાનું મસ્તક કંપાવતા સતા તે સર્વે રસોઈ કરનારી સ્ત્રીઓની પ્રશંસા કરતા હતા. (૩૨) પોતાને કહેવાનું હતું તે તો તે સ્ત્રીઓએ પોતે જ કર્યું હતું માટે પ્રભુ બોલ્યા વગર જ પ્રસન્ન થઈ પોતાના નિવાસ સ્થાનમાં ગયા. (૩૩) હે રાજન્! પછી શ્રીહરિ નિષ્કુળાનંદ મુનિ, ઉત્તમ રાજાના કારભારી લાધા ઠક્કર અને હરજીને પોતાના મંદિરમાં બોલાવડાવીને બોલ્યા : (૩૪) હે ભક્તો! બ્રહ્મચર્યાદિ મહાવ્રતવાળા હજારો મુનિઓ અને હજારો દેશાંતરથી પુરુષો અને સ્ત્રીઓ આ દુર્ગપત્તનમાં પ્રાતઃકાલે આવશે. (૩૫) તે સર્વેનાં ભિન્ન ભિન્ન નિવાસસ્થાનો તમો હાલમાં જ આ દુર્ગ પત્તનમાં કરાવો. (૩૬) હે રાજન્, આ પ્રકારે શ્રીહરિએ આજ્ઞા કરેલા નિષ્કુળાનંદ વગેરે ત્રણ જણ પુરમાં જઈને શ્રીહરિની આજ્ઞાનુસારે યથાયોગ્ય નિવાસસ્થાનો કરાવતા હતા (૩૭)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

स्वीयभक्तहितमेव चिन्तयन् सोऽप्यशेत दशमक्षणे निशः । तस्य तर्ह्यपि तु योगनिद्रया प्रापि नैव नृप ! सेवनक्षणः ॥३८॥
इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे अन्नकूटोत्सवे भगवत्कृतपाकशालावलोकननामा षष्ठोऽध्यायः ॥६॥

सुव्रत उवाच-**शाखानगरसंस्थानां मुनीनां सा तु शर्वरी । आसीत्कल्पसमा राजंस्तद्दिदृक्षातुरात्मनाम् ॥१॥ कथञ्चिद्रजनीं नीत्वा भगवत्कीर्तनादिभिः । प्रातर्दुर्गपुरं तेऽथ सर्व एव समाययुः ॥२॥ सत्वरं चलतां तेषां वर्त्मान्यासन् हि सर्वतः । न कर्करान्न पाषाणान्न वृतीस्ते त्वजीगणन् ॥३॥ कृपानन्दः स्वयूथेन साकं तूर्णमुपाययौ । त्यागानन्दस्तथैवाऽऽयान्निर्लोभानन्दयोर्द्वयम् ॥४॥ आत्मानन्दः सयूथश्च कृष्णानन्द उपाययौ । स्वयूथेनाथ परमहंसानन्दो मुनिस्तथा ॥५॥ तथैव चिन्मयानन्दो वैराग्यानन्द आययौ । अद्भुतानन्दयुगलं स्वस्वयूथसमन्वितम् ॥६॥ अक्षरानन्दजिज्ञासानन्दौ स्वैर्मुनिभिः सह। स्वयंप्रकाशकानन्दः कैवल्यानन्द आययौ ॥७॥ विरक्तानन्दचिद्रूपानन्दौ स्वस्वर्षिभिर्वृतौ । नरनारायणानन्दः स्वयूथेन च संवृतः ॥८॥ तथा श्रीगुरुचरणरतानन्दो ह्युपागमत् । निजयूथेन पतितपावनानन्द आययौ ॥९॥ सह स्वयूथेन महापुरूषानन्द आगमत् । धीरानन्दशिवानन्दावाधारानन्द एव च ॥१०॥ वासुदेवानन्द आयात्स्वयूथेन समन्वितः । तथा परमचैतन्यानन्द आयाच्च सत्वरम् ॥११॥ विश्वात्मानन्द आयाच्च वैष्णवानन्दयोर्द्वयम् । निर्गुणानन्द आयाच्च सूर्यानन्दः स्वयूथयुक् ॥१२॥ राघवानन्दयुगलं कल्याणानन्द आययौ । स्वयूथयुक्च पुरुषोत्तमानन्द उपाययौ ॥१३॥ तथा भागेश्वरानन्दोऽरूपानन्दः स्वयूथयुक् । अपारानन्द आयाच्चामूर्तानन्दोऽपि सत्वरम् ॥१४॥ गोपेश्वरानन्दपद्मधरानन्दावुपेयतुः । लक्ष्मीनारायणानन्दो**

હે નૃપ ! શ્રીહરિ પણ પોતાના ભક્તોના હિતનો વિચાર કરતા થકા જ રાત્રિનાં દશમા મુહૂર્તમાં થોડીવાર સૂઈ ગયા. તે સમયે પણ યોગનિદ્રાએ શ્રીહરિની સેવા કરવાનો અવસર પામી શકાયો નહિ. (૩૮)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે અન્નકૂટોત્સવે ભગવત્કૃત પાકશાલાવલોકન નામા ષષ્ઠોऽધ્યાયઃ (૬)*

## અધ્યાય : ૭

## શ્રી સ્વામિનારાયણ ભગવાનના દર્શનમાં ઉત્કંઠાવાળા મુનિઓનાં મંડળોનું આગમન તે તે મંડલોનાં નામ કહેવા પૂર્વક વર્ણન કરેલું છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! શાખાનગરમાં રહેલા શ્રીહરિના દર્શનની ઈચ્છાથી આતુર મનવાળા મુનિઓને રાત્રિ કલ્પ સમાન થઈ. (૧) સર્વે મુનિઓ ભગવાનનાં કીર્તનો વગેરેથી મહાકષ્ટથી જ જેમ તેમ રાત્રિ નિર્ગમન કરી પછી દ્વાદશીના પ્રાતઃકાલમાં દુર્ગપુરમાં આવ્યા. (૨) તત્કાલ ચાલતા મુનિઓના માર્ગો સર્વ પ્રદેશોમાં હતા; કારણ કે મુનિઓ તો કાંકરાઓ, પથરાઓ અને વાડ્યો તેને ગણતા નહોતા. (૩) કૃપાનંદ મુનિ પોતાના મંડલે સહિત તત્કાલ આવ્યા, તે જ પ્રકારે પોતાના મંડલે સહિત ત્યાગાનંદ મુનિ આવ્યા. બે નિર્લોભાનંદ મુનિઓ પોતાના મંડલોની સાથે આવ્યા. (૪) પોતાના મંડલે સહિત આત્માનંદ મુનિ આવ્યા પછી પોતાના મંડલે સહિત કૃષ્ણાનંદ મુનિ આવ્યા તથા પરમહંસાનંદ મુનિ મંડલે સહિત આવ્યા. (૫) તે જ પ્રકારે ચિન્મયાનંદ-વૈષ્ણવાનંદ અને બે અદ્‌ભુતાનંદ મુનિઓ પોતપોતાના મંડલે સહિત આવ્યા. (૬) અક્ષરાનંદ મુનિ અને જિજ્ઞાસાનંદ મુનિ પોતાના સંતોની સાથે આવ્યા; સ્વયં પ્રકાશાનંદ મુનિ તથા કૈવલ્યાનંદ મુનિ આવ્યા; (૭) વિરક્તાનંદ, ચિદ્રૂપાનંદ પોતાના સંતોની સાથે આવ્યા, નરનારાયણાનંદ પોતાના મંડલે સહિત આવ્યા. (૮) તથા ગુરુચરણરતાનન્દ આવ્યા. પતિતપાવનાનંદ પોતાના મંડલે સહિત આવ્યા. (૯) મહાપુરુષાનન્દ, ધીરાનન્દ, શિવાનન્દ, આધારાનન્દ, પોતપોતાના મંડલે સહિત આવ્યા. (૧૦) વાસુદેવાનન્દ, અને પરમ ચૈતન્યાનન્દ તત્કાલ પોતાના મંડલે સહિત આવ્યા. (૧૧) વિશ્વાત્માનન્દ અને બે વૈષ્ણવાનન્દ પોતપોતાના મંડલે સહિત આવ્યા. નિર્ગુણાનન્દ અને સૂર્યાનન્દ મુનિ પોતાના મંડલે સહિત આવ્યા. (૧૨) બે રાઘવાનન્દ મુનિઓ અને કલ્યાણાનન્દ મુનિ તથા પુરુષોત્તમાનન્દ મુનિ આ બધા પોતપોતાના મંડલે સહિત આવ્યા. (૧૩) તથા ભાગેશ્વરાનન્દમુનિ, અરૂપાનન્દમુનિ, અપારાનન્દમુનિ, અમૂર્તાનન્દમુનિ તત્કાલ પોતપોતાના મંડલે સહિત આવ્યા. (૧૪) ગોપેશ્વરાનન્દમુનિ, પદ્‌મધરાનન્દમુનિ,

राधेशानन्द आययौ ॥१५॥ नरानन्दश्च परमपुरुषानन्द आययौ। आयाच्च श्वेतवैकुण्ठानन्दः स्वैर्मुनिभिः सह ॥१६॥ महानन्दो जगत्पावनानन्दश्च स्वयूथयुक् । भक्तेशानन्दयूथं च देवेशानन्द आययौ ॥१७॥ हरिप्रकाशानन्दश्च तत्रागच्छत्स्वयूथयुक् । हरिप्रसादानन्दश्च सुधर्मानन्द आययौ ॥१८॥ राधेश्वरानन्द आयान्निजयूथसमन्वितः । सुखप्रकाशानन्दश्च निर्विघ्नानन्द आययौ ॥१९॥ आययावक्षरनिवासानन्दश्च स्वयूथयुक् । धर्मप्रकाशानन्दश्च निर्दोषानन्द आययौ ॥२०॥ सुखरूपानन्दविश्वनाथानन्दौ समीयतुः । तथा परमसन्तोषानन्द आयात्स्वयूथयुक् ॥२१॥ शुद्धज्ञानानन्द आयान्निजयूथसमन्वितः । विजयात्मानन्दमुनिः सयूथश्चाययौ द्रुतम् ॥२२॥ आयाच्च बदरीनाथानन्दः स्वमुनिभिः सह । तथैव परमज्ञानानन्द आयात्स्वयूथयुक् ॥२३॥ निवृत्त्यानन्द आयाच्च सदानन्दः स्वयूथयुक् । तथा त्रिविक्रमानन्दश्चिदानन्दोऽभ्युपाययौ ॥२४॥ नयानन्दः सस्वयूथो ध्यानानन्दस्तथैव च । भजनानन्द आयाच्च परमानन्द आगमत् ॥२५॥ गोविन्दानन्द आयाच्च स्वयूथेन समन्वितः । शमानन्दः सुखानन्दश्चाद्वैतानन्द आययौ ॥२६॥ सयूथश्चाच्युतानन्दोऽनन्तानन्दः स्वयूथयुक् । अचिन्त्यानन्द आगच्छदमोघानन्द आशु च ॥२७॥ अरिहन्त्रानन्द आयाद्गवेन्द्रानन्द आत्मनः । यूथेनानुभवानन्द आदित्यानन्द आययौ ॥२८॥ स्वयूथेनाचलानन्दोऽथाजन्मानन्द आययौ । अखिलानन्द आकाशानन्द आयात्समण्डलः ॥२९॥ स्वयूथेनाखिलब्रह्माण्डेश्वरानन्द आगमत् । ॐकारानन्द आयाच्च वीर्यानन्दः समण्डलः ॥३०॥ विश्वरूपानन्द आयात्प्रज्ञानन्दः स्वयूथयुक् । परमात्मानन्द आयाद्वेदान्तानन्द आययौ ॥३१॥ वैकुण्ठानन्दयूथं च ज्ञानानन्दस्य मण्डलम् । आयाद्भगवदानन्दस्तत्त्वानन्दः स्वयूथयुक् ॥३२॥ निजबोधानन्द आयात्सच्चिदानन्द आययौ । मुकुन्दानन्द आयाच्च क्षमानन्दः स्वयूथयुक् ॥३३॥ पुण्डरीकाक्षानन्दश्च विधात्रानन्द आययौ। अनादिनिधनानन्द उत्तमानन्द आगमत् ॥३४॥ अग्राह्यानन्द आयाच्च शाश्वतानन्द आत्मनः । यूथेनायाद्ध्रुवानन्दोऽप्रमेयानन्द आययौ ॥३५॥ पवित्रानन्द आयाच्च स्थविष्ठानन्द आशु च । हृषीकेशानन्द आयात्प्रभूतानन्द आययौ ॥३६॥ सयूथो नियमानन्दो निर्मानान्द आययौ । निष्कामानन्द आगच्छन्निःस्वादानन्दमण्डलम् ॥३७॥ निःस्नेहानन्द आयाच्च कौशिकानन्द आशु च । अष्टावक्रानन्द आयाद्युक्तानन्दः स्वयूथयुक् ॥३८॥ जगदीशानन्द आयान्निजयूथसमन्वितः । पीताम्बरानन्द आयात्पूर्णानन्दः समण्डलः ॥३९॥ परमेश्वरानन्दश्च दयानन्दः समण्डलः । सर्वेश्वरानन्द आयादीश्वरानन्द आययौ ॥४०॥

---

લક્ષ્મીનારાયણાનન્દ, રાધેશાનન્દ, નરાનન્દ, પરમપુરુષાનન્દ, શ્વેતવૈકુંઠાનન્દ, પરાનન્દ, જગતપાવનાનન્દ, ભક્તેશાનન્દ, દેવેશાનન્દ મુનિ, આ બધા મુનિઓ પોતપોતાના મંડલના સાધુઓ સહિત આવ્યા. (૧૫-૧૬-૧૭) હરિપ્રકાશાનન્દ, હરિપ્રસાદાનંદ, સુધર્માનન્દ, રાધેશ્વરાનન્દ, સુખપ્રકાશાનન્દ, નિર્વિઘ્નાનન્દ, અક્ષરનિવાસાનન્દ, ધર્મપ્રકાશાનન્દ, નિર્દોષાનન્દ, સુખસ્વરૂપાનન્દ, વિશ્વનાથાનન્દ, પરમસંતોષાનન્દ, શુદ્ધજ્ઞાનાનન્દ, વિજયાત્માનન્દ આ બધા મુનિઓ પોતપોતાના મંડલે સહિત આવતા હતા. (૧૮-૧૯-૨૦-૨૧-૨૨) બદરિનાથાનન્દ, પરમજ્ઞાનાનન્દ, નિવૃત્ત્યાનન્દ, સદાનન્દ, ત્રિવિક્રમાનન્દ, ચિદાનન્દ, નયાનન્દ, ધ્યાનાનન્દ, ભજનાનન્દ, પરમાનન્દ, ગોવિન્દાનન્દ, શમાનન્દ, સુખાનન્દ, અદ્વૈતાનન્દ, અચ્યુતાનન્દ, અનન્તાનન્દ, અમોઘાનન્દ આ બધા મુનિઓ પોતપોતાના મંડલે સહિત આવ્યા. (૨૩-૨૪-૨૫-૨૬-૨૭) અરિહંત્રાનન્દ, ગવેન્દ્રાનન્દ, અનુભવાનન્દ, આદિત્યાનન્દ, અચલાનંદ, અજન્માનંદ, અખિલાનંદ, આકાશાનંદ, અખિલ બ્રહ્માંડેશ્વરાનંદ, ૐકારાનંદ, વીર્યાનંદ, વિશ્વરૂપાનંદ, પ્રજ્ઞાનંદ, પરમાત્માનંદ, વેદાન્તાનંદ, વૈકુંઠાનંદ, જ્ઞાનાનંદ, ભગવદાનંદ, તત્ત્વાનંદ, નિજબોધાનંદ, સચ્ચિદાનંદ, મુકુન્દાનંદ, ક્ષમાનંદ, પુંડરીકાક્ષાનંદ, વિધાત્રાનંદ, અનાદિનિધનાનંદ, ઉત્તમાનંદ, અગ્રાહ્યાનંદ, શાશ્વતાનંદ, ધ્રુવાનંદ, અપ્રમેયાનંદ, પવિત્રાનંદ, સ્થવિષ્ઠાનંદ, હૃષીકેશાનંદ, પ્રભુતાનંદ, નિયમાનંદ, નિર્માનાનંદ, નિષ્કામાનંદ, નિઃસ્વાદાનંદ, નિઃસ્નેહાનંદ, કૌશિકાનંદ, અષ્ટાવક્રાનંદ, યુક્તાનંદ, જગદીશાનંદ, પીતામ્બરાનંદ, પૂર્ણાનંદ, પરમેશ્વરાનંદ, દયાનંદ, સર્વેશ્વરાનંદ, ઈશ્વરાનંદ, આ બધા મુનિઓ પોતપોતાના મંડલોએ સહિત આવ્યા. (૨૮ થી ૪૦)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुरेश्वरानन्द आयाद्धर्मानन्दश्च यूथयुक् । मुनीश्वरानन्द आयान्नृहर्यानन्द आशु च ॥४१॥ बलभद्रानन्द आयात्प्रकाशानन्द आत्मनः । यूथेन सिद्धानन्दश्च शङ्करानन्द आययौ ॥४२॥ विश्रामानन्द आगच्छत्केशवानन्दमण्डलम् । कपिलेश्वरानन्दश्च स्ववशानन्द आययौ ॥४३॥ द्रष्टृप्रकाशानन्दश्च स्वयूथेन सहागमत् । सज्जनानन्द आयाच्च माधवानन्द आययौ ॥४४॥ साङ्ख्यानन्दः प्रभानन्दो भास्करानन्द आययौ । ऋषभानन्द आगच्छत्सगुणानन्द आशु च ॥४५॥ रमेश्वरानन्द आयान्नृसिंहानन्द आगमत् । निर्द्वन्द्वानन्द आगच्छद्विदेहानन्द आययौ ॥४६॥ निरालम्बानन्द आयाद्विज्ञानानन्द आययौ । निःसन्देहानन्द आयाद्विश्वासानन्द आययौ ॥४७॥ निर्विकारानन्द आयाद्दीप्तानन्दः समण्डलः । निरपेक्षानन्द आयाद्देवानन्दस्तथाययौ ॥४८॥ निरन्नानन्द आगच्छल्लक्ष्मणानन्द आशु च । सत्तानन्दो नीलकण्ठानन्दस्तत्राययौ द्रुतम् ॥४९॥ निर्मोहानन्द आगच्छद्भूधरानन्द आययौ । योगानन्दस्य यूथं च भद्रानन्दस्य मण्डलम् ॥५०॥ अविनाशानन्दयूथमच्छेद्यानन्दमण्डलम् । मायातीतानन्दयूथं मानदानन्दमण्डलम् ॥५१॥ हंसानन्दः समागच्छत्प्रद्युम्नान्द आययौ । मञ्जुकेशानन्दयूथं प्रतोषानन्द आगमत् ॥५२॥ हरिभजनानन्दश्च निर्मलानन्दमण्डलम्। हयग्रीवानन्द आयाच्छान्तानन्दश्च यूथयुक् ॥५३॥ नरोत्तमानन्दयूथं प्रशान्तानन्दमण्डलम् । नारायणानन्द आयाद्धन्यानन्दश्च यूथयुक् ॥५४॥ सवित्रानन्द आयाच्च सुज्ञानानन्द आययौ । धरणीधरानन्दश्च सत्कर्त्रानन्द आययौ ॥५५॥ सत्येश्वरानन्द आयाज्ज्योतिषानन्द आगमत्। प्रबोधानन्द आयाच्च प्रभ्वानन्दः समण्डलः ॥५६॥ रामचन्द्रानन्दयूथं सर्वज्ञानन्दमण्डलम् । पद्मनाभानन्दयूथं तापसानन्द आययौ ॥५७॥ शून्यातीतानन्दयूथं तूरीयानन्द आगमत् । स्वस्वरूपानन्दयूथं वामनानन्दमण्डलम् ॥५८॥ जगन्निवासानन्दश्च विवेकानंद आययौ । अक्षयरूपानन्दश्च मङ्गलानन्द आगमत् ॥५९॥ श्वेतद्वीपानन्दयूथमव्ययानन्दमण्डलम् । गोलोकेश्वरानन्दश्च सुव्रतानन्द आययौ ॥६०॥ तुरीयातीतानन्दश्च ह्यभेदानन्द आगमत् । दृढव्रतानन्द आयाद्विचारानन्द आशु च ॥६१॥ निर्विशेषानन्दयूथं क्षेमानन्दस्य मण्डलम् । अनिरुद्धानन्दयूथं जिष्ण्वानन्दश्च यूथयुक् ॥६२॥ मधुसूदनानन्दश्च विष्ण्वानन्दः समभ्यगात् । अव्ययात्मानन्दयूथं मुक्तिदानन्द आययौ ॥६३॥ संशितव्रतानन्दश्च वरदानन्द आशु च । ज्ञानवल्लभानन्दश्च सुपर्णानन्द आगमत् ॥६४॥ विश्वाधारानन्दयूथं दुर्लभानन्दमण्डलम् । घनश्यामानन्दयूथं प्रसादानन्द आगमत् ॥६५॥ दहरानन्द आयाच्चाप्यैश्वर्यानन्दमण्डलम् । अवदातानन्दयूथमलिङ्गानन्दमण्डलम् ॥६६॥ राधाकृष्णानन्दयूथं धर्मात्मानन्दमण्डलम् । आयाद्धरिहयानन्दो व्रजेशानन्दमण्डलम् ॥६७॥ बालमुकुन्दानन्दश्चोपशमानन्द आययौ । सङ्कर्षणानन्दयूथं श्रीधरानन्दमण्डलम् ॥६८॥ जनार्दनानन्दयूथममृतानन्दमण्डलम् । यज्ञेश्वरानन्दयूथं भूतात्मानन्द आगमत् ॥६९॥ पूतात्मानन्दयूथं च पुरुषानन्दमण्डलम्। आयात्प्रधानपुरुषेश्वरानन्दः समण्डलः ॥७०॥

---

સુરેશ્વરાનંદ, ધર્માનંદ, મુનીશ્વરાનંદ, નરહર્યાનંદ, બલભદ્રાનંદ, પ્રકાશાનંદ, સિદ્ધાનંદ, શંકરાનંદ, વિશ્રામાનન્દ, કેશવાનન્દ, કપિલેશ્વરાનન્દ, સ્વવશાનન્દ, દૃષ્ટૃપ્રકાશાનન્દ, સજ્જનાનન્દ, માધવાનન્દ, સાંખ્યાનન્દ, પ્રભાનન્દ, ભાસ્કરાનંદ, ઋષભાનંદ, સગુણાનંદ, રમેશ્વરાનંદ, નૃસિંહાનન્દ, નિર્દ્વન્દ્વાનન્દ, વિદેહાનન્દ, નિરાલમ્બાનન્દ, વિજ્ઞાનાનન્દ, નિઃસંદેહાનન્દ, વિશ્વાસાનંદ, નિર્વિકારાનન્દ, દીપ્તાનંદ, નિરપેક્ષાનંદ, દેવાનંદ, નિરન્નાનંદ, લક્ષ્મણાનન્દ, સત્તાનન્દ, નીલકંઠાનન્દ, નિર્વાહાનન્દ, ભૂધરાનન્દ, યોગાનન્દ, ભદ્રાનન્દ, અવિનાશાનન્દ, અછેદ્યાનન્દ, માયાતીતાનન્દ, માનદાનન્દ, હંસાનંદ, પ્રદ્યુમ્નાનન્દ, મંજુકેશાનંદ, પ્રતોષાનંદ, આ બધા મુનિઓ પોતપોતાના મંડલે સહિત આવ્યા ( ૪૧ થી ૫૨ )

હરિભજનાનન્દ, નિર્મલાનંદ, હયગ્રીવાનંદ, શાન્તાનંદ, નરોત્તમાનંદ, પ્રશાન્તાનંદ, નારાયણાનંદ, ધન્યાનંદ, સવિત્રાનંદ, સુજ્ઞાનાનંદ,ધરણીધરાનંદ, સત્કર્ત્રાનંદ, સત્યેશ્વરાનંદ, જ્યોતિષાનંદ, પ્રબોધાનંદ, પ્રભ્વાનંદ, રામચંદ્રાનંદ, સર્વજ્ઞાનંદ, પદ્મનાભાનંદ, તાપસાનંદ, શૂન્યાતીતાનંદ, તુરીયાનંદ, સ્વસ્વરૂપાનંદ, વામનાનંદ, જગન્નિવાસાનંદ, વિવેકાનંદ, અક્ષયરૂપાનંદ, મંગલાનંદ, શ્વેતદ્વીપાનંદ, અવ્યયાનંદ, ગોલોકેશ્વરાનંદ, સુવ્રતાનંદ, તુરીયાતીતાનંદ, અભેદાનંદ, દૃઢવ્રતાનંદ, વિચારાનંદ, નિર્વિશેષાનંદ, ક્ષેમાનંદ, અનિરૂદ્ધાનંદ, જીષ્ણ્વાનંદ, મધૂસૂદનાનંદ, વિષ્ણ્વાનંદ, અવ્યયાત્માનંદ, મુક્તિદાનંદ, સંશિતવ્રતાનંદ, વરદાનંદ, જ્ઞાનવલ્લભાનંદ, સુપર્ણાનંદ, વિશ્વાધારાનંદ, દુર્લભાનંદ, ઘનશ્યામાનંદ, પ્રસાદાનંદ, દહરાનંદ, ઐશ્વર્યાનંદ, અવદાતાનંદ, અલીંગાનંદ, રાધાકૃષ્ણાનંદ, ધર્માત્માનંદ, હરિહયાનંદ, વ્રજેશાનંદ, બાલમુકુન્દાનંદ, ઉપશમાનંદ, સંકર્ષણાનંદ, શ્રીધરાનંદ, જનાર્દનાનંદ, અમૃતાનંદ, યજ્ઞેશ્વરાનંદ, ભૂતાત્માનંદ, પૂતાત્માનંદ, પુરુષાનંદ, પ્રધાનપુરુષેશ્વરાનંદ,

हिरण्यगर्भानन्दश्च भावनानन्द आययौ । दुराधर्षानन्द आयात्प्रभवानन्द आशु च ॥७१॥ इशानानन्द आयाच्च भूगर्भानन्द आगमत् । प्राणदानन्द आगच्छत्कृतज्ञानन्द आययौ ॥७२॥ संवत्सरानन्दयूथं सुरेशानन्दमण्डलम् । त्रिगुणातीतानन्दश्च बुद्धानन्दस्तथाययौ ॥७३॥ वृषाकप्यानन्दयूथं वस्वानन्दस्य मण्डलम् । वृषकर्मानन्द आयात्समात्मानन्द आगमत् ॥७४॥ सहस्रशीर्षानन्दश्च सर्वगानन्द आययौ । सर्वविदानन्दयूथं सामगानन्द आगमत् ॥७५॥ विष्वक्सेनानन्दयूथं वेदानन्दस्य मण्डलम् । धर्माध्यक्षानन्द आयाद्वेदाङ्गानन्द आययौ ॥७६॥ लोकाध्यक्षानन्दयूथं भ्राजिष्ण्वानन्दमण्डलम् । चतुर्व्यूहानन्दयूथं सहिष्ण्वानन्द आगमत् ॥७७॥ चतुरात्मानन्द आयादनघानन्द आययौ । चतुर्भुजानन्दयूथं विजयानन्द आगमत् ॥७८॥ ऊर्जितानन्दयूथं च कारणानन्दमण्डलम् । उपेन्द्रानन्द आयाच्च धृतात्मानन्द आययौ ॥७९॥ अतीन्द्रियानन्द आयात्सत्त्वस्थानन्द आगमत् । महावीर्यानन्दयूथं तत्राऽऽगच्छच्च सत्वरम् ॥८०॥ अयोनिजानन्द आयात्सात्त्वतानन्द आशु च । महोत्साहानन्दयूथं विश्रुतानन्दमण्डलम् ॥८१॥ अनिर्देश्यानन्दयूथं निमेषानन्दमण्डलम्। महेष्वासानन्दयूथमुदारानन्द आययौ ॥८२॥ महाशक्त्यानन्दयूथं विश्वानन्दस्तथागमत् । दुर्मर्षणानन्द आयाद्धामानन्दः स्वयूथयुक् ॥८३॥ गुरूत्तमानन्दयूथं भूषणानन्दमण्डलम् । सहस्राक्षानन्दयूथमनिलानन्द आययौ ॥८४॥ तत्रायौ सत्यपराक्रमानन्दस्य मण्डलम् । निवृत्तात्मानन्द आयात्संवृतानन्दमण्डलम् ॥८५॥ सत्कृतानन्दयूथं चासङ्ख्येयानन्दमण्डलम् । विशिष्टानन्दयूथं च सिद्धार्थानन्दमण्डलम् ॥८६॥ सिद्धसङ्कल्पानन्दश्च सिद्धिदानन्द आययौ। वर्धनानन्द आगच्छद्विविक्तानन्द आशु च ॥८७॥ श्रुतिसागरानन्दश्च महेन्द्रानन्द आगमत् । बृहद्रूपानन्द आयाद्वसुदानन्द आशु च ॥८८॥ जगन्नाथानन्दयूथं सन्न्यासानन्दमण्डलम् । प्रकाशात्मानन्दयूथं प्रतापानन्द आययौ ॥८९॥ अव्यक्तरूपानन्दश्च पावनानन्द आययौ । तथाऽनन्तजिदानन्दः क्रोधहानन्द आगमत् ॥९०॥ रामानुजानन्दयूथं प्रथितानन्दमण्डलम् । आयादशोकानन्दश्च सयूथस्तत्र सत्वरम् ॥९१॥ दामोदरानन्द आयादकामानन्दमण्डलम्। अनुकूलानन्दयूथमतुलानन्द आययौ ॥९२॥ आदिदेवानन्दयूथं श्रीगर्भानन्दमण्डलम् । महाभागानन्द आयान्निर्वाणानन्द आगमत् ॥९३॥ व्यवसायानन्द आयात्सन्तोषानन्द आययौ । नन्दानन्दः स्थिरानन्दो विरामानन्द आगमत् ॥९४॥ निर्मत्सरानन्द आयाच्छत्रुघ्नानन्दमण्डलम् । सुदर्शनानन्दयूथं विशालानन्द आययौ ॥९५॥ परमेष्ठ्यानन्द आयाद्दक्षानन्दश्च यूथयुक् । धर्मयूपानन्दयूथमिज्यानन्दस्य मण्डलम् ॥९६॥ महामखानन्दयूथं विमुक्तानन्दमण्डलम् । सुमुखानन्द आयाच्च सूक्ष्मानन्दश्च यूथयुक् ॥९७॥ जितक्रोधानन्द आयाद्ब्रह्मण्यानन्दमण्डलम् । मनोहरानन्दयूथं दर्पहानन्द आययौ ॥९८॥ भक्तवत्सलानन्दश्च शुभाङ्गानन्द आगमत् । ज्ञानगम्यानन्द आयाच्छान्तिदानन्द आययौ ॥९९॥

---

હિરણ્યગર્ભાનંદ, ભાવનાનંદ, દુરાધર્ષાનંદ, પ્રભવાનંદ, ઈશાનાનંદ, ભૂગર્ભાનંદ, પ્રાણદાનંદ, કૃતજ્ઞાનંદ, સંવત્સરાનંદ, સુરેશાનંદ, ત્રિગુણાતીતાનંદ, બુદ્ધાનંદ, વૃષાકપ્યાનંદ, વસ્વાનંદ, વૃષકર્માનંદ, સમાત્માનંદ, સહસ્રશીર્ષાનંદ, સર્વગાનંદ, સર્વવિદાનંદ, સામગાનંદ, વિશ્વક્સેનાનંદ, વેદાનંદ, ધર્માધ્યક્ષાનંદ, વેદાંગાનંદ, લોકાધ્યક્ષાનંદ, ભ્રાજીષ્ણવાનંદ, ચતુર્વ્યૂહાનંદ, સહિષ્ણવાનંદ, ચતુરાત્માનંદ, અનઘાનંદ, ચતુર્ભુજાનંદ, વિજયાનંદ, ઊર્જીતાનંદ, કારણાનંદ, ઉપેન્દ્રાનંદ, ધૃતાત્માનંદ, અતીન્દ્રિયાનંદ, સત્ત્વસ્થાનંદ, મહાવીર્યાનંદ, અયોનિજાનંદ, સાત્ત્વતાનંદ, મહોત્સાહાનંદ, વિશ્રુતાનંદ, અનિર્દેશ્યાનંદ, નિમેષાનંદ, મહેષ્વાસાનંદ, ઉદારાનંદ, મહાશક્ત્યાનંદ, વિશ્વાનંદ, દુર્મર્ષણાનન્દ, ધામાનંદ, ગુરૂત્તમાનંદ; ભૂષણાનંદ, સહસ્ત્રાક્ષાનંદ, અનિલાનંદ, સત્યપરાક્રમાનંદ, નિવૃત્તાત્માનંદ, સંવૃતાનંદ, સત્કૃતાનંદ, અસંખ્યેયાનંદ, વિશિષ્ટાનંદ, સિદ્ધાર્થાનંદ, સિદ્ધસંકલ્પાનંદ, સિદ્ધિદાનન્દ, વર્ધનાનન્દ, વિવિક્તાનંદ, શ્રુતિસાગરાનંદ, મહેન્દ્રાનંદ, બૃહદ્રૂપાનંદ, વસુદાનંદ, જગન્નાથાનંદ, સંન્યાસાનંદ, પ્રકાશાત્માનંદ, પ્રતાપાનંદ, અવ્યક્તારૂપાનંદ, પાવનાનંદ, અનન્તજીદાનંદ, ક્રોધહાનંદ, આ બધા મુનિઓ પોતપોતાના મંડલે સહિત આવ્યા. (૫૩ થી ૯૦)

રામાનુજાનંદ, પ્રથિતાનંદ, અશોકાનંદ, દામોદરાનંદ, અકામાનંદ, અનુકૂલાનંદ, અતુલાનંદ, આદિદેવાનંદ, શ્રીગર્ભાનંદ, મહાભાગાનંદ, નિર્વાણાનંદ, વ્યવસાયાનંદ, સંતોષાનંદ, નંદાનંદ, સ્થિરાનંદ, વિરામાનંદ, નિર્મત્સરાનંદ, શત્રુઘ્નાનંદ, સુદર્શનાનંદ, વિશાલાનંદ, પરમેષ્ઠ્યાનંદ, દક્ષાનન્દ, ધર્મયૂપાનંદ, ઈજ્યાનન્દ, મહામખાનન્દ, વિમુક્તાનન્દ, સુમુખાનન્દ, સૂક્ષ્માનન્દ, જીતક્રોધાનન્દ, બ્રહ્મણ્યાનન્દ, મનોહરાનન્દ, દર્પહાનન્દ, ભક્તવત્સલાનન્દ, શુભાંગાનંદ, જ્ઞાનગમ્યાનન્દ,

पुरातनानन्दयूथं सत्कीर्त्यानन्द आगमत् । सत्यसन्धानन्द आयाद्विशोकानन्द आययौ ॥१००॥ प्रमोदनानन्द आयान्नन्दनानन्द आशु च । सत्यधर्मानन्द आयात् सद्गत्यानन्द आययौ ॥१०१॥ गदाधरानन्दयूथं पुण्यानन्दः स्वयूथयुक्। आयाच्चक्रधरानन्दो दुर्जयानन्दमण्डलम् ॥१०२॥ सनातनानन्दयूथं कुमुदानन्द आगमत् । तूर्णं तत्राऽऽगमच्छिन्नसंशयानन्दमण्डलम् ॥१०३॥ विशुद्धात्मानन्दयूथमक्षोभ्यानन्दमण्डलम् । त्रिलोकेशानन्द आयात्सुलभानन्द आशु च ॥१०४॥ त्रिलोकात्मानन्द आयाद्योगीशानन्द आगमत् । आदित्यवर्णानन्दश्च विशुद्धानन्द आययौ ॥१०५॥ धनञ्जयानन्दयूथं शूद्धानन्दश्च यूथयुक्। पुण्यकीर्त्यानन्द आयात्सुनेत्रानन्द आययौ ॥१०६॥ भूतावासानन्दयूथं सद्भूत्यानन्दमण्डलम् । शूद्धात्मानन्दयूथं च विद्यानन्दस्तथाऽययौ ॥१०७॥ दिव्यमूर्त्यानन्द आयाच्छरण्यानन्द आशु च । लोकनाथानन्द आयात्साक्ष्यानन्दश्च सत्वरम् ॥१०८॥ महाकर्मानन्दयूथं सुहृदानन्दमण्डलम् । चतुर्वेदानन्दयूथं सत्त्वानन्दस्तथागमत् ॥१०९॥ तथेश्वरेश्वरानन्द उद्भवानन्द आययौ । महाभूतानन्दयूथं तत्रागच्छच्च सत्वरम् ॥११०॥ आनन्दानन्दयूथं च यज्ञानन्दस्य मण्डलम्। तत्राऽऽगच्छच्च परमप्रकाशानन्दमण्डलम् ॥१११॥ योगेश्वरानन्द आयाद्धर्यानन्दश्च यूथयुक् । विश्वचैतन्यानन्दश्च क्षेत्रज्ञानन्द आययौ ॥११२॥ तद्रूपानन्द आगच्छत्सत्यानन्दस्य मण्डलम् । अखण्डानन्दयूथं च चैतन्यानन्दमण्डलम् ॥११३॥ श्रीनिवासानन्द आयात्सद्धर्मानन्द आशु च । तथा भक्तेश्वरानन्द इशानन्दश्च यूथयुक् ॥११४॥ रासेश्वरानन्दयूथं भावानन्दस्य मण्डलम् । हिरणमयानन्दयूथं भूमानन्दस्तथाययौ ॥११५॥ एवं ते मुनयः सर्वे स्वस्वयूथसमन्विताः । अन्ये च पुरुषा योषा आययुर्दुर्गपत्तनम् ॥११६॥ शकुनानतिमङ्गलावहांस्तैर्बहुशो वर्त्मनि भूप ! जायमानान् । प्रसमीक्ष्य हरीक्षणक्षणः स्वान् झटिति प्राप्त इति स्म मन्यते वै ॥११७॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे अन्नकूटोत्सवे मुनिमण्डलागमननामा सप्तमोऽध्यायः ॥७॥

---

શાંતિદાનન્દ, પુરાતનાનન્દ, સત્કીર્ત્યાનન્દ, સત્યસન્ધાનન્દ, વિશોકાનન્દ, પ્રમોદનાનન્દ, નંદનાનંદ, સત્યધર્માનંદ, સદ્ગત્યાનન્દ, ગદાધરાનન્દ, પુણ્યાનન્દ, ચક્રધરાનન્દ, દુર્જયાનન્દ, સનાતનાનન્દ, કુમુદાનન્દ, છિન્નસંશયાનન્દ, આ સર્વે મુનિઓ પોતપોતાના મંડલે સહિત આવ્યા ( ૯૧ થી ૧૦૩) વિશુદ્ધાત્માનંદ, અક્ષોભ્યાનંદ, ત્રિલોકેશાનંદ, સુલભાનંદ, ત્રિલોકાત્માનંદ, યોગીશાનન્દ, આદિત્યવર્ણાનંદ, વિશુદ્ધાનંદ, ધનંજયાનંદ, શુદ્ધાનંદ, પુણ્યકીર્ત્યાનંદ, સુનેત્રાનંદ, ભૂતાવાસાનંદ, સદ્ભૂત્યાનંદ, શુદ્ધાત્માનંદ, વિદ્યાનંદ, દિવ્યમૂર્ત્યાનંદ, શરણ્યાનંદ, લોકનાથાનંદ, સાક્ષ્યાનંદ, મહાકર્માનંદ, સુહૃદાનંદ, ચતુર્વેદાનંદ, સત્ત્વાનંદ, ઈશ્વરાનંદ, ઉદ્ભવાનંદ, મહાભૂતાનંદ, આનંદાનંદ, યજ્ઞાનંદ, પરમપ્રકાશાનંદ, યોગેશ્વરાનંદ, હર્યાનંદ, વિશ્વચૈતન્યાનંદ, ક્ષેત્રજ્ઞાનંદ, તદ્રૂપાનંદ, સત્યાનંદ, અખંડાનંદ, ચૈતન્યાનંદ, શ્રીનિવાસાનંદ, સદ્ધર્માનંદ, ભક્તેશ્વરાનંદ, ઈશાનંદ, રાસેશ્વરાનંદ, ભાવાનંદ, હિરણ્યમયાનંદ, ભૂમાનંદ, આ બધા મુનિઓ પોતપોતાના મંડલો સહિત, તે સર્વે કૃપાનંદ વગેરે (૪૨૬) ચારસો ને છવ્વીસ મુનિઓ ગઢપુરમાં આવ્યા. (અહીં પૂર્વોક્ત મુનિઓને સમાન નામ હોવાથી બ્રહ્મચારીઓ મંડળ સહિત આવ્યા એમ નથી કહ્યું છતાં પણ તેઓ પણ આવ્યા એમ જાણી લેવું) તથા અન્ય હરિભક્ત પુરુષો અને સ્ત્રીઓ પણ દુર્ગપુરમાં આવ્યા. (૧૦૪ થી ૧૧૬)

હે રાજન્ ! મુનિઓ વગેરે હરિજનોએ માર્ગમાં થતા અતિ મંગલકારી ઘણા શુકનો જોઈને પ્રત્યક્ષ શ્રીહરિનાં દર્શનનો સમય તત્કાલ પ્રાપ્ત થયેલો ચોક્કસ જાણ્યો. (૧૧૭)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે અન્નકૂટોત્સવે મુનિમંડલાગમન નામા સપ્તમોઽધ્યાયઃ (૭)*

सुव्रत उवाच-**ब्राह्मे मुहूर्त उत्थाय भगवानथ सर्वदृक् । कृत्वा शौचविधिं स्नात्वा नित्यकर्म समाचरत् ॥१॥ स्वपीठेऽथ बहिर्वेद्यां स्वास्तृते निजपार्षदैः । उपाविशत्स्वभक्तानां नयनानन्दवर्धनः ॥२॥ त्यागिभिर्गृहिभिश्चासौ प्रणतश्च पदातिभिः । योषाभिश्च दधौ हस्ते कृष्णस्मरणमालिकाम् ॥३॥ कृतनित्यविधिस्तान्नृपतिः समुपेत्य तम् । चन्दनाक्षतपुष्पाद्यैरुपचारै : पुपूज ह ॥४॥ वर्णिराट् पार्श्वसंस्थस्तं गृहीतसितचामरः । मुकुन्दो वीजयामास व्यजनेन स चोत्तमः ॥५॥ मालिकः स्थविरो वाट्या हरनाथ उपेत्य तम् । धारयामास भक्त्यैव पौष्पान्हारांश्च शेखरान् ॥६॥ तावत्तत्रागमत्तूर्णं ललिताप्रेषिता रतिः । वासःपोटलिकां कक्षे दधानाऽऽच्छाद्य वाससा ॥७॥ प्रणम्य दूरे तिष्ठन्तीं तामवेक्ष्य हरिर्हसन् । किमेतदस्तीत्यप्राक्षीत्तदिङ्गितविदीश्वरः ॥८॥ सोमाद्याः प्राहुरनया नूतनान्यंशुकानि ते । धनत्रयोदशीत्यद्याऽऽनीतानि स्वीकुरु प्रभो ! ॥९॥ तानाह सोऽद्य तु दिने कृष्णभूषामृजोत्सवः । क्रियतां नूत्नवासांसि धास्येऽहं प्रतिपद्दिने ॥१०॥ इत्थं वदत्येव हरौ मुनींस्तान् क्रोशार्धदूरे पथि वीक्ष्य योधः । उपागतान् गोप उपेत्य दुर्गे दौवारिकं तत्त्वरितं जगाद ॥११॥ स्नात्वा व्रजन्नच्युतसन्निधानं कृतोर्ध्वपुण्ड्रो जलपात्रहस्तः । शुश्राव मुन्यागमनं तदैव ससम्भ्रमं तन्मयरामभट्टः ॥१२॥ अथ द्रवन्प्रस्खलदङ्घ्रिराशु समुच्छ्वसन्बद्धकटिः सहासः । बद्धाञ्जलिः प्राह हरिं समेत्य स चिन्तयन्तं हृदि तत्तदेव ॥१३॥ प्रभो ! मुनीनामुपशल्य एव वृन्दानि सङ्घा अपि गौर्जराद्याः । समागताः सन्ति महोत्सवोऽद्य त्वद्दर्शनेनास्तु तदीक्षणानाम् ॥१४॥**

## અધ્યાય : ૮

## મુનિઓનાં મંડળોને સન્મુખ ગયેલા શ્રીહરિના દર્શનનો આનંદ પ્રેમના અતિશય વર્ણનથી કહેલો છે.

**સુવ્રત મુનિ બોલ્યા :** હે રાજન્ ! સર્વજ્ઞ શ્રીહરિ બ્રાહ્મમુહૂર્તમાં ઊઠીને શૌચવિધિ કરી ઉન્મત્ત ગંગામાં સ્નાન કરી સંધ્યા વંદના આદિ નિત્યકર્મ કરતા હતા. (૧) પછી પોતાના ભક્તોનાં નેત્રોના આનંદની વૃદ્ધિ કરનારા શ્રીહરિ બહાર લીંબડાના વૃક્ષ નીચે ઓટા ઉપર પોતાના પાર્ષદોએ ઓછાડે સહિત બિછાવેલા સિંહાસનમાં વિરાજમાન થયા. (૨) મુક્તાનંદાદિ ત્યાગીઓ અને ગૃહસ્થો તથા પાર્ષદો તથા સ્ત્રીઓએ નમસ્કાર કરાયેલા શ્રીહરિ જમણા હાથમાં તુલસીની માળા ધારણ કરતા હતા. (૩) જેમણે નિત્યવિધિ કરી છે એવા ઉત્તમ રાજાએ શ્રીહરિની સમીપમાં આવી ચંદન, અક્ષત સુગંધીમાન પુષ્પોના હારો અને નીરાજન વગેરે ઉપચારોથી પૂજન કર્યું. (૪) સમીપમાં રહેલા મુકુંદ નામના વર્ણીન્દ્ર હાથમાં શ્વેત ચામર ગ્રહણ કરી શ્રીહરિને ચામરથી અને ઉત્તમરાજા વીંઝણાથી વાયરો નાખતા હતા. (૫) વૃદ્ધ હરનાથ નામના માળી લક્ષ્મીવાડીથી આવીને ઉત્તમ પુષ્પોના હારો, ગુચ્છો અને તોરાઓ ભક્તિપૂર્વક ધારણ કરાવતા હતા. (૬) તે સમયમાં લલિતાએ પ્રેરણા કરેલી, વસ્ત્રોની પોટલીને પોતે ઓઢેલા વસ્ત્રથી ઢાંકીને બગલમાં ધારણ કરી રહેલી રતિ નામની સ્ત્રી શ્રીહરિની સમીપમાં આવી. (૭) શ્રીહરિને નમસ્કાર કરી (લજ્જાપૂર્વક) દૂર ઉભી રહેલી રતિને જોઈને હસતાં તેમના અભિપ્રાયને જાણનારા શ્રીહરિએ આ બગલમાં શું છે ? આ પ્રમાણે પૂછ્યું. (૮) સોમાદિ પાર્ષદો બોલ્યા : હે પ્રભુ ! આજે દ્વાદશીને દિવસે અમાવાસ્યાનો ક્ષય હોવાથી ધનત્રયોદશી છે. માટે તમારે માટે આ રતિએ લાવેલાં નવીન વસ્ત્રો અંગીકાર કરો. (૯) હે રાજન્ ! સોમાદિ પાર્ષદોને શ્રીહરિએ કહ્યું : હે ભક્તો ! આજે શ્રીકૃષ્ણના ભૂષણનો માર્જનોત્સવ કરો. હું પ્રતિપદાને દિવસે નૂતન વસ્ત્રો ધારણ કરીશ. (૧૦) હે રાજન્ ! શ્રીહરિ આ પ્રમાણે બોલ્યા ત્યારે જોધાભક્તે અર્ધો ગાઉ દૂરથી માર્ગમાં આવતા મુનિઓને જોઈને ઉત્તમરાજાના દરબારમાં આવી મુનિઓનું આગમન દ્વારપાલને ઉતાવળથી કહ્યું. (૧૧) તે સમયે ઉન્મત ગંગામાં સ્નાન કરી શ્રીહરિની સમીપમાં જતા, લલાટાદિમાં ઊર્ધ્વપુંડ્ર ચાંલ્લા સહિત જેમણે કર્યું છે; હાથમાં ગંગાજળનું પાત્ર છે એવા મયારામ ભટ્ટ મુનિઓનું આગમન આદરપૂર્વક જેમ હોય તેમ ઉતાવળથી સાંભળતા હતા. (૧૨) પછી ઉતાવળા ચાલતા તેથી જ આઘાપાછા પડતા ચરણવાળા, ઉતાવળી ગતિથી શ્વાસવાળા, બાંધેલો છે કટિભાગ જેમણે એવા મયારામ ભટ્ટ પોતાના હૃદયમાં મુનિઓના આગમનનું ચિંતવન કરતા શ્રીહરિને મળીને હસતા મુખવાળા બન્ને હાથ જોડી મુનિઓનું આગમન કહેવા લાગ્યા. (૧૩) હે પ્રભો ! મુનિઓનાં મંડળો તથા ગુજરાત વગેરેના હરિભક્તોના સમુદાયો પણ ગામની સમીપમાં આવેલા છે; હાલમાં તમારા દર્શનથી તે મુનિજનો વગેરે સમગ્ર તમારા ભક્તજનોના નેત્રોને મહોત્સવ થાઓ. (અર્થાત્ આપ દર્શન આપવા સન્મુખ પધારો) (૧૪)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

श्रुत्वा स्वभक्तनिचयागमनस्य वार्तामुत्फुल्लवक्त्रनयनाम्बुरुहोऽतिहर्षात् । प्रत्युद्गमोत्सुकमनाः सहसोदतिष्ठत्पीठोत्तमान्निजजनप्रियकृन्मुनीशः ॥१५॥ तावद्धयं चपलचारिणमानिनाय भूपाज्ञया भृगुजिदाशु पुरोऽच्युतस्य। प्रावारशुभ्रपटबद्धकटिः स्वयं तं सोऽध्यारुरोह झटिति प्लुतिलाघवेन ॥१६॥ वल्गापकर्षणनिरुद्धजवेन तेन स्वीयाग्रपार्श्वगसमीक्षकलोकसङ्घात्। तत्पत्तनात्करविदूरितमार्गलोको भूरित्वरोऽपि शनकैः किल निर्ययौ सः ॥१७॥ शीघ्रोपबन्धशिथिलत्वचलायमानपर्याणतूर्णगतिवाजिवराधिरूढाः । सोमादयस्तमनुजग्मुरुदात्तकुन्ताः पद्गाश्चताननुययुस्तरवारिहस्ताः ॥१८॥ सहस्रशोऽन्येऽपि नराश्च नार्यस्ताननवयुस्त्यक्तसमस्तकृत्याः। हरिश्च पुर्या बहिरेत्य पार्ष्णिस्पर्शेन सोऽद्रावयदाशु वाहम् ॥१९॥ दूरे गतं तं सहसावलोक्य तेऽप्यश्ववाराः पदधाविताश्वाः । अन्वद्रवंस्ताननु भक्तसङ्घाः सर्वेऽप्यश्ववाराः पदधाविताश्वाः। अन्वद्रवंस्ताननु भक्तसङ्घाः सर्वेऽप्यधावन्हरिमीक्षमाणाः ॥२०॥ उद्गच्छन्ति धरातलात्किमु दिवं किं वाम्बराद्भूतलं हंसाः सन्निपतन्ति किन्नु गरुडाः किं मूर्तिमन्तोऽनिलाः । इत्याश्चर्यवशात्समीक्षकजनैस्ते तर्क्यमाणा मुनीन् गीतध्वाननिनादिताखिलदिशश्चैक्षन्त नारीर्नरान् ॥२१॥ तेऽप्येकं मुनयो मनोजवहयारूढं तमक्षिप्रियं दूराद्वीक्ष्य च लक्षणैर्हरिरसौ वेगोच्छलच्छेखरः । इत्यात्मन्यनुमाय हृष्टतनवस्तत्पृष्ठधावद्धयारूढान्वीक्ष्य तु सत्वरं सहजनैस्तं दुद्रुवुर्यूथशः ॥२२॥ सन्तप्ता वनवह्निनेव करिणो गङ्गाप्रवाहं हिमं दूराद्वीक्ष्य तमुद्‌वन्ति च यथा हंसाः सरो मानसम् । दातारं च दरिद्रभिक्षुकजनाः सद्यो यथा ते तथा धावन्ति स्म तमात्मवल्लभममी भक्तास्तदेकाश्रयाः ॥२३॥

---

હે રાજન્! પોતાનાં ભક્તજનોનું વૃત્તાંત સાંભળી અતિ હર્ષથી પ્રફુલ્લિત છે મુખ અને નેત્રો જેનાં એવા, સન્મુખ જવામાં ઉત્સાહિત મનવાળા, પોતાના ભક્તોનું પ્રિય કરનારા મુનિઓના સ્વામી તત્કાલ જ સિંહાસનથી ઊભા થયા. (૧૫) તે સમયમાં ઉત્તમ રાજાની આજ્ઞાથી ભગુજી નામના પાર્ષદ ચપલ ગતિવાળો અશ્વ શ્રીહરિની આગળ તત્કાળ લાવ્યા. ઓઢવાના શ્વેત વસ્ત્રથી બાંધી છે કેડ્ય જેમણે એવા સ્વયં શ્રીહરિ ઊછળીને તત્કાળ અશ્વ ઉપર બેસી ગયા. (૧૬) હસ્તથી દૂર કર્યા છે પોતાના દર્શન કરનારા જેણે એવા શ્રીહરિ અત્યંત ઉતાવળા હોવા છતાં પણ લગામ ખેંચવાથી રોક્યો છે વેગ જેનો એવા અશ્વથી પોતાની આગળ અને ડાબે અને જમણે પડખે ચાલનારા પોતાનાં દર્શન કરનારા સમૂહો જેમાં છે એવા દુર્ગનગરથી ધીરે ધીરે બહાર નીકળ્યા. (૧૭) ઉતાવળથી બાંધેલા તેથી ચલાયમાન છે પલાણો જેમનાં એવા સત્વર ગતિવાળા શ્રેષ્ઠ અશ્વો તેના ઉપર બેઠેલા સોમાદિ ઘોડેસ્વારો હાથમાં ભાલાઓવાળા શ્રીહરિની પછવાડે જતા હતા. તરવારો હાથમાં જેમને છે એવા રતનજી અને ભગુજી વગેરે પાર્ષદો ઘોડેસ્વારોની પાછળ જતા હતા. (૧૮) હજારો બીજા પુરુષો અને સ્ત્રીઓ પણ પોતાના ગૃહકાર્યનો ત્યાગ કરી પાર્ષદોની પાછળ ચાલતાં હતાં. શ્રીહરિ પણ નગરથી બહાર આવીને પગની એડીના સ્પર્શથી ઘોડાને તત્કાળ દોડાવતા હતા. (૧૯) તે ઘોડેસ્વારો પણ તત્કાળ દૂર જતા શ્રીહરિને જોઈને પગના પ્રહારોથી દોડાવ્યા છે ઘોડાઓ જેમણે એવા થકા પાછળ ગતિ કરતા હતા. અને તેમની પાછળ શ્રીહરિને દૂરથી જોતા સતા સર્વ ભક્તસમુદાયો પણ પછવાડે દોડતા હતા. (૨૦) આ ઘોડેસ્વારો પૃથ્વીના તળથી સ્વર્ગમાં ઊડે છે કે શું ? અથવા હંસો આકાશથી ભૂતલમાં આવે છે કે શું ? અથવા આ ગરુડો છે કે શું ? અથવા મૂર્તિમાન વાયુઓ છે કે શું ? આ પ્રકારે આશ્ચર્યથી જોનારાં જનોએ ઉત્પ્રેક્ષા કરેલા ઘોડેસ્વારો, કીર્તનો અને વાજાંઓના ધ્વનિઓથી દશ દિશાઓ શબ્દાયમાન કરી છે જેમણે એવા મુનિઓ અને સ્ત્રીપુરુષોને આગળ જોતા હતા. (૨૧) મુનિઓ પણ મનના વેગ જેવા અશ્વ ઉપર બેઠેલા પોતાનાં નેત્રોને પ્રિય એકાકી શ્રીહરિને જોઈને અશ્વના અતિવેગથી ઊછળતા તોરાઓ જેમના છે એવા આ આગળ જોવાતા શ્રીહરિ આ લક્ષણોથી પોતાના મનમાં અનુમાનથી નિશ્ચય કરી રોમાંચિત થયા અને શ્રીહરિની પછવાડે દોડતા ઘોડેસ્વારોને જોઈને આ શ્રીહરિ જ છે એવો નિશ્ચય કરી પોતાની સાથેના જનોની સાથે શ્રીહરિ સન્મુખ દોડતા હતા. (૨૨) દાવાગ્નિથી તપાયમાન વનના હાથીઓ શીતલ ગંગાપ્રવાહ દૂરથી જોઈને જેમ દોડે છે, હંસો માનસરોવર તરફ દોડે છે, ભિક્ષુકો દાતાના તરફ દોડે છે તેવી રીતે કેવળ શ્રીહરિના આધારવાળા મુનિઓ અને તેવા ભક્તજનો બન્ને આત્માના પ્રિય શ્રીહરિને દૂરથી જોઈને દોડતા હતા. (૨૩)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सर्वे ते मुनयस्तदा जविहयारूढप्रभोर्वीक्षणात्स्वीयं दिव्यमवाप्य भावमभवंस्तद्देहभानोज्झिताः । व्यासं वीक्ष्य शुको
यथा गतवपुर्भानोऽतिदूराद्द्रवंश्चापोन्मुक्तशरा इवाशुगतयस्तं लेभिरे तत्क्षणम् ॥२४॥ तान्प्राप्य प्रभुरश्वमाशुजविनं
सोऽतिष्ठिपत्तत्क्षणं तेऽपि प्रेमदृगश्रवः स्वपरमप्रेष्ठं प्रभुं दण्डवत् । नेमुः क्षोणितले निपत्य मुनयश्चान्ये पुमांसस्तथा योषा
अप्युपविश्य भूनिहितदोर्दत्तोत्तमाङ्गा मुदा ॥२५॥ सोमाद्या हरिपार्षदा अथ तदा वाजिभ्य उत्तीर्य तान्नत्वा दण्डवदाशु ते
स्वतुरगानध्यारुहन्नुत्प्लवैः । नत्वा ते मुनयोऽतिहर्षविवशा उत्थाय फुल्लाक्षिभिः सानन्दं च ससम्भ्रमं स्मितमुखाः स्वप्रेष्ठमैक्षन्त
तम् ॥२६॥ व्यावल्गच्चपलाश्वरोधनहठादाकृष्य वल्गां दधद्दोष्णैकेन परेण चोत्तमकशां शीर्षोल्लसच्छेखरः ।
भक्तेक्षारभसादकञ्चुकधृतेः संलक्ष्यवक्षःस्थले हारालिं च दधत्स पीततिलकस्तैरैक्षि शुक्लाम्बरः ॥२७॥ तं वीक्ष्याक्षिमनःप्रियं
मधुरया स्वानीक्षमाणं दृशा नातृप्यन्मुनयश्च ते हरिजना बद्धाञ्जलीन्संस्थिताः । तान्सम्भाव्य यथोचितं स भगवान्प्रायात्पुरं
सादिभिः साकं तैर्मुनिभिर्जनैश्च शनकैरानन्दयन् स्वान् पथि ॥२८॥ शृण्वञ्छ्रीनगरागतैः कृतमसौ तासादिवाद्यध्वनिं
नानादुन्दुभिशृङ्गझर्झररवं सद्बन्धुकीधूष्कृतीः । योषाभिर्निजभक्ष्यपात्रवसनग्रन्थीं शिरःस्वात्मनां धृत्वोच्चारितगीतिकाध्वनिमपि
प्रायात्समाकर्णयन् ॥२९॥ पुर्यां तत्र नृपालयाङ्गणमुपेत्याश्वात्समुत्तीर्य तानावासाय यथोचितं स भगवानाज्ञाप्य सर्वांस्ततः।
वेद्यां निम्बतरोरधो मणिमये पीठे निषीदन् स्वयं पाकं शीघ्रमकारयन्मुनिकृते भक्तान्समुत्साहयन् ॥३०॥

તે સમયે સર્વ મુનિઓ અતિ વેગવાળા ઘોડા ઉપર બેઠેલા શ્રીહરિનાં દર્શનથી પોતાનો દિવ્યભાવ પામીને મનુષ્યદેહના ભાવથી રહિત થયા પછી ધનુષ્યથી છૂટેલા બાણની જેમ શીઘ્ર ગમનવાળા મુનિઓ તત્કાલ જ શ્રીહરિને પામતા હતા. જેમ વ્યાસપુત્ર શુકદેવ પોતાના પિતાને જોઈ શરીરના ભાને રહિત અતિ દૂરથી દોડતા સતા, જેમ વ્યાસને પામ્યા હતા તેમ સંતો શ્રીહરિને પામ્યા. (૨૪) પ્રભુ શ્રીહરિએ મુનિઓને પામીને અતિવેગવાળા ઘોડાને તત્કાલ ઊભો રાખ્યો. પ્રેમથી આંખોમાં આંસુવાળા મુનિઓ અને બીજા પુરુષો પૃથ્વીમાં દંડની માફક પડીને અત્યંત પ્રિય શ્રીહરિને સાષ્ટાંગ પ્રણામ કરતા હતા. તેવી રીતે હરિભક્તો પણ પ્રણામ કરતા હતા અને હરિભક્ત સ્ત્રીઓ પણ પૃથ્વી ઉપર બેસીને પૃથ્વીમાં પોતાના જોડેલા બંને હાથ ઉપર મસ્તક મૂકીને અતિ હર્ષથી પંચાંગ નમસ્કાર કરતી હતી. (૨૫) તે સમયે સોમાદિ પાર્ષદો પોતપોતાના ઘોડાથી ઊતરીને મુનિઓને સાષ્ટાંગ પ્રણામ કરી તત્કાલ જ પોતપોતાના અશ્વ ઉપર બેઠા . પછી તે મુનિઓ નમસ્કાર કરી અતિ હર્ષથી પરાધીનથકા ઊઠીને મંદહાસ્યયુક્ત મુખવાળા અને આનંદપૂર્ણ આદરે સહિત પ્રફુલ્લિત નેત્રોથી પોતાને અતિ પ્રિય શ્રીહરિને જોતા હતા. (૨૬) ઊંચે અને નીચે તેમજ બંને પડખે મુખ કરતા, સ્વભાવથી ચંચળ અશ્વને સ્થિર કરવા માટે આગ્રહથી ડાબા હસ્તથી લગામને ખેંચીને ધારણ કરતા, બીજા હાથથી ચાબુક ધારણ કરતા, મસ્તકના ફેંટા ઉપર શોભાયમાન તોરાઓવાળા, પોતાના ભક્ત મુનિઓના દર્શનના વેગથી અંગરખું જેમણે ધારણ કર્યું નથી એવા; માટે જ સારી રીતે દર્શનીય વક્ષઃસ્થળમાં પુષ્પોના હારોની પંક્તિ ધારણ કરતા, પીળું તિલક વિશાળ ભાલમાં ધારણ કરતાં, ધારણ કર્યાં છે શ્વેત વસ્ત્રો જેમણે એવા શ્રીહરિને મુનિઓએ જોયા. (૨૭) પોતાનાં નેત્રો અને મનને પ્રિય, મનોહર દૃષ્ટિથી પોતાને જોતા શ્રીહરિને જોઈ બંને હાથ જોડીને ઊભા રહેલા મુનિઓ અને નાના દેશથી આવેલા હરિભક્તો દર્શનની તૃપ્તિ પામ્યા નહિ. ભગવાન શ્રીહરિ મુનિ વગેરેને યથાયોગ્ય સ્વાગત પ્રશ્નાદિથી સત્કાર કરી માર્ગમાં પોતાના ભક્તોને આનંદ આપતા થકા ઘોડેસ્વાર અને મુનિજનો તથા હરિભકતો સાથે ધીમે ધીમે દુર્ગપત્તન તરફ ચાલ્યા. (૨૮) શ્રીહરિ શ્રીનગરના ભક્તોએ કરેલાં કાંસી-જોડાં તથા વાજિંત્રો તથા નાના પ્રકારનાં નગારાં, ઝાંઝ, મૃદંગના શબ્દો તથા બંદૂકોના અવાજોને સાંભળતા તેમજ દેશાંતરથી આવેલી પોતાની ભક્ત સ્ત્રીઓએ પોતાના ભાથા વગેરેનાં પાત્રો, વસ્ત્રો વગેરેની ગાંસડીઓને પોતાનાં મસ્તકોમાં ધારણ કરી, ઉચ્ચારણ કરેલાં ગીતોના ધ્વનિઓને સાંભળતા સતા દુર્ગપત્તન તરફ જતા હતા. (૨૯) ભગવાન શ્રીહરિએ દુર્ગપુરમાં ઉત્તમ રાજાના ભવનના આંગણામાં જઈને ઘોડા ઉપરથી ઊતરીને તે સર્વે દેશાંતરથી આવેલા ભક્તજનોને યથાયોગ્ય નિવાસ કરવા માટે આજ્ઞા આપી, પછી લીંબડાના વૃક્ષ નીચે ઓટા ઉપર મણિમય સિંહાસન ઉપર બેઠા. સ્વયં શ્રીહરિ રાંધનારા પોતાના ભક્તજનોને ઉત્સાહ આપતા થકા તમો સાક્ષાત્ ભગવાનના ભક્ત સાધુઓ માટે પાક કરો, અતિકૃતાર્થ છો, એવી રીતે ઉત્સાહ આપતા મુનિઓ માટે પાક શીઘ્ર તૈયાર કરાવતા હતા. (૩૦)

भूरिकालतृषितैर्विलोचनैस्तन्मुखाम्बुजसुधां सदीक्षिताम् । सन्निपीय बहुधापि तर्पणं प्रापि नैव नृप ! तर्हि सन्नृणाम् ।।३१।। इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे अन्नकूटोत्सवे मुनिसन्मुखागत-भगवद्दर्शनानन्दनामाष्टमोऽध्यायः ।।८।।

सुव्रत उवाच-स्वीयवासविधये गतेष्वथो सर्वशो गृहिजनेषु तत्र ते । त्यागिनो मुनय आज्ञया हरेरग्रतः खलु निषेदुरुन्मुदः ।।१।। स्वागतादिवचनेन तोषितास्तेन ते तु मुनयः प्रहर्षिताः । पत्रपुष्पफलवल्कलादिभिस्तं पुपूजुरखिलाश्च तापसाः ।।२।। भक्त्या हरेः पूजनकर्म तेषु कुर्वत्सु हर्षेण मुनीश्वरेषु । तं गालवोऽभ्येत्य जगाद वाक्यं पाकस्य सिद्धिर्भगवन्नभूद्वै ।।३।। श्रुत्वेति वाक्यं भगवान् मुनींस्तानाज्ञापयामास तदैव भोक्तुम् । ततश्च ते शुद्धिविधिं विधाय भोक्तुं निषेदुः कृतपङ्क्तिबन्धाः ।।४।। तान्भोजयित्वा विविधैः सुभोज्यैः सिताज्ययुक्पायसपूरिकाद्यैः । आज्ञापयामास ततः स तृप्तान्महाकुटीं गन्तुमृषीनृषीशः ।।५।। कृत्वा पाकं स्वगृहे निवेद्य कृष्णाय भुक्त्वोपविवेश यावत् । सत्सङ्गिनस्तत्र च तावदायन्ननेकदेशेभ्य उदारभावाः ।।६।। प्राच्योदीच्याश्च पाश्चात्या दाक्षिणात्याः सहस्रशः । मध्यदेशीयलोकाश्च तत्राजग्मुरनेकशः ।।७।। आग्नेया नैर्ऋताश्चापि वायव्या अपि भूरिशः । भक्तास्तत्राययुर्हृष्टा ऐशानाश्च सहस्रशः ।।८।। वृद्धाश्च तरुणा बालाः सधवा विधवाः स्त्रियः । पतिव्रताधर्मरता भक्तिमत्यश्च धर्मजे ।।९।। वाद्यघोषं प्रकुर्वन्त उच्चैर्गीतध्वनिं तथा । ध्वनिं च तालिकानां ते पौरांश्चक्रुः ससम्भ्रमान् ।।१०।।

હે નૃપ ! તે સમયે ઘણા સમયથી તૃષિત થયેલાં નેત્રોથી શ્રીહરિના મુખકમળની સુધાનું ઘણી વાર પાન કરીને પણ મુનિઓ અને હરિભક્ત પુરૂષો તૃપ્તિ પામ્યા નહિ. (૩૧)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીયપ્રકરણે અન્નકૂટોત્સવે મુનિસન્મુખ-આગત ભગવત્ દર્શનાનંદ નામાડષ્ટમોડધ્યાયઃ (૮)*

## અધ્યાય : ૯

## દેશાન્તરથી આવેલા, પ્રેમપૂર્વક હર્ષથી પોતાનાં દર્શન કરતાં પોતાના ભક્તોનું સન્માન શ્રીહરિએ કર્યું એ કહ્યું છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! પછી સમગ્ર ગૃહસ્થજનો પોતાનો ઉતારો કરવા ગયા ત્યારે મહાત્યાગ સ્વભાવવાળા પૂર્વે કહેલા મુનિઓ શ્રીનારાયણ મુનિની આજ્ઞાથી સભામાં શ્રીહરિની આગળ અત્યંત આનન્દ યુક્ત થકા બેઠા. (૧) શ્રીહરિએ સ્વાગતાદિ વચનોથી સંતોષ પમાડેલા માટે જ હર્ષવાળા તપસ્વી સમગ્ર મુનિઓ પણ પત્ર, પુષ્પ, ફળ, વલ્કલાદિ તથા કુંકુમ વગેરેથી પૂજા કરતા હતા. (૨) મુનીશ્વરો અતિ પ્રેમથી શ્રીનારાયણ મુનિની પૂજા કરતા હતા ત્યારે ઉત્તમ રાજાના મામા ગાલવ શ્રીહરિની સમીપમાં આવી બોલ્યા : હે ભગવન્ ! રસોઈ તૈયાર થઈ ગઈ છે. (૩) હે રાજન્ ! આ ગાલવનું વચન સાંભળી શ્રીહરિએ તે જ સમયે પારણાં કરવા માટે આજ્ઞા આપી પછી મુનિઓ હાથપગ ધોઈને પંક્તિબદ્ધ જમવા બેઠા. (૪) મુનિપતિએ સાકર અને ઘી યુક્ત દૂધપાક-પૂરી, ભજિયાં, વડાં, નાના પ્રકારનાં સુસ્વાદિષ્ટ અન્નોથી મુનિઓને જમાડીને તૃપ્ત કર્યા, પછી મુનિઓને મોટી ધર્મશાળામાં જવા માટે આજ્ઞા આપી. (૫) પછી શ્રીહરિ પોતાના નિવાસસ્થાનમાં પોતાના હાથે રસોઈ કરી શ્રીકૃષ્ણને નૈવેદ્ય કરી પારણાં કરી જેટલામાં મુખવાસ લઈ આસન ઉપર બેઠા તેટલામાં મહા પ્રેમવાળા સત્સંગીઓ અનેક દેશથી ગઢપુરમાં આવતા હતા. (૬) હજારો હજાર પૂર્વ, ઉત્તર, પશ્ચિમ અને દક્ષિણ દિશાના અને મધ્યપ્રદેશનાં હજારો હજાર ભક્તજનો ગઢપુરમાં આવતા હતા. (૭) અગ્નિ દિશા, નૈર્ઋત્ય દિશા, વાયવ્ય દિશા, ઈશાન દિશાના ઘણા ભક્તજનો હર્ષપૂર્વક ગઢપુરમાં આવ્યા હતા. (૮) વૃદ્ધો, યુવાનો, બાળકો, પુરુષ ભક્તો અને પતિવ્રતાધર્મપરાયણ, ધર્મપુત્ર શ્રીહરિમાં ભક્તિવાળી સધવા અને વિધવા સ્ત્રીઓ આવી હતી. (૯) હર્ષાતિશયથી અતિ ઊંચાં વાજિંત્રોના શબ્દો તથા ગીતોના ધ્વનિ અને તાલીઓનો ધ્વનિ કરતાં દેશાન્તરથી આવેલાં સત્સંગી જનો, પુરવાસી જનોને સંક્ષોભિત ચિત્તવાળા કરતા હતા. (૧૦)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

उच्चैर्घोषं तमाश्रुत्य भगवान्निजमन्दिरात् । बहिर्वेद्यामुपेत्यैव तस्थौ भक्तजनप्रियः ॥११॥ अत्युत्कण्ठास्तदीक्षायां ते तं प्राप्य निजं प्रभुम् । प्रणेमुः प्रेमविवशा बद्धाञ्जलिपुटा जनाः ॥१२॥ औत्सुक्यसम्भ्रमात्केचित्कराभ्यां तं ववन्दिरे । केचिच्च प्रेमविवशा निपत्य भुवि दण्डवत् ॥१३॥ नमनं केऽपि विस्मृत्य तन्मूर्तिं ददृशुश्चिरम् । यो योऽपश्यद्यद्यदङ्गं तत्र तत्र स सोऽलगत् ॥१४॥ केचित्पादाङ्गुलीर्वीक्ष्य निमेषोन्मेषवर्जिताः । सद्यस्तत्र निरुद्धाक्षिवृत्तयः स्तम्भवद्बभुः ॥१५॥ केचिद्गुल्फौ हरेर्वीक्ष्य रुद्धदृग्वृत्तयोऽभवन् । केचिज्जङ्घे समीक्ष्यैवं जानुनी वीक्ष्य केचन ॥१६॥ उरू दृष्ट्वा प्रभोः केचिदुदरं च कटिं तथा । दृष्ट्वा तत्रैव चित्तस्य निरोधं प्रतिपेदिरे ॥१७॥ विशालं हृदयं तस्य केचिद्वीक्ष्य स्तनावपि । श्रीवत्सचिह्नमालोक्य समाधिं प्रापुरात्मनः ॥१८॥ आजानु बाहुयुगलं केचित्केचित्कराङ्गुलीः । प्रभोरालोक्य तत्रैव सद्यः प्रापुः स्थितिं जनाः ॥१९॥ केचिद्भगवतो वीक्ष्य प्रसन्नं मुखपङ्कजम् । केचिद्विशाले नेत्रे च तत्र लीनहृदोऽभवन् ॥२०॥ केचित्तु नासिकां तस्य कपोलौ श्रवसी नृप ! । ललाटं भ्रुकुटिं केचिद्वीक्ष्य तत्र स्थितिं ययुः ॥२१॥ केचिद्धरेः शिरो वीक्ष्य नानाशेखरराजितम् । तत्रैव नेत्रवृत्तीनां निरोधं प्रतिपेदिरे ॥२२॥ सोऽपि नारायणमुनिस्तदानीं करुणानिधिः । स्वमूर्तेर्दिव्यतैश्वर्ये सौन्दर्यं चाप्यदीदृशत् ॥२३॥ अतः पश्यजनाः सर्वे तत्तदङ्गेऽस्य लेभिरे । सद्य निरोधं वै निजप्राणेन्द्रियात्मनाम् ॥२४॥ स्वदृष्टाङ्गेतरत्त्वङ्गमशक्ता द्रष्टुमीशितुः । ते तदा चित्रलिखिता इवाऽऽसन्नचला जनाः ॥२५॥ निर्विकल्पसमाधिं ते प्राप्ताः केऽप्यपतन्भुवि । केचित्तथैव तस्थुश्च निषेदुः केऽपि भूतले ॥२६॥ इत्थं तदानीमाश्चर्यं महदासीज्जनागमे । देवाः सुविस्मिताश्चक्रुः पुष्पवृष्टिं मुदा हरौ ॥२७॥ स्त्रियश्च पुरुषास्तेऽपि स्वहृत्सु स्फुरितं ततः । तेजःपुञ्जं समद्राक्षुः कोटिसूर्यसमप्रभम् ॥२८॥

ભક્તજનોને પ્રિય શ્રીહરિ ઊંચો વાજિંત્રોનો નાદ સાંભળી પોતાના નિવાસસ્થાનથી બહાર આવીને ઓટા ઉપર સિંહાસનમાં બેઠા. (૧૧) શ્રીહરિના દર્શનમાં અતિ ઉત્કંઠાવાળાં તે જનો પરમેશ્વર શ્રીહરિને પામીને પ્રેમાધીન ચિત્તવાળા ,બન્ને હાથ જોડી નમસ્કાર કરતાં હતાં. (૧૨) કેટલાંક ભક્તો ઉત્સાહના વેગથી શ્રીહરિને બન્ને હાથોથી વંદના કરતા હતા; કેટલાક પ્રેમને આધીન થકા પૃથ્વીમાં દંડની માફક પડીને નમસ્કાર કરતા હતા. (૧૩) કેટલાક નમસ્કાર કરવાના ભૂલી જઈ લાંબા સમય સુધી તેમની મૂર્તિને જોતા હતા. શ્રીહરિનું ચરણાદિ જે જે અંગ જોતા હતા તે તે અંગમાં ચોંટી જતા હતા. (૧૪) કેટલાક ભક્તો મટકારહિત શ્રીહરિના ચરણકમળની આંગળીઓ જોઈ તત્કાલ જ શ્રીહરિના ચરણની આંગળીઓમાં નેત્રની વૃત્તિઓ રોકાઈ જવાથી થાંભલાઓની માફક શોભતા હતા. (૧૫) કેટલાક ભક્તો શ્રીનારાયણ મુનિની ઘૂંટીઓ જોઈને તેમાં રોકાયેલી દૃષ્ટિવાળા થયા. કેટલાક ભક્તો જંઘાને જોઈને તેમજ કેટલાક ભક્તો ઘૂંટણો જોઈને તેમાં રોકાયેલી દૃષ્ટિવાળા થયા. (૧૬) કેટલાક શ્રીહરિના સાથળો જોઈને અને કેટલાક ઉદર તથા કેડ્ય જોઈને ચિત્તનો નિરોધ પામતા હતા. (૧૭) કેટલાક શ્રીહરિનું વિશાળ હૃદય અને સ્તનો તથા શ્રી વત્સનું ચિહ્ન જોઈને પોતાના મનનો તેમાં નિરોધ પામતા હતા. (૧૮) કેટલાક જનો શ્રી હરિના ઢીંચણ પર્યંત બન્ને ભુજાઓ જોઈને તેમાં જ તત્કાલ સમાધિ પામતા હતા. (૧૯) કેટલાક ભગવાનનું પ્રસન્ન મુખ-કમળ જોઈને, અને કેટલાક વિશાળ નેત્રો જોઈને તે બન્નેમાં લીન અંતઃકરણવાળા થયા. (૨૦) હે નૃપ ! કેટલાંક શ્રીહરિની નાસિકા, ગંડસ્થલો, (કપોળ) તથા બન્ને શ્રવણ તથા વિશાળ ભાલ અને ભ્રકુટીઓ જોઈને તે તે સ્થાનોમાં તે તે ભક્તો સમાધિસ્થિતિને પામ્યા. (૨૧) કેટલાકને નાના પ્રકારના તોરાઓથી શોભાયમાન શ્રીહરિનું મસ્તક જોઈ મસ્તકમાં ચિત્ત લય પામી ગયું. (૨૨) કરુણાસાગર નારાયણમુનિ પણ તે સમયે પોતાની મૂર્તિનો દિવ્ય ભાવ અને ઐશ્વર્ય તથા સૌંદર્ય પણ બતાવતા હતા. (૨૩) માટે જોનારાં સર્વજનો શ્રીહરિનાં તે તે અંગોમાં તત્કાલ જ પોતાનાં પ્રાણ-ઈન્દ્રિયો અને મનની સ્થિરતા પામતા હતા. (૨૪) તે સમયે તે હરિભક્તો શ્રીનારાયણ મુનિના પોતે જોયેલા અંગથી બીજા અંગને જોવા માટે અશક્ત થયેલા ભીંતમાં ચિતરેલાં હોયને શું ? એમ તે જનો સ્થિર થઈ ગયાં હતાં. (૨૫) નિર્વિકલ્પ સમાધિને પામેલાં કેટલાંક જનો પૃથ્વીમાં પડતાં હતાં. કેટલાંક તે સમાધિ પામેલાં ઉભાં જ રહ્યાં હતાં. કેટલાંક પૃથ્વીમાં બેસી ગયાં હતાં. (૨૬) તે સમયે આ પ્રમાણે મહાઆશ્ચર્ય થયું, દેવતાઓ વિસ્મય પામ્યા સતા શ્રી નારાયણ મુનિ ઉપર પુષ્પ વૃષ્ટિ કરતા હતા. (૨૭) સમાધિવાળા પુરુષો તથા સ્ત્રીઓ પણ સમાધિ પામ્યા પછી પોત પોતાના હૃદયમાં સ્ફુરાયમાન થયેલા કરોડો સૂર્યના સમાન કાંતિવાળા તેજના સમુદાયને જોતા હતા. (૨૮)

तमेव भगवन्तं च स्फुरन्तं तत्र वीक्ष्य ते । परिषस्वजिरे गाढं प्रापुश्चालौकिकं सुखम् ॥२९॥ इच्छयैव हरेस्तेऽथ पुनर्लब्धबहिर्दृशः। तमेव वेद्यामासीनं ददृशुः प्रभुमादरात् ॥३०॥ आनन्दं लेभिरेऽत्यन्तं ते सर्वे हरिदर्शनात् । सद्यो गतश्रमा आसन्हर्षापूर्णहृदो जनाः ॥३१॥ तेषामासंश्च कतिचित्पञ्चमासाध्वगा जनाः । चातुर्मास्याध्वगाः केचित्केचित्त्रैमासिकाध्वगाः ॥३२॥ मासद्वयाध्वगाः केचित्केचिन्मासाध्वगा अपि । ते सर्वेऽपि हरिं प्राप्य लेभिरे परमां मुदम् ॥३३॥ हरिश्च तान् गृहसुखं त्यक्त्वा कष्टेन भूयसा। स्वदर्शनार्थमायातान्मानयामास सादरम् ॥३४॥ स्वागतं कुशलं पृष्ट्वा स तान्वासार्थमादिशत् । वासस्थानानि तान्निन्युर्हरजित्प्रमुखास्ततः ॥३५॥ तस्मिन् दिने तु भक्तानां मुहुरागच्छतां प्रभुः । स्वदर्शनप्रदानार्थं तत्रैव न्यवसच्चिरम् ॥३६॥ तत्रागतानां नारीणां सन्मानं च यथोचितम् । जयारमादयश्चक्रुर्ललिता तु विशेषतः ॥३७॥ तत्रागतेभ्यो विप्रेभ्यो भिक्षुकेभ्यश्च सर्वशः । अध्वक्षीणधनेभ्यश्च हरिरन्नाद्यदापयत् ॥३८॥ पञ्चानां दिवसानां च तदैवामान्नमीश्वरः । घृतं सितां च काष्ठादि तेभ्योऽशेषमदापयत् ॥३९॥ क्षत्रवैश्याश्च शूद्राश्च सूतमागधबन्दिनः । वादकाद्याश्च ये तांस्तु नृपतेर्गृह आशयत् ॥४०॥ अश्वमारुह्य रात्रौ च भटैः कतिपयैर्वृतः । निवासान् सर्वभक्तानां स जगाम पृथक् पृथक् ॥४१॥ तेषां स्वास्थ्यं समापृच्छ्य यन्न्यूनं तददापयत् । वर्तितव्यं सावधानैरिति सर्वानशिक्षयत् ॥४२॥ अज्ञातः पुरुषः स्त्री वा निष्कास्यः स्वस्ववासतः। इति सर्वानुपादिश्य निजमन्दिरमाययौ ॥४३॥ दूरदेशादागतानां च जनानां स्वार्पितात्मनाम् । मुमुक्षां प्रशशंसासौ सोमादीनां पुरः प्रभुः ॥४४॥

---

તે ભક્તો તે તેજસમુદાયમાં સ્ફુરાયમાન સકલૈશ્વર્યસંપન્ન શ્રી નારાયણ મુનિને જોઈને અત્યંત આલિંગન કરતા હતા અને અલૌકિક સુખ પામતા હતા. (૨૯) પછી શ્રીહરિના સંકલ્પથી જ ફરીથી બહાર દૃષ્ટિ પામીને હરિભક્તો લીંબડાના વૃક્ષ નીચે ઓટા ઉપર રત્નસિંહાસનમાં બેઠેલા શ્રીહરિને આદરપૂર્વક જોતા હતા. (૩૦) તે સર્વજનો શ્રીહરિનાં દર્શનથી અતિશય આનંદ પામ્યાં. હર્ષથી પરિપૂર્ણ મનવાળાં થઈને તત્કાલ જ માર્ગના પરિશ્રમે રહિત થયા. (૩૧) તેમાં કેટલાંક જનો પાંચ માસ માર્ગમાં ચાલવાથી ગઢપુરમાં આવ્યાં હતાં કેટલાંક ચાર માસ, કેટલાંક ત્રણ માસ, કેટલાંક બે માસ, કેટલાંક માસ : આટલો વખત માર્ગમાં ચાલતાં થયો ત્યારે ગઢપુરમાં આવ્યાં હતાં તે સર્વજનો શ્રી નારાયણ મુનિને પામીને સર્વોત્તમ આનંદ પામ્યાં. (૩૨-૩૩) શ્રી સહજાનંદ સ્વામી, પોતાના ઘરનું સુખ ત્યાગ કરી ઘણા દુઃખથી પોતાનાં દર્શન કરવા આવેલાં, દેશાન્તરનાં જનોને સત્કારપૂર્વક વાણીથી પ્રશંસા કરતા હતા. (૩૪) શ્રીહરિ તેઓને તમો સુખેથી આવ્યા? કુશળ છો ? એમ પૂછીને નિવાસ કરવા માટે આજ્ઞા આપતા હતા. પછી હરજી ઠક્કર વગેરે ભક્તો દેશાન્તરથી આવેલાં જનોને નિવાસ સ્થાનો પ્રત્યે લઈ જતા હતા. (૩૫) શ્રી સ્વામિનારાયણ ભગવાન ધનત્રયોદશીને દિવસે તો વારંવાર દેશાન્તરથી આવતાં ભક્તજનોને દર્શન આપવા માટે સિંહાસનમાં ઘણા સમય સુધી બેઠા. (૩૬) ગઢપુરમાં આવેલી સ્ત્રીઓને યથાયોગ્ય સન્માન જયા, રમા, વગેરે ભક્તો કરતા હતા. લલિતા તો વિશેષપણે તેઓનું સન્માન કરતાં હતાં. (૩૭) ગઢપુરમાં આવેલા સર્વ બ્રાહ્મણોને, ભિક્ષુક જનોને તથા માર્ગમાં દ્રવ્યનો ખર્ચ થઈ ગયેલો હોય એવાં ગૃહસ્થજનોને પણ શ્રીહરિકૃષ્ણ ભગવાન અન્નાદિ જે કંઈ જોઈએ તે પદાર્થ માત્ર અપાવતા હતા. (૩૮) શ્રીહરિ તે સમયે પાંચ દિવસનું કાચું અન્ન, ઘી, સાકર, લાકડાં, જળનાં પાત્ર, પત્રાવલ્લી,પડિયા વગેરે તથા મરચાં, મીઠું, હળદર, તેલ, ગોળ આદિક સર્વે રસોઈની સામગ્રી બ્રાહ્મણોને અપાવતા હતા. (૩૯) જે ક્ષત્રિય, વૈશ્ય, શૂદ્રો, ભાટ, ચારણો, વાજિંત્રો વગાડનારા વગેરે તેમને તો ઉત્તમરાજાના ભવનમાં શ્રીહરિ યથાયોગ્ય જમાડતા હતા. (૪૦) શ્રીહરિ ત્રયોદશીની રાત્રિમાં પોતાના અશ્વ ઉપર બેસીને કેટલાક પાર્ષદોની સાથે સર્વ ભક્તોનાં નિવાસસ્થાનો પ્રત્યે જુદા જુદા જતા હતા. (૪૧) શ્રીહરિ પોતાના ભક્તોને તેમના નિવાસ વગેરેનું અનુકૂળપણું પૂછીને જેનીજેની ન્યૂનતા હતી તે અપાવતા હતા. 'તમોએ સાવધાન રહેવું' એમ સર્વ જનોને શિક્ષાનાં વચનો કહેતા હતા. (૪૨) 'અપરિચિત એવા પુરુષ અથવા સ્ત્રીને પોતાના નિવાસસ્થાનથી બહાર કાઢવાં,' શ્રીહરિ સર્વજનોને આવો ઉપદેશ આપીને પોતાના નિવાસસ્થાનમાં આવ્યા. (૪૩) શ્રીહરિ દૂર દેશથી આવેલા પોતાનામાં અર્પણ કર્યાં છે મન જેમણે એવાં જનોની મુમુક્ષાને સોમાદિ પોતાના પાર્ષદો આગળ પ્રશંસા કરતા હતા. (૪૪)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**सम्भावनं कुर्वत एव नृणामागच्छतां सङ्घश आशु तस्य । निशस्तृतीयप्रहरान्त आसीत्संलक्षितः कुक्कुटकूजितेन ॥४५॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे अन्नकूटोत्सवे देशान्तरागतभक्तसन्माननामा नवमोऽध्यायः ॥९॥

सुव्रत उवाच-**किञ्चित्सुप्त्वा तदा स्वामी सहसा पुनरुत्थितः । कृत्वा स्नानविधिं चक्रे नित्यकर्मादरान्नृप ! ॥१॥ चतुर्दश्या अपि दिनं प्रातरारभ्य पूर्ववत् । आगच्छतो निजान् भक्तांस्तस्य तोषयतो ह्यगात् ॥२॥ दीपोत्सवदिने सोऽथ मङ्गलस्नानमीश्वरः । अरुणोदयवेलायां कृत्वा नैत्यकमाचरत् ॥३॥ वर्तुले तूलपटके निषसाद ततः क्षणम् । चकार पूजनं तस्य नैत्यकं चोत्तमो नृपः ॥४॥ तावच्च नूत्नवस्त्राणां कक्षे संछन्नपोटलीम् । मयरामः शीघ्रगतिर्गृहीत्वागच्छदुत्सुकः ॥५॥ तं दृष्ट्वा प्रहसन्प्राह हरिर्भट्ट ! किमाहृतम् । तमाह नूत्नवस्त्राणि सन्तीमानीति स द्विजः ॥६॥ प्रीतये सर्वभक्तानां तानि जग्राह स प्रभुः । कौसुम्भं पटकं शीर्ष्णि बबन्ध मुकुटाकृति ॥७॥ स्वर्णबुट्टं शोणवर्णं पर्यधादङ्गरक्षकम् । बबन्ध स्वर्णपटकं ततः कटितटे प्रभुः ॥८॥ ततश्चाकारयामास सर्वान्निजजनान्विभुः । कृतनित्यविधानास्ते तत्र सर्वे समाययुः ॥९॥ अधस्तान्निम्बवृक्षस्य भगवद्वेदिकामनु । आगत्य मुनयस्तस्थुर्गृहिणश्चाभितो मुनीन् ॥१०॥ आगत्य तत्र योषाश्च योषित्सदसि सर्वशः । तस्थुः प्रतीक्षमाणा वै तत्र नारायणागमम् ॥११॥ पौराणिकाः शास्त्रिणश्च वैदिकास्तान्त्रिकास्तथा । तस्थुस्तत्रागत्य विप्रा नैष्ठिका ब्रह्मचारिणः ॥१२॥**

ભક્તજનોના સંઘોમાં, દેશાન્તરથી આવતાં મનુષ્યોની તત્કાલ સંભાવના કરતા શ્રીહરિએ કૂકડાંનો શબ્દ સાંભળીને રાત્રિનો ત્રીજો પ્રહર થયો એમ જાણ્યું. (૪૫)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીયપ્રકરણે અન્નકૂટોત્સવે દેશાન્તરાગતભક્તસન્માન નામા નવમોઽધ્યાયઃ (૯)*

## અધ્યાય : ૧૦

### શ્રીહરિનાં દર્શન કરનારા ભક્તજનોને સભામાં બેસવાની યથાયોગ્ય રીતિ કહી છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! શ્રીનારાયણ મુનિ રાત્રિના ચોથા પ્રહરમાં લગારેક યોગનિદ્રાનો અંગીકાર કરી તત્કાળ જ ફરીથી પણ ઊભા થઈને સ્નાનવિધિ કરી નિત્ય કર્મ આદરપૂર્વક કરવા લાગ્યા. (૧) ચતુર્દશીનો દિવસ પણ સવારથી આરંભીને પૂર્વ દિવસની માફક દેશાન્તરથી આવતાં પોતાનાં સત્સંગીજનોની સંભાવના કરતાં વ્યતીત થયો.(૨) પછી પરમેશ્વર દીપોત્સવને દિવસે અરુણોદય વેળામાં મંગલ સ્નાન કરી નિત્યકર્મ આચરતા હતા. (૩) પછી શ્રીહરિ ચાકળા ઉપર ક્ષણ વાર બેઠા. ઉત્તમ રાજાએ શ્રીહરિનું પ્રતિદિન કરાતું ચંદન પુષ્પાદિથી સમર્ચન-પૂજન કર્યું. (૪) તે સમયે શીઘ્ર ગતિવાળા મયારામ ભટ્ટ નવીન વસ્ત્રોની, ઓઢવાનાં વસ્ત્રથી ઢાંકેલી પોટલી બગલમાં ગ્રહણ કરી, ઉત્સાહે યુક્ત થકા શ્રીહરિની સમીપમાં જયા, લલિતાએ પ્રેરણા કરેલા આવ્યા. (૫) મયારામ ભટ્ટને જોઈને શ્રીહરિ મંદ હાસ્ય કરતા થકા બોલ્યા : હે ભટ્ટ ! આ શું લાવ્યા છો ? હે રાજન્ ! તે બ્રાહ્મણે શ્રીહરિને કહ્યું : હે સ્વામિન્ ! આ નવીન વસ્ત્રો છે. (૬) શ્રીહરિએ પોતાના ભક્તોની પ્રીતિ માટે નવીન વસ્ત્રો પહેરવા માટે ગ્રહણ કર્યાં; ત્યાર બાદ કસુંબી પટકો મુગટના આકારવાળો મસ્તકે બાંધ્યો. (૭) શ્રીહરિએ પછી સોનેરી બુટ્ટાદાર અંગરખું ધારણ કર્યું, પછી કેડ ઉપર સોનેરી પટકો બાંધ્યો. (૮) પછી શ્રીહરિએ પોતાનાં ભક્ત જનોને પોતાનાં દર્શન માટે બોલાવ્યાં. જેમણે નિત્યવિધિ કર્યો છે એવા તે સર્વે હરિભક્તો ઉત્તમ રાજાના દરબારમાં આવ્યા. (૯) લીંબડાની નીચે રહેલી ભગવાનની વેદિકાની સમીપમાં આવી મુનિઓ ઊભા રહ્યા. મુનિઓની ચોતરફ ગૃહસ્થ હરિભક્તો ઊભા રહ્યા. (૧૦) સર્વ હરિભક્ત સ્ત્રીઓ ત્યાં ઉત્તમ રાજાના દરબારમાં આવીને સભામાં શ્રીનારાયણના આગમનની પ્રતીક્ષા કરતી સતી સ્ત્રીઓની સભામાં ઊભી રહી. (૧૧) પુરાણીઓ, શાસ્ત્રીઓ, વૈદિકો તથા તાંત્રિકો, (નારદ પંચરાત્ર વગેરે તંત્રશાસ્ત્રને જાણનારા) બ્રાહ્મણો સભામાં આવીને બેઠા અને નૈષ્ઠિક બ્રહ્મચારીઓ સભામાં આવીને બેઠા. (૧૨)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

गायकाः शतशस्तत्र शतशो वाद्यवादकाः । आगत्य च नटा मल्लास्तस्थुः सूताश्च बन्दिनः ॥१३॥ सर्वेऽपि ते समागत्य हरेरागमनं बहिः । प्रतीक्षमाणास्तस्थुर्वै तावत्तत्रागमत्प्रभुः ॥१४॥ तं विलोक्य जनाः सर्वे हर्षोत्फुल्लाननाशयाः । जयेति घोषं तुमुलं प्रणम्य नृप ! चक्रिरे ॥१५॥ आनन्दयन् भक्तजनान् हरिर्निम्बतरोरधः । वेद्यां सिंहासनवरे निषसाद तदैव सः ॥१६॥ सितातपत्रमर्काभं सोमस्तच्छीर्ष्ण्यधारयत् । भगवन्मुखकान्त्या तन्नितरां शुशुभे तदा ॥१७॥ भृगुजिच्चालयश्चोभौ रत्नदण्डे मनोहरे । गृहीत्वा चामरे तत्र वीजयामासतुः प्रभुम् ॥१८॥ सूरो नाञ्जश्च भगवत्पार्श्वयोः संस्थितावुभौ । प्रभुं तं तालवृन्ताभ्यां वीजयामासतुस्तदा ॥१९॥ उशीरव्यजनं रम्यं गृहीत्वा हेमदण्डकम् । उत्तमः पार्श्वसंस्थश्च वीजयामास तं प्रभुम् ॥२०॥ मुकुन्दो वर्णिराट् तस्य समीपे नक्तकं दधत् । तस्थौ प्रतीक्षमाणश्च निदेशं तस्य किञ्चन ॥२१॥ दौवारिकः स्वर्णयष्टिर्जयेत्युच्चैर्वदन् प्रभोः । अग्रे कुबेरसिंहाख्यस्तस्थौ कार्यनिवेदकः ॥२२॥ पार्षदप्रवराश्चान्ये क्षत्रवीरा महाभटाः । आज्ञाकराः प्रभोस्तस्थुः परितः शतशस्तदा ॥२३॥ ततोऽपश्यज्जनानेव भगवान् परितः स्थितान् । उद्वेलं सागरमिव सोत्कण्ठान्निजदर्शने ॥२४॥ अन्योन्येषामुपरि तान् पततो घनसंस्थितीन् । नृपतेरङ्गणेऽपश्यदसङ्ख्याताञ्जनान् हरिः ॥२५॥ बहिःशालासु च जनान् गर्भागारेषु च स्थितान् । छदिष्षु च चतुष्केषु बहिर्वेदिषु चैक्षत ॥२६॥ वलभीषु तथाट्टेषु चन्द्रशालासु च स्थितान् । मन्दुरासु च चैत्येषु प्राकारे गोपुरोपरि ॥२७॥ आरुह्य च द्रुमानुच्चान्मूलादग्रावधि स्थितान् । पुरश्च पार्श्वयोः पश्चाज्जनान्वीक्ष्य जहास सः ॥२८॥ तालिकां वादयित्वाथ हरिः स्थापनमुद्रया । उपावीविशदात्मीयान्सर्वांस्तांल्लक्षशो जनान् ॥२९॥

---

સો એ સો ગાંધર્વ વિદ્યા જાણનારા, સો એ સો વાજિંત્રો વગાડવામાં નિપુણ નટો તથા મલ્લો, ભાટ-ચારણો સભામાં આવીને બેઠા હતા. (૧૩) તે મુનિઓ વગેરે સર્વ ભક્તજનો આવીને શ્રીનારાયણ મુનિની બહાર સભામાં આગમનની રાહ જોતા સતા ઊભા હતા. તે સમયમાં શ્રીહરિ સભામાં પધાર્યા. (૧૪) હે નૃપ ! સર્વ જનો સભામાં આવેલા શ્રીહરિને જોઈને અતિ આનંદથી પ્રફુલ્લિત મુખ અને અંતઃકરણોવાળા, નમસ્કાર કરી તમારો જય જય થાઓ એમ મહાઘોષ કરતાં હતાં. (૧૫) તે સમયે જ શ્રી સ્વામિનારાયણ ભગવાન ભક્ત જનોને આનંદ આપવા માટે લીંબડાના વૃક્ષ નીચે ઓટલા ઉપર શ્રેષ્ઠ સિંહાસનમાં બેઠા. (૧૬) સોમવર્મા નામના પાર્ષદે સૂર્યની કાંતિ સમાન શ્વેત છત્ર શ્રીહરિના મસ્તક ઉપર ધારણ કર્યું, તે સમયે શ્રીહરિના મુખની કાંતિથી તે છત્ર અત્યંત શોભતું હતું. (૧૭) તે સમયે ભગુજી નામના પાર્ષદ, અલૈયા નામના પાર્ષદ, આ બન્ને રત્નજડિત દંડવાળા ચામરોથી વીંઝણો કરતા હતા. (૧૮) સુરા ભક્ત, નાજો ભક્ત, આ બે પાર્ષદો શ્રીહરિના ડાબા અને જમણા પડખે ઊભા રહીને તાડના પંખાથી શ્રીહરિને મંદમંદ વાયુ ઢોળતા હતા. (૧૯) ઉત્તમ રાજા પડખે ઊભા રહીને અતિરમણીય સુવર્ણના દંડ યુક્ત વીરણનો પંખો ગ્રહણ કરી પ્રભુને પવન નાખતા હતા. (૨૦) વર્ણીન્દ્ર મુકુંદાનંદ શ્રીહરિની સમીપમાં રૂમાલ હાથમાં ધારણ કરતા, શ્રીહરિની કંઈ પણ આજ્ઞા-વચનની પ્રતીક્ષા કરતા થકા શ્રીહરિની સમીપમાં ઊભા હતા. (૨૧) સુવર્ણની છડી ધારણ કરનાર, શ્રીહરિની આજ્ઞાથી બીજાં માણસોને યોગ્ય કાર્ય જણાવનાર અને બીજાએ કહેલું તે શ્રીહરિને જણાવનાર કુબેરસિંહ નામના દ્વારપાલ 'જય જય' એમ ઉચ્ચ સ્વરથી બોલતા થકા શ્રીહરિની આગળ ઊભા રહ્યા હતા. (૨૨) તે સમયે ક્ષત્રિય-વીરો રણમાં કીર્તિ પામેલા શ્રીહરિની આજ્ઞામાં રહેલા બીજા સોએસો રતનજી વગેરે ઉત્તમ પાર્ષદો શ્રીહરિની ચોતરફ ઊભા હતા. (૨૩) પછી શ્રીહરિ ચોતરફ ઊભા રહેલા પોતાના દર્શનમાં ઉત્સાહવાળાં જનોને જોઈને મર્યાદાને ઉલ્લંઘન કરતાં સમુદ્રની માફક જોતા હતા. (૨૪) એકબીજાની ઉપર પડતાં અસંખ્ય માણસોનો સમૂહ ઉત્તમ રાજાના આંગણામાં શ્રીહરિએ જોયો. (૨૫) બહાર શાળામાં અર્થાત્ ઓસરીમાં, ઓરડામાં, પડાળ ઉપર, ચોકમાં, ઓટલીઓ ઉપર, છજા ઉપર, મેડીઓ ઉપર, અગાશીઓમાં, ઘોડશાળમાં, ચકલાંઓમાં, કિલ્લાઓમાં અને દરવાજા ઉપર રહેલાં માણસોને જોતા હતા. (૨૬-૨૭) અતિ ઊંચાં વૃક્ષો ઉપર મૂળથી આરંભીને ટોચ સુધી રહેલા, પોતાની આગળ અને પડખાંઓમાં રહેલાં જનોને જોઈને શ્રીહરિ અતિ આશ્ચર્યથી મંદહાસ કરતા હતા. (૨૮) પછી શ્રીહરિ તાલી વગાડીને પોતાના આશ્રિત લક્ષાવધિ મનુષ્યોને પોતાના બંને હાથના સંકેતથી બેસાડતા હતા. (૨૯)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

कृतमौनास्तत्क्षणं ते निषेदुश्च व्यवस्थया । स्त्रियः स्त्रीमण्डलेष्वेव पुमांसः पुरुषेषु च ॥३०॥ निषेदुर्मुनयस्तत्र मुनीनां मण्डलेषु च ॥३१॥ गृहस्थेषु गृहस्थाश्च वृद्धा वृद्धेषु सर्वशः । विद्वद्यूथेषु विद्वांसः शिल्पज्ञाः शिल्पवित्सु च ॥३२॥ तूष्णीं तेषूपविष्टेषु निजभक्तेषु स प्रभुः । आजिज्ञपद्वादकांश्च सज्जीभूय चिरस्थितान् ॥३३॥ ते च तासादिवाद्येषु यद्यत्स्वकरकौशलम् । तदानीं दर्शयामासुस्तत्तत्सर्वमशेषतः ॥३४॥ प्रशशंस हरिस्तांश्च दृष्ट्वा तत्करलाघवम् । ततोऽपश्यत्सभासंस्थान्नैकदेशागताञ्जनान् ॥३५॥ तेषां ये ये येषु येषु मुख्या देशेषु तान्प्रभुः । तत्तद्देशीयवृत्तान्तं प्रष्टुमाह्वास्त संसदि ॥३६॥ ते सद्य उत्थाय सहर्षमेव क्षमापते ! तं समया समेत्य । प्रणम्य च प्राञ्जलयः पुरस्तात्तस्थुस्तदीयाननचन्द्रनेत्राः ॥३७॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे अन्नकूटोत्सवे सभोपवेशनवर्णननामा दशमोऽध्यायः ॥१०॥

सुव्रत उवाच-तान्मानयित्वा भगवान्निजभक्तान्विचक्षणान् । शृण्वतां सर्वलोकानां पप्रच्छ विनयानतान् ॥१॥ श्रीनारायणमुनिरुवाच-युष्मद्देशेषु मेऽथैषां त्यागिनां गृहिणां जनाः ! । मदाश्रितानां स्त्रीणां च कीदृश्यस्ति जनश्रुतिः ॥२॥ जना मद्विमुखा ये ते लौकिकानां सतां तथा । वार्तामात्मगुरूणां च कुर्वते कीदृशीं भुवि ॥३॥ सुव्रत उवाच-इति पृष्टा भगवता ते तमूचुर्यथाश्रुतम् । यथादृष्टं च नृपते ! वृतान्तं स्वस्वदेशजम् ॥४॥

---

તે સમયે જનો મૌન રહ્યા છતાં આગળ કહે છે એવી મર્યાદાથી બેસતા હતા. સ્ત્રીઓ સ્ત્રીઓના મંડળમાં બેસતી હતી. અને પુરુષો પુરુષોના મંડળમાં બેસતા હતા. (૩૦) પુરુષોમાં પણ મુનિઓ મુનિઓના મંડલમાં બેસતા હતા. બ્રાહ્મણો અને વર્ણીઓ પોતપોતાના મંડળમાં બેસતા હતા. (૩૧) ગૃહસ્થો ગૃહસ્થોમાં, વૃદ્ધો વૃદ્ધોમાં, પંડિતો પંડિતોમાં, તથા શિલ્પીઓ પોતપોતાના (સુથાર સોની વગેરે) સમુદાયમાં બેસતા હતા. (૩૨) પોતાના ભક્તો મૌન બેઠા ત્યારે શ્રીહરિએ પોતપોતાનાં વાજિંત્રો તૈયાર કરી લાંબા સમયથી શ્રીહરિની આજ્ઞાની પ્રતીક્ષા કરતાં વગાડનારાઓને આજ્ઞા આપી. (૩૩) તે સમયે વાદ્ય વગાડનારા પોતાના હાથની કુશળતા સમગ્રપણે શ્રીહરિને બતાવતા હતા. (૩૪) શ્રીહરિ તેમના હાથની લાઘવતા જોઈને વગાડનારાઓની પ્રશંસા કરતા હતા પછી સભામાં બેઠેલા અનેક દેશથી આવેલા જનોને જોતા હતા. (૩૫) શ્રીહરિ તેમનામાં જે જે દેશોમાં જે જે મુખ્ય હોય તે તે જનોને તે તે દેશનું વૃત્તાંત પૂછવા માટે સભામાં પોતાની પાસે બોલાવતા હતા. (૩૬)

હે રાજન્ ! તે જનો સહર્ષ તત્કાલ જ ઊઠીને શ્રીહરિની સમીપમાં જઈ બન્ને હાથ જોડી પ્રણામ કરી શ્રીહરિના મુખચંદ્રમાં ચકોર પક્ષીની માફક નેત્રોવાળા થઈને શ્રીહરિની આગળ ઊભા રહ્યા. (૩૭) ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે અન્નકૂટોત્સવે સભોપવેશનવર્ણન નામા દશમોઽધ્યાયઃ (૧૦)

## અધ્યાય : ૧૧

## પોતાના ભક્તોના મુખથી હર્ષપૂર્વક દેશાન્તરના વૃત્તાંતનું શ્રવણ શ્રીહરિએ કર્યું તેનું વર્ણન છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! ભગવાન શ્રીહરિ લોક અને શાસ્ત્રવ્યવહારમાં કુશળ વિનયથી નમ્ર પોતાના ભક્તોનો સત્કાર કરી સર્વ લોકોને સાંભળતા સતા પૂછતા હતા. (૧) હે જનો ! તમારા દેશમાં મારું અને મારા આશ્રિતો સભામાં બેઠેલા ત્યાગીઓ તથા મારા આશ્રિત ગૃહસ્થો તથા તેવી સ્ત્રીઓના વૃત્તાંત-સંબંધી લોકમાં પ્રસિદ્ધ વાર્તાઓ કેવા પ્રકારની હાલમાં વર્તે છે ? (૨) પૃથ્વીમાં મારાથી વિમુખ જે જનો છે તે લોકમાં સાધુ શબ્દથી વ્યવહાર કરાતા (સાધુલક્ષણે રહિત) સાધુઓની અને પોતાના ગુરુઓની કેવી વાતો કરે છે ? (૩) હે રાજન્ ! આ પ્રકારે શ્રીહરિએ પુછાયેલાં જનોએ જે પ્રકારે સાંભળ્યું હતું અને જે પ્રકારે જોયું હતું તે પ્રમાણે પોતપોતાના દેશમાં થયેલું વૃત્તાંત કહ્યું. (૪)

जना ऊचुः- भगवन्नस्मदीयेषु देशेषु विमुखा अपि । जना यथा वदन्ति त्वां तथैव ब्रूमहे वयम् ॥५॥ धन्यो नारायणमुनिः साम्प्रतं धरणीतले । भक्तिज्ञानविरागाढ्यं सद्धर्मं पाति योऽखिलम् ॥६॥ गृहभिन्नाश्रमस्थान् यस्त्यागिनो विधवास्तथा । सन्धारयत्यष्टविधं ब्रह्मचर्यं सुदुर्धरम् ॥७॥ यस्त्याजयति तान् कामं येन कामेन मोहिताः । विद्वांसोऽपि सगोत्रां स्त्रीर्गच्छन्ति पशवो यथा ॥८॥ यस्त्याजयति तान् द्रव्यं यल्लोभेन बुधा अपि । स्वबन्धूंश्चापि मित्राणि घ्नन्त्यन्यैर्घातयन्ति च ॥९॥ यश्च स्वामी रसास्वादं तांस्त्याजयति वै सतः । जायन्ते यद्वशा एव कामोद्वृत्ता हि पूरुषाः ॥१०॥ नीचजातीनामशनन्त्यन्नादि येन च। विह्वला वर्णसाङ्कर्यं कुर्वते पुरुषा भुवि ॥११॥ यश्च त्याजयति स्वामी स्नेहं स्वान्वपुरादिषु । नरकान्प्रेतभावं च यद्वशाद्यान्ति मानवाः ॥१२॥ यत्र यत्र भवेत्स्नेहो देहिनामिह वस्तुनि । ताद्रूप्यं तस्य तस्य स्यात्तादृक् स्नेहो हि हाप्यते ॥१३॥ यः स्वामी मानमत्यर्थं हापयत्यात्मनः सतः । गुरून्साधूनपि प्राज्ञा मन्यन्ते नैव यद्वशाः ॥१४॥ मानेनैवात्मनः पापं साधूनां पुरतो नराः। न निष्कपटभावेन कथयन्त्यात्मशुद्धये ॥१५॥ मानाद्धि जायते क्रोधो निर्दयो हिंस्रवृत्तिकृत् । अवाच्यवाचकः स्वस्य परेषां चापि घातकः ॥१६॥ इदृग्मानविहीना हि सन्तो यस्य परैः कृतम् । धूलिक्षेपं ताडनं च सहन्ते दुर्वचांसि च ॥१७॥ धन्य एवास्त्यतः स्वामी सत्योऽसावेव सद्गुरुः । न महान् पुरुषः कश्चिद्वर्तते हीदृशो भुवि ॥१८॥ धन्याश्च साधवस्तस्य ये धर्मान् स्वगुरूदितान् । प्रयता ब्रह्मचर्यादीन् पालयन्ति निरन्तरम् ॥१९॥ धन्या गृहस्था अपि ते स्वामिनं समुपाश्रिताः । स्वसृमातृसमा ये तु जानन्ति परयोषितः ॥२०॥ स्पर्शनं विधवास्त्रीणां गृहिणोऽपि कदाचन । विनाऽऽपदं न कुर्वन्ति स्वमात्रापि रहःस्थितिम् ॥२१॥

**ભક્તજનો બોલ્યાં** : હે ભગવન્ ! અમારા દેશમાં તમારાથી વિમુખજનો પણ જે પ્રકારે તમોને કહે છે તે પ્રકારે અમો કહીએ છીએ. (૫) પૃથ્વીમાં હાલમાં શ્રીનારાયણ મુનિને ધન્યવાદ છે, જે નારાયણ મુનિ ભક્તિ, જ્ઞાન અને વૈરાગ્યયુક્ત સમગ્ર એકાંતિક ધર્મનું રક્ષણ કરે છે. (૬) તથા જે ગૃહસ્થ ભિન્ન પ્રથમ, ત્રીજો અને ચોથો; બ્રહ્મચારી, વાનપ્રસ્થ અને સંન્યાસાશ્રમોમાં રહેતા આશ્રમીઓ અને ત્યાગી સાધુઓને તથા વિધવા સ્ત્રીઓને બીજા જનોથી અતિકષ્ટથી પણ ન ધારી શકાય તેવું બ્રહ્મચર્યવ્રત ધારણ કરાવે છે. (૭) જે વર્ણી વગેરે પોતાના આશ્રિતોને કામનો ત્યાગ કરાવે છે, જે કામથી મોહ પામેલા વિદ્વાન પુરુષો પણ પશુઓની માફક સગોત્રની સ્ત્રીઓ પ્રત્યે ગમન કરે છે. (૮) જે સ્વામિનારાયણ સ્વાશ્રિત બ્રહ્મચારી વગેરેને ધનનો ત્યાગ કરાવે છે. જેના લોભથી વિવેકીજનો પણ પોતાનાં બંધુજનો અને મિત્રોને પણ મારે છે અને બીજા પાસે મરાવે છે. (૯) જે સ્વામી સાધુ પુરુષોને રસાસ્વાદનો ત્યાગ કરાવે છે, જે રસાસ્વાદને આધીન પુરુષો કામદેવથી ઉન્મત્ત થાય છે. (૧૦) પૃથ્વીમાં જે રસાસ્વાદથી વ્યાકુળ પુરુષો પોતાના વર્ણથી નીચ જાતિઓનું અન્ન આદિ ભક્ષણ કરે છે માટે વર્ણથી નીચ જાતિઓનું અન્ન આદિ ભક્ષણ કરે છે માટે વર્ણસંકર ઠરે છે. (૧૧) જે શ્રીહરિ પોતાના સાધુજનોને પોતાના શરીર આદિમાં પ્રીતિનો ત્યાગ કરાવે છે. મનુષ્યો શરીર આદિમાં સ્નેહના આધીનપણાથી નરકાદિની યાતના અને પ્રેતભાવને પામે છે. (૧૨) આ લોકમાં જ્યાં જ્યાં સ્ત્રી-ધનાદિ પદાર્થોમાં સ્નેહ થાય તે તે પદાર્થોમાં સ્નેહ કરનાર મનુષ્ય તદ્‌રૂપપણાને પામે, તેવો સ્નેહ શ્રીહરિ સ્વાશ્રિતોને ત્યાગ કરાવે છે. (૧૩) જે સ્વામી પોતાના સાધુઓને માનનો અત્યંત ત્યાગ કરાવે છે, જે માનને આધીન શાસ્ત્રજ્ઞો પણ પોતાના આચાર્યો તથા સાધુઓને પણ માનતા નથી. (૧૪) મનુષ્યો પોતે કરેલાં ગુપ્ત પાપો પણ સાધુની આગળ નિષ્કપટપણે પોતાની શુદ્ધિ માટે કહી શકતા નથી. (૧૫) માનથી, નિર્દય, હિંસા કરનારો, અવાચ્ય શબ્દો બોલનારો, પોતાનો અને પારકાનો ઘાત કરનારો, ક્રોધ ચોક્કસ ઉત્પન્ન થાય છે. (૧૬) આ પ્રકારે માનથી રહિત જે સ્વામીના સંતો દુર્જનોએ ધૂળ નાખવી, માર મારવો, નઠારાં વચનો કહેલાં તેને સહન કરે છે. (૧૭) માટે નારાયણ મુનિને ધન્ય છે ! સાચા સદ્‌ગુરુ સ્વામી જ છે. પૃથ્વીમાં સ્વામીના જેવા બીજા કોઈ મહાપુરુષ નથી જ. (૧૮) શ્રી સ્વામીના સાધુઓને ધન્ય છે, જે સાધુઓ પોતાના ગુરુ શ્રી હરિએ કહેલા બ્રહ્મચર્યાદિ ધર્મો, નિયમતત્પર થઈને નિરંતર પાળે છે. (૧૯) સ્વામીના આશ્રિત ગૃહસ્થ જનો પણ ધન્ય છે, જે ગૃહસ્થો પારકી સ્ત્રીને બહેન અને માતા સમાન જાણે છે. (૨૦) શ્રીહરિનાં આશ્રિત ગૃહસ્થજનો પણ વિધવા સ્ત્રીઓનો સ્પર્શ ક્યારેય પણ કરતા નથી. આપત્‌કાળ વિના પોતાની માતાની સાથે પણ એકાંત સ્થાનમાં રહેતા નથી. (૨૧)

भङ्गां गञ्जं चाहिफेनं मद्यमत्स्यामिषाणि च । अभक्ष्यं नैव भक्षन्ति न्यायार्जितधनाश्च ये ॥२२॥ अदत्तं नैव गृह्णन्ति तृणाद्यपि परस्य ये । घातं स्वपरयोर्नैव ये विपद्यपि कुर्वते ॥२३॥ गुरोर्दृढाप्तज्ञानत्वान्मोक्षार्थमपि नैव ये । शास्त्रोक्तभृगुतुङ्गाद्यैस्तित्यक्षन्ति वपूंषि वै ॥२४॥ इत्थं दृढधियो धीरास्तच्छिष्या गृहिणो नराः । वर्तमानास्तदाज्ञायां सन्ति धन्या भुवस्तले ॥२५॥ स्त्रियश्चैषामपि पतिं निजमेकं विनापरान् । जानन्ति पुरुषान् स्वीयपितृभ्रातृसमान्किल ॥२६॥ याश्च तं स्वामिनं नार्यो विधवाः समुपाश्रिताः । ता ब्रह्मचर्यमष्टाङ्गं पालयन्त्यगृहा इव ॥२७॥ धनुर्मानान्तरेणैव पुम्भ्यो गच्छन्ति दूरतः । न भाषन्ते च पुरुषैः पितृभ्रातृसुतान्विना ॥२८॥ सत्सङ्गिनः स्वपित्रादेर्वार्ता श्रृण्वन्ति या हरेः । चलन्ति सह तेनैव मार्गेऽप्यन्यैर्न कर्हिचित् ॥२९॥ पित्रादिनापि साकं ता न तिष्ठन्ति रहःस्थले । एवं हि सर्वा विधवा वर्तन्ते स्वाम्युपाश्रिताः ॥३०॥ सर्वेऽप्येते पयोऽम्ब्वाज्यं न पिबन्ति ह्यगालितम् । व्रतान्येकादशीजन्माष्टम्यादीनि च कुर्वते ॥३१॥ आश्रित्य स्वामिनं चैते स्वस्वधर्मे स्थिताः सदा । अनन्यभक्तिं कुर्वन्ति कृष्णस्य परमादरात् ॥३२॥ धन्याः स्वाम्याश्रितास्तस्माद्योषितः पुरुषा इह । अस्मदीयास्तु गुरवस्त्यक्त्वा धर्मं चरन्ति हि ॥३३॥ न स्थापयन्ति स्वामीव स्वशिष्यान्धर्मवर्त्मनि । तस्माद्धिगस्तु तांस्तांश्च श्रीस्वामिविमुखांश्च नः ॥३४॥ इत्थं वदन्ति बहवो लोका नारायण ! प्रभो ! । केचिदाहुः श्रयिष्यामो वयं तं स्वामिनं त्विति ॥३५॥ तान्वदन्ति तदा केचिद्वयं कुलगुरून्यदि । त्यजेम तर्हि नो लज्जा लौकिकी हि गमिष्यति ॥३६॥ तदाहुः केऽपि निपुणा लज्जा तु स्वाम्युपाश्रयात् । स्थास्यत्येवान्यथास्माकं सा यास्यति न संशयः ॥३७॥

---

જે સ્વામીના આશ્રિત ગૃહસ્થો છે તે ભાંગ, ગાંજો અને અફીણ, ત્રણ પ્રકારની સુરા અને અગિયાર પ્રકારનું મદ્ય, માછલાં, માંસ અને અભક્ષ્ય વસ્તુઓ કંઈ પણ ખાતા નથી અને પીતા પણ નથી અને ન્યાયથી ધન સંપાદન કરનારા છે. (૨૨) જે ગૃહસ્થો કોઈએ નહિ આપેલી વસ્તુ, તૃણ, કાષ્ઠ વગેરે ગ્રહણ કરતા નથી. આપત્કાલમાં પણ પોતાનો અને પારકો ઘાત કરતા નથી. (૨૩) જે ગૃહસ્થો પોતાના ગુરુની આજ્ઞાથી પ્રાપ્ત કરેલા દૃઢ જ્ઞાનથી, મોક્ષ માટે પણ શાસ્ત્રમાં કહેલા ભૃગુપત્તન (ઊંચા પર્વતથી પડવું) વગેરેથી પોતાના દેહને ત્યાગ કરવા ઈચ્છતા નથી. (૨૪) આ પ્રમાણે નિશ્ચલ બુદ્ધિવાળા ધીર પુરુષો શ્રીસ્વામીના આશ્રિત ગૃહસ્થ પુરુષો શ્રીહરિની આજ્ઞામાં વર્તતા સતા પૃથ્વીમાં ધન્ય છે. (૨૫) એ ગૃહસ્થોની સ્ત્રીઓ પણ કેવળ પોતાના પતિ વિના બીજા પુરુષોને પોતાના પિતા અને ભાઈ સમાન નિશ્ચે જાણે છે. (૨૬) સ્વામીની આશ્રિત વિધવા સ્ત્રીઓ ત્યાગીની માફક અષ્ટ પ્રકારનું બ્રહ્મચર્ય પાળે છે. (૨૭) જે વિધવા સ્ત્રીઓ પુરુષોથી ચાર હાથ દૂર ચાલે છે પોતાના પિતા, ભાઈ અને પુત્ર વિના બીજા પુરુષો સાથે બોલતી નથી. (૨૮) જે વિધવા સ્ત્રીઓ સાધુઓના સમાગમવાળા પોતાના પિતા, ભાઈ અને પુત્રાદિથી શ્રીકૃષ્ણની વાતો સાંભળે છે, બીજા પુરુષથી સાંભળતી નથી, માર્ગમાં પોતાના પિતા વગેરેની સાથે ચાલે છે ક્યારેય બીજા સાથે ચાલતી નથી. (૨૯) વિધવા સ્ત્રીઓ પોતાના પિતાદિની સાથે પણ એકાંત સ્થળમાં રહેતી નથી. આ પ્રકારે શ્રી સ્વામિનારાયણની આશ્રિત વિધવા સ્ત્રીઓ વર્તે છે. (૩૦) સર્વે ગૃહસ્થ અને ત્યાગીઓ દૂધ, જળ, ઘી ગાળીને પીએ છે. એકાદશી અને જન્માષ્ટમી વગેરે વ્રતો કરે છે. (૩૧) ગૃહસ્થો અને ત્યાગીઓ સ્વામીને આશરીને નિરંતર પોતપોતાના ધર્મમાં રહ્યા સતા શ્રીકૃષ્ણની અનન્ય ભાવથી ભક્તિ, પરમ સ્નેહથી કરે છે. (૩૨) માટે આ જગતમાં સ્વામિનારાયણનાં આશ્રિત સર્વ કોઈ નર-નારી ધન્ય છે, કારણ કે તેઓ પોતાના ધર્મનું ઉલ્લંઘન કરતાં નથી. આપણા ગુરૂઓ તો પોતાના ધર્મનો ત્યાગ કરીને વર્તે છે. (૩૩) તે ગુરુઓ શ્રીસ્વામીની માફક પોતાના શિષ્યોને પોતપોતાના ધર્મમાર્ગમાં સ્થાપન કરતા નથી માટે તે આપણા ગુરુઓને ધિક્કાર છે. અને શ્રીસ્વામીથી વિમુખ (અધર્મી ગુરુઓના શિષ્ય થઈ રહેલા) આપણને પણ ધિક્કાર છે. (૩૪) હે નારાયણ ! હે પ્રભો ! આ પ્રકારે ઘણા લોકો બોલે છે. કેટલાક તો અમો શ્રીસ્વામીનો આશ્રય કરીશું એમ બોલે છે. (૩૫) તે સમયે કેટલાક 'સ્વામીનો આશ્રય કરીશું' એમ બોલનારા પુરુષોને કહે છે : જો આપણે કુળના ગુરુઓનો ત્યાગ કરીએ તો આપણી લોકમાં લાજ જશે જ. (૩૬) તે સમયે વિચક્ષણ કેટલાંક જનો કહેવા લાગ્યાં : હે ભાઈ ! લજ્જા તો શ્રી સ્વામિનારાયણના આશ્રયથી જ રહેશે. સ્વામીનો આશ્રય નહિ કરીએ તો લાજ જશે જ, એમાં સંશય નથી. (૩૭)

आस्माकीना हि विधवा बहवः स्वसृकन्यकाः । गुरुसंज्ञेभ्य एतेभ्यो गर्भं दधति निस्त्रपाः ॥३८॥ प्रच्छन्नं गर्भपातं ताः कुर्वते पातकं महत् । तस्मात्तासामघाद्रक्षा कार्या स्वाम्याश्रयेण वै ॥३९॥ तांस्तदा केचन प्राहुर्जायमानेऽपि पातके । एतावत्कालपर्यन्तमासील्लज्जा तु बाह्यतः ॥४०॥ साम्प्रतं त्वङ्गदीयस्य राज्यं सार्वत्रिकं भुवि । जातमस्तीति नो लज्जा गमिष्यत्येव निश्चितम् ॥४१॥ स जानाति नृपश्चारैर्विधवागर्भसम्भवम् । गर्भं घ्नतीस्तु ता हन्ति कण्ठपाशेन तत्क्षणम् ॥४२॥ तत्सम्बन्धिजनान् द्रव्यं गृहीत्वा दण्डयत्यसौ । लज्जानाशस्तथा पापं भविष्यति ततोऽधुना ॥४३॥ अपत्यरक्षणे तासां वधे वाऽपयशो महत् । मृत्योरप्यधिकं भूमावस्माकं हि भविष्यति ॥४४॥ तस्माद्भूमण्डले क्वापि चातुर्वर्ण्यस्य साम्प्रतम् । न स्वामिनं विनाऽन्यास्ति गतिस्तस्मात्स सेव्यताम् ॥४५॥ धूर्तास्तु येऽस्मद्गुरवः प्रवेष्टव्या न ते गृहे । कथञ्चिदागतास्ताड्या नागच्छेयुः पुनर्यथा ॥४६॥ ततो नार्यो भजिष्यन्ति सहास्माभिरभर्तृकाः । स्वामिनं तेन नः कीर्तिः सपुण्या वृद्धिमेष्यति ॥४७॥ इत्थं महाराज ! जना देशे देशे वदन्ति वै । यथाश्रुतं यथादृष्टं तथास्माभिरुदीरितम् ॥४८॥ सुव्रत उवाच – श्रुत्वेति तद्वचो राजन् ! भक्तैः सह जहास सः । दिव्यरूपौ वीक्षमाणः पितरौ प्रीणयन्प्रभुः ॥४९॥ तेऽपीत्थमावेद्य जनास्तदीयां जनश्रुतिं तस्य ततो निदेशात् । स्पृष्ट्वाङ्घ्रिपद्मं च मुदा प्रणम्य स्वस्थानमेत्यैव पुनर्निषेदुः॥५०॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे अन्नकूटोत्सवे देशान्तरीयवृत्तान्तश्रवणनामैकादशोऽध्यायः ॥११॥

---

આપણી ઘણી વિધવા બહેનો અને કન્યાઓ લજ્જાએ રહિત એવીઓ નામ માત્રના ગુરુઓથી ગર્ભ ધારણ કરે છે. (૩૮) આપણી બહેનો વગેરે છાની જેમ હોય તેમ મહાપાપરૂપ ગર્ભપાત કરે છે. માટે સ્વામીના આશ્રયથી વિધવાઓની પાપથી રક્ષા કરવી. (૩૯) તે સમયે કેટલાંક જનો આ પ્રમાણે બોલનારાઓને કહેવા લાગ્યા. ગર્ભપાત સ્વરૂપ પાપ ઉત્પન્ન થવા છતાં પણ આટલા સમય સુધી બહારથી લાજ રહી છે. (૪૦) હાલમાં તો પૃથ્વીમાં અંગ્રેજ રાજાનું રાજ્ય સર્વ દેશોમાં થયેલું છે. માટે આપણી લાજ અચૂક જશે જ. (૪૧) તે અંગ્રેજ રાજા ગુપ્તચરો દ્વારા વિધવાના ગર્ભની ઉત્પત્તિ જાણે છે. ગર્ભપાત કરતી વિધવાઓને તો તત્કાળ કંઠમાં પાશ નાખીને વિનાશ કરે છે. (૪૨) આ રાજા વિધવાઓનાં સંબંધીઓને ગ્રહણ કરીને દંડથી દ્રવ્ય ગ્રહણ કરે છે માટે હાલમાં લજ્જાનો નાશ તથા વિધવાના વ્યભિચારજન્ય પાપ થશે. (૪૩) વિધવા સ્ત્રીઓની પ્રજાના રક્ષણમાં અથવા રાજાએ કરેલાં વિધવાઓના મારવામાં મૃત્યુથી પણ અધિક અપયશ પૃથ્વીમાં થશે. (૪૪) માટે હાલમાં ભૂમંડલમાં ચાર વર્ણનાં જનોને સ્વામી વિના બીજું આશ્રયસ્થાન કંઈ પણ નથી માટે સ્વામીનું સેવન કરો. (૪૫) આપણા ધૂર્ત ગુરુઓને તો આપણા ઘરમાં પ્રવેશ કરાવવો નહિ, ક્યારેક ભગવાનની પ્રસાદી આપવા વગેરે નિમિત્તે આવે તો માર મારવો જેથી ફરીને આપણે ઘેર આવે નહિ. (૪૬) એમ થવાથી કુસંગદોષ દૂર થશે. વિધવા સ્ત્રીઓ પણ આપણી સાથે સ્વામિનારાયણના ચરણકમલનો આશ્રય કરશે. તેથી મોટું સત્કાર્ય થયું ગણાશે. કીર્તિ થશે. સત્કાર્ય અને કીર્તિમાં વધારો થશે. (૪૭) હે મહારાજ ! આ પ્રકારે દરેક દેશમાં જનો નિશ્ચે બોલે છે. અમોએ જે પ્રકારે સાંભળ્યું છે. અને જોયું છે તે પ્રમાણે તમોને કહ્યું. (૪૮) હે રાજન્ ! આ પ્રમાણે સર્વ દેશના મુખ્ય હરિભકતોનું વચન સાંભળીને પ્રભુ શ્રીહરિ દિવ્ય સ્વરૂપથી પોતાને પડખે રહેલાં ધર્મ અને ભક્તિને જોતા થકા માતાપિતાને પ્રસન્ન કરતાં સતા ભક્તજનોની સાથે હાસ કરતા હતા. (૪૯)

તે ભક્તજનો પણ આ પ્રમાણે શ્રીહરિ સંબંધી લોકવાર્તાઓ નિવેદન કરી, પછી શ્રીહરિની આજ્ઞાથી શ્રીહરિનાં ચરણકમળનો હર્ષથી સ્પર્શ કરી પ્રણામ કરીને જ પોતાના સ્થાનમાં જઈને બેઠા. (૫૦)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીયપ્રકરણે અન્નકૂટોત્સવે દેશાન્તરીયવૃત્તાન્તશ્રવણ નામૈકાદશોઽધ્યાય: (૧૧)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच-अथापश्यद्भक्तजनान्निजपूजासमुत्सुकान् । पूजाद्रव्याणि पात्रेषु भृत्वा स्वामी चिरस्थितान्॥१॥ तेषां मनोरथं पूर्णं कर्तुं राजन्नियेष सः । मयरामो द्विजस्तावद्बद्धाञ्जलिपुटोऽवदत् ॥२॥ एते पुरःस्थिताः स्वामिन् ! पुरुषा योषितस्तथा। दूरदेशादुपायाताः सन्ति भक्तास्तव प्रभो ! ॥३॥ तेषां हि चिरकालीनो ह्यस्त्येव मनोरथः । पूजनार्थं तव हरे ! तं पूरयितुमर्हसि ॥४॥ इत्युक्तस्तेन विप्रेण प्रहसन् हरिरब्रवीत् । अद्यास्ति किं दिनं ब्रह्मन् ! कार्यमत्र च किं वद ॥५॥ इत्युक्तस्तेन स निजोष्णीषाद्दीर्घं पञ्चाङ्गपत्रकम् । निष्कास्य तद्विलोक्याह प्रभो ! दीपोत्सवोऽद्य तु ॥६॥ ग्राम्याणां ग्राम्यसौख्येन ह्यानन्दो लौकिको नृणाम् । त्वदर्चनेन भक्तानामद्यानन्दोऽस्त्वलौकिकः ॥७॥ एतेषां ग्राम्यसौख्येच्छा नास्त्येव गृहिणामपि । दूरे त्यक्त्वा यतस्तत्तु समायाता इहाद्य वै ॥८॥ मनोरथं हि सर्वेषां त्वदीयानां ततः प्रभो ! । त्वं पूरयितुमीशोऽसि भक्तकल्पमहीरुहः ॥९॥ इत्युक्तः स हरिः प्राह पूजयन्तु जना इमे । किन्तु कोलाहलो नैव कार्यो नान्योन्यमर्दनम् ॥१०॥ स्वस्व ग्रामपृथग्यूथैरागत्यात्रार्चनं द्रुतम् । कृत्वा गन्तव्यमित्युक्ता जना आसन्प्रहर्षिताः ॥११॥ ततः क्रमेण तत्पूजां सर्वे कर्तुमुपाययुः यूथशो हि हरेरग्रे पुरुषाश्च स्त्रियः पृथक् ॥१२॥ तत्रादौ मध्यदेशीया जना हरिमुपाययुः। माथुराः शूरसेनाश्च वात्सघोषाश्च यामुनाः ॥१३॥ साल्वा नीपा उज्जिहाना माण्डव्याः कुरवस्तथा । दक्षिणोत्तरपाञ्चाला भद्राः कापिष्ठला अपि ॥१४॥ गौरग्रीवाश्चारिमेदा हस्तिनापुरवासिनः । पारियात्रनगोत्पन्ना धर्मारण्योद्भवास्तथा ॥१५॥ कालकोटय आश्वत्थाः कङ्ककाञ्चनपाण्डवाः। सारस्वताश्च मत्स्याश्च साकेताः कुकुरास्तथा ॥१६॥ एते चान्येऽपि बहवो गौर्जरौदुम्बरादयः । भक्ता भगवतो दक्षास्तस्मिन्पूजनकर्मणि ॥१७॥

## અધ્યાય : ૧૨

## સર્વે દેશાન્તરથી આવેલા ભક્તજનોને શ્રીહરિના પૂજનના આનંદનો મહોત્સવ કહ્યો છે.

**સુવ્રત મુનિ બોલ્યા :** હે રાજન્ ! પછી શ્રીહરિ પોતાની પૂજામાં ઉત્સાહવાળા, પાત્રોમાં પૂજાની સામગ્રીઓ મૂકીને લાંબા સમયથી ઊભા રહેલા ભક્તજનોને જોતા હતા. (૧) હે રાજન્ ! શ્રીહરિ દૂર દેશથી આવેલા ભક્તજનોના મનોરથ પૂર્ણ કરવા માટે ઈચ્છતા હતા તેટલામાં મયારામ ભટ્ટ બંને હાથ જોડીને બોલ્યા : (૨) હે સ્વામિન્ ! હે પ્રભો ! તમારી આગળ ઊભેલા તમારા ભકતો આ પુરૂષો તથા સ્ત્રીઓ દૂર દેશથી આવેલાં છે. (૩) હે હરે ! તે ભક્તજનોને તમારી પૂજા માટે લાંબા કાળથી ઉત્પન્ન થયેલા મનોરથ છે તેને પૂર્ણ કરવા માટે યોગ્ય છો. (૪) હે રાજન્ ! આ પ્રકારે વિપ્ર મયારામ ભટ્ટે કહેવાયેલા શ્રીહરિ હસતા સતા બોલ્યા : હે બ્રહ્મન્ ! આ તિથિમાં કયો દિવસ અથવા મહોત્સવ છે ? અને આ દિવસે શું કરવા યોગ્ય છે તે કહો ? (૫) હે રાજન્ ! આ પ્રકારે શ્રીહરિએ કહેલા મયારામ વિપ્ર પોતાના મસ્તકની પાઘડીમાંથી લાંબું પંચાંગ કાઢી તેમાં જોઈને કહેવા લાગ્યા : હે પ્રભો ! આ તિથિમાં તો દીપોત્સવ છે. (૬) તમારાથી વિમુખ માયિક વિષયસુખ ઈચ્છનારા જનોને વિષયસુખથી સાંસારિક આનંદ છે. તમોને ભજનારા જનોને તો તમારા પૂજનથી અલૌકિક આનંદ થાઓ. (૭) ગૃહસ્થ ભક્તોને પણ ગ્રામ્યસુખની અભિલાષા નથી જ. માટે ગ્રામ્યસુખ દૂરથી ત્યાગ કરી અહીં આવેલા છે. (૮) હે પ્રભો! તે માટે કલ્પવૃક્ષ સમાન પોતાના ભક્તોના મનોરથ પૂર્ણ કરવામાં તમો સમર્થ છો. (૯) હે રાજન્ ! આ પ્રકારે કહેલાં શ્રીહરિએ કહ્યું : હે ભટ્ટ ! આ ભક્તો સુખેથી પૂજા કરે પરંતુ કોલાહલ કરવો નહિ. એકબીજાને પીડા કરવી નહિ. (૧૦) પોતપોતાના ગામનાં જુદાં જુદાં મંડળોએ મારી સમીપમાં આવી મારું પૂજન તત્કાલ કરીને જવું. હે રાજન્ ! આ પ્રકારે કહેલાં મનુષ્યો અત્યંત હર્ષ પામ્યાં. (૧૧) પછી તે તે દેશના ભક્તો ભેગા થઈ સર્વે પુરુષો અને સ્ત્રીઓ ભિન્ન ભિન્ન અનુક્રમે શ્રીહરિનું પૂજન કરવા માટે શ્રીહરિની સમીપ આવ્યા. (૧૨) તે જનોમાં પ્રથમ મધ્યદેશનાં જનો શ્રીનારાયણમુનિની સમીપમાં પૂજા કરવા માટે આવ્યાં. મથુરા દેશના, શૂરસેન દેશના, વત્સઘોષ દેશના, યમુનાના દેશના, સાલ્વ દેશના, નીપ દેશના, ઉજ્જૈન દેશના, માંડવ્ય દેશના, કુરુદેશના, દક્ષિણ પાંચાલના, ઉત્તર પાંચાલના, ભદ્ર દેશના અને કાપિષ્ઠલ દેશના; ગૌરગ્રીવ દેશના, અરિમેદના, હસ્તિનાપુર, પારિયાત્ર પર્વતના, ધર્મારણ્યના, કલકત્તાના, અશ્વત્થ દેશના, કંકદેશના, ઉપજ્યોતિષ દેશના, સારસ્વત દેશના, પાંડુ દેશના, મત્સ્ય દેશના, અયોધ્યા દેશના, કુકુર દેશના, એ પૂર્વે કહેલા મથુરા વગેરે દેશોમાં રહેનારા હરિભક્તો તથા ગુજરાત દેશના, અને ઔદુમ્બર દેશના નિવાસીઓ વગેરે બીજા ઘણા પૂજનકર્મમાં ચતુર ભગવાનના ભક્તો આવ્યા. (૧૩-૧૪-૧૫-૧૬-૧૭)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुगन्धिना चन्दनेन पौष्पैर्हारैर्मनोहरैः । स्वर्णबुट्टाङ्कितैर्वस्त्रैरुष्णीषैश्च महाधनैः ॥१८॥ अमूल्यरत्नाभरणैः पूजयित्वा तदन्तिके । रौप्यामत्राणि निदधुः पिण्डकैर्निभृतानि ते ॥१९॥ खेलनानि विचित्राणि शार्कराण्येव भूरिशः । ताम्बूलानि सपूगानि हरये ते न्यवेदयन् ॥२०॥ तेषां नार्यो भक्तिमत्यो हरेः कण्ठे पृथक् पृथक् । नक्षत्रमाला निदधुर्नमस्कृत्य ततो ययुः ॥२१॥ अथाययुर्महासत्त्वाः प्राच्या भक्तजनाः प्रभोः । मागघाः कर्बटाः सुह्मा आम्बष्ठाश्चान्द्रपत्तनाः ॥२२॥ काशयः कोसलाः पौण्ड्रा मेकला औत्कलास्तथा। गौडाश्च मिथिलोद्भूता माल्यवद्गिरिजास्तथा ॥२३॥ किरातजाश्च लौहित्या वर्धमानपुरोद्भवाः । एतेऽन्येऽप्यौण्ड्रमुख्याश्च पुपूजुर्हरिमादरात् ॥२४॥ चन्दनाक्षतपुष्पैश्च वासोभिश्चीनदेशजैः । मृदुभिश्च महामूल्यैस्तथा हेमविभूषणैः ॥२५॥ मुक्तापीडैर्बहुविधैः पूजयित्वा हरेः पुरः । स्वर्णमुद्राभृतान्येव रूप्यामत्राणि ते दधुः ॥२६॥ फलान्यनेकजातीनि स्वादूनि रुचिराणि च । अर्पयित्वा भगवते ययुस्तद्योषितस्तथा ॥२७॥ अथ तेषु गतेष्वायन्नग्निकाष्ठोद्भवा जनाः । जठराङ्गास्तथा वङ्गा उपवङ्गाश्च शूलिकाः ॥२८॥ चर्मद्वीपा विदर्भाश्च वत्सा अन्ध्राश्च चेदयः । विन्ध्यान्तवासिनश्चैव दशार्णास्त्रैपुरास्तथा ॥२९॥ एतेऽन्येपि च किष्किन्धाः शाबराद्या जनाः प्रभुम् । अनर्घ्यैः पीतवसनैर्हैमैर्वलयशृङ्खलैः ॥३०॥ मुक्तानां शेखरै रम्यैर्विविधैः कर्णवेष्टनैः । सम्पूज्याग्रे च निदधुरुपहारान्महाधनान् ॥३१॥ फलान्यनेकजातीनि पक्वानि गुणवन्ति च । राजतानि च हैमानि पात्राणि हरये ददुः ॥३२॥ कलशान् गर्गरीः कंसान् भृङ्गारान् वाटिकास्तथा । अलिञ्जरान् दर्शनीयान्प्रभवे ते न्यवेदयन् ॥३३॥

---

સુગંધીમાન ચંદન અને મનોહર નાના પ્રકારનાં પુષ્પોના હાર, સોનેરી બુટ્ટાદાર અંગરખાં વગેરે અને મહામૂલ્યવાળાં ભોળિયાનાં વસ્ત્રોથી અને મહામૂલ્ય હીરા-માણેક જેમાં છે એવાં સુવર્ણનાં અલંકારોથી શ્રીહરિનું પૂજન કરી મધ્યદેશના ભક્તો, દૂધના પેડાંથી ભરેલા, ચાંદીના થાળ શ્રીહરિની સમીપમાં મૂકતા હતા. (૧૮-૧૯) મધ્ય દેશના ભક્તો સાકરના રસથી નિર્માણ કરેલાં નાના પ્રકારનાં ઘણાં રમકડાં અને નાગરવેલનાં પાનનાં બીડાં શ્રીહરિને અર્પણ કરતા હતા. (૨૦) શ્રીહરિમાં ભક્તિવાળી મધ્ય દેશની સ્ત્રીઓ, શ્રીહરિના કંઠમાં સત્તાવીશ સેરોનો હાર ભિન્ન ભિન્ન ધારણ કરાવતી હતી. તે ફરીથી શ્રીહરિને નમસ્કાર કરી તે સ્થાનથી પોતાને બેસવાના સ્થાનમાં ગઈ. (૨૧) પછી મહાબળવાળા પૂર્વ દેશના નિવાસી ભક્તજનો શ્રીહરિની પૂજા માટે સમીપમાં આવ્યા. મગધ દેશના, કર્બટ દેશના, સુહ્મ દેશના, અંબષ્ઠ દેશના, ચાન્દ્રપત્તન દેશના, કાશી દેશના, કોશલ દેશના, પૌન્ડ્ર દેશના, મેકલ દેશના, તથા ઉત્કલ દેશના, ગૌડ દેશના, મિથિલા દેશના તથા મલયાચલ દેશના, કિરાત દેશના, લૌહિત્ય દેશના, વર્ધમાન દેશના, એ મગધ દેશ વગેરે તેમજ ઔન્ડ્ર દેશનાં નિવાસીજનો મુખ્ય જેમાં છે એવા બીજા ભક્તો પણ શ્રીહરિની પૂજા માટે શ્રીહરિની સમીપમાં આવ્યા. એ સર્વે ભક્તોએ પરમ પ્રેમથી શ્રી નારાયણ મુનિની પૂજા કરી. (૨૨-૨૩-૨૪) ચંદન, અક્ષત, નાના પ્રકારના પુષ્પના હારો અને ચીન દેશનાં કોમળ સ્પર્શવાળાં વસ્ત્રો તથા મહામૂલ્યોવાળાં સ્વર્ણનાં અલંકારો અને ઘણા પ્રકારનાં મોતીઓના તોરાઓથી શ્રીહરિનું પૂજન કરી પૂર્વ દિશાના ભક્તજનો, શુદ્ધ સુવર્ણની નિર્માણ કરેલી મુદ્રાઓથી ચાંદીના થાળો ભરીને શ્રીહરિની આગળ મૂકતા હતાં. (૨૫-૨૬) તે પ્રકારે પૂર્વ દેશની સ્ત્રીઓ અનેક જાતનાં સ્વાદિષ્ટ મનોહર દાડમ આદિનાં ફળો શ્રીહરિને અર્પણ કરીને પોતાને બેસવાના સ્થાનમાં ગઈ. (૨૭) પછી પૂર્વ દેશના ભક્તો પોતાના સ્થાનમાં ગયા ત્યારે અગ્નિ દિશાના ભક્તો શ્રીહરિની પૂજા માટે સમીપમાં આવ્યા. અગ્નિ દિશાના અવાન્તર દેશોનાં નામ કહે છે : જઠરાંગ દેશના, બંગાલના, ઉપબંગાલના, શૂલિક, ચર્મદ્વીપ, વિદર્ભ, વત્સ, આંધ્ર, ચેદી, વિંધ્યવાસી, દશાર્ણ, ત્રિપુર, એ જઠરાંગ વગેરે તથા કિષ્કિંધા શબર વગેરે દેશનાં નિવાસી બીજાં પણ ભક્તજનો અમૂલ્ય પીતામ્બરાદિ વસ્ત્રો અને સુવર્ણનાં કડાં, સાંકળાં વગેરેથી શ્રીહરિનું પૂજન કરીને તથા મોતીઓના રમણીય તોરાઓ અને કુંડળોથી પૂજન કરીને તે ભક્તો બહુમૂલ્યવાળી ભેટો શ્રીહરિની આગળ મૂક્તા હતા. (૨૮-૨૯-૩૦-૩૧) શ્રેષ્ઠ ગુણવાળાં અનેક જાતનાં ફળો, ચાંદી, અને સુવર્ણનાં પાત્રો શ્રીહરિને તે ભક્તો અર્પણ કરતા હતા. (૩૨) તાંબાના ઘડાઓ, અબખોરા, ઝારી તથા ચાંદીની વાટકીઓ, દર્શન કરવા યોગ્ય માંણ્યો વગેરે અગ્નિ દેશના નિવાસી ભક્તોએ શ્રીહરિને અર્પણ કર્યું. (૩૩)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

इति सम्पूज्य ते याता दाक्षिणात्या अथाययुः । सौरिकीर्णास्तालिकटा मलयाचलसम्भवाः ॥३४॥ नासिक्याः कोल्लगिरिजा भरुकच्छाश्च कौङ्कणाः । कर्कोटकाश्च शिबिका वेणातटनिवासिनः ॥३५॥ दार्दुरा ऋष्यमूकीया महेन्द्राचलवासिनः । कावेरीतटवासाश्च चैत्रकूटा जटाधराः ॥३६॥ कार्णाटकाश्च गोनर्दाश्चोलाः केरलदेशजाः । गाणराज्या ऋषीकाश्च काञ्चीवासास्तथार्षभाः ॥३७॥ ताम्रपर्णीतटावासा दण्डकारण्यवासिनः । बलदेवपत्तनाश्च धर्मपत्तनवासिनः बलदेवपत्तनाश्च तैलिङ्गा द्राविडास्तथा ॥३८॥ वेङ्कटाद्रिनिवासाश्च धर्मपत्तनवासिनः । एते चान्येऽपि बहवो मनुजाः सैंहलादयः ॥३९॥ पूजां भगवतश्चक्रुर्यथाविधि विचक्षणाः । यक्षकर्दमसंज्ञेन चन्दनेन सुगन्धिना ॥४०॥ अक्षतैर्विविधैः पुष्पैरनर्घ्यैर्वसनैः शुभैः । सितैः पीतैश्च रक्तैश्च चित्रैश्च स्वर्णबिन्दुभिः ॥४१॥ प्रावारैश्च निचोलैश्च पटकैः कटिबन्धनैः । कौशेयैश्च दुकूलैश्च पत्रोर्णैर्बहुमूल्यकैः ॥४२॥ अमूल्यैः शीर्षपटकैर्मञ्जीरैर्हंसकैस्तथा । ऊर्मिकाभिश्च कैयूरैः पारिहार्यैश्च शृङ्खलैः ॥४३॥ ग्रैवेयकैः कुण्डलैश्च गुत्सगुत्सार्धगोस्तनैः । एकावलीभिः शतशो देवच्छन्दैश्च भासुरैः ॥४४॥ ललन्तिकाभिः काञ्चीभिर्हारैर्माणवकैस्तथा । ललाटिकादिभिस्तं च पुपूजुस्ते जनाः प्रभुम् ॥४५॥ उपायनानि तस्याग्रे निदधुश्च बहूनि ते । भृतानि पृथुपात्राणि पर्पिकाशर्करादिभिः ॥४६॥ द्राक्षाक्षोडलवङ्गैलाजातीफलभृतानि च । निधाय पात्राणि ययुः प्रीणयन्तो हरिं भृशम् ॥४७॥ अथ नैरृतदिग्जाताः पुरुषाश्च स्त्रियो हरौ । भक्तिं परामनुप्राप्ता आययुः सस्मिताननाः ॥४८॥ सिन्धुपह्लवकाम्बोजाः सौवीरा वडवामुखाः । नारीमुखा आरवाश्च कापिला यावनास्तथा ॥४९॥ क्रव्यादाम्बष्ठखण्डाश्च सैन्धवाः कालकास्तथा । बादराः फेनगिरयः कर्णप्रावेष्टबर्बराः ॥५०॥ तथा पारशवाः शूद्रा जना रैवतका अपि । सौराष्ट्राभीरचञ्चूकाः किराता द्राविडादयः ॥५१॥

---

આ પ્રમાણે શ્રીહરિનું પૂજન કરીને ગયા પછી દક્ષિણ દિશાના ભક્તો આવ્યા. સૌરિકીર્ણ (સૂરત) તાલિકટ, મલયાચલ, નાસિક, કુલપર્વત, ભરૂચ, કુંકણ, કર્કોટક, શિબિક દેશ, વેણાનદીનો તટ, દર્દુર દેશ, ઋષ્યમૂક પર્વત, મહેન્દ્રાચલ, કાવેરીતટ, ચિત્રકૂટ, જટાધર, કર્ણાટક, ગોનર્દ, ચોલ, કેરલ, ગણ રાજ્ય, ઋષિક, કાંચીનગર, ઋષભ, તામ્રપર્ણી, તટના દંડકારણ્ય, બલદેવપત્તન, તૈલંગણ, દ્રાવિડ, વેંકટાદ્રિ, ધર્મપત્તન, એ સૌરીકીર્ણાદિ તથા સિંહલ વગેરે દેશનાં નિવાસી અને બીજાં ઘણાં મનુષ્યો શ્રીહરિના પૂજન માટે આવ્યાં. (૩૪ થી ૩૯) પૂજા કરવામાં વિચક્ષણ દક્ષિણ દેશના ભક્તો કુંકુમ, કપૂર, અગરૂ અને કસ્તૂરીથી યુક્ત મલયાગર ચંદનથી શ્રીહરિની પૂજા શાસ્ત્રવિધિથી કરતા હતા. (૪૦) કુમકુમથી મિશ્રિત અક્ષતો, નાના પ્રકારના પુષ્પોના હારો અને અમૂલ્ય, મનોહર, ધોળા, પીળા, લાલ, કૌસુંબી રંગથી રંગાયેલા ચિત્રવિચિત્ર સુવર્ણના બુટ્ટાઓથી અંકિત વસ્ત્રોથી પૂજા કરતા હતા. (૪૧) ઓઢવાનાં તથા સુવર્ણનાં સૂત્રોવાળાં અંગરખાં, પટકા, દુપટ્ટા, બહુમૂલ્યવાળા રેશમી પટકા, ધોયેલાં રેશમી વસ્ત્રો, બહુમૂલ્યવાળાં મસ્તકે બાંધવાનાં વસ્ત્રો તથા નૂપુર, પગના તોડા તથા વીંટીઓ તથા વેઢ, બાજુબંધ, હાથનાં કડાં, સાંકળાં, કંઠના આભૂષણ, કુંડળો, બત્રીસ સેરોના હાર, (ગુત્સ) ચોવીસ સેરોના હાર, (અર્ધ ગુત્સ) ચાર સેરોના હાર (ગોસ્તન) સોએ સો એકાવલી (એક લટના) હાર, અતિ પ્રકાશમાન ચળકતા સો સેર્યોના હાર, (દેવચ્છંદ) તથા નાભિ પર્યન્ત લાંબા હારો, કંદોરા તથા માણવક - (વીશ સેર્યોના હાર) લલાટનાં ભૂષણો વગેરે તેમજ 'શ્રીહરિ' એવા અક્ષરોવાળી વીંટીઓ તથા વેઢો વગેરેથી તે જનો શ્રીહરિને પૂજતાં હતાં. (૪૨ થી ૪૫) તે પૂર્વે કહેલાં ભક્તો બરફી, સાકર, પેંડા, પતાસાં વગેરેથી પરિપૂર્ણ ચાંદીના મોટા થાળો વગેરે અનેક ભેટો શ્રીહરિની આગળ મૂકતા હતા. (૪૬) તથા દ્રાક્ષ, અખરોટ, લવિંગ, એલાયચી અને જાયફળ, તેનાથી ભરેલાં તાંબાનાં ઉત્તમ પાત્રો શ્રીહરિની આગળ મૂકીને શ્રી નારાયણ મુનિને અત્યંત પ્રસન્ન કરતા દક્ષિણ દેશના ભક્તો પોતાના સ્થાનમાં ગયા. (૪૭) હવે નૈર્ઋત્ય દેશના ભક્તો શ્રીહરિમાં ઉત્તમ ભક્તિને પામેલા મંદહાસ્ય યુક્ત મુખવાળાં પુરુષો અને સ્ત્રીઓ શ્રીહરિના પૂજન માટે શ્રીહરિની સમીપમાં આવ્યાં. (૪૮) નૈર્ઋત્ય દેશના અવાન્તર દેશ, સિંધુ, પહ્લવ, કંબોજ, સૌવીર, વડવામુખ, નારીમુખ, આરવ, કાપિલ, યવન, ક્વ્યાદ, અંબષ્ઠ, ખંડ, સૈંધવ, કાલક દેશ, બાદર, ફેનગિરિ, કર્ણ, પ્રાવેષ્ટ, બાબરિયાવાડ, પારશવ, શૂદ્ર, રૈવત, સૌરાષ્ટ્ર, આભીર, ચંચૂક, કિરાત, દ્રાવિડ, આનર્ત વગેરે દેશનાં નિવાસીજનો શ્રીહરિના પૂજન માટે આવ્યાં. (૪૯-૫૦-૫૧)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

हरिं पुपूजुर्भक्त्या ते सौराष्ट्रास्तु विशेषतः । वस्त्रैः श्वेतैश्च कौसुम्भैर्जाम्बुवर्णैश्च कैसरैः ॥५२॥ हेमबुट्टाङ्कितैः शोणैर्नीशारैरसितैरपि । और्णैरनर्घ्यैर्मृदुभिर्घनैः सूक्ष्मैश्च रल्लकैः ॥५३॥ जाम्बूनदेन शुद्धेन निर्मितैश्च विभूषणैः । मणिरत्नेन्द्रनिचितैरनर्घ्यैर्मुकुटादिभिः ॥५४॥ चन्दनैः पुष्पहारैश्च पूजयित्वा हरेः पुरः । उपायनानि निदधुर्महापात्रभृतानि ते ॥५५॥ शर्कराभिः पीतसारैः खारिकाभिर्भृतानि च । बहुभी रूप्यमुद्राभिः पात्राणि हरयेऽदिशन् ॥५६॥ उद्वेगभृतपात्राणि नालिकेराणि च प्रभोः । अग्रे निधाय जग्मुस्ते तत्स्त्रियोऽपि तथैव च ॥५७॥ उपहारा हरेरग्रे गण्डशैला इवाभवन् । वस्त्राणां च चया आसन्पर्वता इव तत्र वै ॥५८॥ तत्रानन्दानन्दमुनिर्भगवत्पार्श्वसंस्थितः । वस्त्राणि च विभूषाश्च परिधापयति स्म तम् ॥५९॥ आगतेषु नवीनेषु पूर्वाण्यत्याजयत्तथा । सर्वेभ्यः स्वार्चकेभ्योऽदाद्धरिः पुष्पस्त्रगादि च ॥६०॥ प्रासादिकानि वस्त्राणि केभ्यश्चित्प्रददौ प्रभुः । अलङ्कारांश्च केभ्यश्चित्केभ्यश्चिच्च फलादिकम् ॥६१॥ केभ्यश्चिदुपहारार्थं केभ्यश्चित्सकलोपदाम् । दत्ते स्म भगवांस्तत्र भक्तानानन्दयन्निजान् ॥६२॥ अथाययुस्तत्र भक्ताः पाश्चात्या अपि भूरिशः । मणिमत्पर्वतावासा मेघवद्गिरिजास्तथा ॥६३॥ पारताः शकदेशीया भक्ताः पाञ्चनदा अपि । अपरान्तका हैहयाश्चोष्काणा रामठादयः ॥६४॥ चन्दनाद्यैश्च वस्त्रैश्च हेमरौप्यविभूषणैः । पूजयित्वोपहारांस्ते तस्याग्रे निदधुः प्रभोः ॥६५॥ बदामनालिकेरैश्च खर्जूरैः क्रमुकैस्तथा । भृतानि रूप्यमुद्राभिः पात्राणि हरयेऽदिशन् ॥६६॥ पयःफेननिभाः शय्या उपधानानि गेण्डुकान् । विविधास्तूलपटिका दीपिकाश्च न्यवेदयन् ॥६७॥ गतेषु तेष्वथाजग्मुर्वायव्या हरिसेवकाः । माण्डव्या मरुकच्छाश्च तथा फाल्गुलुकाश्मकाः । ॥६८॥ एते चान्ये मद्रखसस्त्रीराज्यस्थादयः प्रभुम् । पुपूजुः परया भक्त्या गन्धपुष्पांशुकादिभिः ॥६९॥

તે ભક્તો-જનો શ્વેત, કસુંબલ, જાંબુવર્ણ તથા કેસરવર્ણનાં વસ્ત્રોથી ભક્તિપૂર્વક શ્રીનારાયણ મુનિની પૂજા કરતા હતા. સૌરાષ્ટ્ર દેશના ભક્તો તો વિશેષપણે પૂજતા હતા. (૫૨) સુવર્ણના બુટ્ટાદાર, લાલ અને શ્યામ વર્ણની ડગલીઓ અને ઊનના અમૂલ્ય કોમળ સ્પર્શવાળા સૂક્ષ્મ તંતુઓથી ગૂંથેલા શાલ-દુશાલાઓથી તથા શુદ્ધ સુવર્ણથી નિર્માણ કરેલાં, પદ્મરાગ-મર્કતમણિ વગેરે તથા ઉત્તમ રત્નોથી જડેલો અમૂલ્ય મુગટાદિ અલંકારોથી પૂજા કરતાં હતાં. (૫૩-૫૪) ભક્તો ચંદન અને પુષ્પોના હારોથી શ્રીહરિને પૂજીને સોના અને ચાંદીના મોટા થાળોમાં ભેટો ભરીને શ્રીહરિની આગળ મૂકતા હતા. (૫૫) સાકર, પતાસાં અને ખારેકથી ભરેલાં પાત્રો તથા રૂપ્યમુદ્રા (રૂપિયા)થી ભરેલા વિવિધ પાત્રો શ્રીહરિને નિવેદન કરતા હતા. (૫૬) તે ભક્તજનો સોપારીથી ભરેલાં અને નાળિયેરથી ભરેલાં પાત્રો શ્રીહરિની આગળ મૂકીને જતા હતા. તેમની સ્ત્રીઓ પણ તે જ પ્રકારે કરતી હતી. (૫૭) શ્રીહરિની આગળ ભક્તજનોએ પૂજામાં અર્પણ કરેલા પદાર્થો પર્વત પરથી પડેલા મોટા પથ્થરોની માફક તથા વસ્ત્રો નાના પર્વતોની માફક હતા. (૫૮) તે સમયે ભગવાનની પડખે રહેલા આનંદાનંદ મુનિ વસ્ત્રો અને અલંકારો શ્રીહરિને પહેરાવતા હતા. (૫૯) તેવી રીતે નવીન વસ્ત્ર અને આભૂષણો આવે ત્યારે પ્રથમ ધારણ કરેલાં વસ્ત્રાદિને મુનિ ત્યાગ કરાવતા હતા. શ્રીહરિ પોતાની પૂજા કરનાર ભક્તોને પુષ્પોના હારો વગેરે આપતા હતા. (૬૦) શ્રીહરિ કેટલાક ભક્તોને પોતાનાં પ્રસાદીભૂત વસ્ત્રો આપતા હતા, કેટલાકને અલંકારો, કેટલાકને ફળો આપતા હતા. (૬૧) તે સમયે શ્રીહરિ પોતાના ભક્તોને આનંદ આપતા સતા, કેટલાક ભક્તોને અર્પણ કરેલી ભેટનો અર્ધો ભાગ (પ્રસાદરૂપે) આપતા હતા. કેટલાકને સમગ્ર ભાગ આપતા હતા. (૬૨) પછી પશ્ચિમ દેશના પણ ઘણા ભક્તો શ્રીહરિની પૂજા કરવા માટે આવ્યા. મણિમત્ પર્વતની તળેટીમાં રહેનારા તથા મેઘપર્વતની તળેટીમાં રહેનારા, પારત દેશ, શક દેશ, પંચનદ દેશ, અપરાંતક દેશ,હૈહય દેશ, ચોષ્કણ દેશ, રામઠ દેશ વગેરે દેશના ભક્તો આવ્યા. (૬૩-૬૪) તે ભક્તોએ ચંદન-પુષ્પની માળાઓ, તોરા અને વસ્ત્રો, ચાંદી-સુવર્ણનાં અલંકારોથી શ્રીહરિની પૂજા કરી શ્રીહરિની આગળ ઉપહારો મૂક્યા. (૬૫) બદામ, નાળિયેર, ખજૂર, સોપારીઓથી ભરેલાં પાત્રો તથા ચાંદીના રૂપિયાથી ભરેલાં પાત્રો શ્રીહરિને ભક્તો અર્પણ કરતા હતા. (૬૬) દૂધના ફીણના સમાન ઉજ્જવળ ઓછાડ કરેલા પલંગો, ઓશીકાં, ગાલમસૂરિયાં, નાના પ્રકારની રજાઈઓ અને પિત્તળની દીવીઓ ભક્તો શ્રીહરિને અર્પણ કરતા હતા. (૬૭) પછી તે ગયા ત્યારે વાયવ્ય દિશાના હરિભક્તો શ્રીહરિના પૂજન માટે આવ્યા. (વાયુ દિશાના દેશોનાં નામ) માંડવી, માળવા, કચ્છ દેશ, ફાલ્ગુ દેશ, અશ્મ દેશ તેમજ મદ્ર દેશના તથા ખસ દેશના અને સ્ત્રી રાજ્ય વગેરે દેશોમાં રહેનારા બીજા પણ ભક્તો આવતા હતા. અને પરમ ભક્તિથી ચંદન-પુષ્પના હારો અને વસ્ત્રો વગેરેથી શ્રીહરિનું પૂજન કરતા હતા. (૬૮-૬૯)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

पद्मरागेन्द्रनीलादिमणिमद्धेमभूषणैः । तं पूजयित्वोपहारांस्तदग्रे निदधुश्च ते ॥७०॥ नानामणिमयेष्वेव पात्रेषु स्वर्णमुद्रिकाः । भृत्वा न्यवेदयंस्तस्मै रूप्यमुद्राश्च केचन ॥७१॥ पादुका रत्नखचिता विचित्रास्त उपानहः । निवेद्य प्रययुस्तावदुदीच्या आययुर्जनाः ॥७२॥ यौधेयाः पौरवा मद्रा मालवा आर्जुनायनाः । कैकयाः क्षुद्रमीनाश्च त्रैगर्ताः कोसलास्तथा ॥७३॥ शरधाना वाटधाना भोगप्रस्था वसातयः । आन्तर्द्वीपा अश्वमुखाः कच्छारा दण्डपिङ्गलाः ॥७४॥ कैलावर्ताः कण्ठधानाः पुष्करावर्तशातकाः । गान्धाराः खचरा हूणा गव्या भूतपुरास्तथा ॥७५॥ दासेरका केशधरास्तथा चिपिटनासिकाः । क्षेमधूर्ता हेमताला हिमाचलनिवासिनः ॥७६॥ यशोवतीनिवासाश्च माण्डव्याः कुरवस्तथा । एते चान्ये श्यामकाद्याः पुपूजुस्तं जनाः प्रभुम् ॥७७॥ सुगन्धिना कैसरेण चन्दनेनाक्षतैः शुभैः । प्रफुल्लपद्ममालाभिरभ्यर्च्योपायनान्यदुः ॥७८॥ महावस्त्राण्यमूल्यानि सितसूक्ष्मघनानि च । कस्तूरिकाभृतान्हैमान् समुद्गांश्चामराणि च ॥७९॥ गारुत्मतानि रत्नानि पद्मरागांश्च विद्रुमान् । महानीलांश्च गोमेदान् स्फटिकांस्तथा ॥८०॥ हरये चार्पयामासुर्हीरकानर्कभासुरान् ॥ ततो गतेषु तेष्वायन् ऐशाना हरिसेवकाः ॥८१॥ पशुपालाश्च काश्मीरा दरदास्तङ्गणास्तथा । अभिसाराश्च कौलूता जना ब्रह्मपुरोद्भवाः ॥८२॥ चीनाश्च दामरा घोषाः कोलिन्दाः कौविकास्तथा । गान्धर्वा वसुधानाश्च वनराष्ट्रादयस्तथा ॥८३॥ पुपूजुः परया भक्त्या नारायणमुनिं जनाः । तेषां च योषिता राजन्साध्वीधर्ममुपाश्रिताः ॥८४॥ चन्दनाक्षतपुष्पैश्च तुलसीमालिकादिभिः । वस्त्रैर्मृदुतरैः पीतै रक्तैर्नीलैश्च चित्रितैः ॥८५॥ मुक्तामयैराभरणैः पूजयित्वा हरेः पुरः । उपायनानि निदधुर्जनास्ते तत्स्त्रियोऽपि च ॥८६॥

---

તે ભક્તો પદ્મરાગ અને ઈન્દ્રનીલ મર્કત વગેરે મણિઓ જેમાં જડેલાં છે એવાં સુવર્ણનાં અલંકારોથી શ્રીહરિની પૂજા કરી શ્રીહરિની આગળ ઉપહારો મૂકતા હતા. (૭૦) કેટલાક ભક્તો નાના પ્રકારનાં મણિમય પાત્રોમાં સુવર્ણ મુદ્રાઓ મૂકીને, કેટલાક રૂપાની મુદ્રાઓ ધારણ કરીને શ્રીહરિને અર્પણ કરતા હતા. (૭૧) તે ભક્તો રત્નજડિત પાદુકાઓ અને અનેક મણિથી જડેલી મોજડીઓ શ્રીહરિની આગળ મૂકીને પોતપોતાના સ્થાનમાં ગયા. (૭૨) તેટલામાં ઉત્તર દિશાના જનો આવ્યા. યૌધેય, પૌરવ દેશ, મદ્ર દેશ, માલવ દેશ, અર્જુનાયન દેશ, કૈકય દેશ, ક્ષુદ્રમીન દેશ, ત્રિગર્ત દેશ, તથા કૌશલ દેશ, શરધાન દેશ, વારધાન દેશ, ભોગપ્રસ્થ દેશ, વસાતી દેશ, અંતરદ્વીપ દેશ, અશ્વમુખ દેશ, કચ્છાર દેશ, દંડપિંગલ દેશ, કૈલાવર્ત દેશ, કંઠધાન દેશ, પુષ્કરાવર્ત, શાતક, ગાંધાર, ખચર, હૂણ, ગવ્ય તથા ભૂતપુર, દાસેરક, કેશધર, તથા ચિપિટનાસિક, ક્ષેમધૂર્ત, હેમતાલ, હિમાચલ, યશોવતી, માંડવ્ય તથા ઉત્તર કુરુ એ યૌધેય વગેરે દેશનાં તથા શ્યામાક વગેરે દેશના નિવાસી બીજાં જનો પણ આવ્યાં. તે જનો સર્વેશ્વર શ્રીહરિને પૂજતાં હતાં. (૭૩ થી ૭૭) સુગંધીમાન કેસર, ચંદન, અક્ષત અને પ્રફુલ્લિત કમળોની માળાઓથી તે જનો સર્વેશ્વરનું પૂજન કરી નાના પ્રકારની ભેટો અર્પણ કરતાં હતાં. (૭૮) અમૂલ્ય શ્વેત સૂક્ષ્મ તંતુઓથી નિર્માણ કરેલાં ઘાટાં મહાવસ્ત્રો (દુશાલા) અને કસ્તૂરી ભરેલી સુવર્ણમય ડાબલીઓ તથા ચામરો તથા મર્કત, પદ્મરાગ, વિદ્રુમ, મહાનીલ, ઈંદ્રનીલ, ગોમેદ, તથા સ્ફટિક વગેરે મણિઓ અને સૂર્ય સમાન તેજસ્વી હીરાઓ શ્રીનારાયણ મુનિને ઉત્તર દિશાના ભક્તો અર્પણ કરતા હતા. પછી તે ગયા ત્યારે ઈશાન દિશાના શ્રીહરિના સેવકો પૂજા કરવા માટે શ્રીહરિની સમીપમાં આવ્યા. ( ૭૯ થી ૮૦) ઈશાન દિશાના દેશોનાં નામ : પશુપાલ, કાશ્મીર, દરદ, તંગણ, અભિસાર, કુલૂત, બ્રહ્મપુર, ચીન, દામર, ઘોષ, કોલિંદ, કુવિક, ગાંધર્વ, વસુધાન, વનરાષ્ટ્ર, પૌરવાદિ દેશનાં નિવાસીજનો આવ્યાં. (૮૧-૮૨-૮૩) હે રાજન્ ! ઈશાન દિશાના નિવાસી હરિભક્તો પતિવ્રતા ધર્મને આશરેલા અને તેમની સ્ત્રીઓ પણ પતિવ્રતા ધર્મને આશરેલી પરમ ભક્તિથી શ્રીનારાયણ મુનિને પૂજતી હતી. (૮૪) ચંદન, અક્ષત,પુષ્પોની માળાઓ અને તુલસીની માળાઓથી અને અતિ કોમળ પીળા, લાલ, નીલા વગેરે મિશ્રિત રંગોથી રંગેલાં, વિચિત્ર વર્ણવાળાં વસ્ત્રોથી પૂજા કરીને ઘણાં મોતીઓનાં આભૂષણોથી શ્રીહરિની પૂજા કરી તે ભક્તજનો અને તેમની સ્ત્રીઓ પણ શ્રીહરિની આગળ ભેટો મૂકતી હતી. (૮૫-૮૬)

नानाविधानि रत्नानि स्वर्णस्थालभृतानि च । भृतान् करण्डकान् रौप्यान् दिव्यकुङ्कुमकेसरैः ॥८७॥ आसनानि विचित्राणि तार्णान्यतिमृदूनि च। मृदुस्पर्शांश्चित्रवर्णान् रम्यानासनकम्बलान् ॥८८॥ फलान्यनेकजातीनि सुरसाः सितशर्कराः । समर्प्येत्यादि हरये जग्मुस्ते सस्त्रियो जनाः ॥८९॥ एवं सर्वेऽपि ते भक्ता यथावित्तं यथामति । पुपूजुः परया भक्त्या स्थविरास्तरुणार्भकाः ॥९०॥ भगवानपि भक्तानां भावदर्शी जगत्प्रभुः । पत्रपुष्पादिभिरपि तद्दत्तैस्तुष्यति स्म सः ॥९१॥ ततः प्रभुः स तान् सर्वान्वस्त्रालङ्कारसञ्चयान् । चक्रे ब्राह्मणसात्सद्यो जनयञ्जनविस्मयम् ॥९२॥ उपायनानि सर्वाणि तत्क्षणं प्रददौ च सः । विप्रेभ्यो रङ्कजीवेभ्यो भिक्षुकेभ्यश्च सादरम् ॥९३॥ साधुभ्यो ब्रह्मचारिभ्यः पद्गेभ्यश्च यथोचितम् । उपायनमदात्प्रीत्या पार्षदेभ्यश्च सत्पतिः ॥९४॥ राजभ्यो धनिकेभ्योऽपि स्ववस्त्रादि ददौ प्रभुः । सर्वेऽपि विस्मयं प्रापुश्चरित्रं वीक्ष्य तस्य तत् ॥९५॥ नानानरेन्द्रसम्प्रार्थ्यान् पदार्थानपि तत्क्षणम् । कोटिशोऽपि ददौ स्वामी तेनाऽऽसन्विस्मिता नृपाः ॥९६॥ कृत्वाप्यमानुषं कर्म निरहङ्कृतिरीश्वरः । सितवासा यथापूर्वं बभूवानाप्तविस्मयः ॥९७॥ देशान्तरीयेषु जनेषु पूजामित्थं हि कुर्वत्सु हरेरुदाराम् । तदीक्षणात्युत्सुकमानसः किं सूर्योऽपि मध्ये गगनस्य तस्थौ ॥९८॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे अन्नकूटोत्सवे देशान्तरीयसकलजनानां भगवदर्चनानन्दनिरूपणनामा द्वादशोऽध्यायः ॥१२॥

सुव्रत उवाच – **अथ माध्याह्निकं कर्तुं विधिं नारायणो नृप !। गङ्गां गन्तुमनाः प्राह मुनीन् स्वस्यार्चनोत्सुकान् ॥१॥ युष्माभिः पूजनं कार्यं मुनयः ! श्वो यथेप्सितम् । उन्मत्तगङ्गां गच्छामि स्नानार्थमधुना त्वहम् ॥२॥**

---

સુવર્ણના થાળમાં ભરેલાં નાના પ્રકારનાં રત્નો અને લવિંગ-કુમકુમ-કેસરથી ભરેલા ચાંદીના ડાબલાઓ અને નાના પ્રકારના અતિ કોમળ તૃણથી નિર્માણ કરેલાં આસનો અને કોમળ સ્પર્શવાળા, વિચિત્ર વર્ણવાળા તેમજ રમણીય, આસન માટેના કામળાઓ અને અનેક જાતનાં ફળો, અતિ મધુર ધોળી સાકર વગેરે શ્રીનારાયણ મુનિને અર્પણ કરી સ્ત્રીઓએ સહિત ઈશાન દિશાના જનો પોતાના સ્થાનમાં ગયાં. (૮૭-૮૮-૮૯) આ પ્રમાણે વૃદ્ધો, જુવાનો અને બાળકો તે સર્વે ભક્તો પોતાના ધનને અનુસરી બુદ્ધિ પ્રમાણે પરમ ભક્તિથી શ્રીહરિની પૂજા કરતાં હતાં. (૯૦) ભક્તોના અંતરના પ્રેમને જોનારા, જગત્પ્રભુ શ્રીહરિ પણ ભક્તોએ અર્પણ કરેલાં પત્ર, પુષ્પાદિથી પણ પ્રસન્ન થાય છે. (૯૧) પછી શ્રીહરિ જનોને આશ્ચર્ય ઉત્પન્ન કરતા સતા ભક્તોએ અર્પણ કરેલાં સમગ્ર વસ્ત્ર અલંકારોના સમૂહો તત્કાલ જ બ્રાહ્મણોને આપી દેતા હતા. (૯૨) શ્રીહરિ બીજી સર્વ ભેટો પણ બ્રાહ્મણોને અને દીનજનોને તત્કાળ આપી દેતા હતા. (૯૩) સત્ પુરુષોના સ્વામી શ્રીહરિ મુક્તાનંદાદિ સાધુજનો, મુકુંદાનંદાદિ બ્રહ્મચારીઓ તથા રતનજી, ભગુજી વગેરે પાર્ષદોને ભેટો યથાયોગ્ય પ્રસન્નતાથી આપતા હતા. (૯૪) પ્રભુ શ્રીહરિ પોતાના ભક્ત, રાજાઓ તથા પોતાના ભક્ત ધનવાનોને પણ પોતાનાં વસ્ત્રાદિ આપતા હતા. શ્રીહરિનું આ ચરિત્ર જોઈ સર્વે જનો વિસ્મય પામ્યાં. (૯૫) શ્રીહરિ નાના (અનેકવિધ) નરેન્દ્રોએ પ્રાર્થના કરવા યોગ્ય અપરિમિત પદાર્થોને પણ તત્કાળ જ આપતા હતા તેનાથી રાજાઓ વિસ્મય પામ્યા. (૯૬) અલૌકિક ક્રિયા (સર્વસ્વ દાનરૂપ) કરીને પણ અહંકારે રહિત શ્રીહરિ પૂર્વની માફક શ્વેત વસ્ત્ર ધારણ કરનારા હતા. (૯૭)

હે રાજન્ ! આ પ્રમાણે દેશાન્તરનાં આવેલા ભક્તજનોએ શ્રીહરિની અતિ પૂજા કર્યે સતે સૂર્ય પણ શ્રીહરિની પૂજાનાં દર્શન કરવા માટે ઉત્સાહયુક્ત મનવાળા થઈને આકાશના મધ્ય ભાગમાં સ્થિર થયો હોય ને શું ? એમ જણાતો હતો. (૯૮)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે અન્નકૂટોત્સવે દેશાન્તરીય સકલજનાનાં ભગવદર્ચનાનંદનિરૂપણ નામા દ્વાદશોઽધ્યાયઃ (૧૨)*

## અધ્યાય : ૧૩ - ઉન્મત્તગંગાનું માહાત્મ્ય અને જલક્રીડા તથા માધ્યાહ્નિક વિધિનું વર્ણન છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! પછી શ્રીહરિ મધ્યાહ્ન સમયે પ્રથમાશ્રમીઓને કરવા યોગ્ય વિધિ કરવા માટે ઉન્મત ગંગામાં જવા માટે ઈચ્છાવાળા સતા પોતાની પૂજા કરવા માટે ઉત્સાહવાળા સાધુઓ પ્રત્યે બોલ્યા : (૧) હે મુનિઓ ! તમોએ આવતે દિવસે ઈચ્છા પ્રમાણે મારું પૂજન કરવું. હાલમાં હું સ્નાન કરવા માટે ઉન્મત્તગંગા પ્રત્યે જવા ઈચ્છું છું. (૨)

अमावास्याभिधं पर्व वर्ततेऽद्य महत्ततः स्नानं नैमित्तिकं कार्यं गङ्गायामिति याम्यहम् ॥३॥ इत्युक्त्वोत्थाय भगवान्रोहिताश्वं महाजवम् । आनयेत्याह नान्नं च स तं शीघ्रमुपानयत् ॥४॥ अग्रे चलन्त्विति जनानाज्ञाप्य च मुनीन्प्रभुः । चचालाश्वं तमारुह्य जनतासु शनैः शनैः ॥५॥ तमन्वधावन्सकलाः पत्तयः शस्त्रपाणयः । उत्तमः स नृपः सोमः सूरोऽलर्कश्च मूलजित् ॥६॥ जीववर्मा च भृगुजिन्नाज्ञो राष्ट्रोढमान्त्रिकौ । व्याघ्रो वैरिभयो हस्ती मामयो रामगालवौ ॥७॥ गोवर्धनो मानजिच्च वास्तुर्वेलोऽलयोऽर्जुनः । केसरी मानसिंहश्च कुशलः पुञ्जजित्तथा ॥८॥ कालो हम्मीरजित् खोडो भीमो जूषश्च रत्नजित् । जाल्मो लक्षः कमो मोको वीरो देवश्च नथ्थुजित् ॥९॥ देशजित्प्रमुखाश्चान्ये हरिमन्वयुराशु ते । मुकुन्दानन्दमुख्याश्च नैष्ठिकब्रह्मचारिणः ॥१०॥ मयरामादयो विप्राः पर्वताद्यास्तथा विशः । हर्षजित्प्रमुखाः शूद्रा गोकुलाद्याश्च चारणाः ॥११॥ सर्व एव जना जग्मुः स्नातुं भगवता सह। वाद्यवादकसङ्घस्तु सर्वेषामग्रतोऽचलत् ॥१२॥ तत्पृष्ठे च ययुः सर्वे मुनयो बाणचक्षुषः । अश्वारूढो हरिः साक्षात्तत्पृष्ठे शनकैर्ययौ ॥१३॥ तत्पृष्ठे पार्षदाः सर्वे तत्पृष्ठे निखिला जनाः । योषिद्वृन्दानि तेषां च पृष्ठतः शनकैर्ययुः ॥१४॥ ततोऽपश्यद्धरिर्गङ्गां जनसङ्घसमाकुलाम् । समाह्वयन्तीं हर्षेण तरङ्गभुजचालनैः ॥१५॥ या नित्यं भक्तभर्तुर्धृतनरवपुषो वासुदेवस्य साक्षात्साकं मुक्तैर्मुनीन्द्रैः प्रमुदितवदनैः क्रीडया स्नानकाले । कालिन्द्या वासुदेवाप्लवभवमतनुं मानमुन्मूलयन्ती वन्द्या देवैः । सहेशैर्भुवि जयतितरां मुक्तिदोन्मत्तगङ्गा ॥१६॥

---

આજે અમાવાસ્યાનું મહાન પર્વ છે. માટે ગંગામાં પર્વ નિમિત્તે સ્નાન કરવું જોઈએ, માટે હું જઉં છું. (૩) હે રાજન્ ! આ પ્રકારે ભગવાન શ્રીહરિ સંતોને કહીને મહાવેગવાળા રોઝા ઘોડાને મારી સમીપમાં લાવો : આ પ્રમાણે નાના નામના પોતાના ભક્તને કહેતા હતા. નાના ભક્ત તત્કાળ ઘોડાને લાવ્યા. (૪) શ્રીહરિએ સમગ્ર ગૃહસ્થ તથા સાધુઓને કહ્યું કે તમો આગળ ચાલો એમ આજ્ઞા આપીને રોઝા ઘોડા ઉપર બેઠા. જનસમૂહો ધીરે ધીરે ચાલતા હતા. (૫) તલવાર વગેરે શસ્ત્રો હાથમાં જેમને છે એવા સર્વ ક્ષત્રિયો પણ પગે ચાલતા સતા શ્રીહરિની પાછળ તત્કાળ જતા હતા. ઉત્તમ રાજા, સોમા ભક્ત, સુરા ભક્ત, અલર્ક ભક્ત, મૂળજી ભક્ત, જીવા ભક્ત, ભગુજી, નાજો ભક્ત, રાઠોડ, માંત્રિક, વ્યાઘ્રજીત, વેરીભાઈ, હાથીભાઈ, મામૈયો, રામ, ગાલવ, ગોવર્ધન, માનજીત, વસ્તો, વેલો, અર્જુન, અલૈયો, કેસરી, માનસિંહ, કુશલ, પૂંજાજી, કાલુ, હમીરજી, ખોડો, ભીમો, જૂઠો, રતનજી, જાલમજી, લાખો, કમો, મોકો, વીરો, દેવો, નથુજી, દેશજી અને બીજા દેશાન્તરથી આવેલા ક્ષત્રિયો સર્વે શ્રી નારાયણ મુનિની પાછળ ચાલતા હતા. તેમજ મુકુંદાનંદાદિ બ્રહ્મચારીઓ પાછળ ચાલતા હતા. ( ૬ થી ૧૦) મયારામ ભટ્ટ વગેરે બ્રાહ્મણો તથા પર્વત વગેરે વૈશ્યો, હરખજી વગેરે શૂદ્રો અને ગોકળ વગેરે ચારણો પછવાડે ચાલતા હતા. (૧૧) શ્રીહરિની સાથે સ્નાન કરવા સર્વ જનો જતાં હતાં તેમાં વાજાં વગાડનારા બધાની આગળ ચાલતા હતા. (૧૨) તેમની પાછળ સર્વે મુક્તાનંદાદિ સાધુઓ ફક્ત ચાર હાથ દૂર જોનારા ચાલતા હતા. તેમની પાછળ રોઝા ઘોડા ઉપર પ્રત્યક્ષ શ્રીહરિકૃષ્ણ ભગવાન ધીમે ધીમે ચાલતા હતા. (૧૩) શ્રીહરિની પાછળ સર્વે પાર્ષદો ચાલતા હતા. તેમની પાછળ સમગ્ર જનો ચાલતાં હતાં. તેમની પાછળ હરિભક્ત સ્ત્રીઓ ધીમે ધીમે ચાલતી હતી. (૧૪) ત્યાર બાદ શ્રી સ્વામિનારાયણ ભગવાન લોકોના સમુદાયથી વ્યાપ્ત, તરંગો રૂપી ભુજાઓના ચાલવાથી હર્ષપૂર્વક પોતાને બોલાવતી ઉન્મત્તગંગાને જોતા હતા. (૧૫) ભક્તોના સ્વામી જેમણે મનુષ્યશરીર ધારણ કર્યું છે એવા પ્રત્યક્ષ શ્રીહરિકૃષ્ણ ભગવાનના આનંદયુક્ત મુખવાળા, મુક્ત એવા શ્રેષ્ઠ મુનિઓની સાથે દરરોજ સ્નાન સમયે જળ ઉછાળવા પૂર્વક ક્રીડાથી વસુદેવના પુત્ર શ્રીકૃષ્ણના સ્નાનથી જેની ઉત્પત્તિ છે એવું અતિશય યમુનાનું અભિમાન તેને તિરસ્કાર કરનારી (બ્રહ્મભૂત મુનિવરોની સાથે દરરોજ પોતાનામાં ઘણા પ્રકારની જળક્રીડા કરતાં અવતારી શ્રીહરિના અવતારના સંબંધ માત્રથી તારું મહત્ત્વ મારી આગળ કેટલું ? એમ તિરસ્કાર કરનારી) બ્રહ્મા, શિવાદિ સહિત ઈન્દ્રાદિ દેવોએ સર્વદા વંદના કરવા યોગ્ય મુક્તિ આપનારી ઉન્મત્તગંગા પૃથ્વીમાં અતિશય સર્વથી અધિકપણે વર્તે છે. (૧૬)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

वीक्षामात्रेण पुंसामगणितजनिजं पातकं नाशयन्ती स्नानात्सर्वार्थदात्री हसति भुवि च या भानुजां फेनजालैः । या चान्यासां नदीनां प्रकटभगवतो ह्यङ्गसङ्गं विनापि ख्यातं लोके महत्त्वं प्रतिवदतितरां वारिघोषैः किमुच्चैः ॥१७॥ श्वेतं स्वाभाविकं या मुनिगणतिलकैः स्नानधौतैश्च पीतं वासःप्रक्षालनेन व्रतिमुनियतिनां चारुकाषायरागम् । राज्ञीनामङ्गधौतैः पिशुनमृगमदैरीशपूजावशिष्टैः शोणं कृष्णं च वर्णं स्वपयसि दधती चित्रवर्णा विभाति ॥१८॥ यस्यां स्नानं त्रिकालं पयसि विदधतां सन्नृणां योषितां वा वक्त्रेभ्यो नामघोषः प्रकटितनृतनोः स्वामिनारायणस्य निर्यन्मिश्रोऽम्बुघोषैः प्रतिदिशमटतां भास्करेः किङ्कराणां साशङ्कं दूरगाणां हरिविमुखदृशां कर्णशूलायते वै ॥१९॥ प्रायश्चित्तैरनाश्यानपि कलुषचयान्सद्य एव घ्नती या सौरेस्तल्लेखकस्याप्यनुदिनमघकृद्दण्डविश्रान्तिदात्री । दूरस्थैरन्तकालेऽप्यणुमितमपि चेदम्बु यस्याश्च पीतं स्यात्तत्ते त्यक्तदेहाः सुरवरवनितासेव्यतां यान्ति सद्यः ॥२०॥ यस्यास्तीरे विहङ्गान्निवसत उदके मीननक्रोरगादीन् दृष्ट्वा देहावसाने दिवि सुरवनितास्तत्कृतेऽन्योन्यकोपाः । केशाकेशि प्रमर्दं विदधति मम वा एष ते नैव मेऽयं कामादित्थं ब्रुवन्त्यो झटिति मृतिमितांस्तान्विमानैर्नयन्ति ॥२१॥ यस्यास्तीरे कृतानां व्रतजपतपसां श्राद्धदानादिकानां पुण्यं स्यादक्षयं वा अमरपितृनृणां तर्पणाद्भूरितृप्तिः । नानायज्ञादिपुण्यं त्विह सकलजनैः स्नानतो लभ्यते वै श्रेयस्कामैस्ततो या नृभिरनिशमसौ सेव्यते सर्वकामैः ॥२२॥ दुष्टान् पापान् विगर्ह्यानपि पतितजनान् स्नानमात्रेण सद्यः स्वर्गार्हान्कुर्वती या सुकविभिरुदिता

પૃથ્વીમાં પોતાને જોનારાં જનોના અગણિત જન્મમાં ઉત્પન્ન થયેલા પાપને પોતાના દર્શન માત્રથી સમગ્રપણે નાશ કરનારી, સ્નાનથી સર્વ પુરુષાર્થોને આપનારી જે ઉન્મતગંગા સૂર્યથી ઉત્પન્ન થયેલી યમુનાને ફીણના સમુદાયોથી હસે છે પોતાનાથી બીજી નર્મદાદિ નદીઓને પ્રત્યક્ષ શ્રીહરિના શરીરના સ્પર્શ વિના પણ લોકમાં પ્રસિદ્ધ મહિમાને જે ઉન્મત્ત ગંગા ઊંચા જળના ધ્વનિઓથી ઠપકાપૂર્વક અતિશય નિષેધ કરતી હોય ને શું ? એવી ઉન્મત્તગંગાને જોતા હતા. (૧૭) જે ઉન્મત્તગંગા પોતાના જળમાં સ્વાભાવિક શ્વેત વર્ણ ધારણ કરતી સ્નાનથી ધોવાયેલાં કેસર-ચંદનથી કરેલા મુનિ સમુદાયોના તિલકોથી પીળા વર્ણને ધારણ કરતી, વ્રતવાળા બ્રહ્મચારીઓ સાધુઓ અને સંન્યાસીઓનાં ભગવાં વસ્ત્રો ધોવાથી સુંદર કાષાય રંગને ધારણ કરતી સ્નાન કરતી રાજાઓની સ્ત્રીઓનાં શરીર ધોવાથી કુમકુમ અને કસ્તૂરીથી લાલ વર્ણ અને શ્યામ વર્ણને ધારણ કરતી સતી વિચિત્ર વર્ણવાળી શોભે છે. (૧૮) જે ઉન્મત્તગંગાના નિર્મળ જળમાં પ્રાતઃકાલાદિ ત્રિકાલ સ્નાન કરતા સંતો, વર્ણાશ્રમી પુરુષો તથા તેમની સ્ત્રીઓના મુખથી નીકળેલા નરાકૃતિ ધારણ કરનારા ભગવાન શ્રી સ્વામિનારાયણના નામના ઉચ્ચારણનો ધ્વનિ જળના ધ્વનિ સાથે મિશ્ર થયેલો પ્રત્યક્ષ ભગવાનથી વિમુખ જનોમાં પ્રાણ હરનારી દૃષ્ટિ જેમની છે માટે જ દરેક દિશાઓમાં દોડતા, શ્રી સ્વામિનારાયણનું નામ સાંભળીને દૂર નાસતા સૂર્યના પુત્ર યમના કિંકરોને તે શબ્દ કાનમાં શૂલની માફક ખૂંચે છે જ. (૧૯) જે ઉન્મત્તગંગા પ્રાયશ્ચિત્તોથી પણ નાશ નહિ પામતાં પાપોના સમુદાયોને તત્કાલ નાશ કરે છે, જે ઉન્મત્તગંગા યમરાજાના લેખક ચિત્રગુપ્તને પણ દરરોજ પાપીજનોના દંડવિધાનમાં વિશ્રાંતિ આપનારી છે. દૂર દેશમાં રહેલાં જનોએ અંતકાળમાં પણ ઉન્મત્તગંગાનું લગાર જળપાન કરેલું થાય તો પાંચ ભૌતિક દેહનો ત્યાગ કરી તે જનો તત્કાલ જ ઈન્દ્રાદિની અપ્સરાઓને સેવા કરવા યોગ્ય થાય છે. (૨૦) જે ઉન્મત્તગંગાના તીરમાં નિવાસ કરનારાં પક્ષીઓ તથા જેના જળમાં નિવાસ કરનારાં મત્સ્યો, મગરો, સર્પો વગેરે જળ-જંતુઓનો અંતકાલ જોઈને તેમની પ્રાપ્તિ માટે દેવતાઓની અપ્સરાઓ પરસ્પર ક્રોધ કરતી સતી ' આ પ્રાણી મારો પતિ છે તારો નથી, આ પ્રાણી મારો પતિ છે તારો નથી જ' : આ પ્રમાણે કામની ભાવનાઓથી પરસ્પર બોલતી એકબીજાના કેશ પકડીને યુદ્ધ કરે છે. તે મરણ પામેલાં પ્રાણીઓને સ્વર્ગમાં લઈ જાય છે. (૨૧) જે ઉન્મત્તગંગાને કિનારે કરેલાં એકાદશી આદિક વ્રતો, શ્રીહરિ-સ્તોત્રો વગેરેના જપયજ્ઞો-તપ-શ્રાધ્ધ તથા સત્ પાત્રમાં દાન વગેરે સત્કર્મોનું અક્ષય પુણ્ય થાય છે. બ્રહ્માદિ દેવો અને અર્યમાદિ પિતૃદેવો અને સનકાદિ ઋષિઓ, જેના તીરે જલાંજલિ અર્પણ કરવાથી અતિ પ્રસન્ન થાય છે. આ ઉન્મત્તગંગા નિઃશ્રેયસાર્થી જનોએ તથા ધર્મ, અર્થ અને કામની ઈચ્છાવાળા પુરુષોએ હંમેશા સ્નાનાદિથી સેવન કરાય છે. (૨૨) જન્મથી આરંભીને દુષ્કર્મમાં પ્રવર્તેલા નીંદનીય આચરણવાળા પાપી, પતિત જનોને પણ સ્નાન માત્રથી સ્વર્ગને યોગ્ય કરતી ઉન્મત્તગંગા સારા કવિઓએ

नूनमुन्मत्तगङ्गा । माहात्म्यं नैव यस्या जगति भगवता स्वात्मसाद्वै कृताया वक्तुं केऽपि क्षमन्ते भुजगपतिमुखा वर्णयन्तोऽपि नित्यम् ॥२३॥ तां प्राप्य सस्नौ भगवांस्तदानीं साकं मुनीन्द्रैरखिलैर्नृभिश्च । सिञ्चञ्जलं स्वाञ्जलिलाघवेन तान् सिञ्चयंश्चापि परस्परं सः ॥२४॥ आनन्दयन् स्वेक्षकलोकसङ्घानगाधतोयं च विवेश तत्र । प्रत्योघमेवाम्बुनि तिष्ठति स्म सङ्गीतकीर्तिर्निजभक्तसङ्घैः ॥२५॥ प्रतिप्रवाहं स्थितमीक्षमाणास्तं सर्वतस्ते परिवृत्य तस्थुः । तत्पादमाघट्य पतत् पयोऽपि भक्ताः पिबन्ति स्म जवेन केचित् ॥२६॥ तं देवसङ्घा जलकेलिलीलां कुर्वन्तमालोकयितुं समुत्काः । तूर्णं विमानैर्गगने समेत्य निरीक्ष्य चानन्दभरं समीयुः ॥२७॥ निमज्ज्य सद्यः प्लुतिलाघवेन स्वान्वेषकान् भ्रामयति स्म तोये । चरञ्जलेऽसौ तदचिन्त्यदेशे स्वीयं शिरो दर्शयति स्म तांश्च ॥२८॥ पुनर्निमज्ज्याम्बुनि सद्य एव स्वं चिन्तयन् ब्रह्म च कृष्णसंज्ञम् । तिष्ठंश्चिरं सोऽम्भसि हृत्सु चित्रं कुर्वन्नृणां निःसरति स्म तोयात् ॥२९॥ तरन्विचित्रैस्तरणप्रभेदैस्तद्वेदिनां चापि मनःसु चित्रम् । तदा समुत्पादयति स्म तोयक्रीडां स साकं मुनिभिः प्रकुर्वन् ॥३०॥ तं सन्तरन्तं ह्यनु पार्षदाग्र्या ऋषिप्रवीराः शतशश्च तेरुः । अप्राप्य तं फूत्कृतिफुल्लवक्त्राः समुच्छ्वसन्तस्तमहासयंस्ते ॥३१॥ मत्स्यादिरूपेण जले चिरस्थान्स्वपत्स्पृशिं कामयतः सुरेशान् । आनन्दयंस्तां सरितं च रेमे निशावियोगां चिरमम्भसीशः ॥३२॥ स्नात्वाम्बुनैव तिलकं स विधाय सद्यो माध्याह्निकीं सितरुचं समुपास्य सन्ध्याम् । पश्यन् रविं गगनमण्डलमध्यसंस्थमम्बुस्थितस्तमुपतस्थ ऋजूर्ध्वबाहुः ॥३३॥ तं सूर्यमण्डलनिबद्धदृशं स्थिराङ्गं सूक्तं पठन्तमपि सौरमुदारमुच्चैः । स्वेदोदबिन्दुततिमौक्तिकदामभालमैक्षन्त

'ઉન્મત્તગંગા' આ પ્રકારે નામથી કહેલી છે. પૃથ્વીમાં શ્રીહરિએ 'આ મારી છે' આ ભાવથી સ્વીકારેલી એવી ઉન્મત્તગંગાનું માહાત્મ્ય દરરોજ વર્ણન કરતાં હજાર મુખથી કહેતા શેષનારાયણ વગેરે કોઈ પણ સમગ્ર કહેવા માટે શક્તિમાન નથી જ. (૨૩) શ્રીહરિ તે સમયે સમગ્ર મુનિવરો અને સત્સંગી જનોની સાથે ઉન્મત્તગંગામાં જઈને પોતાની અંજલિઓથી જળ અતિ ઉતાવળથી સાધુઓ અને સત્સંગીઓ ઉપર સિંચન કરતા તથા મુનિ વગેરે ભક્તોને પણ પરસ્પર એકબીજા ઉપર જળ છંટાવતા સ્નાન કરતા હતા. (૨૪) પોતાનાં દર્શન કરતા જનોના સમુદાયોને આનંદ આપતા શ્રીહરિએ ઉન્મત્તગંગામાં અગાધ જળમાં પ્રવેશ કર્યો. પોતાના ભક્તસમૂહોએ ગાન કરાયેલી છે કીર્તિ જેમની એવા થકા પ્રવાહના સન્મુખ ઊભા રહ્યા. (૨૫) પ્રવાહ સન્મુખ રહેલા શ્રીહરિને જોનારા મુનિ વગેરે ભક્તો ચોતરફ વીંટળાઈને ઊભા રહ્યા કેટલાંક ભક્તો શ્રીહરિના ચરણકમળનો સ્પર્શ કરીને વેગથી જતા જળને પીતા હતા તેમજ દૂર રહેલી સ્ત્રીઓ પણ પીતી હતી. (૨૬) જલક્રીડારૂપી લીલા કરતા શ્રીહરિને જોવા માટે ઉત્સાહવાળા દેવોના સમુદાયો વિમાનો દ્વારા તત્કાલ આકાશમાં ભેગા થઈ ભગવાનનાં દર્શન કરી અત્યંત આનંદ પામ્યા. (૨૭) શ્રીહરિ સુંદર રીતે કૂદીને તત્કાળ જ જળની અંદર પ્રવેશ કરી પોતાને જળમાં ખોળનારા બ્રહ્માનંદાદિ મુનિઓને જળમાં ભમાવતા હતા. જળની અંદર તરવાની યુક્તિથી ફરતા સતા કોઈએ નહીં ધારેલા દેશમાં પોતાનું મસ્તક બતાવતા હતા. (૨૮) ફરીથી જળમાં તત્કાળ જ ડૂબકી મારીને શ્રીહરિ કૃષ્ણ નામના પરબ્રહ્મ સ્વસ્વરૂપનું ચિંતવન કરતાં સતા જળમાં ઘણા સમય સુધી રહેતા છતાં પોતાનાં જનોના હૃદયમાં આશ્ચર્ય પમાડતા સતા જળથી બહાર નીકળતા હતા. (૨૯) તે સમયે આ રીતે વિચિત્ર ચરિત્રનું આચરણ કરતાં થકા સખાભાવને પામેલા બ્રહ્માનંદાદિ સાધુઓ અને સોમસુરાદિ પાર્ષદો સાથે જળલીલા સારી રીતે કરતા શ્રીહરિ તરવાના નાના પ્રકારના ભેદોથી તરતા સતા તે ભેદોને જાણનારાં જનોના મનમાં આશ્ચર્ય ઉત્પન્ન કરતા હતા. (૩૦) તરવાની લીલાનું આચરણ કરતાં શ્રીહરિની પાછળ ઘણા શ્રેષ્ઠ પાર્ષદો અને મુક્તાનંદ, બ્રહ્માનંદ વગેરે મુનિવરો તરતા હતા, હાંફી જવાથી શ્વાસ લેવાથી પ્રફુલ્લિત મુખવાળા શ્વાસ લેતા તે તે મુનિઓ અને પાર્ષદો શ્રીહરિને નહીં પામીને શ્રીહરિને હસાવતા હતા. (૩૧) પરમેશ્વર પોતાના ચરણકમળના સ્પર્શને ઈચ્છતા માટે જ મત્સ્યાદિ રૂપે ઉન્મત્તગંગાના જળમાં ઘણા સમયથી રહેલા બ્રહ્માદિ દેવોને આનંદ આપતા અને તેવા પ્રકારની રાત્રિમાં વિયોગવાળી ઉન્મત્તગંગાને આનંદ આપતા થકા જળમાં ઘણા કાળ પર્યન્ત રમતા હતા. (૩૨) શ્રીહરિ સ્નાન કરી જળથી ઊર્ધ્વપુંડ્ર તિલક તત્કાલ કરી શુક્લ વર્ણા-માધ્યાહ્નિકી સંધ્યાની ઉપાસના કરી, જળમાં રહીને આકાશના મધ્યમાં રહેલા સૂર્યનારાયણને ઊંચી દષ્ટિથી જોતાં સરલ ઊંચા બાહુવાળા છતાં સૂર્યની ઉપાસના કરતા હતા. (૩૩) સૂર્યમંડલમાં સ્થિર દષ્ટિવાળા, નિશ્ચલ શરીરવાળા, સૂર્ય સંબંધી મહાસૂક્તનો ઊંચા સ્વરથી પાઠ કરતા, પરસેવાનાં બિંદુઓની પંક્તિ રૂપી મોતીઓની માળા લલાટમાં જેમને છે એવા શ્રીહરિને આકાશમાં રહેલાં બ્રહ્માદિ

साद्भुतममर्त्यगणाः खसंस्थाः ॥३४॥ स्नात्वा यथाविधि च तं त्वभितोऽम्बुसंस्था एकैकमर्घ्यमखिला अपि वर्णिविप्राः । दत्त्वैव पूष्ण उपतस्थिर ऊर्ध्वहस्ताः पङ्क्तिस्थिता नृप ! सहस्रश आदृतास्तम् ॥३५॥ समाप्य सूर्योपस्थानं भगवान्धर्मरक्षकः । ब्रह्मयज्ञं विधायादौ चक्रे देवादितर्पणम् ॥३६॥ देवता उपवीती च नरान् निवीत्यतर्पयत् । प्राचीनावीत्यसौ पितृनेकद्वित्र्यञ्जलिक्रमात् ॥३७॥ द्विजैः सहेत्थं विधिना विधाय माध्याह्निकं वाजिनमारुरोह। संस्तूयमानो मुनिभिर्नरेन्द्रैः पुरं विवेशाथ स वर्णिराजः ॥३८॥ शृण्वन् स भक्तैः पथि गीयमानं यशः स्वकीयं मुनिभिः सहैत्य । संसिद्धपाकं नृपतेर्निशान्तं सम्भोजयामास मुनीन् यथावत् ॥३९॥ तृप्तान्स तान् पायसमोदकाद्यैर्गन्तुं द्रुतं विस्तृतधर्मशालाम् । आज्ञापयामास ततश्च सर्वान्भक्तानपि स्वान् गमनाय भोक्तुम् ॥४०॥ स्वस्थानमेत्य पुनराप्लवनं विधाय कृत्वा च पाकमथ संस्कृतभूप्रदेशे । कृष्णाय तं नृप ! निवेद्य स वैश्वदेवं कृत्वा स्वयं च बुभुजे रसजिन्मिताशी ॥४१॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे अन्नकूटोत्सवे उन्मत्तगङ्गायां भगवज्जलक्रीडामाध्याह्निकविधि-निरूपणनामा त्रयोदशोऽध्यायः ॥१३॥

सुव्रत उवाच-मुहूर्तमथ विश्रम्य हरिर्नृप ! पुनर्बहिः । वेद्यामेत्य निजे पीठे निषसाद सपार्षदः ॥१॥ अह्नस्तृतीययामान्ते जनसङ्घाः सयोषितः । समेत्य पूर्ववत्तत्र निषेदुर्मुनयस्तथा ॥२॥ जगुर्गुणानृषिवराः प्रेमानन्दादयो हरेः । वादयन्तो मृदङ्गांश्च वीणावेणुविपञ्चिकाः ॥३॥ तावदाकारयामास हरिः पौराणिकोत्तमम् । श्रोतुं नित्यकथां राजन् ! प्रयागजिदिति श्रुतम्

---

દેવસમૂહો આશ્ચર્યપૂર્વક જોતા હતા. (૩૪) હે રાજન્ ! શાસ્ત્રવિધિ પ્રમાણે સ્નાન કરી શ્રીહરિની ચોતરફ જળમાં ઉભા રહેલા સમગ્ર બ્રહ્મચારીઓ અને બ્રાહ્મણો એક એક અર્ઘ્યાંજલિ સૂર્યને આપીને સરલ ઊંચા હાથોવાળા, પંક્તિબદ્ધ થઈને સૂર્યમાં આદરવાળા હજારો વર્ણીઓ અને બ્રાહ્મણો સૂર્યની ઉપાસના કરતા હતા. (૩૫) ધર્મરક્ષક શ્રીહરિ સૂર્યોપસ્થાન સમાપ્ત કરી પ્રથમ બ્રહ્મયજ્ઞ કરી દેવાદિનું તર્પણ કરતા હતા. (૩૬) શ્રીહરિ યજ્ઞોપવીતવાળા હોવા છતાં પણ અગ્નિ આદિ દેવોને કંઠાવલંબી યજ્ઞોપવીતવાળા થઈને સનકાદિકોને પ્રાચીનાવીતી થઈને રાણાયનિ આદિક પિતૃઓને (એક એક અંજલિથી દેવોને, બે અંજલિથી સનકાદિકોને, ત્રણ ત્રણ અંજલિઓથી પિતૃઓને) તૃપ્ત કરતા હતા. (૩૭) વર્ણીરાજ શ્રીહરિ આ પ્રકારે વર્ણી અને બ્રાહ્મણોની સાથે માધ્યાહ્નિક વિધિ શાસ્ત્ર પ્રમાણે કરીને રોઝા ઘોડા ઉપર બેઠા. પછી મુનિઓ અને રાજાઓએ સ્તુતિ કરાયેલા સતા દુર્ગપત્તનમાં પ્રવેશ કર્યો. (૩૮) શ્રીહરિ માર્ગમાં સાધુઓની સાથે ગૃહસ્થ સત્સંગીજનોએ ગવાયેલ પોતાનો યશ સાંભળતા સતા જેમાં રસોઈ તૈયાર છે એવા ઉત્તમ રાજાના ગૃહમાં જઈને યથાયોગ્ય મુનિઓને જમાડતા હતા. (૩૯) શ્રીહરિ દૂધપાક, લાડુ, પુરીઓ વગેરેથી તૃપ્ત કરેલા મુનિઓને મોટી ધર્મશાળામાં જવા માટે તત્કાલ આજ્ઞા આપતા હતા પછી સર્વે દેશાન્તરથી આવેલા ભક્તજનોને પણ જમવા જવા માટે આજ્ઞા આપતા હતા. (૪૦)

હે રાજન્ ! પછી શ્રીહરિ પોતાના નિવાસસ્થાનમાં જઈને ફરીથી સ્નાન કરી સંસ્કાર કરેલી પૃથ્વીમાં પાક કરીને શ્રીકૃષ્ણને નૈવેદ્ય કરી તથા વૈશ્વદેવ કરી રસાસ્વાદને જીતનારા, અલ્પાહાર કરનારા સ્વયં શ્રીહરિ ભોજન કરતા હતા. (૪૧)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે ભગવજ્જલક્રીડા માધ્યાહ્નિકવિધિનિરૂપણ નામા ત્રયોદશોऽધ્યાયઃ (૧૩)*

## અધ્યાય : ૧૪

## પુરાણીનું સન્માન, દિવાળીનો મહોત્સવ અને શ્રીહરિએ નવીન વસ્ત્રાદિ ધારણ કર્યા તે કહ્યું છે.

**સુવ્રત મુનિ બોલ્યા :** હે નૃપ ! પછી શ્રીહરિ બે ઘડી વિશ્રામ કરી ફરીથી પાર્ષદે સહિત બહાર ભાગમાં ઓટા ઉપર પોતાના સિંહાસનમાં બેઠા. (૧) દિવાળીને દિવસે, ત્રીજા પ્રહરને અંતે સ્ત્રીઓ સાથે જનસમુદાયો તથા સાધુઓ સભામાં આવીને પૂર્વની માફક વ્યવસ્થાથી બેઠા. (૨) પ્રેમાનંદાદિ મુનીન્દ્રો મૃદંગો, વીણા, વાંસળી, સતાર, વગેરે વગાડતા સતા શ્રીહરિના ગુણોને ગાતા હતા. (૩) હે રાજન્ ! તે સમયે શ્રીહરિ નિત્ય કથા સાંભળવા માટે પ્રયાગજી નામથી પ્રસિદ્ધ ઉત્તમ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

।।४।। प्रोढाकृतिः सकलशास्त्रपुराणवेत्ता वेदार्थवेदनपटुर्भगवत्प्रसादात् । स्पष्टाक्षरप्रवचनो मधुदीर्घशब्दस्तत्राजगाम स मुनीन्प्रणमन्कराभ्याम् ।।५।। बद्धाञ्जलिः स भगवत्पदोः शिरः स्वं धृत्वा ननाम विनयेन च पार्षदादीन् । नारायणोऽपि विधिवद्विनयात्तमुच्चे व्यासासने समुपवेश्य ननाम विप्रम् ।।६।। ब्रह्मण्यदेव इह धर्मपथावनेच्छुः पूज्योऽपि देवपतिभिः स सरस्वतीं प्राक् । सम्पूज्य सादरमथो तमपि द्विजेन्द्रमानर्च गन्धवरपुष्पफलोत्तमाद्यैः ।।७।। क्रमप्राप्तां भागवतपञ्चमस्कन्धसङ्गताम् । वाचयिष्यन्कथां सोऽथ मङ्गलाचरणं व्यधात् ।।८।। सुनीसारं सारं शुचिकनकबुट्टं परदधन्निचोलं कौसुम्भं कटितटपटं चारुणरुचिम् । बहून् हारान् हैमान्वरवलयकेयूरमुकुटान् हसद्वक्त्रेन्दुर्मे दृशि जयतु नारायणमुनिः ।।९।। य ईशोऽपि स्वेच्छाधृतनृतनुरानन्दनिलयः कृपासिन्धुर्भवजलनिधौ दुःखितनृणाम् । सकामैर्निष्कामैरपि सुरनरैः सेव्यचरणं नमाम्यात्मात्मानं तमहमिह नारायणमुनिम् ।।१०।। कृत्वेति मङ्गलं विप्रः कथामचकथत्स ताम् । तत्र तत्राध्यात्मभागं स्फुटीकृत्यावदत्प्रभुः ।।११।। स स्कन्धस्तद्दिने पूर्णस्ततः पौराणिकं प्रभुः । सम्पूज्य शीर्षपटकं तस्मै प्रादान्महाधनम् ।।१२।। धोत्रप्रावरणादीनि वस्त्राण्यन्यानि च प्रभुः । करभूषाद्यलङ्कारान् ददौ च विपुलं धनम् ।।१३।। बहुमूल्यं निजं चाश्वं रोहिताख्यं नृपेप्सितम् । तस्मै प्रादात्स भगवान् हैमालङ्कारभूषितम् ।।१४।। ततो व्यासासनाद्विप्रः स उत्थायानमत्प्रभुम् । उपाविवेश मुनिषु सूर्योऽस्तं तावदाप च ।।१५।। वासुदेवाङ्गणे तत्र मण्डपः शिल्पिभिस्तदा । चतुरस्रश्चतुर्द्वारश्चक्रेऽतिविततः शुभः ।।१६।। दीपानां

---

પુરાણીને બોલાવતા હતાં. (૪) પ્રૌઢ આકૃતિવાળા, સમગ્ર શાસ્ત્ર અને પુરાણના જાણનારા, વેદાર્થને જાણવામાં વિચક્ષણ, સ્પષ્ટ વર્ણોચ્ચારવાળા, સાંભળવામાં મધુર અને લાંબા સ્વરવાળા પ્રયાગજી પુરાણી બન્ને હાથથી મુનિઓને પ્રણામ કરતા સતા સભામાં આવ્યા. (૫) બન્ને હાથ જોડી પુરાણી શ્રીહરિના ચરણારવિંદમાં પોતાનું મસ્તક આદરપૂર્વક મૂકીને વિનયભાવથી નમસ્કાર કરતા હતા અને પાર્ષદોને નમસ્કાર કરતા હતા. શ્રીહરિ પણ પુરાણી બ્રાહ્મણને યથાશાસ્ત્ર વિનયથી ઊંચા વ્યાસાસનમાં બેસાડીને નમસ્કાર કરતા હતા. (૬) બ્રાહ્મણોનું હિતકર્મ કરનારમાં મુખ્ય દેવ, આ લોકમાં ધર્મમાર્ગનું રક્ષણ કરવા ઈચ્છતા; દેવોના સ્વામીઓએ પણ પૂજનીય શ્રીહરિએ ચંદન-કુમકુમ-નાના પ્રકારના પુષ્પોના હારો અને નાળિયેર, સોપારી અને સુવર્ણ મુદ્રાઓથી પ્રથમ શ્રીમદ્ ભાગવત પુરાણના પુસ્તકની આદરપૂર્વક પૂજા કરી પછી ઉત્તમ બ્રાહ્મણ પ્રયાગજી પુરાણીનું પણ ચંદન વગેરેથી પૂજન કર્યું. (૭) પછી પુરાણી અનુક્રમથી પ્રાપ્ત થયેલી ભાગવતના પંચમ સ્કંધ સંબંધી કથા કહે છે એવા સતા મંગલાચરણ કરતા હતા. (૮) શુદ્ધ સુવર્ણના બુટ્ટાદાર, અતિ શ્રેષ્ઠ નીશાર (ટાઢને ટાળે તેવું જામો ડગલી અથવા રજાઈ વગેરે વસ્ત્ર)ને ધારણ કરતા કૌસંબી રંગથી રંગેલા, નિચોલ (સુરવાળ ઉપર ધારવાનું કાઠિયાવાડમાં પ્રસિદ્ધ વસ્ત્ર) ને તથા તેવું માથાના સાફાને ધારણ કરતાં, લાલ કાંતિવાળું કેડે બાંધવાનું વસ્ત્ર ધારણ કરતાં સુવર્ણના ઘણા હારો, શ્રેષ્ઠ કડાં, બાજુબંધ, નૂપુર તથા મુગટને ધારણ કરતાં હાસ્ય યુક્ત મુખરૂપ ચંદ્રમાવાળા શ્રીનારાયણ મુનિ પ્રત્યક્ષ શ્રીહરિ મારી દૃષ્ટિ આગળ સદા રહો. (૯) શ્રી નારાયણ મુનિ પરમેશ્વર છે તો પણ પોતાના સંકલ્પથી ધારણ કર્યો છે મનુષ્ય સમાન દેહ જેમણે એવા, આનંદના સ્થાનભૂત, કરુણાસાગર, સંસારસાગરમાં દુઃખ પામતાં મનુષ્યોના બંધુ, સકામ અને નિષ્કામ ભક્તો એવા દેવતા અને મનુષ્યોએ ઉપાસના કરાયાં છે ચરણકમળ જેમનાં એવા, સમગ્ર જીવોના અંતર્યામી એવા શ્રી નારાયણ મુનિને આ કથાના આરંભમાં હું નમસ્કાર કરું છું. (૧૦) હે રાજન્ ! પ્રયાગજી પુરાણી આ પ્રમાણે મંગલાચરણ કરી પંચમ સ્કંધની કથા કહેતા હતા. કથાના પ્રસંગમાં આત્મા, અનાત્માદિ જ્ઞાનના વિભાગને સ્પષ્ટ કરી શ્રીહરિ કહેતા હતા. (૧૧) પંચમ સ્કંધ દિવાળીના ઉત્સવમાં સંપૂર્ણ થયો માટે શ્રીહરિએ પુરાણીની પૂજા કરી બહુમૂલો ફેંટો પુરાણીને આપ્યો. (૧૨) શ્રીહરિએ પહેરવાનાં ધોતિયાં બે, ઓઢવાનું વસ્ત્ર, સુંદર ડગલો,બીજાં વસ્ત્રો અને કડાં, સાંકળાં વગેરે અલંકારો અને ચાંદીનો થાળ ભરીને સુવર્ણ મુદ્રાઓ આપી. (૧૩) તેમજ શ્રીહરિએ બહુમૂલ્યવાળો રાજાઓએ પણ સ્પૃહા કરાયેલો-રોઝા નામનો પોતાનો અશ્વ સુવર્ણના અલંકારોથી અલંકૃત કરી પુરાણીને આપ્યો. (૧૪) પછી પુરાણીએ વ્યાસાસનથી ઊઠીને શ્રીહરિને નમસ્કાર કર્યા અને મુનિઓના મંડળમાં જઈને યોગ્ય સ્થાનમાં બેઠા અને તે સમયે સૂર્યાસ્ત થયો. (૧૫) તે સમયે ત્યાં શ્રી વાસુદેવ નારાયણના આંગણામાં શિલ્પીઓએ ચોખંડો ચાર દરવાજાવાળો અતિ વિસ્તાર યુક્ત સુશોભિત મંડપ કર્યો હતો. (૧૬) તે મંડપમાં લાંબી સરખી તથા આડી ઊંચી હજારો દીવાઓની



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

राजयस्तत्र दिवाकीर्तिभिरायताः । समस्तिर्यक् तथोर्ध्वं च चक्रिरे हि सहस्रशः ॥१७॥ बहिर्वेदिषु बद्धेषु तिर्यग्वंशेषु दीपकाः । सहस्रशः कृता भक्तैस्तैर्दीर्घस्थूलवर्तयः ॥१८॥ दीपिकानां शतान्यासन्नारायणमुनेः पुरः । मधूत्थवर्तिदीपाश्च रौप्याङ्कोड्डेषु भूरिशः ॥१९॥ काचयन्त्रेषु दीपाश्च तस्मिन्निम्बतरावपि । निबद्धाः शतशो भक्तैः दिशासु विदिशासु च ॥२०॥ दीपचक्रभ्रमाश्चापि रथकारैर्हरेः पुरः । निर्मिता यत्र दीपानां शतान्यासन् भ्रमन्ति वै ॥२१॥ रत्नेन्द्रसारा इव ते दीपा रोचिष्णवो बभुः। कुहुनिशायास्तिमिरं तदा तत्र व्यलीयत् ॥२२॥ ततः स्वर्णमयीं लक्ष्मीं विप्रानाहूय वैदिकान् । उपहारैर्बहुविधैः सोऽर्चयामास मण्डपे ॥२३॥ गीतवादित्रनिनदस्तदानीं सुमहानभूत् । ततः प्रादात्स विप्रेभ्यो वस्त्रालङ्कारदक्षिणाः ॥२४॥ जयया प्रेरितोऽभ्येत्य तं नृपस्तत उत्तमः । पूजयामास भक्त्यैव महासदसि भूपते ! ॥२५॥ शोणमाप्रपदीनं च चोलं प्राग्घरये ददौ । तत्प्रीतये हरिस्तं च धोत्रोपरि दधौ क्षणम् ॥२६॥ अनर्घ्यं च शिरोवेष्टं नृपो भगवते ददौ । ततः शोणं स्वर्णमयं नीशारं पर्यधापयत् ॥२७॥ चञ्चत्प्रान्तं कटिपटं गुम्फितैर्हैमतन्तुभिः । कौसुम्भं हरये प्रादात्कट्यां तं च बबन्ध सः ॥२८॥ प्रावारपटकं चान्यं बहुमूल्यं सितं शुभम् । समर्प्य प्रभवे तस्थौ तं प्रणम्य स तत्पुरः ॥२९॥ अथाहूतो ललितया नृपोऽगच्छत्तदन्तिकम् । तया दत्तानलङ्कारानानीय हरये ददौ ॥३०॥ पादयोर्नूपुरे तस्य किङ्किणीजालशोभिते । कट्यां च तादृशीं काञ्चीमुत्तमः पर्यधारयत् ॥३१॥ कटके शृङ्खले तस्य भुजयोश्चाङ्गदद्वयम् । अङ्गुलीषूर्मिका हैमीर्मणिरत्नविभूषिताः ॥३२॥ कर्णयोः कुण्डले कण्ठे हारान्नानाविधांस्तथा । तं धारयित्वा नृपतिः प्रणनाम कृताञ्जलिः ॥३३॥ आनन्दयन्भक्तजनानथोत्थाय हरिः स्वयम् । मण्डपान्तर्गतं पीठमुपेत्याध्यारुरोह तत् ॥३४॥ दृढाबद्धकटिस्तत्र तालिकां

પંક્તિઓ નાપિતોએ કરી. (૧૭) મહેલના બહારના ભાગમાં શણની દોરીથી બાંધેલા વાંકા વાંસડાઓમાં કૃષ્ણદાસ વગેરે નાપિતોએ મોટી દિવેટોવાળા હજારો દીવાઓ કર્યા. (૧૮) શ્રીનારાયણ મુનિની આગળ દીપિકાઓ સો એ સો કરી હતી, ચાંદીનાં કોડિયાંઓમાં મીણબત્તીઓના દીવાઓ કર્યા હતા. (૧૯) કાચની હાંડીઓ, ઝુમરો વગેરેમાં દીવાઓ મૂકીને લીંબડાના વૃક્ષમાં પણ ભક્તોએ પૂર્વપશ્ચિમ આદિ ચારે દિશાઓ તથા વિદિશાઓમાં ઘણા દીવાઓ બાંધ્યા હતા. (૨૦) સુથાર નારાયણજી વગેરે ભક્તોએ દીવાઓને ચક્રાકાર ફરે તેવાં યંત્રો શ્રી નારાયણ મુનિની આગળ નિર્માણ કર્યા હતાં, જે યંત્રોમાં હજારો દીવાઓ વારંવાર ચક્રાકારે ફરતા હતા. (૨૧) પ્રકાશિત દીવાઓ ઉત્તમ મણિઓની માફક શોભતા હતા, તે સમયે અમાવાસ્યાની રાત્રિનો અંધકાર ઉત્તમ રાજાના દરબારમાં લીન થઈ ગયો. (૨૨) પછી શ્રીહરિ વેદપાઠી બ્રાહ્મણોને બોલાવીને સુવર્ણની લક્ષ્મીજીની મૂર્તિને અનેક પ્રકારના ઉપહારોથી મંડપમાં પૂજતા હતા. (૨૩) તે સમયે અતિશય ગીત વાજિંત્રોના ધ્વનિઓ થયા. પછી શ્રીહરિએ બ્રાહ્મણોને વસ્ત્રો, અલંકારો, અને દક્ષિણાઓ આપી. (૨૪) હે ભૂપતે ! પછી જયાએ પ્રેરેલા ઉત્તમ રાજાએ શ્રીહરિની સમીપમાં આવીને મહાસભામાં અતિપ્રેમથી પૂજન કર્યું. (૨૫) લાલ વર્ણનો સુરવાળ પ્રથમ શ્રીહરિને ઉત્તમ રાજાએ આપ્યો. શ્રીહરિએ તેમની પ્રીતિ માટે તે સુરવાળને પહેરેલા ધોતિયા ઉપર તે સમયે જ ધારણ કર્યો. (૨૬) ઉત્તમ રાજાએ બહુમૂલ્યવાળો સોનેરી તારનો ફેંટો શ્રીહરિને અર્પણ કર્યો તે શ્રીહરિએ પોતાના મસ્તક ઉપર બાંધ્યો પછી લાલ વર્ણનો સોનેરી બુટ્ટાદાર જામો ધારણ કર્યો. (૨૭) સુવર્ણના તારોથી ગૂંથેલા છેડાવાળો કૌસંભી રંગનો પટકો શ્રીસ્વામિનારાયણ ભગવાનને આપ્યો. શ્રીહરિએ કેડ્યમાં બાંધ્યો. (૨૮) અમૂલ્ય,શ્વેત, અત્યંત શોભતું બીજું ઓઢવાનું વસ્ત્ર શ્રીહરિને સમર્પણ કરી ઉત્તમ રાજા શ્રીહરિને પ્રણામ કરી શ્રીહરિની આગળ ઊભા રહ્યા. (૨૯) પછી લલિતાએ બોલાવેલા ઉત્તમ રાજા લલિતાની પાસે ગયા. લલિતાએ આપેલાં અલંકારો લાવીને શ્રીહરિને આપ્યાં. (૩૦) નાની નાની ઘૂઘરીઓના સમૂહથી શોભતાં નૂપુરો શ્રીહરિનાં ચરણકમળોમાં ઉત્તમ રાજાએ ધારણ કરાવ્યાં તેવી ઘૂઘરીઓથી શોભાયમાન કંદોરો કેડ્યમાં ધારણ કરાવ્યો. (૩૧) શ્રીહરિના બન્ને હાથમાં કડાં, સાંકળાં, બન્ને બાજુબંધ, રત્નોથી વિભૂષિત અલંકારો, સુવર્ણની વીંટીઓ, વેઢ, ઉત્તમ રાજા શ્રીહરિને ધારણ કરાવતા હતા. (૩૨) ઉત્તમ રાજાએ શ્રીહરિના બન્ને કાનમાં કુંડળો તથા કંઠમાં નાના પ્રકારના સોનાના અને મોતીઓના અનેક પ્રકારના હારો ધારણ કરાવી બંને હાથ જોડીને નમસ્કાર કર્યા. (૩૩) સ્વયં શ્રીહરિ પોતાના આસનથી ઊઠીને ભક્તજનોને આનંદ આપતા સતા મંડપના મધ્યભાગમાં સ્થાપન કરેલા સિંહાસન પાસે આવીને તેના પર બિરાજમાન થયા. (૩૪) ત્યાં જેમણે કેડ્ય બાંધી

वादयन्स्वयम् । नामसङ्कीर्तनं चक्रे तदा नारायणस्य सः ॥३५॥ श्रीराधाकृष्ण ! गोविन्द ! नरनारायण ! प्रभो ! । वासुदेव! हरे ! स्वामिन्नित्युच्चैः समकीर्तयत् ॥३६॥ मुनयश्च जनाः सर्वे तदा तन्नामकीर्तनम् । उच्चैश्चक्रुर्वादयन्तस्तालिका हर्षसंयुताः ॥३७॥ आसीत्स तुमुलो घोषः सर्वाघौघविनाशनः । दिशश्च विदिशः सर्वाः स वै व्याप महाध्वनिः ॥३८॥ मुहूर्तमिति सङ्कीर्त्य निषसादासने प्रभुः । प्रणेमुस्तं जनाः सर्वे स्तुवन्तो विविधैः स्तवैः ॥३९॥ संस्कृतैः प्राकृतैः पद्यैः पुराणैर्नूतनैरपि । स्तुत्वा नारायणमुनिं प्रणेमुः परया मुदा ॥४०॥ दीनानाथस्तदा विप्रो नूत्नकाव्यविशारदः । बद्धाञ्जलिपुटोऽस्तौषीच्छ्लोकानामष्टकेन तम् ॥४१॥ महातेजःपुञ्जे स्फुरदमलसिंहासनवरे स्थितं सर्वाधीशं नखकिरणविद्योतितसभम् । सितच्छत्रं पार्श्वस्फुरदमलसच्चामरयुगं भृशं धन्यो लब्ध्वा नयनपथि नारायणमहम् ॥४२॥ हसद्वक्त्राम्भोजं चपलनयनालोकितजनं लसन्मुक्ताहारं विविधकु-सुमापीडमुकुटम् । प्रचञ्चत्प्रावारं चरमविलसन्नूपुरमिदं हरे ! रूपं नित्यं मम मनसि सम्यक् स्फुरतु ते ॥४३॥ दृढं विश्वासो मे तव चरणपद्माश्रितजनो भवाम्भोधेः पारं व्रजति सहसा त्वत्करुणया । त्वमेवैकः स्वामी सकलजगतामित्यपि हरे ! विदित्वा पादौ ते दृढतरमहं ह्याश्रयमिमौ ॥४४॥ न जाने शास्त्राणां विविधमतसन्निर्णयमहं पुराणव्रातानामपि च बहुकल्पाश्रितकथाः । न वा देवर्षीणां पृथगिह मनोरञ्जनविधिं परं जाने स्वामिन् ! भ्रमणहरणं तेऽत्र शरणम् ॥४५॥

तपो नोग्रं तप्तं व्रतनियमदानानि च मया न चेष्टापूर्ते वा श्रवणमननाभ्यासदृढता । न चीर्णान्यामुं त्वामिह तदपि यस्त्वं दृशि गतो न जाने तद्धेतुं त्वदतितरकारुण्यत ऋते ॥४६॥ भृशं पापव्रातैर्मदनमदमानादिभिरपि प्रभो ! ग्रस्तस्यालं तव

---

છે એવા શ્રીહરિ તે સમયે તાળી વગાડતા સતા નારાયણની ધૂન કરવા લાગ્યા. (૩૫) હે રાધાકૃષ્ણ ! હે ગોવિંદ ! હે નરનારાયણ ! હે પ્રભો ! હે વાસુદેવ ! હે હરે ! હે સ્વામિન્ ! આ પ્રકારે ઉચ્ચ સ્વરથી શ્રીહરિ કીર્તન કરતા હતા. (૩૬) તે સમયે સર્વ સાધુઓ અને સર્વ ભક્તજનો તાલીઓ વગાડતા સતા હર્ષયુક્ત ઊંચા સ્વરે શ્રીહરિનાં નામોનું કીર્તન કરતા હતા. (૩૭) સર્વ પાપોના સમુદાયને નાશ કરનારા નામ સંકીર્તનનો ધ્વનિ ઘણો થયો. તે મહાધ્વનિ સર્વ દિશાઓ અને વિદિશાઓમાં વ્યાપી ગયો. (૩૮) પ્રભુ શ્રીહરિ આ પ્રમાણે બે ઘડી સુધી નામકીર્તન કરી પોતાના આસનમાં બેઠા. સર્વ જનો વિવિધ પ્રકારનાં સ્તોત્રોથી સ્તુતિ કરતા સતા શ્રીહરિને પ્રણામ કરતા હતા. (૩૯) પ્રાચીન કવિઓએ અને નવીન કવિઓએ રચેલા સંસ્કૃત અને પ્રાકૃત ભાષામાં શ્લોકો અને પદોથી પ્રત્યક્ષ શ્રીહરિની સ્તુતિ કરી પરમ હર્ષથી સર્વે જનો પ્રણામ કરતા હતા. (૪૦) તે સમયે નવીન કાવ્ય કરવામાં વિશારદ દીનાનાથ વિપ્ર બન્ને હાથ જોડી આઠ શ્લોકથી ગૂંથેલા સ્તોત્રથી શ્રીહરિની સ્તુતિ કરતા હતા. (૪૧) મહાતેજના સમુદાયમાં ચળકતા શુદ્ધ મણીન્દ્રો જડેલા ઉત્તમ સિંહાસનમાં બેઠેલા; અક્ષર- કાલ- માયાદિના સ્વામી, ચરણકમળની આંગળીઓના નખનાં કિરણોથી સંપ્રકાશિત કર્યા છે સભાનાં જનો જેમણે, મસ્તક ઉપર સ્વપાર્ષદ સોમવર્માએ ધારેલા શ્વેત છત્રવાળા, બંને પડખાઓમાં અલૈયા અને ભગુજીએ ઢોળેલા છે પ્રકાશિત શુદ્ધ, સુંદર, બંને ચામરો જેમને એવા શ્રી ભક્તિધર્માત્મજ નારાયણ મુનિ તમોને પામીને હું અત્યંત કૃતાર્થ થયો છું. (૪૨) હે હરે, મંદ હાસ્યયુક્ત મુખારવિંદવાળું, ખંજન પક્ષીની માફક ચંચળ નેત્રોથી જોવાયેલા છે સ્વાશ્રિતજનો જેણે એવું, શોભાયમાન મોતીઓની માળાઓવાળું, વિવિધ પ્રકારના તોરાઓ અને મુગટવાળું, અતિ પ્રકાશિત પ્રાવાર- (ઓઢવાના વસ્ત્ર) વાળું, બન્ને ચરણોમાં શોભાયમાન નૂપુરોવાળું તમારું આ દેખાતું રૂપ મારા મનમાં નિત્ય પ્રકાશો. (૪૩) હે હરે ! તમારા ચરણકમળનો આશ્રિત જન સંસારસાગરના અંતને તમારી કૃપાથી તત્કાલ પામે છે : આ પ્રમાણે મારો દઢ વિશ્વાસ છે. સમગ્ર જગતોના સ્વામી તમો એક જ છો, આ પ્રમાણે જાણીને તમારાં આ બંને ચરણકમળોનો અતિદઢ આશ્રિત થયો છું. (૪૪) હે સ્વામિન્ ! હું મીમાંસાદિ શાસ્ત્રોના વિવિધ મતોના સિદ્ધાંતોનો નિર્ણય જાણતો નથી. શ્રીમદ્ ભાગવતાદિ પુરાણોની ઘણા કલ્પોના આશ્રયવાળી કથાઓ પણ જાણતો નથી. આ લોકમાં બ્રહ્માદિ દેવો અને મરીચ્યાદિ ઋષિઓનો ભિન્ન ભિન્ન મનોરંજન વિધિ જાણતો નથી. આ લોકમાં તમારું શરણ સંસારના ભ્રમણને નાશ કરનારું કેવલ જાણું છું. (૪૫) હે પ્રભો ! આ લોકમાં તમારી પ્રાપ્તિ માટે તીવ્ર તપ કર્યું નથી. એકાદશી આદિ વ્રતો, અહિંસાદિ નિયમો, સત્પાત્રોમાં દાનો કર્યાં નથી. યાગાદિ, બગીચા નિર્માણ વગેરે ઈષ્ટાપૂર્તાદિ વિધિઓ પણ કરી નથી. શ્રવણ-મનનના અભ્યાસની દઢતા પણ કરી નથી તો પણ તમો મારી દષ્ટિગોચર થયેલા છો તેનું કારણ તો તમારી અત્યંત કૃપા વિના જાણતો નથી. (૪૬) હે પ્રભો

चरणपद्मेक्षणमिदम् । कथंकारं मे स्याद्यदि न पुरुकारुण्यपदवीं श्रयेथा नाथ ! त्वं त्वयि हि तदिदं केवलमहो !! ॥४७॥ बलं नो मे बुद्धेर्न च सुदृढवैराग्यविलसन्निजात्मज्ञानस्य प्रचुरनियमानामपि हरे ! । विमोक्तुं संसारान्निरतिशयमेकं हि बिरुदं विलोक्य स्वीयं मां भवजलनिधेरुद्धर निजम् ॥४८॥ न जाने धर्माणामतिगहनकर्तव्यसरणिं न शास्त्रं मन्त्राणां न च विविधतन्त्रागमविधिम् । न वा भक्तैः कृत्यं तव चरणपद्मार्चनविधिं ततो वन्दे दीनस्तव पदयुगं दण्डवदहम् ॥४९॥ करुणाष्टकसंज्ञेन स्तोत्रेणेत्थं निजस्तुतिम् । तस्मै विदधते तुष्टो भगवानभयं ददौ ॥५०॥ ततः सर्वेऽपि मुनयो मध्ये कृत्वा तमीश्वरम् । प्रदक्षिणां प्रकुर्वन्तो गायनं चक्रुरादरात् ॥५१॥ भ्रमन्तो मण्डलाकारमेककालं च तालिकाम् । वादयन्तश्च गायन्तस्तोषयामासुरीश्वरम् ॥५२॥ ततस्तुष्टः स भगवान् गन्तुं स्वस्य स्थलं जनान् । मुनींश्चाज्ञापयामास जग्मुः सर्वे तदाज्ञया ॥५३॥ पाकः शीघ्रं विधेयः श्व इत्याज्ञाप्य च पाचकान् । ब्राह्मणान् हरिरात्मीयं मन्दिरं प्रत्यगान्नृप ! ॥५४॥ स्नात्वा सन्ध्यावन्दनं होमकर्म स्वीयं नित्यं तत्र कृत्वाद्ययामे । याते रात्रेर्योगनिद्रां समुत्कामक्ष्णासौ सम्भावयामास किञ्चित् ॥५५॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे अन्नकूटोत्सवे दीपावलीमहोत्सवनामा चतुर्दशोऽध्यायः ॥१४॥

सुव्रत उवाच-**पाचकाः कृतपक्वान्नाः शाकसूपादि ते तदा । कर्तुमारेभिरे राजन् ! विप्रा योषास्तथा पृथक् ॥१॥ तस्यां रात्रौ क्षत्रयोषा उत्तमस्यापि मन्दिरे । जयारमादयः पाकं चतुर्विधमसाधयन् ॥२॥ सर्वाः सर्वाणि कार्याणि निर्मानास्तत्र**

---

! હે નાથ ! પાપના સમુદાયોથી તથા કામદેવ, વિદ્યાદિ ગુણજન્ય મદ અને માન, લોભ વગેરે અંતઃશત્રુઓથી પરાભવ પામેલો છું એવો જે હું તે મને તમારાં ચરણકમળનાં દર્શન જો તમો અત્યંત દયાળુપણાના માર્ગને આશરેલા ના હોય તો ક્યા પ્રકારે થાય ? અહો, આશ્ચર્ય છે ! (૪૭) હે હરે ! જન્મમરણરૂપી સંસારથી મુક્તિ પામવા માટે મારી બુદ્ધિનું સામર્થ્ય નથી જ. અતિ દઢ વૈરાગ્યથી પ્રકાશતું આત્મસ્વરૂપના જ્ઞાનનું પણ બળ નથી. ઘણા શૌચ-સંતોષાદિ નિયમોનું પણ બળ નથી માટે અતિશય પોતાની એક કેવળ પ્રતિજ્ઞા ( 'હું તમારો છું એમ યાચના કરનારને સર્વ પ્રકારે અભય કરું છું. મારો ભક્ત નાશ પામતો નથી. એવું બિરુદ') જોઈને આપના ભક્ત મને સંસારસમુદ્રથી ઉદ્ધાર કરો. (૪૮) વર્ણાશ્રમ ધર્મમાં રહેલાઓની અતિ ગહન કર્તવ્યની પદ્ધતિ જાણતો નથી. મંત્રોનાં શાસ્ત્રને જાણતો નથી, નાના પ્રકારનાં પંચરાત્રાદિ તંત્રશાસ્ત્રનો વિધિ જાણતો નથી. તમારા એકાંતિક ભક્તોએ કરવા યોગ્ય તમારા ચરણકમળના પૂજનનો વિધિ જાણતો નથી. માટે ગરીબ અથવા દીનાનાથ નામનો બ્રાહ્મણ હું તમારાં બન્ને ચરણકમળોને દંડની માફક સાષ્ટાંગ પ્રણામ કરું છું. (૪૯) હે રાજન્ ! આ પ્રકારે કરુણાષ્ટક સ્તોત્રથી પોતાની સ્તુતિ કરતા દીનાનાથ બ્રાહ્મણ ઉપર શ્રીહરિએ પ્રસન્ન થઈને અભયદાન આપ્યું. (૫૦) પછી સર્વે મુનિઓ પરમેશ્વર શ્રીહરિને વચમાં કરીને પ્રદક્ષિણા કરતા સતા આદરપૂર્વક કીર્તનો ગાતા હતા. (૫૧) મંડલાકાર જેમ હોય તેમ ફરતા, એકીસાથે તાલી વગાડતા અને કીર્તનનું ગાયન કરતા મુનિઓ પરમેશ્વર શ્રીહરિને સંતોષ પમાડતા હતા. (૫૨) પછી પ્રસન્ન થયેલા ભગવાન શ્રીહરિ ભક્તજનો અને મુનિઓને પોતપોતાના સ્થાનમાં જવા માટે આજ્ઞા કરતા હતા, સર્વજનો અને મુનિઓ શ્રીહરિની આજ્ઞાથી જતા હતા. (૫૩) હે નૃપ ! શ્રી નારાયણ મુનિ, આવતે દિવસે તત્કાલ રસોઈ કરવી : આ પ્રકારે રસોઈયા બ્રાહ્મણને આજ્ઞા આપી પોતાના નિવાસસ્થાનમાં ગયા. (૫૪)

શ્રીહરિ પોતાના સ્થાનમાં સ્નાન કરી પોતાનાં નિત્યવિધિ, સંધ્યાવંદનાદિ અને હોમ કરી રાત્રિનો પ્રથમ પહોર ગયો ત્યારે પોતાની સેવામાં ઉત્સાહવાળી યોગનિદ્રાને આંખથી લગારેક સંભાવના કરતા હતા. (૫૫) *ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે અન્નકૂટોત્સવે દીપાવલીમહોત્સવ નામા ચતુર્દશોઽધ્યાયઃ (૧૪)*

## અધ્યાય : ૧૫

### ક્ષત્રિય ભક્ત સ્ત્રીઓએ પ્રેમપૂર્વક પાક કર્યો તેમનાં નામપૂર્વક કોણે કયો પાક કર્યો તે કહ્યું છે.

**સુવ્રત મુનિ બોલ્યા :** શ્રીહરિએ પ્રેરણા કરેલા રસોયા બ્રાહ્મણોએ પકવાનો જેમણે કરેલાં છે એવા થકા શ્રીહરિની આજ્ઞા મળતાં શાક, દાળ વગેરે કરવાનો આરંભ કર્યો તે પ્રકારે રસોઈ કરનારી બ્રાહ્મણની સ્ત્રીઓએ જુદાં જુદાં રસોડાઓમાં શાક, દાળ વગેરે કરવાનો આંરભ કર્યો. (૧) દિવાળીની રાત્રિમાં જયા, રમા વગેરે ક્ષત્રિય સ્ત્રીઓ ઉત્તમ રાજાના ભવનમાં પણ ભક્ષ્ય ભોજ્યાદિ ચાર પ્રકારની રસોઈ તૈયાર કરતા હતાં. (૨) ઉત્તમ રાજાના ભવનમાં નિર્માની

चक्रिरे । विशेषेणाधिकारित्वं ब्रुवे तासां यथा तथा ॥३॥ जनन्यौ ललितायास्तु चक्रतुस्तत्र शोधनम् । तण्डुलद्विदलादीनां पाकार्हाणां यथोचितम् ॥४॥ जया च पाककर्त्रीणां सर्वासामपि योषिताम् । तत्तत्कार्यप्रेरणेऽभूत्सक्ता चापेक्षितार्पणे ॥५॥ पाके दाक्ष्यं दर्शयन्तीर्योषितः प्रशशंस च । अजानतीश्च तत्कार्यं ललिताशिक्षयत्स्वयम् ॥६॥ रमा तु तत्र सिद्धानि खाजकानि च शष्कुलीः । पात्रान्तरे सञ्चिचाय चातुर्यादक्षतानि हि ॥७॥ अमरी चामला क्षेमा क्वथिकावटिकादिषु । लेह्येषु नानाशाकेषु स्वचातुर्याण्यदीदृशन् ॥८॥ रतिमेनासातिदेव्यः पूरिकाः पोलिकास्तथा । कुर्वत्यस्तत्र नैपुण्यं दर्शयामासुरात्मनः ॥९॥ पाककर्मणि दक्षा च रेवती पायसं शुभम् । अपूपांश्चापि संयावं सूपं च कुरुते स्म सा ॥१०॥ फुल्लादित्यजवामल्ल्यः कैसराद्यांश्च जाह्नवी । एता बहुविधांश्चक्रुरोदनान्नुचिरान्नृप ! ॥११॥ यमिफुल्लजया चोभे घर्घुरांश्चक्रतुः शुभान् । विदधुर्मण्डकादींश्च तत्रान्या अपि योषितः ॥१२॥ पाञ्चाली तत्कनिष्ठा च पाचिकाभ्यः प्रतिक्षणम् । अपेक्षितानि वस्तूनि दत्तः स्माऽऽनीय वेश्मतः ॥१३॥ श्रमिताभ्यः पाचिकाभ्यो विश्रान्तिं नृपयोषितौ । ददतुर्ललितोक्तेन कुर्वत्यौ तत्क्रियाः स्वयम् ॥१४॥ एतासां परिचर्यायां जितामान्यादयः स्त्रियः । काष्ठपात्राम्बुदानादाववर्तन्तोद्यताः सदा ॥१५॥

एलालवङ्गत्वक्पत्रराजिकाजरणोषणैः । कुस्तुम्बुरुप्रभृतिभिर्घृततैलसमन्वितैः ॥१६॥ द्रव्यैः संस्क्रियमाणानां व्यञ्जनानां पुनःपुनः । छुम्कारा भूरिशस्तत्र स्त्रीणामासन्महानसे ॥१७॥ वटकानां पूरिकाणामपूपानां च भूरिशः । घृतेषु पच्यमानानां सुर्सुड्कारास्तथाऽभवन् ॥१८॥ मृदुसूक्ष्मसितानां च तण्डुलानां महानसे । सौरभः पच्यमानानां व्यानशे सकलं पुरम्॥१९॥

---

થઈને સર્વ કાર્ય ક્ષત્રિય ભક્ત સ્ત્રીઓ કરતી હતી તે ક્ષત્રિય સ્ત્રીઓનું જે રીતે વિશેષ અધિકારીપણું હતું તે હું કહું છું. (૩) તે ક્ષત્રિય સ્ત્રીઓમાં લલિતાની માતાઓ સોમાદેવી અને સુરપ્રભા તો રાંધવા યોગ્ય ચોખા અને દાળની યથાયોગ્ય શુદ્ધિ કરતાં હતાં. (૪) અને જયા પાકની રસોઈ કરનારી જે સર્વ ક્ષત્રિય સ્ત્રીઓ તેમને તે તે કાર્યમાં પ્રેરણા કરવામાં તથા અપેક્ષિત વસ્તુઓ આપવામાં તત્પર હતાં. (૫) લલિતા પાક કાર્યમાં પોતાનું ચાતુર્ય બતાવતી સ્ત્રીઓની પ્રશંસા કરતી હતી. તે પાક-કાર્યમાં નહિ જાણનારી સ્ત્રીઓને પોતે તે કાર્ય શિખવાડતી હતી. (૬) રમા તો પાકોમાં તૈયાર થયેલાં ખાજાં, ચાતુર્યથી આખા રહે તેમ બીજા મોટા પાત્રમાં સારી રીતે ગોઠવતી અને જલેબી પણ ચાતુર્યથી આખી રહે તેવી રીતે બીજા પાત્રમાં ગોઠવતી હતી. (૭) અમરી, અમલા, ક્ષેમા : આ ત્રણ સ્ત્રીઓ વડીઓ અને રાયતાં વગેરે લેહ્ય પદાર્થો અને વિવિધ પ્રકારનાં શાકોમાં પોતાની દક્ષતા લલિતાને બતાવતી હતી. (૮) રતિ, મેના, સાતી અને દેવી : આ ચાર સ્ત્રીઓ પુરીઓ તથા પુરણપોળી કરતી હતી. અને પુરણપોળી કરવામાં પોતાની નિપુણતા લલિતાને બતાવતી હતી. (૯) પાક કરવામાં નિપુણ સ્ત્રીઓમાં પ્રસિદ્ધ રેવતી દૂધપાક, માલપુવા, શીરો અને દાળ પણ કરતી હતી. (૧૦) હે રાજન્! ફુલ્લી અને અદિતિ, અજવા, મલ્લી, જાહ્નવી : આ પાંચ સ્ત્રીઓ કેસરિયો બીરંજ વગેરે નાના પ્રકારના અતિ સુંદર ભાત કરતી હતી. (૧૧) યમી અને ફૂલજયા આ બંને સ્ત્રીઓ શોભાયમાન ઘૂઘરા કરતી હતી. સ્ત્રીઓના રસોડામાં બીજી પણ સ્ત્રીઓ માંડા વગેરે ખાદ્ય વિશેષોને કરતી હતી. (૧૨) પાંચાળી અને નાની આ બે સ્ત્રીઓ રસોઈ કરનારી સ્ત્રીઓને જરૂરી વસ્તુઓ અને મસાલા વગેરે ઘરમાંથી લાવીને વારંવાર આપતી હતી. (૧૩) ઉત્તમ રાજાની સ્ત્રીઓ કુમુદા અને જુહૂ થાકી ગયેલી રસોઈ કરનારી સ્ત્રીઓને લલિતાના કહેવાથી તેમની ક્રિયાઓ પોતે કરતી સતીઓ વિશ્રાંતિ આપતી હતી. (૧૪) જીતા અને માન્યા આદિ સ્ત્રીઓ નિરંતર ઉદ્યમવાળી સતી રાંધનારી સ્ત્રીઓને લાકડાં, પાત્રો,જળ આદિ આપવાનું તથા પાત્ર માંજવાનું કાર્ય વગેરે સેવામાં વર્તતી હતી. (૧૫)

ઘી અને તેલથી યુક્ત એલાયચી, મોટી એલાયચી, લવિંગ, તજ, રાઈ, જીરું,મરચાં, ધાણા વગેરે વસ્તુઓથી વઘારેલાં શાક વગેરેના ઘણા છમકારા ક્ષત્રિય સ્ત્રીઓના મહાનસમાં (પાકશાળામાં) વારંવાર થતા હતા. (૧૬-૧૭) તે જ પ્રકારે ઘીમાં તળાતાં વડાં, પુરીઓ માલપૌંઆના ઘણા સુડસુડ અવાજો થતા હતા. (૧૮) રાંધવામાં આવતા કોમળ, સૂક્ષ્મ,શ્વેત ચોખાઓનો પમરાટ ગઢપુરમાં વ્યાપી ગયો. (૧૯) જેમણે સ્વાદ જીત્યો છે એવાં જયા, રમા વગેરે સ્ત્રીઓ પણ જાણે કે

जितस्वादा अपि च ताः प्रभुं प्रीणयितुं स्त्रियः । पाकं चतुर्विधं चक्रुः सूपशास्त्रविदो यथा ॥२०॥ आपूपिका आन्धसिका निपुणाः पाककर्मसु। दृष्ट्वा तत्पाकचातुर्यं निर्माना अभवन्नराः ॥२१॥ प्रातःकालेऽथ सम्प्राप्ते ब्राह्मणस्त्वर्चकः सुधीः । वासुदेवार्चनं चक्रे नवीनैर्वस्त्रभूषणैः ॥२२॥ अन्नकूटस्य रचनां कर्तुं च हरिमन्दिरे । विचित्रं मण्डलं चक्रे नानारङ्गोपशोभितम् ॥२३॥ तोरणानि तथाऽशोकसहकारादिपल्लवैः । अबन्धयद्धरेर्द्वारि रम्भास्तम्भैश्च मण्डपम् ॥२४॥ पक्वान्नभृतपात्राणां स्थापनार्थं हरेः पुरः । पीठानि स्थापयामास चतुरस्राण्यनुक्रमात् ॥२५॥ मध्याह्नपूजाविहितोपचारान्सम्पादयित्वा स हरेर्निदेशम् । तस्थौ प्रतीक्ष्यैव महान्नकूटविधान उत्कः सह वर्णिवर्यैः ॥२६॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे अन्नकूटोत्सवे पाकनिष्पत्तिनामा पञ्चदशोऽध्यायः ॥१५॥

सुव्रत उवाच–हरिर्निशोऽन्तिमे राजन् ! याम उत्थाय सत्वरम् । स्वपार्षदैः कतिपयैः सह गङ्गां जगाम सः ॥१॥ न विदुः प्रायशो लोकाः स्नानार्थं तं गतं प्रभुम् । जागरूकास्तु मुनयो विदित्वैव तमन्वयुः ॥२॥ नित्यस्नानादिकं तत्र विधाय विधिना प्रभुः । जनसम्मर्दभीत्याशु स्वमन्दिरमुपाययौ ॥३॥ तत्र धौताम्बरधर उपविश्यौर्ण आसने । कृत्वा पञ्चोर्ध्वपुण्ड्राणि सन्ध्यावन्दनमाचरत् ॥४॥ ततो जप्त्वा च गायत्रीमजुहोज्जातवेदसम् । आदरात्कृष्णमभ्यर्च्य तन्मनुं प्रयतोऽजपत् ॥५॥ तत एत्योत्तमो भूपस्तं प्रणम्यार्चिचत्प्रभुम् । चन्दनाक्षतपुष्पैश्च नूत्नवस्त्रैश्च भूषणैः ॥६॥ नद्यां स्नात्वाऽऽगतं तं च ज्ञात्वा

નલ, ભીમ, ક્ષેમ વગેરે પાકશાસ્ત્રોને જાણનારી હોય તેમ શ્રીનારાયણમુનિને પ્રસન્ન કરવા માટે ભક્ષ્ય ભોજ્યાદિ ચાર પ્રકારના પાકોને કરતી હતી. (૨૦) પાકકર્મમાં પ્રવીણ કંદોઈયાઓ તથા રસોઈયા પુરુષો, સ્ત્રીઓનું પાકચાતુર્ય જોઈને પોતાના ગુણોનાં અભિમાનથી રહિત થઈ ગયા. (૨૧) પછી પ્રાતઃકાળ થયો ત્યારે પૂજનક્રિયામાં કુશળ પૂજારી બ્રાહ્મણ નવીન વસ્ત્રો તથા અલંકારોથી શ્રીરાધાકૃષ્ણ ભગવાનનું પૂજન કરતા હતા. પછી ગાયો, વાછરડાં વગેરેને હળદર, કુમકુમ પુષ્પના હારો વડે પૂજીને મંદિરની આગળ ખેલાવતા હતા પછી ગોમય (છાંણ) વડે ગોવર્ધન કરી તેનું પૂજન કર્યું. (૨૨) વળી શ્રીવાસુદેવના મંદિરમાં અન્નકૂટની રચના કરવા માટે વિધવિધ રંગોમાં શોભાયમાન વિચિત્ર મંડળ પૂજારી બ્રાહ્મણ કરાવતા હતા. (૨૩) તે જ પ્રકારે શ્રી વાસુદેવના મંદિરના દ્વારમાં અશોક અને આંબાનાં પલ્લવોથી તોરણ બાંધતા હતા અને કેળના સ્તંભોથી મંડપ બાંધતા હતા. (૨૪) શ્રીવાસુદેવ ભગવાનની આગળ જલેબી, ઘેબર વગેરેથી ભરેલાં પાત્રોના સ્થાપન માટે ચાર ખૂણાઓવાળા અનુક્રમથી ગોઠવાયેલાં પાટિયાં મૂકતા હતા. (૨૫)

પૂજારી બ્રાહ્મણ, મધ્યાહ્ન સમયે કરવાની પૂજામાં કહેલા જે ઉપહારો, તેને સંપાદન કરી, મહા અન્નકૂટની રચનામાં ઉત્સાહવાળા; મુકુંદાનંદાદિ વર્ણીન્દ્રોની સાથે માત્ર શ્રીનારાયણમુનિની આજ્ઞાની પ્રતીક્ષા કરતા સતા ઊભા હતા. (૨૬)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે અન્નકૂટોત્સવે પાકનિષ્પત્તિ નામા પંચદશોડધ્યાયઃ (૧૫)*

## અધ્યાય : ૧૬

## અન્નકૂટના દિવસે ઉત્તમ રાજાએ સ્તુતિ કરાયેલા પ્રભુ શ્રીહરિનું, બહાર વેદી ઉપર હર્ષપૂર્વક બેસવું વગેરેનું વર્ણન કર્યું છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! શ્રી નારાયણ મુનિ અમાવાસ્યાની રાત્રિના છેલ્લા પહોરમાં ઊઠીને તત્કાલ કેટલાક પાર્ષદોની સાથે ઉન્મત્ત ગંગામાં ગયા. (૧) સ્નાન કરવા માટે ગયેલા શ્રીહરિને નગરવાસીજનો ઘણું કરીને જાણતા ન હતા. તે સમયે શ્રીહરિના ધ્યાનપરાયણ સ્વભાવવાળા હોવાથી નિદ્રાએ રહિત સાધુઓ તો સ્નાન કરવા માટે ગયેલા શ્રીહરિને જાણીને જ શ્રીહરિની પાછળ જતા હતા. (૨) શ્રીહરિ ઉન્મત્તગંગામાં યથાશાસ્ત્ર નિત્ય સ્નાનાદિ કરી જનોના ભીડાના ભયથી તત્કાલ પોતાના નિવાસસ્થાનમાં આવ્યા. (૩) પોતાના ભવનમાં શ્વેત વસ્ત્રધારી શ્રીહરિ ઊનના આસન ઉપર બેસી પાંચ ઊર્ધ્વપુંડ્ર તિલકો કરી સંધ્યાવંદન કરતા હતા. (૪) પછી શ્રીહરિ ચોવીસ અક્ષરોવાળા ગાયત્રી મંત્રનો જપ કરી અગ્નિમાં હોમ કરતા હતા. શ્રી કૃષ્ણની પ્રતિમાનું ષોડશોપચારથી પૂજન કરી નિશ્ચલ ચિત્તે અષ્ટાક્ષર મંત્રનો જપ કરતા હતા (૫) પછી ઉત્તમ રાજા શ્રીહરિની સમીપમાં આવીને પ્રણામ કરી ચંદન, અક્ષત, પુષ્પો, નવીન વસ્ત્રો અને અલંકારોથી શ્રીહરિનું પૂજન કરતા હતા. (૬) 'શ્રીહરિ ઉન્મત્તગંગામાં સ્નાન કરીને તત્કાળ પધાર્યા છે' એમ જાણીને વિસ્મય પામેલા ઉત્તમ રાજા



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

विस्मितमानसः । धन्याष्टकेन तुष्टाव निजस्वामिनमादरात् ॥७॥ पदपङ्कजे रुचिरचङ्क्रमणे त्वं चलयन्प्रभो ! व्रजसि यर्हि च तर्हि । मुनिमण्डलं धृतकमण्डलुकन्थं ह्यभितोऽनुधावति समीक्ष्य भवन्तम् ॥८॥ तव गाङ्गवारिणि हरे ! स्नपनार्थं गमनं त्वशेषतनुभृत्सुखहेतोः । भवतीति यास्युषसि पश्यजनेभ्यो भुवि धन्यताप्रदमिदं हि वपुस्ते ॥९॥ सदयत्वदीक्षणहतात्मतमस्कास्त्वयि भावतो मधुमिषस्त्रवदस्त्राः । तरवोऽप्युपात्तफलपुष्पविनम्रा ऋषयस्त्वदर्चनपरा इव धन्याः ॥१०॥ बहवः खगा अपि समीक्ष्य भवन्तं ह्यकृतात्मजातिरवणाः श्रितमौनाः । अवलम्बितद्रुमभुजाः स्थिरगात्रा भवदङ्गचिन्तनसुखा ननु धन्याः ॥११॥ हरिणादयो वनभवाः पशवोऽपि त्वदुदीक्षणैकमनसोऽस्मृतदेहाः । न चलन्ति तर्हि मुनयः स्थितिगा वा सुखिनस्त्वयाऽचलदृशो भुवि धन्याः ॥१२॥ पथि वीक्ष्य भिल्लवनिता वनचर्यं सहसा विसृष्टगृहदैहिककृत्याः। कृतधावना भुवि निपत्य नमन्त्यो दधतीह धन्यतरतां हि भवन्तम् ॥१३॥ निजनीरमागतमवेक्ष्य भवन्तं भृतभूरिभक्तिरसविद्रवदङ्गा । स्वतरङ्गभङ्गिचपला किल धन्या विवशा भवत्यतिसुखेन च गङ्गा ॥१४॥

गतिलाघवं स्वकमुदस्य मरालास्त्वदुदारचङ्क्रमणचिन्तनसक्ताः । बहिरन्तराप्तभवदीक्षणधन्या यतयो महान्त इव सन्ति विमुक्ताः ॥१५॥ स्नपनं विधाय मुनिभिश्च सलीलं धृतशुक्लवाससमहं निजगेहे । स्थितमब्जपत्रनयनं स्मितवक्त्रं दधदस्मि धन्य उरसीह भवन्तम् ॥१६॥ स्तुवत्येवं नरपतौ जनाः श्रीपुरवासिनः । तत्राययुर्ये पूर्वेद्युर्नापुस्तत्पूजनक्षणम् ॥१७॥ निवेदिता

ધન્યાષ્ટકથી પોતાના સ્વામી શ્રીહરિની આદરપૂર્વક સ્તુતિ કરવા લાગ્યા. (૭)

હે પ્રભો ! તમો જ્યારે અતિ સુંદર, અતિ શીઘ્ર ગમન જેમનું છે એવાં બન્ને ચરણકમળોને મૂકતા સતા ચાલો છો ત્યારે તમોને જોઈને ધારણ કર્યાં છે કમંડલો અને ગોદડીઓ જેણે એવું મુનિમંડળ તમારી ચોતરફ પાછળ દોડે છે. (૮) હે હરે ! ઉન્મત્તગંગાના સ્વચ્છ જળમાં સ્નાન કરવા માટે તમારુ ગમન તો સમગ્ર દેહધારીઓને દર્શનજન્ય સુખ માટે છે તે હેતુથી પ્રાતઃસમયે સ્નાન માટે જાઓ છો કારણ કે તમારું આ શરીર પૃથ્વીમાં જોનારાં જનોને ધન્યતા આપનારું છે. (૯) હે હરે ! દયા સહિત તમારું જોવું તેનાથી નાશ પામ્યો છે આત્મસ્થિત અંધકાર જેમનો એવા, માટે જ તમારા વિશે થયેલા પ્રેમથી મધુધારાના નિમિત્તથી અશ્રુઓવાળાં વૃક્ષો પણ ગ્રહણ કરેલાં ફળ અને પુષ્પોથી નમતા છતાં તમારી પૂજામાં તત્પર ઋષિઓની જેમ ધન્યપણાને પામે છે. (૧૦) અનેક પક્ષીઓ પણ ઉન્મત્તગંગામાં જતાં તમોને જોઈને નથી ઉચ્ચારણ કર્યા પોતાની જાતિના શબ્દો જેમણે એવાં મૌન વ્રતવાળા, આશ્રય કરેલી છે વૃક્ષોની ડાળીઓ જેમણે એવા નિશ્ચલ શરીરવાળા તમારી મૂર્તિના ચિંતવનથી પરમાનંદની પ્રાપ્તિવાળાં કૃતાર્થ થયેલાં છે જ. (૧૧) હે હરે ! આપ જ્યારે સ્નાન કરવા પધારો છો ત્યારે વનના મૃગ વગેરે પશુ-જાતિઓ પણ ઊંચી ડોક કરી તમારા દર્શનમાં જ કેવળ એક મનવાળા, માટે જ દેહના ભાને રહિત થઈને સમાધિનિષ્ઠ મુનિઓની માફક તમારા દર્શનથી સુખી થયેલાં, સ્થિર નેત્રવાળા સતા ત્યાંથી ચાલતા નથી માટે પૃથ્વીમાં ધન્ય છે. (૧૨) વનમાં વિચરણના સ્વભાવવાળી ભીલડીઓ માર્ગમાં તમોને જોઈને તત્કાલ જ ત્યાગ કર્યાં છે ગૃહનાં કાર્યો અને દેહ સંબંધી કાર્યો જેમણે એવી દોડતી સતી પૃથ્વીમાં પડીને નમસ્કાર કરતી સતી આ લોકમાં કૃતાર્થ થતી હતી. (૧૩) પોતાના કિનારા ઉપર આવેલા શ્રીહરિને જોઈને પુષ્ટતાને પામેલી ઉન્મત્તગંગા પણ ઘણા ભક્તિરસથી દ્રવતા અંગવાળી માટે જ પોતાના તરંગોની પંક્તિઓથી ચંચળ થયેલી સતી અતિ સુખથી અસ્વાધીન ચિત્તવાળી થાય છે માટે ધન્ય (કૃતાર્થ) છે. (૧૪)

ઉન્મત્ત ગંગાના તટમાં રહેલા હંસો આપની ઉદાર ગતિની ચાતુર્યતાને જોઈને પોતાના ગતિચાતુર્યનો વિસ્મરણપૂર્વક ત્યાગ કરી તમારી ઉતાવળી છતાં લાઘવયુક્ત પદન્યાસવાળી ચાલના ચિંતનમાં એકાગ્ર મનથી ધ્યાનમાં આસક્ત થકા મુક્ત ભાવને પામેલા મહા પરમહંસોની માફક બહાર અને અંતરાત્મામાં પ્રાપ્ત થયેલાં તમારાં દર્શનથી ધન્ય છે; અર્થાત્ કૃતાર્થ છે. (૧૫) સાધુઓની સાથે જળક્રીડા યુક્ત સ્નાન કરીને ધોળાં વસ્ત્રો ધારણ કરી મારા ગૃહમાં રહેલા, કમળના પત્ર સમાન નેત્રવાળા, મંદ હાસ્ય યુક્ત મુખારવિન્દવાળા તમોને પોતાના હૃદયકમળમાં ચિંતવન કરતો હું આ લોકમાં કૃતાર્થ થયેલો છું. (૧૬)

હે રાજન્ ! આ પ્રકારે ઉત્તમ રાજાએ સ્તુતિ કરી ત્યારે શ્રીપુરના નિવાસી હેમંતરામ વગેરે હરિભક્તો-દિવાળીને દિવસે શ્રીહરિનું પૂજન પ્રાપ્ત થયું ન હતું તે ભક્તજનો શ્રીહરિના નિવાસસ્થાને બહારના દ્વાર પાસે આવ્યા. (૧૭) કરીમ

भगवते प्रतीहारेण ते जनाः । तदाज्ञयैत्य तत्राशु तं प्रणम्यार्चयन्प्रभुम् ॥१८॥ नीशारैर्मृदुभिः शोणैः स्वर्णबिन्दुविचित्रितैः । सूक्ष्मैरनर्घ्यैररुणैर्दीर्घैरपि शिरःपटैः ॥१९॥ प्रावारैः कटिबन्धैश्च कटकाद्यैर्विभूषणैः । चन्दनेनाक्षतैः पौष्पैर्हारैर्नीराजनादिभिः ॥२०॥ सम्पूज्य तं तदग्रे च पीतसाराणि शर्कराः । फलादीनि निधायाथ जग्मुस्तस्याज्ञयैव ते ॥२१॥ ततो नारायणमुनिः शोणाम्बरधरः प्रभुः । बहिर्वेदीमुपेत्य स्वे निषसादासने शुभे ॥२२॥ जनाश्च मुनयः सर्वे पूर्ववत्तत्र सङ्घशः । समागत्य निषेदुस्ते स्वस्वमर्यादयाखिलाः ॥२३॥ पार्षदा अपि सेवायां तस्यावर्तन्त पूर्ववत् । वाद्यान्यवादयंस्तज्ज्ञा गायकाश्च जगुस्तदा ॥२४॥ स्थितं दीनानाथभट्टं विप्रं तत्रावलोक्य सः । तस्मै प्रसन्नो वासांसि स्वकीयानि ददौ तदा ॥२५॥ स्वाङ्गान्नीशारमुत्तार्य तथैव कटिबन्धनम् । प्रावारं स्वमनर्घ्यं च ददौ शीर्षपटं तथा ॥२६॥ धारया रौप्यमुद्राणां पूरयामास चाञ्जली । तस्य चानुग्रहं चक्रे भगवान् योगिवाञ्छितम् ॥२७॥ गाङ्गेयप्रमुखास्तावन्मल्लाः स्वस्मिन्निजप्रभोः । दृष्टिपातार्थमाचेरुर्बाह्वास्फोटनमात्मनः ॥२८॥ स्वामी नारायणो दृष्ट्वा तान्भक्तान् कूर्दनोत्सुकान् । रन्तुमाज्ञापयामास तत्प्रीत्यै करसंज्ञया ॥२९॥ दृढं निबद्धकच्छास्ते तदैवोत्प्लवनादिभिः । हासयामासुरखिलान्कर्मभिः सहरीञ्जनान् ॥३०॥ उत्थापने चोन्नयने चालने स्थापने तथा । आकर्षणे शृङ्खलने प्लवने ताडनादिषु ॥३१॥ तेषां चातुर्यमालोक्य तान्प्रशंसन्हसन्प्रभुः। प्रसन्नो दापयामास तेभ्यो वस्त्राणि भूरिशः ॥३२॥ युक्तिवाक्येषु निपुणस्तथावसरवित्तदा । ब्रह्मानन्दो महाबुद्धिः स्मयमानोऽवदत्प्रभुम् ॥३३॥ आज्ञा ते ह्यस्तनास्माभिः सद्भिः पाल्या न वा प्रभो ! । विनात्र त्यागिनोऽन्येषां

---

નામના દ્વારપાળે શ્રીહરિને નિવેદન કરાયેલા, શ્રીનગરના હરિભક્તો શ્રીહરિની આજ્ઞાથી શ્રીહરિની સમીપે તત્કાલ આવીને શ્રીહરિને પ્રણામ કરી પૂજા કરતા હતા. (૧૮) સુવર્ણના તંતુઓથી ગૂંથાયેલા વિચિત્ર બુટ્ટાદાર લાલ વર્ણવાળા કોમળ જામાઓ તથા સૂક્ષ્મ તંતુઓથી રચેલા મહામૂલ્યવાળા લાલ, લાંબા ફેંટાઓથી, કડાં, સાંકળાં, વગેરે આભૂષણોથી અને ચંદન, અક્ષત, પુષ્પોના હારો અને મહાનીરાજનથી તે જનો શ્રીહરિને પૂજીને શ્રીહરિની આગળ પતાસાં, સાકર, ફલાદિ ભેટો અર્પણ કરી પછી શ્રીહરિની આજ્ઞાથી જતા હતા. (૧૯-૨૦-૨૧) પછી લાલ વસ્ત્રધારી પ્રભુ નારાયણ મુનિ બહાર વેદી ઉપર આવીને પોતાના શુભ સિંહાસન ઉપર બેઠા. (૨૨) સર્વ હરિભક્તજનો, સર્વ સાધુઓ સમુદાયથી સભામાં આવીને સમગ્ર તે હરિભક્તો પોતપોતાની મર્યાદાથી પૂર્વની માફક બેસતા હતા. (૨૩) સોમાદિ પોતાની સેવા કરનારા પાર્ષદો પણ શ્રીહરિનું છત્ર ધારણ કરી ચામર-વીંઝણા વગેરેની સેવામાં વર્તતા હતા. તે સમયે વાજિંત્ર વગાડવામાં નિપુણ ભક્તો સતાર વગેરે વાજિંત્રો લઈને વગાડતા હતા; ગાયન કરનારા ગાન કરતા હતા. (૨૪) શ્રીહરિએ સભામાં બેઠેલા દીનાનાથ ભટ્ટને જોઈને પ્રસન્ન થઈ વિપ્રને તે સમયે પોતાનાં વસ્ત્રો આપ્યાં. (૨૫) શ્રીહરિએ પોતાના અંગથી જામો તથા કેડ્યે બાંધેલો રેંટો, પોતાનું બહુ મૂલ્યવાળું ઓઢવાનું વસ્ત્ર, અને માથાનો ફેંટો ઉતારીને બ્રાહ્મણને આપ્યો. (૨૬) શ્રીહરિએ રૂપિયાની ધારેથી બન્ને હાથની અંજલિ પૂર્ણ કરી તે બ્રાહ્મણ દીનાનાથ ભટ્ટને યોગીએ ઈચ્છિત અનુગ્રહ કર્યો. (૨૭) તે સમયમાં ગંગારામ વગેરે મલ્લો પોતાના ઉપર પોતાના ઈષ્ટદેવની દૃષ્ટિ પડે તે માટે પોતાના બાહુનું તાડન કરતા હતા. (૨૮) ભગવાનશ્રી સ્વામિનારાયણ, કૂદવામાં ઉત્સાહવાળા તે ભક્તોને જોઈને તેમની પ્રસન્નતા માટે પોતાના હાથની ચેષ્ટાથી રમવા માટે આજ્ઞા આપતા હતા. (૨૯) તે સમયે દઢ જેમણે કચ્છ બાંધ્યો છે એવા તે મલ્લો કૂદવા વગેરેની તે તે ચેષ્ટાઓથી શ્રીહરિ સહિત સમગ્ર જનોને હસાવતા હતા. (૩૦) પગ અને ઢીંચણ પિંડીકરણ કરી પડેલા મલ્લને ઉઠાડવો, બન્ને હાથથી ઊચકી લઈ જવો, કંઠ વગેરેમાં ચોંટેલા મલ્લને ઉખેડી નાખવો, હાથપગથી વીંટાયેલા પોતાના દેહને ખેંચી કાઢવો, સામા મલ્લના હાથપગ વગેરેને બાંધવા, પોતાને રોકનાર મલ્લોને કળાથી કૂદી પડવું, સામેના મલ્લે કરેલા પોતાના રક્ષણના ઉપાયોને ઠગીને મર્મસ્થલમાં પ્રહાર કરવા વગેરેમાં તે મલ્લોનું કૌશલ્ય જોઈને તે મલ્લોની પ્રશંસા કરતા શ્રીહરિ પ્રસન્ન થઈને તે મલ્લોને ઘણાં વસ્ત્રો અપાવતા હતા. (૩૧-૩૨) તે સમયે યુક્તિવાક્યોમાં પ્રવીણ, અવસર જાણનાર મહાબુદ્ધિશાળી બ્રહ્માનંદ મુનિ હસતા સતા શ્રીહરિને કહેવા લાગ્યા : (૩૩) હે પ્રભો ! અમો સાધુઓએ તમારી આજ્ઞા



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**फलिता हि मनोरथाः ॥३४॥ इत्युक्तस्तेन भगवान्सतः सर्वानुवाच तान्। यूयमप्यर्चनं मेऽद्य कुरुथैकैकशो द्रुतम् ॥३५॥ इत्युक्तास्त्यागिनस्तेन घृष्टगन्धादिपाणयः । उत्तस्थुः पूजनं कर्तुं हरेः सर्वे नराधिप ! ॥३६॥ मुकुन्दानन्दाद्या झटिति भगवत्पार्षदवरास्तथा मुक्तानन्दप्रवरमुनयो हर्षनिभृताः । समागत्याभ्याशं बहुतरदयात्यार्द्रसुदृशः प्रभोश्चक्रुस्तस्यार्चनममलसद्वासनहृदः ॥३७॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे अन्नकूटोत्सवे उत्तमसंस्तुतभगवतो बहिर्वेद्युपवेशननामा षोडशोऽध्यायः ॥१६॥

सुव्रत उवाच-**चन्दनेनाक्षतैः पुष्पैः पूजनं तुलसीदलैः। कुर्वन्तस्ते हरेर्भक्त्या तुष्टुवुस्तं पृथक् पृथक् ॥१॥** मुकुन्दानन्द उवाच-**मत्स्यं कूर्मं वराहं कपिलमथ हरिं वासुदेवं च वैन्यं दत्तात्रेयं च हंसं नरहरिमृषभं वामनं पर्शुरामम् । यज्ञं रामं कुमारं हयशिरसमथो नारदं राजराजं व्यासं कृष्णं च बुद्धं धृतपुरुवपुषं नौमि नारायणं त्वाम् ॥२॥**

मुक्तानन्द उवाच-**कौसुमशेखरराजिविराजितभाललसत्तिलके कलितारे । चारुसरोजदलायतचञ्चललोचनमोचितनारे । शोणपटेन कटिं च निबद्ध्य तदर्पितपाणियुगेऽङ्गदधारे । स्मेरमुखेऽस्तु मनोऽत्र विभो ! त्वयि भूरिसुगन्धिमनोहरहारे ॥३॥**

---

પાળવી કે ન પાળવી, કારણ કે આ ઉત્સવમાં સાધુ વિના બીજા તમારા ભક્તોના મનોરથો (પૂજનની અભિલાષા) સફલ થયા છે. (૩૪) હે રાજન્ ! આ પ્રકારે બ્રહ્માનંદ મુનિએ કહેવાયેલા શ્રીહરિએ તે સાધુઓ અને બ્રહ્મચારીઓને કહ્યું : તમો પણ આજે મારું પૂજન એક એક આવીને તત્કાળ કરો. (૩૫) હે રાજન્ ! આ પ્રમાણે શ્રીહરિએ કહેવાયેલા સર્વે ત્યાગીઓ અને વર્ણીઓ ઘસેલાં ચંદનો વગેરે હાથમાં જેમને છે એવા સતા પૂજન કરવા ઊભા થયા. (૩૬)

કામાદિ દોષે રહિત માટે જ સદ્વાસના યુક્ત મનવાળા શ્રીહરિના સેવકોમાં શ્રેષ્ઠ મુકુંદાનંદ વર્ણી મુખ્ય જેમાં છે એવા વર્ણીઓ તથા મુક્તાનંદાદિ અને ગોપાળાનંદાદિ મુનિઓ હર્ષથી, આનંદપૂર્ણ હૃદયવાળા થઈને ભીનાં બન્ને નેત્રો રૂપી કમળોવાળા શ્રીહરિની સમીપમાં તત્કાળ આવીને પૂજા કરવા લાગ્યા. (૩૭)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે અન્નકૂટોત્સવે ઉત્તમ સંસ્તુતભગવતો બહિર્વેદ્યુપવેશન નામા ષોડશોઽધ્યાયઃ (૧૬)*

## અધ્યાય : ૧૭

### સર્વ સાધુસમુદાયોએ વિવિધ પ્રકારના પ્રેમયુક્ત-શ્રીહરિની સ્તુતિ અને પૂજન કર્યું તેનું નિરૂપણ છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! તે વર્ણીઓ અને સાધુઓ ચંદન, અક્ષત, પુષ્પો અને તુલસીની મંજરીઓથી શ્રીહરિનું પૂજન કરતા સતા ગાઢ સ્નેહથી શ્રીહરિની ભિન્ન ભિન્ન સ્તુતિ કરતા હતા. (૧) તેમાં પ્રથમ **મુકુંદાનંદ વર્ણી સ્તુતિ કરે છે** : હે પ્રભો ! મત્સ્ય, કૂર્મ, વરાહ, કપિલ, હરિ, વાસુદેવ, વૈન્ય (પૃથુરાજા), દત્તાત્રેય, હંસ, નૃસિંહ, ઋષભ, વામન, પરશુરામ, યજ્ઞ, રામ, કુમાર, (સનકાદિ) હયગ્રીવ, નારદ, રાજરાજ, વ્યાસ, શ્રીકૃષ્ણ અને પાંખડી અસુરોને મોહ પમાડવા માટે બુદ્ધાવતાર વગેરે ઘણા અવતારો ધારણ કરીને પૃથ્વીનાં ઉદ્ધારાદિ કાર્યો તેમજ ભક્તોનાં કાર્યો કરનારા પ્રત્યક્ષ શ્રીહરિકૃષ્ણ તમોને હું નમસ્કાર કરું છું. (૨)

**મુક્તાનંદ મુનિ સ્તુતિ કરે છે** : હે વ્યાપક !સર્વના અંતર્યામી, નાના પ્રકારનાં પુષ્પોથી કરેલા તોરાઓની પંક્તિઓથી શોભાયમાન, ભાલમાં કેસરયુક્ત ઊર્ધ્વપુંડ્ર તિલકવાળા, અધર્મસર્ગથી તારનારા, સુંદર કમળના પત્ર સમાન દીર્ઘ અને ચંચલ નેત્રોથી કૃપાપૂર્વક જોવાથી સંસારથી મુક્ત કર્યો છે જીવોનો સમુદાય જેમણે એવા, લાલ પટકાથી કેડ્ય બાંધીને કેડ્યમાં અર્પણ કર્યા છે બન્ને હાથ જેમણે એવા રત્ન જડિત બાજુબંધને ધારણ કરનારા, મંદ હાસ્યયુક્ત મુખારવિંદવાળા, ઘણા સુગંધીમાન મનોહર પુષ્પના હારો જેમને છે એવા તમારે વિશે મારું મન સદા રહો. (૩) **ગોપાળાનંદ મુનિ સ્તુતિ**



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

गोपालानन्द उवाच-**जय श्रीमद्भास्वच्चयरुचिबृहद्धामनिलय ! प्रभो ! कारुण्याब्धे ! जनसुखविधानात्तनृतनो ! जय स्वामिन्नारायण ! निजजनानन्दद ! सदा दृगग्रे रूपं तेऽप्रतिम ! यदीदं ह्येव वसताम् ॥४॥** ब्रह्मानन्द उवाच-**त्वदीयं मनोहारि रूपं मदीयं मनो मा जहातु क्षणं ह्येतदेव । अनादृत्य लोकं लसच्छेखराले ! वृतस्त्वं मया मस्तकेनासि बाढम् ॥५॥** आनन्दानन्द उवाच-**निखिलभक्तजनैरभितोऽर्चितं विविधनूतनवस्त्रमनोहरम् । रुचिररत्नविभूषणभूषितं हृदि भवन्तमहं निदधे सदा ॥६॥** नित्यानन्द उवाच-**किसलयमृदुले पदाम्बुजे ते निजजनहृत्तिमिरापहारशीले । विलसदशनिनीरजोर्ध्वरेखे नयनयुगं मम षट्पदत्वमेतु ॥७॥** महानुभावानन्द उवाच-**केवलं ते कथामेव यः श्रोत्रगां मानवः कोऽपि कुर्यान्न सोऽपि भ्रमेत् । संसृतौ तर्हि साक्षाद्भवन्तं दृशा पश्यतः सा कुतस्तं भजे त्वां सदा ॥८॥** शुकानन्द उवाच-**नित्यं योऽक्षरधाम्नि दिव्यमहसि स्वे प्राकृताख्यात्परे गाढात्सन्तमसात्प्रभोऽक्षरपरः श्रीवासुदेवः स्वयम् । मुक्तैर्दिव्यवपुर्भिराश्रितपदोऽसङ्ख्यैश्च तेजोमयैरास्ते स त्वमिहासि दिव्यनृतनुर्नारायणाख्यो मुनिः ॥९॥ स्वज्ञानप्रथनं च भक्तनयनानन्दं च धर्मावनं कर्तुं ह्यात्तनराकृतौ करुणया स्वीयान्तरारिक्षिति। प्रादुर्भावितदिव्यवैभव इह त्वय्येव तस्मिन्मनो लीनं मेऽस्तु सदा सिताम्बरधरे श्वेतप्रसूनस्त्रजि ॥१०॥** स्वयंप्रकाशानन्द उवाच-**जाग्रत्स्वप्नसुषुप्तिसाक्षिणि परे मायादिशक्तीश्वरे वैराजस्य हिरण्यगर्भपुरुषस्यापीश्वरस्येश्वरे । आत्मीयाक्षरधामनित्यविलसत्क्रीडे मनुष्याकृतौ तस्मिञ्छ्रीपुरुषोत्तमे भगवति त्वय्यस्तु मे मानसम् ॥११॥** आत्मानन्द

**કરે છે :** અનેક સૂર્યોના સમુદાયોની માફક કાંતિવાળા, બ્રહ્મપુર નામના સ્થાનમાં રહેલા હે અનંત ઐશ્વર્યના સ્વામી, હે કરુણાસાગર ! માટે જ એકાંતિક ભક્તોના સુખ માટે ધારણ કરી છે મનુષ્યઆકૃતિ જેમણે એવા, પોતાના ભક્તજનોને આનંદ આપનારા, હે સ્વામિન્ ! હે નારાયણ, હે અનુપમ, તમો સર્વોત્કર્ષ પણે વર્તો, તમારી આ મનોહર મૂર્તિ મારી દષ્ટિ આગળ નિરંતર જ નિવાસ કરો. (૪) **બ્રહ્માનંદ મુનિ સ્તુતિ કરે છે :** શોભાયમાન મસ્તકમાં તોરાઓની પંક્તિવાળા હે પ્રભો ! મારું મન તમારા આ સમગ્ર લાવણ્યના સમુદ્રરૂપ,મારાં નેત્રોની આગળ જણાતાં મનોહર દિવ્ય સ્વરૂપને ક્ષણ વાર પણ ત્યાગ ન કરો. લોકનો અનાદર કરી હું તમોને વરેલો છું. મારા મસ્તકથી પણ અત્યંત વરેલો છું. તમારા વિના બીજાને નહિ વરું. (૫) **આનંદાનંદ મુનિ સ્તુતિ કરે છે :** હે ભગવન્ ! સમગ્ર ભક્તજનોએ સર્વાંગમાં સુગંધી ચંદનથી પૂજાયેલા, નાના પ્રકારનાં નવીન વસ્ત્રો ધારણ કરવાથી મનોહર, સુંદર રત્નોનાં વિભૂષણોથી સમલંકૃત તમારું હું મારા હૃદયમાં હંમેશા ચિંતવન કરું છું. (૬) **નિત્યાનંદ મુનિ સ્તુતિ કરે છે :** પલ્લવના સમાન કોમળ, પોતાનાં જનોના હૃદયમાં રહેલા અંધકારને નાશ કરવાના સ્વભાવવાળા, શોભાયમાન; વજ્ર, કમળ, ઊર્ધ્વરેખાવાળાં તમારાં બંને ચરણકમળોમાં મારાં બંને નેત્રો ભ્રમરભાવને પામો. (૭) **મહાનુભાવાનંદ મુનિ સ્તુતિ કરે છે :** હે હરે ! જે કોઈ મનુષ્ય તમારી કથાને જ શ્રવણ કરે તે મનુષ્ય પણ જન્મમરણરૂપ સંસારમાં ભમતો નથી તો પ્રત્યક્ષ તમોને નેત્રોથી જોનારને સંસાર હોય જ ક્યાંથી ? ના જ હોય. આવા મહિમાવાળા તમોને હું સદા ભજું છું. (૮) **શુકાનંદ મુનિ સ્તુતિ કરે છે :** હે પ્રભો! અલૌકિક તેજવાળા, માયિક નામવાળા ગાઢાંધકારથી પર પોતાના અક્ષરધામમાં સ્વરૂપ, સ્વભાવ તથા ઐશ્વર્યાદિથી અક્ષરબ્રહ્મથી પર જે સ્વયં શ્રીવાસુદેવ, દિવ્ય શરીરવાળા અતિશય તેજોમય અસંખ્ય મુક્તોએ સેવ્યાં છે ચરણકમળ જેમનાં એવા હંમેશા વિરાજે છે; તે તમો આ લોકમાં દિવ્ય મનુષ્યશરીર જેમણે ધારણ કર્યું છે એવા શ્રીનારાયણ મુનિના નામથી પ્રસિદ્ધ છો. (૯) પોતાના અક્ષરાદિથી પર પુરુષોત્તમના જ્ઞાનની પ્રસિદ્ધિ અને પોતાનાં એકાંતિક ભક્તોને આનંદ આપવા અને એકાંતિક ધર્મનું રક્ષણ કરવા માટે કરુણા કરી ધારણ કરી છે મનુષ્ય આકૃતિ જેમણે એવા, પોતાના ભક્તોનાં માન-ઈર્ષ્યાદિ અંતઃશત્રુઓને વિનાશ કરનારા, સમાધિમાં પ્રગટ કર્યો છે દિવ્ય વૈભવ જેમણે એવા, શ્વેત વસ્ત્રોને ધારણ કરનારા, શ્વેત પુષ્પોના હારોવાળા એવા તમારે વિશે જ મારું મન સર્વ કાળે નિમગ્ન રહો. (૧૦)

**સ્વયં પ્રકાશાનંદ મુનિ સ્તુતિ કરે છે :** હે સ્વામિન્! જાગૃત, સ્વપ્ન અને સુષુપ્તિના સાક્ષી માટે જ તેથી જુદા, માયા વગેરે શક્તિઓના નિયંતા, વિરાટ દેહના અભિમાની-જગતની સ્થિતિકર્તા વૈશ્વાનર, જગતની ઉત્પત્તિ કરનાર હિરણ્યગર્ભ પુરુષ, તથા જગતનો પ્રલય કરનાર ઈશ્વરના પણ નિયંતા, પોતાના અક્ષરધામમાં હંમેશાં શોભાયમાન લીલાવાળા, કૃપાથી ધારણ કર્યો છે મનુષ્યાકાર જેમણે એવા શ્રી પુરુષોત્તમ ભગવાન સર્વ કારણ તમારે વિશે મારું મન સર્વદા રહો. (૧૧) **આત્માનંદમુનિ** સ્તુતિ કરે છે : પૃથ્વીમાં મૂઢ (અભણ) માણસ પણ તમારો આશ્રિત પુરુષ હોય તો



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

उवाच-**कृपया परयैव सद्यो भुवि मूढोऽपि जनो बुधैर्न जेयः । भवतीत्यखिलागमैकहेतुं भुवि नारायणमीश्वरं भजे त्वाम् ॥१२॥** चैतन्यानन्द उवाच-**निदधे हृदये हृदयेश ! वपुस्तव देशिकदेशिक ! हंसवृतम् । मम मा मतिरन्यपदं विपदं भजतां रमतामिह नाथ ! सदा ॥१३॥** भजनानन्द उवाच-**सुखयितुमलं लोकं शोकार्णवे बहुधाऽर्दितं परमकृपया दध्रे यो वै नराकृतिमिच्छया । तमहमखिलब्रह्माण्डानां भवाभवकारणं स्वहृदि विदधे त्वामात्मानं हरे ! सकलात्मनाम् ॥१४॥** परमचैतन्यानन्द उवाच-**अशेषदुःखभञ्जनं निजान्तरङ्गमञ्जनम् । विशालनेत्रखञ्जनं नमामि भक्तरञ्जनम् ॥१५॥** परमानन्द उवाच-**संस्तूयमानमभिपूज्य महर्षिमुक्तैरेकान्तधर्मनिरतैर्गतकालभीकैः । स्वातन्त्र्यतो धृतनराकृतिनाटनं त्वां नारायणं नरसखं प्रणतोऽस्मि नित्यम् ॥१६॥** कृष्णानन्द उवाच-**अव्याकृताभिमतिरीश्वर आदरात्त्वां सङ्कर्षणं ह्यथ विराडभिमान्युपास्ते । प्रद्युम्नमच्युत उताब्जभवोऽनिरुद्धं सूत्रात्ममान्यखिलनाथ ! नमामि तुभ्यम् ॥१७॥** भगवदानन्द उवाच - **मनोभवशरातुरैर्गुरुभिरक्षपोषाकुलैर्विचित्रतिलकादिभिर्ज्ञपितविष्णुभक्तव्रतैः । अदृष्टतरवर्त्मने नमदकिञ्चनस्वामिने गवेषितमुमुक्षवे प्रणतपाल ! तुभ्यं नमः ॥१८॥**

शिवानन्द उवाच-**नारायण ! तव चरणं शरणं मम कामपूरणं पुंसाम् । तारणकारणकरुणाभरणं शरणागतत्राणम् ॥१९॥** वासुदेवानन्द उवाच-**सकलमुनिजनेशं धर्ममोक्षाब्धिभेशं मखसुखितसुरेशं नाथ ! मज्जीवितेशम् । अनुदितमदलेशं**

---

તેને તમારી સર્વોત્તમ કરુણાથી જ તત્કાલ જ પંડિતો પણ જીતવા માટે શક્તિમાન થતા નથી. માટે સમગ્ર શાસ્ત્રોની ઉત્પત્તિના કારણરૂપ પરમેશ્વર પૃથ્વીમાં નારાયણમુનિના નામથી પ્રસિદ્ધ એવા તમોને ભજું છું. (૧૨) **ચૈતન્યાનંદ મુનિ** સ્તુતિ કરે છે : હે પ્રાણપતે, હે ગુરુઓના પણ ગુરુ ! હે નાથ, પરમહંસોથી વીંટાયેલા તમારા શરીરનું મારા મનમાં ચિંતવન કરું છું. મારી બુદ્ધિ તમારા વિના બીજી કોઈપણ વિપત્તિરૂપ એવી માયિક વસ્તુમાં આસક્ત થાઓ નહિ. આ તમારા સ્વરૂપમાં હંમેશા રમો. (૧૩) **ભજનાનંદ મુનિ** સ્તુતિ કરે છે : હે હરે ! જે તમો શોક-સાગરમાં ઘણા પ્રકારે પીડા પામેલા જનસમૂહને અત્યંત સુખ આપવા માટે પરમ કૃપાથી પોતાના સંકલ્પથી મનુષ્ય સમાન આકાર ધારણ કરો છો. સમગ્ર બ્રહ્માંડોની ઉત્પત્તિ, સ્થિતિ, અને વિનાશના કારણ તથા સમગ્ર જીવોના અંતર્યામી એવા તમારું હું મારા હૃદયમાં સતત ચિંતવન કરું છું. (૧૪) **પરમ ચૈતન્યાનંદ મુનિ** સ્તુતિ કરે છે : સમગ્ર દુઃખોને નાશ કરનારા, જ્ઞાનોપદેશથી પોતાના ભક્તજનોના અંતઃકરણની શુદ્ધિ કરનારા; કમળના પત્ર સમાન વિશાળ બંને નેત્રો, ખંજન પક્ષીઓની માફક ચંચળ જેને છે એવા, પોતાના ભક્તોને રંજન કરનારા તમોને હું નમસ્કાર કરું છું. (૧૫) **પરમાનંદમુનિ** સ્તુતિ કરે છે : એકાંતિક ધર્મમાં અખંડ પ્રીતિવાળા, નિવૃત્ત થયો છે કાળનો ભય જેમને એવા મુક્તાનંદાદિ મહામુનિરૂપ મુક્ત પુરુષોએ ચંદનાદિથી સમર્ચન કરી સ્તુતિ કરાયેલા પોતાની ઈચ્છાથી ધારણ કર્યું છે મનુષ્યાનુકરણ જેમણે એવા, નરના મિત્ર શ્રીનારાયણ મુનિ તમોને હું હંમેશા નમસ્કાર કરું છું. (૧૬) **કૃષ્ણાનંદમુનિ** સ્તુતિ કરે છે : હે પ્રભો ! અવ્યાકૃત શરીરના અભિમાની ઈશ્વર-શિવજી, સંકર્ષણરૂપ તમોને સેવે છે. વિરાટાભિમાની વૈશ્વાનર નામના વિષ્ણુ પ્રદ્યુમ્નરૂપ તમારી ઉપાસના કરે છે. સૂત્રાત્મા શરીરના અભિમાની હિરણ્યગર્ભાખ્ય બ્રહ્મા, અનિરુદ્ધરૂપ તમારી ઉપાસના કરે છે. હે અખિલ ઈશ્વરોના સ્વામી ! આવા મહિમાવાળા તમોને હું નમસ્કાર કરું છું. (૧૭) **ભગવદાનંદ મુનિ** સ્તુતિ કરે છે : હે પ્રણામ કરનારાંઓનું રક્ષણ કરનારા ! કામદેવનાં બાણોથી પીડાવાળા, સર્વદા ઈન્દ્રિયોનું પોષણ કરવામાં આસક્ત, નાના પ્રકારનાં તિલકો, માળાઓ વગરેને ધારણ કરવાથી જનોને વિષ્ણુના ભક્તો છે એમ જણાતા, મિથ્યા ગુરુભાવનું નાટક કરતા અસુર ગુરુઓએ નહિ જોયેલા માર્ગવાળા, વારંવાર નમસ્કાર કરતા અકિંચન સાંસારિક પદાર્થ માત્રની વાસના રહિત સાધુઓના સ્વામી; શોધ્યા છે મુમુક્ષુઓ જેમણે એવા તમો શ્રીહરિને વારંવાર નમસ્કાર થાઓ. (૧૮)

**શિવાનંદ મુનિ** સ્તુતિ કરે છે : હે નારાયણ મુનિ ! પોતાનાં ભક્તજનોની સમગ્ર ઈચ્છાઓને પૂર્ણ કરનારા, પોતાના ભક્તોને સંસારસાગરથી તારવામાં કારણભૂત દયારૂપી આભૂષણવાળા શરણાગતોની રક્ષા જેણે કરી છે એવાં તમારાં ચરણારવિન્દ મારા પરમ આશ્રયરૂપ થાઓ. (૧૯) **વાસુદેવાનંદ** વર્ણી સ્તુતિ કરે છે : હે નાથ! સમગ્ર મુનિજનોના સ્વામી એકાંતિક ધર્મ અને તમારી સેવા રૂપ આત્યંતિક મુક્તિ રૂપી સમુદ્રને વૃદ્ધિ કરનાર ચંદ્રમા સમાન, વિષ્ણુયાગાદિ યજ્ઞોનાં આચરણોથી સુખી કર્યા છે દેવતાઓના ઈશ્વરો જેમણે એવા, મારા પ્રાણપતિ, નથી ઉત્પન્ન થયો અણુમાત્ર મદ જેમને એવા,

पावितानेकदेशं नटवरसमवेशं त्वां भजे मञ्जुकेशम् ॥२०॥ आत्मानन्दमुनिरुवाच-**अधर्महेतुभेदनं प्रकाशितात्मवेदनं सुरैः कृताभिवन्दनं निरीशमार्गनिन्दनम् । निजान्तरारितर्दनं नमामि मानमर्दनं ललाटपीतचन्दनं हरिप्रसादनन्दनम् ॥२१॥** कपिलेश्वरानन्द उवाच-**उद्दण्डहृद्गतरीपून्नैकवीरो जाड्यान्धकारपटलोद्धमने पटीयान् । स्वामिन्नघौघदलनो हि तव प्रतापस्तापांश्च पापनिकरान्हरतान्मदीयान् ॥२२॥** भूधरानन्द उवाच-**क्षोणीक्षेमकरः क्षमाजलनिधिः क्षुद्राध्वविध्वंसकः क्षोणीरक्षकलक्षसेवितपदः क्ष्मादेवरक्षाकरः । अक्षक्षोभविहीनवीक्षणसुधालक्षीकृतात्मप्रियः । क्षेमं नस्तनुतात्सदा क्षितितले श्रीवासुदेवो भवान् ॥२३॥** योगानन्द उवाच-**अष्टाङ्गयोगाभ्यसनं विनापि यस्य प्रसादात्सहसा जनानाम् । भवत्यवस्थात्रितयात्परत्वं समाधियोगस्तमहं भजे त्वाम् ॥२४॥** पूर्णानन्द उवाच-**विशदकुसुममालं पापतापौघकालं रुचिरतिलकभालं भक्तसङ्घैकपालम् । हृतनिजजनिजालं कालमायाकरालं सुखितपरमरालं त्वां भजे धर्मबालम् ॥२५॥** गुणातीतानन्द उवाच-**निजानन्दं मन्दस्मितमधुरचन्द्राभवदनं दयासिन्धुं शान्तं बहुविधविभूषाश्च दधतम् । अनर्घ्यैर्वासोभिर्नटवरसमानच्छविमहं समायातोऽस्मि त्वां शरणमिह नारायणमुने ! ॥२६॥**

प्रेमानन्दादयो मुनय ऊचुः- **जय श्रीमहाराज माराज ! सर्गादिकालस्वजाताब्जजातादिकात्मप्रजाजातजन्मादिदुःखापहृज्जन्म ! नैकेन्दुविद्योतदोर्जद्युतिध्वंसितात्मीयहार्दान्धकाराऽऽदिदेवाद्य ! विद्युत्प्रभाभासवासः ! सदानन्द ! गोविन्द !**

---

પવિત્ર કર્યાં છે અનેક દેશનાં નિવાસીજનો જેમણે એવા, ઉત્તમ નટના જેવા વેશવાળા, સુંદર કેશવાળા એવા તમોને હું ભજું છું. (૨૦) **વૃદ્ધ આત્માનંદ મુનિ** સ્તુતિ કરે છે : અધર્મના કારણભૂત કલિ વગેરેનો પોતાના પ્રતાપથી પરાભવ કરનારા, પ્રકાશિત કર્યું છે પોતાના સ્વરૂપનું જ્ઞાન જેમણે એવા, બ્રહ્માદિ દેવોએ જેમની સ્તુતિ કરી છે એવા, અંતઃશત્રુઓનો વિનાશ કરનારા, અભિમાનનો નાશ કરનારા, પોતાના ભક્તજનોએ લલાટમાં ચર્ચિત છે કેસર યુક્ત ચંદન જેમને એવા હરિપ્રસાદના પુત્ર તમોને હું નમસ્કાર કરું છું. (૨૧) **કપિલેશ્વરાનંદ મુનિ** સ્તુતિ કરે છે : હે સ્વામિન્ ! ઉદ્ધત એવા હૃદયમાં રહેલા લોભાદિ શત્રુઓને પરાભવ કરવામાં એકવીર, અજ્ઞાનરૂપી અંધકારના સમૂહોને નાશ કરવામાં અતિ ચતુર, પાપોના સમૂહોને નાશ કરનારો તમારો પ્રતાપ મારા ત્રિવિધ તાપો અને પાપના સમુદાયોને વિનાશ કરો. (૨૨) **ભૂધરાનંદ મુનિ** સ્તુતિ કરે છે : પૃથ્વીને સુખ કરનારા, ક્ષમાના સાગર, ક્ષુદ્ર એવા કૌલ-કુંડ-નાસ્તિકાદિ પાખંડ માર્ગનો વિનાશ કરનારા, લાખો રાજાઓએ જેમનાં ચરણકમળ સેવેલાં છે એવા, બ્રાહ્મણોનું રક્ષણ કરનારા, ઈન્દ્રિયોના ક્ષોભે રહિત માટે જ અમૃતને વર્ષનારી દૃષ્ટિથી જોયેલાં છે પોતાનાં પ્રિય ભક્તો જેમણે એવા, શ્રીવાસુદેવ તમો ભૂતલમાં અમારા કલ્યાણને સર્વદા વિસ્તારો. (૨૩) **યોગાનંદ મુનિ** સ્તુતિ કરે છે : અષ્ટાંગ યોગના અભ્યાસ વિના પણ જે તમારી પ્રસન્નતાથી તત્કાલ જ જનોને ત્રણ અવસ્થાથી પર સાક્ષીપણે વર્તતો સમાધિયોગ અને ગોલોકાદિ તે તે ધામના અધિપતિપણે તમારી મૂર્તિનો યોગ થાય છે એવા તમોને હું ભજું છું. (૨૪) **પૂર્ણાનંદ મુનિ** સ્તુતિ કરે છે : મોગરા વગેરે ધવલ પુષ્પોની માળાવાળા, પાપો અને ત્રિવિધિ તાપોના સમુદાયોને નાશ કરનારા, સુંદર કેસરેયુક્ત ઊર્ધ્વ પુંડ્ર તિલક ભાલમાં જેમને છે, પોતાના ભક્તોના સમુદાયોના અનન્ય રક્ષક, નિવૃત્તિ પમાડ્યા છે પોતાના ભક્તોના જન્મસમૂહો જેમણે એવા, કાલ-માયાને પણ અત્યંત ભયંકર, સુખી કર્યા છે સ્વાશ્રિત પરમહંસો જેમણે એવા ધર્મપુત્ર શ્રીહરિ તમોને હું ભજું છું. (૨૫) **ગુણાતીતાનંદ મુનિ** સ્તુતિ કરે છે : હે નારાયણ મુને ! પોતાનાં ભક્તજનોને આનંદ આપનારા, મંદ હાસ્ય યુક્ત અતિ સુંદર પૂર્ણ ચંદ્રની કાંતિ સમાન શોભાયુક્ત મુખારવિંદ વાળા, કરુણાસાગર, સૌમ્યાકાર, વિધવિધ પ્રકારનાં અલંકારોને ધારણ કરનારા, અમૂલ્ય વસ્ત્રોથી ઉત્તમ નટની સમાન શોભાવાળા તમારો હું આ લોકમાં આશ્રય પામેલો છું. (૨૬)

**પ્રેમાનંદાદિ મુનિઓ સ્તુતિ કરે છે** : અનંતકોટિ બ્રહ્માંડોના અધિપતિઓના શાસન કરવારૂપ શોભાવાળા તમો જયકારી પ્રવર્તો. વિશ્વની સૃષ્ટિના આરંભ સમયમાં પોતાના અવતારભૂત નારાયણની નાભિકમળમાંથી થયેલા બ્રહ્માદિ પોતાની પ્રજાના સમૂહોનાં જન્માદિ દુઃખોને નાશ કરનાર છે જન્મ જેમનો એવા, અનેક ચંદ્રમાઓની માફક પ્રકાશ જેમનો છે એવા બન્ને હાથ અને બન્ને ચરણારવિંદના નખોની કાંતિથી વિનાશ કર્યો છે પોતાના ભક્તજનોનો હૃદયનિષ્ઠ અંધકાર જેમણે એવા, હે આદિ દેવ ! હે સકલ કારણના કારણ ! વિદ્યુતની કાંતિ સમાન કાંતિ જેમની છે એવાં વસ્ત્રોવાળા, હે સદા આનંદસ્વરૂપ, હે ગોવિંદ ! આનંદ સહિત પ્રણામ કરતા ભક્તજનોને કલ્પવૃક્ષ સમાન મનોરથ પૂર્ણ કરનારું ચરણકમળ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सानन्दवन्दारुमन्दारपादारविन्दोत्तमक्षेमधामाक्षराध्यक्ष ! लोके मुमुक्षायियक्षागमेक्षातितिक्षासमन्दाक्षता-वर्जिताक्षीणविक्षोभणात्माक्षपोषप्रसक्तातिरूक्षाक्षरालापदक्षोद्धतक्षुद्रक्षोविपक्षक्षयोद्युक्त ! । राधारमाम्भोजजन्मोक्ष-लक्ष्मार्चितातीक्ष्णवक्षःक्षमारक्षक ! त्र्यक्षभूभृद्वलक्षोत्तमश्लोक ! विष्णो ! वलक्षाख्यपक्षान्तनक्षत्ररक्षाकराभास्य ! दोषप्रशोष! प्रकाशाश्रयाशेषशर्मेश ! । शान्ताशयाशेषसिद्धेश ! सिद्धीश ! बुद्धीश ! बद्धोद्धरध्यान ! । नैकावताराधमोद्धारक ! श्रीहरे ! त्वं प्रसीद प्रभो ! दीनबन्धो ! ॥२७॥ सुव्रत उवाच-इत्थं त्यागिषु सर्वेषु मुनिषु स्तवनं प्रभोः । कृतवत्स्वितरेऽप्येनं भक्तास्तुष्टुवुरीश्वरम् ॥२८॥ सर्वे जना ऊचुः- अहो धन्याः स्वामिन्वयमिह कृतार्थी कृतकुलास्तपोदानध्यान-व्रतहवनमौनादिफलिनः । यमद्राक्षीद्धाता नहि नलिननालेऽब्दशतकंविचिन्वंस्तं त्वाद्यं मनुजतनुमीक्षामह ऋतम् ॥२९॥ निजजनभवतारणातिशैघ्र्यादिव धृतपीतपटं दृढाप्तकच्छम् । लसदरुणपटेन नाथ ! बध्वा स्थितवति नस्त्वयि चित्तमस्तु लीनम् ॥३०॥ वागस्माकं गायतु नित्यं गुणजातं कर्णौ नित्यं नाथ ! चरित्रं शृणुतां ते । चक्षुर्नित्यं पश्यतु मूर्तिं तव लोके रूपं ह्येतद्ध्यायतु नित्यं च मनो नः ॥३१॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे अन्नकूटोत्सवे सकलमुनिसङ्घकृतभगवत्पूजनस्तवननिरूपणनामा सप्तदशोऽध्यायः ॥१७॥

---

જેમનું છે એવા, હે પોતાના આશ્રિતોના સર્વોત્તમ કલ્યાણ પ્રાપ્તિના સ્થાનસ્વરૂપ, હે અક્ષરાધિપતે ! આ લોકમાં મુક્તિની ઈચ્છા, યજ્ઞયાગાદિથી શ્રીકૃષ્ણના પૂજનની ઈચ્છા, સત્ શાસ્ત્રને જોવાની ઈચ્છા, ક્ષમા, અકાર્યમાં લજ્જા વગેરેથી રહિત તેમજ નાશ નથી પામ્યો પોતપોતાના વિષયોમાં સંચાર જેમને એવી પોતાની ઈન્દ્રિયોના પોષણમાં આસક્તિવાળા, અતિ અશ્લીલ શબ્દોથી આલાપ કરવામાં નિપુણ, ઉદ્ધત, અતિ તુચ્છ ક્રિયા કરનારા એવા તે બધા ગુરુ અને રાજારૂપે ઉત્પન્ન થયેલા અસુરો રૂપી શત્રુઓના ક્ષયમાં ઉદ્યમપરાયણ, રાધા-લક્ષ્મી-બ્રહ્મા અને શંકરે પૂજેલા, કોમળ વક્ષઃસ્થળમાં ક્ષમા રાખનાર, શિવના નિવાસભૂત કૈલાસ પર્વતની માફક શ્વેત સર્વોત્તમ કીર્તિવાળા, હે સર્વાન્તરાત્મન્! શુક્લ પક્ષના અવસાનરૂપ પૂર્ણિમામાં નક્ષત્રોની રક્ષા કરનાર ચંદ્રમાની કાંતિ સમાન કાંતિયુક્ત મુખારવિંદવાળા, હે દોષોને નાશ કરનારા, હે અક્ષરબ્રહ્માદિ પ્રકાશકોના સર્વોત્તમ તેજઃપુંજના આધાર, હે સમગ્ર સુખના અધિપતિ, હે શાંત હૃદયવાળા સમગ્ર મુક્ત પુરુષોના સ્વામી, હે યથાર્થ જ્ઞાનપ્રદાતા, તમારૂં ધ્યાન બધ્ધને મુક્ત કરનારૂં છે, હે પોતાના ભક્તોનું રક્ષણ કરવા માટે અનેક અવતારો ધારણ કરનારા, હે અધમોદ્ધારક હે પ્રભો, હે દીનબંધો, હે હરે ! તમો અમારા ઉપર પ્રસન્ન થાઓ. (૨૭)

**સુવ્રત મુનિ કહે છે** : હે રાજન્ ! આ પ્રમાણે સર્વ ત્યાગી સાધુઓ અને વર્ણીઓ શ્રીહરિની સ્તુતિ કર્યે સતે **બીજા ભક્તો પણ** પરમેશ્વર શ્રીહરિની સ્તુતિ કરવા લાગ્યા : (૨૮) હે સ્વામિન્ ! આ લોકમાં અમો કૃતાર્થ થયા છીએ; એટલું જ નહીં, પરંતુ ધન્યતા પમાડેલા છે કુળોને જેમણે એવા તેમજ તપ-દાન-ધ્યાન-વ્રતો, યજ્ઞાદિનું આચરણ-મૌનવ્રત જેમને સફળ થયા છે એવાં થયેલાં છીએ. હે ભગવન્ ! જગતસ્રષ્ટા બ્રહ્મા કમળના નાળમાં સો વર્ષ સુધી તમોને ખોળતા સતા જોતા નહોતા એવા સર્વના કારણ, ધારણ કરેલા મનુષ્યના સમાન આકારવાળા સર્વદા સત્યસ્વરૂપ તમોને અમો દૃષ્ટિથી નીરખીએ છીએ માટે ધન્યવાદવાળા થયા છીએ. (૨૯) હે નાથ ! સ્વાશ્રિત જનોનો સંસારસમુદ્રથી ઉદ્ધાર કરવામાં જાણે કે ત્વરાએ યુક્ત જેમ હોય તેમ દૃઢ કચ્છ જેમણે વાળ્યો છે એવા, પહેર્યું છે પીતાંબર જેમણે એવા, લાલ પટકાથી કેડ્ય બાંધીને તત્પર થઈ બિરાજતા તમારે વિશે અમારું ચિત્ત અત્યંત સ્નેહથી નિમગ્ન થાઓ. (૩૦)

હે નાથ ! આ લોકમાં અમારી વાક્ઈન્દ્રિય તમારા ગુણસમુદાયનું હંમેશા ગાન કરો, અમારા બન્ને કાન તમારાં ચરિત્ર, નાના પ્રકારની લીલાઓનું નિત્ય શ્રવણ કરો, અમારાં નેત્રો તમારી મૂર્તિને હંમેશાં જુઓ, અમારું મન આ તમારી મૂર્તિના સૌંદર્યનું હંમેશા ચિંતવન કરો. (૩૧)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે અન્નકૂટોત્સવે સકલમુનિસંઘકૃત ભગવત્પૂજનસ્તવન નિરૂપણ નામા સપ્તદશોઽધ્યાયઃ (૧૭)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच-इति भक्तैः स्तूयमानं प्रीतं राजन् ! प्रभुं रतिः । दूरस्था प्राञ्जलिः प्राह पाकसिद्धिरभूदिति ॥१॥ ततो नारायणमुनी राधाकृष्णस्य सन्निधौ । अन्नकूटं रचयितुं विप्रमर्चकमादिशत् ॥२॥ ततः सोऽपि द्विजश्रेष्ठो राधाकृष्णसमर्चने। नित्यं प्रसक्तोऽरचयदन्नकूटं यथाविधि ॥३॥ वासुदेवानन्दमुख्यास्तदानीं वर्णिसत्तमाः । पक्वान्नभृतपात्राणि तत्रोपाजह्रुरादरात् ॥४॥ अन्नकूटस्य रचनां यथावत्स विधाय च । निवेदयामास ततः श्रीकृष्णाय नराधिप ! ॥५॥ हर्याज्ञयाऽऽगत्य तत्र मुकुन्दानन्दवर्णिराट् । शुचिर्नीराजनं चक्रे श्रीकृष्णस्य महाव्रतः ॥६॥ नारायणमुनिः श्रुत्वा घण्टानादं तदा स्वयम् । तत्रागत्य द्रुतं कृष्णं प्रणनाम कृताञ्जलिः ॥७॥ अन्नकूटं ततोऽपश्यन्निचितं वर्णिसत्तमैः । तेषां तत्रातिचातुर्यं प्रशंसन्बहुधा हरिः ॥८॥ शतच्छिद्राणि चारूणि वर्तुलानि सितानि च । उपर्युपरि पङ्क्तिस्थान्यपश्यत्खाजकानि सः ॥९॥ शष्कुलीर्दक्षिणावर्ता मृद्व्यः शुभ्राश्च वर्तुलाः । वर्णिभिर्निचितास्तत्र पीठेषु हरिरैक्षत ॥१०॥ संयावं पृथुपात्रस्थं प्रचुराज्यसितं तथा । घृतेनालोड्य कंसारं पर्वतीकृतमैक्षत ॥११॥ पर्पिकाखण्डकांस्तत्र चतुरस्रान् सुशोभनान् । पीठेषु निचिताञ्छुभ्रानुपर्युपरि चैक्षत ॥१२॥ पिण्डकान् गुडकांश्चैव ग्रन्थिकान्मोदकांस्तथा । कलिकालड्डुकान्सक्तू-दौहित्रांश्चूर्णलड्डुकान् ॥१३॥ सोहालिकाः सेविकाश्च मण्डकान् घृतपूरकान् । पूरिकाः पोलिकाः शुभ्राः पायसं च स ऐक्षत ॥१४॥ दध्योदनं दुग्धकूरं बिरञ्जं मुद्गचूर्णकम्। वटकांस्तिलपिष्टं च शालिपिष्टं सशर्करम् ॥१५॥ रसालां सुखदां फेणीं पीतसाराणि घुर्घुरान् । गुन्द्रपाकमपूपांश्च पूपान्मौक्तिकलड्डुकान् ॥१६॥ कलिम्बाञ्छाटकान् रम्यान् स्थिरकान् बहुधाकृतान् । रम्भाफलानि च

## અધ્યાય : ૧૮

## શ્રીહરિએ જોયેલી ભગવાન શ્રીવાસુદેવનારાયણની આગળ અન્નકૂટ-રચનાનું સવિસ્તર નિરૂપણ કર્યું છે.

**સુવ્રત મુનિ બોલ્યા :** હે રાજન્ ! આ પ્રકારે ભક્તોની સ્તુતિથી પ્રસન્ન થયેલા એવા શ્રીહરિની સમીપે દૂર પ્રદેશમાં વિનયથી બંને હાથ જોડીને, ભક્તા સ્ત્રી રતિ ઊભી રહી અને હે પ્રભુ ! રસોઈ તૈયાર થઈ ગઈ છે, એમ બોલી. (૧) પછી શ્રીનારાયણ મુનિએ શ્રી વાસુદેવની મૂર્તિ સમીપે અન્નકૂટ રચવાની પૂજારી બ્રાહ્મણને આજ્ઞા આપી. (૨) પછી શ્રી રાધાકૃષ્ણની પૂજામાં હંમેશા તત્પર એવા તે પૂજારી વિપ્ર અન્નકૂટની વિધિ પ્રમાણે રચના કરતા હતા. (૩) તે સમયે વાસુદેવાનંદ બ્રહ્મચારી વગેરે જલેબી વગેરેનાં પૂરેલાં પાત્રો શ્રી રાધાકૃષ્ણની સમીપે પ્રેમપૂર્વક લાવતા હતા. (૪) હે નરાધિપ, પછી તે પૂજારી બ્રાહ્મણ અન્નકૂટની રચના યથાયોગ્ય કરીને શ્રીકૃષ્ણને નિવેદન કરતા હતા. (૫) નૈષ્ઠિક વ્રતધારી મુકુંદાનંદ વર્ણિરાજ શ્રીહરિની આજ્ઞાથી શ્રીરાધાકૃષ્ણના મંદિરમાં આવીને સ્નાનાદિથી શુદ્ધ થઈ શ્રીકૃષ્ણની મહા આરતી કરતા હતા. (૬) અને સ્વયં શ્રીનારાયણ મુનિ ઘંટાનો નાદ સાંભળીને, સભામાંથી ઊઠીને, તત્કાલ આવીને, બન્ને હાથ જોડી શ્રી રાધાકૃષ્ણને પ્રણામ કરતા હતા. (૭) પછી શ્રીહરિ વાસુદેવાનંદ આદિ શ્રેષ્ઠ વર્ણિઓએ રચેલો અન્નકૂટ અને તેની ગોઠવણીમાં તે વર્ણીઓની ચતુરાઈની બહુ પ્રકારે પ્રશંસા કરતા સતા દર્શન કરતા હતા. (૮) સેંકડો છિદ્ર યુક્ત, સુંદર,ગોળાકાર, શ્વેત અને ઉપરા ઉપરી પંક્તિબદ્ધ ગોઠવાયેલાં ખાજાંનાં દર્શન કરતા હતા. (૯) વાસુદેવાનંદ આદિ વર્ણિઓએ પાટિયાં ઉપર ગોઠવેલી, જમણી તરફ ગોળાકારવાળી, કોમળ, શ્વેત અને ગોળ એવી જલેબી શ્રીહરિ અન્નકૂટની રચનામાં જોતા હતા. (૧૦) પુષ્કળ ઘી-સાકર યુક્ત એવો શીરો મોટા એક વાસણમાં ધરાવ્યો હતો તેમજ એક મોટા પાત્રમાં પર્વત આકારે ગોઠવેલો, પુષ્કળ ઘી-મિશ્રિત એવો કંસાર શ્રીહરિએ જોયો. (૧૧) ચાર ખૂણાવાળી, અતિ રમણીય, ઉપરા ઉપરી વાસણમાં પાટિયા ઉપર ગોઠવેલી ધોળી બરફીનાં ચકતાં શ્રીહરિએ જોયાં. (૧૨) પેંડા, લાખણશાહી લાડુ, બળેલો લાડુ, કળીના લાડુ, દાળના લાડુ, તળેલા લાડુ, દહીંથરાં અને ગાંઠિયા શ્રીહરિએ જોયા. (૧૩) ધોળી સુંહાળિયો, સેવો, માંડા, ઘેબર, પુરીઓ, રોટલીઓ, દૂધપાક શ્રીહરિએ જોયાં. (૧૪) દહીં-ભાત, દૂધભાત, બીરંજ, મગદળ, વડાં, તલસાંકળી, હરીસો, શ્રીહરિ જોતા હતા. (૧૫) શીખંડ, સુખડી, સુતરફેણી, પતાસાં, ઘૂઘરા, ગુંદરપાક, માલપુવા, (વેઢમી),પુડલા, મોતીઆ લાડુ, હલવો, સારાં રમણીય ઘણા પ્રકારના ઠોર, ઘી અને સાકરથી મિશ્રિત કરેલાં કેળાં શ્રીહરિ જોતા હતા. (૧૬-૧૭) શ્રીહરિ વિશાળ પાત્રોમાં નાના પ્રકારનાં શાકો જોતા હતા. દહીંથી યુક્ત તજ, લવિંગ, મરચાં

सिताघृतमिश्राण्यवैक्षत ॥१७॥ महामत्रेष्वथापश्यच्छाकानि विविधानि सः । कोशातकीं दधियुतां त्वग्लवङ्गादिसंस्कृताम् ॥१८॥ राजकोशातकीं तद्वद्द्वाहारांश्च भिण्डकान् । रक्तालुं स्वर्णदुग्धां च स ददर्श सुसंस्कृताम् ॥१९॥ अनेकभेदरचितं वृन्ताकं मुत्करीस्तथा । कर्कोटकाञ्छिम्बिकां च कर्कटीं चिर्भटं तथा ॥२०॥ राजमाषकशिम्बीश्च प्रवालानि मृदूनि च । बिम्बीफलानि मिष्टानि शार्करं कन्दमुज्ज्वलम् ॥२१॥ खर्बुजं कारवेल्लं च कूष्माण्डं सूरणं तथा । मुनिशिम्बीः पटोलं च सम्यक् संस्कृतमैक्षत ॥२२॥ तथैव मेथिकाभाजी तण्डुलीयं च मूलकम् । शतपुष्पामम्ललोणीं जीवन्तीं स्यन्दिकां तथा ॥२३॥ भार्जी राजगिराख्यां च करञ्जप्रमुखानि सः । बहून्यालोक्य शाकानि राजिकाराद्धमैक्षत ॥२४॥ दुग्धिकायाश्चिर्भटस्य कर्कारोः कदलस्य च । तथा शार्करकन्दस्य द्राक्षाखारिकियोरपि ॥२५॥ शमीशिम्ब्याश्च रचितं राजिकाक्तं स ऐक्षत । वृन्ताकं भर्जितं दध्ना मिश्रितं पात्रसम्भृतम् ॥२६॥ राजिकादधिमिश्राश्च वटिका वटकांस्तथा । सोऽपश्यत्पुष्पवाटिकाः प्रफुल्लाः वर्तुलाः प्रभुः ॥२७॥ अथाऽऽलोः कदलादीनां भज्यानि विविधानि च । मृदूनि प्रफुल्लानि कृतानि बहुयुक्तिभिः ॥२८॥ एतेषां मध्यभागे च कृतमोदनपर्वतम् । सितं मृदुं सौरभेण व्याप्नुवन्तं दिशो दश ॥२९॥ उपत्यकायां तस्यैव तुवरीसूपमैक्षत । निभृतं वङ्गपात्रेषु वर्तुलेषु पृथुष्वसौ ॥३०॥ तलितान् हरिमन्थांश्च निष्पावान्वर्तुलांस्तथा । क्वथिकां दधि तक्रं च मण्डं पर्पटकांस्तथा ॥३१॥ सशर्करेण दुग्धेन क्वथितेन भृतानि च । हैयङ्गवीनेन तथा पात्राण्यैक्षत स प्रभुः ॥३२॥ ददर्श चान्यपात्रस्थं नवनीतं सशर्करम् । सुसंस्कृतं चारनालं लघुपात्रस्थितं तथा ॥३३॥ शृङ्गवेरं सजम्बीरं स्वादु भोजकरोचकम् । धान्याकादेश्च चटनीं लवणं चैक्षत प्रभुः ॥३४॥ भुजिपात्रमथापश्यदेकं कृष्णस्य सन्निधौ । हैमं भास्वच्च विततं वर्तुलं पूर्णचन्द्रवत् ॥३५॥ वाटिकाभिश्चतुःषष्ट्या रौप्याभिः सितकान्तिभिः । परितः शोभमानं च पश्यलोकमनोहरम् ॥३६॥ एकोत्तरशतं तत्र पदार्थान् परिवेषितान् । प्राग्दृष्टानेव सोऽपश्यन्मुमुदे च ततो भृशम् ॥३७॥

---

વગેરેથી સંસ્કાર કરેલાં તુરિયાં જોતા હતા. (૧૮) તેની માફક ગલકાં, ગવારની ફળી, ભીંડા, રતાળુ, સંસ્કાર કરેલી દૂધી શ્રીહરિ જોતા હતા. (૧૯) તે જ પ્રકારે અનેક પ્રકારે સંસ્કાર કરેલાં વૃંતાક, મોગરીઓ, કંકોડાં, વાલોળ, કાકડી તથા ચીભડાં જોતા હતા. (૨૦) ચોળાફળી કોમળ પરવળ, મીઠાં ઘીલોડાં તથા શ્વેત શકરકંદ જોતા હતા. (૨૧) સાકરટેટી, કારેલાં, કોળું, સૂરણ, અગથિયાની ફળી, સારા સંસ્કાર કરેલાં પંડોળાં શ્રીહરિ જોતા હતા. (૨૨) તેવી રીતે મેથીની ભાજી, તાંદળજો, મૂળો, સુવાની ભાજી, ખાટીલૂણી, ડોડી, ફાંગ્યની ભાજી જોતા હતા. (૨૩) રાજગરાની ભાજી, કણજરો એ મુખ્ય છે જેમાં એવા ઘણાં શાકો જોઈને શ્રીહરિ રાયતું જોતા હતા. (૨૪) દૂધીનું, ચીભડાંનું, કોળાનું, કેળાનું,શકરિયાનું, ખારેક; (૨૫) સાંગરીઓનાં કરેલાં રાયતાં (કેવળ અંગારા ઉપર પકવેલાં) તેને દહીંની સાથે મિશ્રણ કરેલાં અને પાત્રોમાં ભરેલા અને વૃત્તાંકનું ભરથું તે પણ દહીંમાં મિશ્રણ કરેલું; (૨૬) રાઈ અને દહીંથી મિશ્રણ કરેલી વડીઓ તથા તેવાં વડાં, ફૂલેલી ગોળ ફૂલવડી શ્રીહરિ જોતા હતા. (૨૭) પછી પત્તરવેલિયાં, કેળાં, વૃંતાક, કોળું, દૂધી, સૂરણ, ગલકાં, વગેરેનાં કોમળ અને ઘણી યુક્તિથી કરેલાં ભજિયાં જોતા હતા. (૨૮) એ સર્વ પૂર્વે કહેલા પદાર્થોની વચ્ચે કરેલો, શ્વેત વર્ણનો, સુગંધીથી દશ દિશામાં વ્યાપતો, પર્વત સમાન ભાતનો ઢગલો જોતા હતા. (૨૯) તે ભાતના પર્વતની સમીપમાં જ રહેલાં ગોળ અને વિશાળ કલાઈવાળા પાત્રમાં ભરેલી તુવેરની દાળ શ્રીહરિ જોતા હતા. (૩૦) ઘી અને મસાલાઓથી વઘારેલા ચણા તથા વાલ, વટાણા, કઢી, છાશ, મઠો તથા પાપડ જોતા હતા. (૩૧) સાકરે સહિત કઢેલા દૂધથી ભરેલાં પાત્રો તથા માખણથી ભરેલાં ચાંદીનાં પાત્રોને શ્રીહરિ જોતા હતા; (૩૨) તથા બીજાં સુવર્ણપાત્રમાં સાકરે સહિત મિશ્રિત કરેલું માખણ તથા તત્કાલ કરેલાં અથાણાં નાનાં પાત્રોમાં ભરેલાં જોયાં. (ત્યાર પછી રાઈ અને સરસિયા તેલથી મિશ્રિત કરમદાં, બીલાં, લીંબુ અને મરચાંને જોતા હતા.) (૩૩) લીંબુના રસથી મિશ્રિત કરેલું, ભોજન કરનારાઓને રુચિ કરનારું આદાનું અથાણું તથા ધાણા વગેરેની ચટણી તથા મીઠું શ્રીહરિ જોતા હતા. (૩૪) પછી સુવર્ણનો- પ્રકાશમાન, મોટા પૂર્ણ ચંદ્રમાના જેવો ગોળ એક ભોજનનો થાળ શ્રીવાસુદેવના સમીપમાં શ્રીહરિ જોતા હતા. (૩૫) શુદ્ધ ચાંદીની કરેલી શ્વેત કાંતિવાળી ચોસઠ વાટકીઓથી ચોતરફ શોભાયમાન, જોનારા લોકોનાં ચિત્તને હરનાર એવો તે સુવર્ણનો થાળ જોતા હતા. (૩૬) સુવર્ણના થાળમાં પીરસેલાં પૂર્વે જોયેલા ખાજાં વગેરે એકસો એક પદાર્થો જોતા હતા તેથી અત્યંત પ્રસન્ન થયા. (૩૭) શ્રી રાધાકૃષ્ણના

अन्नकूटं वीक्षमाणस्तत्र भक्तजनैः सह। भुव्येव निषसादासौ मर्यादां पालयन्प्रभुः ॥३८॥ अगापयत्कृष्णकृतं गोवर्धनमहोत्सवम् । पद्यबद्धं सुकविभिस्तदा तत्र स चर्षिभिः ॥३९॥ वीणाविपञ्चिकाकांस्यतालमर्दलवेणुभिः । अन्यैश्च सह वाद्यैस्ते जगुः कृष्णाननेक्षणाः ॥४०॥ नीराजनं चान्नकूटमिति दृष्ट्वा प्रहर्षितः । हरिः प्रणम्य साष्टाङ्गं पूजाविधिमपूरयत् ॥४१॥ मुनयश्च जनाः सर्वेऽप्यन्नकूटमहोत्सवम्। दृष्ट्वा जयध्वनिं भक्त्या कुर्वन्तोऽतिमुदं ययुः ॥४२॥ आनन्द आसीत्सुमहान्नराणां सम्पश्यतां सुन्दरमन्नकूटम् । स्त्रीणां तदानीं हरिभक्तिभाजां तत्रागतानां च महीभृदिन्द्र ! ॥४३॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे अन्नकूटोत्सवे भगवद्दृष्टान्नकूटरचनानिरूपणनामाऽष्टादशोऽध्यायः ॥१८॥

सुव्रत उवाच-अथ तदा ललितापि निदेशतो भगवतो निजपूज्यहरेः पुरः । रचयितुं पृथगन्नगिरिं भुवं नृप ! विशोध्य चकार सुमण्डलम् । ॥१॥ समुपवेश्य हरिं मृदुलासने सह जयादिभिरादरतो भृशम् । वसनचन्दनकुङ्कुमकेसरैः कुसुमहारवरादिभिरार्चिचत् ॥२॥

कनकभोजनताटकमुज्ज्वलं पुरत एत्य जया निदधौ हरेः । तदभितोऽकृत कंसशुभावलिं त्वथ रमा निदधे लघुवाटिकाः ॥३॥ कलशमुज्ज्वलमम्बुभृतं तदा रतिरुपेत्य दधार च दक्षिणे । भगवतः पुर एत्य दधौ शुभं कनककंसमथो ललितानुजा ॥४॥ निजनिजां परिवेषणचातुरीं प्रकटयन्त्य इव प्रभुतुष्टये । झटिति संविदधुः परिवेषणं सकमलारतिफुल्लजयादयः ॥५॥

---

મંદિરમાં સાધુજનો વગેરે ભક્તોએ સહિત અન્નકૂટની રચનાને જોતા સતા શ્રીહરિ ‘દેવોની આગળ આસનમાં બેસવું નહીં’ એવી મર્યાદાનું પાલન કરતા સતા પોતાનાં જનોને શિક્ષણ આપતા પૃથ્વી પર જ બેઠા. (૩૮) તે સમયે શ્રીવાસુદેવ નારાયણના મંદિરમાં શ્રીહરિ મુક્તાનંદાદિ સારા કવિઓએ પદ્યમાં વર્ણવેલો શ્રીકૃષ્ણે કરેલો ગોવર્ધન-મહોત્સવ પ્રેમાનંદાદિ મુનિઓ પાસે ગવડાવતા હતા. (૩૯) તે સર્વે વર્ણી અને સાધુઓ વીણા, સતાર, કાંસીજોડાં, મૃદંગ અને વાંસળી વગેરે બીજાં વાજિંત્રો સાથે શ્રીકૃષ્ણના મુખારવિંદ સામે દૃષ્ટિ રાખીને ગાન કરતા હતા. (૪૦) આ પ્રમાણે મુકુંદાનંદવર્ણીએ કરેલી શ્રી રાધાકૃષ્ણની આરતી અને અન્નકૂટને જોઈને હર્ષ પામેલા શ્રીહરિએ સાષ્ટાંગ પ્રણામ કરી પૂજાવિધિ સમાપ્ત કર્યો. (૪૧) સર્વ સાધુ બ્રહ્મચારીઓ અને સર્વ સત્સંગીઓ પણ અન્નકૂટના મહોત્સવને જોઈને પ્રેમથી જયધ્વનિ કરતા સતા અત્યંત આનંદ પામ્યા. (૪૨)

હે પ્રતાપસિંહ રાજન્ ! ગઢપુરમાં અન્નકોટના ઉત્સવ ઉપર આવેલા શ્રીહરિની ભક્તિ કરનારા અતિ સુંદર અન્નકૂટ જોનારા મુનિઓ વગેરે પુરુષો અને સ્ત્રીઓને તે સમયે અતિશય આનંદ થયો. (૪૩)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે અન્નકૂટોત્સવે ભગવદ્દૃષ્ટાન્નકૂટરચના-નિરૂપણ નામાઽષ્ટાદશોઽધ્યાયઃ (૧૮)*

## અધ્યાય : ૧૯

## પ્રત્યક્ષ મહાપ્રભુ શ્રીહરિની ભોજનલીલાનું આશ્ચર્યપૂર્વક નિરૂપણ કર્યું છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! તે સમયે લલિતાએ પણ શ્રી સહજાનંદ સ્વામીની આજ્ઞાથી દરરોજ પોતાને પૂજવાની શ્રી રાધાકૃષ્ણ, શ્રીહરિકૃષ્ણ ભગવાનની મૂર્તિ આગળ જુદો ( શ્રી વાસુદેવની મૂર્તિની આગળ કરેલા અન્નકૂટથી બીજો) અન્નકૂટ રચવા માટે પૃથ્વીને શોધીને ગુલાલ, હળદર વગેરેથી શોભાયમાન મંડળ કર્યું. (૧) લલિતાએ પોતાને પૂજવા યોગ્ય ભગવાનને અત્યંત કોમળ આસન ઉપર સ્થાપીને જયાદિની સાથે અત્યંત પ્રેમથી વસ્ત્રો, ચંદન, કુમકુમ, કેસરોથી અને શ્રેષ્ઠ પુષ્પોના હારો વગેરે ભૂષણોથી પૂજા કરી. (૨)

પછી સુવર્ણનું ભોજનપાત્ર શ્રીહરિની આગળ મૂક્યું પછી રમાએ ભોજનપાત્રની ચોતરફ દૂધપાન વગેરે માટે ચાંદીનાં પાત્રોની શુભ પંક્તિ કરી અને નાની નાની વાટકીઓ પણ મૂકી. (૩) તે સમયે રતિએ આવીને ઉજ્જ્વલ વસ્ત્રથી ગાળીને ભરેલો ચાંદીનો કળશિયો ભગવાનને જમણે પડખે મૂક્યો પછી પાંચાલીએ આવીને સુંદર સોનાનું પવાલું ભગવાનની આગળ મૂક્યું. (૪) કમલાએ સહિત રતિ, ફૂલજયા વગેરે જેમાં છે એવી રેવતી વગેરે સ્ત્રીઓ શ્રીહરિની પ્રસન્નતા માટે પોતપોતાની પીરસવાની ચાતુરી પ્રકાશ કરતી હોય ને શું ? એમ તત્કાલ પીરસતી હતી. (૫) અમરી, દેવિકા, ક્ષેમા, ફૂલ્લાં,

अमरी देविका क्षेमा फुल्ला रामादयः स्त्रियः । पदार्थान् स्वस्वरचितांस्तत्रानिन्युर्मुदान्विताः ॥६॥ स्वस्वकल्पितपाकेषु यद्यज्चातुर्यसीमया। कृतं प्रीत्यै प्रभोस्तत्तत्तदानीं पर्यवेषयन् ॥७॥ पदार्थान् सकलांस्तत्र पूर्ववत्परिवेषितान् । एकोत्तरशतं दृष्ट्वा हरये ललिताऽऽर्पयत् ॥८॥ हसन्ती तां रमा प्राह भुङ्क्ष्वेति वद ते प्रभुम् । दिदृक्षामोऽत्र भुञ्जानमेता वयमपि ध्रुवम् ॥९॥ इत्युक्ता सापि भगवन्मुखपद्मार्पितेक्षणा । तस्थौ बद्धाञ्जलिपुटा पुरस्तात्तस्य भूपते ! ॥१०॥ तदा साक्षात्कृष्णः करकलितपक्वान्नकवलः पिबन्मध्ये मध्ये सुसलिलमभुक्तातिमुदितः । समीपस्था राधा करकमलसन्नक्तकधरा हसद्वक्त्राम्भोजा चपलनयनाऽवीजयदमुम् ॥११॥ साश्चर्यं योषितः सर्वास्तदा तं पुरुषा अपि । प्रत्यक्षमेव ददृशुः पश्यभक्तमनोहरम् ॥१२॥ ततः कृष्णोऽपि भगवान्भक्तानानन्दयन्निजान् । तत्तत्पदार्थनामानि पृच्छन्स बुभुजे रमाम् ॥१३॥ अतिस्वादु कृतमिदं कयेति च पुनः पुनः । नामानि तत्तत्कर्त्रीणां पृच्छंस्ताः प्रशशंस सः ॥१४॥ मुनयश्च जनाः सर्वे योषितश्चापि दूरतः । वीक्षमाणास्तमात्मेशमानन्दं लेभिरे भृशम् ॥१५॥ मितभुक् स हरिः किञ्चिद्भुक्त्वाथोत्थातुमैहत । तं स्थापयन्ती ललिता जगावष्टपदीमिमाम् ॥१६॥

प्रभो ! भुङ्क्ष्व कामं प्रभो ! भृङ्क्ष्व कामं गच्छसि किमु झटिति सलीलम् । सहजसुख ! सुन्दरे तिष्ठ मम मन्दिरे मुञ्च चपलतर! शिशुशीलम् । पुरटामयवाटिका रुचिररसमण्डिकाः शोभयति विततरुचिवासे । कनकभुजिभाजने

---

રામા આદિ જેમાં છે એવી અમલા વગેરે સ્ત્રીઓ હર્ષથી યુક્ત પોતે કરેલા પદાર્થોને અન્નકૂટ-રચનામાં લાવતા હતાં. (૬) પોતે પોતાનાં કરેલા પાકોમાં જે જે વસ્તુ પોતાની સંપૂર્ણ ચાતુર્યથી કરેલી તે તે વસ્તુ શ્રીહરિની પ્રીતિ માટે અન્નકૂટ સમયે તે સ્ત્રીઓ પીરસતી હતી. (૭) લલિતા પૂર્વની માફક પીરસેલા એકસો એક સમગ્ર પદાર્થોને જોઈને શ્રીહરિને અર્પણ કરતી હતી. (૮) રમા હાસ્યપૂર્વક લલિતાને કહેવા લાગી : હે લલિતે ! તમે ‘હે શ્રીહરે ! તમો ભોજન કરો.’ આ પ્રકારે તમારા પ્રભુને કહો. આ અમો પણ બધાં આ અન્નકૂટમાં ભોજન કરતા શ્રીહરિને જોવા ઈચ્છીએ છીએ. (૯) હે ભૂપતે ! આ પ્રકારે રમાએ કહેલી લલિતા પણ શ્રીહરિના મુખકમળમાં અર્પણ કર્યાં છે નેત્રો જેણીએ એવી સતી બન્ને હાથ જોડી શ્રીહરિની આગળ ઊભી રહી. ‘ હે પ્રભો ! જમો’ એમ મનથી પ્રેરણા કરી ઊભી રહી. (૧૦) તે સમયે પૂજા કરવાની મૂર્તિથી પ્રત્યક્ષ ભાવને પામેલા શ્રીહરિકૃષ્ણ ભગવાન પોતાના જમણા હાથથી ગ્રહણ કર્યો છે મોતિયા લાડુનો કોળિયો જેમણે એવા, બે-ત્રણ ગ્રાસ જમ્યા પછી વચ્ચે વચ્ચે સ્વાદિષ્ટ જળ પીતા સતા અત્યંત પ્રસન્નતાપૂર્વક જમતા હતા. શ્રી હરિની સમીપમાં રહેલાં રાધા પોતાના જમણા હસ્તકમળમાં રૂમાલને ધારણ કરીને મંદહાસ્ય યુક્ત મુખારવિન્દ અને ચંચળ નેત્રયુક્ત થકા શ્રીહરિકૃષ્ણ ભગવાનને વીંઝણાથી વાયરો નાખતાં હતાં. (૧૧) તે સમયે રમા વગેરે સ્ત્રીઓ અને હરિભક્તો પણ જોનારા ભક્તોને મનોહર, ભોજન કરતા શ્રીહરિને પ્રત્યક્ષ પણે આશ્ચર્યપૂર્વક જેમ હોય તેમ જોતા હતા. (૧૨) પછી તે ભગવાન શ્રી હરિકૃષ્ણ પણ પોતાના ભક્તોને આનંદ આપતા તે તે પદાર્થોનાં નામો : ઘેબર, જલેબી વગેરેનાં નામો રમાને પૂછતા સતા જમતા હતા. (૧૩) અત્યંત સ્વાદયુક્ત આ પકવાન અથવા શાક કોણે કર્યું છે ? આ પ્રકારે તે તે પકવાનો કરનારનાં નામો વારંવાર પૂછતા શ્રીહરિ પાક કરનાર સ્ત્રીઓની પ્રશંસા કરતા હતા. (૧૪) સર્વ મુનિઓ અને ભક્તજનો તથા સર્વે સ્ત્રીઓ પણ દૂરથી પોતાના સ્વામીને જમતા જોતા સતા અત્યંત આનંદ પામતા હતા. (૧૫) પછી મિતાહારી શ્રી હરિકૃષ્ણ લગાર લગાર જમીને થાળથી ઊઠવા ઈચ્છતા, હતા તેમને ‘થોડી વાર બેસો’ એમ પ્રેમથી જમાડવા માટે લલિતા અષ્ટપદી ગાતાં હતાં. (૧૬)

હે પ્રભો ! ઈચ્છા પ્રમાણે ભોજન કરો. લીલાએ સહિત જેમ હોય તેમ તત્કાલ કેમ જાઓ છો ? હે સહજાનંદ સ્વામિન્ ! તમારા ચરણના વિન્યાસથી રમણીય મારા મંદિરમાં ફરીથી લગારેક જમવા માટે બેસો. હે અત્યંત ચંચળ મૂર્તિ ! બાળકોની માફક થોડું જમવાનો સ્વભાવ ત્યાગ કરો. અતિ સુંદર રસાળ શ્રીખંડ વગેરેથી શોભાયમાન શુદ્ધ સુવર્ણની વાટકીઓમાં ચોતરફ પ્રસરતાં જડેલાં મણિઓની કાંતિનો નિવાસ જેમાં છે એવી થાળીમાં મૂકેલી વાટકીઓમાં તમારે જમવા યોગ્ય પકવાનાદિની કાંતિઓથી અત્યંત શોભાયમાન, આપના સાંનિધ્યથી અતિશય ઉદય પામેલી સૂર્યની માફક કાંતિ

भोज्यरुचिराजने खाद्यमिदमुदितरविभासे ॥ प्रभो० ॥१७॥ अदनपटुमोदनं सितसुरभिमोदनं पायसमतिसितमथ सूपम् । दधिदलितराजिकामिलितहतखारिकामुपनतमनुपममपि पूपम् ॥ प्रभो० ॥१८॥ पृथुममलमण्डकं बहुलघृतखण्डकं लड्डुकमधिरसदधिमण्डम् । फुल्लसितपूरिकां मृदुलतरपोलिकां माषवटकयुगलमखण्डम् ॥ प्रभो० ॥१९॥ चतुरतरसेविकारचितसितफेणिका नैकजनपदजनितशाकम् । मिलितघृतशर्करं कदलमथ घुर्घुरं चन्द्रशकलरुचिघृतपाकम् ॥ प्रभो० ॥२०॥ त्वदभिमतचिर्भटं मरिचयुतपर्पटं शाष्कुलिकमतुलदधिघोले । क्वथितमथ गालितं सुरभिघृतमाहितं द्युतिमति वरकनककचोले ॥ प्रभो० ॥२१॥ विधुजरणलोडिते लवणमरिचाञ्चिते दधनि निहितमतिमृदुकूरम् । अद्धि शनकैर्हरे ! तव रुचिद माहरे मा कुरु कवलमपि विदूरम् ॥ प्रभो०॥२२॥ करकमलसङ्गतं तव सततसम्मतं लीढि ससितनवनवनीतम् । नववसनपावितं पिब नलदवासितं गाङ्गमिदमुदकमतिशीतम् ॥प्रभो०॥२३॥ शूद्ध्य करपङ्कजं तदनु मुखनीरजं स्वीकुरु समुचितमुखवासम्। तिष्ठ रुचिरासने भक्तमव शासने कुरु मम नयनपथे निवासम् ॥ प्रभो० ॥२४॥ सुव्रत उवाच-इत्यादिभिस्तं वचनैर्भोजयन्तीं शनैः शनैः । मितस्मितां ललितां तां प्रशशंसू रमादयः ॥२५॥
भगवानपि ता योषा वार्तालुरिव रञ्जयन् । किञ्चिद्भुक्त्वा पुनः प्रीत्यै तासां चुलुकमाचरत् ॥२६॥
ततस्ताम्बूलपूगादिमुखवासं स ईश्वरः । उपेत्य जयया दत्तं गृहीत्वाऽभक्षयत्करे ॥२७॥ तावत्प्रासादिकं किञ्चिद्राधा तद्भुजे प्रभोः । भेजाते सद्य एवाथ प्रतिमाकारतां च तौ ॥२८॥ वृत्तान्तमेतं तु हरिर्निशम्य स्वभक्तवच्चित्रमवाप हृष्टः ।

જેનાથી છે એવા શુદ્ધ સુવર્ણના ભોજનથાળમાં રહેલું ભક્ષ્ય, ભોજ્ય, લેહ્ય અને ચોષ્ય અન્ન જમો. (૧૭) ભોજન કરવામાં ચતુર એવા તમો, શ્વેત અને સુગંધી યુક્ત ભાત જમો. અતિશય ઉજ્જ્વળ દૂધપાક જમો. દહીંની સાથે દળેલી રાઈની સાથે વાટેલી ખારેકનું રાયતું જમો. તમારા સમીપમાં લાવેલા આ અનુપમ માલપુવા જમો. (૧૮) વિશાળ ધોળા માંડા (એક જાતની પોળી) જમો. ઘણાં ઘી-સાકરવાળા મોતિયા લાડુ જમો. અધિક સ્વાદવાળી દહીંની તર જમો, ફૂલેલી શ્વેત પુરીઓ, અત્યંત સુંવાળી રોટલી અને અડદનાં બે વડાં જમો. (૧૯) હે પ્રભો ! પાકમાં ચતુર તમારી ભક્ત સ્ત્રીઓએ કરેલી ધોળી સેવો જમો. નાના દેશોમાં ઉત્પન્ન થયેલાં શાકો જમો, ઘી અને સાકરથી મિશ્રિત કેળાં જમો; અર્ધચંદ્રના સમાન આકૃતિની કાંતિવાળા ઘીમાં તળેલા ઘૂઘરા જમો. (૨૦) તમોને પ્રિય આ ચીભડું જમો અને મરિયાં યુક્ત પાપડ, જલેબી, અનુપમ ઘાટું દહીં અને રવૈયાથી વલોવીને જીરું, મરી અને લવણથી મિશ્રણ કરેલું દહીં તથા ઊનું કરેલું, શ્રેષ્ઠ કાંતિવાળા સુવર્ણના કટોરામાં ભરેલું સુગંધીમાન ઘી તમો જમો. (૨૧) હે હરે ! કપૂર અને જીરું આ બંનેથી વઘારેલું-લવણ અને મરિયાં યુક્ત દહીંથી મિશ્રિત, તમોને રુચિ કરનાર અતિ કોમળ ભાત તમારા સમીપમાં લાવું છું. ધીમે ધીમે તમો જમો. એક ગ્રાસ માત્રને પણ દૂર કરશો નહિ. (૨૨) તમારા કરારવિંદમાં રહેલું અને તમોએ નિરંતર જમવા માટે પસંદ કરેલું સાકરે સહિત માખણ તમો આરોગો. ધોયેલાં નવીન વસ્ત્રથી ગાળેલું વીરણના વાળાઓથી સુગંધીમાન કરેલું અત્યંત શીતલ તમારી સમીપમાં મૂકેલું ઉન્મત્ત ગંગાનું જળ પીઓ. (૨૩) કરકમળને ધોઈને પછી મુખકમળને શુદ્ધ કરી યોગ્ય મુખવાસ-પાનબીડી ગ્રહણ કરો. સુંદર સિંહાસનમાં બેસો. મને તમારા ભક્તજનને એકાંતિક ધર્મમર્યાદાનાં પાલનરૂપ આજ્ઞામાં રાખો. મારાં નેત્રોની આગળ નિવાસ કરો. (૨૪) હે રાજન્ ! એ વગેરે વચનોથી શ્રીહરિને ધીમે ધીમે જમાડતી મંદ હાસ્ય યુક્ત મુખવાળી લલિતા ને રમા વગેરે ભગવાનની ભક્ત સ્ત્રીઓ પ્રશંસા કરતી હતી. (૨૫) શ્રીહરિ પણ વાતો કરવાના અને સાંભળવાના સ્વભાવવાળા હોય તેમ લલિતા વગેરે સ્ત્રીઓને પ્રસન્ન કરતા સતા તે સ્ત્રીઓની પ્રસન્નતા માટે વારંવાર થોડું થોડું જમીને જળપાનનું આચરણ કરતા હતા અને હાથ-મુખની શુદ્ધિ કરતા હતા. (૨૬)

પછી પરમેશ્વર શ્રીહરિ જયાએ સમીપમાં જઈને અર્પેલા પાનબીડાં વગેરે મુખવાસ પોતાના હાથમાં ગ્રહણ કરી જમતા હતા. (૨૭) એટલામાં રાધા શ્રીહરિનું પ્રસાદીઅન્ન લગારેક જમતાં હતાં, પછી રાધા અને શ્રીહરિકૃષ્ણ તત્કાલ જ પોતાની પ્રતિમા રૂપને જ પામતા હતા. (૨૮)

લીંબડાના વૃક્ષ નીચે સિંહાસન ઉપર બેઠેલા પ્રત્યક્ષ શ્રીહરિકૃષ્ણ ભગવાન આ વૃત્તાંત-(લલિતાદિ ક્ષત્રિય સ્ત્રીઓએ પૂરેલા અન્નકૂટમાં શ્રીહરિના પ્રત્યક્ષપણે ભોજનના આચરણની વાર્તા) સાંભળીને પ્રસન્ન થયેલા, પોતાના ભક્તની માફક



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**आज्ञापयामास ततो मुनीन्द्रान्स्वपार्षदांश्चाशितुमाशु चान्यान् ।।२९।।** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे अन्नकूटोत्सवे भगवतः प्रत्यक्षभोजनलीलानिरूपणनामैकोनविंशोऽध्यायः ।।१९।।

सुव्रत उवाच- **आज्ञयाथ हरेः सर्वे मुनयः साधवो नृप ! । कृतशुद्धिविधानास्ते भोक्तुमीयुस्त्वरान्विताः ।।१।। अनुज्ञातो भगवता सर्वांस्तान्भोजकान्नृप ! ।उपावीविशदायातान्मुक्तानन्दो यथोचितम् ।।२।। मर्यादयोपविष्टेषु तेषु त्यागिषु पङ्क्तिशः। जलानि बिभरामासुर्बद्धकच्छा द्विजातयः ।।३।। आज्ञापयामास ततो भगवान्निजपार्षदान् । द्विजानन्यांश्च शतशः परिवेषणकर्मणि।।४।। आदौ पत्रावलीर्दत्त्वा ततः पर्णपुटान् दृढान् । दत्त्वा क्रमेण शाकानि द्विजास्ते पर्यवेषयन् ।।५।। स्नातः स्वयं च कौशेयाबद्धपीताम्बरश्चरन् । पङ्क्तिमध्येषु मुनिभिः परिविष्टिमकारयत् ।।६।। तत्रानाभ्यस्ततत्कर्मा मुक्तानन्दस्तु बुद्धिमान्। अभिज्ञ इव युक्त्यैव चक्रे तत्परिवेषणम् ।।७।। ब्रह्मानन्दस्तु झटिति हरये करलाघवम् । दर्शयन् हासयामास तं च भक्तजनान्भृशम् ।। ८।।**

**विचित्रभक्ष्यभोज्यादेर्नामान्युच्चारयंस्तदा । महानुभावानन्दोऽपि हासयामास चाखिलान् ।।९।। नित्यानन्दशुकानन्दौ परिवेषणकर्मणि । स्तूयेते स्मातिचार्तुयात्सर्वैः सहरिभिर्जनैः ।।१०।। सर्वपङ्क्तिषु साम्येन पदार्थार्पणलाघवात् । आनन्दानन्द आनन्दं हरेरजनयत्तदा ।।११।। स्वयम्प्रकाशानन्दश्च मुनिः श्यामलविग्रहः। ध्याननिष्ठावशतया पर्यवेषयदक्रमम् ।।१२।।**

(મનુષ્યલીલાથી) આશ્ચર્ય પામ્યા. પછી મુનીન્દ્રો અને પોતાના પાર્ષદો અને બીજાં જનોને જમવા માટે તત્કાલ આજ્ઞા આપતા હતા. (૨૯)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે અન્નકૂટોત્સવે ભગવતઃ પ્રત્યક્ષ ભોજનલીલા નિરૂપણ નામૈકોનવિંશોઽધ્યાયઃ (૧૯)*

## અધ્યાય : ૨૦

## નાના પ્રકારનાં ભોજનોથી સાધુઓને જમાડવામાં શ્રીહરિનું સાધુઓને પીરસવું વગેરેથી શ્રી મુનિસમુદાયોને મહાઆનંદ કહ્યો છે.

**સુવ્રત મુનિ બોલ્યા :** હે રાજન્ ! પછી શ્રી નારાયણ મુનિની આજ્ઞાથી સમગ્ર સાધુઓ હાથ, પગ, મુખની શુદ્ધિ કરી ઉતાવળા થઈને જમવા માટે આવ્યા. (૧) હે નૃપ ! શ્રીહરિએ આજ્ઞા કરેલા મુક્તાનંદ મુનિ, આવેલા તે સર્વે સાધુઓને યથા યોગ્ય બેસાડતા હતા. (૨) ત્યાગીઓમાં વડીલ વગેરેની મર્યાદાથી, પોતાના સમાન સાધુઓમાં યોગ્યતા પ્રમાણે પંક્તિબદ્ધ બેઠા ત્યારે કછોટા વાળીને બ્રાહ્મણો ઉન્મત્તગંગાના ગાળેલા જળથી મુનિઓનાં કમંડલો ભરાવતા હતા. (૩) પછી ભગવાન શ્રીહરિ હંમેશા પોતાની પાસે રહેનારા મુકુંદાનંદ અને મુક્તાનંદ વગેરે અને બીજા બ્રાહ્મણોને મુનિઓની પંક્તિઓમાં પીરસવાની આજ્ઞા આપતા હતા. (૪) તે બ્રાહ્મણો પ્રથમ પત્રાવળાં અને પડિયા આપીને અનુક્રમ પ્રમાણે શાકો પીરસતા હતા. (૫) સ્વયં શ્રીહરિ સ્નાન કરી પીતાંબર પહેરી અને ઓઢવાના રેશમી વસ્ત્રથી કેડ્ય બાંધીને મનોહર ચલન ચાતુરીથી પંક્તિઓમાં ફરતા થકા મુનિઓ પાસે પિરસાવતા હતા. (૬) તે પિરસનારાઓમાં મુક્તાનંદમુનિને તો પીરસવાના કાર્યમાં અભ્યાસ નહોતો તો પણ પ્રતિભાશાળી હોવાથી પીરસવામાં યથાર્થ પ્રવીણની માફક જ યુક્તિથી જ સાધુઓની પંક્તિમાં પીરસતા હતા. (૭) બ્રહ્માનંદ મુનિ તો શ્રી નારાયણમુનિને પોતાના હાથથી પીરસવાની ઉતાવળ બતાવવા માટે પીરસતા સતા શ્રીહરિને તથા સાધુઓ અને હરિભક્તોને અત્યંત હસાવતા હતા. (૮)

તે સમયે મહાનુભાવાનંદ મુનિ પણ નાના પ્રકારનાં ભક્ષ્ય ભોજ્યાદિનાં નામો યથાર્થ નહિ જાણતા હોવાથી વિપરીતપણે ઉચ્ચારણ કરતા સતા સમગ્ર મુનિઓને હસાવતા હતા. (૯) નિત્યાનંદમુનિ અને શુકાનંદમુનિ પીરસવાના કાર્યમાં અતિકુશળ હોવાથી શ્રીનારાયણમુનિ સહિત સાધુઓ અને હરિભક્તો તેમની પ્રશંસા કરતા હતા. (૧૦) તે સમયે આનંદાનંદમુનિ મુનિઓની બધી પંક્તિઓમાં સરખી રીતે પદાર્થો આપવાની શીઘ્રતાથી શ્રીહરિની પ્રસન્નતાને ઉત્પન્ન કરાવતા હતા. (૧૧) શ્યામ વર્ણવાળા અને અતિ શાંત સ્વભાવવાળા સ્વયંપ્રકાશાનંદ મુનિ, શ્રીહરિના ધ્યાનપરાયણ હોવાથી અનુક્રમ વિના જેમ તેમ પીરસતા હતા. (૧૨) દુર્બળ શરીર હોવા છતાં પણ પીરસવામાં પ્રવીણ આત્માનંદમુનિ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

आत्मानन्दः कृशाङ्गोऽपि परिपेषणपाटवः । क्षणेनैकेन वटकान् परितः पर्यवेषयत् ॥१३॥ मुकुन्दानन्दमुख्याश्च भगवत्प्रीतये तदा । शष्कुलीखाजकादीनि परितः पर्यवेषयन् ॥१४॥ व्यञ्जनानि विचित्राणि पक्वान्नानि च सर्वशः । सर्वेषामेव पात्रेषु नापुरन्योन्यमिश्रताम् ॥१५॥ सर्वे सर्वेषु पात्रेषु परिवेषितमीश्वरः । विलोक्याज्ञापयामास भोक्तुं सर्वान्निजाश्रितान् ॥१६॥ ततो बुभुजिरे राजन् ! गृहीताज्ञाः परस्परम् । साधवो मुनयः सर्वे स्तुवन्तोऽद्यगुणान्मुहुः ॥१७॥ सर्वमेव हि सुस्वादु भक्ष्यं भोज्यं तदश्नताम् । क्रमप्राप्ते पदार्थेऽभूद्रसास्वादो विशेषतः ॥१८॥ पुनः पुनः स्वपात्रेषु शष्कुलीघृतपूरकान् । क्षिपतो भोजकाः साधून् न्यषेधन्करधूननैः ॥१९॥ निषेधद्भ्यः परावृत्तानशनद्भ्यः परिवेषकान् । ऋजुबुद्धीन् मुनीन्प्राह भगवान्प्रहसंस्तदा ॥२०॥ हांहां हुंहुं रवे देयं देयं च करधूनने । शिरःकम्पेऽपि दातव्यं न देयं सिंहगर्जने ॥२१॥ इत्युक्तास्ते तु मुनयो लड्डुकान्मौक्तिकाह्वयान् । आसिंहगर्जनात्तेषाममत्रेष्वक्षिपन्नृप ! ॥२२॥ औत्सुक्यादथ दृढबद्धपीतवासाः साधूनां नृप ! परिवेषणं विधातुम् । उत्तस्थौ स्वयमपि हर्षयन्स्वभक्तान्सर्वेषामपि स तदैकदृश्य आसीत् ॥२३॥ ज्ञात्वा तं मुनिपरिवेषकाममीशं पक्वान्नाचितपृथुरीतिपात्रहस्ताः । धावन्तो रभसपराग्भवत्पुरोगं ह्यासेदुः सपदि तदन्तिकं द्विजाश्च ॥२४॥ तत्तत्पात्रात्स गृह्णंश्चपलगतिपदो लड्डुकान्मौक्तिकाख्यान् द्वौ द्वौ दोर्भ्यां च पङ्क्तिक्रमणमनुसृतः प्रत्यमत्रं ददानः । स्वानां स्वीयप्रसादाभिलषितमपि सम्पूरयन्पूर्णकामस्तेषां सर्वासु पङ्क्तिष्वपि मुहुरचरद्भूरिदोर्लाघवश्रीः ॥२५॥ लड्डुकान्स परिवेष्य मौक्तिकानाशु शाष्कुलिकमप्यनाकुलः । पर्यवेषयदवापुरद्भुतं तेन भूरि परिवेषका अपि ॥२६॥ सर्वतः परिवेष्येत्थं

---

મુહૂર્ત માત્રમાં બધી પંક્તિઓમાં વડાં પીરસી દેતા હતા. (૧૩) તે સમયે મુકુંદાનંદાદિ વર્ણીઓ ભગવાનની પ્રસન્નતા માટે સર્વ પંક્તિઓમાં જલેબી અને ખાજાં વગેરે પીરસતા હતા. (૧૪) નાના પ્રકારનાં સમગ્ર શાકો અને નાના પ્રકારનાં જલેબી વગેરે પકવાનો સર્વ મુનિઓનાં પતરાવળાંઓમાં એકબીજા સાથે ભેગાં નહોતાં થઈ ગયાં, કેમ કે વિશાળ પતરાળાં હતાં તે રીતે પીરસનારા પણ તેમાં પ્રવીણ હતા. (૧૫) પરમેશ્વર શ્રીહરિ સમગ્ર પાત્રોમાં પીરસેલાં પદાર્થ માત્ર જોઈને પોતાના આશ્રિત મુનિઓને જમવાની આજ્ઞા આપતા હતા. (૧૬) હે રાજન્ ! પછી પરસ્પર આજ્ઞા ગ્રહણ કરી સર્વે સાધુઓ ભોજનના વિવિધ સ્વાદોની વારંવાર પ્રશંસા કરતા સતા જમતા હતા. (૧૭) સારા સ્વાદયુક્ત ભક્ષ્ય ભોજ્યાદિ જમનારા મુનીઓને જલેબી પછી સાટાં-પુરી વગેરે ભોજનના અનુક્રમથી જમવાના પદાર્થોમાં અતિશય સ્વાદ આવતો હતો. (૧૮) જલેબી અને ઘેબર વારંવાર પીરસતા મુક્તાનંદાદિ સાધુઓને ભોજન કરનારા સાધુઓ હાથ હલાવવાથી વારંવાર નિષેધ કરતા હતા. (૧૯) નિષેધ કરનાર જમનારા સાધુઓથી પાછાં વળી જતાં સરલ બુદ્ધિવાળા પીરસનારા સ્વયંપ્રકાશાનંદ, મહાનુભાવાનંદાદિ મુનિઓને તે સમયે શ્રીહરિ હસતા સતા કહેવા લાગ્યા : (૨૦) હે મુનિઓ ! ‘ હાં હાં’ આ પ્રકારના શબ્દ, ભોજન કરનારા કરે તોપણ પીરસવું. ‘હું હું’ આવું કરે તો પણ આપવું. હાથ હલાવે અથવા માથું ધુણાવે તો પણ આપવું. સિંહની માફક ગર્જના કરે ત્યારે આપવું નહિ. (૨૧) હે રાજન્ ! આ પ્રકારે શ્રીહરિએ કહેલા પીરસનારા મુનિઓ સિંહગર્જના સુધી ભોજન કરનારા સાધુઓનાં પાત્રોમાં મોતિયા લાડુઓ આપતા હતા. (૨૨) હે રાજન્ ! પછી શ્રીહરિ પણ પોતાના ભક્તોને આનંદ આપતા દૃઢ જેમ હોય તેમ પહેરેલા પીતાંબરને ઓઢવાના વસ્ત્રથી, ખભાથી કેડ્ય સુધી બાંધી સાધુઓને પીરસવામાં પોતાને ઉત્સાહ હોવાથી સાધુઓને પીરસવા માટે ઊભા થયા. તે સમયે સર્વે મુનિઓ અને હરિભક્તોને પણ એકદર્શનીય હતા. (૨૩) પરમેશ્વર શ્રીહરિને મુનિઓને પીરસવાની ઈચ્છા જાણી મોતિયા લાડુ, જલેબી વગેરેથી ભરેલાં મોટાં પાત્રો હાથમાં જેમને છે એવા, ઉતાવળા ચાલતા પીરસનારા મુનિઓ શ્રીહરિની સન્મુખ પાત્રો હાથમાં રાખીને પાછે પગલે ચાલવા માટે તત્કાળ જ શ્રીહરિની સમીપમાં આવ્યા. (૨૪) શ્રીહરિ તે તે પોતાની આગળ ધરેલાં પાત્રોમાંથી મોતિયા લાડુ ગ્રહણ કરતા ચપલ ગતિયુક્ત ચરણવાળા, પંક્તિના અનુક્રમે આશરીને પોતાના બન્ને હાથથી બે બે લાડુઓ દરેક મુનિઓનાં પાત્રોમાં આપતા સતા પોતાના જમનારા મુનિઓની પોતાની પ્રસાદીની અભિલાષાને પણ પૂરણ કરતા, પૂર્ણકામવાળા છતા પીરસવામાં અતિશય બન્ને હસ્તની શીઘ્રતાની શોભાવાળા થકા મુનિઓની પ્રત્યેક પંક્તિઓમાં વારંવાર વિચરતા હતા. (૨૫) શ્રીહરિ મોતિયા લાડુ તત્કાલ પીરસીને શાંતિથી હાથમાં જેટલી આવે તેટલી જલેબી પીરસતા હતા. આથી પીરસવામાં અતિ નિપુણ પુરુષો પણ અત્યંત આશ્ચર્ય પામ્યા. (૨૬) આ પ્રમાણે સર્વ પંક્તિઓમાં પીરસીને મંદ હાસ્યયુક્ત મુખારવિંદવાળા શ્રીહરિએ ‘તમો ધીમે ધીમે ઈચ્છા પ્રમાણે જમો’ આ પ્રકારે કહીને બંને હાથ

प्रहसद्वदनो हरिः । भुङ्ग्ध्वं यथेष्टं शनकै रित्युक्त्वाऽशोधयत्करौ ॥२७॥ धृत्वाथ घृतभृङ्गारं निषिञ्चन् स्थूलधारया । मुनिपायसपात्रेषु मुकुन्दोऽहासयत्प्रभुम् ॥२८॥ पात्रसम्भृतपक्वान्नांस्तानथेङ्गितविद्धरेः। स एव वर्णिराडुच्चैः प्राह नैष्ठिक ऊर्ध्वदोः ॥२९॥ हरेः प्रासादिकं खाद्यं स्वपात्रे केनचित्क्वचित्। नावशेष्यं महामुक्ता ! इत्याज्ञा पारमेश्वरी ॥३०॥ इत्युक्ते तेन तद्वाक्यं ब्रह्मानन्दोऽतिमानयन् । हसन्नाम्रेडितं कृत्वा श्रावयंस्तानभोजयत् ॥३१॥ तद्भयादेव भक्ष्याणि सर्वे तेऽपि शनैः शनैः । अभुञ्जतैव निःशेषं वीक्षमाणाः परस्परम् ॥३२॥ ओदनं क्वथिकां चाथ घृतं च प्रचुरं प्रभुः । परिवेष्य द्विजैः सर्वांस्तर्पयामास भोजकान् ॥३३॥ अतितृप्तान्भोजनेन गृहीतचुलुकोदकान् । स्वस्वस्थानं ततो गन्तुं हरिराज्ञापयच्च तान् ॥३४॥ आज्ञप्ता अपि हरिणा स्वकीयशालां गन्तुं ते मुनिनिकरास्तदीक्षणोत्काः । यावत्तद्बहिरुपवेशनं नृपाऽऽसीत्तावत्तेऽप्यमुमुपतस्थिरे स्वनाथम् ॥३५॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे अन्नकूटोत्सवे साधुसन्तर्पणनामा विंशोऽध्यायः ॥२०॥

सुव्रत उवाच–ततो भोजयितुं स्वामी क्षत्रियादीन्निजाश्रितान् । आज्ञापयन्नृपं सोऽपि सत्वरं तानुपाह्वयत् ॥१॥ पञ्चार्द्रान् पङ्क्तिशः सर्वान् यथार्हं तानवीविशत् । परिवेषयितुं तांश्च द्विजानन्यान् स आदिशत् ॥२॥ अन्नं चतुर्विधं सर्वं सत्वरं पर्यवेषयन्। द्विजास्तांस्तेऽथ मुनिवत्सर्वे बुभुजिरे नृप ! ॥३॥ भुञ्जानान् भगवान् प्रीत्या पुनः पुनरदापयत् । पक्वान्नं

જળથી ધોયા. (૨૭) પછી મુકુંદાનંદ નામના વર્ણીરાજ ઘી થી ભરેલી સોનાની વાઢી (ઝારી) ધારણ કરી મુનિઓનાં દૂધપાક ભરેલાં પાત્રોમાં મોટી ધારથી ઘી પીરસતા સતા શ્રીહરિને હસાવતા હતા. (૨૮) શ્રીહરિના હૃદયનો અભિપ્રાય જાણનાર નૈષ્ઠિક બ્રહ્મચારી મુકુંદાનંદ બન્ને હાથ ઊંચા કરી જેમના પાત્રોમાં પકવાનો ભરેલા છે એવા ભોજન કરનારા મુનિઓને ઉચ્ચ સ્વરથી કહેવા લાગ્યા : (૨૯) હે મહામુક્તો ! કોઈ મુનિએ ક્યારેય પણ શ્રીહરિની પ્રસાદી ભોજન વસ્તુ પોતપોતાના પાત્રમાં બાકી રાખવું નહીં : આ પ્રમાણે પરમેશ્વરની આજ્ઞા છે. (૩૦) હે રાજન્ ! આ પ્રકારે મુકુંદાનંદ વર્ણીએ કહ્યું ત્યારે બ્રહ્માનંદ મુનિ તેમનું વાક્ય સાંભળીને અતિ માન આપતા સતા હસતા હસતા બે-ત્રણ વખત મુનિઓને સંભળાવતા થકા તેમને જમાડતા હતા. (૩૧) તે સર્વે જમનારા મુનિઓ પરસ્પર જોતા સતા મુકુંદાનંદ વર્ણીએ કહેલું શ્રીહરિના વચનના ભંગભયથી ભોજન વસ્તુઓને ધીરે ધીરે સમગ્ર જેમ હોય તેમ જમતા હતા. (૩૨) પછી શ્રીહરિ ભાત, કઢી અને પુષ્કળ ઘી મુનિઓ દ્વારા પીરસીને ભોજન કરનારા મુનિઓને તૃપ્ત કરતા હતા. (૩૩) શ્રીનારાયણ મુનિ ભોજનથી અતિ તૃપ્ત થયેલા અને જેમણે હાથપગ ધોઈને ચળુ કરેલું છે એવા મુનિઓને તે સ્થાનથી પોતપોતાના નિવાસસ્થાનમાં જવા માટે આજ્ઞા આપતા હતા. (૩૪)

હે નૃપ! શ્રીનારાયણ મુનિએ પોતપોતાના નિવાસભૂત ધર્મશાળાઓમાં જવા માટે આજ્ઞા આપેલા સાધુઓના સમૂહો શ્રીહરિનાં દર્શનમાં ઉત્સાહવાળા હોવાથી જ્યાં સુધી શ્રીહરિ લીંબડા નીચે ઓટલા ઉપર બહાર બેસી રહ્યા ત્યાં સુધી મુનિઓ પણ પોતાના સ્વામી શ્રીહરિના દર્શનમાત્રથી તેમનું સેવન કરતા હતા. (૩૫)

*ઈતિશ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે અન્નકૂટોત્સવે સાધુસંતર્પણનામા વિંશોઽધ્યાયઃ (૨૦)*

## અધ્યાય : ૨૧

## પાર્ષદોએ સહિત ઉત્તમ વગેરે રાજાઓનાં મંડળોને ભોજનથી સંતૃપ્ત કરવામાં શ્રીહરિની પીરસવાની લીલા કહેલી છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! પછી શ્રી સ્વામિનારાયણ ભગવાન પોતાના આશ્રિત ક્ષત્રિયાદિ ભક્તોને જમવા માટે આજ્ઞા આપતા હતા. (૧) શ્રીહરિ, જેમણે હાથ-પગ-મુખ વગેરે ધોયાં છે એવા સર્વ ક્ષત્રિયાદિ ભક્તજનોને યથાયોગ્ય પંક્તિબદ્ધ બેસાડતા હતા. તેઓને પીરસવા માટે બીજા બ્રાહ્મણો અને મુનિઓને આજ્ઞા આપતા હતા. (૨) હે રાજન્ ! બ્રાહ્મણો અને મુનિઓ ક્ષત્રિયાદિ ભક્તોને ભક્ષ્યાદિ ચાર પ્રકારનું સમગ્ર અન્ન તત્કાળ પીરસતા હતા. પછી સર્વે ભક્તો મુનિઓની માફક જ જમતા હતા. (૩) શ્રીહરિ જમનારા તે ભક્તોને માર્મિક વચનોથી હાસ્ય કરાવતા અને પોતે હસતા

व्यञ्जनादीनि हसंस्तांश्च स हासयन् ॥४॥ तृप्तानिव समालक्ष्य नृपादींस्तांस्ततः स्वयम् । तेषां स्वदोःप्रसादेच्छामुदतिष्ठद्विदन्प्रभुः ॥५॥ तिष्ठन्नुच्चे स पीठे पृथुलकटितटाबद्धकौशेयवासा नानापुष्पावतंसः स्थलकमलमिलन्मल्लिकाहारराजिः । नानाभक्तेक्षणाब्जै परिरचितमहातोरणश्रीभिरेभिः सग्रासास्यास्फुटोच्चैर्जयजयवचनैर्हासितोऽसौ व्यराजत् ॥६॥ आहूतैश्चपलमुपागतैर्मुनीन्द्रैः पक्वान्नाभृतपृथुताम्रपात्रहस्तैः । तस्याग्रे चपलपराग्गतिप्रवीणैस्तद्दोष्णोः स्तिमितविलोचनैश्च तस्थे ॥७॥ दोर्भ्यां तूर्णं गृहीत्वा मुनियुगलधृतात् पात्रतः शष्कुलीनां षट्कं वा सप्तकं वा झटितिपदगतिः प्रत्यमत्रं ददानः। पात्रस्थाद्यैरपि स्वैर्विकचसरसिजाभोर्ध्वहस्तद्वयैस्तैः प्रीत्यैवाभ्यर्थ्यमानः स्मितमधुरमुखः पङ्क्तिशः सर्वतोऽगात् ॥८॥ एकवारं हरिः कृत्वा सर्वत्र परिवेषणम् । पर्पिकाखाजकादींश्च स मुहुः पर्यवेषयत् ॥९॥ परिवेषणचातुर्यान्मुहुः सर्वत्र चेक्षणात् । बहुरूप इवादर्शि जनैरचिरकृत्प्रभुः ॥१०॥ गृहाण पिण्डकं सोम ! गृहाणालर्क ! शष्कुलीम् । मृदुलं खाजकमिदं जीववर्मन् ! गृहाण भो ! ॥११॥ गृहाण गोलकं वीर ! रत्नजित् ! पर्पिकां च भो ! । वदन्नेवं हरिः प्रादात्सर्वेभ्योऽपि मुहुर्मुहुः ॥१२॥ हरेः प्रसादमाहात्म्यं विदन्तो भोजकाश्च ते । अभुञ्जत तदाऽऽकण्ठं स्वयं चाप्याप्तविस्मयाः ॥१३॥ तृप्तत्वाच्च सफूत्कारमश्नन्मृदुलशष्कुलीम् । सुरस्तां ददतं प्राह तुन्दस्फाटो भविष्यति ॥१४॥ इत्युक्त्वन्तं तं स्वामी प्राह चिन्ताऽत्र नास्ति वै। यतः कृष्णप्रसाद्यन्नमश्नतां नोदरं स्वकम् ॥१५॥ अनूर्ध्ववदनं नाज्ञं कुर्वन्तं करधूननम् । दृष्ट्वा

---

સતા પ્રીતિપૂર્વક પકવાનો અને શાક વગેરેને વારંવાર અપાવતા હતા. (૪) શ્રીહરિ ઉત્તમાદિ પોતાના ભક્તોને તૃપ્ત થયેલા જેવા જાણતા સતા તે રાજાઓને પોતાના હાથની પ્રસાદીની ઈચ્છા જાણીને પોતે પીરસવા ઊભા થયા. (૫) સહજ ઊંચા અને ઊંચી વેદી ઉપર રહેલું હોવાથી અતિ ઊંચા સિંહાસનમાં ઊભા રહેલા શ્રીહરિ વિશાળ કેડ્ય ઉપર પહેરેલાં પીતાંબર ઉપર બાંધેલા રેશમી વસ્ત્રથી અને ઘણા પ્રકારનાં પુષ્પોના ગુચ્છોથી અને કંઠમાં શોભતા ગુલાબની સાથે ગૂંથાયેલા મોગરાનાં પુષ્પોના હારોથી શોભતા શ્રીહરિને સર્વ કોઈ તે નાના પ્રકારના ભક્તજનોએ નેત્રોરૂપી કમળોથી શ્રીહરિની સન્મુખ જોવાથી કમળના મહાતોરણની શોભાથી યુક્ત હોય એવા; ભોજન કરનારા ક્ષત્રિયોએ ગ્રાસે સહિત મુખવાળા હોવાથી સ્પષ્ટ ઉચ્ચારણ નહિ થતા એવા ઊંચેથી 'જય જય' આ પ્રકારનાં વચનોથી હાસ્યને પમાડેલા, આસનથી ઊભા થયેલા શ્રીહરિ અત્યંત શોભતા હતા. (૬) શ્રીહરિએ બોલાવવાથી તત્કાળ આવેલાં તેમજ પકવાનોથી પરિપૂર્ણ વિશાળ તામ્ર-પાત્રો હાથમાં જેમને છે એવાં, શ્રીહરિના આગલા ભાગમાં ચપળતાથી પાછે પગે ચાલવામાં અતિ નિપુણ તથા શ્રીહરિનાં બંને હસ્તકમળોમાં નિશ્ચળ નેત્રોવાળા પીરસનારા સાધુઓ શ્રીહરિની આગળ ઊભા રહ્યા. (૭) પછી બે મુનિઓએ ધારણ કરેલાં જલેબીનાં પાત્રથી છ અથવા સાત જલેબી પોતાના બંને હાથોથી તત્કાલ ગ્રહણ કરીને દરેકના પાત્રમાં પીરસતા સતા ઉતાવળથી ચાલતા શ્રીહરિ, જેમના પોતપોતાનાં પાત્રોમાં ભોજનો રહેલા છે છતાં પણ પ્રફુલ્લિત કમળોના જેવી કાંતિવાળા ઊંચા કરેલા બન્ને હાથ જેમના છે એવા પોતાના ભક્તોએ સ્નેહથી પ્રસાદીના મહિમાથી 'મને આપો' એમ પ્રાર્થના કરાયેલા; મંદ હાસ્ય યુક્ત, સુંદર મુખારવિંદવાળા શ્રીહરિ સર્વે પંક્તિઓમાં વિચરણ કરતા હતા. (૮) શ્રીહરિ એક વાર સર્વ પંક્તિઓમાં જલેબી આપીને બરફી, ખાજાં વગેરે પદાર્થને વારંવાર પીરસતા હતા. (૯) ઉતાવળથી પીરસનારા શ્રીહરિ એક હોવા છતાં પણ અનેક હોયને શું ? એમ જોનારાં જનોને દેખાતા હતા. (૧૦) હે સોમભક્ત! પેંડા ગ્રહણ કરો, હે અલૈયા ! જલેબી ગ્રહણ કરો. હે જીવા ખાચર ! કોમળ ખાજાં ગ્રહણ કરો ! (૧૧) હે વીર વર્મા ! આ મોતિયા લાડુઓ ગ્રહણ કરો. હે રતનજી ! બરફી ગ્રહણ કરો. હે રાજન્ ! આ પ્રમાણે બોલતા સતા નારાયણમુનિ સર્વ ભક્તજનોને પણ વારંવાર આપતા હતા. (૧૨) તે સમયે શ્રી નારાયણ મુનિના પ્રસાદનું માહાત્મ્ય જાણનારા ભોજન કરનારા પોતે પણ વિસ્મય પામીને કંઠ પર્યન્ત જમતા હતા. (૧૩) સુરવર્મા તૃપ્ત થયેલા હોવાથી કોમળ જલેબી ફૂત્કારે સહિત જેમ હોય તેમ ખાતા સતા બીજી કોમળ જલેબી આપતા શ્રીહરિને કહેવા લાગ્યા : હે ભગવન્ ! મારું પેટ ફાટી જશે. (૧૪) હે રાજન્ ! આ પ્રમાણે કહેતા સુરાભક્તને શ્રીહરિ કહેતા હતા : હે સુરાભક્ત ! ઉદર ફાટવામાં ચિંતા નથી કારણ કે ભગવાનની પ્રસાદી અન્ન જમનારા ભક્તોને ઉદર પોતાનું નથી હોતું. ભગવાનની પ્રસાદી-અન્નજન્ય શુદ્ધિથી ત્રણ દેહથી વિલક્ષણ આત્માને પૃથક્ માનનારને ઉદરની સાથે સંબંધ જ ક્યાં છે? આવા ઉપદેશપૂર્વક પરિહાસ કરતા હતા. (૧૫) નીચું મુખ રાખીને,હાથ હલાવીને ના

करेण तत्पात्रे शष्कुलीं हरिरक्षिपत् ॥१६॥ अब्रुवाणं तथाप्येनं दृष्ट्वादात्स हसन् प्रभुः । तिस्रोऽन्याः स तदा चक्रे ह्यूर्ध्वदृक् सिंहगर्जनाम् ॥१७॥ दूराद्दृष्ट्वा हरिं स्वीयं धूनयन्तं शिरः शनैः । सोमं दृष्ट्वा तत्समीपं स उपेत्याब्रवीद्वच : ॥१८॥ स्थविरेण त्वया खाद्ये न गृहीतेऽयमुत्तमः । लज्जिष्यत इति प्रोच्य ददौ तस्मै स शाटकान् ॥१९॥ दूरादेव प्रकुर्वन्तमलीकं सिंहगर्जनम् । मान्त्रिकं स प्रभुः प्रापत्तद्विद्विरदनाननम् ॥२०॥ पायसेन घृताक्तेन पृथुलं कांस्यभाजनम् । तदीयं पूरयामास तदोच्चैः सोऽकरोद्ध्वनिम् ॥२१॥ ततोऽन्यत्र हसन्प्रायाद्दोश्चतुर्लड्डुकः प्रभुः । रिक्ते हम्मीरजित्पात्रे तान् क्षिप्त्वा जगृहेऽपरान् ॥२२॥ लज्जयैव निषेधन्तं कराभ्यां तमवेत्य च । पुनः करस्थांस्तान्दत्त्वा सिंहध्वनिमचीकरत् ॥२३॥ दृष्ट्वा वैरिभियं वृद्धं चर्वन्तं पर्पटं शनैः । त्वद्योग्यमेतदित्युक्त्वा प्रादात्तस्मै स पर्पिकाम् ॥२४॥ एवमानन्दयन्भक्तान् पार्षदान् स्वान्स इश्वरः । सर्वानपि मुहुः प्रीत्या यथेष्टं पर्यवेषयत् ॥२५॥ पक्वान्नभृतपात्राणि गृहीत्वा मुनयः प्रभोः । समीप एव बहवस्तिष्ठन्ति स्म विचक्षणाः ॥२६॥ समाप्यमान एकस्मिन् पात्रे सद्योऽपरं परे । न्यधारयन् पूर्णपात्रं नारायणमुनेः पुरः ॥२७॥ हरेः पृष्ठचरो ब्रह्मानन्दोऽदत उवाच तान् । एतादृशप्रसादाप्ती राजानो ! दुर्लभा ननु ॥२८॥ अनित्य एव देहोऽस्ति यूयमित्यपि वेत्थ वै । अतो वपुरनादृत्य सम्यगश्नीत निर्भयाः ॥२९॥ इत्युक्ते तेन जहसुर्भोजकाश्च हरिः स्वयम् । सर्वत्र पात्रपूरं हि चकार परिवेषणम् ॥३०॥ सहासमित्थं तान् सर्वान् यथेष्टं परिवेष्य च । हस्तप्रक्षालनं कृत्वा पीठे तस्थौ ततः प्रभुः ॥३१॥ ललाटं

---

પાડતા નાજા ભક્તને જોઈને શ્રીહરિએ પોતાના હાથથી તેમના પાત્રમાં જલેબી મૂકી; (૧૬) તોપણ લગારે બોલતા નહિ એવા નાજા ભક્તને જોઈને શ્રીહરિ હસતા સતા બીજી ત્રણ જલેબી મૂકતા હતા. તે સમયે તે ભક્ત ઊંચી દષ્ટિ કરીને સિંહ-ગર્જના કરતા હતા. (૧૭) દૂરથી શ્રીહરિને જોઈને મસ્તક ધુણાવતા સોમવર્માને જોઈને શ્રીહરિ એમના સમીપમાં જઈ વચન બોલ્યા : (૧૮) હે સોમવર્મા ! વૃદ્ધ એવા તમોએ ખાવાનો પદાર્થ ગ્રહણ ન કર્યો તેથી તમારી સમીપમાં બેઠેલા જુવાન ઉત્તમ રાજા લાજથી ગ્રહણ નહિ કરે. આ પ્રકારે કહીને શ્રીહરિએ સોમવર્માને સાટાં આપ્યાં. (૧૯) દૂરથી જ ખોટી સિંહગર્જના કરતા, દાંતે સહિત મુખવાળા માંત્રિક (માતરા) ભકતને જાણનારા શ્રીહરિ તેની સમીપમાં ગયા. (૨૦) શ્રીહરિએ વિશાળ તેના પાત્રને ઘીથી મિશ્રિત દૂધપાકથી ભરી દીધું તે સમયે માંત્રિક ભક્ત ઊંચા સ્વરથી સિંહની માફક સાચી ગર્જના કરતા હતા. (૨૧) પછી શ્રીહરિ હસતા સતા બંને હાથમાં બે બે લાડુ ધારણ કરતા થકા બીજી પંક્તિમાં ગયા. હમીરજીતના ખાલી પાત્રમાં ચાર લાડુ મૂક્યા, બીજા ચાર લાડુ ગ્રહણ કર્યા. (૨૨) કેવળ લાજથી જ પોતાના બંને હસ્તોથી નિષેધ કરતા હમીરજીતને જાણીને ફરીથી પોતાના બંને હસ્તોથી નિષેધ કરતા હમીરજીતને જાણીને ફરીથી શ્રીહરિ પોતાના બંને હાથોમાં રહેલા ચાર લાડુ પણ આપીને સિંહધ્વનિ કરાવતા હતા. (૨૩) શ્રીહરિએ ધીમે ધીમે પાપડને ચાવતા વૃદ્ધ વેરીભાઈને જોઈને ‘આ ખાદ્ય તમારે ખાવાં યોગ્ય છે’ એમ કહીને બરફી આપી. (૨૪) પરમેશ્વર શ્રીહરિ આ પ્રકારે પોતાના પાર્ષદો સોમવર્માદિને અને દેશાન્તરથી આવેલા ક્ષત્રિય જાતિનાં પોતાનાં ભક્તજનોને આનંદ પમાડતા થકા તે સર્વજનોને વારંવાર પ્રીતિથી ઈચ્છા પ્રમાણે પીરસતા હતા. (૨૫) ભગવાનની આગળ ખાવાના પદાર્થોથી ભરેલાં પાત્રો ધારણ કરવામાં નિપુણ મુનિઓ પકવાનનાં પાત્રો ગ્રહણ કરી શ્રીહરિની સમીપે જ ઊભા રહ્યા. (૨૬) એક પાત્ર ખાલી થાય ત્યારે બીજા મુનિઓ પકવાન ભરેલું પાત્ર તત્કાલ જ શ્રીનારાયણમુનિની આગળ ધારણ કરતા હતા. (૨૭) શ્રીહરિકૃષ્ણની પછવાડે ચાલતા બ્રહ્માનંદ મુનિએ ભોજન કરનારા ક્ષત્રિય ભક્તોને કહ્યું : હે રાજાઓ, આ પ્રકારે પ્રત્યક્ષ ભગવાને આપેલા પ્રસાદની પ્રાપ્તિ તો નિશ્ચે દુર્લભ છે. (૨૮) પાંચ ભૌતિક દેહ તો અનિત્ય છે : આવી રીતે તમે જાણો. અતિ ભોજન કરવાથી દેહ પડી જશે એવી શંકા કરવી નહિ; માટે પોતાના શરીરને નહિ ગણીને ભયે રહિત સારી રીતે જમો. (૨૯) હે રાજન્ ! આ પ્રમાણે બ્રહ્માનંદ મુનિએ કહેલા ભોજન કરનારા હસતા હતા અને સ્વયં શ્રીહરિ પણ હસતા સતા સર્વ પંક્તિઓમાં પાત્ર જે પ્રકારે પૂરાઈ જાય તેમ પીરસતા હતા. (૩૦) શ્રીહરિ આ પ્રકારે હાસ્ય સહિત સર્વજનોને ઈચ્છા પ્રમાણે પીરસીને હાથ ધોઈને પછી વેદી ઉપરના સિંહાસનમાં બેઠા. (૩૧) શ્રીહરિના લલાટમાં પરિશ્રમથી ઉત્પન્ન થયેલાં પરસેવાનાં બિંદુઓથી શ્રીહરિનું લલાટ પૂજા કરનારાં જનોએ મોતીઓની લલાટિકા (ભાલ પ્રદેશનું મોતીઓનું ઘરેણું) થી અલંકૃત કરેલું

**शुशुभे तस्य श्रमस्वेदस्य बिन्दुभिः । मुक्ताफलानां दामन्या विभूषितमिवार्चकैः ॥३२॥ अतितृप्तांस्तथाचान्तान् स्वस्वावासगमाय सः । प्रीत आज्ञापयामास जग्मुस्ते च नराधिप ! ॥३३॥ गतेषु तेषु भगवान्भोक्तुं तान् परिवेषकान् । आज्ञाप्य योषितस्ताश्च निजमन्दिरमाययौ ॥३४॥ कृष्णार्थे च स्वयं पाकं शुचिर्भूत्वा विधाय सः । तस्मै निवेद्य तच्छेषं बुभुजे धर्मधारकः ॥३५॥ भुक्त्वाथ सम्यक् स्वस्थानं ययुस्ते परिवेषकाः । ललिता भोजयामास ततः सर्वाश्च योषितः ॥३६॥ नापितेभ्यः कुलालेभ्यो ह्यन्नार्थिभ्यश्च सर्वशः । देशान्तरीयलोकेभ्यः प्रादाच्चान्नं यथोचितम् ॥३७॥ दीयतां दीयतां चेति गृह्यतां गृह्यतामिति । शब्दो बभूवाविरतं नृपतेर्मन्दिरे तदा ॥३८॥ जनेभ्यो विभजन्ती तदन्नं प्रासादिकं हरेः । आसायमपि तस्यान्तं न लेभे ललिता तु सा ॥३९॥ हरेरेव प्रतापं तं जानती सातिविस्मया । तमेव सर्वभावेन भेजे नित्यमतन्द्रिता ॥४०॥ इत्थं नरेश ! प्रभुरन्नकूटमहोत्सवं सम्यगकारयत्सः । येनोज्ज्वला कीर्तिरभूज्जगत्यां तस्य क्षितीन्द्रस्य नृपैर्दुरापा ॥४१॥**

**आसंश्च दीपावलयो निशायां तथाह्नि पूर्वे हरिमन्दिरादौ । सभा महत्याऽऽस च तत्र तस्यामुपाविशत् पीठ उदार ईशः ॥४२॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे अन्नकूटोत्सवे निजपार्षदोत्तमादिनृपतिमण्डलसन्तर्पणे भगवत्परिवेषणलीलानिरूपणनामैकविंशोऽध्यायः ॥२१॥

---

હોય તેમ શોભતું હતું. (૩૨) હે રાજન્ ! શ્રીહરિ પ્રસન્ન થઈને અતિ તૃપ્ત થયેલા તથા ચળુ કરી અને મુખ અને હસ્તની શુદ્ધિ કરી રહેલા સર્વજનોને પોતપોતાના નિવાસમાં જવા માટે આજ્ઞા આપતા હતા. શ્રીહરિએ આજ્ઞા આપેલા જનો પોતપોતાના ઉતારે ગયા. (૩૩) પછી શ્રીહરિ પીરસનારા મુનિઓને અને પૂર્વે કહેલી ભક્ત સ્ત્રીઓને જમવા માટે આજ્ઞા આપી પોતાના મંદિરમાં આવ્યા. (૩૪) ધર્મને ધારણ કરનારા સ્વયં શ્રીહરિ, સ્નાનાદિથી શુદ્ધ થઈને શ્રીકૃષ્ણને માટે પાક કરીને શ્રીકૃષ્ણને નૈવેદ્ય કરીને તેમની પ્રસાદીનું અન્ન જમતા હતા. (૩૫) પછી પીરસનારા મુનિઓ ઈચ્છા પ્રમાણે જમીને પોતપોતાના સ્થાનમાં ગયા પછી લલિતા સર્વ સ્ત્રીઓને જમાડતી હતી. (૩૬) સર્વ વાળંદો, કુંભારો, અન્નાર્થીઓ તથા સર્વે દેશાન્તરથી આવેલા જનોને યથાયોગ્ય અન્ન લલિતા આપતી હતી. (૩૭) તે સમયે 'આપો આપો' આ પ્રકારનો શબ્દ અને 'ગ્રહણ કરો, ગ્રહણ કરો' શબ્દ ઉત્તમ રાજાના મંદિરમાં નિરંતર સંભળાતો હતો. (૩૮) લલિતા શ્રીહરિની પ્રસાદીનું અન્ન અન્નાર્થીઓને યથાયોગ્ય સાયંકાલ સુધી આપતાં હતાં છતાં પણ અન્નની સમાપ્તિ થઈ નહિ. (૩૯) અન્ન ખૂટ્યું નહીં એ શ્રીહરિના પ્રતાપને જાણતી લલિતા અત્યંત આશ્ચર્ય પામીને આળસે રહિત શરીર, વાણી અને મનથી શ્રીહરિને જ નિત્ય ભજતી હતી. (૪૦) હે નરેશ ! શ્રીહરિએ આ પ્રકારે અન્નકૂટનો મહોત્સવ સારી રીતે ઉત્તમ રાજા પાસે કરાવ્યો, જે ઉત્સવ કરાવવાથી ઉત્તમ રાજાની અન્ય રાજાઓને દુર્લભ એવી ઉજ્જ્વળ કીર્તિ પૃથ્વીમાં થઈ. (૪૧)

પૂર્વદિવસે (દીપોત્સવને દિવસે) જેમ હરિના મંદિર વગેરેમાં રાત્રિએ દીવાઓની પંક્તિઓ થઈ હતી તેવી જ અન્નકોટના ઉત્સવના દિવસે રાત્રિએ પણ થઈ હતી. તે સમયે કારતક સુદી પડવાની રાત્રિએ ત્યાં એક મોટી સભા થઈ તે સભામાં શ્રીહરિ મહાસિંહાસનમાં બિરાજમાન થયા હતા. (૪૨)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે અન્નકૂટોત્સવે નિજપાર્ષદોત્તમાદિનૃપતિમંડલસન્તર્પણે ભગવત્પરિવેષણલીલા નિરૂપણ નામૈકવિંશોऽધ્યાયઃ (૨૧)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच-सदःस्थाखिलभक्तौघवीक्ष्यमाणाननाम्बुजः । श्रीनीलकण्ठः प्रोवाच सर्वानथ निजाश्रितान् ॥१॥ श्रीनारायणमुनिरुवाच-औद्धवे सम्प्रदायेऽस्मिन् सर्वे सत्सङ्गिसंज्ञिताः। यूयं भवथ तन्नाम धार्यमन्वर्थकं ततः ॥२॥ सत्सङ्गेनैव मुक्तिः स्यादित्याचार्यमतं हि नः । अस्तीति सत्सङ्गपदं निर्वच्मि शृणुताखिलाः ॥३॥ सच्छब्देन परंब्रह्म साधवश्च तदाश्रिताः। प्रोक्तास्तदीयो धर्मश्च शास्त्रं चैतत्त्रिकाश्रयम् ॥४॥ तत्र विष्णुः परंब्रह्म योऽसौ कृष्णो नराकृतिः । नृत्वेऽपि दिव्यकर्मा च दिव्य एव नृनाट्यधृत् ॥५॥ तदुक्तधर्मसंस्था ये सद्भक्तास्ते तु साधवः । निरूप्यतेऽथ सद्धर्मः साक्षाद्भगवतोदितः ॥६॥ श्रीमद्भागवते प्राह नारदस्तं युधिष्ठिरम् । राजसूयमखस्यान्ते तमेवाहं ब्रुवे स्फुटम् ॥७॥ श्रीनारद उवाच-नत्वा भगवतेऽजाय लोकानां धर्महेतवे । वक्ष्ये सनातनं धर्मं नारायणमुखाच्छ्रुतम् ॥८॥ योऽवतीर्यात्मनोंऽशेन दाक्षायण्यां तु धर्मतः । लोकानां स्वस्तयेऽध्यास्ते तपो बदरिकाश्रमे ॥९॥

धर्ममूलं हि भगवान्सर्ववेदमयो हरिः । स्मृतं च तद्विदां राजन् ! येन चात्मा प्रसीदति ॥१०॥ सत्यं दया तपः शौचं तितिक्षेक्षा शमो दमः । अहिंसा ब्रह्मचर्यं च त्यागः स्वाध्याय आर्जवम् ॥११॥ सन्तोषः समदृक्सेवा ग्राम्येहोपरमः शनैः । नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनम् ॥१२॥ अन्नाद्यादेः संविभागो भूतेभ्यश्च यथार्हतः । तेष्वात्मदेवताबुद्धिः सुतरां

## અધ્યાય : ૨૨- કરુણાસાગર શ્રીહરિએ પોતાના ભક્તોની સભામાં સત્સંગરૂપી દીપનો પ્રકાશ કરેલો છે.

**સુવ્રત મુનિ બોલ્યા :** હે રાજન્ ! પછી સભામાં બેઠેલા સમગ્ર ભક્તોના સમૂહોએ જોવાયેલું છે મુખ જેમનું એવા શ્રીનીલકંઠ, સર્વે પોતાના આશ્રિતોને કહેવા લાગ્યા : (૧) હે ભક્તો ! આ ઉદ્ધવ સંપ્રદાયમાં સર્વે તમો 'સત્સંગી સંજ્ઞાને પામેલા છો માટે સત્સંગી નામ સાર્થક ધારવું. (૨) 'સત્સંગથી મુક્તિ થાય છે' આવો આપણા ઉદ્ધવાચાર્યનો સિદ્ધાંત છે જ; માટે **'સત્સંગ'** આ શબ્દની સ્પષ્ટતા કરું છું તે તમો સર્વે સાંભળો. (૩) સત્ શબ્દથી પરબ્રહ્મ (ભગવાન) કહેલા છે અને પરબ્રહ્મના આશ્રિત સાધુઓ સત્ શબ્દથી કહેલા છે તથા પરબ્રહ્મે ઉપદેશ આપેલો ધર્મ પણ સત્ શબ્દથી કહ્યો છે. પરબ્રહ્મ, તેમના સાધુ અને તેમણે ઉપદેશેલો ધર્મ આ ત્રણનું પ્રતિપાદન કરનાર શાસ્ત્ર સત્ શબ્દથી કહેલું છે. (૪) સત્ શબ્દ વાચ્ય ચારમાં જે સર્વાન્તર્યામી, નરાકૃતિ ધરનારા શ્રીકૃષ્ણ છે એજ પરબ્રહ્મ વાચ્ય કહેલા છે. (તેમને વિશેષણો આપે છે તે પરમાત્મા મનુષ્યભાવમાં પણ દિવ્ય ગુણચરિત્રો યુક્ત જ, મનુષ્યઅનુકરણ કરનારા; દિવ્ય જ છે. (૫) શ્રીકૃષ્ણે કહેલા પોતાના ધર્મમાં રહેલા શ્રીકૃષ્ણની અનન્ય ભાવથી ઉપાસના કરનારા જે ભક્તો છે તેમને સત્ શબ્દ વાચ્ય સાધુઓ કહેવાય છે. હવે સાક્ષાત્ ભગવાને કહેલો સદ્ધર્મ અર્થાત્ (સત્ શબ્દ વાચ્ય) ભાગવત ધર્મ તેનું નિરૂપણ કરીએ છીએ. (૬) શ્રીમદ્ ભાગવત પુરાણમાં નારદ મુનિ યુધિષ્ઠિરના રાજસૂય યજ્ઞના અન્તમાં યુધિષ્ઠિરને તે સદ્ધર્મ કહેતા હતા નારદમુનિએ કહેલા જ ધર્મો હું તમોને સ્પષ્ટપણે કહું છું. (૭)

**શ્રી નારદજી બોલ્યાઃ** સર્વજનોના ધર્મની પ્રવૃત્તિમાં કારણ સકલ ઐશ્વર્ય સમ્પન્ન શ્રી નારાયણને નમસ્કાર કરી નારાયણના મુખકમલમાંથી સાંભળેલો સનાતન ધર્મ હું તમોને કહીશ. (૮) જે નારાયણ, ધર્મ પ્રજાપતિ થકી દક્ષ પ્રજાપતિની પુત્રી મૂર્તિ નામની પત્નીમાં પોતાના અંશથી બીજા રૂપે નરે સહિત પ્રાદુર્ભાવ પામીને પોતાના ભક્તજનોના મંગલ માટે બદરિકાશ્રમમાં તપ કરે છે. (૯) હે રાજન્ ! શ્રી નારાયણ ધર્મની ઉત્પત્તિ અને પ્રવૃત્તિનું કારણ છે. ભગવાન સર્વ વેદમય છે અને વેદના અર્થને જાણનારાઓ યાજ્ઞવલ્કય, પરાશર વગેરે મુનિઓએ પણ (તેમની સ્મૃતિઓમાં પણ) એજ ધર્મમૂલ કહેલું છે; જેના અનુષ્ઠાનથી ધર્માનુષ્ઠાન કરનાર આત્મા શુદ્ધ થાય છે અને ભગવાનની સેવામાં અધિકારી થાય છે. એવો ધર્મનો મહિમા છે. (૧૦) સત્ય, દયા, તપ, શૌચ, તિતિક્ષા, ઈક્ષા (આત્મા-અનાત્માનો વિવેક), શમ, દમ, અહિંસા, બ્રહ્મચર્ય, ત્યાગ, સ્વાધ્યાય, આર્જવ, આ તેર : (૧૧) સંતોષ, સમદષ્ટિવાળાઓની સેવા, ગ્રામ્ય વિષયોની ઈચ્છાનો ત્યાગ, મનુષ્યોને વિપરીત ફળ આપનાર ક્રિયાઓની સમીક્ષા, મૌન, આત્માનો વિચાર આ છ : (૧૨) હે પાંડવ ! યથાયોગ્ય



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

नृषु पाण्डव! ॥१३॥ श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः । सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणम् ॥१४॥ नृणामयं परो धर्मः सर्वेषां समुदाहृतः । त्रिंशल्लक्षणवान्राजन्सर्वात्मा येन तुष्यति ॥१५॥ इत्थं श्रीनारदः प्राह सतो धर्मान् युधिष्ठिरम् । तेषामर्थं तत्त्वतोऽहं कथयामि समासतः ॥१६॥ तत्र सत्यं तु जीवानां हितकृद्वचनं मतम् । परदुःखासहिष्णुत्वं दया नत्वात्मबन्धकृत् ॥१७॥ यया भवेदपयशः स्वस्य वा स्वानुयायिनाम् । साप्यस्माकं मते नूनं दया नैवास्ति सम्मता ॥१८॥ व्रतोपवासकृच्छ्राणि स्वधर्मश्च तपो मतम् । शौचं तु द्विविधं प्रोक्तं बाह्यं चाभ्यन्तरं तथा ॥१९॥ तत्र बाह्यं मृदम्बुभ्यामस्पर्शात्पापकर्मणाम्। त्यागाच्च मद्यमांसादेस्तथा साङ्कर्यकर्मणः ॥२०॥ आभ्यन्तरं तु सर्वेषामात्मवच्छुभचिन्तनम् । मानसानां मलानां च सद्विचारेण शोधनम् ॥२१॥ यत्प्राप्तं देशकालाभ्यां दुःखं प्रारब्धकर्मणा । तत्सम्मर्षस्तितिक्षेक्षा युक्तायुक्तविवेचनम् ॥२२॥ शमस्तु मनसोऽक्षोभः पञ्चभिर्विषयैरपि । प्रोक्तो बाह्येन्द्रियाणां च निग्रहोऽकार्यतो दमः ॥२३॥ आलिक्षाया आमनुष्यात्प्राणिमात्रस्य सर्वथा । अद्रोहो बुद्धिपूर्वं यः सा त्वहिंसेति कथ्यते ॥२४॥ आत्मघातानाचरणं स्वर्गार्थमपि सोच्यते । ब्रह्मचर्यं चागृहिणामष्टधा स्त्रीविवर्जनम् ॥२५॥ गृहस्थानां तु तत्प्रोक्तं परस्त्रीसङ्गवर्जनम् । त्यागस्तत्स्वस्त्रियाश्चोक्तं व्रतश्राद्धाहपर्वसु ॥२६॥ अष्टधा पुरुषत्यागो विधवानां तदुच्यते । स्त्रीणां च सधवानां तत्परपुंसङ्गवर्जनम् ॥२७॥ त्यागः स्वशक्तितो दानं पदार्थानां स्त्रियं विना । स्वाध्यायः स्वोचितस्तोत्रमन्त्रादेः

---

પ્રાણીઓને અન્નાદિ પદાર્થોનો સંવિભાગ, મનુષ્યથી ભિન્ન પ્રાણીઓમાં પોતાના દેવની બુદ્ધિ અને મનુષ્યોમાં અતિશય પોતાના દેવતાની બુદ્ધિ આ બે : (૧૩) સાધુઓના શરણસ્વરૂપ શ્રીનારાયણનું શ્રવણ, કીર્તન, સ્મરણ, સેવા, અર્ચન, નમસ્કાર, દાસપણું, સખાભાવ, આત્મસમર્પણ, આ નવ : (૧૪) હે રાજન્ ! સર્વ મનુષ્યોનો આ ત્રીસ લક્ષણવાળો સત્ય આદિ સ્વરૂપ સર્વોત્તમ ધર્મ મેં કહેલો છે જે ધર્મના અનુષ્ઠાનથી સર્વાન્તર્યામી શ્રીનારાયણ પ્રસન્ન થાય છે. (૧૫)

હે ભક્તો ! આ પ્રકારે શ્રીનારદજીએ સત્ શબ્દ વાચ્ય ધર્મોને યુધિષ્ઠિરને કહ્યા. હું તમોને તે સત્ય આદિનો અર્થ યથાર્થપણે સંક્ષેપથી કહું છું. (૧૬) તેમાં **સત્ય** તો જીવોનું હિત કરનારું વચન માનેલું છે **દયા** તો પારકાનાં દુઃખોનું નહિ સહન કરવાપણું, યથા શક્તિ તેનો પ્રતિકાર કરવો તે, પરંતુ તે પોતાને બંધનકર્તા ના હોવું જોઈએ. (૧૭) જે દયાથી પોતાના આત્માને અને પોતાના અનુયાયીઓને દુષ્કીર્તિ થાય તે દયા પણ અમારા ઉદ્ધવ સંપ્રદાયમાં સંમત નથી. (૧૮) એકાદશી આદિક વ્રતના ઉપવાસો અને પ્રાયશ્ચિત્તના ઉપવાસો અને ભગવાનની પ્રીતિ માટે કૃચ્છ્ર ચાંદ્રાયણાદિ અને સ્વધર્મ પોતાના વર્ણાશ્રમને યોગ્ય સદાચાર તે તપ માનેલું છે. શૌચ તો બાહ્ય તથા આંતરિક બે પ્રકારનું કહેલું છે. (૧૯) તેમાં **બાહ્ય શૌચ** તો મૃત્તિકા અને જળથી અને પાપકર્મોવાળા ચાંડાળ આદિ અસ્પૃશ્યના સ્પર્શનો ત્યાગ કરવાથી, મદ્ય-માંસાદિના ત્યાગથી તથા વર્ણસાંકર્યના હેતુભૂત કર્મ સમુદાયનો ત્યાગ કરવાથી થાય. (૨૦) **આંતરિક શુદ્ધિ** તો સર્વ જીવોનું પોતાની માફક શુભ ચિંતન કરવું અને મનના કામ, ક્રોધ, લોભ, માન, ઈર્ષાદિ દોષોનો સારા વિચારથી ત્યાગ કરવો એ બે આંતરિક શૌચ કહેવાય છે. (૨૧) દેશકાળથી જે દુઃખ પ્રાપ્ત થાય અને પ્રારબ્ધકર્મનું જે દુઃખ હોય; ધીરજતાથી તે દુઃખનું સહન કરવું તે **તિતિક્ષા** કહેવાય છે. **ઈક્ષા** તો પોતાના વર્ણાશ્રમના ધર્મને અનુસરીને કર્તવ્ય અને અકર્તવ્યનો વિચાર કરવો તે. (૨૨) **શમ,** શબ્દાદિ માયિક પંચ વિષયોથી મનનો ક્ષોભ ના થવો તે. **દમ**-ચક્ષુરાદિ બાહ્યેન્દ્રિયોનો શાસ્ત્ર વિરુદ્ધ આચરણથી નિગ્રહ કરવો તે. (૨૩) લીખથી આરંભીને મનુષ્ય પર્યન્ત પ્રાણીમાત્રનો બુદ્ધિપૂર્વક સર્વ પ્રકારે શરીર, વાણી અને મનથી દ્રોહ ન કરવો તેને **અહિંસા** કહેવાય છે. (૨૪) સ્વર્ગને માટે પણ તીર્થ આદિમાં આત્મઘાત ન કરવો તે પણ અહિંસા કહેવાય છે. બ્રહ્મચર્ય તો ત્યાગીઓને અષ્ટ પ્રકારે સ્ત્રીનો ત્યાગ કરવો, (૨૫) ગૃહસ્થોને પરસ્ત્રીનો ત્યાગ કરવો તેને **બ્રહ્મચર્ય** કહેલું છે અને એકાદશી આદિક વ્રતો તથા શ્રાદ્ધાદિ સહિત પહેલાંનો અને પછીના એક એક દિવસો અને અમાવાસ્યા, પૂર્ણમાસી, વ્યતિપાત, સંક્રાંતિ વગેરે દિવસોમાં પોતાની સ્ત્રીનો ત્યાગ કરવો તે ગૃહસ્થોને બ્રહ્મચર્ય કહેલું છે. (૨૬) આઠ પ્રકારે પોતાના સંબંધ વિનાના પુરુષનો ત્યાગ તે વિધવાને બ્રહ્મચર્ય કહેલું છે અને સધવા સ્ત્રીઓને પોતાના પતિ વિના પુરુષ માત્રના અંગસંગનો ત્યાગ કરવો તે બ્રહ્મચર્ય કહેલું છે. (૨૭) પોતાની પત્ની વિના પોતાને અભીષ્ટ (મનગમતી) વસ્તુઓનું પોતાની શક્તિ પ્રમાણે પાત્રમાં દાન આપવું તેને **ત્યાગ** કહેલો છે. પોતાને યોગ્ય સ્તોત્ર-મંત્રાદિનો અધિકાર પ્રમાણે શક્તિને



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

शक्तितो जपः ॥२८॥ आर्जवं वक्रतात्यागः सन्तोषाऽन्नांशुकादिषु । दैवलब्धैष्वलम्बुद्धिस्तथा स्तेयस्य वर्जनम् ॥२९॥ ब्रह्मचर्यादिनियमैर्युक्तानां कृष्णसेविनाम् । सेवोक्ता समदृक्सेवा विनयेनानुवर्तनम् ॥३०॥ शनैः शनैर्ग्राम्यसौख्याद्विरामः संसृतिप्रदात् । अनुद्योगस्तदर्थं च ग्राम्येहोपरमो मतः ॥३१॥ प्रोक्ता विपर्ययेहेक्षा ग्राम्यसौख्याप्तये नृणाम् । बहुधा यतमानानां दुःखबाहुल्यदर्शनम् ॥३२॥ वृथा प्रलापतो बुद्ध्या निवृत्तिर्मौनमुच्यते । देहात्पृथक्तया ज्ञानं जीवस्याऽऽत्मविमर्शनम् ॥३३॥ यथोचितं तु जीवेभ्यो दत्त्वैवान्नोदकादि च । तस्योपभोगाचरणं संविभाग इतीर्यते ॥३४॥ ज्ञात्वैव व्यापकं विष्णुं सर्वभूतेषु सन्नतिः । ज्ञेयाऽऽत्मदेवताबुद्धिर्मानमत्सरवर्जनम् ॥३५॥ कथामृतस्य श्रीविष्णोः पानं श्रवणमुच्यते । गुणानां गायनं तस्य प्रेम्णा कीर्तनमुच्यते ॥३६॥ तस्य मूर्तेर्हृदि ध्यानं नित्यदा स्मरणं मतम् । तस्य निश्छद्मभावेन सदा सेवानुवर्तनम् ॥३७॥ विधिना पूजनं चेज्या तस्य शक्त्यनुसारतः । नमस्कारश्च साष्टाङ्गं तस्मा अवनतिर्मता ॥३८॥ परिचर्या तस्य दास्यं सख्यं स्नेहातिशायिता । सर्वथा तदधीनत्वं प्रोक्तमात्मसमर्पणम् ॥३९॥

सद्धर्म एष कथितस्त्रिंशल्लक्षणवान् परः । सच्छब्दार्थ इति त्रेधा तत्त्वतोऽत्र निरूपितः ॥४०॥ सच्छब्दवाच्यमेतच्च त्रितयं यत्र वर्णितम् । स्यात्तत्सच्छास्त्रमुदितं संक्षिप्तं वापि विस्तृतम् ॥४१॥ वेदाः श्रीमद्भागवतं नीतिश्च विदुरोदिता । विष्णोर्नामसहस्त्रं च गीता भागवती तथा ॥४२॥ शारीरकाख्यसूत्राणि याज्ञवल्क्यस्मृतिस्तथा । श्रीवासुदेवमाहात्म्यमिति

અનુસરીને જપ કરવો તે **સ્વાધ્યાય** કહ્યો છે. (૨૮) સાધુઓની આગળ પોતાની કુટિલતાનો ત્યાગ તે **આર્જવ** કહ્યો છે. પોતાના પ્રારબ્ધ અનુસારે પ્રાપ્ત થયેલાં અન્ન-વસ્ત્રાદિમાં સંપૂર્ણપણાની બુદ્ધિ તથા ચોરીનો ત્યાગ કરવો તે **સંતોષ** માનેલો છે. (૨૯) બ્રહ્મચર્ય વ્રત મુખ્ય જેમાં છે એવા નિર્લોભ, નિર્માન વગેરે જે નિયમોથી યુક્ત એકાંતભાવથી શ્રીકૃષ્ણને ભજતા સાધુઓની આગળ નમ્રતાપૂર્વક અનુવર્તન કરવું તે **સેવા** કહેલી છે. (૩૦) સંસાર આપનારા માયિક સુખથકી ધીમે ધીમે દોષ દર્શનથી વિરામ પામવો અને ગ્રામ્ય સુખ માટે ઉદ્યોગે રહિતપણું તે **ગ્રામ્યેહોપરમ** કહેવાય છે. (૩૧) માયિક વિષયસુખની પ્રાપ્તિ માટે અનેક પ્રકારે પ્રયત્ન કરતાં મનુષ્યોને અતિશય દુઃખની પ્રાપ્તિનું જોવું તે **વિપર્યયેહેક્ષા** કહેલી છે. (૩૨) વૃથા પ્રલાપથી સત્ અને અસત્ વિવેકે સહિત બુદ્ધિથી ઉપરામ (શાંતિ) પામવું તે મૌન કહેવાય. પોતાના જીવાત્માને સ્થૂળ, સૂક્ષ્મ અને કારણ શરીરથી જુદો જાણવો તે **આત્મવિમર્શન** કહેલું છે. (૩૩) અન્નજળાદિ જે કંઈ વસ્તુ જીવોને યથાયોગ્ય આપીને જ તેનો ઉપભોગ કરવો તે **સંવિભાગ** કહેવાય છે. (૩૪) સ્થાવર, જંગમ આત્મક પ્રાણીઓમાં અંતર્યામી રૂપે પ્રવેશેલા શ્રીવાસુદેવને જાણીને જ નમસ્કાર કરવો પરંતુ દ્રોહ કરવો નહિ. મનુષ્યોમાં વિશેષપણે માન-મત્સરના કારણભૂત દ્રોહનું આચરણ કરવું નહિ તે **આત્મામાં દેવતાબુદ્ધિ** જાણવી. (૩૫) શ્રી વિષ્ણુ ભગવાનની કથારૂપી અમૃતનું પાન કરવું તે શ્રવણ કહેલું છે. શ્રી વિષ્ણુના ગુણો સત્ય, શૌચ, (પવિત્રતા) દયા, વાત્સલ્ય વગેરેનું પ્રેમપૂર્વક ગાન કરવું તે **કીર્તન** કહેલું છે. (૩૬) શ્રી કૃષ્ણની મૂર્તિનું સર્વદા પોતાના મનમાં, સમગ્ર અંગનું અથવા એક એક અંગનું ચિંતન કરવું તે **સ્મરણ** માનેલું છે. નિષ્કપટ ભાવથી શ્રીકૃષ્ણના હંમેશા ચરણકમળ ચાંપવા વગેરેનું આચરણ તે **સેવા** કહેલી છે. (૩૭) શાસ્ત્રવિધિ પ્રમાણે પોતાના સામર્થ્યને અનુસરીને શ્રીકૃષ્ણનું પૂજન તે **ઈજ્યા** કહેવાય છે. શ્રીકૃષ્ણને આઠ અંગે સહિત નમસ્કાર કરવા તે **અવનતિ** માનેલી છે. (૩૮) શ્રીકૃષ્ણની દાસભાવથી પરિચર્યા તે શ્રીકૃષ્ણનું **દાસપણું** માનેલું છે. અતિશય સ્નેહપણું તે **સખાભાવ** કહેલો છે. શરીર, વાણી અને મનથી શ્રીકૃષ્ણને આધીન વર્તવું તે **આત્મસમર્પણ** કહેલું છે. (૩૯)

આ પ્રમાણે ત્રીશ લક્ષણે યુક્ત સર્વોત્તમ આ સદ્ધર્મ સત્ શબ્દવાચ્ય ભાગવત ધર્મ કહેલો છે. આ પ્રકારે આ પ્રકરણમાં ત્રણ પ્રકારે પરબ્રહ્મ-તેમના સાધુઓ, તેમણે કહેલો ધર્મ આ ત્રણ પ્રકારે, સત્ શબ્દ યથાર્થપણે નિરૂપણ કરેલો છે. (૪૦) જે શાસ્ત્રમાં સત્ શબ્દથી કહેલા ભગવાન, તેમના સાધુઓ અને તેમણે કહેલો ધર્મ આ ત્રણનું સર્વાધિકપણે સંક્ષિપ્તથી અથવા વિસ્તારથી વર્ણન કરેલું હોય તે સત્શાસ્ત્ર કહેલું છે. (૪૧) ચાર વેદ, શ્રીમદ્ ભાગવતપુરાણ, વિદુરનીતિ, વિષ્ણુ સહસ્ર નામ તથા ભગવદ્ગીતા; (૪૨) શારીરક સૂત્રો તથા યાવલ્ક્યની સ્મૃતિ તથા શ્રી વાસુદેવમાહાત્મ્ય : આ આઠ

तज्ज्ञेयमष्टकम् ॥४३॥ येऽनुसृता भवेयुश्च सद्ग्रन्था एतदष्टकम् । तेऽपि सच्छास्त्रमित्युक्ता मुमुक्षूणां हितावहाः ॥४४॥ सच्छब्दार्थ इति प्रोक्तः सङ्गशब्दार्थ उच्यते । सतः कृष्णस्य सङ्गस्तु साक्षाद्भक्तिर्दृढं स्थिरा ॥४५॥ साधूनां च सतां सङ्गः सेवाऽर्चा तद्वचःस्थितिः । धर्माणां तु सतां सङ्गस्तदत्यागो विपद्यपि ॥४६॥ सतः शास्त्रस्य सङ्गस्तु कृष्णभक्त्यादिपुष्टये । श्रवणं कीर्तनं प्रीत्या पाठनं श्रावणं तथा ॥४७॥ एतेषां हि सतां सङ्गो येषामीदृग्भवेद्भुवि। सत्सङ्गिनस्ते कथिताः सम्प्रदाय इहौद्धवे ॥४८॥ एत एकान्तिका भक्ताः कथ्यन्ते शास्त्रदर्शिभिः । सन्तो भागवताश्चैव सात्त्वताः साधवस्तथा ॥४९॥ भक्ता एते तु देहान्ते धाम गोलोकमुत्तमम् । लभन्ते राजते यत्र श्रीराधाकृष्ण ईश्वरः ॥५०॥ एतं विहाय सत्सङ्गं सज्जन्तेऽन्यत्र येऽसति । कुसङ्गिनस्ते विज्ञेया असदीशादिसङ्गिनः ॥५१॥ कालो माया स्वभावश्च कर्म तामसदेवताः । अस्वातन्त्र्यादिमे प्रोक्ता असदीश्वरसंज्ञकाः ॥५२॥ कालाद्युपासका विष्णुं विहाय परमेश्वरम्। श्रुतिस्मृतिविरुद्धेहा असन्तः साधुसंज्ञकाः ॥५३॥ दम्भमानकलिक्रोधहिंसालोभस्मरादयः । अधर्मसर्गजाः पापा असन्तो धर्मविभ्रमाः ॥५४॥ असदेतत्त्रयं यत्र वर्णितं स्यान्निजेच्छया । असच्छास्त्रं तु तत्प्रोक्तमल्पं वा महदस्तु तत् ॥५५॥

एतच्चतुष्टये सक्ता ये नरा असति ध्रुवम् । कुसङ्गिनस्त एवोक्ता दम्भभक्तादिनामकाः ॥५६॥ जना असद्धियस्त्वेते पाषण्डिगुरुभिर्मुहुः । वञ्चिता वित्तयोषादिग्रहणैस्तांस्त्यजन्ति हि ॥५७॥ सतः श्रयन्ते तेऽथैषां दृष्ट्वा शीलं तु दुष्करम् ।

---

શાસ્ત્રો છે તે સત્ શાસ્ત્ર જાણવાં. (૪૩) જે સદ્ગ્રંથો આ આઠ ગ્રંથોને અનુસરતા હોય, તે મુમુક્ષુ જનોને હિત કરનારા સદ્ગ્રંથોને પણ અમોએ સત્ શાસ્ત્ર કહેલા છે. (૪૪) આ પ્રકારે સત્ શબ્દનો અર્થ ચાર પ્રકારે કહેલો છે. સત્ શબ્દથી કહેલા પરંબ્રહ્મ **શ્રીકૃષ્ણનો સંગ** તો વિઘ્નોથી નાશ નહિ પામેલી દૃઢ જેમ હોય તેમ નવ પ્રકારે ભક્તિ કરવી તે કહેવાય છે. (૪૫) સત્ શબ્દથી કહેલા **સાધુઓનો સંગ** તો અન્નવસ્ત્રાદિ આપવાથી તેમની સેવા ચંદન-પુષ્પાદિથી પૂજન અને તેમના વચનમાં રહેવાનું તે સાધુઓનો સંગ કહેલો છે. સત્ શબ્દથી કહેલા **ધર્મોનો સંગ** તો મહાઆપત્કાલમાં પણ તેનો ત્યાગ ન કરવો તે ધર્મસંગ કહેવાય છે. (૪૬) સત્ શબ્દથી કહેલાં **શાસ્ત્રનો સંગ** તો શ્રીકૃષ્ણભગવાનની ભક્તિની પુષ્ટિ, તેમજ શ્રીકૃષ્ણના માહાત્મ્યજ્ઞાનાદિની સિદ્ધિ માટે પ્રીતિપૂર્વક શ્રવણ, કીર્તન અને તેનું ભણવું-ભણાવવું તથા કથા સંભળાવવી તે. (૪૭) એ સત્ શબ્દ વાચ્ય પરબ્રહ્માદિ ચારનો આ પ્રકારનો સંગ પૃથ્વીમાં જે જનોને થાય તે જનો આ ઉદ્ધવ-સંપ્રદાયમાં સત્સંગીઓ કહેલા છે. (૪૮) એ સત્સંગીઓને શાસ્ત્રજ્ઞ પુરુષોએ એકાંતિક ભક્ત, સંત, ભાગવત, સાત્ત્વત તથા સાધુઓ પણ કહેલા છે : સત્સંગીઓનો જ આ છ પ્રકારે વ્યવહાર થાય છે. (૪૯) એ સત્સંગી ભક્તો તો દેહાન્તે સર્વોત્કૃષ્ટ ભગવાનના અક્ષરધામને પામે છે. જે અક્ષરમાં શ્રીરાધાકૃષ્ણ પરમેશ્વર વિરાજે છે. (૫૦) જે જનો પૂર્વોક્ત સત્સંગનો ત્યાગ કરી અસત્પુરુષોના સંગમાં આસક્ત થાય છે તે જનો અસત્ ઈશ્વરાદિના સંગવાળા હોવાથી તેમને કુસંગી જાણવા. (૫૧) કાલ, માયા, સ્વભાવ, કર્મ અને તામસ દેવતા આ કાલાદિ સ્વતંત્રપણાના અભાવવાળા હોવાથી **અસત્ ઈશ્વર** સંજ્ઞાવાળા છે. (૫૨) જે પરમેશ્વર શ્રીકૃષ્ણનો ત્યાગ કરી કાલ, માયા વગેરેની ઉપાસના કરનારા તેમજ શ્રુતિ, સ્મૃતિથી વિરુદ્ધ વેષાચારવાળા છે તે નામમાત્ર સંજ્ઞાવાળા સાધુ **અસત્ સાધુ** કહેલા છે. (૫૩) દંભ, માન, ક્લેશ, ક્રોધ, હિંસા, લોભ, અને કામ વગેરે જેમને છે એવા મત્સર રસાસ્વાદાદિ અધર્મસર્ગથી ઉત્પન્ન થયેલા પાપમાં કારણભૂત દોષો ધર્માભાસી **અસત્ ધર્મો** કહેલા છે. (૫૪) જે શાસ્ત્રોમાં અસત્ ઈશ્વર, અસત્ ધર્મો, અસત્ ઈશ્વર અને અસત્ ધર્મના આશ્રયવાળા અસંતો : આ ત્રણનું વર્ણન કરેલું હોય તે **અસત્ શાસ્ત્ર** કહેવાય છે. તે શાસ્ત્ર નાનું હોય અથવા મોટું હોય તો પણ અસત્ શાસ્ત્ર છે. (૫૫)

જે પુરુષો અસત્ શબ્દ વાચ્ય કાળ વગેરે ચારનો સંગ કરનારા; કુસંગીજનો જ દંભભક્ત, ધર્મધ્વજી, પાખંડી, નાસ્તિક વગેરે નામથી નિશ્ચે કહેલા છે. (૫૬) તે આ અસત્ બુદ્ધિવાળા કુસંગી લોકો પાખંડી ગુરુઓએ અધર્મોપદેશથી, ધન, સ્ત્રી આદિના ગ્રહણ કરવાથી વારંવાર ઠગાયેલા સતા તે પાખંડી ગુરુઓનો ત્યાગ કરે છે. (૫૭) પછી તે કુસંગીજનો સત્પુરુષોનું ભાગવત ધર્મના આચરણરૂપ સારું વૃત્તાન્ત જોઈને સાચા સાધુઓનો આશ્રય કરે છે, પરંતુ તે સંતોએ

**हित्वा तानथ कुण्डादीन् श्रित्वा क्रीडन्ति कीशवत् ॥५८॥ ततस्ते गुरुभिः साकं शिष्यसंज्ञाः कुसङ्गिनः । प्रयान्ति नरकान् घोरान् देहान्ते नात्र संशयः ॥५९॥ इति सत्सङ्गशब्दार्थदीप उद्दीपितो मया । ज्ञात्वा तेनान्वहं सन्तः सङ्गम्या ईश्वरादयः ॥६०॥ सत्सङ्गदीपकमिमं कुमतान्धकारनाशं समाश्रयति यः श्रुतिकीर्तनाभ्याम् । सोऽज्ञानसन्तमसतो भवबन्धहेतोर्मुक्तो भवत्यभिमतं लभते स सौख्यम् ॥६१॥** सुव्रत उवाच-**श्रुत्वा गुरोर्वचनमेतदसंशयं ते भक्तास्तदेकशरणा जगृहुः शिरोभिः । आज्ञापिता निजनिजां वसतिं ययुस्ते तेनाथ सोऽप्युटजमात्मन आजगाम ॥६२॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे अन्नकूटोत्सवे सत्सङ्गदीपप्रकाशननामा द्वाविंशोऽध्यायः ॥२२॥

सुव्रत उवाच-**ततो यमद्वितीयायां पोलिकापायसादिभिः । बहुलाज्यसितैर्भोज्यैरतर्पयदृषीन्नृपः ॥१॥ तस्यां निशि सदःसंस्थं चरितुं भूतले मुनीन् । आजिज्ञापयिषुं भूपः प्रोवाच हरिमानतः ॥२॥** उत्तम उवाच-**अन्नकूटोत्सवे ह्यद्य ललितायास्तु सर्वथा । मनोरथस्त्वया सर्वो भक्तवत्सल ! पूरितः ॥३॥ एवमेव त्वया कार्यं प्रबोधन्युत्सवेऽपि च । नातिदूरे वर्तमाने जयाया अपि तोषणम् ॥४॥**

**स्थितिमत्रैव कुर्वन्तु पूर्णिमान्तं यथासुखम् । सर्वेऽपि मुनयः स्वामिन्नित्यस्ति प्रार्थितं मम ॥५॥ विप्रादयो यथापूर्वं गृह्णन्त्वन्नादि मद्गृहात् । निमित्तमात्रमेवाहं कर्ता कारयिता भवान् ॥६॥** सुव्रत उवाच-**इत्युत्तमवचः श्रुत्वा पश्यन् दूरस्थितां**

આચરણપૂર્વક ઉપદેશ કરાતા શીલાદિ નિયમપાલનને પોતાનાથી દુષ્કર (અર્થાત આચરણ ન થઈ શકે તેવું) જાણી સત્પુરુષોનો ત્યાગ કરી કેવળ ગ્રામ્ય વિષયપ્રધાન કુંડાદિક અસન્માર્ગનો આશ્રય કરી વાનરની માફક ક્રીડા કરે છે. (૫૮) પછી કેવળ નામમાત્ર શિષ્યસંજ્ઞાવાળા કુસંગીજનો પોતાના ગુરુઓની સાથે ઘોર નરકોને પામે છે, એમાં સંશય નથી. (૫૯) હે ભક્તો ! આ પ્રમાણે **'સત્સંગ'** શબ્દનો જે અર્થ તે રૂપી દીપ મેં પ્રકાશિત કર્યો છે. આ દીપથી સત્સંગનો અર્થ જાણીને સત્ શબ્દ વાચ્ય ઈશ્વરાદિક પહેલાં કહેલા શ્રીકૃષ્ણ વગેરે દરરોજ સંગ કરવા યોગ્ય છે. (૬૦) જે માણસ નઠારા મતરૂપી અંધકારનો નાશ કરનાર આ સત્સંગદીપકનો શ્રવણ અને કીર્તનથી આશ્રય કરે છે તે સંસારના બંધનનાં કારણરૂપ અજ્ઞાનરૂપી મહા અંધકાર થકી મુક્ત થાય છે અને પોતાના ઈચ્છિત પરમસુખને પામે છે. (૬૧)

હે રાજન્ ! સંશયે રહિત આ પૂર્વોક્ત શ્રીસહજાનંદ સ્વામીનું વચન સાંભળીને તેમના જ શરણને પામેલા તે સભામાં બેઠેલા સત્સંગીજનો પોતપોતાનાં મસ્તકોથી તેમનું વચન ગ્રહણ કરતા હતા, પછી શ્રીનારાયણ મુનિએ આજ્ઞા આપેલા ભક્તો પોતપોતાના નિવાસ સ્થાનમાં જતા હતા. શ્રીહરિ પણ પોતાના નિવાસભવનમાં આવ્યા. (૬૨)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે અન્નકૂટોત્સવે સત્સંગદીપપ્રકાશન નામા દ્વાવિંશોઽધ્યાયઃ (૨૨)*

## અધ્યાય : ૨૩

### પ્રબોધિનીનો ઉત્સવ કરવા માટે સર્વે મુનિ વગેરેનો પૂર્ણિમા સુધી ગટપુરમાં નિવાસ કરાવ્યો એ કહ્યું છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! પછી યમદ્વિતીયા જે કારતક સુદી બીજને દિવસે ઉત્તમ રાજા ઘણાં ઘી, સાકર જેમાં છે એવાં દૂધપાક પૂરી વગેરે તથા જે અન્નકોટમાં કરેલાં તે બાકી રહેલાં ભોજનોથી સર્વ મુનિઓને તૃપ્ત કરતા હતા. (૧) યમદ્વિતીયાની રાત્રિમાં સભામાં સિંહાસનમાં બેઠેલા, પૃથ્વીમાં અજ્ઞાનીજનોને બોધ આપવા માટે મુનિઓને આજ્ઞા આપવા ઈચ્છતા શ્રીહરિને ઉત્તમ રાજા પ્રણામ કરતા બોલ્યા : (૨) હે ભક્તવત્સલ ! આ અન્નકોટના ઉત્સવમાં તમોએ લલિતાના સર્વ મનોરથો પૂર્ણ કર્યા. (૩) સમીપમાં આવેલા પ્રબોધિની ઉત્સવમાં જયાના મનોરથ પણ તમોએ લલિતાની માફક પૂર્ણ કરવા. (૪)

હે સ્વામિન્ ! સર્વે મુનિઓ પણ પૂર્ણિમા સુધી સુખપૂર્વક ગઢપુરમાં જ સ્થિતિ કરો એવી પ્રાર્થના છે. (૫) દેશાંતરથી આવેલા બ્રાહ્મણો પૂર્વની માફક જ મારા ઘેરથી અન્નાદિ ગ્રહણ કરો. હું તો નિમિત્ત માત્ર છું. ઉત્સવાદિ કાર્યોના કર્તા અને કરાવનાર આપ જ છો. (૬) હે રાજન્ ! આ પ્રકારે ઉત્તમ રાજાનું વચન સાંભળીને શ્રીહરિએ મંદ

जयाम् । तथास्त्विति प्राह प्रहसन्मुखपङ्कजः ॥७॥ जयान्तिकमथोपेत्य तत्तथाऽवददुत्तमः । सापि प्रीता स्वानुजावत्तत्सम्भारानचीक्लृपत् ॥८॥ हरिश्चाह मुनीन्सर्वान् भक्तांस्तत्र च सङ्गतान् । पूर्णिमावधि सर्वेऽपि यूयमत्र वसन्तु भोः ! ॥९॥ आमान्नादेर्ग्रहीतारो येऽत्र स्युर्ब्राह्मणादयः । नृपमोदिवणिग्गेहात्ते गृह्णन्तु यथा पुरा ॥१०॥ सिद्धान्नस्य च भोक्तारो ये स्युस्तैर्नृपमन्दिरे । भोजनीयं यथाकालं दिवसानि त्रयोदश ॥११॥ इति प्रोक्ता भगवता विप्राद्यास्ते तथाऽऽचरन्। सुखेन न्यवसंश्चैते भक्ता भूपेन सत्कृताः ॥१२॥ मुन्यादींस्तांस्ततो राजा यथेष्टं प्रतिवासरम्। प्रचुराज्यसितैः खाद्यैःप्रीणयामास भक्तितः ॥१३॥ सम्भावयन्नृपं सोऽपि भगवान्विविधानि च । कारयामास भोज्यानि जयया नृपमन्दिरे ॥१४॥ रमा च ललितामुख्या योषितस्तत्र सादरम् । पाकसिद्ध्यादि चक्रुस्ता निर्मानाः पूर्ववन्नृप ! ॥१५॥ हरौ भक्तिं परां प्राप्ता जयापि ललितेव सा । आरभ्यैव तृतीयायाः प्रसिताऽभवदुत्सवे ॥१६॥ प्रभाशङ्करमुख्याश्च ब्राह्मणा अपि पूर्ववत् । गङ्गाद्या विप्रपत्न्यश्च विदधुः पाकमादृताः ॥१७॥ दृढबद्धकटिस्तत्र नित्यं पाकादि कारयन् । आनन्दयामास हरिर्जयां तां ललितामिव ॥१८॥ महादानान्यथ स्वस्रा कारयन् हर्यनुज्ञया । आनयामास नृपतिर्देयवस्तून्युदारधीः ॥१९॥ प्रश्नोत्तरैरनेकैश्च सभायां प्रत्यहं प्रभुः । सर्वानानन्दयामास कुर्वन्निःसंशयान् जनान् ॥२०॥

तृतीयायां प्रदोषेऽसौ कृष्णनीराजनोत्तरम् । नामसङ्कीर्तनं कृत्वा सदःसंस्थोऽब्रवीन्निजान् ॥२१॥ प्रष्टव्यं यस्य यत्किञ्चिद्भवेत्पृच्छतु मां स तत् । निःसंशयं सेवितौ यद्भक्तिधर्मौ फलप्रदौ ॥२२॥ हेमन्तसिंहो नृपतिस्तदानीं सदःस्थितस्तं

---

હાસ્યથી સુંદર મુખકમળવાળાં દૂર રહેલા જયાને જોતાં 'એમ થાઓ': આ પ્રમાણે કહ્યું. (૭) પછી ઉતમ રાજા જયાની સમીપમાં જઈને શ્રીહરિનું વચન જેવું શ્રીહરિએ કહ્યું હતું તેવું જયાને કહેતા હતા તે જયા પણ પ્રસન્ન મનવાળાં સતા લલિતાની માફક પ્રબોધિની ઉત્સવની સામગ્રી ભેગી કરતાં હતાં. (૮) શ્રીહરિ સર્વ મુનિઓને તથા અન્નકૂટના ઉત્સવમાં દેશાંતરથી આવેલા સર્વ હરિભક્તોને કહેતા હતા : હે મુનિઓ ! હે ભક્તો ! તમે સર્વે પણ પૂર્ણિમા સુધી અહીંયાં રહો. (૯) તમારામાં કાચું અન્ન વગેરે ગ્રહણ કરનારા જે બ્રાહ્મણો વગેરે હોય તે રાજાના મોદીને ઘેરથી પૂર્વની માફક સીધું સામાન વગેરે ગ્રહણ કરો. (૧૦) જે ભક્તો રાંધેલી રસોઈ જમનાર હોય તેમણે ઉત્તમ રાજાના ભવનમાં તેર દિવસ સુધી યથાયોગ્ય સમય પ્રમાણે ભોજન કરવું. (૧૧) હે રાજન્ ! આ પ્રમાણે શ્રીહરિએ કહેલા મુનિઓ અને ભક્તો અને વિપ્રો વગેરે શ્રીહરિના કહેવા પ્રમાણે આચરણ કરતા હતા. ઉત્તમ રાજાએ સત્કાર કરાયેલા પૂર્વે કહેલા સર્વ ભક્તો સુખેથી રહેતા હતા. (૧૨) પછી ઉત્તમરાજા દરરોજ મુનિ વગેરે ભક્તોને ઘણાં ઘી અને સાકરે યુક્ત ભોજનોથી પ્રેમપૂર્વક ઈચ્છા પ્રમાણે તૃપ્તિ પમાડતા હતા. (૧૩) ભગવાન શ્રીહરિ પણ ઉત્તમરાજાને સંભાવના કરતાં કરતાં રાજાના ભુવનમાં જયા દ્વારા વિવિધ પ્રકારનાં ભોજનો કરાવતા હતા. (૧૪) હે રાજન્ ! રમા અને લલિતા આદિક સ્ત્રીઓ પ્રબોધિની ઉત્સવ નિમિત્તે આદરપૂર્વક પૂર્વના અન્નકૂટોત્સવમાં જ જેમ તેમ પાકસિદ્ધિ વગેરે કરતી હતી. (૧૫) શ્રીહરિમાં સર્વોત્તમ ભક્તિ પામેલી જયા પણ લલિતાની માફક તૃતીયાથી આરંભ કરીને પ્રબોધિનીના ઉત્સવકાર્યમાં તત્પર થયાં. (૧૬) પ્રભાશંકર આદિક બ્રાહ્મણો તથા ગંગાદિ બ્રાહ્મણસ્ત્રીઓ પણ આદરયુક્ત થકા પૂર્વની માફક પાક કરતા હતા. (૧૭) પ્રબોધિનીના ઉત્સવ-કાર્યમાં દૃઢ કેડ્ય બાંધીને શ્રી સ્વામિનારાયણ ભગવાન નિત્ય પાક કરાવવા રૂપી કાર્યોને કરાવતા કરાવતા લલિતાની માફક જયાને આનંદ પમાડતા હતા. (૧૮) પછી દાન આપવામાં ઉદાર બુદ્ધિવાળા ઉત્તમરાજા શ્રીહરિની આજ્ઞાથી પોતાની બહેન જયા દ્વારા મહાદાનો કરાવવા માટે તે દાનમાં આપવા યોગ્ય પદાર્થો લાવતા હતા. (૧૯) શ્રીહરિ દરરોજ સભામાં ઘણા પ્રકારના પ્રશ્નોત્તરોથી સર્વ મુનિ વગેરે સમગ્ર ભક્ત જનોને સંશયે રહિત કરતાં કરતાં આનંદ પમાડતા હતા. (૨૦)

શ્રીહરિએ તૃતીયાને દિવસે સંધ્યાને સમયે શ્રી વાસુદેવ નારાયણની આરતી થયા પછી નામ સંકીર્તન-ઉચ્ચ સ્વરથી શ્રી નારાયણ વગેરે નામોનું ઉચ્ચારણ કરી સભામાં સિંહાસનમાં બિરાજમાન થઈને પોતાના ભક્તોને કહ્યું : (૨૧) હે ભક્તો ! જે ભક્તજનને જે કંઈ પૂછવું હોય તો તે મને પૂછે, કારણ કે ભક્તિ અને ધર્મનું તમે આચરણ કરનારા છો. સંશયે રહિત પ્રશ્નોત્તરોથી આચરણ કરાયેલા ભક્તિ અને ધર્મ યથાર્થ ફળ આપનારા થાય, માટે સંશયનિવૃત્તિ માટે કોઈને સંશય હોય તો પૂછો. (૨૨)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**विनयेन नत्वा । सद्धर्मपुष्टिं हृदि कामयानः पप्रच्छ च स्वस्य सहान्वयस्य ॥२३॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे प्रबोधन्युत्सवे दुर्गपुरे मुन्याद्यावासननामा त्रयोविंशोऽध्यायः॥२३॥

राजोवाच - **पुंसां स्त्रीणां च भगवन्सम्प्रदाय इहौद्धवे । धर्मरक्षा भवेद्येन साधनं ब्रूहि तद्धि मे ॥१॥ स्यात्सद्धर्मस्य संवृद्धिर्यथा कृष्णस्य च प्रभो ! । उपासनायास्तद्ध्रासस्तथा सम्यङ्निरूपय ॥२॥** श्रीनारायणमुनिरुवाच-**शृणु राजन् ! ब्रुवे तुभ्यं सद्धर्मावनसाधनम् । सत्सङ्गमेव तन्मुख्यं विद्धि सच्छास्त्रसम्मतम् ॥३॥ दैवसम्पद्युजां सङ्गात्सद्धर्मोपासनाबलम् । विवर्धते क्षीयते तत्सङ्गाद्ध्यासुरसम्पदाम् ॥४॥ धर्मज्ञानविरक्तीनां भक्तेश्चापि निरूपणे । बाह्यवेषे चास्ति साम्यमुभयेषां च योषिताम् ॥५॥ तत्र निष्कपटं स्वीयश्रेयोर्थं दैवसम्पदः । प्रीतये च हरेर्नित्यं स्वधर्माद्याचरन्ति हि ॥६॥ स्त्रीद्रव्यरसमानादिप्राप्तयेऽन्ये तु दाम्भिकाः । धर्मादिवार्तां कपटाद्वाङ्मात्रेणात्र कुर्वते ॥७॥ फूत्कृत्य गुप्तं दंशन्तो मूषका इव ते शनैः । धर्मादिवार्तां कृत्वैतन्मूलच्छेदं हि कुर्वते ॥८॥**
**सदसद्व्यक्तिबोधोऽतो यथा स्यादुद्धवाध्वनि । मनुष्याणां तथा स्पष्टं तल्लक्ष्माद्यपि कथ्यते ॥९॥ निःश्रेयसाय जीवानां श्रीविष्णुर्भगवान्स्वयम् । आविर्भवति भूलोके स्वतन्त्रः करुणानिधिः ॥१०॥ नरनारायणो दत्त ऋषभः कपिलादयः । रामकृष्णादयश्चास्यावताराः सन्ति भूरिशः ॥११॥ ते निहत्यासुरान्दुष्टान्धर्मसाधुसुरद्रुहः । धर्मं प्रवर्तयन्त्यत्र सेव्यास्ते**

હે રાજન્ ! તે સમયે સભામાં બેઠેલા જૂનાગઢનાં અધિપતિ હેમંતસિંહ રાજા વિનયપૂર્વક શ્રીહરિને નમસ્કાર કરી પોતાના પરિવારજનો સહિત પોતાના સદ્ધર્મની પુષ્ટિને હૃદયમાં ઇચ્છતા થકા શ્રીહરિને પૂછતા હતા. (૨૩)

*ઇતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે પ્રબોધન્યુત્સવે દુર્ગપુરે મુન્યાદ્યાવાસનનામા ત્રયોવિંશોઽધ્યાયઃ (૨૩)*

## અધ્યાય : ૨૪

## શ્રીહરિએ હેમંતસિંહ રાજાને ઉદ્દેશીને ઘણી યુક્તિપૂર્વક ધર્મરક્ષાનું નિરૂપણ કરેલું છે.

**હેમંતસિંહ રાજા પુછે છે :** હે ભગવન્ ! આ ઉદ્ધવ સંપ્રદાયમાં પુરુષો અને સ્ત્રીઓને જે ઉપાયથી પોતપોતાના સદ્ધર્મનું રક્ષણ થાય તે સાધન મને કહો. (૧) હે પ્રભો ! જે પ્રકારે સદ્ધર્મની પુષ્ટિ થાય તથા શ્રીહરિકૃષ્ણ સ્વરૂપ તમારી ઉપાસનારૂપ માહાત્મ્યે સહિત ભક્તિની સંવૃદ્ધિ જે પ્રકારે થાય; તેમજ તે સદ્ધર્મ અને ઉપાસનાનો નાશ કેવી રીતે થાય છે ? આ ચાર પ્રશ્નો છે તે વિવેચનપૂર્વક જેમ હોય તેમ સમજાવીને કહો. (૨)

**શ્રીનારાયણ મુનિ બોલ્યા :** હે રાજન્ ! પોતપોતાના સદ્ધર્મનો ઉપાય તમને હું કહું છું સાંભળો. સત્ શાસ્ત્રમાં માનેલું મુખ્ય સદ્ધર્મનું સાધન સત્ શબ્દ વાચ્ય સાધુઓનો સમાગમ જ જાણવો. (૩) દૈવી સમ્પત્તિથી યુક્ત પુરુષો અને સ્ત્રીઓના સંગથી (તે પણ પુરુષોને પુરુષોનો સંગ અને સ્ત્રીઓને સ્ત્રીઓનો સંગ એમ અહીં સંગ મર્યાદાપૂર્વક જ વિવક્ષિત છે, તેનાથી) સદ્ધર્મ અને ઉપાસનાનું બળ વૃદ્ધિ પામે છે. આસુરી સંપદા યુક્ત પુરુષો અને સ્ત્રીઓના સંગથી સદ્ધર્મ અને ઉપાસનાનું બળ નાશ પામે છે. (૪) ધર્મ જ્ઞાન વૈરાગ્ય અને ભક્તિના પણ નિરૂપણમાં અને બાહ્ય વેષધારણમાં દૈવી અને આસુરી સંપત્તિયુક્ત પુરુષો અને સ્ત્રીઓનું સરખાપણું છે. (૫) તે એ બે પ્રકારમાં દૈવી સમ્પદાયુક્ત સાધુ ભક્તો, કપટે રહિત જેમ હોય તેમ પોતાના આત્યંતિક કલ્યાણની સિદ્ધિ માટે, શ્રીકૃષ્ણની પ્રસન્નતા માટે સ્વધર્માદિનું શરીર-વાણી અને મનથી આચરણ કરે છે જ. (૬) આ લોકમાં આસુરી સંપત્તિવાળા દાંભિક સંતો, સ્ત્રી-દ્રવ્ય-રસાસ્વાદ-પોતાની મહત્તાની ખ્યાતિ વગેરે તથા વસ્ત્ર-સત્કારાદિની પ્રાપ્તિ માટે ધર્મ-જ્ઞાન-વૈરાગ્ય અને ભક્તિની વાર્તાને કપટથી વાણી માત્રથી કરે છે. (૭) મુખથી વાયુ ફૂંકીને પછી ગુપ્તપણે કરડનારા ઉંદરોની જેમ, આસુરી સંપત્તિવાળા પુરુષો પ્રથમ જનોનાં વિશ્વાસાર્થે ધીમે ધીમે ધર્માદિની પ્રશંસારૂપ વાતો કરી ને પછી તે ધર્માદિ ચારેયના મૂળોનું છેદન કરે છે. (૮)

માટે આ ઉદ્ધવ સંપ્રદાયમાં મનુષ્યોને જે પ્રકારે સત્ અને અસત્નું જ્ઞાન; અર્થાત્ દૈવી સંપત્તિયુક્ત સાધુ અને આસુરી સંપત્તિયુકત અસુરનું વિવેકથી જ્ઞાન થાય તેવી રીતે તેનાં લક્ષણો પણ હું કહું છું. (૯) હે રાજન્ ! સ્વતંત્ર એવા



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

मोक्षकाङ्क्षिभिः ॥१२॥ असुरांस्ते यथा घ्नन्ति यादृशास्तेऽसुरा यथा । जातास्तदादौ वच्म्यत्र श्रीमद्भागवतोदितम् ॥१३॥ सर्गारम्भे पुरा ब्रह्मा छाययैवात्मनोऽसृजत् । अविद्यां पञ्चपर्वाणं निजसर्गोपबृंहणाम् ॥१४॥ तमो मोहो महामोहस्तामिस्रं च तुरीयकम् । पञ्चमं त्वन्धतामिस्रमविद्यापर्व कीर्त्यते ॥१५॥ एतामविद्यां सृष्ट्वैव तां तनुं विजहावजः । तमोरूपा निशा साऽभूदसुराणां बलं यतः ॥१६॥ एतत्तनुसमुद्भूता विधेर्जघनजास्तथा । असुरा यक्षरक्षांसि बभूवुर्दुःखहेतवः ॥१७॥ सर्गोऽधर्मात्तदा चाभूद्ब्रह्मपृष्ठोद्भवादयम् । कामलोभमदेर्ष्या रुट् हिंसा माया कलिर्भयम् ॥१८॥ मोहमत्सरमानाद्या अधर्मकुलनायकाः । एते ह्यसुरदेहेषु न्यूषुः सर्वे यथासुखम् ॥१९॥ तदाविष्टास्तु ते यब्धुं भोक्तुं पातुं च निर्दयाः । ब्रह्माणं दुद्रुवुः सर्वे स तं देहं तदा जहौ ॥२०॥ पतन्स देहः सन्ध्याऽभूत्तां ते मूढाः प्रपेदिरे । त्रिषु लोकेषु ते दुष्टाश्चरन्तोऽभ्यार्दयंश्च तान् ॥२१॥ आसीत्तेषां जीवनं चाथैहिकामुष्मिकं सुखम् । अधर्मसर्ग एवैकमसुराणां दुरात्मनाम् ॥२२॥ तन्वाऽथ प्रभया विद्यातपोयोगसमाधिना । देवानृषीन् मनूंनॄंश्च ससर्ज विधिरादरात् ॥२३॥

साक्षाद्धर्मस्ततो जातो ब्रह्मणो दक्षिणस्तनात् । सह स्वपरिवारेण देवादिष्ववसच्च सः ॥२४॥ श्रद्धा मैत्री दया शान्तिस्तुष्टिः पुष्टिः क्रियोन्नतिः । बुद्धिर्मेधा तितिक्षा ह्रीर्मूर्तिर्धर्मस्य योषितः ॥२५॥ एता लक्ष्मीर्यथा विष्णुं शिवा वा शङ्करं यथा । शक्तयोऽनुव्रताः सन्ति तथा धर्मं हि सर्वदा ॥२६॥ शुभं सुखं प्रसादश्च क्षेमाभयमुदादयः । पुत्रा धर्मस्य तैः साकं तत्रोवास सुखेन सः ॥२७॥ सह सम्बन्धिभिर्धर्मो देवादीनां तु जीवनम् । आसीदत्र परत्रापि स एव सुखमीप्सितम्

નિરવધિકાતિશય દયાસાગર, ભગવાન શ્રીહરિ પોતે જીવોના આત્યન્તિક મોક્ષ માટે ભૂલોકમાં પ્રગટ થાય છે. (૧૦) નરનારાયણ, દત્તાત્રેય, ઋષભ, કપિલ, વગેરે નિવૃત્તિ માર્ગને આશરેલા અને રામકૃષ્ણ વગેરે પ્રવૃત્તિમાર્ગને આશરેલા શ્રીવિષ્ણુના ઘણા અવતારો થાય છે. (૧૧) તે અવતારો ધર્મ, સાધુઓ અને દેવતાઓનો દ્રોહ કરનારા અસુરોનો નાશ કરી આ ભૂતલમાં ધર્મની પ્રવૃત્તિ કરાવે છે તે અવતારો મોક્ષાર્થી જનોને સેવવા યોગ્ય છે. (૧૨) તે અવતારો અસુરોને જે પ્રકારે મારે છે, તે અસુરો જેવા છે અને જે પ્રકારે ઉત્પન્ન થાય છે; તે સર્વ શ્રીમદ્ ભાગવતમાં કહેલું છે તે પ્રમાણે પ્રથમ અહીંયાં તમારા પ્રશ્નના ઉત્તરમાં હું કહું છું : (૧૩)

પૂર્વે સૃષ્ટિના આરંભમાં બ્રહ્મા પોતાની સૃષ્ટિની વૃદ્ધિ કરનારી પાંચ પર્વવાળી અવિદ્યાને પોતાની છાયાથી (અબુદ્ધિરૂપ છાયાથી) સૃજતા હતા. (૧૪) તમ, મોહ, મહામોહ, તામિસ્ર, અંધતામિસ્ર આ અનુક્રમે પાંચ પર્વ તે અવિદ્યાપર્વ કહ્યાં છે. (૧૫) બ્રહ્માએ આ પાંચ પર્વાત્મિકા અવિદ્યા સર્જીને તે અવિદ્યાની સૃષ્ટિના કારણભૂત પોતાના દેહનો ત્યાગ કર્યો. બ્રહ્માએ ત્યાગેલું શરીર તમોરૂપ રાત્રિ થઈ, જે રાત્રિમાં અસુરોનું બળ વિશેષ વધે છે. (૧૬) અવિદ્યાની ઉત્પત્તિના કારણભૂત બ્રહ્માના શરીરથી ઉત્પન્ન થયેલા તથા બીજા દેહને પામેલા બ્રહ્માના જઘન (કટિના અગ્રભાગ) થી ઉત્પન્ન થયેલા અસુરો -યક્ષો અને રાક્ષસો બ્રહ્માંડના સમગ્ર જીવોને દુઃખના કારણભૂત થયા. (૧૭) તે સમયે બ્રહ્માના પશ્ચાત્ ભાગથી ઉત્પન્ન અધર્મથી આ સર્ગ થયો. તે સર્ગ કામ, ક્રોધ, લોભ, મદ, ઈર્ષ્યા, હિંસા, માયા, કલિ, ભય, મોહ, મત્સર, માનાદિક તથા અસત્યભાષણ, કઠોરપણું વગેરે અધર્મ કુળમાં મુખ્ય; એ કામ વગેરે સર્વે અસુરોના શરીરમાં સુખપૂર્વક નિવાસ કરતા હતા. (૧૮-૧૯) કામાદિક અધર્મવંશથી આવિષ્ટ થયેલા, કરુણાથી રહિત સર્વ અસુરો વગેરે મૈથુન કરવા, માંસભક્ષણ અને રક્તપાન કરવા માટે બ્રહ્માની પછવાડે દોડ્યા તે સમયે બ્રહ્માએ તેમની ઉત્પત્તિના કારણભૂત પોતાના દેહનો ત્યાગ કર્યો. (૨૦) તે બ્રહ્માનો દેહ પડતાં પડતાં સાયંકાલની સંધ્યા થઈ, મૂઢ બુદ્ધિવાળા અસુરો સર્વે તે સંધ્યાને પોતાની ઈચ્છિત સ્ત્રીબુદ્ધિથી પામ્યા. તે દુષ્ટ અસુરો ત્રણ લોકમાં ફરતાં ફરતાં ત્રણ લોકને પીડા કરતા હતા. (૨૧) દુષ્ટ મનવાળા અસુરો અને યક્ષ રાક્ષસોનું જીવન અને તેમનું આ લોકનું સુખ અને પરલોકનું સુખ તે કેવળ અધર્મ સર્ગ જ હતો. (૨૨) પછી બ્રહ્મા પ્રભારૂપ પોતાના દેહથી દેવોને સૃજતા હતા. વિદ્યા, તપ અને યોગ-સમાધિના સામર્થ્યથી ઋષિઓ, મનુઓ અને માણસોને આદરપૂર્વક સૃજતા હતા. (૨૩)

પછી બ્રહ્માના જમણા સ્તનથી પ્રત્યક્ષ ધર્મ ઉત્પન્ન થયા, તે ધર્મ પોતાના પરિવારે સહિત દેવાદિમાં નિવાસ કરતા હતા. (૨૪) શ્રદ્ધા, મૈત્રી, દયા, શાંતિ, તુષ્ટિ, પુષ્ટિ, ક્રિયા, ઉન્નતિ, બુદ્ધિ, મેધા, તિતિક્ષા, હ્રી, મૂર્તિ, આ તેર ધર્મની પત્નીઓ છે. (૨૫) આ તેર શ્રદ્ધાદિ પત્નીઓ લક્ષ્મી વિષ્ણુને જ જેમ અને ભવાની શંકરને જ જેમ તેમ ધર્મને સર્વદા પતિવ્રતા ધર્મથી



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

॥२८॥ वपूंष्यधर्ममुख्यानां सन्त्यविद्यामयानि वै । विद्यामयानि सर्वेषां धर्मादीनां भवन्ति च ॥२९॥ दैवी सम्पदिति प्रोक्तः सान्वयो धर्म आसुरी । सम्पच्चाधर्मसर्गस्तु हरिगीतासु विस्तरात् ॥३०॥ दैवी सम्पन्मोक्षकर्त्री बन्धकर्त्री मताऽऽसुरी । देवतास्वस्ति दैव्येवमासुरी चासुरेष्वपि ॥३१॥ देशकालक्रियासङ्गवैषम्याद्दैवतेष्वपि । आसुरी सम्पदायाति तदा तेऽप्यसुरा मताः ॥३२॥ यथा शच्याः प्रसङ्गेन पारिजाततरोः कृते । कृष्णेन भूरि युयुधे देवेन्द्रोऽप्यसुरेन्द्रवत् ॥३३॥ देशादीनां सतां योगादसुरेष्वपि कुत्रचित् । दैवी निविशते सम्पत्तदा देवा हि ते मताः ॥३४॥ प्रह्लादो दैत्यपुत्रोऽपि यथा नारदसङ्गमात् । दैवीं सम्पदमेवाऽऽप विष्णौ भक्तिं परां व्यधात् ॥३५॥ तस्यैव सङ्गाच्च यथा तत्पौत्रो बलिरासुरम् । त्यक्त्वा भावं हरिं चक्रे स्ववशं दैवसम्पदा ॥३६॥ देशादीनां सदसतां सम्बन्धात्सम्पदोर्द्वयम् । इदं देवासुराख्याकृन्मनुष्येष्वपि वर्तते ॥३७॥ देशादेरसतो योगाद्दैविका अपि मानवाः । आसुरीं सम्पदं प्राप्य लभन्ते ह्यसुराभिधाम् ॥३८॥ दुर्योधनस्याश्रयणाद्द्रोणभीष्मादयो यथा । आसन्नधर्मरुचयस्ततो दुर्योधनार्थितैः ॥३९॥ पातालस्थासुरैर्विष्टा देवा अप्यसुरा इव। नरनारायणाभ्यां ते कृष्णाभ्यां युद्धमाचरन् ॥४०॥
कृतकार्येषु दैत्येषु निर्गतेषु तदङ्गतः । पुनस्ते भगवद्भक्तिं चक्रिरे धर्ममाश्रिताः ॥४१॥ सतो योगात्तथा क्वापि देशादेरासुरक्रियाः । अपि देवाभिधां यान्ति दैवीं प्राप्यात्र मानवाः ॥४२॥ कदर्यपिङ्गलाद्याश्च दत्तात्रेयसमागमात् । यथाऽऽसुरक्रिया हित्वा पूज्या देवा इवाभवन् ॥४३॥ धर्मेण चाप्यधर्मेण सवंश्येनाश्रितात्मनाम् । देवासुराणामेतेषां

---

અનુસરેલી છે. (૨૬) શુભ, સુખ, પ્રસાદ, ક્ષેમ, અભય, હર્ષ, જ્ઞાન, વૈરાગ્ય, યોગ, તપ, પ્રશ્રય, વગેરે ધર્મના પુત્રો છે. પત્નીએ સહિત ધર્મ, પુત્રોએ સહિત દેવ વગેરેમાં સુખેથી નિવાસ કરતાં હતાં. (૨૭) સ્ત્રી, પુત્ર, પૌત્રાદિની સાથે ધર્મ દેવાદિનું જીવન હતું. આ લોકમાં અને પરલોકમાં પણ જે ઈચ્છિત સુખ તે સંબંધીઓની સાથે વર્તતો ધર્મ જ હતો. (૨૮) અધર્માદિ વંશોના દેહો અવિદ્યામય (અજ્ઞાન પ્રધાન) છે અને ધર્માદિની શ્રદ્ધાદિ પત્નીઓ અને શુભાદિ પુત્રોના શરીરો વિદ્યામય છે. (૨૯) શ્રીભગવદ્‌ગીતામાં પરિવારે સહિત ધર્મ દૈવી સંપત્તિ છે એમ વિસ્તારથી કહેલું છે. અને અધર્મસર્ગ આસુરી સંપત્તિ છે. આ પ્રમાણે સવિસ્તર કહેલું છે. દૈવી સંપત્તિ મોક્ષ કરનારી અને આસુરી સંપત્તિ બંધન કરનારી માનેલી છે. દેવતાઓમાં (દેવતા શબ્દથી ઋષિઓ, મનુઓ અને મનુષ્યો વગેરેમાં) દૈવી સંપત્તિ છે, એ જ પ્રકારે અસુરોમાં (અસુર શબ્દથી યક્ષ, રાક્ષસો વગેરેમાં) આસુરી સંપત્તિ રહેલી છે. (૩૦-૩૧) દેશ, કાલ, ક્રિયા અને સંગનું વિષમપણું હોવાથી દૈવી સંપત્તિવાળા દેવોમાં પણ આસુરી સંપત્તિ આવે છે. ત્યારે દેવો પણ અસુરો માન્યા છે. (૩૨) જેમ દેવેન્દ્રે, શચિ (ઈંદ્રાણી) ના પ્રસંગથી પારિજાત વૃક્ષ માટે ભગવાન શ્રીકૃષ્ણ સાથે અસુરેન્દ્રવત્ ઘણું યુદ્ધ કર્યું હતું. (૩૩) ક્યારેક શુભ દેશ, કાલ, ક્રિયા અને સંગના યોગથી અસુરોમાં પણ દૈવી સંપત્તિ પ્રવેશ કરે છે ત્યારે અસુરો દેવો માનેલા છે. (૩૪) અસુરસુત પ્રહ્‌લાદજી પણ નારદજીના સમાગમથી દૈવી સંપદાને પામીને વિષ્ણુમાં પરમ ભક્તિ કરતા હતા. (૩૫) જેમ પ્રહ્‌લાદના સંગથી તેના પુત્રનો પુત્ર બલિ, આસુર ભાવનો ત્યાગ કરીને દૈવી સંપત્તિથી હરિને પોતાને આધીન કરતો હતો. (૩૬) શુભ અને અશુભ દેશ વગેરેના સંબંધથી દેવ અને અસુર નામ કરનારી આ બન્ને દૈવી અને આસુરી સંપત્તિઓ મનુષ્યોમાં પણ વર્તે છે. (૩૭) દૈવી સંપત્તિયુક્ત મનુષ્યો પણ અશુભ દેશ વગેરેના યોગથી આસુરી સંપત્તિને પામીને **અસુર** નામને પામે છે જ. (૩૮) જેમ દ્રોણ, ભીષ્મ અને કૃપાચાર્ય વગેરે કલિના અવતારભૂત દુર્યોધનના આશ્રયરૂપ સંબંધથી અધર્મમાં રુચિવાળા થયા. પછી દુર્યોધનની પ્રાર્થનાથી પાતાલવાસી અસુરોએ પ્રવેશ કરેલા દ્રોણ, ભીષ્મ વગેરે પ્રથમ દૈવી સંપત્તિવાળા હતા તો પણ અસુરોની માફક સાક્ષાત્ નરનારાયણ રૂપ અર્જુન અને કૃષ્ણ સાથે યુદ્ધ કરતા હતા. (૩૯-૪૦)

કાર્ય કરી લીધા પછી અસુરો તેમના શરીરથી નીકળી ગયા ત્યારે દ્રોણ અને ભીષ્મ વગેરે ફરીથી ધર્મનો આશ્રય કરી ભગવદ્ ભક્તિ કરતા હતા. (૪૧) તે પ્રકારે કોઈ સમયે આ લોકમાં આસુરી ક્રિયાવાળા પણ મનુષ્યો સારા દેશકાલાદિના યોગથી દૈવી સંપત્તિને પામીને **દેવ** સંજ્ઞાને પામે છે. (૪૨) જેમ અવંતિ નગરનો કદર્ય બ્રાહ્મણ અને મિથિલા નગરીની પીંગલા વેશ્યા, તથા ગુહ, શબરી વગેરે મનુષ્યો દત્તાત્રેયના તથા શ્રીરામના સમાગમથી આસુરી ક્રિયા- (કદર્યમાં લોભાદિ આસુરી ક્રિયા, પિંગલામાં કામાદિ આસુરી ક્રિયા, ગુહમાં હિંસાદિ આસુરી ક્રિયા) તેનો ત્યાગ કરી દેવોની માફક પૂજ્ય થયા. (૪૩) પોતપોતાના પરિવારે સહિત ધર્મથી, અને વંશે સહિત અધર્મથી પણ આવિષ્ટ મનવાળા દેવ અને અસુરોને પરસ્પર



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

वैरमस्ति परस्परम् ॥४४॥ छिद्राणि स्वस्वशत्रूणां ते पश्यन्त इतस्ततः । विचरन्ति त्रिलोक्यां वै स्वयूथैर्विजिगीषवः ॥४५॥ देशकालक्रियासङ्गान् सतो यर्हि श्रयन्ति ह । देवास्तर्हि जयन्त्येव धर्माद्यैर्निजवैरिणः ॥४६॥ देशादीनसतो यर्हि श्रयन्ते देवताः क्वचित् । तदा स्वनिष्ठाधर्माद्यैरसुरास्ता जयन्ति हि ॥४७॥ इत्थं देवाश्चासुराश्च स्वस्थयोः सम्पदोर्वशात् । व्यवह्रियन्ते लोकेषु तत्तन्नाम्ना द्विधा किल ॥४८॥ तत्रेदृशासुरान्हन्ति धर्मसंरक्षणाय सः । कृतावतारो भगवान् द्वेधा तदधुनोच्यते ॥४९॥ प्रवृत्तिमार्गमाश्रित्य भगवान् यर्हि वर्तते । रामकृष्णादिरूपेण तदा तान् हन्ति हेतिभिः ॥५०॥ क्वचित्क्वचिच्च तन्निष्ठान्कामादीनान्तरासुरान् । ज्ञानोपदेशखड्गेन स हन्ति नतु तत्तनूः ॥५१॥ निवृत्तिमार्गमाश्रित्य भगवान् यर्हि वर्तते । नारायणादिरूपेण तदा हन्त्यान्तरान्रिपून् ॥५२॥ स्वाभाविकान्हन्ति दोषान्कामादीनसुरस्थितान् । सांसर्गिकांश्च देवस्थान्नतु तेषां तनूः क्वचित् ॥५३॥ स एव भगवान् पुंभिर्धृतमानुषविग्रहः । उपासनीयः श्रेयोऽर्थमज्ञानतिमिरापहः ॥५४॥ स्वतन्त्रत्वात्स भगवान्प्रत्यक्षः क्वापि वर्तते । क्वचित्परोक्षवच्चासावदृश्यो वर्तते नृभिः ॥५५॥ अदृश्यः स यदा तर्हि तूपास्या तस्य सर्वथा । प्रतिमैवाथ साधूनां सेवा कार्या च पूजनम् ॥५६॥ निष्कामा अथ निर्लोभा निःस्वादा निष्परिग्रहाः । निःस्नेहा निर्ममा दान्ता निर्मानाः साधवो मताः ॥५७॥ तितिक्षवः कारुणिकाः सुहृदः सर्वदेहिनाम् । अजातशत्रवः शान्ताः साधवः साधुभूषणाः ॥५८॥ सन्तोऽपि द्विविधा ज्ञेया धीमन्तोऽल्पधियस्तथा । धीमन्तस्तत्र देशादीन् सत

---

સ્વાભાવિક વેર છે. (૪૪) વંશેસહિત ધર્મના આવેશવાળા દેવો વગેરે, અને વંશેસહિત અધર્મના આવેશવાળા અસુરો વગેરે પોતપોતાના શત્રુઓના, પોતપોતાના પ્રવેશ કરવાના છિદ્રોને જોતાં થકાં અન્યોન્યને જીતવાની ઈચ્છાવાળા થઈને પોતપોતાના મંડળોની સાથે ત્રણ લોકમાં અહીંતહીં-(એક ઠેકાણેથી બીજે ઠેકાણે)વિચરણ કરે છે. (૪૫) દેવો જ્યારે શુભ દેશ, કાલ, ક્રિયા અને સંગનો આશ્રય કરે છે ત્યારે પોતાનામાં રહેલાં, સત્ દેશ વગેરેથી પ્રાપ્ત બળવાળા ધર્માદિથી પોતાના શત્રુ અસુરોનો પરાભવ કરે છે જ. (૪૬) જ્યારે દેવતાઓ અશુભ દેશાદિનો આશ્રય કરે છે ત્યારે અસુરો પોતાનામાં રહેલાં, અસત્ દેશ વગેરેથી બળ પામેલાં અધર્માદિથી દેવતાઓને જીતે છે. (૪૭) આ પ્રમાણે દેવો અને અસુરો પોતાનામાં રહેલી દૈવી અને આસુરી સંપત્તિના વશપણાથી દેવ અને અસુર નામથી લોકમાં બે પ્રકારે વ્યવહાર થાય છે જ. (૪૮) દેવ અને અસુરોમાં આ પ્રકારે આસુરી સંપત્તિ યુક્ત અસુરોને ધર્મનું રક્ષણ કરવા માટે ગ્રહણ કર્યો છે અવતાર જેણે એવા પૂર્વે કહેલા ભગવાન વિનાશ કરે છે, તે વિનાશ હાલમાં બે પ્રકારે; પ્રત્યક્ષ તેના દેહના નાશથી અને તેની જીવિકારૂપ સંપત્તિના વિનાશથી કહેવાય છે. (૪૯) જ્યારે ભગવાન શ્રી વાસુદેવ રામ-કૃષ્ણાદિ રૂપથી પ્રવૃત્તિ માર્ગનો આશ્રય કરી વર્તે છે ત્યારે તે અસુરોને સુદર્શનાદિ આયુધોથી નાશ કરે છે. (૫૦) પ્રવૃત્તિમાર્ગને આશરીને વર્તતા ભગવાન ક્યારેક ક્યારેક અસુરોમાં રહેલાં- અસુરોની જીવિકારૂપ કામાદિ અધર્મસર્ગના લક્ષણરૂપ દોષોનો જ્ઞાનોપદેશરૂપ તરવારથી નાશ કરે છે; પરંતુ તે અસુરોના સ્વાભાવિક આસુરી સંપત્તિવાળા અને સાંસર્ગિક આસુરી સંપત્તિવાળા શરીરોનો નાશ કરતા નથી. (૫૧) જ્યારે ભગવાન શ્રી નરનારાયણાદિ સાધુ સ્વરૂપે નિવૃત્તિમાર્ગને આશરીને વર્તે છે ત્યારે અસુરોની અંદર પ્રવેશ પામેલા જીવિકારૂપ કામાદિને નાશ કરે છે. (૫૨) અસુરમાં રહેલા સ્વાભાવિક કામાદિ દોષોને નાશ કરે છે અને અસુરોના સંસર્ગથી આવેલા દેવોમાં રહેલા કામાદિ દોષોને નાશ કરે છે. ક્યારેય પણ તેમનાં શરીરોને નાશ કરતા નથી જ. (અહિંસાદિ નિવૃત્તિધર્મને આશરેલા હોવાથી) (૫૩) મનુષ્યાકૃતિ ધારણ કરનારા, જીવોના અજ્ઞાનરૂપી અંધકારને નાશ કરનારા તે ભગવાન જ જનોએ પોતાના કલ્યાણ માટે ઉપાસના કરવા યોગ્ય છે. (૫૪)

તે ભગવાન સ્વતંત્ર હોવાથી ક્યારેક પ્રત્યક્ષ વર્તે છે અને ક્યારેક પરોક્ષની માફક મનુષ્યોએ અદૃશ્ય વર્તે છે. (૫૫) જ્યારે તે ભગવાન અદૃશ્ય વર્તતા હોય ત્યારે તો ભગવાનની પ્રતિમા જ સર્વ પ્રકારે ઉપાસના કરવા યોગ્ય છે અને સાક્ષાત્ તેમના આશ્રિત સાધુઓની સેવા અન્ન-વસ્ત્રાદિથી કરવી અને ચંદન-પુષ્પાદિથી પૂજન કરવું. (૫૬) નિષ્કામ, નિર્લોભ, નિઃસ્વાદ, નિષ્પરિગ્રહ, નિઃસ્નેહ, મમતા રહિત, પોતાના ધર્મને અનુસારે ઈન્દ્રિયોનો નિગ્રહ કરનારા, માને રહિત એવા સાધુઓ માનેલા છે. (૫૭) ક્ષમાશીલ, દયાળુ, સર્વ દેહીઓના મિત્ર, અજાત શત્રુ, ઉપશમસ્વભાવવાળા, સાધુભૂષણ શીલ સ્વભાવથી શોભતા એવા સાધુઓ માનેલા છે. (૫૮) સાધુઓ પણ શ્રેષ્ઠ બુદ્ધિવાળા તથા અલ્પ બુદ્ધિવાળા એમ બે પ્રકારના



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

एवाश्रयन्ति हि ॥५९॥ हरेरदृश्यादपि ते भिया पूर्ववदात्मनः । वर्तन्ते सर्वथा धर्मे जानन्तस्तस्य नित्यताम् ॥६०॥ माहात्म्यबलमाश्रित्य हरेरन्ये तु निर्भयाः । असतो देशकालादीन् सेवन्ते च निरङ्कुशाः ॥६१॥ तानधर्मः सह स्वस्य वंश्यैर्जयति सत्वरम् । धर्मभ्रष्टा भवन्त्येव ततस्ते पापचेतसः ॥६२॥ भक्तेषु द्विविधेष्वेषु प्रागुक्ता धर्मसंस्थिताः । ये ते तु परमप्रीत्या सेवनीया मुमुक्षुभिः ॥६३॥ नियमान् ब्रह्मचर्यादीन्न जह्युर्ये भयाद्धरेः । ज्ञानिनो भगवद्भक्तास्तद्वशेऽस्ति यतः प्रभुः ॥६४॥ अधर्मसर्गेण जिता भक्ताख्या ये तु निर्भयाः । ते महापापिवत्तूर्णं दूराद्धेया मुमुक्षुभिः ॥६५॥ न तेषां सेवया श्रेयो न प्रीतिश्च श्रियःपतेः । केवलं धर्महानिः स्यादतस्त्याज्या हि ते मताः ॥६६॥ धर्मस्योपासनायाश्च बलवृद्धिर्भवेत्सताम् । सङ्गात्तद्बलनाशश्च सङ्गात्स्यादसतां ध्रुवम् ॥६७॥ सदसद्व्यक्तिबोधस्तु भवेद्बुद्ध्यैव देहिनाम् । सा तु सुज्ञेषु पुंसु स्यान्नतु स्त्रीषु कदाचन ॥६८॥

अतस्ताभिर्दृढं भक्त्या श्रीविष्णोः प्रतिमैव हि । साक्षाद्विष्णुधियोपास्या न सन्तोऽन्तर्हिते हरौ ॥६९॥ यदि सद्वृत्तयः सन्तः स्युस्तर्हि स्त्रीभिरात्मनः । साकं सम्बन्धिभिः श्रव्या कथा तेभ्यस्तु संसदि ॥७०॥ सम्बन्धिभिरपि स्त्रीणां पितृभ्रातृसुता - दिभिः । परीक्ष्यादौ सतो नेया योषास्तद्दर्शनाय ताः ॥७१॥ असन्तोऽप्यत्र बहवः सद्वेषा विचरन्ति हि । वाचातिज्ञानवैराग्यभक्तिधर्मनिरूपकाः ॥७२॥ अतस्तेषां परीक्षापि दुष्करा सर्वपूरुषैः । सुप्रयुक्तस्य दम्भस्य नान्तं गन्तुं हि

જાણવા : આ બે પ્રકારના સાધુઓમાં બુદ્ધિમાન સાધુઓ શુભ દેશાદિનો આશ્રય કરે છે. (૫૯) તે બુદ્ધિવાળા સાધુઓ પોતાની ઈચ્છાથી અદૃશ્ય ભાવને પામેલા શ્રીહરિનું પણ નિત્યપણું જાણતા સતા અપ્રત્યક્ષ એવા પણ શ્રીહરિના ભયથી (સર્વજ્ઞ અંતર્યામી મારા પાપને જુએ છે એવા ભયથી) પ્રત્યક્ષની માફક નિષ્કામાદિ ધર્મમાં સર્વ પ્રકારે વર્તે છે. (૬૦) અલ્પ બુદ્ધિવાળા સાધુઓ તો શ્રીહરિના માહાત્મ્યબળનો (ભગવાન અધમોદ્ધારક છે પતિતપાવન છે વગેરે માહાત્મ્યના બળનો) આશ્રય કરી નિર્ભય થઈને ગુરુઆદિ શાસન કર્તાના ભયથી રહિત થઈને અસત્ દેશકાલાદિનો આશ્રય કરે છે. (૬૧) અલ્પ બુદ્ધિવાળા સાધુઓને પોતાનાં કામક્રોધાદિક વંશે સહિત અધર્મ, તત્કાલ પરાભવ પમાડે છે, પછી તે સાધુઓ સ્વધર્મથી પડીને પાપમાં બુદ્ધિવાળા થાય છે. (૬૨) બે પ્રકારના ભગવાનના ઉપાસક સાધુઓમાં નિષ્કામાદિ ધર્મમાં વર્તતા પૂર્વે કહેલા બુદ્ધિશાળી સાધુઓ તે તો મુમુક્ષુઓએ સેવા કરવા યોગ્ય છે; (૬૩) કારણ કે દૃઢ પરમાત્માના સ્વરૂપના જ્ઞાનવાળા ભગવાનના ભક્તો બુદ્ધિશાળી સાધુઓ પરોક્ષ ભગવાનના પણ ભયથી બ્રહ્મચર્યાદિ નિયમોનો ત્યાગ કરતા નથી તેવા પ્રકારના સાધુઓના વશપણામાં શ્રીકૃષ્ણ વર્તે છે. (૬૪) ભગવાનના માહાત્મ્યબળનો આશ્રય કરીને ભયથી રહિત અધર્મસર્ગથી પરાભવ પામેલાં ફક્ત ભક્ત નામવાળા, અલ્પબુદ્ધિવાળા સાધુઓ તે તો મુમુક્ષુઓએ મહાપાપીની માફક શીઘ્ર દૂરથી ત્યાગ કરવા યોગ્ય છે. (૬૫) તેવા અલ્પ બુદ્ધિવાળા સાધુઓની સેવાથી મોક્ષ ન થાય અને શ્રીકૃષ્ણની પ્રસન્નતા ન થાય : કેવળ ધર્મહાનિ થાય, માટે અલ્પબુદ્ધિવાળા સંતો ત્યાગ કરવા યોગ્ય માનેલા છે. (૬૬) ધીમંત સાધુઓના સંગથી ધર્મ અને ઉપાસનાના બળની વૃદ્ધિ થાય; અલ્પ બુદ્ધિવાળા નામ માત્ર સાધુઓના (અર્થાત્ અસાધુઓના) સંગથી પોતાના સદ્ધર્મ અને ભગવાનની ઉપાસનાનો નાશ થાય જ. (૬૭) હે રાજન્ ! મનુષ્યોને સાધુ અને અસાધુના લક્ષણ સહિત વિવેકજ્ઞાન તો સત્શાસ્ત્રનાં સંસ્કારવાળી બુદ્ધિથી જ થાય, તેવા પ્રકારની બુદ્ધિ તો વિચક્ષણ પુરુષોમાં હોય, સ્ત્રીઓમાં ક્યારેય પણ તે બુદ્ધિ હોતી નથી. (૬૮) માટે શ્રીહરિ પોતાની ઈચ્છાથી અંતર્ધાન થાય ત્યારે સ્ત્રીઓએ શ્રીકૃષ્ણ ભગવાનની પ્રતિમા પ્રત્યક્ષ બુદ્ધિથી સ્વધર્મે સહિત ભક્તિપૂર્વક સેવવા યોગ્ય છે. બંને પ્રકારના સાધુઓ ઉપાસના કરવા યોગ્ય નથી. (૬૯) જ્યારે પૂર્વે કહેલા સાધુ લક્ષણ યુક્ત સાધુઓ હોય ત્યારે સ્ત્રીઓએ પોતાના સંબંધી પિતા અને ભાઈ વગેરેની સાથે સભામાં સત્ પુરુષોથી કથા સાંભળવી. (૭૦) તે પિતા, ભાઈ અને પુત્ર, કાકા, મામા, વગેરે સ્ત્રીઓના સંબંધીઓએ પણ પ્રથમ સાધુઓની પરીક્ષા કરી સાધુઓનાં દર્શન કરાવવા મુમુક્ષુ પોતાની દીકરી, બહેન, માતા, વગેરે સ્ત્રીઓ લઈ જવી; (૭૧) કારણકે આ લોકમાં સાચા સાધુઓના વેશવાળા, વાણી માત્રથી અતિશય જ્ઞાન, વૈરાગ્ય, ભક્તિ અને ધર્મનું દંભથી નિરૂપણ કરનારા; ઘણા અસાધુઓ પણ વિચરણ કરે છે. (૭૨) માટે સાધુ અને અસાધુઓની પરીક્ષા સર્વ પુરુષોએ કરવા



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

शक्यते ॥७३॥ तथापि चतुरैः पुम्भिः परीक्षा शास्त्रबुद्धिभिः । कर्तुं तेषां शक्यतेऽतो ब्रुवे लक्ष्माणि सत्सताम् ॥७४॥ अहिंसाब्रह्मचर्याद्याः स्वधर्माः सन्ति येऽमलाः । अल्पस्यापि च्युतौ तेषामनुतापं व्रजन्त्यति ॥७५॥ तन्निष्कृतिं यथोक्तां च ततो भगवतो भयात् । परोक्षादपि कुर्वन्ति प्रत्यक्षादिव ये द्रुतम् ॥७६॥ आपद्वशात् क्वचित्तस्यामकृतायां तु निष्कृतौ । अनुतापविकारः स्यात् येषामन्तर्बहिर्महान् ॥७७॥ महापापेष्वन्यतमे क्वापि जाते यथाऽऽपदि । सम्भावितस्य पुंसः स्यात्तापस्तेषां तथाल्पके ॥७८॥ व्याघ्रादप्यधिका येषां स्त्रियाः स्त्रैणाच्च भीर्भुवि । नात्मश्लाघां च कुर्वन्ति ये ते ज्ञेया हि साधवः ॥७९॥ परीक्षितानामेतेषां दर्शनार्थं गृहस्थितैः । सम्बन्धिन्यः स्त्रियो नेयास्ताभिः श्रव्या च तत्कथा ॥८०॥ अथ ये दाम्भिका भक्ताः सद्वेषा वाचि साधवः । देहाचारेण वाचा च परीक्ष्यास्तेऽपि सज्जनैः ॥८१॥ ये वासुदेवमाहात्म्ये धर्मा भगवता स्वयम् । कथिताः साधुभक्तानां तत्र द्वित्रच्युतावपि ॥८२॥ तन्निष्कृतेराचरणे स्वशैथिल्यस्य गोपनम् । कर्तुं नारायणस्येत्थं माहात्म्यं दर्शयन्ति ये ॥८३॥

अधमोद्धारणो नूनं हरिः पतितपावनः । सकृत्तन्नामकीर्त्या वा पापं नैवावशिष्यते ॥८४॥ नाम्नोऽस्ति यावती शक्तिः पातकानां विनाशने । तावत्कर्तुं न शक्नोति पातकं पातकी नरः ॥८५॥ अङ्गसङ्गं वैष्णवानां वदेयुर्दुर्लभं च ये । आत्मश्लाघां मुहुर्ये च कुर्युः सिद्धत्वबुद्धये ॥८६॥ ये च स्वसद्धर्मरतान्साधकानेव चक्षते । स्वैरं तु चरतः सिद्धान्मुक्तान्प्राहुश्च दुर्धियः

---

માટે શક્ય નથી. સારી રીતે પ્રયોગ કરેલો સારો વેશ અને સારી રીતે આચરણ કરેલા દંભનો પાર પામવા શક્તિમાન થવાતું નથી. (૭૩) તો પણ શાસ્ત્રાર્થમાં કુશળ બુદ્ધિવાળા સુજ્ઞ પુરુષોએ સત્ અને અસત્ પુરુષોની પરીક્ષા કરવા શક્તિમાન થવાય છે. માટે પ્રથમ સત્ય **સાધુઓનાં લક્ષણો** કહું છું. (૭૪) અહિંસા, આઠ પ્રકારે સ્ત્રીના ત્યાગરૂપ બ્રહ્મચર્ય, એ છે મુખ્ય જેમાં એવા દ્રવ્યાદિનો ત્યાગ વગેરે નિર્મળ ધર્મો છે તે ધર્મોમાં અલ્પ માત્ર પણ સ્વધર્મનો ભંગ થાય તો સાચા સાધુઓ છે તે પશ્ચાત્તાપ કરે છે. (૭૫) જે સત્ય સાધુઓ છે તે પશ્ચાત્તાપ પામ્યા પછી પ્રત્યક્ષ વર્તતા ભગવાનના ભયથી જ જેમ તેમ પરોક્ષ થકી પણ ભય પામીને પોતાના ધર્મના ભંગનું પ્રાયશ્ચિત્ત તત્કાલ કરે છે. (૭૬) ક્યારેક આપત્કાલના વશપણાથી પ્રાયશ્ચિત્ત ના કર્યું હોય તો જે સત્ પુરુષોના અંતઃકરણમાં અને બહાર દેહમાં અતિશય ઉદાસીનતારૂપ પશ્ચાત્તાપની વિકૃતિ થાય. (૭૭) જેમ આ લોકમાં ધાર્મિક વગેરે ગુણોથી પ્રસિદ્ધ પુરુષને ક્યારેક આપત્કાલમાં મહાપાપોમાં કોઈ એક મહાપાપ થયે સંતાપ થાય તેમ તે સાધુઓને અલ્પમાત્રામાં પણ સ્વધર્મનો ભંગ થયો હોય ત્યારે સંતાપ થાય છે. (૭૮) જેઓને પૃથ્વીમાં સ્ત્રીઓ અને સ્ત્રીલમ્પટ પુરુષોથી ભય વ્યાઘ્રથી પણ અતિશય થાય છે. જે સંતો આત્મશ્લાઘાને કરતા નથી તે સાચા સાધુઓ જાણવા. (૭૯) ગૃહસ્થોએ, કહેલાં લક્ષણોથી કરેલી છે પરીક્ષા જેમની એવા સાધુઓના દર્શન માટે પોતાના સંબંધવાળી સ્ત્રીઓને લઈ જવી. સ્ત્રીઓએ સાચા સાધુઓએ કહેલી કથા સાંભળવી. (૮૦) પછી ઉપરથી જેમણે સાચા સાધુનો વેશ ધારણ કર્યો છે. વસ્તુતાએ દંભ માત્રમાં નિષ્ઠાવાળા, વાણીમાત્રથી સાધુ સંજ્ઞાવાળા અને ભક્ત સંજ્ઞાવાળા જે અસાધુઓ તે પણ દેહના આચારથી અને વાણીથી સજ્જનોએ આ અસાધુઓ છે એમ પરીક્ષા કરવી. (૮૧) વાસુદેવ માહાત્મ્યમાં સ્વયં ભગવાને સાધુઓ અને ભક્તોના જે ધર્મો કહેલા છે તે ધર્મોમાં બે અથવા ત્રણ ધર્મોનો ભંગ થાય તોપણ તેના પ્રાયશ્ચિત્તમાં પોતાના મંદપણાને ઢાંકવા માટે જે અસાધુઓ છે તે નારાયણનું માહાત્મ્ય બતાવે છે. (૮૨-૮૩)

શ્રીહરિ અધમોદ્ધારક, (પિંગલાદિ અધમનો ઉધ્ધાર કરનાર) અને પતિતપાવન-(અજામિલ વગેરેને પણ પાવન કરનાર) છે; એક વાર નારાયણના નામોચ્ચારથી પાપ બધા નાશ પામે છે. (૮૪) પાપોના નાશ કરવામાં ભગવાનના નામોચ્ચારણની જેટલી શક્તિ છે, પાપી તેટલું પાપ કરવા માટે શક્તિમાન નથી. (૮૫) જે અસાધુઓ વૈષ્ણવોનો અંગસંગ દુર્લભ કહે છે; વૈષ્ણવના ચરણસ્પર્શનું પણ માહાત્મ્ય શાસ્ત્રોએ કહેવા માટે શક્ય નથી તો સર્વ અંગનું આલિંગનની દુર્લભતા હોય તેમાં તો કહેવું શું ? તે તો દુર્લભ હોય જ : એમ કહે છે. જે અસાધુઓ પોતાના સિધ્ધપણાની પ્રસિદ્ધિ માટે વારંવાર પોતાના ગુણોની પ્રશંસા કરે છે. (૮૬) દુષ્ટ મતિવાળા અસાધુઓ પોતાના સદ્ધર્મોમાં પ્રીતિવાળા સાધકોને સાધન

॥८७॥ वयं ब्रह्म जगत्सर्वं मूर्तिमद् ब्रह्म निश्चितम् । स्त्रीपुंसानां च शृङ्गारो ब्रह्मकल्लोल एव हि ॥८८॥ राधाकृष्णस्य रासोऽपि गोलोकेऽस्माभिरैक्षि वै । समाधौ नात्र सन्देहः स कृष्णोऽस्मासु वर्तते ॥८९॥ कृष्णबुद्धिं करिष्यन्ति तस्मादस्मासु ये जनाः । भवित्री भगवल्लोकप्राप्तिस्तेषां यथैव नः ॥९०॥ इत्थं मिथ्यादम्भवार्ताचाटुभिर्वञ्चितान् जनान् । स्वविश्वस्तान् प्रकुर्युर्ये धर्मभ्रष्टान् दुराशयाः ॥९१॥ अधर्मसर्गेण जिता असन्तस्तेऽवगम्यताम् । यदाश्रयात्प्रपच्यन्ते कुम्भीपाकेषु मानवाः ॥९२॥ तत्परीक्षणकालं च सूचयामि समासतः । तद्धार्दं ज्ञायते यत्र मुहुस्तत्पार्श्वगैर्नरैः ॥९३॥ स्वतुल्यशीलिनो यर्हि भवेयुस्ते तु सङ्गताः । भक्तिधर्मविरक्तीनां कुर्युर्मूलच्छिदां तदा ॥९४॥ ब्रह्मणो ज्ञानमात्रस्य कुर्युश्च स्थापनं मुदा । एतस्मिन्नन्तरे कश्चिद्यद्यागच्छेदुपासकः ॥९५॥ तदा तु स्वस्य सिद्धान्तमाच्छाद्यैवाशु ते खलाः । धर्मादिस्थापनं कुर्युस्तस्मादप्यधिकं सतः ॥९६॥ इत्यादिकाले ह्यसतां ज्ञेय आभ्यन्तराशयः । नित्यानुयायिभिः पुंभिर्धर्मध्वंसैकलक्षणः ॥९७॥ मद्ये मांसे पारदार्ये स्तैन्ये स्वपरहिंसने । गुप्तं तेषां प्रवृत्तिश्च ज्ञेया साङ्कर्यकर्मसु ॥९८॥ धर्मस्य स्थापने यादृक् श्रीविष्णोराग्रहोऽस्ति हि। तथैव तेषामसतां धर्मोन्मूलन आग्रहः ॥९९॥

इत्थं कुलक्षणैर्ज्ञात्वा दाम्भिकानसतः खलान् । तद्दर्शनार्थं गृहिभिर्न नेया योषितः क्वचित् ॥१००॥ न पुम्भिरपि कर्तव्यः सङ्गस्तेषां ततः परम् । श्रीविष्णोः प्रतिमैवार्च्या सर्वैरपि मुमुक्षुभिः ॥१०१॥ एतां सच्छास्त्रमर्यादामतिक्रम्यात्र याः स्त्रियः । वर्तिष्यन्ते नरा वा ये नङ्क्ष्यन्ति च न संशयः ॥१०२॥ प्राप्स्यन्त्यपयशोऽत्रापि परत्र च यमालये । आर्तनादान्प्रकुर्वन्तो लप्स्यन्ते तीव्रवेदनाः ॥१०३॥ धर्मसंरक्षणेनैव मुक्तिमैकान्तिकीं तु ये । इच्छेयुस्तैश्चिन्तनीयमेतन्मद्वाक्यमादरात् ॥१०४॥

દશાવાળા કહે છે. વિધિનિષેધનું ઉલ્લંઘન કરીને ઈચ્છા પ્રમાણે વર્તનારા અસાધુઓને તો સિધ્ધ દશા પામેલા અને મુક્ત ભાવને પામેલા કહે છે. (૮૭) અમો બ્રહ્મરૂપ છીએ, સર્વ જગત સાકાર બ્રહ્મ નિશ્ચે છે; સ્ત્રી પુરુષોનો સંભોગ મહાતરંગ સમાન બ્રહ્મ વિલાસ છે. ('આનંદં બ્રહ્મણો રૂપં' આ શ્રુતિવાક્યથી આનંદ જ બ્રહ્મનું રૂપ છે એવો ભાવાર્થ છે.) (૮૮) રાધાકૃષ્ણની રાસ ક્રિયા પણ અમોએ સમાધિમાં જોયેલી છે. એમાં સંદેહ નથી. કૃષ્ણ અમારે વિષે નિરંતર રહે છે. (૮૯) માટે જે અમારામાં કૃષ્ણબુદ્ધિ કરશે તે જનોને પણ અમારી જેમ જ ભગવાનના લોકની પ્રાપ્તિ થશે. (૯૦) હે રાજન્ ! આ પ્રકારે દુષ્ટ અભિપ્રાયવાળા અસાધુઓ મિથ્યાભૂત દંભ વાર્તાઓમાં પ્રિય વાણીની મધુરતાથી પોતાના ઉપર વિશ્વાસવાળા જનોને પોતાના સ્વધર્મથી ભ્રષ્ટ કરે છે. (૯૧) જે અધર્મસર્ગે વશ કરાયેલા હોય તેમને અસાધુઓ જાણવા, તેઓના આશ્રયથી મનુષ્યો કુંભીપાકોમાં તપેલા તેલના કઢાયામાં રંધાય છે.(૯૨) વળી અસાધુઓનો જે પરીક્ષાસમય તે સંક્ષેપથી કહું છું. જે સમયે વારંવાર અસાધુઓના સમીપમાં રહેનારા મનુષ્યો તે અસાધુઓનો હૃદયગત અભિપ્રાય જાણી શકે છે. (૯૩) જ્યારે પોતાના સમાન સ્વભાવવાળા અસાધુઓ પરસ્પર ભેગા થાય છે ત્યારે ભક્તિ, ધર્મ અને વૈરાગ્યાદિનાં મૂળોનું છેદન કરે છે. (૯૪) બ્રહ્મના જ્ઞાન માત્રને જ અતિ હર્ષથી સ્થાપન કરે છે. મોક્ષ તો 'અહમ્ બ્રહ્માડસ્મિ' 'હું બ્રહ્મ છું.' : આ જ્ઞાનથી થાય છે. એટલા સમયમાં જ્યારે કોઈ ઉપાસક ધર્મનિષ્ઠ આવે તો તે અસાધુઓ પોતાનો સિદ્ધાંત બ્રહ્મજ્ઞાન રૂપને તત્કાલ ઢાંકીને સદ્ધર્મનિષ્ઠ ઉપાસકથી પણ અતિશય ધર્મભક્તિ અને વૈરાગ્યનું પ્રતિપાદન કરે છે. (૯૫-૯૬) એ આદિક સમયમાં નિત્ય સમીપમાં રહેનારા પુરુષોએ ધર્મનો નાશ કરવા રૂપી લક્ષણવાળા અસત્ પુરુષોનો દુષ્ટ આશય અવશ્ય જાણી શકાય છે. (૯૭) મદ્યપાન, માંસભક્ષણ, પરસ્ત્રીનો સંગ, ચોરી, પોતાનો આત્મઘાત, પારકાનો ઘાત, સંકરીકરણ, જાતિભ્રષ્ટ કર્મ વગેરે ક્રિયાઓમાં અસત્ પુરુષોની ગુપ્ત પ્રવૃત્તિ જાણવી. (૯૮) શ્રીકૃષ્ણ પરમાત્માને ધર્મના સ્થાપનમાં જેવો આગ્રહ છે તેવો જ અસાધુઓને પરિવારે સહિત ધર્મનાં મૂળ ઉખેડી નાખવામાં આગ્રહ હોય છે. (૯૯)

આ પ્રકારનાં તેમના દુષ્ટ લક્ષણોથી દંભથી વર્તતા, અસાધુઓને જાણી તેમનાં દર્શન માટે પોતાના સંબંધવાળી સ્ત્રીઓને લઈ જવી નહિ. (૧૦૦) પછી પુરુષોએ પણ તે અસાધુઓનો સંગ કરવો નહિ. મુમુક્ષુ-સર્વ સ્ત્રીઓ તથા પુરુષોએ પણ શ્રીવિષ્ણુની પ્રતિમા જ પોતાના કલ્યાણ માટે સેવા કરવા યોગ્ય છે. (૧૦૧) આ મારી બાંધેલી સત્ શાસ્ત્રની મર્યાદાને ઉલ્લંઘન કરી આ લોકમાં જે સ્ત્રીઓ અને પુરુષો વર્તશે તે પોતાના મોક્ષમાર્ગથી ભ્રષ્ટ થશે એમાં સંશય નથી. (૧૦૨) તેઓ આ લોકમાં અપકીર્તિને પામશે અને પરલોક જે યમપુરીમાં દુઃખના સ્વરોને (આર્તનાદોને) કરતા થકા નરકોના તીવ્ર દુઃખોને પણ પામશે. (૧૦૩) માટે જે મુમુક્ષુ જનો પોતાના ધર્મનું રક્ષણ કરવા પૂર્વક જ એકાંતિકી મુક્તિને ઈચ્છતા હોય તે જનોએ તો આ પૂર્વે કહેલું મારું વાક્ય આદરપૂર્વક વિચારવું. (૧૦૪)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच - **श्रुत्वैतद्धरिणोदितं स नृपतिर्भूप ! स्वधर्मावनं प्रीतोऽभूच्च सदःस्थिता मुनिगणाः स्त्रीपुंससङ्घास्तथा । प्रीतिं प्राप्य परां प्रणम्य च हरिं तस्याज्ञयेयुः स्वकानावासांश्च निजाश्रमं प्रभुरपि प्रायाद्गुरूणां गुरुः ॥१०५॥ योषाणां च नृणां स्वधर्ममवितुं सच्छास्त्रवारांनिधिं निर्मथ्यैव समुद्धृतोऽस्ति हरिणा सारस्तदीयो ह्ययम्। एतं येऽनुदिनं पठन्ति मनुजाः शृण्वन्ति वा भूपते ! ते धर्मं परिरक्ष्य च स्वममलं यान्त्येव विष्णोः पदम् ॥१०६॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे प्रबोधन्युत्सवे श्रीनारायणहेमन्तसिंहसंवादे धर्मरक्षानिरूपणनामा चतुर्विंशोऽध्यायः ॥२४॥

सुव्रत उवाच - **चतुर्थ्यां तु सदःसंस्थः स्वयमेव हरिर्निजान् । अस्पृश्यस्पर्शजाद्दोषाद्रिरक्षिषुरुवाच ह ॥१॥** श्रीनारायणमुनिरुवाच - **शृण्वन्तु पुरुषाः सर्वे गृहिणस्त्यागिनस्तथा । सर्वेषां हि हितं वच्मि युष्माकं मामुपेयुषाम् ॥२॥ स्त्रियोऽत्र द्विविधाः सन्ति तत्रैका धर्मसर्गजाः । पतिव्रतासतीसाध्वीसंज्ञाश्च शुचयः सदा ॥३॥ धर्मसर्गजाश्चान्याः कृत्याः पातकचेतसः । पुंश्चलीकुलटाद्याख्या अपवित्राः सदा मताः ॥४॥ सम्बन्धीतरपुंस्पर्शे स्वतो जाते विनापदम् । तत्राद्या बिभ्यति यथा सर्पाद्देहाभिमानिनः ॥५॥ स्वं चेत्क्वापि स्पृशेदन्यस्तदा तु प्राप्नुयू रुजम् । स्पर्शे तथैव वानर्यास्तीक्ष्णाग्नेर्वा तथात्र ताः ॥६॥ द्वितीयास्त्वथ पुंस्पर्शे स्वतो जाते च वान्यतः । न तेन हृदि तप्यन्ते न क्रियास्वपि तद्भयम् ॥७॥ इत्थं द्वेधा**

**સુવ્રતમુનિ કહે છે :** હે ભૂપ ! શ્રીનારાયણ મુનિએ કહેલું પોતાના સદ્ધર્મનું રક્ષણ કરનારું આ વચન સાંભળીને હેમંતસિંહ રાજા પ્રસન્ન થયા તેમજ સભામાં બેઠેલા મુનિસમુદાય અને સ્ત્રીપુરુષોના સંઘો પણ તે સાંભળીને અતિશય પ્રસન્નતા પામીને શ્રી નારાયણ મુનિને પ્રણામ કરી શ્રી હરિની આજ્ઞાથી પોતપોતાના નિવાસસ્થાનમાં ગયા. ગુરુઓના ગુરુ શ્રીહરિ પણ પોતાના ભવનમાં ગયા. (૧૦૫)

હે ભૂપતે ! શ્રી નારાયણ મુનિએ સ્વાશ્રિત સ્ત્રીઓના અને તેવા પુરુષોના પોતપોતાના ધર્મનું રક્ષણ કરવા માટે સત્ શાસ્ત્ર રૂપી સમુદ્રનું મંથન કરીને જ સત્શાસ્ત્ર સંબંધી આ સાર કાઢેલો છે. જે મનુષ્યો આ સારનો પ્રતિદિન પાઠ કરશે અથવા સાંભળશે તે મનુષ્યો પોતાનો નિર્મળ ધર્મ રક્ષણ કરી શ્રીહરિકૃષ્ણ ભગવાનના અક્ષરધામને પામશે જ. [પોતાના અક્ષરધામને પમાડવા માટે શ્રીહરિ ધર્મરક્ષા કહેતા હતા એવા એકાંતિક ધર્મના કારણભૂત શ્રીહરિને હું ભજું છું.] (૧૦૬)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે તૃતીયપ્રકરણે પ્રબોધન્યુત્સવે શ્રીનારાયણહેમંતસિંહ સંવાદે ધર્મરક્ષાનિરૂપણ નામા ચતુર્વિંશોऽધ્યાયઃ (૨૪)*

## અધ્યાય : ૨૫

### પોતાના ભક્ત પુરુષો અને સ્ત્રીઓના નિષ્કામત્વ ધર્મની સિદ્ધિ માટે શ્રીહરિએ સ્પર્શવિવેક કહ્યો છે.

**સુવ્રતમુનિ બોલ્યા :** હે રાજન્ ! કારતક સુદી ચોથને દિવસે સંધ્યા આરતી પછી સભામાં સિંહાસન ઉપર બેઠેલા શ્રીનારાયણ મુનિ સ્વાશ્રિત સ્ત્રી-પુરુષોને અસ્પૃશ્યનો જે સ્પર્શ થાય, તે દોષથી રક્ષણ કરવા ઈચ્છતા પોતે જ બોલ્યા. (૧)

**શ્રીનારાયણમુનિ કહે છે :** હે ભક્તો ! ગૃહસ્થાશ્રમીઓ તથા ત્યાગીઓ સર્વે જનો સાંભળો. મારા આશ્રિત તમારું સર્વેનું હિત કરનારું વાક્ય નિશ્ચે કહું છું : (૨) આ લોકમાં સ્ત્રીઓ બે પ્રકારની છે તેમાં એક ધર્મસર્ગથી ઉત્પન્ન પ્રતિવ્રતા સ્ત્રી, સાધ્વી સંજ્ઞાવાળી; હંમેશાં પવિત્રતાયુક્ત હોય છે. (૩) બીજી અધર્મસર્ગથી ઉત્પન્ન કૃત્યા અર્થાત્ પિશાચી વગેરેમાં અંતર્ગત કૃત્યારૂપ અગ્નિ સમાન, પાપયુક્ત અંતઃકરણવાળી, પુંશ્ચલી, કુલટા વગેરે નામોવાળી સદા અપવિત્ર માનેલી છે. (૪) બે પ્રકારની સ્ત્રીઓમાં પ્રથમ પતિવ્રતા પોતાના સમીપ સંબંધી વિના બીજા પુરુષનો સ્પર્શ આપત્કાલ વિના પોતાનાથી થયો હોય તો દેહાભિમાનીજનો, સર્પથીજ જેમ તેમ ભય પામે છે. (૫) જો ક્યારેક પોતાને પોતાના સંબંધીથી બીજો કોઈ માણસ સ્પર્શ કરે ત્યારે તો પતિવ્રતાઓ આ સ્પર્શમાં વાનરીના સ્પર્શમાં અથવા તીક્ષ્ણ અગ્નિના સ્પર્શમાં જેમ તેમ પીડા પામે છે. (૬) હવે બીજા પ્રકારની કૃત્યા એવી સ્ત્રીઓ તો પોતાથી અથવા બીજાથી જો પુરુષનો સ્પર્શ થઈ જાય તો તે સ્પર્શથી મનમાં લેશ પણ સંતાપને પામતી નથી, અને જેમાં પુરુષો બહુ આવતા જતા હોય એવા માર્ગમાં ચાલવું વગેરે ક્રિયાઓમાં પણ તે સ્ત્રીઓ પુરુષોના સ્પર્શનો જરા પણ ભય રાખતી નથી. (૭) આમ સ્ત્રીઓ બે પ્રકારની છે, તેવી રીતે પુરુષો પણ બે પ્રકારના છે તેમાં એક ધર્મવંશમાં



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

स्त्रियः सन्ति पुंमासोऽपि तथा द्विधा । धर्मवंश्याः पुण्यवन्तोऽधर्मवंश्याश्च पापिनः ॥८॥ पतिव्रतातुल्यशीलास्तत्राद्याः पापभीरवः । कृत्याशीलाश्च सन्त्यन्ये स्त्रीस्पर्शाशङ्किनो नराः ॥९॥ ज्ञानाद्वाज्ञानतः स्पर्शे स्त्रीपुंसानां परस्परम् । जाते दोषो भवत्येव पापरूपश्च दुःखदः ॥१०॥ तस्मात्स्पर्शविवेकोऽयं स्त्रीपुंसानां हितावहः । सर्वेषामपि लोकेऽस्मिन्मया साधु निरूप्यते ॥११॥ अमङ्गलानां सर्वेषामशुचीनाममङ्गलः । अशुचिर्विधवादेहः पुराणे बहुधोच्यते ॥१२॥ अत उद्धववर्त्मस्थैर्विधवा योषितो नरैः । स्प्रष्टव्या नापि गृहिभिस्ताभिः स्पृश्या न ते तथा ॥१३॥ अज्ञानाद्विधवास्पर्शे जाते स्नायात्पुमांश्च सा । ज्ञानाच्चेत्तर्हि कुर्यातामेकैकं तावुपोषणम् ॥१४॥ यदि बुद्ध्या स्पृशेत्कामाद्विधवा पुरुषं क्वचित् । तदा तु निष्कृतिस्तस्याः शास्त्रेषु द्विविधोदिता ॥१५॥ रहसि स्पर्शमात्रे तु दिनद्वयमुपोषणम् । तादृक्स्पर्शे जनैर्ज्ञाते कार्यं चान्द्रायणं व्रतम् ॥१६॥ एतां या निष्कृतिं नारी न कुर्याद्यद्यनादरात् । कायक्लेशभयाद्वा सा प्राप्नुयादापदं भृशम् ॥१७॥ प्राप्य सापयशोऽत्रापि मृत्वाथ यमयातनाः । भुक्त्वा निरुदकेऽरण्ये पिशाची स्यात् क्षुधाकुला ॥१८॥ अथ स्पृशेद्यः पुरुषः कामाद्बुद्ध्या विभर्तृकाम् । तस्यापि निष्कृतिः प्रोक्ता पूर्ववद्द्विविधैव हि ॥१९॥ स्पर्शे जनैरविदिते दिनद्वयमभोजनम् । विदिते तु यथाशास्त्रं कार्यं चान्द्रायणं व्रतम् ॥२०॥ य एतन्नैव कुर्वीत प्रायश्चित्तं पुमान् कुधीः । सोऽत्रैवाप्नोत्यपयशो मृत्वा च यमयातनाः ॥२१॥ ततोऽयुतं स वर्षाणि पिशाचः स्यात् क्षुधाकुलः । विण्मूत्ररक्तमांसाशी वने धावन्नितस्ततः

ઉત્પન્ન થયેલા પુણ્યવાળા; બીજા અધર્મવંશમાં ઉત્પન્ન થયેલા અને પાપીઓ છે. (૮) તેમાં બે પ્રકારના પુરુષોમાં પ્રથમના પતિવ્રતાના સમાન શીલવાળા એક પત્નીવ્રતવાળા પરસ્ત્રીના સ્પર્શજન્ય પાપથી ભય પામવાના સ્વભાવવાળા છે; બીજા કુલટાના સમાન આચારવાળા પરસ્ત્રીના સ્પર્શની શંકા રહિત છે. (૯) સ્ત્રી-પુરુષોને પરસ્પર બુદ્ધિપૂર્વક અથવા અજ્ઞાનથી સ્પર્શ થઈ ગયો હોય તો પાપરૂપ, મહાકષ્ટ આપનારો દોષ થાય છે. (૧૦)

માટે આ લોકમાં સર્વ સ્ત્રી-પુરુષોને હિત કરનારો આ સ્પર્શ વિવેક હું યથાર્થ જેમ હોય તેમ નિરૂપણ કરૂં છું : (૧૧) વિધવાનો દેહ સર્વ અમંગલોમાં પણ અતિ અમંગલરૂપ અને અપવિત્ર વસ્તુઓમાં પણ અધિક અપવિત્રપણે, પુરાણોમાં ઘણા પ્રકારે વ્યાસાદિકે કહેલો છે. (૧૨) માટે ઉદ્ધવ સંપ્રદાયમાં રહેલા ગૃહસ્થોએ પણ વિધવા સ્ત્રીઓનો સ્પર્શ કરવો નહિ અને ઉદ્ધવ સંપ્રદાયમાં રહેલી સ્ત્રીઓએ પણ ગૃહસ્થ પુરુષોનો સ્પર્શ કરવો નહિ. (૧૩) અજ્ઞાનથી વિધવાના અંગનો સ્પર્શ થાય તો ગૃહસ્થ પુરુષ વસ્ત્રે સહિત સ્નાન કરે. તેમજ વિધવા અજ્ઞાનથી ગૃહસ્થાદિ પુરુષનો સ્પર્શ થાય તો સ્નાન કરે. જો જ્ઞાનપૂર્વક પરસ્પર સ્પર્શ થાય તો વિધવા અને ગૃહસ્થ પુરુષ એક એક ઉપવાસ કરે. (૧૪) જો વિધવા કામોપભોગ બુદ્ધિથી ક્યારેક કામની ભાવના રહિત પુરુષને સ્પર્શ કરે તો વિધવાને શાસ્ત્રોમાં પ્રાયશ્ચિત્ત બે પ્રકારનું કહેલું છે. (૧૫) એકાંત સ્થાનમાં કામભાવથી કેવળ સ્પર્શ માત્ર જ કર્યો હોય તો વિધવાએ બે દિવસ ઉપવાસ કરવો. (પુરુષ તો કામેરહિત હોવાથી એક ઉપવાસ કરે) તેવો સ્પર્શ લોકોએ જાણ્યો હોય તો વિધવાએ ચાન્દ્રાયણ વ્રત કરવું. (અને પુરુષ બે ઉપવાસ કરે એમ જાણવું.) (૧૬) જે નારી મેં કહેલું આ પ્રાયશ્ચિત્ત, મારા વચનનો અનાદર કરીને અથવા શરીરના કલેશના ભયથી જો નહિ કરે તો તે સ્ત્રી અત્યન્ત વિપત્તિને પામશે. (૧૭)

તે સ્ત્રી આ લોકમાં અપકીર્તિને પામીને પછી મરીને પણ નરકની પીડાઓ ભોગવીને, જળેરહિત વનમાં ભૂખથી પીડા પામેલી પિશાચી દશ હજાર વર્ષ સુધી થશે. (૧૮) જે ગૃહસ્થ પુરુષ કામબુદ્ધિથી કામભાવનાએ રહિત વિધવા સ્ત્રીનો સ્પર્શ કરે તો આવા પુરુષને પણ બે પ્રકારનું પ્રાયશ્ચિત્ત કહેલું છે. (૧૯) બુદ્ધિપૂર્વક કામભાવથી વિધવાનો સ્પર્શ જનોએ એકાંતમાં જાણ્યો હોય તો બે દિવસ ઉપવાસ કરે. (વિધવા તો કામભાવથી રહિત હોવાથી એક ઉપવાસ કરે) તેવો સ્પર્શ જનોએ જાણ્યો હોય તો શાસ્ત્ર પ્રમાણે ચાંદ્રાયણ વ્રત પુરુષે કરવું (અને વિધવા તો બે દિવસ ઉપવાસ કરે.) (૨૦) કુબુદ્ધિવાળો જે પુરુષ મારું કહેલું પ્રાયશ્ચિત્ત નહીં કરે તે પુરુષ આ લોકમાં અપકીર્તિ જ પામે છે; અને મરીને યમયાતનાઓ ભોગવે છે. (૨૧) પછી તે પુરુષ દશ હજાર વર્ષ ભૂખથી વિહ્વળ થયેલો વિષ્ટા, મૂત્ર, રુધિર, માંસ તેને ખાનારો વનમાં અહીંથી ત્યાં



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

॥२२॥ विधवानां मुख्यधर्मो ब्रह्मचर्यस्य पालनम् । तद्भङ्गः स्याद्धि पुंस्पर्शान्महान् दोषस्ततो मतः ॥२३॥ तस्याश्च ब्रह्मचर्यस्य स्वस्पर्शेनैव नाशनात् । पुंसो दोषो महानुक्तो विधवास्पर्शने किल ॥२४॥ यादृक् पतिव्रतानार्याः सङ्गे पुंसः परस्य वै । स्याद्दोषस्तादृगेव स्यात्पुंस्पर्शे विधवास्त्रियाः ॥२५॥ दोषः स्याद्गृहिणो यादृक् स्वकीयेतरयोषितः । सङ्गे स्याद्विधवास्पर्शे बुद्ध्या तादृगसंशयम् ॥२६॥ सङ्गे परस्त्रिया दोषो गृहिणो यादृगीरितः । अगृहस्थस्य तादृक् स्यात्स्त्रीमात्रस्पर्शने किल ॥२७॥ मृते पत्यौ ब्रह्मचर्यं विधवाया दृढं मतम् । स्त्रीस्पर्शात् ब्रह्मचारीव भीता पुंस्पर्शतो भवेत् ॥२८॥ सच्छास्त्रश्रवणे दाने तीर्थे च ब्राह्मणार्चनम् । सदस्यावश्यकं कुर्याद्यदि सा नात्र दोषभाक् ॥२९॥ रहःस्थाने यदि तु तत्कुर्यात्तर्हि तयोर्द्वयोः। भक्तयोः स्त्रीपुरुषयोर्हरेः शुद्धिर्मतैन्दवात् ॥३०॥ रोगे वैद्यस्य च स्पर्शे मुण्डने नापितस्य च । स्पर्शे तस्या न दोषोऽस्ति यदि तत्रेतरो भवेत् ॥३१॥ आसन्नसम्बन्धभाजां स्पर्शे जाते नृयोषिताम् । आवश्यकत्वादन्योन्यं न दोषो ह्यगतित्वतः ॥३२॥

पिता भ्राता पितृव्यश्च तत्पुत्रास्तत्सुतादयः । मातामहो मातुलश्च तत्पुत्रास्तत्सुतादयः ॥३३॥ मातृष्वसुः पतिः पुत्रास्तथा पितृष्वसुः पतिः । तत्पुत्रा गुरुतत्पुत्रावन्नदाता च तत्सुतः ॥३४॥ सभ्रातृकश्च श्वशुरस्तथा ज्येष्ठाश्च देवराः । तेषां पुत्राश्च दौहित्रा दुहितृपतयस्तथा ॥३५॥ पुत्रपौत्रादयः स्वस्या एते सम्बन्धिनो मताः । एतेषां स्पर्शने दोषो नास्ति ते यदि धार्मिकाः

---

ચોતરફ દોડતો પિશાચ થાય છે. (૨૨) આઠ પ્રકારે પુરુષના ત્યાગ રૂપ વ્રતનું પાલન વિધવાઓનો મુખ્ય ધર્મ છે. વિધવાને પુરુષના સ્પર્શથી બ્રહ્મચર્ય વ્રતનો ભંગ થાય, માટે તેને મોટો દોષ માનેલો છે. (૨૩) વિધવાના બ્રહ્મચર્યવ્રતનો પોતાના સ્પર્શથી જ વિનાશનો સંભવ હોવાથી વિધવાસ્પર્શનો પુરુષને અતિશય દોષ કહેલો છે. (૨૪) પતિવ્રતા જે સધવા સ્ત્રીને પોતાના પતિ વિના બીજા પુરુષના સંભોગના આચરણમાં જેવો દોષ થાય તેવો વિધવા સ્ત્રીને કામભાવથી પુરુષના સ્પર્શ માત્રમાં દોષ થાય. (૨૫) ગૃહસ્થ પુરુષને પોતાની સ્ત્રીથી બીજી સ્ત્રીના ઉપભોગમાં જેવો દોષ થાય તેવો દોષ બુદ્ધિપૂર્વક કામભાવથી વિધવાના સ્પર્શમાં થાય એમાં સંશય નથી. (૨૬) ગૃહસ્થને પરસ્ત્રીના સંગમાં જેવો દોષ કહ્યો છે તેવો; ગૃહસ્થ ભિન્ન બ્રહ્મચારી, વાનપ્રસ્થ અને સંન્યાસી વગેરે ત્યાગીઓને સ્ત્રી માત્રના સ્પર્શમાં બુદ્ધિપૂર્વક સ્પર્શ માત્રનાં આચરણમાં દોષ થાય તે નિશ્ચિત છે. (૨૭) પતિ મરણ પામ્યે સતે વિધવાને આઠ પ્રકારે પુરુષનાં ત્યાગ લક્ષણ બ્રહ્મચર્ય દૃઢ જેમ હોય તેમ શાસ્ત્રમાં માનેલું છે. બ્રહ્મચારી પુરુષ સ્ત્રીના સ્પર્શથી જેમ ભય પામે તેમ વિધવા, પુરુષના સ્પર્શથી ભય પામેલી થાય. (૨૮) જો વિધવા સત્ શાસ્ત્રના શ્રવણમાં,દાનમાં, તીર્થમાં, અવશ્ય પ્રાપ્ત બ્રાહ્મણપૂજન સભામાં કરે તો વિપ્રસ્પર્શનો દોષ વિધવાને લાગતો નથી. (૨૯) જો એકાંત સ્થાનમાં કથા-શ્રવણ વગેરેમાં બ્રાહ્મણનું પૂજન કરે તો શ્રીકૃષ્ણના ભક્ત વિધવા સ્ત્રી અને બ્રાહ્મણ બંનેની ચાંદ્રાયણ વ્રતથી શુદ્ધિ થાય. (૩૦) રોગમાં વૈદ્યના સ્પર્શમાં અને મુંડનમાં નાપિત (વાળંદ)ના સ્પર્શમાં વિધવાને દોષ નથી. જો તે સ્થાનમાં ત્રીજો મનુષ્ય અથવા સ્ત્રી હોય તો દોષ નથી. એમ ના હોય તો ઉપવાસ કરવો. (૩૧) સમીપ સંબંધ વાળા પુરુષોને સ્ત્રીના સ્પર્શમાં અને સ્ત્રીઓને પુરુષના સ્પર્શમાં અવશ્ય કારણ હોય તો પરસ્પર દોષ નથી. (૩૨)

પિતા, ભાઈ, કાકા તથા ભાઈના પુત્રો-પૌત્ર આદિક, (આદિ શબ્દથી ભાઈના પૌત્રોની માફક,ભાઈની પુત્રીઓના પુત્રો પણ જાણી લેવા; એજ પ્રમાણે કાકા, મામા વગેરેનાં પણ પુત્રના પુત્રો અને દીકરીઓના પુત્રો પણ જાણવાં) માતાના પિતા, માતાનો ભાઈ (મામા) અને મામાના પુત્રો, મામાના પુત્રોના પુત્રો; (૩૩) માસીના પતિ તથા તેમના પુત્રો, ફોઈના પતિ ફુઆ તથા તેમના પુત્રો, ગુરુઓ અને તેમના પુત્રો, પોતાને અન્ન આપીને જીવાડનારો અને તેના પુત્રો; (૩૪) ભાઈની સાથે વર્તતા પોતાના પતિનો પિતા (અર્થાત્ પોતાના સસરા અને તેમના ભાઈઓ) તથા દિયર, તથા તેમના પુત્રો તથા પોતાની પુત્રીના દીકરા અને પોતાના જમાઈઓ; (૩૫) તથા વિધવાના પોતાના પુત્રો, અને પુત્રના પુત્રો વગેરે એ પિતા વગેરે સમીપ સંબંધવાળા માનેલા છે. તે પિતા વગેરે જો પોતે ધર્મનિષ્ઠ હોય અને બીજાઓના ધર્મની રક્ષા કરનારા હોય



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

॥३६॥ एतद्भिन्ननरस्पर्शः क्रयविक्रयकर्मसु । जलाग्न्यादिभये वापि कृष्यादौ स्यान्न दोषकृत् ॥३७॥ तथा सम्बन्धियोषायाः स्पर्शेऽन्यस्याः क्रयादिषु। स्पर्शे च पुरुषस्यापि नास्ति दोषः स्त्रिया यथा ॥३८॥ प्रयाणकाले विधवादर्शनं चात्यमङ्गलम् । तिर्यग्गच्छत्कृष्णसर्पादप्येतदधिकं मतम् ॥३९॥ न केवलं कार्यहानिः किन्तु मृत्युरपि ध्रुवम् । स्वस्य स्वीयस्य वापि स्याद्धननाशोऽथवाग्निभीः ॥४०॥ अतस्तद्दर्शनाघस्य शान्तये शास्त्रवेदिभिः । सद्य एवास्ति कथितं हरिस्मरणमङ्गलम् ॥४१॥ तासां चाप्याशिषो ज्ञेया आशीविषविषोपमाः । ताभ्यो भेयमतः पुंभी राक्षसीभ्य इवाखिलैः ॥४२॥ मात्रा स्वस्रा दुहित्रा वा रहःस्थाने वयःस्थया । न तिष्ठेत्पुरुषस्तादृक् हरेर्भक्तो विनाऽऽपदम् ॥४३॥ अज्ञानात्तु रहःस्थाने स्थितावेकमुपोषणम् । उभाभ्यामपि कर्तव्यं स्त्रीपुंसाभ्यां प्रयत्नतः ॥४४॥ सविकारेण मनसा स्पर्शमात्रे रहःकृते । चान्द्रायणं व्रतं कार्यमुभाभ्यां स्वाघशान्तये ॥४५॥ एकलः पुरुषः क्वापि कयाचिदपि योषया । गच्छेद्विधवया साकं नैव वर्त्मनि सर्वथा ॥४६॥

यदि गच्छेत्प्रमादेन तर्हि साकं तया स्त्रिया । उपवासं स कुर्वीत दिनमेकं स्वशुद्धये ॥४७॥ तरुणानां नराणां च तरुणीनां च योषिताम् । सर्वथैव प्रसङ्गोऽयं निषिद्धोऽस्ति परस्परम् ॥४८॥ अभर्तृकाणां नारीणां सम्बन्धिपुरुषैः सदा । स्वातन्त्र्यगमनाद्रक्षा कार्या पितृसुतादिभिः ॥४९॥ समाजोत्सवतीर्थेभ्यो विवाहात्पान्थसार्थतः । साधुभ्योऽनाश्रमिभ्यश्च रक्ष्या योषा हि सर्वथा ॥५०॥ असुरा राक्षसा यक्षा अतिकामातिहिंसकाः । स्त्रीद्रव्यहरणार्था हि तिष्ठन्त्येतेषु नित्यदा ॥५१॥

---

તો તેમના સ્પર્શમાં દોષ નથી. એટલાથી ભિન્ન નરનો સ્પર્શ તો વેચાતી ચીજો લેવા-આપવામાં; જળ, અગ્નિ વગેરેના ભયમાં અથવા ખેતીના કામમાં પણ સંબંધી વિનાનાં પુરુષનો સ્પર્શ દોષ કરનારો થતો નથી. (૩૬-૩૭) તે પ્રકારે ગૃહસ્થ પુરુષને પણ સમીપ સંબંધવાળી સ્ત્રીના સ્પર્શમાં અને વેચાતી ચીજો લેવા-દેવામાં; અને જળ, અગ્નિ વગેરેનો ભય વગેરેમાં સંબંધી વિનાની બીજી વિધવા સ્ત્રીના સ્પર્શમાં વિધવા સ્ત્રીની માફક દોષ નથી. (૩૮) કોઈ કામકાજ માટે ગ્રામાન્તરાદિ-ગમન સમયમાં સન્મુખ વિધવા દર્શન અતિ અમંગલ છે, વાંકી રીતે ચાલતા કાળા સર્પથી પણ વિધવા દર્શન વધારે અપશુકન માનેલું છે. (૩૯) આવા અપશુકનનાં દર્શન થયા હોય, તો પણ જો પ્રયાણ કરે તો કેવળ કાર્યનો નાશ થાય એટલું જ નહિ; પરંતુ પોતાનાં પુત્ર-પુત્રી વગેરેનું પણ મૃત્યુ નિશ્ચે થાય અથવા ધન નાશ થાય અથવા અગ્નિથી ભય થાય. (૪૦) માટે વિધવાદર્શનજન્ય પાપની શાંતિ માટે શાસ્ત્ર જાણનારાઓએ હરિનું નામ-સ્મરણરૂપી પ્રાયશ્ચિત્ત કહેલું છે; કારણ કે હરિ નામસ્મરણ સર્વ અમંગલને નિવારનારું મંગલનું પણ મંગલ છે. (૪૧) વિધવા સ્ત્રીઓના આશીર્વાદો ('સુખી થા, ઘણું જીવો' ઈત્યાદિપણ) સર્પના ઝેરની ઉપમા આપવા યોગ્ય છે, માટે સમગ્ર પુરુષોએ વિધવા સ્ત્રીઓથી રાક્ષસીઓની માફક ભય પામવો. (૪૨) યુવાન અવસ્થામાં રહેલી માતા, બહેન, અથવા દીકરીની સાથે યુવાન અવસ્થામાં રહેલા ભક્ત પુરુષે આપત્‌કાળ પડ્યા વિના એકાંત સ્થળમાં બેસવું નહિ (૪૩) અજ્ઞાનથી એકાન્ત સ્થળમાં સ્થિતિ થઈ ગઈ હોય તો બન્નેએ પણ પ્રયત્નથી એક એક ઉપવાસ કરવો. (૪૪) કામનાએ સહિત મનથી સ્પર્શ માત્ર એકાન્તમાં ('સ્થિતિમાત્રે' એવા પાઠાન્તરથી તેવી રીતે સ્થિતિ માત્ર પણ) થાય તો સ્ત્રી પુરુષ બન્ને પોતાના પાપની નિવૃત્તિ માટે ચાંદ્રાયણ વ્રત કરે. (૪૫) ક્યારેય એકલા જુવાન માણસે કોઈ પણ યુવાન વિધવા સ્ત્રી સાથે માર્ગમાં કોઈપણ પ્રકારે ચાલવું નહીં. (૪૬)

જો પોતાની સંબંધી યુવાન વિધવા સ્ત્રી સાથે પ્રમાદથી યુવાન પુરુષ માર્ગમાં ચાલે તો તે યુવાન પુરુષ પોતાના પાપની નિવૃત્તિ માટે રાત્રિ-દિવસ ઉપવાસ કરે. (તે સ્ત્રી પણ જો ભગવાનની ભક્ત હોય તો એક ઉપવાસ કરે.) (૪૭) યૌવન અવસ્થાવાળા પુરુષો અને યુવાન અવસ્થાવાળી સ્ત્રીઓને પરસ્પર જે પ્રસંગ છે તેનો સર્વ પ્રકારે નિષેધ છે. (૪૮) પિતાપુત્રાદિ સંબંધી પુરુષોએ પોતાના સંબંધવાળી વિધવા સ્ત્રીઓનું સ્વતંત્રપણે જ્યાં ત્યાં વિચરણ કરવાથી સદા રક્ષણ કરવું. (૪૯) સમાજ, (જનોનો સંઘાત) જન્માષ્ટમી વગેરે ઉત્સવ, દ્વારિકા-પ્રયાગ વગેરે તીર્થો, તથા વિવાહ તેમજ માર્ગમાં જન સમુદાય, માત્ર સાધુ સંજ્ઞાવાળા વૈરાગી વગેરે અસત્ પુરુષો અને આશ્રમ વિનાના (વંઠા આદિક-સ્ત્રી રહિત) પુરુષોથી પોતાના સંબંધવાળી સ્ત્રીઓનું સર્વ પ્રકારે રક્ષણ કરવું; (૫૦) કારણ કે અતિ કામી અને અતિ હિંસા કરનારા અસુરો, રાક્ષસો અને યક્ષો; સ્ત્રી અને દ્રવ્યને લૂંટવા માટે સમાજ વગેરેમાં હંમેશા રહે છે. (૫૧) માટે પાપાચરણથી ભય પામેલા



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**अबलानामतस्तेभ्यो रक्षणं पुरुषैः स्वकैः । प्रयत्नेनैव कर्तव्यं गृहिभिः पापभीरुभिः ॥५२॥ तासां रक्षापि धर्मिष्ठैर्बुद्धिमद्भिः सयुक्तिना । साम्ना दानेन वा कार्या पुंभिर्भेदेन वापि तैः ॥५३॥ नाङ्गच्छेदोऽङ्गभङ्गो वा तासां कार्यो न तैर्वधः । तदात्मघातहेतुश्च न वाच्या मर्मभिच्च वाक् ॥५४॥ धर्मस्य रक्षणे शक्तिः स्वस्यान्येषां च सर्वथा । भुवि भूपस्य च गुरोः सर्वेभ्योऽप्यधिकास्ति हि ॥५५॥ शिक्षयित्वा प्रजा राज्ञा शिष्यांश्च गुरुणा ततः । पुंस्पर्शाद्विधवाधर्मो रक्षणीयः प्रयत्नतः ॥५६॥ कुरुतो नैव यावित्थं तौ प्रजाशिष्यपातकैः । नृपो गुरुश्च युज्येते भुञ्जाते तान्यमुत्र च ॥५७॥ पितरश्च पतन्त्येव तयोः स्वर्गगता अपि । पापेन तेन महता निरयेषु न संशयः ॥५८॥ उद्धवस्वामिनैवैषा मर्यादास्ति पुरा कृता। उल्लङ्घयेत्तां यः कोऽपि स ज्ञेयस्तत्पथाद्बहिः ॥५९॥ एतामुल्लङ्घ्य मर्यादां स्त्री पुमान्वा निजेच्छया । वर्तिष्येते तयोर्भूरि भविष्यत्ययशो भुवि ॥६०॥ मिथ्याकलङ्कानपि तौ प्राप्यान्ते निरयान्बहून् । भोक्ष्येते नात्र सन्देहो नीलकण्ठो ब्रवीम्यहम् ॥६१॥**

सुव्रत उवाच – **एतन्निशम्य प्रमुदस्तदानीं सर्वे जनाः प्राञ्जलयः प्रभुं तम् । प्रणम्य ते बाढमितीशवाक्यमुपाददुः सन्मतयो नरेन्द्र ! ॥६२॥ यः पूरुषः स्पर्शविवेकमेतं नारी पठेद्वा शृणुयात्प्रभूक्तम् । तावत्र कीर्तिं धनधान्यऋद्धिं सम्प्राप्नुतो धाम हरेस्तथान्ते ॥६३॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे प्रबोधन्युत्सवे स्पर्शविवेकनिरूपणनामा पञ्च-विंशोऽध्यायः ॥२५॥

---

વિધવા સ્ત્રીઓના સંબંધી ગૃહસ્થ પુરુષોએ પોતાની સંબંધી સ્ત્રીઓનું સમાજ વગેરેથી પ્રયત્નપૂર્વક રક્ષણ કરવું. (૫૨) જો તે સ્ત્રી સરળ હોય તો ધર્મનિષ્ઠ, બુદ્ધિમાન પુરુષોએ તે સ્ત્રીઓની રક્ષા પણ યુક્તિ સહિત પ્રેમપરાયણ વાક્યથી અથવા તેને જોઈતી વસ્તુ આપવી વગેરેથી રક્ષા કરવી; જો તે સ્ત્રી ઉદ્ધત હોય તો તેના પક્ષમાં ભેદ પાડવાથી તે સ્ત્રીઓનું રક્ષણ કરવું. (૫૩) તે સંબંધી પુરુષોએ સ્ત્રીઓના અંગોનું છેદન (છરીથી નાકકાનાદિ કાપવાં વગેરે) કરવું નહિ અને લાકડી વગેરેથી અંગભંગ કરવો નહીં અથવા તલવાર વગેરેથી વધ અથવા મસ્તકછેદન ન કરવું અને સ્ત્રીઓના દેહપાતના કારણભૂત મર્મસ્થાનને ભેદનારી વાણી ઉચ્ચારણ ન કરવી. (૫૪) પૃથ્વીમાં પોતાના અને બીજાઓના ધર્મનાં સર્વ પ્રકારે રક્ષણમાં રાજા અને દીક્ષા આપનારા ગુરુનું સામર્થ્ય પિતા વગેરેથી પણ અધિક છે; માટે રાજાએ પોતાના રાજ્યના લોકોને અને ગુરૂએ પોતાના દીક્ષિતજનોને યથાયોગ્ય શિક્ષણ આપીને પુરુષોના સ્પર્શથી વિધવાધર્મ મહાપ્રયાસથી પણ રક્ષણીય છે. (૫૫-૫૬) જે રાજા અને ગુરુ એ પ્રમાણે ધર્મમાં રખાવતા નથી તે બંને પણ પ્રજા અને શિષ્યોનાં પાતકોને યમપુરીમાં નર્કોમાં ભોગવે છે. (રાજા પ્રજાનાં પાતકોને ભોગવે છે, ને ગુરુ શિષ્યનાં પાતકોને ભોગવે છે. ) (૫૭) રાજા અને ગુરુઓના યજ્ઞ દાનાદિથી દેવલોકને પામેલા પણ પિતૃઓ અતિશય પ્રજા અને શિષ્યોનાં પાપથી નર્કોમાં પડે છે જ, એમાં સંશય નથી. (૫૮) આ મેં કહેલી મર્યાદા પૂર્વે ઉદ્ધવ સ્વામીએ કરેલી છે તે મર્યાદાને કોઈ પણ માણસ ઉલ્લંઘન કરે તે માણસ ઉદ્ધવ સંપ્રદાયથી બહાર છે. (૫૯) જે વિધવા સ્ત્રી અથવા ગૃહસ્થ પુરુષ ઉદ્ધવ સ્વામીએ કરેલી, મેં કહેલી આ મર્યાદાને ઉલ્લંઘન કરી પોતાથી ઈચ્છા પ્રમાણે વર્તશે તે સ્ત્રી-પુરુષની પૃથ્વીમાં ઘણી અપકીર્તિ થશે. (૬૦) આ મર્યાદાનું ઉલ્લંઘન કરનાર સ્ત્રી-પુરુષ બંને મિથ્યા કલંકોને પણ પામીને દેહ મૂકીને પણ ઘણાં નર્કોને ભોગવશે એમાં સંશય નથી. હું નીલકંઠ બોલું છું અર્થાત્ તમારે ઉપાસના કરવા યોગ્ય તમારો ઈષ્ટદેવ આ લોક અને પરલોકમાં હિત કરનાર બોલું છું માટે આ મારું વચન સર્વ જનોએ ગ્રહણ કરવું. (૬૧)

હે નરેન્દ્ર ! તે સમયે આ પૂર્વે કહેલું પરમેશ્વરનું વચન સાંભળીને મહા આનંદવાળા બુદ્ધિમાન સર્વ સભામાં બેઠેલા પોતાના ભક્તજનો બન્ને હાથ જોડીને શ્રીહરિને પ્રણામ કરી, 'સત્ય-તમો જે પ્રમાણે બોલો છો તે પ્રમાણે જ અમે કરીશું' આ પ્રકારે શ્રીહરિનું વચન અંગીકાર કરતા હતા. (૬૨)

જે પુરુષ અને સ્ત્રી શ્રીહરિએ કહેલો આ સ્પર્શવિવેકનો પાઠ કરે અથવા સાંભળે તે બંને આ લોકમાં સારો યશ, અને ધન-ધાન્ય બંનેની સમૃદ્ધિને પામે; તે જ પ્રકારે દેહના અંતમાં શ્રીહરિકૃષ્ણ ભગવાનના અક્ષરધામને પામે છે : [આ પ્રમાણે પોતાના આશ્રિતોને સ્પર્શવિવેક કહીને ગૃહસ્થ અને વિધવાઓને કલ્યાણમાં વિઘ્નરૂપ કામશત્રુથી રક્ષણ કરનારા શ્રીહરિને હું ભજું છું.] (૬૩)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીયપ્રકરણે પ્રબોધિન્યુત્સવે સ્પર્શવિવેક નિરૂપણ નામા પંચ વિંશોડધ્યાયઃ (૨૫)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच – **प्रदोषकालेऽथ च पञ्चमीतिथौ महासभायामुपविष्टमीशम् । मुनिः शुकानन्द उदारबुद्धिः पप्रच्छ हेतुं नृप! धर्मसिद्धेः ।।१।। भगवन् ! हेतुना केन धर्मः सिद्ध्यति सान्वयः । शीघ्रं च मानवानां तद्वक्तुमर्हसि मेऽञ्जसा ।।२।।** श्रीनारायणमुनिरुवाच– **धर्मः सहान्वयो ब्रह्मन् ! देशादौ सति वर्तते । सिद्ध्येत्तत्सेविनां धर्मः स्यादैश्वर्यं सुखं च तत् ।।३।। असत्यधर्मो देशादावास्ते सपरिवारकः । तत्सेविनामधर्मः स्याद्दुःखं चैश्वर्यतश्च्युतिः ।।४।। देशः कालः क्रिया ध्यानं शास्त्रं दीक्षा तथा मनुः । सङ्गश्चेत्यष्ट धर्मस्य हेतवो हीतरस्य च ।।५।। लक्षणानि सतां तेषां देशादीनां तथाऽसताम् । कथयामि समासेन हिताय वै नृणामहम् ।।६।। चतुर्वर्णाश्रमवतां धर्मो यत्र विभागशः । यत्रैकान्तिकभक्ताः स्युर्हरेर्देशः स शोभनः ।।७।।**

**यत्र ह ब्राह्मणकुलं तपोविद्यादयान्वितम् । यत्र यत्र हरेरर्चा स देशः श्रेयसः पदम् ।।८।। पुराणप्रथिता यत्र गङ्गाद्याः स्युश्च निम्नगाः । पुष्करादीनि तीर्थानि क्षेत्राण्यर्हाश्रितानि च ।।९।। कुरुक्षेत्रं गयाशीर्षं प्रयागः पुलहाश्रमः । नैमिषं फाल्गुनं सेतुः प्रभासोऽथ कुशस्थली ।।१०।। वाराणसी मधुपुरी पम्पा बिन्दुसरस्तथा । नारायणाश्रमोऽयोध्या सीतारामाश्रमादयः ।।११।। सर्वे कुलाचलाः पुण्या महेन्द्रमलयादयः । देशानामुत्तमो देशः सत्पात्रं यत्र लभ्यते ।।१२।। एते पुण्यतमा देशाः**

## અધ્યાય : ૨૬

## શ્રીહરિએ સત્ દેશકાલાદિ અને અસત્ દેશકાલાદિનાં નિરૂપણોથી યથાર્થપણે ધર્મની સિધ્ધિ (શુકાનંદમુનિને ઉદ્દેશીને) કહી છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! કારતક સુદી પાંચમને દિવસે સંધ્યા આરતીના અંતમાં મહાસભામાં બેઠેલા શ્રીહરિને મહાબુદ્ધિશાળી શુકાનંદ મુનિ સર્વેના પોતપોતાના ધર્મની સિદ્ધિનું કારણ (અર્થાત્ સાધન) શું છે ? એમ પૂછતા હતા : (૧) હે ભગવન્ ! તમારાં આશ્રિતજનોને સપરિવાર ધર્મ કયા સાધનથી તત્કાલ સિધ્ધ થાય તે હેતુ મને યથાર્થ કહેવા માટે યોગ્ય છો. (અને તે ધર્મસિદ્ધિના નાશનું કારણ પણ કહેવા માટે યોગ્ય છો.) (૨)

**શ્રીનારાયણમુનિ બોલ્યા** : હે મુને ! શુભ દેશકાળ વગેરેમાં પરિવારે સહિત ધર્મ વર્તે છે; સત્ દેશ, કાળ વગેરેનું સેવન કરનારાં જનોને ધર્મ સિદ્ધ થાય અને ધર્મની સિદ્ધિથી ઐશ્વર્યની પ્રાપ્તિ થાય અને ધર્મના ફળરૂપ સુખની પ્રાપ્તિ થાય. (૩) અસત્ દેશકાળ વગેરેમાં પરિવારે સહિત અધર્મ રહે છે; અસત્ દેશકાળ વગેરેનું સેવન કરનારાં જનોને અધર્મ થાય અને અધર્મના ફળરૂપ દુ:ખની પ્રાપ્તિ થાય અને ઐશ્વર્યથી પતન થાય. (૪) દેશ, કાળ, ક્રિયા, ધ્યાન, શાસ્ત્ર, દીક્ષા, મંત્ર અને સંગ : આ આઠ ધર્મ અને અધર્મના કારણ છે. સત્ દેશ, કાળ વગેરે આઠ ધર્મની વૃદ્ધિનાં કારણ છે. અને અધર્મના નાશમાં કારણ છે. અને અસત્ એવા દેશ, કાળ વગેરે આઠ અધર્મની વૃદ્ધિનાં કારણો છે અને ધર્મના ક્ષયમાં કારણ છે. (૫) શુભ અને અશુભ દેશકાળ વગેરે આઠનાં લક્ષણો મારાં આશ્રિત જનોના હિત માટે સંક્ષેપથી કહું છું : (૬)

જે દેશમાં બ્રાહ્મણ, ક્ષત્રિય, વૈશ્ય અને શૂદ્ર આ ચાર વર્ણો અને બ્રહ્મચારી ગૃહસ્થ, વાનપ્રસ્થ અને સંન્યાસી : આ ચાર આશ્રમવાળાઓનો ધર્મ વિભાગપૂર્વક યથાર્થ પાલન થતો હોય, જે દેશમાં શ્રીકૃષ્ણના એકાંતિક ભક્તો સ્વધર્મ-જ્ઞાન- વૈરાગ્ય સહિત ભક્તિવાળા ભક્તજનો હોય તે દેશ શુભ જાણવો. (૭)

જે દેશમાં કૃચ્છ્ર ચાંદ્રાયણ વગેરે વ્રત, ધર્મે સહિત શુદ્ધ સંપ્રદાયને અનુગુણ વિદ્યાધ્યયન, દયા : એ આદિક ગુણ યુક્ત બ્રાહ્મણનું કુળ હોય, જે દેશમાં શ્રીકૃષ્ણના અવતારની પ્રતિમા હોય તે દેશ કલ્યાણના સ્થાનભૂત અર્થાત્ સત્ દેશ છે. (૮) જે દેશમાં પુરાણોમાં પ્રસિદ્ધ ગંગા વગેરે નદીઓ હોય, પુષ્કરાદિ તીર્થો હોય અને પૂજવા યોગ્ય મહર્ષિઓએ આશ્રય કરાયેલાં ક્ષેત્રો હોય તે સત્ દેશો જાણવા. (જળ પ્રધાન તીર્થો, આશ્રમપ્રધાન ક્ષેત્રો કહેવાય છે. ) (૯) કુરુક્ષેત્ર, પ્રયાગ, ગયા, પુલહાશ્રમ, નૈમિષારણ્ય, ફાલ્ગુન, સેતુબંધ, પ્રભાસ, દ્વારિકા, કાશી, મથુરા, પંપાસર, સિદ્ધપુર, બદ્રિકાશ્રમ, અયોધ્યા, સીતારામના આશ્રમો = ચિત્રકૂટ, પંચવટી તથા કપિલાશ્રમ વગેરે તથા મહેન્દ્રાચલ-મલયાચલ વગેરે સાત કુળ પર્વતો; એ કુરુક્ષેત્રાદિ સ્થાનો પવિત્ર સત્ દેશો છે, જે દેશમાં સત્ પાત્ર પ્રાપ્ત થાય તે દેશ સર્વ દેશોમાં ઉત્તમ દેશ છે. (૧૦-૧૧-૧૨)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सेव्याः श्रेयोर्थिभिर्नरैः । धर्मो ह्यत्र कृतः पुंसां सहस्राधिफलोदयः ॥१३॥ असद्देशानथो वच्मि हातव्यान् धर्मबुद्धिभिः । अङ्गवङ्गकलिङ्गाश्च म्लेच्छदेशाश्च कीकटाः ॥१४॥ असंस्कृताश्चोषराश्च हर्यर्चारहिताश्च ये । यत्रत्योदकपानेन भवेयुर्जाठरा रुजः ॥१५॥ स्वस्वधर्मविहीनाः स्युर्नरा यत्र तथा स्त्रियः । भक्ताश्चैकान्तिका यत्र न स्युर्भगवतोऽमलाः ॥१६॥ राजा च राजकीया वा बलाद्यत्र परस्त्रियः । परस्वानि हरेयुश्च पीडयेयुश्च दुर्बलान् ॥१७॥ यत्र च व्यभिचारिण्यो भवेयुः प्रायशः स्त्रियः । मद्यमांसादिलेपाः स्युर्यत्र च स्तेयकर्मिणः ॥१८॥ देशे सत्यपि यत्र स्यान्मारीरोगाद्युपद्रवः । राजसैन्योपद्रवश्च स्याच्चेतीनामुपद्रवः ॥१९॥ यत्रान्नवस्त्रातिदुःखादपि स्वजनविक्रयम् । कुर्वीरन् पुरुषाश्चैते देशाः खल्वशुभा मुने ! ॥२०॥शुभो ब्राह्ममुहूर्तादिः पूर्वाह्णो देवकर्मणि । कालोऽपराह्णः पैत्रे च कर्मणि प्रोच्यते शुभः ॥२१॥

तथायनं च विषुवं व्यतीपातो दिनक्षयः । चन्द्रादित्योपरागश्च द्वादशी वैष्णवं च भम् ॥२२॥ अक्षयाख्या तृतीया च नवमी कार्तिके सिता । चतस्रोऽप्यष्टकाश्चैव माघे च सितसप्तमी ॥२३॥ समासर्क्षाः पौर्णमास्य एकादश्यश्च सर्वशः । संस्कारकालो जायाया अपत्यस्यात्मनस्तथा ॥२४॥ सप्तमी भानुयुक्ता च सोमामा च बुधाष्टमी । अङ्गारकचतुर्थी च षष्ठी च कपिलाह्वया ॥२५॥ यस्मिंश्चापरात्रे स्युर्देवविप्रेक्षणादयः । सुस्वप्नाः शकुनाश्च स्युः सन्तः कालः स शोभनः ॥२६॥ प्रेतक्रियायाः

---

એ પૂર્વે કહેલા અતિશય પુણ્યશાળી દેશો પોતાના કલ્યાણને ઈચ્છનારા પુરુષોએ સેવા કરવા યોગ્ય છે. આ દેશોમાં આચરણ કરાયેલો ધર્મ, ધર્માચરણ કરનારા જનોને હજાર ગણા ફળને આપનારો થાય છે. (૧૩)

હવે ધર્મ-બુદ્ધિવાળા જનોએ ત્યાગ કરવા યોગ્ય, અસત્ દેશોને કહું છું : અંગ, બંગાલ, કલિંગ, જ્યાં યવનો રહેતા હોય એવા સિંધ વગેરે તથા કીકટ નામના દેશો અસત્ દેશો કહેવાય છે. (૧૪) જે દેશો અસંસ્કૃત = વાળવું-જળથી છંટકાર-લીંપવું વગેરેથી રહિત હોવાથી કીટાદિકની અધિકતાવાળા, ખાર યુક્ત દેશો અને ભગવાનની પ્રતિમાએ રહિત હોય, જે દેશના જળનું પાન કરવાથી ઉદરના રોગો થાય, કંઠની વૃદ્ધિ થાય, પગ ફૂલી જાય વગેરે રોગ કરનારા દેશો અશુભ માનેલા છે. (૧૫) જે દેશમાં પુરુષો તથા સ્ત્રીઓ પોતપોતાના ધર્મે રહિત હોય અને જે દેશમાં ક્રોધ, લોભાદિ દોષે રહિત અંતઃકરણવાળા શ્રીકૃષ્ણના એકાંતિક ભક્તો ન હોય, જે દેશમાં રાજા અને રાજાના કારભારીઓ બળપૂર્વક પારકી સ્ત્રીઓ અને બીજાઓનું ધન હરી લે અને દુર્બળ જનોને પીડા કરે તે દેશો અશુભ માનેલા છે. (૧૬-૧૭) જે દેશમાં વ્યભિચારિણી સ્ત્રીઓ ઘણું કરીને હોય, જે દેશમાં મદ્યમાંસ વગેરે જેમાં છે એવાં મળ, મૂત્રાદિના સંસર્ગો હોય, જે દેશમાં ચોરીનું કામ કરવામાં પ્રીતિવાળા મનુષ્યો હોય, તે દેશો અશુભ જાણવા. (૧૮) શુભ દેશોમાં પણ જે દેશમાં મરકીના રોગો વગેરે અને અતિસારાદિ રોગોની પીડા હોય, રાજસૈન્યનું વારંવાર જવાઆવવાનું થતું હોય તેથી પ્રજાને લૂંટ વગેરે ઉપદ્રવ થતો હોય, અને ઈતિઓ અર્થાત્ અતિવૃષ્ટિ, અનાવૃષ્ટિ, તીડ, ઉંદર, પોપટો, પોતાના રાજ્યનું ચક્ર અને પારકા રાજ્યનું સૈન્ય આ સાત ઈતિઓ છે તેનો ઉપદ્રવ હોય તે દેશ અશુભ જાણવો. (૧૯) હે મુને ! જે દેશમાં અન્નવસ્ત્રાદિની પ્રાપ્તિ નહિ થવાથી પીડાતાં પુરુષો સ્ત્રી, પુત્ર, પુત્રી આદિ પોતાના માણસોનું વિક્રય કરતા હોય તે દેશો અશુભ જાણવા. (૨૦)

બ્રાહ્મમુહૂર્ત વગેરે, દિવસનો પૂર્વભાગ રૂપ સમય શ્રી વિષ્ણુ વગેરે દેવના પૂજનકર્મમાં શુભ કહેલો છે. મધ્યાહ્ન પછીનો સમય પિતૃ સંબંધી શ્રાધ્ધ કરવામાં શુભ કહેલો છે. (૨૧)

જે પ્રકારે દક્ષિણાયન, અને ઉત્તરાયન, (કર્ક સંક્રાંતિ અને મકર સંક્રાંતિ) વિષુવ, (તુલા સંક્રાતિ અને મેષસંક્રાતિ સમય) વ્યતિપાત, દિનક્ષય, સૂર્યચંદ્રનો ગ્રહણકાળ, દ્વાદશી, શ્રવણ નક્ષત્ર; (૨૨) અક્ષય તૃતીયા, કારતક સુદી નવમી તિથિ, અષ્ટકા = (માગશર, પોષ, મહા, ફાગણ આ ચાર માસની કૃષ્ણ પક્ષની ચાર અષ્ટમીઓ) અને મહા માસની સુદી સાતમ, તે તે માસના નામનક્ષત્રે યુક્ત સર્વ પૌર્ણમાસીઓ, સર્વે એકાદશીઓ, પોતાની પત્નીનો પુંસવનાદિ કાળ, પુત્રનો જાતકર્માદિ કાળ, રવિવાર સહિત સપ્તમી, સોમવાર સહિત અમાસ, બુધવારે સહિત આઠમ, મંગળવારે સહિત ચતુર્થી, કપિલા છઠ્ઠ (વરાહ પુરાણમાં ભાદરવા વદ છઠ્ઠ, વ્યતિપાત-મંગળવાર-રોહિણી નક્ષત્ર વગેરે યોગથી કપિલા છઠ્ઠ કહેલી છે) વગેરે શુભ કાળ કહેવાય છે. (૨૩-૨૪-૨૫) જે પાછલી રાત્રિમાં દેવ-બ્રાહ્મણ તથા ભગવાનના ભક્તોનાં દર્શન સહિત શુભ સ્વપ્નો આવે અને મંગલ ધ્વનિના શ્રવણ વગેરે શુભ શુકનો થાય તે શુભ કાળ કહેવાય છે. (૨૬) પોતાના પિતા



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

कालश्च मृताहो व्रतवासराः । जन्मोत्सवा हरेश्चेति पुण्यकालाः प्रकीर्तिताः ॥२७॥ एषु स्नानं जपो होमो व्रतं देवद्विजार्चनम् । पितृदेवनृभूतेभ्यो यद्दत्तं तद्ध्यनश्वरम् ॥२८॥ प्रदोषश्च निशीथादिः सूतकं दुर्दिनानि च । दिव्यभौमौत्पातहेतुः सर्वोद्वेगादिकृत्तथा ॥२९॥ आत्मनः पशुवित्तादेर्हानिकृत्सर्वथा च यः । असन्त एते विज्ञेयाः कालाः पुंभिर्विचक्षणैः ॥३०॥ यस्मिंश्चापररात्रे स्युः कृष्णसर्पेक्षणादयः । दुःस्वप्नाश्चापशकुनाः प्रोक्तः कालः स चाप्यसन् ॥३१॥ सत्क्रियास्तु हरेर्भक्तिर्नवधा श्रवणादिका। अहिंसयज्ञा दानानि व्रतानि नियमा यमाः ॥३२॥ स्वधर्मश्च सतां सेवा ब्राह्मणाराधनं तथा । तीर्थयात्रादिका ज्ञेयाः क्रियाः सत्यो मनीषिभिः ॥३३॥ असत्क्रियास्तु विज्ञेया जीवहिंसानृतं तथा । मद्यमांसाशनं स्तेयं दम्भः साङ्कर्यकर्म च ॥३४॥ द्यूतं च परनारीणां सङ्गः क्ष्वेलिश्च नर्म च । अपमानः सतां चेति ह्यसत्यः कथिताः क्रियाः ॥३५॥

शान्तमूर्तेर्भगवतो वासुदेवस्य सत्पतेः । नारायणस्य श्रीभर्तुर्यद्ध्यानं तत्सदुच्यते ॥३६॥ कृष्णसम्बन्धिनां स्थानासनभूषणवाससाम् । वेणुमालायुधादीनां ध्यानं च सदुदीरितम् ॥३७॥ कालीभैरवयक्षाणां मद्यमांसाशिनां तु यत् । ध्यानं तामसदेवानामशुभं परिकीर्तितम् ॥३८॥ मूर्तयश्चावताराणां श्रीविष्णोः प्रतिपादिताः । श्रीरामकृष्णमुख्यानां यत्र सच्छास्त्रमेव तत् ॥३९॥ यन्नारदोद्धवादीनामेकान्तिकसतां हरेः। प्रतिपादनकर्तृ स्यान्मूर्तीनां तच्च सन्मतम् ॥४०॥ यत्र

---

વગેરેની ઔર્ધ્વદૈહિક ક્રિયાનો સમય પોતાનાં માતાપિતા વગેરેનો સંવત્સરી દિવસ કૃચ્છ્રાદિ વ્રતાચરણના સર્વ વ્રતના દિવસો, તથા શ્રી વાસુદેવના જન્મોત્સવો; આ સર્વે શુભ કાળો કહેલા છે. (૨૭) આ પુણ્ય સમયમાં સ્નાન, જપ, હોમ, વ્રત, ઉપવાસ વગેરે નિયમોનું આચરણ, દેવ અને બ્રાહ્મણોનું પૂજન, પિત્રીઓ, દેવો મનુષ્યો અને પ્રાણીઓને જે આપેલું હોય તે સર્વ અવિનાશી ફળને ઉત્પન્ન કરનાર થાય.(૨૮)

પ્રદોષ = રાત્રિનું મુખ, (જેમાં ચંદ્ર-તારાઓ સ્પષ્ટ દેખાતા હોય), મધ્યરાત્રિ આદિક, જન્મમરણ વગેરે સૂતકનો સમય, સમય વિના વાદળથી ઢંકાયેલા દિવસો, વીજળીનું પડવું, ભૂકંપાદિ જે ઉત્પાતોના કારણભૂત સમય તથા સર્વને ઉદ્વેગ કરનારો સમય, પોતાનાં પશુ- વિત્ત વગેરેનો સર્વ પ્રકારે હાનિકારક કાલ; એ પ્રદોષ વગેરે સમય વિચક્ષણ પુરુષોએ અશુભ કાળો જાણવા. પાછલી રાત્રિએ કાળા સર્પોનાં દર્શન, પ્રેત-દર્શન વગેરે અશુભ સ્વપ્નો થાય અને અપશબ્દનું શ્રવણ વગેરે થાય તો તે કાલ પણ અશુભ કહેલો છે. (૨૯-૩૦-૩૧)

હે મુને ! શ્રવણ આદિ નવ પ્રકારની શ્રીકૃષ્ણની ભક્તિ, પશુહિંસારહિત વિષ્ણુયાગ વગેરે યજ્ઞો, સત્ પાત્રને ગાય, પૃથ્વી, સુવર્ણ આદિનું દાન, એકાદશીના ઉપવાસ વગેરે વ્રતો; શૌચ, તપ, સંતોષ, સ્વાધ્યાય, વગેરે નિયમો; અહિંસાદિ યમો, પોતપોતાના વર્ણાશ્રમ ધર્મનું આચરણ, સાચા સાધુઓની યથાયોગ્ય પરિચર્યા તેમજ સ્વધર્મનિષ્ઠ બ્રાહ્મણની સેવા, તીર્થયાત્રા; વગેરે ક્રિયાઓ બુદ્ધિમાન પુરુષે સત્ ક્રિયાઓ જાણવી. (૩૨-૩૩) જીવહિંસા, અસત્ય ભાષણ, મદ્યપાન, માંસનું ભક્ષણ, ચોરી,દંભ, જાતિભ્રષ્ટ કરનારું કર્મ; એ અસત્ ક્રિયાઓ જાણવી. (૩૪) જુગારનું કર્મ કરવું, પરસ્ત્રીનો સંગ, તેની સાથે રમવું; તેમની સાથે પરિહાસ કરવો, સાચા સાધુઓનું અપમાન : આ અસત્ ક્રિયાઓ કહેલી છે. (૩૫)

શાંત આકૃતિવાળા-સાધુઓના સ્વામી-સર્વાંતર્યામી ભગવાન શ્રી લક્ષ્મીપતિ વાસુદેવનાં સમગ્ર અંગનું ચિંતન અને પગ વગેરે અંગોનું જુદું ચિંતન તે **સદ્ધ્યાન** કહેલું છે. (૩૬) શ્રીકૃષ્ણના સંબંધને પામેલાં સ્થાનો, આસનો, ભૂષણો, વસ્ત્રો, બંસી, માળા, કંઠની કંઠી, શંખ, ચક્ર, ગદા, પદ્મ વગેરે આયુધો, શૈયા, પુષ્પ, તોરા વગેરેનું ધ્યાન તે શુભ ધ્યાન કહેલું છે. (૩૭) મદ્યપાન અને માંસને જમનારા કાલિ, ભૈરવ, યક્ષ ,ભૂત, પ્રેત, પિશાચ, કૃત્યા વગેરે મલિન તામસ દેવોનું જે ધ્યાન તે અશુભ ધ્યાન કહેલું છે. (૩૮)

જે શાસ્ત્રમાં શ્રી વિષ્ણુ, સદા દિવ્ય-આકૃતિ શ્રીવાસુદેવ ભગવાનના શ્રી રામકૃષ્ણ આદિ અવતારોની મૂર્તિઓ સત્યપણાથી પ્રતિપાદન કરેલી હોય તે શાસ્ત્ર **સત્ શાસ્ત્ર** માનેલું છે. જે શાસ્ત્ર નારદ-ઉદ્ધવ આદિ શ્રીકૃષ્ણના એકાંતિક સાધુઓનાં સ્વરૂપોને પ્રતિપાદન કરનારુ હોય તે શાસ્ત્ર પણ સત્ શાસ્ત્ર માનેલું છે.(૩૯-૪૦) જે શાસ્ત્રમાં ધારણ કરેલી



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી **શ્રી સ્વા. મંદિર - સરધાર**

साक्षाद्भगवतो धृतदिव्यनराकृतेः । तत्सतां च वचांसि स्युः प्रतिपाद्यानि तच्च सत् ॥४१॥ सच्छास्त्रलक्षणं प्रोक्तमसच्छास्त्रं ब्रवीम्यथ । एतच्छास्त्रविरुद्धं यदसच्छास्त्रं तदुच्यते ॥४२॥ आकारखण्डनं यत्र स्याद्धरेश्चापि तत्सताम् । आत्मनिष्ठा च भक्तिश्च स्याद्यत्र रहिता यमैः ॥४३॥ अवतारचरित्रेषु विष्णोरारोप्य दूषणम् । कृतं स्यान्निन्दनं यत्र तदसच्छास्त्रमुच्यते ॥४४॥ यत्र तामसदेवानां द्रव्यैरशुचिभिर्भवेत् । पूजाविधिश्च तत्सर्वं शास्त्रं ह्यसदितीर्यते ॥४५॥ कण्ठस्रक् जपमाला च पुण्ड्रं वस्त्राणि दैहिकी । प्रकृतिश्च भवेत्सौम्या यस्यां दीक्षा तु सा सती ॥४६॥ आनखादाशिखं वेषो यस्यां स्याच्च भयानकः । यस्यां क्रोधश्चापशब्दाः सा दीक्षा त्वसती मता ॥४७॥ यद्दर्शनाद्बिभीयुश्च जना व्याघ्रादितो यथा । मद्यमांसाद्यभक्ष्यस्य भक्षणं यत्र वा भवेत् ॥४८॥ आरक्ते लोचने यत्र गञ्जभङ्गादिभक्षणात् । प्रोक्ता सा चासती दीक्षा पारदार्यं च यत्र वा ॥४९॥ सन्मन्त्रः स तु विज्ञेयो यत्र स्युर्मङ्गलाभिधाः । कृष्णनारायणनरवासुदेवादयो हरेः ॥५०॥ असन्मन्त्रस्तु स ज्ञेयो मारणोच्चाटनादिकृत् । युक्तस्तामसदेवानां नाम्ना चित्तभ्रमश्च यः ॥५१॥ ये तु भागवतास्तेषां सङ्गः सत्सङ्ग उच्यते । लक्षणैस्ते तु विज्ञेयाः सच्छास्त्रेषूपवर्णितैः ॥५२॥ अष्टाङ्गं ब्रह्मचर्यं ये पालयेयुर्दृढव्रताः । धनमात्रत्यागिनश्च निःस्वादाः स्नेहवर्जिताः ॥५३॥ निर्मानाः निःस्पृहाः शुद्धाः क्रोधेर्ष्याद्रोहवर्जिताः । निर्मत्सराश्च निर्लोभा आत्मनिष्ठा जितेन्द्रियाः ॥५४॥ भक्तिं हर्यवतारेषु माहात्म्यज्ञानपूर्विकाम् । कुर्युरैकान्तिका भक्तास्तेषां सङ्गो हि सन्मतः ॥५५॥

---

છે દિવ્ય મનુષ્ય-આકૃતિ જેમણે એવા પ્રત્યક્ષ ભગવાનના વચનો પ્રતિપાદન કરેલાં હોય તે સત્ શાસ્ત્ર માનેલું છે. (૪૧) હે મુને ! આ પ્રમાણે સત્ શાસ્ત્રનું લક્ષણ કહ્યું. હવે તે અસત્ શાસ્ત્ર કહું છું : જે શાસ્ત્ર, સત્ શાસ્ત્રોથી વિરુદ્ધ હોય તે અસત્ શાસ્ત્ર કહેવાય છે. (૪૨) જે શાસ્ત્રમાં શ્રી કૃષ્ણ અને તેમના એકાંતિક સાધુઓના પણ આકારનું ખંડન થાય, જે શાસ્ત્રમાં આત્મનિષ્ઠા અને ભક્તિ અહિંસા-બ્રહ્મચર્યાદિ નિયમથી રહિત હોય; (૪૩) જે શાસ્ત્રમાં શ્રી વાસુદેવ ભગવાન અવતારોનાં ચરિત્રો-સદ્ધર્મના રક્ષણ માટે દૈત્યોને મારવા વગેરે; જગતના કલ્યાણમાં કારણભૂત-ચરિત્રોમાં હિંસાદિરૂપ દોષનો આરોપ કરીને નિંદા કરેલી હોય, તે સર્વ શાસ્ત્ર અસત્ શાસ્ત્ર કહેવાય છે. (૪૪)

જે શાસ્ત્રમાં અપવિત્ર મદ્ય-પાન, માંસાદિ દ્રવ્યોથી કાલી ભૈરવાદિ તામસ દેવતાઓનો પૂજાવિધિ થાય એમ કહ્યું હોય તે સર્વ શાસ્ત્ર અસત્ શાસ્ત્ર કહેવાય છે. (૪૫) જે દીક્ષામાં કંઠમાં ધારવા યોગ્ય સૂક્ષ્મ મણિકાની માળા, જપમાળા, તિલક, વસ્ત્રો વગેરે દેહની પ્રકૃતિ સૌમ્ય હોય તે **શુભ દીક્ષા** કહેવાય. (૪૬) જે દીક્ષામાં પગના નખથી આરંભીને શિખા પર્યંત દીક્ષાજન્ય વેશ ધારણ તે બીજાઓને ભયંકર હોય, જે દીક્ષામાં ક્રોધ અને અપશબ્દોનું ઉચ્ચારણ હોય તે દીક્ષા અસત્ માનેલી છે. (૪૭) જે દીક્ષાવાળા માણસના દર્શનથી લોકો વાઘ વગેરે પ્રાણીઓથી જ જેમ તેમ ભય પામે, જે દીક્ષામાં મદ્ય-માંસ, ડુંગળી, લસણ વગેરે અભક્ષ્યનું ભક્ષણ થાય; (૪૮) જે દીક્ષામાં ગાંજો, ભાંગ્ય, મહાજમ વગેરેના ભક્ષણથી લાલ -ચોળ નેત્રો થાય, જે દીક્ષામાં પરસ્ત્રીનો સંગ હોય તે દીક્ષા અસત્ કહેલી છે. (૪૯)

જે મંત્રમાં કૃષ્ણ, નારાયણ, નર, વાસુદેવ વગેરે વિષ્ણુ, કેશવ આદિક શ્રીહરિ પુરુષોત્તમનાં મંગલ કરનારાં નામો હોય તે મંત્ર **સત્ મંત્ર** જાણવો. (૫૦) જે મંત્ર, મારણ = સાંભળવા માત્રથી પ્રાણનો વિયોગ કરનારો હોય, અને ઉચ્ચાટન = બીજાને અમાત્યાદિપદથી ભ્રષ્ટ કરનાર હોય અને મોહ પમાડનાર હોય; તથા તામસ દેવતાઓનાં નામોથી યુક્ત અને ચિત્તને વિભ્રાંત કરનાર હોય તે મંત્ર અસત્ મંત્ર જાણવો. (૫૧)

જે ભગવાનના એકાંતિક સાધુઓ હોય તેમનો સમાગમ તે **સત્સંગ** કહેવાય છે. તે ભાગવતો, સત્ શાસ્ત્રોમાં કહેલાં લક્ષણોથી જાણવા. (૫૨) જે સાધુઓ અષ્ટ અંગ યુક્ત બ્રહ્મચર્ય વ્રત પાલન કરે, નિશ્ચલ નિયમવાળા, ધનમાત્રના ત્યાગી, સ્વાદે રહિત, અને સ્નેહે રહિત હોય, માને રહિત, નિઃસ્પૃહ, નિર્મળ અંતઃકરણવાળા, ક્રોધ, ઈર્ષ્યા, દ્રોહ તેનાથી રહિત, મત્સરે રહિત, લોભે રહિત, આત્મસ્વરૂપમાં સ્થિતિવાળા, અને ઈન્દ્રિયોને જીતનારા હોય; (૫૩-૫૪) જે ભાગવતો શ્રીકૃષ્ણના પ્રાદુર્ભાવમાં (અવતારોમાં) માહાત્મ્યજ્ઞાનપૂર્વક ભક્તિ કરે, જે ભકતો સદા એકાંતિક ભક્તિપરાયણ હોય તેમનો સંગ તે સત્સંગ માનેલો છે. (૫૫) પૃથ્વીમાં પ્રત્યક્ષ શ્રીહરિનો જે સંગ અને શ્રીહરિનાં વચનગર્ભિત ચરિત્રોને



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

धृतावतारस्य हरेः साक्षात्सङ्गश्च यो भुवि । तदीयानां च शास्त्राणां सङ्गः सत्सङ्ग उच्यते ॥५६॥ देशादिसप्तकस्यापि सच्छब्देनोदितस्य यः । सङ्गः स सर्वोऽपि मतः सत्सङ्गो मुनिसत्तमैः ॥५७॥ सङ्गोऽसतामसन्नुक्तो ज्ञातव्यास्तेऽपि लक्षणैः । भक्तिहीना भवेयुर्ये श्रीविष्णौ वैष्णवेषु च ॥५८॥ ये सच्छास्त्रेष्वविश्वासा नास्तिका धनलोलुपाः। पारदार्यरताः स्तेनाः सुरामिषनिषेविणः ॥५९॥ मानिनो मत्सरग्रस्ता दाम्भिका द्यूतदेविनः । अभक्ष्यभक्षा हिंस्राश्च मदमत्ताः पुरुक्रुधः ॥६०॥ महतो ब्रह्मचर्यादीन् गुणांस्त्यक्त्वाल्पकेऽपि ये । सतां दोषे दैहिके तु महादोषापवादिनः ॥६१॥ आत्मश्लाघापरा ये च हरितद्भक्तनिन्दकाः । गृह्णन्तोऽन्नादि च स्वार्थमुपद्रुत्य परान् भृशम् ॥६२॥ नृदेहं हरिणा दत्तं कृपया भक्तिधर्मयोः । संसाधकमपि प्राप्य पौरुषं नाचरन्ति ये ॥६३॥ कालं दैवं च संस्कारं कृपां भगवतस्तथा । श्रेयोऽर्थे पौरुषे हेतुं मन्यन्ते ये प्रमादिनः ॥६४॥ अशान्त्यादिभिरन्यैश्च युक्ता दुर्लक्षणैस्तु ये । असन्तस्ते हि पुरुषास्तेषां सङ्गस्त्वसन्मतः ॥६५॥ देशादिसप्तकं यद्यदसच्छब्देन कीर्तितम् । तत्तत्सङ्गोऽप्यसज्ज्ञेयः स्त्रीभिः पुंभिश्च तत्त्वतः ॥६६॥ इत्थं सतां चासतां च देशादीनां समासतः । लक्षणानि मयोक्तानि बोधायैव मुमुक्षताम् ॥६७॥ शुभैरेतैः सेवितैस्तु शुभा बुद्धिर्भवेन्नृणाम् । अशुभैस्तैर्भवेद्बुद्धिरशुभा नात्र संशयः॥६८॥ यादृशी यस्य बुद्धिः स्यात्कर्म कुर्यात्स तादृशम् । कर्मानुरूपं च फलं प्राप्नुयात्स ततो मुने ! ॥६९॥ असतो देशकालादीन्न सेवेत ततः सुधीः । विहाय ताञ्छुभानेव हितार्थी शीघ्रमाश्रयेत् ॥७०॥ यथा पीयूषममलमज्ञानादपि सेवितम् । मूर्खं वा पण्डितं वापि नयत्यमरतां किल ॥७१॥ तथा सद्देशकालादिरज्ञानादपि

---

પ્રતિપાદન કરનારાં શાસ્ત્રોનો સંગ તે સત્સંગ કહેવાય. (૫૬) સત્ શબ્દથી કહેલાં દેશાદિ સાતનો પણ જે સંગ તે બધોજ મુનિ શ્રેષ્ઠોએ સત્સંગ માનેલો છે. (૫૭)

અસાધુઓનો જે સંગ તે **અસત્સંગ** કહેલો છે. તે અસંત પણ લક્ષણોથી જાણવા યોગ્ય છે. જે અસંતો છે તે શ્રી વિષ્ણુમાં, અને વૈષ્ણવોમાં ભક્તિથી રહિત હોય; (૫૮) જે સંતો અને સત્ શાસ્ત્રોમાં વિશ્વાસે રહિત, પરલોકમાં વિશ્વાસે રહિત, (નાસ્તિકો) ધનની લોલુપતાવાળા, પરસ્ત્રીઓમાં આસક્તિવાળા, ચોરી કરનારા, સુરાપાન અને માંસનું ભક્ષણ કરનારા, માનવાળા, મત્સરથી પરાભવ પામેલા, દાંભિક, દ્યૂતક્રીડામાં આસક્ત, અભક્ષ્યનું ભક્ષણ કરનારા, પ્રાણીહિંસામાં આસક્તિવાળા, વિદ્યામદ-ધનમદ-કુલમદાદિથી ઉન્મત્ત થયેલા, અત્યન્ત ક્રોધવાળા, જે સત્પુરુષોના બ્રહ્મચર્યાદિ અતિ શ્રેષ્ઠ ગુણોનો ત્યાગ કરી દેહ સંબંધી અલ્પ દોષ જે ભોજનાદિ આચરણ, વસ્ત્રાદિ ધારણ કરવામાં અવ્યવસ્થારૂપ દોષમાં મહાદોષનો અપવાદ કહેનારા; (૫૯-૬૦-૬૧) જે પોતાની પ્રશંસા વારંવાર પોતાના મુખથી કરે અને પ્રત્યક્ષ શ્રીહરિ અને તેમના ઉપાસક ભક્તોમાં દોષનો આરોપ કરી, નિન્દાપરાયણ હોય, પોતાના સ્વાર્થ માટે બીજાઓને પીડા કરીને અન્નવસ્ત્રાદિ ગ્રહણ કરનારા; (૬૨) શ્રીહરિએ કૃપા કરી આપેલાં ભક્તિ અને ધર્મની સિદ્ધિ કરનાર મનુષ્યશરીરને પામીને પણ પુરુષપ્રયત્નથી સાધ્ય ભક્તિ નથી કરતા તેમજ બ્રહ્મચર્યાદિ ધર્મ-પાલન નથી કરતા; (૬૩) અને જે પ્રમાદી પુરુષો પોતાના કલ્યાણ માટે પુરુષપ્રયત્નમાં સત્યુગાદિ કાળ, દૈવ, સંસ્કાર તથા ભગવાનની કૃપાને કારણ જાણે છે; (૬૪) અશાંતિ વગેરે બીજાં દુષ્ટ ચિહ્નોથી યુક્ત તે અસત્ પુરુષો માનેલા છે. તે અસત્ પુરુષોનો સંગ તો અસત્સંગ જ માનેલો છે. (૬૫) અસત્ શબ્દથી કહેલા જે દેશાદિ સાત તેનો સંગ પણ પુરુષો અને સ્ત્રીઓએ યથાર્થપણે અસત્સંગ જાણવો. (૬૬) આ પ્રમાણે સત્ દેશાદિનાં લક્ષણો અને અસત્ દેશાદિનાં લક્ષણો મારા આશ્રિત-મુમુક્ષુજનોના જ્ઞાન માટે મેં સંક્ષેપથી કહ્યાં છે. (૬૭) સેવન કરાયેલાં સત્ દેશાદિ આઠથી જનોની બુદ્ધિ શુભ થાય અને સેવન કરાયેલાં અસત્ દેશાદિ આઠથી મનુષ્યોની બુદ્ધિ અશુભ થાય એમાં સંશય નથી. (૬૮) હે મુને ! જે માણસની બુદ્ધિ જેવી શુભ અથવા અશુભ હોય તે માણસ તેવી શુભ અથવા અશુભ ક્રિયા કરે અને પછી તે માણસ કર્મ પ્રમાણે શુભ અથવા અશુભ ફળ પામે.(૬૯)

તે માટે પોતાના હિતને ઈચ્છનાર સન્મતિ માણસ અશુભ દેશ કાળાદિને સેવે નહિ, અસદ્ દેશકાળાદિનો ત્યાગ કરી શુભ દેશકાળાદિનો તત્કાલ આશ્રય કરે. (૭૦) જેમ અજ્ઞાનથી પણ પીધેલું નિર્મળ અમૃત મૂર્ખ અથવા પોતાનું સેવન કરનાર પંડિતને પણ અમરપણાને પમાડે છે જ. (૭૧) તે પ્રમાણે અજ્ઞાનથી પણ સેવાયેલાં સત્ દેશકાળાદિ પંડિત અને



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सेवितः । संसृतेर्मोचयत्येव सुज्ञमज्ञं च देहिनम् ॥७२॥ पीतं च मद्यभङ्गादि शास्त्रज्ञं वा जडं नरम् । मादयित्वा यथा सद्यो नयत्युन्मत्ततुल्यताम् ॥७३॥ तथैव देशकालादिरसन्नेष स्वसेविनम् । उत्पथं प्रापयत्येव विद्वांसमपि सात्त्विकम् ॥७४॥ ईदृक्स्वभावमेवैतद्वर्तते सर्वथा मुने ! । स्वभाविकं गुणं नैव हातुं शक्नोति कश्चन ॥७५॥ यः सतो देशकालादीन्सेवते नित्यमादृतः । धर्मः सिद्ध्यति तस्यैव सकलाभीप्सितार्थदः ॥७६॥ यावज्जीवं सुखं भुङ्क्ते स एवात्र धरातले । देहान्ते परमं धाम गोलोकं लभते प्रभोः ॥७७॥ तत्र चैतन्यदेहेन सोऽनन्तानक्षयान्नरः । प्राप्नोति स्वेप्सितान् दिव्यान्भोगानमरदुर्लभान् ॥७८॥ देशादीनसतो यस्तु सेवेत स पुमानिह । यावज्जीवं दुःखमेव प्राप्नुयाद्धर्मतश्च्युतः ॥७९॥ देहान्ते नरकान् भुक्त्वा दारुणान् स यमालये । चतुरशीतिलक्षेषु ततो भ्राम्यति योनिषु ॥८०॥ असद्देशादिसम्बन्धाद्भीत एव ततः पुमान् । धर्मस्य सिद्ध्ये नित्यं देशादीनाश्रयेत्सतः ॥८१॥ सुव्रत उवाच – श्रुत्वेति नारायणवाचमापद्धर्षं महान्तं स मुनिः सहान्यैः । भक्तैस्तमानम्य तदीयवाचं जग्राह राजन् ! शिरसा हितार्थी ॥८२॥

इत्येषा धर्मसिद्धिर्भुवि नृषु गृहिणस्त्यागिनो वापि ये स्युस्तेषां धर्मावनार्थं निगमगणमता कीर्तिता वर्णिराज्ञा । एतां श्रोष्यन्ति ये वा प्रतिदिनमपि ये कीर्तयिष्यन्ति तेषां धर्मस्थैर्यं च सौख्यं विविधमिह तथा संभविष्यत्यमुत्र ॥८३॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे प्रबोधन्युत्सवे श्रीनारायणशुकानन्दसंवादे धर्मसिद्धिनिरूपणनामा षड्विंशोऽध्यायः ॥२६॥

---

મૂર્ખ માણસને સંસારના બંધનથી મુકાવે છે જ. (૭૨) જેમ મદ્ય, ભાંગ વગેરે સુરા, ગાંજો વગેરે માદક વસ્તુ પાન કરનાર શાસ્ત્રજ્ઞ હોય અથવા મૂર્ખ હોય તેને મદ યુક્ત કરી ઉન્મત્તના તુલ્યપણાને પમાડે છે. (૭૩) તે પ્રકારે આ અસત્ દેશકાળાદિ પોતાનું સેવન કરનાર સત્ત્વગુણ યુક્ત પંડિત માણસને પણ નઠારા માર્ગને પમાડે છે જ. (૭૪) હે મુને ! આ દેશકાળાદિ સર્વ પ્રકારે આ પૂર્વે કહેલી પ્રકૃતિવાળા જ છે. કારણ કે કોઈ પણ (વસ્તુ-પદાર્થ પોતાના) સ્વાભાવિક સદ્ગુણ અથવા અસદ્ગુણ રૂપી ધર્મનો ત્યાગ કરવા શક્તિમાન નથી. (૭૫) જે ભગવાનનો ભક્ત આદરપૂર્વક શુભ દેશકાળાદિને નિત્ય સેવે છે તે ભક્તજનને જ સમગ્ર ઈચ્છિતાર્થને આપનારો ધર્મ સિદ્ધ થાયછે. (૭૬) આ પૃથ્વીમાં ધર્મ સિદ્ધિને પામેલો ભક્તજન જ જીવન પર્યંત સુખનો અનુભવ કરે છે. પોતાના દેહના અવસાનમાં ભગવાનના સર્વોત્તમ તેજોમય ધામને પામે છે. (૭૭) ત્યાં તે ભક્તજન બ્રહ્મમય શરીરથી અવધિ વિનાના, અવિનાશી, પોતાને ઈચ્છિત, દિવ્ય; દેવોને દુર્લભ એવાં સુખોને પામે છે. (૭૮) આ લોકમાં જે પુરુષ અશુભ દેશાદિને સેવે તે પુરુષ પોતાના ધર્મથી ભ્રષ્ટ થઈને જીવન પર્યંત દુઃખ જ પામે છે. (૭૯) તે પુરુષ દેહના અવસાનમાં, યમપુરીમાં અતિ દુઃખો આપનારાં નરકોને ભોગવીને પછી ચોરાશી લાખ યોનિમાં ભમે છે. (૮૦) તેથી બુદ્ધિશાળી મનુષ્ય અશુભ દેશકાળાદિના સંબંધથી બહુ ભય પામીને જ સ્વધર્મની સિદ્ધિ માટે નિત્ય શુભ દેશાદિનું સેવન કરે. (૮૧)

**સુવ્રતમુનિ કહે છે** : હે રાજન્ ! આ પ્રકારે શ્રી નારાયણ મુનિની વાણી સાંભળી હિતાર્થી શુકાનંદ મુનિ સભામાં બેઠેલા ભક્તોની સાથે અતિશય આનંદ પામ્યા અને શ્રી નારાયણ મુનિને નમસ્કાર કરી તેમની વાણીને પોતાના મસ્તકથી ધારણ કરતા હતા. (૮૨)

**ધર્મસિદ્ધિ-શ્રવણનું માહાત્મ્ય** :-ચાર વેદોએ પ્રમાણ કરેલી આ ધર્મસિદ્ધિ પૃથ્વીને વિષે મનુષ્યરૂપ પોતાના ભક્તજનો જે ત્યાગીઓ અથવા હરિભક્તો હોય તે બંનેને પણ ધર્મ રક્ષણ કરવા માટે નૈષ્ઠિક વર્ણીરાજ શ્રી નારાયણ મુનિએ કહેલી આ ધર્મસિદ્ધિ જે ગૃહસ્થ અને ત્યાગીજનો દરરોજ સાંભળશે અથવા કહેશે તે બંને પોતાના ધર્મોમાં દૃઢ સ્થિતિ તથા આ લોકમાં અને પરલોકમાં નાના પ્રકારનાં સુખ મેળવશે. [દેશાદિ સત્ અને અસત્નાં ધર્મસિદ્ધિ માટે મેં પૂછેલાં લક્ષણો જે શ્રીહરિએ કહ્યાં તે શ્રીહરિ મારા હૃદયમાં નિવાસ કરો.] (૮૩)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીયપ્રકરણે પ્રબોધન્યુત્સવે શ્રીનારાયણશુકાનંદસંવાદે ધર્મસિદ્ધિનિરૂપણ નામા ષડ્વિંશોऽધ્યાયઃ (૨૬)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच - षष्ठ्यां निशागमे राजन् ! सदस्युच्चासनस्थितम् । ब्रह्मानन्दो मुनीन्द्रोऽथ प्रणम्यापृच्छदीश्वरम् ॥१॥ सम्प्रदायेऽत्र भगवन्निष्कामं हि बृहद्व्रतम् । आश्रिताः सन्ति बहवस्त्यागिनस्तावका इमे ॥२॥ व्रतभङ्गे क्वचित्त्वेषां जाते सम्बन्धतः स्त्रियाः । यथा शुद्धिर्भवेत्स्वामिंस्तथा वक्तुं त्वमर्हसि ॥३॥ श्रीनारायणमुनिरुवाच - बुद्धिपूर्वं न कर्तव्यो व्रतभङ्गः क्वचिन्मुने! । जाते त्वज्ञानतः कार्या तच्छुद्धिः सद्य एव हि ॥४॥ अष्टाङ्गब्रह्मचर्यस्य रक्षणं स्यात्तया ततः । एकान्तिकत्वं भक्तानां भवत्येवेति सोच्यते ॥५॥ निष्कामव्रतकृद्यस्तु पुरुषः क्वापि योषिताम् । वार्तां चेच्छृणुयात् प्रीत्या कुर्यादेकमुपोषणम् ॥६॥ स्त्रीणां गुणान्वाप्यगुणान्सच्छास्त्रीयकथां विना । व्रती चेद्वर्णयेत्तर्हि कुर्यादेकमुपोषणम् ॥७॥ मुग्धामध्यादिकान्भेदानसत्काव्योपवर्णितान् । शृणुयाच्चेत्कीर्तयेद्वा कुर्या० ॥८॥ रममाणा यदि स्वैरं योषितो मूढवच्चिरम् । पश्यंस्तिष्ठेत्तदाप्येष कुर्या० ॥९॥ स्त्रिया दृशा निजदृशं बध्नन् प्रेक्षेत तां यदि । क्षणमात्रमपि ह्येष कुर्या० ॥१०॥

स्त्र्यङ्गस्थवस्त्रस्पर्शे च स्पर्शे स्त्र्यवयस्य वा । स्त्रीधार्यवस्त्रस्पर्शेऽपि कुर्या० ॥११॥ स्त्रियमुद्दिश्य भगवद्वार्ताः पुंसां पुरो यदि । कुर्याद्व्रती स तु तदा कुर्या० ॥१२॥ स्त्रीसम्बन्धिनि सङ्कल्पे दुष्टे जातेऽपि चेतसि। भाषणे वा स्त्रिया जाते कुर्या० ॥१३॥ पुंद्वारा बोधनं नार्याः प्रच्छन्नं कारयेत्तथा । तद्वार्तां शृणुयाद्योऽसौ कुर्या० ॥१४॥ प्रासादिकं भगवतो गुप्तं चेत्प्रेषयेत्स्त्रियै । स निष्कामव्रती तर्हि कुर्या० ॥१५॥ नार्या वा प्रेषितं विष्णोर्यदि प्रासादिकं पुमान्। गुप्तं गृह्णीत तर्ह्येष कुर्या० ॥१६॥

## અધ્યાય : ૨૭

## નિષ્કામ વ્રત પાલન કરનારાઓએ પ્રયત્નપૂર્વક અવશ્ય પાલન કરવા યોગ્ય નિષ્કામ શુદ્ધિ શ્રીહરિએ બ્રહ્માનંદ મુનિને કહી છે.

**સુવ્રત મુનિ બોલ્યા :** હે રાજન્ ! પછી કારતક સુદી છઠને દિવસ સંધ્યા આરતી પછી સભામાં ઉંચા સિંહાસનમાં બેઠેલા શ્રીહરિને પ્રણામ કરી મુનીંદ્ર બ્રહ્માનંદ મુનિ શ્રીહરિને પ્રશ્ન પૂછતા હતા : (૧) હે ભગવન્ ! આ ઉદ્ધવ સંપ્રદાયમાં નિષ્કામ નામના બ્રહ્મચર્ય વ્રતને આશરેલા આ સભામાં બેઠેલા તમારા આશ્રિત અમો ઘણા ત્યાગી ભક્તો છીએ. (૨) હે સ્વામિન્ ! તે અમોને ત્યાગીઓને ક્યારેક સ્ત્રીઓના સંબંધથી વ્રતનો ભંગ થાય ત્યારે જે પ્રકારે પ્રાયશ્ચિત્તથી શુદ્ધિ થાય તે પ્રકારે તમો કહેવાને યોગ્ય છો. (૩) આ પ્રમાણે બ્રહ્માનંદ મુનિએ પુછાયેલા-**શ્રી નારાયણ મુનિ બોલ્યા :** હે મુને ! બુદ્ધિપૂર્વક નિષ્કામ વ્રતનો ક્યારેય ભંગ કરવો નહીં. અજાણથી નિષ્કામ વ્રતનો ભંગ થાય તો તેની શુદ્ધિ તત્કાળ કરવી. (૪) તે શુદ્ધિથી અષ્ટાંગ બ્રહ્મચર્યનું રક્ષણ થાય; તેથી ત્યાગી ભક્તોને એકાંતિકપણું પ્રાપ્ત થાય છે, માટે તે શુદ્ધિ કહીએ છીએ : (૫) નિષ્કામ વ્રતનું પાલન કરનાર ત્યાગી પુરૂષ કોઈ સમયે જો સ્ત્રીઓની વાર્તા કોઈ કરતો હોય તેને કાન દઈને પ્રીતિપૂર્વક સાંભળે તો એક ઉપવાસ કરે. (૬) નિષ્કામી પુરુષ, સત્ શાસ્ત્ર સંબંધી કથા વિના અન્ય સ્ત્રીઓના ગુણો અને દોષોને પણ જો વર્ણન કરે તો એક ઉપવાસ કરે. (૭) રસમંજરી આદિક અસત્ કાવ્યોમાં વર્ણન કરેલાં મુગ્ધા, મધ્યા, અને પ્રૌઢા વગેરે સ્ત્રીઓના ભેદોને જો સાંભળે અથવા વર્ણન કરે તો જુદા જુદા એક એક ઉપવાસ કરે. (૮) જો પોતાની ઈચ્છાથી પરસ્પર રમત કરતી સ્ત્રીઓને જુએ તો અથવા ઘણી વાર ઊભો રહે તો નિષ્કામી પુરુષ એક ઉપવાસ કરે. (૯) જો સ્ત્રીની દૃષ્ટિ સાથે પોતાની દૃષ્ટિ જોડતો થકો ક્ષણમાત્ર પણ તે સ્ત્રીને જુએ તો નિષ્કામી પુરુષ એક ઉપવાસ કરે. (૧૦)

સ્ત્રીના અંગ ઉપરના વસ્ત્રનો અથવા સ્ત્રીના અવયવ હાથ, પગ આદિકનો સ્પર્શ થઈ જાય તો વ્રતવાળો પુરુષ એક ઉપવાસ કરે. (૧૧) જો સ્ત્રીને ઉદ્દેશીને પુરુષોની આગળ ભગવાનની વાર્તા કરે તો નિષ્કામ વ્રતવાળો પુરુષ એક ઉપવાસ કરે. (૧૨) પોતાના વ્રતને દૂષણ પમાડનાર સ્ત્રી સંબંધી મલિન સંકલ્પ પોતાને મનમાં થયો હોય; અથવા સ્ત્રીની સાથે બોલાયું હોય ત્યારે નિષ્કામ વ્રતધારી એક એક ઉપવાસ કરે. (૧૩) જે નિષ્કામી પુરુષ ગુપ્ત રીતે પુરુષ દ્વારાએ સ્ત્રીને ઉપદેશ કરાવે તથા પુરુષ દ્વારા ગુપ્તપણે સ્ત્રીએ કહેવડાવેલી વાર્તા સાંભળે તો તે વ્રતધારી એક એક ઉપવાસ કરે. (૧૪) જો નિષ્કામ વ્રતધારી પુરૂષ શ્રીકૃષ્ણની પ્રસાદીભૂત ચંદન, પુષ્પ, અન્ન, વસ્ત્રાદિ વસ્તુ ગુપ્ત રીતે સ્ત્રીને માટે દઈ મોકલે તો તે વ્રતધારી એક ઉપવાસ કરે. (૧૫) જો સ્ત્રીએ મોકલેલી વિષ્ણુની પ્રસાદીભૂત; ચંદન, પુષ્પાદિ વસ્તુ નિષ્કામી પુરુષ ગુપ્ત પણે ગ્રહણ કરે તો તે વ્રતધારી એક ઉપવાસ કરે. (૧૬) જો ગુપ્તપણે પુસ્તક લખીને અથવા તૈયાર પુસ્તક, જે કોઈ



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

प्रच्छन्नं प्रेषयेन्नार्यै पुस्तकं वा तयैषितम् । गृह्णीयात्काकुदं सोऽपि कुर्या० ॥१७॥ यत्किञ्चिद्वस्तु वा नार्यै प्रेषयेद्वैषितं तया । गृह्णीयाद्गूढमेवासौ कुर्या० ॥१८॥ स्त्रीचित्रप्रेक्षणे चासौ स्त्रीचित्रकरणे तथा । स्त्रीवेशधारिपुंस्पर्शे कुर्या० ॥१९॥ या क्रिया यत्र च स्त्रीणां भवेत्स्नानासनादिका । तां तत्र कुर्याद्यश्चासौ कुर्या० ॥२०॥ स्त्रीणां सञ्चरणस्थाने चोत्सर्गं मलमूत्रयोः । यदि कुर्यात्तर्हि पुमान् कुर्या० ॥२१॥ स्त्रीमुखाद्भगवद्वार्तां श्रोतुं तिष्ठेच्च सन्मुखम् । स्त्रीणामुपविशेद्यश्च कुर्या० ॥२२॥ धनुर्मानाभ्यन्तरे च पृथौ मार्गेऽप्यनापदि । यः कुर्याद्गमनं सोऽपि कुर्या० ॥२३॥ सह स्त्रिया चोपविशेदेकस्मिञ्छकटे तथा । स्त्रीचित्रं च स्पृशेद्योऽसौ कुर्या० ॥२४॥ काष्ठादिजायाः स्त्रीमूर्तेः स्पर्शे जातेऽपि च व्रती । स्त्रीगुह्याङ्गेक्षणे चासौ कुर्या० ॥२५॥ पशूनां पक्षिणां वापि मैथुनस्येक्षणे क्वचित् । जाते मनोवशतया कुर्या० ॥२६॥ प्रयोजनेन वा स्वैरं स्त्र्यागच्छेच्चेत्सबन्धने । स्वस्थाने तत्र चैकश्चेत् कुर्या० ॥२७॥ कार्यार्थं सहजं वापि ह्यापदैकः स्त्रिया गृहम् । प्रविश्य प्रतिगच्छेत्स कुर्या० ॥२८॥ स्त्रीसम्बन्धेन मलिने स्वप्ने जाते तथा स्त्रियाः । दर्शनाद्वीर्यपाते च कुर्या० ॥२९॥ उपविष्टं भोजनार्थं यं नारी परिवेषयेत् । शुद्ध्यर्थमात्मनश्चासौ कुर्या० ॥३०॥ अनाच्छादितकौपीनस्त्यागी चेद्वाससा सभाम् । आगच्छेत् स्त्रीयुतां तर्हि कुर्या० ॥३१॥ इत्थं सामान्यतः प्रोक्तं स्त्रीसंसर्ग उपोषणम् । अन्यत्रापीदृशे स्थाने कुर्या० ॥३२॥ एकाकिन्या स्त्रिया साकं स्वस्यैकस्य रहःस्थितौ । स्त्रिया साकं चाध्वगतौ दिनत्रयमुपोषणम् ॥३३॥ करेण

પણ ગ્રંથ સ્ત્રીને મોકલે, અથવા સ્ત્રીએ મોકલેલા કાગળ તે સ્ત્રીને કીર્તનાદિ લખીને આપવા માટે અથવા પોતાના ઉપયોગ માટે આપેલા છાના ગ્રહણ કરે તો નિષ્કામી પુરૂષ એક એક ઉપવાસ કરે. (૧૭) જે કોઈ વસ્તુ સ્ત્રી માટે ગુપ્ત જ મોકલે અથવા સ્ત્રીએ મોકલેલી કોઈ પણ વસ્તુ ગ્રહણ કરે એવો નિષ્કામી પુરુષ એક એક ઉપવાસ કરે. (૧૮) રાધાલક્ષ્મી વગેરે દેવી વિના બીજી સ્ત્રીની પ્રતિમાને મન દઈને જોવાય તથા રાધા-રમાદિ વિના બીજી સ્ત્રીની પ્રતિમા પોતાનાથી નિર્માણ થયે સતે તથા સ્ત્રીવેશધારી પુરુષનાં સ્પર્શ, ભાષણ, દર્શન વગેરેથી વ્રતી પુરુષ એક એક ઉપવાસ કરે. (૧૯) જે સ્થળમાં સ્ત્રીઓની ક્રિયા-સ્નાન, આસન(બેસવુ) વગેરે તથા મળ, મૂત્ર વગેરેની જે ક્રિયા થાય તે સ્થાનમાં નિષ્કામ વ્રતી તે સ્નાનાદિ ક્રિયા કરે તો એક એક ઉપવાસ કરે. (૨૦) નિષ્કામ વ્રતવાળો પુરુષ સ્ત્રીઓના વિચરણ સ્થાનમાં મળમૂત્ર કરે તો એક એક ઉપવાસ કરે. (૨૧) નિષ્કામી પુરુષ સ્ત્રીના મુખથી ભગવાનની વાર્તા સાંભળવા ઊભો રહે અથવા સ્ત્રીઓને સન્મુખ બેસે તો તે એક એક ઉપવાસ કરે. (૨૨) માર્ગ વિશાળ હોવા છતાં, અને કોઈ આપત્કાળ ન હોય તોપણ નિષ્કામી પુરુષ સ્ત્રી થકી ચાર હાથથી સમીપમાં ચાલે તો એક એક ઉપવાસ કરે. (૨૩) નિષ્કામી પુરુષ સ્ત્રીની સાથે એક ગાડામાં બેસે અથવા સ્ત્રીની પ્રતિમાનો સ્પર્શ કરે તો એક એક ઉપવાસ કરે. (૨૪) રાધા, રમા વગેરે દેવીઓ વિના બીજી સ્ત્રીઓની પૂતળીઓનો સ્પર્શ થઈ જાય તેમજ સ્ત્રીના ગુહ્યાંગ-નિતમ્બાદિ અંગ જોવાય તો પણ એક એક ઉપવાસ કરે. (૨૫) કોઈ સમયે ગધેડા, શ્વાન, ભૂંડીયા અથવા પક્ષીઓ ચકલા વગેરેનું પણ મૈથુન બુદ્ધિ પૂર્વક જોવાયેલું હોય તો એક એક ઉપવાસ કરવો. (૨૬) જળાદિક આપવાના પ્રયોજનથી અથવા પોતાની ઈચ્છાથી અથવા અજ્ઞાનથી પણ જો સ્ત્રી, વાડ અથવા કોટથી આવરણવાળા પોતાના નિવાસસ્થાનમાં આવે અને ત્યાં જો પોતે એકલો હોય તો નિષ્કામી પુરૂષ એક ઉપવાસ કરે. (૨૭) કોઈ પ્રયોજન માટે અથવા સ્વાભાવિકપણે અથવા આપત્કાળે કરીને નિષ્કામ વ્રતવાળો પુરૂષ એકલો જ જેમાં એકાકી સ્ત્રી હોય તેવા ગૃહમાં પ્રવેશ કરીને તત્કાળ પાછો નીકળી આવે તો પણ તે નિષ્કામી પુરુષ એક ઉપવાસ કરે. (૨૮) સ્ત્રીનાં દર્શન, સ્પર્શ વગેરે પોતાના વ્રતને દૂષણ પમાડનાર અર્થાત્ વીર્યપાતાદિ સ્વરૂપ સ્વપ્નું થયું હોય તો અથવા રૂપવાળી સ્ત્રીનાં દર્શનથી જાગૃતમાં પણ વીર્યપાત થયો હોય તો નિષ્કામી પુરુષ એક ઉપવાસ કરે. (૨૯) ભોજન કરવા બેઠેલા નિષ્કામી પુરુષને સ્ત્રી પીરસે તો નિષ્કામી પુરુષ પોતાની શુદ્ધિ માટે એક ઉપવાસ કરે (૩૦) નિષ્કામ વ્રતવાળો ત્યાગી પુરુષ પહેરવાના વસ્ત્રથી કૌપીનને ઢાંક્યા વિના સ્ત્રીઓએ યુક્ત સભા પ્રત્યે આવે તો એક ઉપવાસ કરે. (૩૧) આ પ્રમાણે સ્ત્રી સંબંધમાં સાધારણ પણે એક એક ઉપવાસ કહેલો છે. આવા પ્રકારના બીજા સ્થાનમાં પણ એક ઉપવાસ જાણવો. (૩૨) એકલી સ્ત્રીની સાથે એકાકી એવા પોતાની, એકાંત સ્થાનમાં ક્ષણ માત્ર પણ સ્થિતિ થાય તો ત્રણ દિવસ નિષ્કામી પુરુષ ઉપવાસ કરે, વળી એકલી સ્ત્રીની સાથે એકલો પોતે માર્ગે ચાલે તો, ક્ષણ માત્ર ચાલેલો હોય તો પણ ત્રણ દિવસ ઉપવાસ કરે. (૩૩) કામના પરવશપણાથી પોતાના હાથથી વીર્યપાત કરે અથવા બીજાના હાથથી વીર્યપાત કરાવે તો પણ વ્રતધારી

**कामवैवश्याद्वीर्यपाते कृते व्रती । उपोषणं प्रकुर्वीत दिनानां स चतुष्टयम् ॥३४॥ स्त्रीसङ्गे तु कृते साक्षाद्धारणापारणं व्रतम् । वर्षमेकं प्रकुर्वीत सक्तून्निर्लवणान् पिबन् ॥३५॥ एतत्कर्तुमशक्तस्तु धर्मशास्त्र उदीरितम्। विध्यन्तरं विदित्वा तत्कुर्याच्छक्त्यनुसारतः ॥३६॥ शुद्ध्यर्थेषूपवासेषु नीरमात्रं पिबेद्व्रती । न त्वन्यद्भक्षयेत्किञ्चिद्बालो रुग्णो जरन्नपि ॥३७॥ एतेऽवश्यं तूपवासा निष्कामव्रतचारिभिः । कार्या इति ममैवाज्ञा भवतीत्यवगम्यताम् ॥३८॥ व्रतक्षतौ करिष्यन्ति नोपवासांस्तथा च ये । निषेधिष्यन्ति तत्कर्तॄंस्ते भविष्यन्ति कामिनः ॥३९॥ दयया ये निषेधेयुर्बालादीनुपवत्स्यतः। स्वयं त एवोपवासान् विदध्युस्तद्विशुद्धये ॥४०॥ ये मया विहितामेतां मर्यादामात्मशुद्धये । पालयेयुस्तु ते बोध्या औद्धवीया नहीतरे ॥४१॥** सुव्रत उवाच - **श्रुत्वेति वाक्यं स हरेर्महर्षिः प्रीतस्तथान्येऽपि गृहीतराश्च । तथा विधातुं विदधुः प्रतिज्ञां प्रणम्य तं भक्तहितप्रसक्तम् ॥४२॥ इति परमपवित्रामत्र निष्कामशुद्धिं प्रतिदिनमनुरागाद्ये पठेयुः प्रभाते । त्रिभुवनजयदर्पं ते सुखेनैव कामं सकलगुणकलङ्कं नूनमुन्मूलयेयुः ॥४३॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे प्रबोधन्युत्सवे श्रीनारायणब्रह्मानन्दसंवादे निष्कामशुद्धिनिरूपणनामा सप्तविंशोऽध्यायः ॥२७॥

---

પુરુષ ચાર દિવસ સુધી ઉપવાસ કરે. (૩૪) પ્રત્યક્ષ સ્ત્રીનો સંગ કર્યે સતે બ્રહ્મચર્ય વ્રતનો ભંગ થયો હોય તો એક વર્ષ પર્યંત મીઠા રહિત સાથવો, (એકાંતરા ઉપવાસના બીજા દિવસે એકવાર) પાણીમાં ઘોળીને ખાતો થકો ધારણા પારણા વ્રત કરે. (૩૫) આવું ધારણા પારણા વ્રત વર્ષ દિવસ કરવામાં અશક્ત હોય તો વ્રતધારી ધર્મશાસ્ત્રમાં કહેલો બીજો વિધિ (ચોથા પ્રકરણમાં કહ્યો છે તે) જાણીને શક્તિ પ્રમાણે કરે. (૩૬) આઠ વર્ષથી આરંભીને સોળ વર્ષ સુધીનો બાળક, રોગી, અને એંશી વર્ષની અવધિવાળો વૃદ્ધ હોય એવો પણ વ્રતધારી પોતાની શુદ્ધિના ઉપવાસોમાં કેવળ જળ માત્ર જ પીએ તેનાથી ભિન્ન કંઈ પણ વસ્તુ ન જમે. (૩૭) નિષ્કામ વ્રતધારી પુરુષોએ પૂર્વે કહેલા ઉપવાસો તો અવશ્ય કરવા : આ મારી આજ્ઞા છે જ એમ તમો જાણો. (૩૮) જે નિષ્કામ વ્રતધારીઓ પોતાના વ્રતનો ભંગ થયે સતે મેં કહેલાં વ્રતશુદ્ધિનાં ઉપવાસો કરશે નહિ અને શુદ્ધિ નિમિત્તના ઉપવાસ કરનાર ત્યાગી જનોને નિષેધ કરશે તો તે બન્ને કામથી વ્યાકુળ થઈને ત્યાગીના માર્ગથી ભ્રષ્ટ થશે. (૩૯) જે દયાળુ ત્યાગી પુરુષો શુદ્ધિ નિમિત્તે ઉપવાસ કરતાં બાળક, રોગી અને વૃદ્ધ; આ ત્રણને દયાથી 'ઉપવાસ ના કરો' એમ નિષેધ કરે તો, તેઓ બાળક વગેરે ત્રણની શુદ્ધિ માટે પોતે ઉપવાસ કરે. (૪૦) જે ત્યાગીઓ મેં બાંધેલી-(વિધાન કરેલી)આ મર્યાદાને આત્મશુદ્ધિ માટે પાલન કરે તેમને જ અમારા અનુગ્રહને પાત્ર, ઉધ્ધવ સંપ્રદાયના ત્યાગીઓ જાણવા; બીજા મર્યાદાને પાલન નહિ કરનારા ઉદ્ધવ સંપ્રદાયના નથી. (૪૧)

**સુવ્રતમુનિ કહે છે** : હે રાજન્ ! આ પ્રકારે શ્રી નારાયણ મુનિનું વચન સાંભળી પ્રસન્ન થયેલા મુનિશ્રેષ્ઠ બ્રહ્માનંદ મુનિ તથા બીજા પણ ત્યાગીઓ(મુનિઓ, વર્ણીઓ અને પાર્ષદો પણ) પ્રસન્ન થઈને ભક્તોનું હિત કરવામાં તત્પર શ્રીહરિને પ્રણામ કરીને જેમ શ્રીહરિએ કહ્યું તે પ્રમાણે આચરણ કરવા માટે પ્રતિજ્ઞા કરતા હતા. (૪૨) આ પ્રકારે પરમ પવિત્ર, આ નિષ્કામ શુદ્ધિનો આ ઉદ્ધવ સંપ્રદાયમાં જે ત્યાગીજનો દરરોજ પ્રાતઃકાળમાં પ્રીતિથી પાઠ કરે (તેમજ તેમાં કહ્યા પ્રમાણે વર્તે) તે ત્યાગીજનો, ત્રણ ભુવનમાં રહેલાં બ્રહ્માદિ સમગ્ર જનોને જીતવાથી ગર્વયુકત અને બુદ્ધિમત્તા, જ્ઞાનીપણું, વગેરે સમગ્ર ગુણોને કલંક પમાડનાર, કામદેવને પ્રયાસ વિના સહેજે જ નિશ્ચે મૂળમાંથી ઉખેડી નાખે છે. [જે શ્રીહરિ પોતાના આશ્રિત સાધુઓ, વર્ણીઓ અને પાર્ષદોને કામ નામના શત્રુથી રક્ષણ કરવા માટે નિષ્કામ શુદ્ધિને કહેતા હતા તે શ્રીહરિનો હું આશ્રય કરું છું.] (૪૩)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીયપ્રકરણે પ્રબોધિન્યુત્સવે શ્રીનારાયણબ્રહ્માનંદસંવાદે નિષ્કામશુદ્ધિનિરૂપણ નામા સપ્તવિંશોઽધ્યાયઃ (૨૭)*

सुव्रत उवाच – सप्तम्यामथ संसत्स्थं नारायणमुनिं निशि । गोपालानन्द ऋषिराट् पप्रच्छ प्राञ्जलिर्नृप ! ॥१॥ साधूनामिह सर्वेषां त्यागिनां त्वामुपेयुषाम् । बुभुत्साम्याह्निकविधिमनुष्ठेयं महाप्रभो ! ॥२॥ श्रीनारायणमुनिरुवाच – सङ्क्षेपतो मुने ! वच्मि त्यागिनामाह्निकं विधिम् । अनुष्ठेयमवश्यं हि शृणु त्वं मदुपाश्रितैः ॥३॥ रजन्या अन्तिमे यामे मुहूर्ते ब्राह्मसंज्ञके । उत्थायाऽऽशु स्वेष्टदेवं त्यागी भक्तो विचिन्तयेत् ॥४॥ नामसङ्कीर्तनं कुर्याच्छ्रीकृष्णस्य ततो मुनिः । प्रणम्य वैष्णवान् गच्छेत्सोदपात्रः पुराद्बहिः ॥५॥ मलोत्सर्गविधिं कृत्वा विजनेऽथ जलाशयम् । उपेत्य करपादिशुद्धिं कुर्यान्मृदम्बुभिः ॥६॥ न तिष्ठन्नाप्सु नो विप्रगोवह्न्यर्केन्दुसन्मुखः । न फालकृष्टभूभागे न मार्गे न नदीतटे ॥७॥ गवां मध्ये धान्यमध्ये जीर्णदेवालये क्वचित् । विण्मूत्रे ष्ठीवनं नैव कुर्यात्स्त्रीसन्मुखस्तथा ॥८॥ सजन्तुर्मृत्तिका नैव ग्राह्या शौचविधौ क्वचित् । अशुचिस्थानगा चैव शौचशिष्टा च नाकुजा॥९॥

एका लिङ्गे गुदे तिस्रो दश वामकरे मृदः । दोष्णोर्द्वयोः सप्त देयास्तिस्रस्तिस्रश्च पादयोः ॥१०॥ यथालब्धेन काष्ठेन दन्तधावनमाचरेत् । नतु त्यागी स्वयं छिन्द्यादार्द्रकाष्ठं द्रुमात्क्वचित् ॥११॥ व्रतोपवासदिवसे न कार्यं दन्तधावनम् ।

---

## અધ્યાય : ૨૮

## શ્રીહરિએ ત્યાગીઓને પ્રતિદિન કરવા યોગ્ય આહ્નિક વિધિ ગોપાળાનંદ મુનિને સંક્ષેપથી કહ્યો છે.

**સુવ્રત મુનિ બોલ્યા :** પછી કારતક સુદી સાતમને દિવસે સંધ્યા આરતી થયા પછી સભા મધ્યે ઊંચા સિંહાસન પર બેઠેલા શ્રીહરિને ઋષિરાજ ગોપાળાનંદ મુનિ બંને હાથ જોડી પૂછવા લાગ્યા : (૧) હે મહાપ્રભો ! આ ઉધ્ધવ સંપ્રદાયમાં તમારા શરણને પામેલા ત્યાગી સર્વે સાધુઓને (અમારે) દરરોજ કરવા યોગ્ય આહ્નિકવિધિ પ્રાતઃકાળથી આરંભીને સમગ્ર દિવસમાં કરવા યોગ્ય ક્રિયાનો વિધિ જાણવા ઈચ્છું છું. (૨)

**શ્રી નારાયણ મુનિ બોલ્યા :** હે મુને ! અવશ્ય કરવા યોગ્ય સાધુઓનો આહ્નિક વિધિ સંક્ષેપમાં હું કહું છું. તમો મારા આશ્રિત સમગ્ર સાધુઓની સાથે સાંભળો. (૩) ત્યાગી ભક્ત રાત્રિના છેલ્લા પહોરમાં અર્થાત્ બ્રાહ્મમુહૂર્તમાં તત્કાલ નિદ્રાના ત્યાગપૂર્વક પોતાના આસનમાંથી ઊઠીને પોતાના ઈષ્ટદેવ પ્રત્યક્ષ શ્રીહરિકૃષ્ણ ભગવાનનું ચિન્તન કરે. (૪) પછી મુનિ પ્રત્યક્ષ ભગવાનનાં નામોનું ઉચ્ચારણ કરે. (રામ, કૃષ્ણ,ગોવિન્દ, નારાયણ, નીલકંઠ વગેરે નામનો ધ્વનિ કરવો;) સાક્ષાત્ ભગવાનના ભક્તોને મસ્તકથી નમસ્કાર કરી તુંબડું વગેરે જળપાત્ર હાથમાં લઈને નગરથી બહાર પ્રદેશમાં મળનો ત્યાગ કરવા જાય; બે જણ જાય અથવા ઘણા મુનિઓ જાય. (એક જણને જવાનો નિષેધ હોવાથી) (૫) પછી મુનિ સ્ત્રી આદિના સંસર્ગે રહિત એકાંત સ્થાનમાં મળનો ત્યાગ કરી જળાશય પ્રત્યે જઈને મૃત્તિકા અને જળથી હાથ-પગ વગેરેની શુદ્ધિ કરે. (૬) ઊભા રહીને વિષ્ટા અને મૂત્રનો ત્યાગ કરવો નહીં. જળમાં મળ-મૂત્ર ત્યાગ કરવા નહિ અને થૂંકવું પણ નહીં; બ્રાહ્મણ, ગાય, અગ્નિ, સૂર્ય, ચંદ્ર તેમની સન્મુખ તથા હળથી ખેડેલી જમીન તથા માર્ગમાં અને નદી કિનારે મળમૂત્ર ત્યાગ કરવા નહિ તથા થૂંકવું નહીં. (૭) ગાયોના સમુદાયમાં, ધાન્યના મધ્યમાં-ધાન્યયુક્ત ક્ષેત્રમાં, ધાન્યયુક્ત ખળામાં અને ધાન્યના સમુદાયમાં, તથા જીર્ણ દેવાલયમાં ક્યારેય મળમૂત્ર કરવા નહિ તથા થૂંકવું પણ નહીં; એજ પ્રકારે નારીની સન્મુખ વિષ્ટા તથા મૂત્ર તથા થૂંકવું નહીં આ તો સર્વ વર્ણાશ્રમીઓને સાધારણ કહ્યું છે. આનો વિશેષ વિસ્તાર મનુસ્મૃતિમાં સમાવિષ્ટ છે. (૮) શૌચવિધિમાં સૂક્ષ્મ જંતુ સહિત અશુદ્ધ સ્થાનમાં રહેલી, શુદ્ધિ કરતા બાકી રહેલી અને કીડાઓએ બનાવેલા રાફડાની મૃત્તિકા ક્યારેય પણ ગ્રહણ કરવી નહીં. (૯)

એક વાર મૃત્તિકા ગ્રહણ કરીને લિંગ પ્રક્ષાલન કરવું; ત્રણ વાર મૃત્તિકા ગ્રહણ કરીને ગુદાનું પ્રક્ષાલન કરવું. આ બે તો ગુદાના પ્રક્ષાલન સમયે જ કરવું એમ જાણવું. ડાબો હાથ દશ વખત મૃત્તિકા લઈને ધોવો અને બંને હાથ સાત વખત મૃત્તિકા લઈને, અને પગનું ત્રણ ત્રણ વખત મૃત્તિકા લઈને પ્રક્ષાલન કરવું. (૧૦) ત્યાગીએ પ્રાપ્ત થયેલા દાતણથી દંત શુદ્ધિ કરવી. ક્યારેય પણ વૃક્ષથી લીલું કાષ્ઠ પોતે કાપે નહીં. (૧૧) એકાદશી-જન્માષ્ટમી વગેરે વ્રતોના ઉપવાસો અને



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

काष्ठेनापां तु गण्डूषैस्तदा द्वादशभिर्मतम् ॥१२॥ नद्यां तडागे कूपे वा ततः स्नानं समाचरेत् । उष्णोदकेनापदि तु मानसं वा तदाचरेत् ॥१३॥ ध्यात्वा हरिं स्वहृदये तन्नामोच्चारपूर्वकम् । मनसा कल्पितैस्तोयैर्यत्स्नानं तत्तु मानसम् ॥१४॥ स्नानकाले स्मेरद्गङ्गां विष्णुपादोदकीं शिवाम् । भगीरथतपःसिद्धिं महापातकनाशनीम् ॥१५॥ वसीत धौतं कौपीनं बहिर्वासश्च तादृशम् । धौतवस्त्रान्तराभावे त्वार्द्रवासाश्चरेद्विधिम् ॥१६॥ उदङ्मुखः प्राङ्मुखो वा निषीदेदासने शुचौ । एकोपवेशनार्हे च कौशाद्यन्यतमे मुनिः ॥१७॥ नारायणं वासुदेवं विष्णुं चेति क्रमात्स्मरन् । कुर्यादाचमनं त्यागी गालितेन त्रिरम्भसा ॥१८॥ नारायणार्चावशिष्टचन्दनेन सचन्द्रकम् । ऊर्ध्वपुण्ड्रं प्रकुर्वीत स गोपीचन्दनेन वा ॥१९॥ ललाटे हृदये नित्यं कार्यं पुण्ड्रं च दोर्द्वये । श्रीराधार्चाशिष्टवरचन्द्रको वा तदन्तरे ॥२०। वासुदेवं स्मरेद्भाले हृदि सङ्कर्षणं तथा । प्रद्युम्नमनिरुद्धं च दक्षे वामे च दोषणि ॥२१॥ आचम्याथ यथापूर्वं नामभिर्वैष्णवैस्त्रिभिः । साधुस्त्रैवर्णिको भक्त्या गायत्रीं वैष्णवीं जपेत् ॥२२॥ अस्य श्रीविष्णुगायत्रीमन्त्रस्यर्षिस्तु नारदः । गायत्रीछन्द उदितं श्रीविष्णुर्देवता तथा ॥२३॥
ज्ञानं बीजं मतं ध्यानं शक्तिराज्ञा च कीलकम् । श्रीविष्णुदेवप्रीत्यर्थे विनियोगो जपे मतः ॥२४॥ शीर्षास्यवक्षोनाभ्यङ्घ्रिसर्वाङ्गेषु क्रमान्न्यसन् । नारदर्षिमुखान् कुर्यात् न्यासानृष्यादिकांस्ततः ॥२५॥ विभक्त्यन्तैर्मन्त्रपदैः

પ્રાયશ્ચિત્તોના ઉપવાસોને દિવસે કાષ્ઠથી દાતણ કરવું નહીં તે દિવસે તો જળના બાર કોગળાથી શાસ્ત્રકારોએ દંતધાવન માનેલું છે. (૧૨) ત્યાર બાદ નદી, સરોવર, કૂવામાં સ્નાન કરવું, કૂવામાં તો જળ કાઢીને સ્નાન કરવું, નદીમાં પ્રવાહની સન્મુખ સ્નાન કરવું. તળાવ વગેરેમાં સૂર્ય સન્મુખ સ્નાન કરવું. રોગાદિ આપત્કાળમાં તો ઊના જળથી સ્નાન કરવું અથવા માનસિક સ્નાન કરવું. (૧૩) શ્રીહરિનું પોતાના હૃદયમાં ધ્યાન કરી પરમાત્માના નામોચ્ચારણ પૂર્વક મનથી કલ્પેલા જળથી સ્નાન તે માનસ સ્નાન કહેલું છે. (૧૪) શ્રી વિષ્ણુ ભગવાનના ચરણકમળથી પ્રાદુર્ભાવ પામેલી, મંગલરૂપિણી, ભગીરથના તપની સિદ્ધિરૂપ મહાપાતકોને નાશ કરનારી ગંગાનું; સ્નાન સમયે દરરોજ સ્મરણ કરે. (૧૫) ધોઈને સૂકવેલી કૌપીન અને ધોયેલું પહેરવાનું ધોતિયું ધારણ કરે, ધોયેલું બીજું વસ્ત્ર ન હોય તો ભીનું વસ્ત્ર પહેરીને નિત્ય વિધિ કરે. સાધુ પવિત્ર સ્થાનમાં પોતે એકને બેસવા યોગ્ય દર્ભ, કામળી અથવા વસ્ત્રના એક આસનમાં પૂર્વ મુખે અથવા ઉત્તર મુખે બેસે. (૧૬-૧૭) ત્યાગી નારાયણ, વાસુદેવ અને શ્રી વિષ્ણુને અનુક્રમે સંભારતો સંભારતો વસ્ત્રથી ગાળેલા જળથી ત્રણ વાર આચમન કરે. ૐ નારાયણાય નમઃ એમ કહીને પ્રથમ આચમન, ૐ વાસુદેવાય નમઃ એમ કહીને દ્વિતીયાચમન, અને ૐ વિષ્ણવે નમઃ એમ કહીને તૃતીયાચમન કરે પછી શિખાબંધન કરે. (૧૮) ત્યાગી, નારાયણની પૂજા કરતાં બાકી રહેલા ચંદનથી અથવા ગોપીચંદનથી અથવા ગોપી તળાવડીની મૃત્તિકાથી ચંદ્રની સમાન ગોળ બિન્દુએ સહિત તિલક કરે. (૧૯) લલાટ, હૃદય અને બન્ને બાહુના મૂળમાં ઊર્ધ્વપુંડ્ર તિલક કરવું તેના મધ્યમાં પુંડ્રના દ્રવ્યથી ચાંદલો કરે અથવા લક્ષ્મી અને રાધિકાના પ્રસાદીભૂત કુંકુમથી ચાંદલો કરે. (૨૦) ભાલમાં વાસુદેવને સંભારે, હૃદયમાં સંકર્ષણને સંભારે, જમણા બાહુના મૂળમાં પ્રદ્યુમ્નને સંભારે અને ડાબા બાહુના મૂળમાં અનિરુદ્ધને સંભારે. (૨૧) પછી બ્રાહ્મણ ક્ષત્રિય-વૈશ્ય જ્ઞાતિથી થયેલો ત્યાગી સાધુ વિષ્ણુ-સંબંધી નારાયણ, વાસુદેવ અને વિષ્ણુ આ ત્રણ નામોથી અનુક્રમે પૂર્વની માફક આચમન કરી પ્રેમથી વિષ્ણુ ગાયત્રી, **"ૐ નારાયણાય વિદ્મહે વાસુદેવાય ધીમહિ તન્નો વિષ્ણુ : પ્રચોદયાત્"** આ ગાયત્રી મંત્રનો જપ કરે. (૨૨)

ગાયત્રી મંત્રનો વિધિ કહે છે : આ વિષ્ણુગાયત્રી મંત્રનાં નારદ ઋષિ છે, ગાયત્રી નામનો છંદ છે. તથા શ્રી વિષ્ણુ દેવતા છે. (૨૩) જ્ઞાન બીજ છે, ધ્યાન શક્તિ છે, આજ્ઞા કીલક છે. શ્રી વિષ્ણુ દેવતાની પ્રીતિ માટે જપમાં વિનિયોગ (ઉપયોગ) માનેલો છે. (૨૪) પછી મસ્તક, મુખ, હૃદય, નાભિ બન્ને ચરણ અને સર્વાંગમાં અનુક્રમે ન્યાસ કરે જેમ કે 'નારદ ઋષયે નમઃ શિરસિ' એમ ઉચ્ચારણ કરીને મસ્તકને હાથથી સ્પર્શ કરવો એવી રીતે સર્વ અગંમાં તે તે મંત્ર બોલીને સ્પર્શ કરવો. ૐ ગાયત્રી છંદસે નમઃ મુખે, શ્રી વિષ્ણુ પરમાત્મ દેવતાયે નમઃ હૃદયે, 'ૐ જ્ઞાનબીજાય નમઃ નાભૌ' 'ૐ ધ્યાન શક્તયે નમઃ પાદયોઃ' 'ૐ આજ્ઞા કીલકાય નમઃ સર્વાંગે.' (૨૫) હવે કરન્યાસો કરે. મંત્રના, પદો (શબ્દો)માં, 'તન્નો વિષ્ણુઃ' આ

करन्यासान् समाचरेत् । तत्र तन्नो विष्णुरिति ज्ञेयमेकं पदं मुने ! ॥२६॥ हृदयादीनेवमेव न्यासान् कुर्यात्ततः स च । लक्ष्मीरूपां हृदि ध्यायेद्गायत्रीं वैष्णवीं मुनिः ॥२७॥ श्रीविष्णुवामपार्श्वस्थां सर्वकालमनुव्रताम् । कोटिशारदपूर्णेन्दुप्रभैकैकाङ्गसुन्दराम् ॥२८॥ कौसुम्भवसनां गौरीं नानालङ्कारशोभनाम् । शान्तां सहासवदनां महापुरुषलक्षणाम्॥२९॥ कमलं दक्षिणे पाणौ वामेऽमृतघटं करे । दधतीं देवदेवीभिर्वन्दितां पूजितां मुहुः ॥३०॥ मुक्तिमेकान्तिकीं तूर्णं भक्तेभ्यो ददतीं श्रियम् । ध्यायामि हृदये नित्यं गायत्रीं वैष्णवीमहम् ॥३१॥ इति ध्यात्वा यथाशक्ति तत्त्ववर्णां जपेत्स ताम् । निवेदयेद्भगवते यथासङ्ख्यं जपं ततः ॥३२॥ सहस्त्रपरमां देवीं शतमध्यां दशावराम् । गायत्रीं तां जपेन्नित्यं स्वावकाशानुसारतः ॥३३॥ स्वेष्टदेवं ततो भक्तः श्रीकृष्णं स प्रबोधयेत् । मन्त्रेणानेन सप्रेम कुर्वाणस्तालिकाध्वनिम् ॥३४॥ उत्तिष्ठोत्तिष्ठ गोविन्द ! उत्तिष्ठ गरुडध्वज ! । उत्तिष्ठ कमलाकान्त ! त्रैलोक्ये मङ्गलं कुरु॥३५॥ तां च मूर्तिं भगवत उपावेश्य शुभासने । प्रमार्ज्य वस्त्रखण्डेन ध्यायेच्छ्रीकृष्णमन्तरे ॥३६॥ विधाय मानसीं पूजां सद्गुरूक्तक्रमेण च । प्रतिमायामिष्टदेवं तं भक्त्यावाहयेन्मुनिः ॥३७॥

शैली दारुमयी लौही लेप्या लेख्या च सैकती । मनोमयी मणिमयी प्रतिमाऽष्टविधा स्मृता ॥३८॥ उदङ्मुखः प्राङ्मुखो वा प्रतिमासन्मुखोऽथवा । यथाविध्यर्चयेद्भक्त्या यथालब्धोपचारकैः ॥३९॥ अभाषमाणश्चान्येन भगवन्तं समर्चयेत् ।

---

બે શબ્દોનું એક પદ જાણવું; જેમકે 'ૐ નારાયણાયેતિ અંગુષ્ઠાભ્યામ્ નમઃ' 'ૐ વિદ્મહે ઈતિ તર્જનીભ્યામ્ નમઃ' 'ૐ વાસુદેવાય ઈતિ મધ્યમાભ્યામ્ નમઃ' 'ૐ ધીમહિ ઈતિ અનામિકાભ્યામ્ નમઃ' 'ૐ તન્નો વિષ્ણુઃ ઈતિ કનિષ્ઠિકાભ્યામ્ નમઃ' 'ૐ પ્રચોદયાત્ ઈતિ કરતલકરપૃષ્ઠાભ્યામ્ નમઃ' આ રીતે વિષ્ણુ ગાયત્રીનાં નારાયણાય ઈત્યાદિ પદો વડે કરન્યાસ કરવો. (૨૬) હવે હૃદયાદિ છ અંગનો ન્યાસ કહે છે : મુનિ આ પ્રકારે વિભક્તિના અંતવાળા મંત્રપદોથી હૃદયાદિનો ન્યાસ કરે જેમ કે 'ૐ નારાયણાય ઈતિ હૃદયાય નમઃ ૐ વિદ્મહે ઈતિ શિરસે નમઃ' 'ૐ વાસુદેવાય ઈતિ શિખાયૈ નમઃ' 'ૐ ધીમહિ ઈતિ કવચાય નમઃ ' 'ૐ તન્નો વિષ્ણુઃ ઈતિ નેત્રાભ્યામ્ નમઃ' 'ૐ પ્રચોદયાત્ ઈતિ અસ્ત્રાય નમઃ' ( આ રીતે છ મંત્ર પદો હૃદયાદિન્યાસે કરવા) પછી લક્ષ્મીરૂપ વૈષ્ણવી ગાયત્રીને હૃદયમાં ધ્યાન કરે. (૨૭) શ્રી વિષ્ણુના ડાબા પડખામાં સદા રહેલા વિષ્ણુની ઈચ્છા પ્રમાણે વર્તનારા, કરોડ સંખ્યાવાળા શરદઋતુના જે પૂર્ણ ચંદ્રની માફક કાંતિ જેમને છે એવા એક એક અંગથી સુંદર; (૨૮) કૌસુંભી વસ્ત્રોને ધારણ કરનારા, ગૌર વર્ણવાળા, નાના પ્રકારના અલંકારોથી શોભાયમાન, શાંતાકારવાળા, મંદ હાસ્ય યુક્ત મુખકમળવાળા, મહાપુરુષના સત્ય, શૌચાદિ ગુણોવાળા; (૨૯) જમણા હાથમાં કમળ અને ડાબા હાથમાં અમૃતનો કુંભ ધારણ કરતા, દેવ અને દેવીઓએ વારંવાર નમસ્કાર કરાયેલા અને કુંકુમ આદિથી પૂજાયેલા; (૩૦) પોતાના ઉપાસકને એકાંતિકી મુક્તિને તત્કાલ આપતી લક્ષ્મીરૂપી વૈષ્ણવી ગાયત્રીનું હું હૃદયમાં નિત્ય ધ્યાન કરું છું. (૩૧) આ પ્રકારે ત્યાગી ભક્ત ધ્યાન કરી ચોવીસ અક્ષરવાળી વિષ્ણુ ગાયત્રીનો યથાશક્તિ જપ કરે; ત્યારબાદ જેટલી સંખ્યા હોય તેટલા જપ ભગવાનને નિવેદન કરે : યથાશકિત કરેલા વિષ્ણુ ગાયત્રીના જપથી ભગવાન શ્રી લક્ષ્મીનારાયણ પ્રસન્ન થાઓ. (આ પ્રમાણે ભાવના કરે.) (૩૨) હજાર સંખ્યાવાળો જપ ઉત્તમ છે. સો સંખ્યાવાળો જપ મધ્યમ છે અને દશ સંખ્યાવાળો જપ કનિષ્ઠ માનેલો છે. લક્ષ્મીરૂપ વૈષ્ણવી ગાયત્રી પોતાના અવકાશને અનુસરીને નિત્ય જપે. (૩૩) પછી તે ભક્ત સાધુએ પ્રેમે સહિત તાલી વગાડીને આગળ કહેવાશે એવા મંત્રથી પોતાના ઈષ્ટદેવ શ્રી વાસુદેવને જગાડવા. (૩૪) જગાડવાનો મંત્ર : હે ગોવિંદ! ઊઠો, ઊઠો, હે ગરુડધ્વજ ! હે કમલાકાન્ત ! ત્રિભુવનમાં મંગલ કરો. (૩૫) શ્રીકૃષ્ણની મૂર્તિને શુભ સિંહાસનમાં બેસાડીને શુભ વસ્ત્રના ખંડથી (રૂમાલથી) રજ કાઢી નાખી પોતાના ચિત્તમાં શ્રીકૃષ્ણનું ધ્યાન કરે. (૩૬) સાધુ પોતાના ગુરુએ બતાવેલા અનુક્રમથી મનના સંકલ્પના ઉપચારોથી શ્રીકૃષ્ણની પૂજા કરી ઈષ્ટદેવ શ્રીકૃષ્ણને ભક્તિથી પોતાની આગળ ભગવાનની મૂર્તિમાં આવાહન મંત્રથી આવાહન કરે. (૩૭)

પાષાણની નિર્માણ કરેલી, કાષ્ટમયી, અનિષિદ્ધ ધાતુથી કરેલી, ચંદનાદિમયી, ચિત્રમયી, રેતીની, મનોમયી, મણિયમી, આ આઠ પ્રકારની પ્રતિમા કહેલી છે. (૩૮) ઉત્તર મુખે અથવા પૂર્વ મુખે અથવા પ્રતિમા સન્મુખ બેસીને સાધુએ જે સમયે જેવા પ્રાપ્ત થયા હોય તેવા પુષ્પાદિ ઉપચારોથી, ભક્તિથી શાસ્ત્રોક્તવિધિ પ્રમાણે પૂજન કરવું. (૩૯) બીજાની

उपचारैः षोडशभिस्तदभावे तु मन्त्रतः ॥४०॥ मन्त्रैः पौराणिकैरेव नाममन्त्रेण वार्चनम् । साधुः सप्रेम कुर्वीत श्रीविष्णोः प्रतिवासरम् ॥४१॥ प्रमादानादरौ त्यक्त्वा स्वस्थः पूजनमाचरेत् । ततो जपेत कृष्णमन्त्रं नियतं शक्तितः सदा ॥४२॥ तुलसीकाष्ठजा श्रेष्ठा पद्मबीजोद्भवाऽथवा । श्रीखण्डकाष्ठजा वापि जपमाला शुभावहा ॥४३॥ और्णं तार्णं च पार्णं वा वास्त्रं वाऽऽजिनमासनम् । मुनीनामुचितं प्रोक्तं भूमौ मन्त्रजपो वृथा ॥४४॥ ऋजुरेकाग्रदृष्टिश्च स्वस्तिकासनमास्थितः । वस्त्राच्छादितमालश्च जपेन्मौनव्रतः स्थिरः ॥४५॥ स्तोत्रपाठं यथाशक्ति श्रीविष्णोर्विदधीत सः । नामसङ्कीर्तनं कुर्यादापत्काले तु केवलम् ॥४६॥ ततः संस्थाप्य भगवत्प्रतिमामुचितस्थले । गुरुं प्रणम्य भिक्षायै स गच्छेद्गृहिणः शुचीन् ॥४७॥ अपक्वान्नं तु याचित्वा शुचिर्भूत्वा समाहितः । गायत्रीं कृष्णमन्त्रं च यथाशक्ति जपेत्पुनः ॥४८॥ आपत्काले तु कुर्वीत प्रातर्माध्याह्निकं जपम् । प्रातर्भवं च मध्याह्ने कुर्यादेवं द्वयं द्वयम् ॥४९॥ नैवेद्यार्थं ततः पाकं विष्णोः कुर्याच्छुचिस्थले। महानैवेद्यमीशाय समर्प्य स्वापयेच्च तम् ॥५०॥ प्रासादिकं हरेरन्नं सम्प्रोक्ष्यैवाथ भक्षयेत् । एकाहारं च कुर्वीत प्रत्यहं स विनापदम् ॥५१॥ त्यागी न भक्षयेदन्नं विष्णवे ह्यनिवेदितम् । आपदि प्रतिमाभावे मनसा तन्निवेदयेत् ॥५२॥ यदि भोजनवेलायां कश्चिद्याचेत भिक्षुकः । तर्हि दद्यादात्मबुद्ध्या तस्मा अन्नमविक्लवः ॥५३॥

एकादशीषु सर्वासु हरेर्जन्मोत्सवेषु च । प्रायश्चित्तोपवासेषु नाद्यादन्नं च सन्नरः ॥५४॥ पठनं पाठनं कार्यं सच्छास्त्रस्यानुवासरम् । न दिवा शयनं कार्यं त्यागिना तु विनापदम् ॥५५॥ श्रवणं कीर्तनं विष्णोर्ध्यानं वन्दनमर्चनम् । विना कालो वृथा नैव

સાથે નહીં બોલતો સતો સાધુ આવાહનાદિ ષોડશોપચારથી ભગવાનનું પૂજન કરે. પુષ્પાદિ ઉપચારના અભાવમાં તો તે તે મંત્રોચ્ચારણથી પૂજન કરે. આવાહ્ન, આસન, પાદ્ય, અર્ઘ્ય, આચમન, સ્નાન, વસ્ત્ર, ઉપવીત, ચંદન, પુષ્પ, ધૂપ, દીપ, નૈવેદ્ય, તામ્બુલ, પ્રદક્ષિણા, વિસર્જન આ ષોડશોપચાર છે. (૪૦) સાધુ, પુરાણમાં કહેલા અથવા નામ મંત્રથી દરરોજ પ્રીતિ સહિત શ્રી વિષ્ણુનું પૂજન કરે. (૪૧) પ્રમાદ અને અનાદરનો ત્યાગ કરી એકાગ્ર મનવાળો થઈને પૂજન કરે પછી નિરંતર શક્તિ પ્રમાણે નિયમપૂર્વક જેટલી સંખ્યાનો નિયમ રાખ્યો હોય એ પ્રમાણે અષ્ટાક્ષર મંત્રનો જપ કરે. (૪૨) તુલસીના કાષ્ઠની જપમાળા શ્રેષ્ઠ છે અથવા કમળના બીજની માળા શ્રેષ્ઠ છે અથવા ચંદનના કાષ્ઠની માળા મંગળ આપનારી છે. (૪૩) ઊનનું અથવા તૃણની સાદડી અથવા પાંદડાથી નિર્માણ કરેલું અથવા વસ્ત્રથી કરેલું અથવા મૃગચર્મ, વ્યાઘ્રચર્મ વગેરેનું આસન ત્યાગીજનોને જપાદિ કર્મમાં યોગ્ય કહેલું છે, પૃથ્વી પર કરેલો મંત્રજપ વૃથા કહેલો છે. (૪૪) સરલ શરીરવાળો, એકાગ્ર દૃષ્ટિથી, સ્વસ્તિકાસનમાં રહેલો, ઓઢવાના વસ્ત્રથી આચ્છાદિત છે જપમાળા જેણે એવો; મૌન વ્રતવાળો, શાંત મનવાળો થઈ જપ કરે. (૪૫) ત્યાર બાદ તે સાધુ શ્રી વિષ્ણુના સ્તોત્રનો પાઠ પોતાની શક્તિ પ્રમાણે અવકાશને અનુસરીને કરે. આપત્કાળે તો કેવળ નામોચ્ચારણ કરે. (૪૬) પછી સાધુ ભગવાનની પ્રતિમાને યોગ્ય સ્થાનમાં પધરાવીને ગુરુને પ્રણામ કરી ભિક્ષા માટે સદાચારનિષ્ઠ ગૃહસ્થ જનના ગૃહ પ્રત્યે જઈને ભિક્ષાની યાચના કરે. (૪૭) ત્યાર બાદ લોટ, ચોખા વગેરે કાચું અન્ન માગીને પવિત્ર થઈને એકાગ્રમનવાળો થઈ ફરીથી પૂર્વે કહેલી ગાયત્રી અને કૃષ્ણમંત્રનો શક્તિ પ્રમાણે જપ કરે. (૪૮) આ રીતે બે કાળમાં કરવાના કહેલા ગાયત્રી જપ અને કૃષ્ણમંત્રજપને કદાચિત્ જ્વર આદિ આપત્તિકાળ પ્રાપ્ત થાય તો એક કાળમાં કરી લે. મધ્યાહ્ને જે કર્તવ્ય છે તેને પ્રાતઃકાલે પણ કરી લે અને પ્રાતઃકાળમાં જે કર્તવ્ય છે તેને મધ્યાહ્ન કાળમાં પણ કરી લે. (૪૯) પછી પવિત્ર સ્થાનમાં ભગવાનના નૈવેદ્ય માટે રસોઈ કરે. પરમાત્માને મહાનૈવેદ્ય સમર્પણ કરી તે ઈષ્ટદેવને શયન કરાવે. (૫૦) પછી સાધુ શ્રીકૃષ્ણની પ્રસાદી અન્નને ભગવાનની પ્રસાદીભૂત જળથી અથવા ચરણોદકથી પ્રોક્ષણ કરીને જ ભોજન કરે. રોગાદિ આપત્કાળ વિના દરરોજ એક વાર ભોજન કરે. (૫૧) સાધુ વિષ્ણુ-પરમાત્માને નિવેદન કર્યા વિનાનું અન્ન જમે જ નહીં. આપત્કાળે અને પ્રતિમાના અભાવમાં તે અન્નને મનથી શ્રીકૃષ્ણનું ધ્યાન ધરી નૈવેદ્ય કરીને જમે. (૫૨) જો ભોજન સમયે કોઈ પણ ભિક્ષુકજન અન્નની યાચના કરે તો પ્રસન્ન અંતઃકરણવાળો થઈ તેને પોતાના માણસની બુદ્ધિથી અન્ન આપે. (૫૩)

સાધુ પુરુષ સર્વ એકાદશીઓ, શ્રીકૃષ્ણના જન્મોત્સવો તથા પ્રાયશ્ચિત્તોના ઉપવાસોમાં અને શિવરાત્રીના વ્રતમાં અન્ન જમે નહીં. (૫૪) ત્યાગી સાધુએ દરરોજ સત્ શાસ્ત્રનું અધ્યયન-અધ્યાપન કરવું. આપત્કાળ પડ્યા વિના દિવસે નિદ્રા કરવી નહીં. (૫૫) ત્યાગીસાધુએ વિષ્ણુનું શ્રવણ, કીર્તન, ધ્યાન,વંદન, અર્ચન વિના નકામો સમય કાઢવો નહિ. (૫૬)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**नेतव्यस्तेन च क्वचित् ॥५६॥ मलोत्सर्गे कटिस्नानं वस्त्रशुद्धिश्च योगिना । कार्याथ मूत्रोत्सर्गे तु लिङ्गदोःशुद्धिरम्बुना ॥५७॥ सायं शुचिः प्रबोध्येशं कुर्यान्नीराजनं ततः । नामसङ्कीर्तनं कृत्वा कुर्वीत स्तुतिपाठनम् ॥५८॥ नमस्कृत्य स्वापयेच्च श्रीकृष्णं हृदयाम्बुजे । करण्डकादौ प्रतिमां वन्देताथ निजं गुरुम् ॥५९॥ ततः शुचिः समासीनः पूर्ववत्सुस्थिरासनः । गायत्रीं कृष्णमन्त्रं च जपेत्स निजशक्तितः ॥६०॥ ततः सच्छास्त्रपाठनध्यानकीर्तनैः । विष्णुसम्बन्धिभिः कृत्यैर्याममेकं स जागृयात् ॥६१॥ श्रीकृष्णमेव हृदये चिन्तयन् स ततः स्वपेत् । भूमावापदि तु त्यागी खट्वायामपि संविशेत् ॥६२॥ क्रमेणानेन कर्तव्यं त्यागिना नित्यमात्मनः । आह्निकं विधिवत्तेन श्रीकृष्णः प्रीयतेतराम् ॥६३॥** सुव्रत उवाच – **इत्युक्तमाश्रुत्य मुनिप्रवीरो नारायणेनाह्निकमुत्तमं सः । प्रीतस्तथैव स्वयमाचरंस्तदवीवृतत्सर्वमुनींश्च राजन् ! ॥६४॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे प्रबोधन्युत्सवे श्रीनारायणमुनिगोपालानन्दसंवादे त्यागिनां सङ्क्षिप्ताह्निकविधिनिरूपणनामाष्टाविंशोऽध्यायः ॥२८॥

सुव्रत उवाच – **अथाष्टम्यां निशारम्भे कृतसन्ध्याविधिर्हरिः । नीराजनान्ते कृष्णस्य न्यषीदद्भक्तसंसदि ॥१॥ प्रणम्य तं मुनिश्रेष्ठो मुक्तानन्दो महामतिः । पप्रच्छ कुर्वन्सकलान् कृष्णभक्तानसंशयान् ॥२॥ स्वामिन् स्वरूपं कृष्णस्य बुभुत्साम्यहमञ्जसा । अस्माकमिष्टदेवस्य प्रतिपाद्यस्य चागमैः ॥३॥**
**कथं सगुणो ज्ञेयो निर्गुणश्च जगत्प्रभुः । साकारश्च निराकारः कर्ताऽकर्ता कथं च सः ॥४॥ ब्रह्मधामस्थिता-**

ત્યાગીએ મળનો ત્યાગ કર્યે સતે કટિસ્નાન કરવું, વસ્ત્રશુદ્ધિ કરવી; અને મૂત્રોત્સર્ગ બાદ જળથી લિંગ અને બન્ને હાથની શુદ્ધિ અને કોગળા કરવા. (૫૭) સાયંકાલે બન્ને હાથ, બન્ને પગ, મુખ, આ પંચાંગ શુદ્ધ થઈને પોતાના ઈષ્ટદેવને જગાડીને આરતી કરવી પછી નામસંકીર્તન કરી શ્રીકૃષ્ણના સ્તોત્ર-(સ્તુતિ વગેરે)નો પાઠ કરવો. (૫૮) શ્રીકૃષ્ણને નમસ્કાર કરી હૃદયકમળમાં સુવડાવવા. પ્રતિમા સ્વરૂપ પરમાત્માને કરંડિયા વગેરે સુખશૈયામાં સુવાડવા પછી પોતાના ગુરુને નમસ્કાર કરવા; (૫૯) પછી પવિત્ર આસનમાં પૂર્વની માફક સ્વસ્તિક આસનથી બેસી સાધુ પોતાની શક્તિ અનુસારે ગાયત્રી અને શ્રીકૃષ્ણમંત્રનો જપ કરે. (૬૦) પછી સાધુએ સત્ શાસ્ત્રના પઠન-પાઠન-ધ્યાન-કીર્તન આદિક વિષ્ણુ સંબંધી કાર્યોથી એક પ્રહર સુધી જાગવું. (૬૧) પછી સાધુ શ્રીકૃષ્ણને પોતાના મનમાં ચિંતન કરતો કરતો પૃથ્વીમાં શયન કરે. રોગાદિ આપત્કાળમાં તો ખાટલા ઉપર શયન કરે. (૬૨) હે મુને ! ત્યાગી સાધુએ આ અનુક્રમથી પોતાનો આહ્નિક વિધિ દરરોજ વિધિ પ્રમાણે કરવો તેથી શ્રીકૃષ્ણ ભગવાન અતિશય પ્રસન્ન થાય છે. (૬૩)

હે રાજન્ ! આ પ્રમાણે શ્રીહરિકૃષ્ણ ભગવાને કહેલો ઉત્તમ આહ્નિક વિધિ સાંભળી મુનિવર શ્રી ગોપાળાનંદ મુનિ પ્રસન્ન થયા સતા સર્વ સાધુઓને કહેલી રીત પ્રમાણે આહ્નિક વિધિની પ્રવૃત્તિ કરાવતા હતા : [જે પોતાની પ્રસન્નતાનો હેતુભૂત આહ્નિક વિધિ પોતાના સ્વાશ્રિત સાધુઓને કહેતા હતા તે શ્રીહરિને હું સદા નમસ્કાર કરું છું.] (૬૪)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે પ્રબોધન્યુત્સવે શ્રીનારાયણમુનિ ગોપાલાનંદ સંવાદે ત્યાગિનાં સંક્ષિપ્તાહ્નિકવિધિનિરૂપણ નામાઽષ્ટાવિંશોઽધ્યાયઃ (૨૮)*

## અધ્યાય : ૨૯ - શ્રીહરિએ મુક્તાનંદ મુનિને પોતાના સ્વરૂપનું અદ્વૈત (સ્વરૂપાદ્વૈત) નામનું જ્ઞાન કહ્યું છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! પછી કારતક સુદી આઠમને દિવસે સંધ્યા આરતી કર્યા પછી શ્રીહરિ પોતાના ભક્તજનોની સભામાં ઉત્તમ સિંહાસનમાં બેઠા (૧) મહાબુદ્ધિશાળી મુનિવર મુક્તાનંદ મુનિ શ્રીહરિને પ્રણામ કરી સમગ્ર ભક્તોને ભગવાનના સ્વરૂપમાં સંશયે રહિત કરવા માટે પૂછતા હતા : (૨) હે સ્વામિન્ ! અમારા સર્વેના ઈષ્ટદેવ એવા વેદાદિ શાસ્ત્રોથી પ્રતિપાદન કરાયેલ શ્રીકૃષ્ણ પરમાત્માનું સ્વરૂપ હું તત્ત્વથી જાણવા ઈચ્છું છું. (૩)

સમગ્ર જગતના એક સ્વામી શ્રીકૃષ્ણ સગુણ ક્યા પ્રકારે જાણવા ? અને નિર્ગુણ કેવી રીતે જાણવા ? શ્રીકૃષ્ણ સાકાર કેમ જાણવા ? અને નિરાકાર કેમ જાણવા ? કર્તા કઈ રીતે જાણવા ? અને અકર્તા કેમ જાણવા ? (૪) હે દયાસાગર ! પોતાના અક્ષરધામમાં રહેલા દિવ્ય સ્વરૂપથી પોતાની ઈચ્છાથી મનુષ્યાકૃતિને ધારણ કરનાર શ્રીકૃષ્ણ સ્વરૂપથી જુદા છે કે અભિન્ન છે?



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

द्दिव्यात्स्वरूपान्मनुजाकृतिः । भिन्नो भवत्यभिन्नो वा तन्मे ब्रूहि दयानिधे ! ॥५॥ एतेऽपि वैष्णवाः सर्वे जिज्ञासन्तीदमञ्जसा। शास्त्रानुभवसिद्धान्तमतस्त्वं वक्तुमर्हसि ॥६॥ सुव्रत उवाच – इति जिज्ञासुना तेन सम्पृष्टो भगवान् हरिः । उवाचानन्दयन्वाचा निजाश्रितजनान्नृप ! ॥७॥ श्रीनारायणमुनिरुवाच – शृणु वैष्णवसिद्धान्तं मुनेऽवश्यमुपासकैः । श्रोतव्यं हृदि धार्यं च तत्त्वतः कथयामि ते ॥८॥ श्रीकृष्णो यः परंब्रह्म स्वयंज्योतिः परात्परः । ज्ञेयो नारायणो विष्णुर्भगवान् पुरुषोत्तमः ॥९॥ महेश्वरो वासुदेवो भूमा च परमेश्वरः । आत्मात्मनां चेतनानां चेतनश्च श्रुतीरितः ॥१०॥ कालस्य प्रकृतेश्चापि नियन्ता पुरुषस्य च । प्रकाशकश्च सर्वेषां स्वतन्त्रो दिव्यविग्रहः ॥११॥ धामाक्षरं तु यत्तस्य तद्ब्रह्मपुरमुच्यते । यस्यैकः सूक्ष्मदेशोऽपि कोटिकोट्यर्कभासुरः ॥१२॥ यदुच्यते चिदाकाशं ध्रुवमाकाशवत्सदा । अनाद्यनन्तं चाखण्डं सच्चिदानन्दलक्षणम् ॥१३॥ नवीननीरदश्यामस्तत्र दिव्ये स्वधामनि । विभात्यतिश्वेतरुचिः सूर्यचन्द्राग्नितेजसः ॥१४॥ तस्यैकरोम्णस्तेजोऽपि समग्राक्षरतेजसः । अधिकत्वान्न तत्तेन तत्रस्थैरुपमीयते ॥१५॥ स प्रभुर्दिव्यवसनो दिव्यालङ्कारशोभनः । राधारमादिभिः स्वाभिः शक्तिभिश्च निषेव्यते ॥१६॥ श्रीदामविष्वक्सेनाद्यैः पार्षदैर्दिव्यविग्रहैः । सेव्यमानश्च सच्छत्रचामरव्यजनादिभिः ॥१७॥ सुदर्शनादिभिः स्वास्त्रैर्मूर्तिमद्भिरुपासितः । ऐश्वर्याद्यैर्भगैः षड्भिः सिद्धिभिश्चाणिमादिभिः ॥१८॥ असङ्ख्यैश्च महामुक्तैर्दिव्यसुन्दरविग्रहैः। दिव्यैरनेकोपचारैः पूज्यमानपदाम्बुजः ॥१९॥

---

આ પ્રશ્નોના ઉત્તરો મને કહો. (૫) આ સભામાં બેઠેલા તમારા આશ્રિત સમગ્ર ભક્તો પણ આ મારા પ્રશ્નોના ઉત્તર તત્ત્વથી જાણવા ઈચ્છે છે. માટે તમો સત્ શાસ્ત્ર અને પોતાના અનુભવથી જે નિર્ણય તે કહેવા માટે યોગ્ય છો. (૬) હે રાજન્ ! આ પ્રમાણે જિજ્ઞાસુ મુક્તાનંદ મુનિએ પુછાયેલા શ્રીહરિ પોતાના આશ્રિત જનોને વચનરૂપી અમૃતથી આનંદ પમાડતા સતા બોલ્યા : (૭)

**શ્રીહરિ બોલ્યા** : હે મુને ! શ્રીકૃષ્ણના એકાંતિક ભક્તોએ અવશ્ય સાંભળવા યોગ્ય, પોતાના હૃદયમાં ધારવા યોગ્ય વૈષ્ણવોનો સિદ્ધાંત યથાર્થપણે તમોને કહું છું. તમો સાંભળો. (૮) જે શ્રીકૃષ્ણ તે અક્ષરબ્રહ્માદિથી પણ સ્વરૂપ સ્વભાવથી પર છે, સ્વયં જ્યોતિ છે, સર્વથી પર અક્ષરબ્રહ્મ-તેથી પર છે. જેને શ્રુતિ-શાસ્ત્રોએ જગતનાં કારણભૂત-તત્ત્વોને તે તે કાર્યોમાં પ્રવર્તાવનાર, વિષ્ણુ, ભગવાન, પુરુષોત્તમ, મહેશ્વર, વાસુદેવ, ભૂમા, પરમેશ્વર, આત્માઓના આત્મા, ચેતનોના ચેતન કહેલા છે. (૯-૧૦) કાલ, માયા મહાપુરુષના પણ નિયામક જગતના કારણ, કાલાદિનાં પ્રકાશક, સ્વતંત્ર દિવ્યવિગ્રહ; (૧૧) એવા શ્રીકૃષ્ણ ભગવાનનું જે અક્ષરધામ તે બ્રહ્મપુર સંજ્ઞાથી કહેવાય છે. જે બ્રહ્મપુર ધામનો એક સૂક્ષ્મ પ્રદેશ પણ એકી સાથે ઉદય પામેલા કરોડો સૂર્યના સમાન પ્રકાશવાળો છે. (૧૨) જે અક્ષરધામને ચિદાકાશ કહે છે, જે આકાશની માફક હંમેશાં નિર્લેપ છે. આદિ અને અંતે રહિત છે, માટે અખંડ છે અને સચ્ચિદાનંદ ગુણવાળું છે. (૧૩) અલૌકિક પોતાના ધામમાં નવીન મેઘના સમાન શ્યામ સુંદર મૂર્તિ, સૂર્ય-સુધાકર-અગ્નિની કાંતિથી પણ અતિ શ્વેત કાંતિવાળા શ્રીકૃષ્ણ શોભે છે. (૧૪) શ્રીકૃષ્ણના એક રોમનું તેજ પણ સમગ્ર અક્ષરના તેજથી અધિક હોવાથી તે અક્ષરધામમાં રહેલાં અક્ષરમુક્તો પણ સમગ્ર અક્ષર બ્રહ્મના તેજની સાથે ઉપમા આપી શકતા નથી (એવું અનુપમ તેજ છે.) (૧૫) દિવ્ય વસ્ત્રધારી, દિવ્ય અલંકારોથી મનોહર સમર્થ શ્રીકૃષ્ણ રાધા, રમા વગેરે પોતાની પત્નીઓએ દિવ્યોપચારથી સેવાય છે. (૧૬) દિવ્ય દેહવાળા શ્રીદામા, વિશ્વક્સેન વગેરે પાર્ષદોએ શોભાયમાન છત્ર ચામર વીંઝણાં વગેરેથી સેવા કરાતા; (૧૭) મૂર્તિમાન, સુદર્શનાદિ પોતાના આયુધો અણિમાદિ અષ્ટસિદ્ધિઓ અને છ સંખ્યાવાળાં ઐશ્વર્યથી સેવાયેલા; (૧૮) દિવ્ય સુંદર વિગ્રહવાળા અસંખ્ય મહામુક્તોએ દિવ્ય-અનેકોપચારોથી પૂજાયા છે ચરણકમળ જેમનાં એવા; (૧૯)

द्विभुजः स सदा स्वामी भक्तेभ्यो निजदर्शनम् । चतुर्भुजादिरूपेण दत्ते क्वापि तदिच्छया ।।२०।। न प्राकृता गुणास्तस्मिन्सन्तीत्युक्तः स निर्गुणः । अप्राकृताकृतित्वाच्च निराकारः स कीर्त्यते ।।२१।। स्वधर्मज्ञानवैराग्ययुजा भक्त्या ह्यनन्यया । ये भजेयुस्त एवामुं तथाभूतं विचक्षते ।।२२।। ज्ञानाद्यैरपि सम्पन्ना भक्त्या हीनास्त्वनन्यया । ब्रह्मतेजः प्रपश्यन्ति न तु साक्षात्तमीश्वरम् ।।२३।। तेजोमण्डलमध्यस्थं द्विभुजं दिव्यविग्रहम् । नेक्षन्तेऽर्कं यथा लोकाः साकारं तं तथैव ते ।।२४।। ततो ब्रह्म निराकारमिति मन्यन्त एव ते । तावता न निराकारं कृष्णाख्यं हि परं बृहत् ।।२५।। एकदेशस्थितस्यापि पूर्णत्वं तस्य तेजसा । सर्वत्रास्ति यथार्कस्य शृण्वत्र वचनं विधेः ।।२६।। अहो भाग्यमहो भाग्यं नन्दगोपव्रजौकसाम् । यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम् ।।२७।। अनेकाण्डोद्भवाद्यर्थं निर्गुणः स यदा प्रभुः । मायागुणानुपादत्ते सगुणः प्रोच्यते तदा ।।२८।। अनिरुद्धस्वरूपेण मायायास्तु रजोगुणम् । गृहीत्वा ब्रह्मसंज्ञः सन् ब्रह्माण्डं सृजति प्रभुः ।।२९।। त्रैलोक्यमौदरीकृत्य लये नैमित्तिके ह्यसौ । एकार्णवजले शेते काले सृजति तत्पुनः ।।३०।। स प्रद्युम्नस्वरूपेण वासुदेवोऽखिलं जगत् । सत्त्वं मायागुणं धृत्वा पाति विष्णुः प्रजापतिः ।।३१।। असौ वैराजपुरुषः कथ्यते लोकपालकः । मुक्तिं चतुर्विधां दत्ते स्वभक्तेभ्यः सुरारिहा ।।३२।। सङ्कर्षणस्वरूपेण वासुदेवस्तमोगुणम् । अङ्गीकृत्यैव मायायाः शिवाख्यः संहरत्यदः ।।३३।। शेषरूपेण भूगोलं धत्ते सङ्कर्षणो ह्यसौ । मूर्तयो वासुदेवस्य षडेताः सगुणा मताः ।।३४।।

---

સદા બે ભુજાવાળા, શ્રીહરિકૃષ્ણ ક્યારેક ભક્તજનોને પોતાના ભક્તોની ઈચ્છાથી ચતુર્ભુજરૂપે-આઠ ભુજરૂપે અને સહસ્ર ભુજરૂપે પોતાનાં દર્શન આપે છે. (૨૦) તે શ્રીકૃષ્ણમાં પ્રકૃતિથી ઉત્પન્ન થયેલા સત્ત્વાદિ ગુણો નથી માટે શ્રીકૃષ્ણ નિર્ગુણ કહેલા છે. પ્રકૃતિજન્ય આકારથી રહિત હોવાથી શ્રીકૃષ્ણ નિરાકાર કહેવાય છે. (૨૧) જે પુરુષો સ્વધર્મ, જ્ઞાન, અને વૈરાગ્યે સહિત અનન્ય ભક્તિથી શ્રીકૃષ્ણને ભજે તે પુરુષો જ તેવા પ્રકારના નિર્ગુણ અને નિરાકાર (દિવ્યાકૃતિ) જુએ છે અને કહે છે. (૨૨) જ્ઞાન, વૈરાગ્ય અને સ્વધર્મથી યુક્ત, એકાંતિક-ભક્તિથી રહિત પુરુષો તો કેવળ નિરાકાર, અક્ષરબ્રહ્મના પ્રકાશને જુએ છે; પરમેશ્વરને-પ્રત્યક્ષ સાકાર શ્રીકૃષ્ણને જોતા નથી. (૨૩) જેમ જનો તેજોમય મંડળમાં રહેલાં શંખ, ચક્ર સહિત બે ભુજાવાળા દિવ્ય દેહવાળા સૂર્યને જોતા નથી. કેવળ મંડળમાં રહેલા તેજને જુએ છે તે પ્રકારે અનન્ય ભક્તિ રહિત કૈવલ્યાર્થીઓ સાકાર દિવ્યાકૃતિવાળા શ્રીકૃષ્ણને જોતા નથી. કેવલ અક્ષરબ્રહ્મના તેજને જુએ છે. (૨૪) કૈવલ્યાર્થીઓ શ્રીકૃષ્ણ નામના પરબ્રહ્મ નિરાકાર માને છે તેટલા માત્રથી તેમનું નિરાકાર શ્રીકૃષ્ણ નામનું પરબ્રહ્મ નિરાકાર નથી, પરંતુ સદા સાકાર જ છે. (૨૫) એક દેશમાં પોતાના અક્ષરધામમાં રહેલા છે તોપણ શ્રીકૃષ્ણ અંતર્યામી પોતાની શક્તિથી સર્વ ક્ષેત્રોમાં વ્યાપક છે. જેમ એક દેશમાં સૂર્ય રહેલો છે તોપણ તેજથી સર્વ જનોનાં ચક્ષુ-ઈન્દ્રિયના પ્રકાશથી સર્વત્ર પૂર્ણ છે. આ અર્થમાં શ્રીમદ્ ભાગવતમાં બ્રહ્માનું આ પ્રમાણે વચન છે :(૨૬) નંદ ગોપના વ્રજમાં નિવાસ કરનારાં જનોનાં ભાગ્યનાં શું વખાણ કરીએ ? તેમનાં અહોભાગ્ય છે. હું તો અત્યંત આશ્ચર્યનિમગ્ન છું, શાથી કે પરમાનંદ સ્વરૂપ, અનાદિ સિદ્ધ, સર્વત્ર પૂર્ણ-વ્યાપક શ્રીકૃષ્ણ જેમના મિત્ર છે. (૨૭)

પ્રાકૃત ગુણોથી રહિત પ્રભુ શ્રીકૃષ્ણ જ્યારે અનેક બ્રહ્માંડોની ઉત્પત્તિ, સ્થિતિ અને લય માટે માયાના ગુણો સત્ત્વ, રજ અને તમને ગ્રહણ કરે છે ત્યારે સગુણ કહેવાય છે. (૨૮) શ્રીકૃષ્ણ માયાનો રજોગુણ અનિરુદ્ધરૂપે ગ્રહણ કરી બ્રહ્માના નામવાળા થઈને બ્રહ્માંડને સર્જે છે. (૨૯) આ અનિરુદ્ધરૂપે બ્રહ્મા સંજ્ઞાવાળા શ્રીકૃષ્ણ નૈમિત્તિક પ્રલયમાં ત્રિભુવનને પોતાના ઉદરમાં લીન કરી પ્રલયના સમુદ્રના જળમાં શયન કરે છે. રાત્રિના અવસાનમાં ફરીથી ત્રિલોકીને સર્જે છે. (૩૦) વાસુદેવ શ્રીકૃષ્ણ, માયાના સત્ત્વગુણને પ્રદ્યુમ્ન રૂપે ગ્રહણ કરી પ્રજાપતિ વિષ્ણુરૂપે થઈ સમગ્ર જગતનું રક્ષણ કરે છે. (૩૧) આ પ્રદ્યુમ્ન સ્વરૂપે વિષ્ણુ સંજ્ઞાવાળા શ્રીકૃષ્ણ ભગવાન, વૈરાજ પુરુષરૂપે લોકનું પાલન કરવા માટે અસુરોને હણનારા કહેવાય છે. તેમજ પોતાના ઉપાસક ભક્તોને સાલોક્યાદિ ચતુર્ધા મુક્તિ આપે છે. (૩૨) વાસુદેવ, માયાનો તમોગુણ સંકર્ષણરૂપે અંગીકાર કરી શિવનામવાળા થકા આ ત્રિલોક્યનો સંહાર કરે છે. (૩૩) સંકર્ષણરૂપ તેજ શ્રીકૃષ્ણ, શેષરૂપે, ભૂગોળને ધારણ કરે છે. વાસુદેવની આ છ મૂર્તિઓ સગુણ માનેલી છે. (૩૪)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

कार्यार्थं मूर्तयोऽप्यासां सन्त्यन्याश्च सहस्रशः । एताः सर्वा गुणत्यागे प्रोच्यन्ते निर्गुणा अपि ॥३५॥ दिव्याङ्गो निर्गुणो ह्येष देवक्यां वसुदेवतः । प्रादुर्बभूव कृष्णाख्यो भूतले मनुजाकृतिः ॥३६॥ दिव्यमूर्तिनराकृत्योस्तस्य भेदो न किञ्चन । इति जानीहि सद्बुद्धे ! वैष्णवाचार्यनिश्चयम् ॥३७॥ स दिव्यमूर्तिः सन्नेव नरनाट्यं दधौ प्रभुः । तेनैव च स्वरूपेण सोऽभूद्दिव्याकृतिर्मुहुः ॥३८॥ कथैषा विस्तृताऽस्त्येव पुराणेषु च भारते । तत्सारमात्रमाकृष्य कथयामि समासतः ॥३९॥ स वासुदेवः प्रथमं सतां धर्मस्य गुप्तये । भूभारहरणार्थं च वासुदेवमनोऽविशत् ॥४०॥ तद्द्वारा देवकीगर्भो भूत्वा काले व्यजायत । प्राग्जन्मस्मृतये पित्रोर्विष्णुरूपः स एव च ॥४१॥ पितृभ्यां कंसभीताभ्यां प्रार्थितोऽथाभवन्नरः । स जृम्भणे यशोदायै विश्वरूपमदर्शयत् ॥४२॥ मृद्भक्षणे पुनस्तस्यै नराकृतिरपि स्वयम् । ब्रह्माण्डमखिलं व्यात्ते स्वमुखे समदर्शयत् ॥४३॥ नराकृतिः स एवेशो दाम्नोलूखलबन्धने । अपरिच्छेद्यतां स्वस्य सर्वा गोपीरदर्शयत् ॥४४॥ गोपवत्सापहरणे कृतेऽजेन नरोऽपि सन् । तत्तद्रूपः स्वयं भूत्वा स चिक्रीडैकवत्सरम् ॥४५॥ वत्सवत्सपरूपान् स्वान्विष्णुरूपांस्ततोखिलान्। ब्रह्माणं दर्शयामास पुनरेकोऽभवन्नरः ॥४६॥ कालीयदमनं कृत्वा विषोदेन मृतान् पशून् । गोपांश्च जीवयामास स दृष्ट्यामृतवर्षया ॥४७॥ निशि दावानलं पीत्वा नराकृतिधरोऽपि सः । सर्वान् व्यमोचयत्तीरे कालिन्द्या व्रजवासिनः ॥४८॥ पुनर्दावानलं पीत्वा गा ररक्ष स एव च । सप्ताहमेकहस्तेन दध्रे गोवर्धनं च सः ॥४९॥ नन्दं च दर्शयामास वारुणे लोक उत्तमे । लोकपालैरर्च्यमानां निजमूर्तिं स एव च ॥५०॥

ઉત્પત્તિ વગેરે કાર્ય કરવા માટે આ છ મૂર્તિઓના સંબંધવાળી બીજી પણ હજારો મૂર્તિઓ છે તે પણ સગુણ છે; એ સર્વે મૂર્તિઓ પોતપોતાના ગુણની પરિત્યાગાવસ્થામાં નિર્ગુણ પણ કહેવાય છે. (૩૫) નિત્ય સિદ્ધ-દિવ્ય મૂર્તિ, નિર્ગુણ એવા એજ વાસુદેવ આ પૃથ્વી પર વસુદેવથકી દેવકીમાં શ્રીકૃષ્ણ નામથી મનુષ્યાકૃતિસ્વરૂપે પ્રગટ થયા. (૩૬) હે સદ્‌બુદ્ધે ! શ્રીકૃષ્ણની દિવ્ય મૂર્તિ બ્રહ્મધામને વિષે રહેલી અને નરાકૃતિ આ બંનેમાં ભેદ લગારેય પણ નથી : આ પ્રકારે શ્રીરામાનુજ-ઉદ્ધવાદિ આચાર્યગણનો નિર્ણય છે એમ તમે જાણો. (૩૭) શ્રીકૃષ્ણ દિવ્ય મૂર્તિ થકા જ નરાનુકરણ ધારણ કરે છે. તેમજ તે નરાકાર સ્વરૂપથી જ શ્રીકૃષ્ણ વારંવાર દિવ્યાકૃતિ ધરનારા પણ થયેલા છે. (૩૮) આ કથા પુરાણોમાં તથા ભારતાદિ ઈતિહાસોમાં વિસ્તારથી છે તેનો સાર માત્ર લઈને સંક્ષેપથી કહું છું : (૩૯) તે દિવ્યમૂર્તિ ભગવાન વાસુદેવ પોતાના એકાંતિક સાધુજનો અને વર્ણાશ્રમની વ્યવસ્થારૂપ- પોતાના આધારભૂત સદાચાર ધર્મના રક્ષણ માટે અને પૃથ્વીનો ભાર હરવા માટે પ્રથમ મથુરામાં વસુદેવના મનમાં પ્રવેશ કરતા હતા. (૪૦) વસુદેવ દ્વારા એ દેવકીના ગર્ભરૂપે મનુષ્યાકારે થઈને દશમે મહિને પ્રગટ થયા. તે દેવકી અને વસુદેવને પૂર્વ જન્મની સ્મૃતિ માટે વિષ્ણુરૂપે થયા. (૪૧) પછી કંસથી ભય પામેલાં વસુદેવ અને દેવકીએ પ્રાર્થના કર્યા થકા બાળકરૂપે થયા, પછી વસુદેવે ગોકુલમાં લઈ જવાયા, નરાકૃતિ શ્રીકૃષ્ણ પોતાના બગાસાથી વિકસિત થયેલા મુખમાં યશોદાને બ્રહ્માંડનું સ્વરૂપ બતાવતા હતા. (૪૨) મનુષ્યાકૃતિ હોવા છતાં પણ મૃત્તિકાના ભક્ષણ નિમિત્તે પહોળા કરાયેલા મુખમાં યશોદાને ફરીથી પણ સમગ્ર બ્રહ્માંડ દેખાડતા હતા. (૪૩) મનુષ્ય આકાર જ પરમેશ્વર શ્રીકૃષ્ણ ગાયને બાંધવાની દોરડીથી, ખાંડણી સાથે બાંધવામાં પોતાનું અમાપપણું સર્વ ગોપીઓને બતાવતા હતા. (૪૪) બ્રહ્માએ ગોપ બાળકો અને વાછરડાનું વૃંદાવનમાં અપહરણ કર્યું ત્યારે મનુષ્ય આકૃતિવાળા સ્વયં શ્રીકૃષ્ણ ગોપ અને વાછરડા વગેરે રૂપે થઈને એક વર્ષ પર્યન્ત રમતા હતા. (૪૫) પછી વાછરડા અને ગોપનાં બાળકો રૂપે રહેલા સમગ્ર પોતાનાં સ્વરૂપોને વિષ્ણુરૂપવાળા, સમગ્ર ઐશ્વર્ય સંપન્ન બ્રહ્માને દેખાડતા હતા. ફરીથી એક સ્વરૂપે બાળકની આકૃતિ સમાન થયા. (૪૬) નરાકૃતિ શ્રીકૃષ્ણ કાલિયનાગનું દમન કરી વિષમય જળનું પાન કરવાથી મરેલી ગાયો તથા ગોપોને અમૃતમય દૃષ્ટિથી જિવાડતા હતા. (૪૭) મનુષ્યાકાર શ્રીકૃષ્ણે રાત્રિમાં દાવાગ્નિનું પાન કરીને કાલિંદીના તટમાં સર્વ વ્રજવાસીઓને દાવાનળથી મુકાવ્યા. (૪૮) શ્રીકૃષ્ણે ફરીથી દાવાનળનું પાન કરી ગાયો અને ગોપોનું રક્ષણ કર્યું હતું. તેજ મનુષ્યાકૃતિ શ્રીકૃષ્ણે સાત દિવસ સુધી પોતાના એક હાથથી ગિરિરાજ પર્વતને ધારણ કર્યો હતો. (૪૯) તે શ્રીકૃષ્ણ ભગવાન ઉત્તમ વરુણલોકમાં, વરુણાદિ દિગ્પાળોએ મહાવિભૂતિઓથી પૂજા કરાતી પોતાની મૂર્તિ નંદજીને બતાવતા હતા. (૫૦)

पुनर्वैकुण्ठलोकेऽसौ सर्वान् गोपीनदीदृशत् । छन्दोभिः स्तूयमानं स्वं नन्दादीन् रूपमद्भुतम् ॥५१॥ सर्वासामपि गोपीनां परिपूर्णसुखाप्तये । तावद्रूपधरो भूत्वा स रेमे रासमण्डले ॥५२॥ यमुनाया ह्रदेऽक्रूरं कंसमारणशङ्कितम् । स्वं रूपं दर्शयामास तद्बहिः स्यन्दने च सः ॥५३॥ कंसरङ्गसभामध्ये सर्वेभ्योऽपि स्वदर्शनम् । पृथक् पृथक् यथायोग्यं तत्तद्रसमयं ददौ ॥५४॥ स एव विष्णुरूपेण दृष्टो यवनभूभुजा । पलायमानो दृष्टश्च मुचुकुन्देन तादृशः ॥५५॥ चिरान्मृतं गुरोः पुत्रमानिनाय यमालयात् । सोदरांश्चानिनायासौ मातुः प्रीत्यै रसातलात् ॥५६॥ दुःशासनेन द्रौपद्याः कृष्टे वस्त्रे स्मृतस्तया । सद्यः श्रीशयनादेत्य तत्र वासांस्यपूरयत् ॥५७॥ वने स्मृतश्च पाञ्चाल्या दुर्वासःशापसङ्कटे । तत्रैत्यात्त्वाऽथ शाकान्नं त्रिलोकीं सोऽप्यतर्पयत्॥५८॥ विश्वरूपोऽभवत्सोऽथ न्राकृतिः पार्थसारथिः । तार्क्ष्यारूढो ययौ स्वर्गं पारिजातजिहीर्षया ॥५९॥ द्वार्वत्यां सकलस्त्रीणां प्रीतये तावदाकृतिः । वसन्प्रतिगृहं प्रादान्नारदाय स्वदर्शनम् ॥६०॥ आनेतुं विप्रतनयान्रथस्थः सार्जुनो ययौ । स ब्रह्मधाम स्वस्यैव प्राकृतात्तमसः परम् ॥६१॥ तपः कुर्वन्स पुत्रार्थं हिमाद्रौ वैष्णवाग्निना । स्थावराञ्जङ्गमान्दग्ध्वा पुनस्तांश्चाप्यजीवयत् ॥६२॥ बहुलाश्वनृपावासे श्रुतदेवगृहे च सः । मिथिलायां द्विधाऽवात्सीत् न्राकृतिर्ऋषिभिः सह ॥६३॥ उभयत्र ब्रह्मवादं कुर्वन्नानन्दयन्निजौ । भक्तौ राजर्षिब्रह्मर्षी मासमेकमुवास सः ॥६४॥ तथाऽसौ भगवान्कृष्णो देवमानुषदुःखदान् देवैरवध्यानसुरान् जघानामानवक्रियः ॥६५॥

---

એજ શ્રીકૃષ્ણ ફરીથી વૈકુંઠલોકમાં મૂર્તિમાન વેદોએ સ્તુતિ કરાયેલું પોતાનું અલૌકિક સ્વરૂપ નંદાદિ સર્વ ગોપોને બતાવતા હતા. (૫૧) શ્રીકૃષ્ણ સર્વ ગોપીઓને પરિપૂર્ણ સુખ આપવા માટે જેટલી ગોપીઓ તેટલા રૂપે થઈ રાસ મંડળમાં રમતા હતા. (૫૨) શ્રીકૃષ્ણ, ‘કંસ શ્રીકૃષ્ણને મારશે’ એવી શંકાવાળા અક્રૂરજીને યમુનાજીના ધરામાં અને બહાર રથમાં પોતાનું રૂપ દેખાડતા હતા. ફરીથી જળમાં શેષશાયી સ્વરૂપ બતાવતા હતા. (૫૩) કંસે કરાવેલી રણભૂમિના પર્યાય નામવાળી રંગભૂમિની સભામાં સર્વ મલ્લ-સ્ત્રી વગેરેને ભિન્ન ભિન્ન યથાયોગ્ય તે તે રૌદ્ર, અદ્‌ભુત, શૃંગાર આદિ સર્વ રસમય પોતાના દર્શન શ્રીકૃષ્ણે આપ્યા. (૫૪) એજ શ્રીકૃષ્ણને મથુરાથી પલાયન કરતા છતાં કાલયવને ચતુર્‌ભુજરૂપે જોયા અને મુચકુંદ રાજાએ પણ તેવા જ શ્રી વિષ્ણુરૂપે જોયા. (૫૫) શ્રીકૃષ્ણે ઘણા સમયથી પ્રભાસમાં મરણ પામેલા ગુરુ સાંદીપનિના પુત્રને યમના ભુવનથી લાવી આપ્યો. પોતાના માતા દેવકીની પ્રસન્નતા માટે રસાતલથી બલિની પાસેથી પોતાના મોટા ભાઈઓને લાવી આપ્યા. (૫૬) દુઃશાસને દ્રૌપદીનાં વસ્ત્રો ખેંચતી વખતે દ્રૌપદીએ ચિંતવન કરાયેલા શ્રીકૃષ્ણે દ્વારિકામાં રૂકમણીની શૈયાથી હસ્તિનાપુરમાં આવીને વસ્ત્રો પૂર્યાં. (૫૭) અરણ્યમાં ‘દુર્વાસાને અન્ન નહિ આપીએ તો શાપ આપશે’ એવા સંકટ સમયમાં દ્રૌપદીએ સ્મરણ કરાયેલા; તે મનુષ્યાકૃતિ શ્રીકૃષ્ણ, વનમાં આવીને થાળીમાં ચોંટેલું શાકરૂપ અન્ન જમીને ત્રિલોકીને પણ તૃપ્ત કરતા હતા. (૫૮) મનુષ્ય-આકૃતિ અર્જુનના સારથીરૂપે રહેલા શ્રીકૃષ્ણે અર્જુનને વિશ્વરૂપ દેખાડ્યું. તેમજ ગરુડ ઉપર બેસીને પારિજાતનું વૃક્ષ લેવાની ઈચ્છાથી સ્વર્ગમાં ગયા. (૫૯) દ્વારિકામાં સોળ હજાર એકસો અને આઠ પોતાની પત્નીઓની પ્રસન્નતા માટે તેટલાં સ્વરૂપોને ધારણ કરનારા, દરેક ભુવનમાં નિવાસ કરતાં શ્રીકૃષ્ણ નારદઋષિને દરેક ગૃહમાં પોતાનાં દર્શન આપતા હતા. (૬૦) શ્રીકૃષ્ણ રથ ઉપર બેઠેલા અર્જુને સહિત દ્વારિકાવાસી બ્રાહ્મણોના કુમારોને લાવવા માટે પ્રકૃતિમય ગાઢાન્ધકારથી પર વર્તતા પોતાના જ અવ્યાકૃત ધામમાં ગયા. (૬૧) શ્રીકૃષ્ણ પુત્રને માટે હિમાલયમાં તપ કરતા સતા પોતાના મુખથી ઉત્પન્ન થયેલા વૈષ્ણવાગ્નિથી સ્થાવર જંગમ પશુપક્ષી વગેરેને બાળી દઈને ફરીથી સ્થાવર-જંગમ પ્રાણીઓને અમૃતવર્ષિણી દૃષ્ટિથી જીવાડતા હતા. (૬૨) મનુષ્ય આકૃતિ શ્રીકૃષ્ણ મિથિલાનગરીમાં બહુલાશ્વ નામવાળા જનક રાજાના ભવનમાં અને શ્રુતદેવ વિપ્રના ભવનમાં વ્યાસાદિ ઋષિઓની સાથે બે સ્વરૂપે રહેતા હતા. (૬૩) શ્રીકૃષ્ણ બંનેના નિવાસોમાં બ્રહ્મવાદ,(પ્રશ્નોત્તરાત્મક પરબ્રહ્માશ્રિત જ્ઞાન) ભગવાનના ભક્ત અને બ્રાહ્મણના મહિમાના જ્ઞાનપૂર્વક ઉપદેશ કરતાં કરતાં પોતાના એકાંતિક સેવકો, રાજર્ષિ અને બ્રહ્મર્ષિ જનક રાજા અને શ્રુતદેવ બ્રાહ્મણને આનંદ આપતા આપતા એક માસ પર્યન્ત રહ્યા. (૬૪) તે જ પ્રકારે મનુષ્યપણામાં પણ દિવ્ય ક્રિયાવાળા શ્રીકૃષ્ણ દેવોથી નાશ નહિ પામતા અને દેવો અને મનુષ્યોને મહાદુઃખ આપનારા અસુરોને નાશ કરતા હતા. (૬૫)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

पूतनां च तृणावर्तं शकटं वत्सकं बकम् । अघं वृषं केशिनं च गजमल्लोग्रसेनजान् ॥६६॥ अन्यांश्च सद्द्रुहो दैत्यान्निर्दयान् नृपरूपिणः। बहून्सेतुभिदो हत्वा भुवि धर्ममतिष्ठिपत् ॥६७॥ एवंविधान्यनेकानि चरित्राण्यस्य सन्ति वै । मानुषत्वेऽपि दिव्यानि तानीत्येव विदुर्बुधाः ॥६८॥ तस्माद्दिव्याकृतिः कृष्णो त्राकृतिश्चैक एव सः । भेदं य उभयोर्विद्युस्ते त्वज्ञानिन ईरिताः ॥६९॥ अनेकरूपिणोऽप्यस्य ये जानन्त्येकरूपताम् । मानुष्येऽप्यस्य दिव्यत्वं ते ज्ञेया ज्ञानिनो नराः ॥७०॥ यथा यो बलिना राज्ञा वामनो भगवान् पुरा । दृष्टः स एव वैराजो वामनश्च पुनः स वै ॥७१॥ एक एव यथा विष्णुरजितोऽमृतमन्थने। चतुर्मूर्तिधरश्चक्रे क्रिया दिव्याः पृथक् पृथक् ॥७२॥ तत्राजितो ममन्थाब्धिं कूर्मो दध्रे च मन्दरम् । धन्वन्तरिः सुधां निन्ये व्यभजत्तां च मोहिनी ॥७३॥ विप्राकृतिर्यथा वाग्निः खाण्डवस्य दिधक्षया । कृष्णौ सम्प्रार्थयामास तुन्दरुक् श्मश्रुपिङ्गलः ॥७४॥ तदाज्ञया स एवाभूज्ज्वालामाली च तद्वनम् । दग्ध्वा सजीवमखिलं विप्रोऽभूत्पूर्ववत्पुनः ॥७५॥ नराकृतिस्तथा कृष्णो ज्ञातव्यो दिव्यविग्रहः। दिव्यविग्रह एवासौ नरनाट्यधरश्च वै ॥७६॥ जन्मकर्माणि दिव्यानि ज्ञातव्यानि ततोऽस्य च। अभेद एव च सदा दिव्यमानुषरूपयोः ॥७७॥ वासुदेवोऽयमेवास्ति भगवाञ्जगतः प्रभुः । स्वातन्त्र्येण करोत्यस्य भवस्थित्यप्ययान् यतः ॥७८॥ कालकर्मस्वभावानां मायायाश्चैष आदितः । कर्तास्तीत्युच्यतेऽनादिरादिकर्तेश्वरेश्वरः ॥७९॥ कालादिशक्तिभिः स्वाभिर्विश्वसर्गादि कारयन् । अकर्ता निष्क्रियश्चेति प्रोक्तः सम्राडिवैष च ॥८०॥

પૂતના, તૃણાવર્ત, શકટાસુર, વત્સાસુર, બકાસુર, અઘાસુર, વૃષભાસુર, કેશિ નામનો દૈત્ય, કુવલયાપીડ હાથી તથા ચાણુરાદિ તથા ઉગ્રસેનથી ઉત્પન્ન થયેલા કંસ, કંક, ન્યગ્રોધાદિ તથા બીજા પણ અનેક જે ભગવાનના ભક્ત સાધુઓનો દ્રોહ કરનાર-નિર્દય-રાજાનાં રૂપોને ધારણ કરનાર-અનાદિ ધર્મમર્યાદાઓને તોડનારા દૈત્યો જે જરાસંધ, કાલયવન, શિશુપાલ, દંતવક્ર, સાલ્વ, પૌન્ડ્રક વગેરે અસુરો હતા તેનો નાશ કરી પૃથ્વીમાં ભાગવત ધર્મ શ્રીકૃષ્ણ સ્થાપતા હતા. (૬૬-૬૭) શ્રીકૃષ્ણનાં આ પ્રકારનાં અનેક ચરિત્રો છે. 'તે ચરિત્રો મનુષ્યભાવમાં પણ અલૌકિક છે' આ પ્રમાણે જ ભગવાનના સ્વરૂપના જ્ઞાનવાળા ભક્તો જાણે છે. (૬૮)

માટે દિવ્યાકૃતિ અક્ષરધામમાં રહેલા અને મનુષ્યાકાર શ્રીકૃષ્ણ એક જ છે પણ જુદા નથી. જે પુરુષો શ્રીકૃષ્ણના દિવ્યાકૃતિ અને મનુષ્યાકૃતિસ્વરૂપોમાં ભેદ જાણે છે તે પુરુષોને ભગવાનના સ્વરૂપના યથાર્થ જ્ઞાને રહિત અજ્ઞાની કહેલા છે. (૬૯) અનેક રૂપ ધારણ કરનાર શ્રીકૃષ્ણને પણ 'ભિન્ન નથી એકરૂપ જ છે' એમ જે માણસો જાણે છે. તથા શ્રીકૃષ્ણના મનુષ્યભાવમાં પણ દિવ્યપણું જાણે છે તે મનુષ્યો ભગવાનના સ્વરૂપને યથાર્થ જાણે છે એમ જાણવું. (૭૦) જેમ બલિરાજાએ પ્રથમ ભગવાનને વામનરૂપે દીઠા પછી તે જ વામનને વૈરાજરૂપે જોયા, પછી ફરીથી પણ તે જ ભગવાનને પૂર્વની માફક વામનરૂપે દીઠા. (૭૧) તથા જેમ એક જ અજિત નામના વિષ્ણુ ભગવાન, સુધામંથન નિમિત્તે ચાર મૂર્તિ ધરનારા, ભિન્ન ભિન્ન ક્રિયાઓ કરતા હતા. (૭૨) તે ચાર મૂર્તિઓમાં, અજિત નામના વિષ્ણુ ભગવાન ક્ષીર સાગરને વલોવતા હતા. કૂર્માકૃતિ ધારણ કરી મંદરાચળ પર્વતને પીઠ ઉપર ધારણ કરતા હતા. ધન્વંતરી રૂપ ધારણ કરી અમૃત લાવ્યા અને મોહિની રૂપ ધારીને સુધાનો વિભાગ કરીને દેવોને પાન કરાવતા હતા. (૭૩) તથા જેમ અગ્નિ, બ્રાહ્મણ રૂપ ધારી, તેમાં પણ જઠર રોગ યુક્ત-પીળી મૂછોવાળો ખાંડવ નામના ઈંદ્રના વનને બાળવાની ઈચ્છાથી શ્રીકૃષ્ણ અને અર્જુનને પ્રાર્થના કરતો હતો. (૭૪) પછી વિપ્ર રૂપ ધારણ કરનારો એજ અગ્નિ, શ્રીકૃષ્ણ અને અર્જુનની આજ્ઞાથી બળતી જ્વાળાઓની પંક્તિઓ યુકત થઈને ત્યાં રહેલાં પશુપક્ષી વગેરે સહિત સમગ્ર ખાંડવવનને બાળીને ફરીથી પૂર્વની માફક બ્રાહ્મણ થયો. (૭૫) આ કહેલા વામન વગેરે ત્રણ દૃષ્ટાંતથી નરાકૃતિ કૃષ્ણ દિવ્ય વિગ્રહવાળા જાણવા. દિવ્ય વિગ્રહ જ શ્રીકૃષ્ણ મનુષ્યાકારધારી નિશ્ચે જાણવા. (૭૬) માટે આ શ્રીકૃષ્ણના જન્મો અને કર્મો દિવ્ય જાણવાં; અને દિવ્ય અને મનુષ્ય સંબંધી રૂપોનો સદા અભેદ જાણવો. (૭૭) આ ભગવાન વાસુદેવ શ્રીકૃષ્ણ જ બ્રહ્માંડોના સ્વામી છે માટે આ જગતની ઉત્પત્તિ, સ્થિતિ અને લય સ્વતંત્રપણે કરે છે. (૭૮) આ શ્રીકૃષ્ણ કાળ, કર્મ અને સ્વભાવ તથા માયા અને પુરુષના પણ સર્ગના આરંભમાં કર્તા, (આવિર્ભાવ કરનારા છે) માટે જ અનાદિ, આદિ કર્તા, કાલાદિ સર્વેને પોતાના સંકલ્પ દ્વારા તેમના કાર્યની પ્રેરણા કરનારા છે માટે સર્ગના આરંભમાં સમર્થ કાલાદિના નિયંતા ઈશ્વરેશ્વર કહેવાય છે. (૭૯) પોતાની કાલશક્તિથી અનેક બ્રહ્માંડોની ઉત્પત્તિ વગેરે કરાવતા આ શ્રીકૃષ્ણ ચક્રવર્તી રાજાની માફક અકર્તા, નિષ્ક્રિય આ પ્રકારે સત્ શાસ્ત્રોમાં કહેલા છે. (૮૦)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

स्वातन्त्र्येणैव हेतुत्वं कालादीनामतः क्वचित्। उत्पादनादौ जगतो मन्तव्यं नैव कर्हिचित् ॥८१॥ विनापि कालमायादीन्स्वतन्त्रो भगवान्स्वयम्। ब्रह्माण्डकोटिसर्गादौ समर्थोऽस्ति प्रभुत्वतः ॥८२॥ ईदृक्सामर्थ्यवानेव न्राकृतावपि स प्रभुः। भवतीत्यस्य दिव्यत्वं नृत्वं चैक्येन वर्णितम्॥८३॥ कृष्णस्यैतादृशस्यापि जन्म कर्म च विग्रहम्। प्राकृतं रूपभेदं च ये वदन्त्यसुरा हि ते ॥८४॥ साधुधर्मसुरद्रोहिदुष्टदैत्यवधादिषु । दोषानेव प्रपश्यन्ति कृष्णलीलासु ते किल ॥८५॥ अभ्यसूयन्ति भक्तेभ्यो वर्णयद्भ्यो गुणान्प्रभोः। यथार्थानपि ते मन्दाः स्तुवन्त्यन्यांस्तु सद्द्रुहः ॥८६॥ सतां गुणेषु दोषेक्षा वैरं चाथासतां नृणाम्। दोषेषु गुणधीर्मैत्रीत्यसुराणां स्वभावतः ॥८७॥ पुराणादिप्रसिद्धा च भवत्याख्यायिकात्र ताम्। दुष्टासुरस्वभावस्य बुद्ध्यै वच्मि समासतः ॥८८॥ शिशुपालो राजसूये धर्मराजस्य संसदि । दोषान्कृष्णगुणेष्वाह भीष्मोक्तेष्वखिलेष्वपि ॥८९॥ बालग्रहस्य राक्षस्याः पूतनाया वधे स तु । स्त्रीहत्यादोषमवदन्नतु बालावनं गुणम् ॥९०॥ अजीवकाष्ठभङ्गं च शकटासुरनाशने। चापल्यदोषं स प्राह श्रीकृष्णचरितेऽसुरः ॥९१॥ नाशेऽघस्य बकस्याऽऽह हत्यां सोऽहिपतत्त्रिणोः। नाशे वत्सारिष्टयोश्च गोहत्यादोषमाह च ॥९२॥ वल्मीकोत्खातदोषं च गोवर्धनगिरेर्धृतौ । कालीयमर्दनं दावानलपानं च मायिकम् ॥९३॥ कामदर्पहृतौ रासे गोपीभिर्बहुरूपिणा । ऊर्ध्ववीर्येण कृष्णेन पारदार्यं कृतेऽवदत् ॥९४॥ अन्नदस्य गुरोर्हत्यां दुष्टकंसविनाशने। राजहत्यां च तां प्राह ब्रह्महत्याधिकां खलः ॥९५॥

માટે જગતની ઉત્પત્તિ વગેરેમાં કાલાદિનું શ્રીકૃષ્ણની પ્રેરણા વિના સ્વતંત્રપણે કારણપણું કોઈ પણ સ્થાનમાં, કોઈ પણ કાળમાં, માનવું જ નહિ. (૮૧) સ્વતંત્ર એવા ભગવાન કાળ, માયા વગેરે વિના પોતે જ અનંત બ્રહ્માંડોને સર્જવા માટે સર્વથા સમર્થ છે; કેમ કે આ તો પ્રભુ-અસાધારણ ઐશ્વર્યયુકત છે. (૮૨) સ્વતંત્ર ભગવાન શ્રીકૃષ્ણ મનુષ્ય સમાન આકારમાં પણ આવા પ્રકારનાં સામર્થ્યવાળા છે; માટે શ્રીકૃષ્ણનું દિવ્યપણું અને મનુષ્યપણું એક ભાવથી વર્ણન કર્યું છે. (૮૩)

આવા પ્રકારનાં શ્રીકૃષ્ણનાં જન્મ, ચરિત્ર અને દેહને જે પુરુષો લૌકિક મનુષ્યની માફક માયિક કહે છે અને દિવ્ય અને માયિક આકારને ભિન્ન કહે છે તે પુરુષો અસુરો જ છે. (૮૪) સાધુઓ, ધર્મ અને દેવોનો દ્રોહ કરનારા જે દુષ્ટ દૈત્યોનો વિનાશ વગેરે જેમાં છે એવી શ્રીકૃષ્ણની લીલાઓમાં તે અસુરો દોષોને જ નિશ્ચે જુએ છે. (૮૫) મૂઢ અસુરો યથાર્થ એવા પણ પરમાત્માના ગુણોને પણ વર્ણન કરનારા શ્રીકૃષ્ણના ઉપાસકોના ગુણોમાં દોષોનો આરોપ કરે છે અને સત્ પુરુષોનો દ્રોહ કરનારા અસુરોની સ્તુતિ કરે છે. (૮૬) ભગવાન અને તેના ભક્તોના ગુણોમાં પણ દોષ જોવા તથા તેમની સાથે કારણ વિના વિરોધ; અને ભગવાન અને ભગવાનના ભક્તોના દ્રોહ કરનારા પુરુષોના દોષોમાં ગુણ બુદ્ધિ, અને તેમની સાથે મિત્રતા : આ પ્રકારની વર્તણૂકવાળા અસુરોની સ્થિતિ સ્વાભાવિકપણે જ તેવી હોય છે. (૮૭)આ અર્થમાં પુરાણાદિમાં પ્રસિદ્ધ આખ્યાન છે તે કથા, હું તમોને અસુરોના જે સ્વભાવના જ્ઞાન માટે સંક્ષેપથી કહું છું. (૮૮)

શિશુપાલ, ધર્મરાજાના રાજસૂયયજ્ઞમાં સભાને વિષે ભીષ્મે કહેલાં સમગ્ર શ્રીકૃષ્ણનાં ગુણોમાં દોષોને કહેતો હતો. (૮૯)બાળકોને નાશ કરનારી રાક્ષસી પૂતનાના વધમાં શિશુપાલ તો સ્ત્રીહત્યા નામનો દોષ કહેતો હતો. સમગ્ર બાળકોના રક્ષણરૂપી ગુણને કહેતો ન હતો. (૯૦) શકટાસુરના નાશ રૂપી શ્રીકૃષ્ણના ચરિત્રમાં અસુર શિશુપાલ જીવ વિનાના કાષ્ટને ભાંગી નાખ્યું અને ચપલતા નામનો દોષ કહેતો હતો. (૯૧) વત્સાસુર અને વૃષભરૂપી અસુરના વિનાશરૂપી શ્રીકૃષ્ણના ચરિત્રમાં ગૌહત્યા નામનો દોષ કહેતો હતો. (૯૨) ગોવર્ધન પર્વતના ધારણ કરવારૂપ શ્રીકૃષ્ણના ચરિત્રમાં રાફડો ઉખેડી નાખવારૂપ દોષ કહેતો હતો. યમુનાના ધરામાં ઝેરરૂપી અગ્નિથી જળને દૂષણ કરનાર કાલિય નાગના દમનમાં, દાવાનળના પાનમાં તથા વિશ્વરૂપ દર્શન-ચતુર્ભુજાદિ રૂપે દર્શનાદિ શ્રીકૃષ્ણના ચરિત્રમાં ઈન્દ્રજાળની માફક મિથ્યાપણું કહેતો હતો. (મલિન મંત્ર સાધન રૂપી દોષ કહેતો હતો.) (૯૩) બહુરૂપ ધારણ કરનારા નૈષ્ઠિક બ્રહ્મચારી શ્રીકૃષ્ણ ભગવાને કામના ગર્વને નાશ કરવામાં (તે નિમિત્તે) ગોપીઓની સાથે રાસમાં પરસ્ત્રીના સંગરૂપી દોષને કહેતો હતો. (૯૪) દુષ્ટ કંસના વિનાશરૂપી શ્રીકૃષ્ણના ચરિત્રમાં અતિ નીચ શિશુપાલ અન્નદાતા-ગુરૂની હત્યાદોષ અને બ્રહ્મહત્યા થકી અધિક રાજહત્યાદોષ : એમ બે દોષ કહેતો હતો. (૯૫)

सैन्यैः सप्तदशकृत्वः स्वजिघांसोर्यदुद्रुहः । जरासन्धस्याऽऽह नाशे स छलाद्धर्मिघातनम् ।।९६।। इत्याद्यसूयावाक्यानि कृष्णलीलासु सोऽवदत् । जगन्मङ्गलरूपासु धर्मस्थापनहेतुषु ।।९७।। नैष्ठिकव्रतिनं भीष्मं प्रशंसन्तं गुणान् प्रभोः । स षण्ढं बन्दिधर्माणमपुत्राघं तथावदत् ।।९८।। कृष्णार्चकं धर्मनिष्ठमपि भूपं युधिष्ठिरम् । स तु धर्मभ्रष्टमाह चाबुद्धिं पशुधर्मिणम् ।।९९।। ये तु कामक्रोधलोभाद्यधर्मान्वयमास्थिताः । भूभाराः कृष्णतद्भक्तद्रोग्धारः पापबुद्धयः ।।१००।। रुक्मिसाल्वैकलव्याद्या नृपा दैत्यांशसम्भवाः । तांस्त्वग्रपूज्यानेवाऽऽह महायज्ञे स तत्र च ।।१०१।। दयाक्षमासत्यशौच-धर्मज्ञानादिभिस्तथा । धर्मवंश्यैरनेकैश्च गुणैः कल्याणकारिभिः ।।१०२।। युक्तं कृष्णं नराकारं परं ब्रह्म तु सोऽसुरः । अपूज्यं भषकध्वाङ्क्षतुल्यं च प्राह दुर्मतिः ।।१०३।। इत्थं स चैद्यः कृष्णस्य तद्भक्तानां गुणेष्वपि । दोषानेव हि जग्राह नत्वेकमपि सद्गुणम् ।।१०४।। अन्येऽपि तद्धियो ये ते तदुक्तं मेनिरे ऋतम् । साम्प्रतं तादृशा ये स्युस्ते ज्ञेया ह्यसुरास्ततः ।।१०५।। ईदृशाः पुरुषा ये च नार्यो वा दुष्टचेतसः । कृष्णलीलासु मुह्यन्ति त एव भुवि नेतरे ।।१०६।। अज्ञत्वं पारवश्यत्वं विधिभेदादिकं तथा । तथा प्राकृतदेहत्वं देहत्यागादिकं तथा ।।१०७।। असुराणां विमोहाय दोषा विष्णोर्नहि क्वचित् । इति ब्रह्मपुराणे तु तन्मोहः स्पष्टमीरितः ।।१०८।। अभक्तानां हि मोहः स्यादासुर्या दुष्टया धिया । भक्तानां नेति भगवान् गीतायां प्राह सोऽर्जुनम् ।।१०९।।

---

ત્રેવીશ અક્ષૌહિણી સેનાએ સહિત સત્તર વખત પોતાને મારવા ઈચ્છનાર, યાદવોનો દ્રોહ કરનાર જરાસંધ રાજાનો ભીમસેન દ્વારા નાશ કરાવવા રૂપ શ્રીકૃષ્ણના ચરિત્રમાં કપટથી ધર્મી જરાસંધનો ઘાત કરાવ્યો એમ કહેતો હતો. (૯૬) ઈત્યાદિક સ્મરણ માત્રથી જગતનું કલ્યાણ કરનારી ધર્મના સ્થાપનમાં કારણભૂત શ્રીકૃષ્ણની લીલાઓમાં શિશુપાલ ગુણોમાં દોષોનું આરોપણના અસૂયાના વચનો બોલતો હતો. (૯૭) જીવંત પર્યન્ત નૈષ્ઠિક વ્રત ધારણ કરનાર શ્રીકૃષ્ણના વાત્સલ્ય, ઔદાર્યાદિક ગુણોની પ્રશંસા કરતા ભીષ્મને શિશુપાલ નપુંસક, બંદીજનની માફક પ્રશંસા ધર્મવાળા તથા અપુત્ર હોવાથી પાપવાળો છે એમ કહેતો હતો. (૯૮) રાજસૂય યજ્ઞમાં શ્રીકૃષ્ણના પૂજક ધર્મનિષ્ઠ યુધિષ્ઠિર રાજાને પણ શિશુપાલ ધર્મભ્રષ્ટ અને પશુધર્મવાળા કહેતો હતો. (૯૯) કામ, ક્રોધ,લોભ જેમાં છે એવા અધર્મ વંશને આશરેલા, પૃથ્વીના ભારભૂત તથા કૃષ્ણ અને તેના ભક્તોનો દ્રોહ કરનારા પાપ બુદ્ધિવાળા, દૈત્યના અંશથી ઉત્પન્ન થયેલા રૂકમી, સાલ્વ, એકલવ્ય વગેરે રાજાઓને શિશુપાલ મહાયજ્ઞમાં પ્રથમ પૂજા કરવા યોગ્ય કહેતો હતો. (૧૦૦-૧૦૧) દયા, ક્ષમા, સત્ય, શૌચ, ધર્મ, જ્ઞાન વગેરે જેમને છે એવા કલ્યાણકારી અનેક ગુણો સહિત; તે જ પ્રકારે ધર્મવંશમાં ઉત્પન્ન થયેલા શમ, દમ, તપ,ધૈર્યાદિ ગુણોથી યુક્ત મનુષ્યાકૃતિને ધારણ કરતા પરબ્રહ્મ કૃષ્ણને અસુર-દુષ્ટમતિ શિશુપાલ, રાજસૂય યજ્ઞમાં કૂતરા, કાગડા તુલ્ય કહેતો હતો. (૧૦૨-૧૦૩) આ પ્રમાણે ચેદી દેશનો અધિપતિ શિશુપાલ કૃષ્ણના ગુણોમાં અને તેમના ભક્તોના ગુણોમાં પણ દોષ ગ્રહણ કરતો હતો. એક પણ ગુણ ગ્રહણ કરતો ન હતો. (૧૦૪) શિશુપાલના સમાન બુદ્ધિવાળા, બીજા રૂકમી વગેરે સોએ સો રાજાઓ પણ શિશુપાલે કહેલાં વચનને સત્ય માનતા હતા. માટે હાલમાં પણ તેવા પ્રકારના ગુણોમાં દોષ જોનાર હોય તો તે સર્વે પણ અસુરો જાણવા. (૧૦૫) શિશુપાલની માફક અસુર સ્વભાવવાળા પાપાચરણમાં બુદ્ધિવાળા જે પુરુષો અને સ્ત્રીઓ હોય તે પુરુષો અને સ્ત્રીઓ જ પૃથ્વીમાં પ્રત્યક્ષ શ્રીકૃષ્ણનાં ચરિત્રોમાં મોહ પામે છે, ગુણોમાં દોષોને જુએ છે, દૈવી સંપત્તિવાળા ભગવાનના ભક્તો મોહ પામતા નથી. (૧૦૬) અજ્ઞાનીની માફક, જ્ઞાને રહિત પરવશ ભાવથી વર્તવાપણું તથા શાસ્ત્રોમાં કહેલા વિધિ પ્રમાણે વર્તવું અને કદાચિત્ ઉલ્લંઘન કરીને વર્તવું તથા બીજા માણસની માફક બાલ, યુવાન, વૃદ્ધાદિ ધર્મયુક્ત-પ્રકૃતિના કાર્ય પંચભૂતથી ઉત્પન્ન થયેલા દેહનું બતાવવું તથા અન્ય જનની માફક દેહનું ત્યાગ કરવાપણું; આ સર્વે મનુષ્યભાવથી પ્રાદુર્ભાવ પામેલા ભગવાનનું અજ્ઞત્વાદિ અસુરોના મોહને માટે છે. ક્યારેય પણ દોષરૂપ નથી પરંતુ ગુણો જ છે; આ પ્રમાણે બ્રહ્મપુરાણમાં, અસુરોને મોહ થાય છે એમ સ્પષ્ટ કહેલું છે. (૧૦૭-૧૦૮) આસુરી સંપત્તિ યુક્ત દુષ્ટ બુદ્ધિથી, ભગવાનથી વિમુખોને મોહ થાય, દૈવી સમ્પત્તિ યુક્ત શુદ્ધ ભક્તજનોને મોહ થાય નહિ : આ પ્રમાણે ભગવાન શ્રીકૃષ્ણ ગીતામાં અર્જુનને કહે છે. (૧૦૯)

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः । त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ! ॥११०॥ अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् । परं भावमजानन्तो मम भूतमहेश्वरम् ॥१११॥ मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः । राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥११२॥ तानहं द्विषतः क्रूरान्संसारेषु नराधमान्। क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥११३॥ आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि । मामप्राप्यैव कौन्तेय ! ततो यान्त्यधमां गतिम् ॥११४॥ महात्मानस्तु मां पार्थ ! दैवीं प्रकृतिमाश्रिताः । भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥११५॥ इत्यादि बहुशो वाक्यैरिदमेव स ऊचिवान् । त्यक्त्वाऽतः प्राकृतधियं तस्मिन्सेव्यः स सर्वथा ॥११६॥ यथा चिन्तामणिर्लोके कल्पवृक्षश्च कामधुक् । सेवितोऽसौ तथा कृष्णः सर्वाभीष्टफलप्रदः ॥११७॥ यत्र क्वापि वसेद्भूमौ तत्र त्वप्रार्थितोऽप्यसौ । स्वप्रतापेन कुरुते धनं धर्मं यशः सुखम् ॥११८॥ नित्यं सन्निहितोऽस्त्येव सोऽधुना द्वारिकापुरि । भक्तैरेकान्तिकैरेव दृश्यते हि क्वचित् क्वचित् ॥११९॥ या देहत्यागलीलाऽस्य सा त्वस्त्यसुरमोहिनी । न त्वत्र मोहो भक्तानां दृष्टान्तोऽत्र निगद्यते ॥१२०॥ कश्चिद्याति यथा स्वर्गमैन्द्रजालिकविन्नटः । पत्नीं राज्ञेऽर्पयित्वा स्वां युद्ध्यते तत्र चासुरैः॥१२१॥ विच्छिन्नसर्वावयवः पुनः पतति स क्षितौ । ततस्तत्स्त्री रुदन्त्यग्नौ तदङ्गैः सह दह्यते ॥१२२॥

---

હે અર્જુન ! (अजोऽपि सन् - હું અજ છું; यदा यदा हि - જ્યારે જ્યારે; परित्राणाय साधूनाम्-સાધુઓનું રક્ષણ કરવા માટે : આ ત્રણ પૂર્વ-શ્લોકમાં કહ્યા પ્રમાણે) મારા જન્મ અને કર્મ દિવ્ય છે, તેને યથાર્થપણે જાણે છે તે વર્તમાન શરીરનો ત્યાગ કરી ફરી સંસાર પામતો નથી, પરંતુ મને જ પામે છે. (૧૧૦) સર્વ ભૂતોના મહેશ્વર મારા પરંભાવને નહિ જાણતા અસુરજનો મનુષ્યપણે જણાતી મૂર્તિને આશરેલા મને બીજા માણસની માફક જાણીને તિરસ્કાર કરે છે. (૧૧૧) મારા ગુણોમાં દોષારોપણમાં કારણભૂત મોહને ઉત્પન્ન કરનારી રાક્ષસી પ્રકૃતિને આશરેલા મૂઢ પુરુષો નિષ્ફળ ઈચ્છાઓવાળા હોય છે અને તેમના આરંભો પણ નિષ્ફળ થાય છે, નિષ્ફળ જ્ઞાનવાળા, તેમજ વિપરીત વ્યાવહારિક જ્ઞાનવાળા થાય છે. (૧૧૨) મારો દ્વેષ કરનારા ઉગ્ર સ્વભાવવાળા, નરાધમ, અશુભ એ અસુરોને નિરંતર સંસારમાં આસુરી યોનિઓમાં જ હું યોજના કરું છું. (૧૧૩) હે અર્જુન ! આસુરી યોનિને પામેલા; દરેક જન્મમાં વિપરીત જ્ઞાનવાળા તેઓ મને નહીં પામીને (ભગવાન સર્વેશ્વર છે આવા જ્ઞાનને નહિ પામીને) જન્મથી અતિનીચ યોનિને પામે છે. (૧૧૪) હે પાર્થ ! દૈવી પ્રકૃતિને આશરેલા મહાત્માઓ મારાથી અતિરિક્ત સાંસારિક પદાર્થ માત્રમાં પોતાના મનને નહિ જોડનારા સતા મને સર્વ જગતના કારણ, અવિનાશી જાણીને ભજે છે. (૧૧૫)

હે મુને ! તે શ્રીકૃષ્ણે આ વગેરે કહેલાં ઘણા વાક્યોથી આ મેં પૂર્વે કહેલો અર્થ - સમુદાય જ કહ્યો છે માટે શ્રીકૃષ્ણમાં પ્રાકૃત બુદ્ધિનો ત્યાગ કરી શ્રીકૃષ્ણ સર્વ પ્રકારે ભજવા યોગ્ય છે. (૧૧૬) જેમ લોકમાં સેવાયેલો ચિંતામણિ, કલ્પવૃક્ષ અને કામધેનુ એ સર્વે પોતાના અભીષ્ટ ફળને આપનારા થાય છે તે પ્રકારે સેવા કરાયેલા શ્રીકૃષ્ણ પોતાના અભીષ્ટ ફલને આપનારા થાય છે. (૧૧૭) આ શ્રીકૃષ્ણ પૃથ્વીમાં જ્યાં કોઈ પણ સ્થાનમાં યાચના કર્યા વગર પણ પોતાના પ્રતાપથી ધન, ધર્મ, યશ, અને સુખ, સંપાદન કરે છે. (૧૧૮) તે શ્રીકૃષ્ણ હાલમાં પણ દ્વારિકાપુરીમાં સદા સમીપમાં જ નિવાસ કરી રહેલા છે જે માટે એકાંતિક ભક્તોને ક્યારેક કોઈ સમયે દેખાય છે. (૧૧૯) શ્રીકૃષ્ણની જે દેહત્યાગની લીલા તે તો અસુરોને મોહ પમાડનારી છે, આ દેહના ત્યાગની લીલા; ભક્તોને મોહ પમાડનારી નથી. આ અર્થમાં દૃષ્ટાંત કહીએ છીએ. (૧૨૦) જેમ ઈંદ્રજાળ વિદ્યાનો જાણનારો કોઈ નટ પોતાની પત્ની રાજાને રક્ષણ માટે આપીને સ્વર્ગે જાય છે ત્યાં સ્વર્ગમાં દેવોની સાથે યુદ્ધ કરતા દૈત્યોની સાથે દેવની સહાય માટે યુદ્ધ કરે છે. (૧૨૧) તે નટ છેદાઈ ગયા છે સર્વે હાથપગના અવયવો જેના એવો ફરીથી પૃથ્વીમાં જ્યાં ખેલ આરંભ્યો છે ત્યાં પડ્યો; પછી તેની પત્ની-મરેલા નટની સ્ત્રી પતિના દર્શનથી રુદન કરતી સતી પતિના મસ્તક, હાથ, પગ વગેરે અવયવોની સાથે રચેલી ચિતામાં પોતાના દેહને બાળે છે. (૧૨૨)

पूर्ववद्बद्धशस्त्रोऽथ नट एत्य निजां स्त्रियम् । नृपं याचति साक्रोशं जनयञ्जनविस्मयम् ॥१२३॥ नटविद्याविदो ये स्युस्ते तु मुह्यन्ति नात्र वै । अन्ये तु सर्वे भूपाद्या मुह्यन्त्येवाज्ञभावतः ॥१२४॥ तथैवात्रापि कृष्णस्य देहत्यागोऽथ तद्वपुः । गृहीत्वाग्निप्रवेशोऽपि रुक्मिण्यादेश्च मायिकः ॥१२५॥ एवं भगवता तेन तिरोधाने निजेच्छया । कृतेऽप्यज्ञा विमुह्यन्ति तन्मायावेदिनो न तु ॥१२६॥ असुराणां मोहनार्थं लीलां भगवता कृताम् । एतां विदन्तो भक्तास्तं पश्यन्तीह यथा पुरा ॥१२७॥ स एष भगवान्कृष्णः पुम्भिः स्त्रीभिश्च निर्गुणः । ब्रह्मचर्यादिनियमान्पालयद्भिरुपास्यताम् ॥१२८॥ उपासकानां तस्यापि तत्सबन्धवशान्मुने ! । निर्गुणत्वं भवत्येव तज्ज्ञानादेश्च सर्वथा ॥१२९॥ श्रीमद्भागवते ह्येतद्भक्तमेकान्तिकं निजम् । उद्धवं भगवानाह स्वमुखेनैव तच्छृणु ॥१३०॥ कैवल्यं सात्त्विकं ज्ञानं रजो वैकल्पिकं तु यत् । प्राकृतं तामसं ज्ञानं मन्निष्ठं निर्गुणं स्मृतम् ॥१३१॥ वनं तु सात्त्विको वासो ग्रामो राजस उच्यते । तामसं द्यूतसदनं मन्निकेतं तु निर्गुणम् ॥१३२॥ सात्त्विकः कारकोऽसङ्गी रागान्धो राजसः स्मृतः । तामसः स्मृतिविभ्रष्टो निर्गुणो मदुपाश्रयः ॥१३३॥ सात्त्विक्याध्यात्मिकी श्रद्धा कर्मश्रद्धा तु राजसी । तामस्यधर्मे या श्रद्धा मत्सेवायां तु निर्गुणा ॥१३४॥

---

પછી પૂર્વની માફક પ્રત્યક્ષ દેખાતો; જેણે શસ્ત્ર બાંધ્યાં છે એવો નટ સ્વર્ગથી પાછો આવીને લોકોને આશ્ચર્ય ઉત્પન્ન કરતો સતો, આક્ષેપ કરતો સતો રાજાની પાસે પોતાની સ્ત્રીને માગે છે. [પછી રાજાએ કહ્યું કે તે તો તારા શરીરના અવયવોને ભેગા કરી ચિતાગ્નિમાં પોતાનું શરીર બાળીને પરલોકમાં ગઈ. પછી પારિતોષિકની ઈચ્છાવાળો નટ, હે સ્ત્રી! અહીં આવ : એમ તેને બોલાવે છે; આ પ્રકારે બોલાવેલી સ્ત્રી રાજાના સિંહાસનની નીચેથી આવીને રાજાને નમસ્કાર કરે છે એમ પણ પ્રસંગોપાત જાણવું; ] (૧૨૩) જે પુરુષો નટવિદ્યાને જાણનારા હોય તે તો આ નટના ચરિત્રમાં મોહ પામતા નથી. રાજા વગેરે નટવિદ્યાને નહિ જાણનારા સર્વે જોનારા જનો તો મોહ પામે છે. (૧૨૪) તે પ્રકારે જ શ્રીકૃષ્ણનો આ લોકમાં દેહનો ત્યાગ, અને ત્યારબાદ શ્રીકૃષ્ણનું શરીર ગ્રહણ કરી રૂકમણી વગેરે આઠ પટરાણીઓનો અગ્નિમાં પ્રવેશ પણ ભગવાનની યોગમાયાથી થયેલો છે. (૧૨૫) આ પ્રમાણે ભગવાન શ્રીકૃષ્ણ પોતાની ઈચ્છાથી અન્તર્ધાન થયા તેમાં ભગવાનની યોગમાયાને નહિ જાણનારા અભક્તો મોહ પામે છે. તેમની માયા જાણનારા ભક્તો મોહ પામતા નથી. (૧૨૬) અસુરોને મોહ પમાડવા માટે શ્રીકૃષ્ણે આચરણ કરેલી પોતાના દેહત્યાગ રૂપ લીલાને જાણનારા ભક્તજનો (હાલમાં પણ) શ્રીકૃષ્ણને દ્વારિકામાં જેમ પૂર્વે (તે સમયનાં ભક્તોએ સાક્ષાત્ જોયા હતા તેમ)રૂકમણી વગેરે સહિત જ જુએ છે. (૧૨૭) પ્રાકૃત ગુણે રહિત એવા તે ભગવાન શ્રીકૃષ્ણ, બ્રહ્મચર્યાદિ નિયમોને પાલન કરનારા પુરુષો અને સ્ત્રીઓએ પોતાના કલ્યાણ માટે ઉપાસનીય છે. (૧૨૮) હે મુને ! શ્રીકૃષ્ણના ઉપાસક ભક્તોનું અને શ્રીકૃષ્ણ સંબંધી જ્ઞાનાદિનું પણ શ્રીકૃષ્ણના સંબંધથી સર્વ પ્રકારે નિર્ગુણપણું થાય છે. (૧૨૯) શ્રીમદ્ ભાગવત પુરાણમાં શ્રીકૃષ્ણે પોતાના મુખથી પોતાના એકાંતિક ભક્ત ઉદ્ધવને એ ભક્ત આદિનું નિર્ગુણપણું કહ્યું છે તે સાંભળો : (૧૩૦) દેહાદિથી ભિન્ન શુદ્ધ જીવાત્મા વિષયક જ્ઞાનને સાત્ત્વિક કહેલું છે. દેવ, મનુષ્યાદિ માયિક ભોગાદિ વિષયવાળું જે જ્ઞાન તે રાજસ કહ્યું છે. મૂઢતા વિશિષ્ટ જે બાળક મૂંગા વગેરેની માફક જે જ્ઞાન તે તામસ કહેલું છે. પ્રકૃતિના ગુણોથી પર સદા દિવ્ય વિગ્રહ ધારણ કરેલા મારે વિષે જે 'આ પ્રત્યક્ષ પરમેશ્વર છે' આવું જ્ઞાન તે નિર્ગુણ કહેલું છે. (૧૩૧) વનમાં નિવાસ સાત્ત્વિક-સત્ત્વોદયમાં કારણ કહ્યો છે, ગામમાં નિવાસ તે રાજસ કહ્યો છે અને દ્યુત તથા મદ્યપાનાદિના સદનનો નિવાસ તામસ કહ્યો છે અને મારા ભુવનમાં નિવાસ નિર્ગુણ કહ્યો છે. (૧૩૨) આત્માથી ભિન્ન કર્મફલોની આસક્તિ રહિત, વર્ણાશ્રમોચિત કર્મ કરનારો સાત્ત્વિક કર્તા કહેલો છે. કર્મફલની અભિલાષાવાળો કર્તા રાજસ કહેલો છે; માયિક વિષયોનું અનર્થ આપનારા છે એમ જોવા છતાં પણ સ્મૃતિથી ભ્રષ્ટ થઈને ક્રિયાનો કર્તા છે તે તામસ કહેલો છે. મારી અનુવૃત્તિયુક્ત એકાંતિક ભક્તિ યુક્ત કર્તા તે નિર્ગુણ કહ્યો છે. (૧૩૩) કેવળ આત્મજ્ઞાનના વિષયવાળી શ્રદ્ધા સાત્ત્વિક શ્રદ્ધા કહેલી છે. કેવળ વર્ણાશ્રમના ધર્મના આચરણની શ્રદ્ધા રાજસી કહેલી છે. અધર્મમાં ધર્મ આ પ્રકારની શ્રદ્ધા તે તામસી કહેલી છે. મારા આરાધનમાં જે શ્રદ્ધા છે તે નિર્ગુણ કહેલી છે. (૧૩૪)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

पथ्यं पूतमनायस्तमाहार्यं सात्त्विकं स्मृतम् । राजसं चेन्द्रियप्रेष्ठं तामसं चार्तिदाशुचि ॥१३५॥ सात्त्विकं सुखमात्मोत्थं विषयोत्थं तु राजसम् । तामसं मोहदैन्योत्थं निर्गुणं मदुपाश्रयम् ॥१३६॥ इत्येवं भगवद्वाक्यप्रामाण्यान्मामकैर्जनैः । सगुणत्वं निर्गुणत्वमित्थं ज्ञेयं न चान्यथा ॥१३७॥ इत्युक्तं वासुदेवस्य स्वरूपं ते सुनिश्चितम् । ऐक्यं च दिव्यमनुजाकारयोरपि सन्मते ! ॥१३८॥ एतच्छ्रुतेर्विलीयन्ते कुतर्काः संसृतिप्रदाः । देशकालानुसारासु कृष्णलीलासु ये नृणाम् ॥१३९॥ निरीशशास्त्रश्रुतिजं विश्वोत्पत्तिलयादिषु । स्वतन्त्रहेतुताज्ञानं कालादेश्च निवर्तते ॥१४०॥ एतदेवाभ्यसेन्नित्यं मुमुक्षुर्भक्तिवृद्धये । सम्यक्स्वरूपज्ञानार्थं श्रीकृष्णस्य च सत्पतेः ॥१४१॥ अधीयते ज्ञानमेतत्सकृदप्यादराच्च ये । भगवद्विषयास्तेषां सर्वे नश्यन्ति संशयाः ॥१४२॥ दिव्यं कृष्णस्य रूपं भवति च सततं तस्य लोकोऽपि दिव्यो दिव्या भोगाश्च भोग्यान्यपि च भगवतस्तस्य दिव्यानि सन्ति । दिव्या वै पार्षदाश्च प्रकटितनृतनोः शक्तयस्तस्य दिव्या दिव्या भक्ताश्च सर्वे जगति यदुपतेः सन्ति दिव्याः क्रियाश्च ॥१४३॥ इत्थं निर्दोषरूपं सकलगुणगणालङ्कृतं दिव्यमूर्तिं ज्ञात्वा श्रीवासुदेवं भजत भुवि सदा मुक्तये भो मदीयाः ! । एकस्मिन्नद्वितीये भगवति च परब्रह्मणि द्वैतबुद्धिः कर्तव्या नैव तस्मिन्नणुरपि च कुधीः सच्चिदानन्दरूपे ॥१४४॥ सुव्रत उवाच - इति श्रुत्वाऽऽकृत्योर्हरिगदितमद्वैतमृषिराड् रमाभर्तुः सोऽभूत्सह सकलभक्तैः प्रमुदितः । नराकारे तस्मिन्भगवति हि नारायणमुनौ दृढं दिव्यं भावं सपदि नृपते ! प्रापदमलम् ॥१४५॥

પથ્ય, પવિત્ર અને અનાયાસથી પ્રાપ્ત થયેલું; ભોજન કરવા યોગ્ય અન્નાદિ, સાત્વિક કહેલું છે. ઈન્દ્રિયોને સુખ આપનારું ભોજન રાજસ કહેલું છે. દુઃખ આપનાર, અશુદ્ધ, શાસ્ત્રથી નિષેધ કરાયેલું-ભોજન કરવા યોગ્ય અન્ન તામસ કહેલું છે. મને નિવેદન કરેલું ભોજન કરવા યોગ્ય અન્ન નિર્ગુણ કહેલું છે. (૧૩૫) પોતાના આત્માના અનુભવથી ઉત્પન્ન થયેલું સુખ સાત્વિક કહેલું છે. માયિક વિષયના ઉપભોગથી ઉત્પન્ન થયેલું સુખ રાજસ કહેલું છે. મોહજન્ય માદક વસ્તુના ભોજનથી ઉત્પન્ન થયેલું સુખ અને દીનતાપણાથી (પુત્ર કલત્રાદિના લાલનથી) ઉત્પન્ન થયેલું સુખ તે તામસ કહેલું છે. મારા સ્વરૂપના ગુણચરિત્રાદિના શ્રવણ, કીર્તન, ધ્યાન, દર્શનાદિજન્ય સુખ નિર્ગુણ કહેલું છે. (૧૩૬) હે મુને ! આ પ્રકારે મેં કહ્યા પ્રમાણે શ્રીકૃષ્ણના વચનના પ્રમાણથી જ મારા આશ્રિતજનોએ સગુણપણું અને નિર્ગુણપણું જાણવું; બીજા પ્રકારે જાણવું નહિ. (૧૩૭)

હે સન્મતે ! આ પ્રકારે વાસુદેવનું સ્વરૂપ વિષયક જ્ઞાનશાસ્ત્ર નિશ્ચિત કરેલું જેમ હોય તેમ તમોને મેં કહ્યું. તથા દિવ્ય અને મનુષ્યાકારનું એકપણું પણ કહ્યું. (૧૩૮) દેશકાળને અનુસરી કરેલી શ્રીકૃષ્ણની લીલાઓમાં સંસાર આપનારા જે મનુષ્યોના કુતર્કો તે આના શ્રવણથી નિવૃત્તિ પામે છે. (૧૩૯) નિરીશ્વર શાસ્ત્રના શ્રવણથી ઉત્પન્ન-વિશ્વની ઉત્પત્તિ, સ્થિતિ લયાદિમાં,કાલ, કર્મ, સ્વભાવ,આદિનું સ્વતંત્રપણે કારણપણાનું જ્ઞાન નિવૃત્તિ પામે છે. (કાલાદિ પણ પરમાત્માની આજ્ઞાથી વિશ્વસર્ગાદિ કાર્યમાં સમર્થ થાય છે એમ જાણે છે) (૧૪૦) સાધુના પતિ શ્રીકૃષ્ણના યથાર્થ સ્વરૂપના જ્ઞાન માટે અને શ્રીકૃષ્ણમાં પોતાની ભક્તિ વૃદ્ધિ પમાડવા માટે મુમુક્ષુ ભક્ત આ મેં કહેલા જ્ઞાનનો જ નિરંતર અભ્યાસ કરે. (૧૪૧) જે મુમુક્ષુ ભક્તો આ મેં કહેલા જ્ઞાનને શ્રદ્ધાથી એક વાર પણ પાઠ કરે છે તે મુમુક્ષુ ભક્તોને શ્રીકૃષ્ણના સ્વરૂપ સંબંધી સર્વે સંશયો નાશ પામે છે. (૧૪૨) પૃથ્વીમાં પોતાની ઈચ્છાથી પ્રાદુર્ભાવ થયેલા મનુષ્યાકાર શ્રીકૃષ્ણની આકૃતિ નિરંતર દિવ્ય છે. શ્રીકૃષ્ણનો લોક પણ દિવ્ય છે. અને તેના સુખો દિવ્ય છે. અને તેમના ભોગને યોગ્ય વસ્તુઓ પણ દિવ્ય છે. વળી તેના પાર્ષદો દિવ્ય છે. તેમની શક્તિઓ દિવ્ય છે. શ્રીકૃષ્ણના સર્વે ભક્તો પુરુષો અને સ્ત્રીઓ, તથા ક્રિયા-ચરિત્રો બધું દિવ્ય છે. (૧૪૩) હે મુક્તાનંદાદિ મારા ભક્તો! આ પ્રમાણે નિર્દોષ રૂપવાળા, સમગ્ર સત્ય શૌચાદિ ગુણ સમુદાયોથી અલંકૃત દિવ્ય મૂર્તિ શ્રીકૃષ્ણને જાણી એકાંતિક મુક્તિની પ્રાપ્તિ માટે પૃથ્વીમાં હંમેશા પ્રેમથી નવ પ્રકારે આરાધન કરો. એક અસાધારણ માટે જ અદ્વિતીય, સ્વરૂપ, સ્વભાવ, ગુણ, વિભૂતિ ઐશ્વર્યાદિથી કોઈની સમાન નહિ એવા પરબ્રહ્મ ભગવાનના દિવ્ય અને મનુષ્યાકારમાં દ્વૈતભાવ કરવો નહિ અને એક લેશમાત્ર પણ દોષબુદ્ધિ કરવી નહિ. (૧૪૪)

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! આ પ્રમાણે શ્રીહરિએ કહેલું શ્રીલક્ષ્મીપતિનાં દિવ્યાકાર અને મનુષ્યાકારનું અદ્વૈતપણું સાંભળીને મુનીન્દ્ર મુક્તાનંદમુનિ સભામાં બેઠેલા ત્યાગી અને ગૃહસ્થ સમગ્ર ભક્તજનોની સાથે અતિહર્ષ પામ્યા. અને પોતાની ઈચ્છાથી મનુષ્યાકારને ધારણ કરનાર ભગવાન-પરોક્ષપણે પોતાના જ્ઞાનનો ઉપદેશ આપનાર નારાયણમુનિમાં અતિગાઢ નિર્મળ દિવ્યભાવને તત્કાલ જ પામ્યા. (૧૪૫)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**स्वरूपाद्वैतं यः पठति च शृणोतीह विमलं परं ज्ञानं नारायणमुनिमुखान्निःसृतमिदम् । प्रभौ तस्मिन् भक्तिं परमसुखरूपे स परमां सभुक्तिं मुक्तिं चेप्सितमखिलसौख्यं च लभते ॥१४६॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे प्रबोधन्युत्सवे श्रीनारायणमुक्तानन्दसंवादे श्रीकृष्णस्वरूपाद्वैतज्ञाननिरूपणनामैकोनत्रिंशोऽध्यायः ॥२९॥

सुव्रत उवाच – **तं राजमानं सदसि नवम्यां च निशागमे । वासुदेवानन्दनामा पप्रच्छ वर्णिराडथ ॥१॥ कृष्णमन्त्रजपस्याहं कार्यस्य प्रत्यहं हरे !। विधानं श्रोतुमिच्छामि कृतः सिद्धयेत्स येन वै ॥२॥** श्रीनारायणमुनिरुवाच – **कथयामि समासेन विधिं ते वर्णिसत्तम ! । मन्त्रराजजपस्याहं सच्छास्त्रप्रतिपादितम् ॥३॥ स्नातः शुचिः स्वस्थचित्तः क्रोधचिन्ताविवर्जितः । सद्गुरुप्राप्तमन्त्रश्च जापकः पुरुषो मतः ॥४॥ यतीनामासनं श्लक्ष्णं कूर्माकारमुदीरितम् । अन्येषां तु चतुष्पादं चतुरस्त्रं च सम्मतम् ॥५॥ कार्ष्णाजिनं व्याघ्रचर्म कौशेयं वेत्रनिर्मितम् । वास्त्रं वा काम्बलं कौशमासनं जपसिद्धिदम् ॥६॥ गोमयं मृन्मयं भिन्नं पालाशं पैप्पलं तथा । लोहबद्धं वंशजं च पाषाणं वर्ज्यमासनम् ॥७॥ काष्ठं चाघटितं वर्ज्यं लोहकीलमयज्ञियम् । स्यादापदि शुभं सर्वं विना ह्यशुचिलेपनम् ॥८॥ तुलसीकाष्ठसम्भूता जपमाला शुभा मता । धात्रीकाष्ठभवा वापि पद्मबीजोद्भवा तथा ॥९॥ तथा स्फटिकमाला ग्राह्या रुद्राक्षमालिका । कुशग्रन्थिभवा वापि चन्दनादिमयी च वा ॥१०॥ सर्वापि माला श्रीविष्णुपादस्पर्शाच्छुचिर्भवेत् । जपोचिता च तस्मात्तां बिभृयात्तादृशीं पुमान् ॥११॥**

આ શ્રી નારાયણ મુનિના મુખથી નીકળેલું દિવ્ય અને મનુષ્યાકૃતિનું ઐક્યપણું જેમાં છે એવું નિર્મળ સર્વોત્તમ જ્ઞાનશાસ્ત્ર આ લોકમાં જે જન પાઠ કરશે અને સાંભળશે તે અતિ સમર્થ પરમસુખરૂપ શ્રીનારાયણ મુનિમાં પરમૈકાંતિકી ભક્તિ અને ભુક્તિ સહિત એકાંતિકી મુક્તિ અને ઈચ્છિત સમગ્ર સુખ પામે છે. [પોતાના સ્વરૂપનું અદ્વૈત નામનું સર્વોત્તમ જ્ઞાન પોતે પોતાનાં જનોને સંભાળાવતા હતા તે પુરુષોત્તમ શ્રીહરિને હું પોતાના હૃદયમાં ધારણ કરું છું.] (૧૪૬)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીયપ્રકરણે પ્રબોધન્યુત્સવે શ્રીનારાયણમુક્તાનંદસંવાદે શ્રીકૃષ્ણ સ્વરૂપાદ્વૈતજ્ઞાનનિરૂપણ નામૈકોનત્રિંશોઽધ્યાયઃ (૨૯)*

## અધ્યાય : ૩૦

## સ્વયં શ્રીહરિએ પોતાના મંત્રજપનું વિધાન વાસુદેવાનંદ નામના વર્ણીને કહ્યું છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! પછી કારતક સુદી નવમીને દિવસે સંધ્યા આરતી પછી સભામાં શોભાયમાન શ્રીહરિને વાસુદેવાનંદ નામના વર્ણીરાજ પ્રશ્ન પૂછતા હતાઃ (૧) હે હરે ! દરરોજ કરવા યોગ્ય શ્રીકૃષ્ણના મંત્રજપનો વિધિ હું સાંભળવા ઈચ્છું છું; જે વિધિથી આચરણ કરેલો શ્રીકૃષ્ણ મંત્રનો જપ સિદ્ધ થાય. (૨) હે વર્ણી ! સત્શાસ્ત્રોએ પ્રતિપાદિત મંત્રરાજના જપનો વિધિ તમોને સંક્ષેપથી હું કહું છું. (૩) સ્નાન કરેલો પવિત્ર એકાગ્ર મનવાળો, ક્રોધ અને ચિંતાથી રહિત, તેમજ ધર્મવંશના આચાર્ય થકી દીક્ષાવિધિથી ગ્રહણ કરેલો છે મંત્ર જેણે એવો જપકર્તા પુરુષ અધિકારી માનેલો છે. (૪) કૂર્માકાર આસન સંન્યાસીઓને શોભારૂપ કહેલું છે. અને બીજા સર્વ આશ્રમીઓને તો ચાર ખૂણાવાળું આસન શ્રેષ્ઠ માનેલું છે. (૫) કૃષ્ણ મૃગનું ચર્મ, વ્યાઘ્રચર્મ, રેશમી વસ્ત્રનું કરેલું, નેતરનું આસન, વસ્ત્રનું આસન, તથા કંબલ અથવા દર્ભનું આસન, જપના ફળને આપનારું છે. (૬) (જપમાં ત્યાગ કરવા યોગ્ય આસનો કહે છે :) છાણ (ગોમય)થી કલ્પેલું, મૃત્તિકામય, ખાખરાના કાષ્ટથી, પીપળાના લાકડાનું, લોખંડના ખીલા પાટીએ જડેલું, વાંસડાનું કરેલું, પાષાણથી કરેલું ; આ બધાં આસનો જપમાં વર્જ્ય છે, તથા ઘડ્યા વિનાનું અને ઘડેલું છતાં લોઢાના ખીલાવાળું કાષ્ઠ તથા યજ્ઞાર્હ કાષ્ઠથી નહિ કરેલું આસન વર્જ્ય છે આપત્કાળમાં સર્વે પૂર્વે કહેલાં આસન અશુદ્ધ દ્રવ્યના લેપ વિના શુભ માનેલાં છે. (૭-૮) તુલસીના કાષ્ઠના મણિકાથી કરેલી તથા આમળાના કાષ્ઠના મણકાથી કરેલી તથા કમળના બીજથી કરેલી જપમાળા શુભ માનેલી છે, જપ વિધિમાં શ્રેષ્ઠ છે. (૯) સ્ફટિકમાળા અને રુદ્રાક્ષની માળા, કુશની ગાંઠોની કરેલી અથવા ચંદનના કાષ્ઠની માળા જપવિધિમાં ગ્રહણ કરવી. (૧૦) પૂર્વે કહેલી સર્વ માળાઓ શ્રીવિષ્ણુના ચરણ સ્પર્શથી પવિત્ર થયેલી જપવિધિમાં યોગ્ય છે; તે માટે જપ કરનારો પુરુષ તે જપમાળા શ્રી વિષ્ણુના ચરણસ્પર્શ કરેલી, જપક્રિયામાં ધારણ કરે. (૧૧)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

निश्चला त्रुटिता चैव सशब्दा च पुरातनी । ग्रथिता जीर्णसूत्रेण जपे माला विगर्हिता ॥१२॥ धृता पाषण्डिभिर्या तु पापिभिश्च दुरात्मभिः । असंस्कृता तथा माला ज्ञेया दुःस्वप्नदा नृणाम् ॥१३॥ अष्टोत्तरशतेनोक्ता मणिभिर्मालिकोत्तमा । मध्यमा स्यात्तदर्धेन तदर्धेन कनीयसी ॥१४॥ अकारादिक्षकारान्तान् वर्णान् सर्वान् क्रमेण वा । लिखित्वा स्थापयेदग्रे पङ्क्त्यैव मणिकानिव ॥१५॥ एकैकमानुलोम्येन प्रातिलोम्येन च क्रमात् । पश्यन्वर्णजपं कुर्यादक्षमालेयमुच्यते ॥१६॥ आरभ्यानामिकामध्यात्प्रादक्षिण्येन च क्रमात् । तर्जनीमूलपर्यन्तं जपेत् सा करमालिका ॥१७॥ स्वस्तिकासनमासीनो मुक्तपद्मासनं तु वा । ऋजुरेकाग्रदृष्टिश्च भगवन्तं हृदि स्मरन् ॥१८॥ वस्त्रगोपितमालश्च मन्त्रमेकैकमुच्चरन् । त्यजन्नेकैकमणिकं जपेन्नियतसङ्ख्यया ॥१९॥ तर्जन्या न स्पृशेत्सूत्रं मध्यमामध्यपर्वणि । अङ्गुष्ठपर्वणा मालामणिमेकैकमाहरेत् ॥२०॥ न स्पृशेद्वामहस्तेन जपमालां कदाचन । न पातयेत्करात्तां च जपान्तावधि जापकः ॥२१॥ प्रमादात्पतितायां तु मालायां स्वस्य हस्ततः । तद्दोषशान्तये कुर्याज्जपमष्टोत्तरं शतम् ॥२२॥ मालां न स्पर्शयेद्भूमिं स्वस्य पादतलं तथा । जपं कुर्वन्न हस्तं च धूनयेन्न च मस्तकम् ॥२३॥ उष्णीषी कञ्चुकी नम्रो मुक्तकेशो मलावृतः । अपवित्रकरोऽशुद्धः प्रलपन्न जपेत्क्वचित् ॥२४॥ अप्रावृतकरश्चैव संवेष्टितशिरास्तथा । चिन्ताशोकाकुलमनाः क्रुद्धो भ्रान्तः क्षुधाकुलः ॥२५॥

---

નિશ્ચલ-જેને ફેરવી ન શકાય તેવા મણિકાવાળી, તૂટેલી, કટ કટ, ધ્વનિયુક્ત અને જૂના દોરાથી પરોવેલી માળા જપમાં નિંદિત છે. (૧૨) પાખંડી અને પાપી દુષ્ટાચારવાળા પુરુષોએ પોતાના કંઠ વગેરેમાં ધારણ કરેલી તથા ભગવાનનાં ચરણારવિન્દના સ્પર્શે રહિત જે માળા તે જપ કરનારા મનુષ્યોને દુષ્ટ સ્વપ્ન આપનારી છે એમ જાણવું. (૧૩) એકસો ને આઠ મણકાવાળી માળા ઉત્તમ કહેલી છે. ચોપન મણકાવાળી મધ્યમ માળા માનેલી છે. સત્તાવીશ મણકાવાળી કનિષ્ઠ માળા છે. (૧૪) અકાર આદિ જેમાં છે. અને ક્ષકાર અન્તમાં જેમને છે તે સર્વે અક્ષરો મણકા હોય ને શું, એમ પંક્તિથી લખીને પોતાની આગળ સ્થાપન કરે; (૧૫) અકારાદિ અક્ષર ક્રમથી એક એક વર્ણને જોતો થકો અનુલોમપૂર્વક પંક્તિના જોવાથી અને પ્રતિલોમપણે પંક્તિ જોવાથી મંત્રનું આવર્તન કરે તે આ અક્ષમાલા-અક્ષરમાળા કહેવામાં આવે છે. અકારાદિ ચૌદ સ્વરો, પચીશ સ્પર્શો, ચાર અન્તઃસ્થ, ચાર ઉષ્માક્ષર, અનુસ્વાર- વિસર્ગ બે, જિહ્વામૂલીય- ઉપધ્માનીય બે , ૐ જ્ઞઃ અને ક્ષ : આ ત્રણ આ રીતે ચોપન અક્ષરો છે. (૧૬) અનામિકાના મધ્ય પર્વથી આરંભીને પ્રદક્ષિણાના ક્રમથી તર્જનીના મૂલ સુધી દશ પર્વમાં મંત્રની આવૃત્તિ કરે તે કરમાળા કહેવાય છે. મધ્યમા અંગુલીના મૂલના બે પર્વોને મેરુ કહેલો છે. તેના ઉલ્લંઘનમાં દોષ કહેલો છે. (૧૭) સ્વસ્તિકાસનથી બેઠેલો અથવા મુક્તપદ્માસનથી બેઠેલો, સરલ શરીરવાળો, એકાગ્રદષ્ટિવાળો થઈ ભગવાનને જેવા જોયા હોય અને જેવા સાંભળ્યા હોય એવા પોતાના ઈષ્ટદેવ શ્રીકૃષ્ણને પોતાના હૃદયમાં સ્મરણ કરતો સતો વસ્ત્રથી ઢાંકેલી છે માળા જેણે એવો; એક એક મંત્ર ઉચ્ચારણ કરતો, એક એક મણકાને ત્યાગ કરતો; જપ કરનારો સંખ્યાના નિયમથી જપ કરે. (૧૮-૧૯) તર્જની આંગળીના મધ્ય પર્વમાં અંગૂઠાના આગલા ભાગથી એક એક માળાના મણિકાને આહરણ કરે. (૨૦) જપ કરનાર ડાબા હાથથી જપમાળાને ક્યારેય સ્પર્શ ન કરે, પોતાના નિયમના જપ પૂરા થતાં સુધી માળાને પોતાના જમણા હાથથી નીચે પડવા દે નહિ. (૨૧) પ્રમાદથી પોતાના જમણા હાથથી માળા પડી જાય તો માળાના પડી જવાના દોષનું નિવારણ કરવા માટે એકસો આઠ જપ વધારે કરે, અર્થાત્ એક માળા વધારે ફેરવે. (૨૨) માળાને ભૂમિનો સ્પર્શ ના કરાવે, અર્થાત્ ભૂમિ ઉપર મૂકે નહિ તથા પોતાના પગના તળને સ્પર્શ ના થાય તેમ કરવું. જપ કરતો સતો માળાએ સહિત જમણો હાથ વારંવાર કંપાવે નહિ અને પોતાનું મસ્તક પણ હલાવે નહિ. (૨૩) માથાની પાઘડી સહિત, અંગરખા સહિત, નીચે મુખ રાખીને, શિખા બાંધ્યા વગર, સ્નાનાદિ કર્યા વગર, અપવિત્ર હાથવાળો, ઉદ્વિગ્ન મનવાળો, તથા બીજાની સાથે વાતો કરતો થકો ક્યારેય જપ કરે નહિ. (૨૪) ગોમુખી અથવા વસ્ત્રના ખંડથી જેણે જમણો હાથ ઢાંક્યો નથી એવો તથા વસ્ત્રાદિથી બાંધેલા મસ્તકવાળો, (માથે ઓઢેલાનો નિષેધ નથી) ચિન્તા અને શોકથી આકુળવ્યાકુળ મનવાળો, ક્રોધ યુક્ત, ભ્રાન્ત ચિત્તવાળો, તથા ભૂખથી વ્યાકુળ થયેલો સતો જપ ના કરે. (૨૫)

अनासनः शयानश्च गच्छन्नुत्थित एव च । उपानत्पादुकारूढो यानशय्यागतस्तथा ॥२६॥ न जपेद्वैष्णवो मन्त्रं प्रौढपादश्च कर्हिचित् । प्रसार्य पादौ न जपेत्काकासनगतस्तथा ॥२७॥ प्रहसंस्त्वरमाणश्च नेक्षमाण इतस्ततः ॥ करसंज्ञां नेत्रसंज्ञां कुर्वन्नैव जपेत्पुमान् ॥२८॥ रथ्यायामशिवस्थाने न जपेत्तिमिरान्तरे । दुर्गन्धिवातस्थाने च न पापिजनसन्निधौ ॥२९॥ निद्राख्योऽस्ति महान्विघ्नो जपे ह्यलसदुर्जयः । जयेत्तं सावधानोऽतो विफलोऽस्त्यन्यथा जपः ॥३०॥ अङ्गुल्यग्रे तु यज्जप्तं यजप्तं मेरुलङ्घने । असङ्ख्यातं तु यज्जप्तं तत्सर्वं निष्फलं भवेत् ॥३१॥ निषेधातिक्रमं नैव कुर्यादेष विनापदम् । मनो नियम्य मतिमान् जपं कुर्वीत सर्वथा ॥३२॥ मनःसंयमनं शौचं मौनं मन्त्रार्थचिन्तनम् । अव्यग्रत्वमनिर्वेदो जपसंसिद्धिहेतवः ॥३३॥ जपेच्च नियतो भक्त्या त्रिकालं पुरुषोत्तमम् । बाह्यैर्वा मानसैर्द्रव्यैः पूजयित्वा स्थिरान्तरः ॥३४॥ मार्जारमूषकस्पर्शे क्रोधेऽधोवायुसर्पणे । जपकाले तु सञ्जाते मालां वस्त्रोपरि न्यसेत् ॥३५॥ आचम्य प्राणानायम्य दृष्ट्वा वाऽर्कं हरिं स्मरन् । शेषं कुर्याज्जपं स्नात्वा स्पर्शे त्वस्पृश्यवस्तुनः ॥३६॥ त्रयो भेदा जपस्योक्ता वाचिकोपांशुमानसाः । कनीयोमध्योत्कृष्टास्तान् ज्ञात्वोत्तममाचरेत् ॥३७॥ उदात्तनीचस्वरितैः शब्दैः स्पष्टपदाक्षरैः । मन्त्रस्योच्चारणं यत्र स जपो वाचिको मतः ॥३८॥ किञ्चिच्छ्रवणयोग्यं च मन्त्रस्योच्चारणं शनैः । यत्रेषच्चौष्ठचलनं स उपांशुर्जपो मतः ॥३९॥ धिया यत्राक्षरश्रेणी स्वरवर्णपदात्मिका । उच्चार्येत च संस्मृत्या स जपो मानसो मतः ॥४०॥

---

આસન વિના બેઠેલો, સૂતેલો, ચાલતો, ઊભો, જોડા પહેરેલો, ચાખડીઓ પહેરેલો, તેમજ રથાદિ વાહન તથા પલંગ વગેરે સૂવાની પથારી આદિકમાં બેઠેલો થકો જપ કરે નહિ. (૨૬) જપ કરનાર ભગવાનનો ભક્ત પગ ઉપર પગ ચડાવીને અથવા જંઘા ઉપર કે ઢીંચણ ઉપર કે સાથળ ઉપર બીજો પગ મૂકીને કે પગ લાંબા કરીને કાકાસનથી બેસીને જપ ન જ કરે; (૨૭) તથા હસતો થકો કે ઉતાવળ કરતો થકો કે અહીં તહીં જોતો થકો હસ્ત સંજ્ઞા કરતો સતો અને નેત્રથી સંજ્ઞાને કરતો સતો જપને ક્યારેય ન કરે. (૨૮) માર્ગમાં, અમંગલ-સ્મશાનભૂમિ વગેરે અપવિત્ર સ્થાનમાં અને પ્રકાશનો ત્યાગ કરી ગાઢાન્ધકારમાં અને દુર્ગન્ધિવાયુના સ્થાનમાં અને પાપી જનોની સમીપમાં જપ કરવો નહિ. (૨૯) મંત્રજપમાં આળસુ માણસોએ ન જીતી શકાય એવું નિદ્રા નામનું મહાવિઘ્ન છે માટે નિદ્રા નામના વિઘ્નને સાવધાન થઈને જીતે, એમ ના કરે તો જપ નિષ્ફળ થાય છે. (૩૦) જે આંગળીના અગ્રમાં જપ કરેલો તે, તથા મેરુનું ઉલ્લંઘન કરીને કરેલો જે જપ તથા સંખ્યા (ગણતરી) વગરનો કરેલો જપ તે સર્વ પણ નિષ્ફળતા આપનારો થાય. (૩૧) બુદ્ધિમાન આ જપ કરનાર, આપત્કાળ પડ્યા વિના નિષેધ ક્રમનું ઉલ્લંઘન ન કરે; સર્વ પ્રકારે પોતાના મનને નિયમમાં રાખીને જપ કરે. (૩૨) મનનો સંયમ, પવિત્રપણું, મૌન, મંત્રના અર્થનું ચિંતન, આકુલતાએ રહિતપણું તથા ઉદાસીનતાનો ત્યાગ : આ સર્વે જપની સિદ્ધિમાં કારણ છે. (૩૩) પુરુષોત્તમ શ્રીકૃષ્ણને બહારથી પ્રાપ્ત થયેલા અથવા મનથી ચિંતવન કરાયેલાં, ચંદન, પુષ્પાદિથી પૂજન કરી સ્થિર મનવાળો, જપની સંખ્યાના નિયમ યુક્ત જપ કરનાર ભક્તિપૂર્વક ત્રિકાલ જપ કરે. (૩૪) જપ કરવાના સમયમાં બિલાડો અને ઉંદરનો સ્પર્શ થાય, ક્રોધ થાય અને અધોવાયુ-ઉત્સર્ગ થાય તો માળાને વસ્ત્ર ઉપર મૂકે. (૩૫) પછી આચમન કરી સૂર્યને જોઈને અથવા શ્રીહરિનું સ્મરણ કરતા સતા બાકીનો જપ કરે. નીચ જાતિનો, મદ્ય, માંસાદિનો સ્પર્શ થયો હોય તો સ્નાન કરી બાકીનો જપ કરવો. (૩૬) જપના વાચિક, ઉપાંશુ અને માનસિક નામના અનુક્રમે કનિષ્ઠ, મધ્યમ, અને ઉત્તમ આ ત્રણ ભેદો છે તે ત્રણ ભેદો જાણીને ઉત્તમ જપભેદનું આચરણ કરવું. (૩૭) ઉદાત્ત, અનુદાત્ત અને સ્વરિત : આ ત્રણ પ્રકારના યથાયોગ્ય સ્વરો સહિત સ્પષ્ટ પદો અને અક્ષરો (મંત્રપદના વર્ણો) જેમાં છે એવા શબ્દોથી જે જપમાં મંત્રનું ઉચ્ચારણ થાય તે **'વાચિક'** માનેલો છે. (૩૮) જે જપમાં લગારેક શ્રવણ યોગ્ય ધીમેથી મંત્રનું ઉચ્ચારણ થાય તે જપ **'ઉપાંશુ'** માનેલો છે અને જે જપમાં લગારેક ઓષ્ઠ ચાલે તે જપ પણ ઉપાંશુ માનેલો છે. (૩૯) જે જપમાં ઉદાત્તાદિ સ્વરો અક્ષરોયુક્ત પદો સ્વરૂપ જેનું છે એવી મંત્રવર્ણની પંકિત સારી સ્મૃતિથી યુક્ત બુદ્ધિથી ઉચ્ચારણ કરાય તે જપ **'માનસ'** માનેલો છે. (૪૦)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**उच्चैर्जपादुपांशुः स्याद्विशिष्टो दशभिर्गुणैः । जिह्वाजपः शतगुणः सहस्त्रगुण आन्तरः ॥४१॥ गृहे जपं समं प्राहुर्गोष्ठे दशगुणं तथा । गृहोद्याने शतगुणं सहस्त्रगुणकं वने ॥४२॥ अयुतं पर्वते पुण्ये नद्यां लक्षगुणं तथा । देवालये कोटिगुणमनन्तं हरिसन्निधौ ॥४३॥ इत्थं योषापि कुर्वीत नाममन्त्रजपं हरेः । सधवा विधवा वापि भक्ता भगवतोऽनघ ! ॥४४॥ अस्नातो मालया नैव जपं कुर्वीत कर्हिचित् आपन्नो मानसं स्नानं कृत्वा कुर्याज्जपं पुमान् ॥४५॥ स्नानादिनियमो नास्ति मानसे तु जपे नृणाम् । कीर्तने च हरेर्नाम्नां विना मालां कदाचन ॥४६॥ मालामशुचिहस्तेन न स्पृशेन्न क्षिपेद्भुवि । स्त्रियं च स्पर्शयेन्नैव जपान्ते निदधीत खे ॥४७॥ इत्थं जपन्ति नियतं हरिनाममन्त्रं ये मानवा भुवि सदौद्धववर्त्मसंस्थाः । ते यान्ति धाम परमं परमात्मनो वै गोलोकसंज्ञममलं कमलाधवस्य ॥४८॥** सुव्रत उवाच - **श्रुत्वा पुरातनमहामुनिनेत्थमुक्तं श्रीकृष्णमन्त्रजपनिर्णयमाप तुष्टिम् । वर्णी स चान्यमुनिभिः सह भूमिपाल! प्रीतो ननाम च हरिं सकलार्थसिद्धिम् ॥४९॥**
इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे प्रबोधन्युत्सवे श्रीनारायणवासुदेवानन्दसंवादे श्रीकृष्णमन्त्रजपविधिनिरूपणनामा त्रिंशोऽध्यायः ॥३०॥

सुव्रत उवाच - **अथो दशम्यां तरणौ गतेऽस्तं विधाय सान्ध्यं स विधिं विधिज्ञः । महासभायामुपविष्ट उच्चे पीठे प्रसन्नास्य उवाच भक्तान् ॥१॥**

---

વાચિક જપથી ઉપાંશુ જપ દશ ગણો વિશિષ્ટ (અધિક) થાય. પ્રથમના ઉપાંશુ જપથી બીજો ઓષ્ઠના ચલનવાળો ઉપાંશુ જપ સો ગણો અધિક છે. જિહ્‌વા જપ (બીજા ઉપાંશુ જપ) થી આંતરિક-માનસ જપ, હજાર ગણો અધિક છે. (૪૧) પોતાના ભવનમાં કરેલો જપ જેટલા જપ કરે તેટલા ફલને આપનારો થાય તથા ગાયને બાંધવાના સ્થાનમાં કરેલો જપ પોતાના ઘરમાં કરેલા જપથી દશ ગણા ફળને આપનારો થાય. ઘરના બગીચામાં કરેલો જપ ગાયના સ્થાનથી સો ગણા ફળને આપનારો થાય, વનમાં કરેલો જપ હજાર ગણા ફળને આપનારો થાય. (૪૨) પવિત્ર પર્વતમાં કરેલો જપ દશ હજાર ગણા ફળને આપે, નદીને તીરે કરેલો જપ લાખ ગણા ફળને આપનારો છે, દેવાલયમાં કરેલો જપ કોટિ ગણા ફળને આપે, શ્રીકૃષ્ણની પ્રતિમા સન્મુખ કરેલો જપ અનંત ગણા ફળને આપે. (૪૩) હે નિષ્પાપ વર્ણિન્ ! આ પ્રકારે શ્રીકૃષ્ણના ભક્તો અથવા સધવા વિધવા સ્ત્રીઓ પણ શ્રીકૃષ્ણના મંત્રનો જપ કરે. (૪૪) સ્નાન કર્યા વિના જપ કરનારો તુલસીની માળાથી ક્યારેય પણ જપ કરે નહિ. આપત્કાળમાં આવેલો પુરુષ માનસ સ્નાન કરી જપ કરે. (૪૫) માળા વિના માનસ જપમાં તો જપ કરનાર પુરુષોને સ્નાનાદિ નિયમ નથી. તથા માળા વિના શ્રીકૃષ્ણના નામના કીર્તન સ્મરણમાં ક્યારેય સ્નાનાદિ નિયમ નથી. (૪૬) માળાને અપવિત્ર હાથથી અડકે નહિ, પૃથ્વીમાં મૂકે નહિ, સ્ત્રીને સ્પર્શ કરાવે જ નહિ અને જપ કરી રહ્યા પછી (પોતે જ) ખીલી વગેરે ઉપર મૂકે.(૪૭) આ પ્રમાણે પૃથ્વીમાં ઉદ્ધવ સંપ્રદાયમાં રહેલા મનુષ્યો હરિ નામના મંત્રને નિયમની સંખ્યા જેમ હોય તે પ્રમાણે નિરંતર જપ કરે, તે મનુષ્યો લક્ષ્મીપતિ શ્રીકૃષ્ણના નિર્મળ સર્વોપરિ ધામને પામે છે જ. (૪૮)

**સુવ્રત મુનિ બોલ્યા :** હે ભૂમિપાલ ! આ પ્રકારે પુરાતન મહામુનિ શ્રીહરિએ કહેલો શ્રીકૃષ્ણમંત્રના જપનો નિર્ણય સાંભળીને બ્રહ્મચારી વાસુદેવાનંદ વર્ણી, સભામાં બેઠેલા મુનિઓ અને સત્સંગીઓ સહિત પ્રસન્ન થયા અને પ્રસન્ન થકા સમગ્ર પુરુષાર્થની સિદ્ધિ જેમનાથી છે એવા શ્રી સહજાનંદ સ્વામીને નમસ્કાર કરતા હતા. (૪૯)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે પ્રબોધન્યુત્સવે શ્રી નારાયણ વાસુદેવાનંદ સંવાદે શ્રીકૃષ્ણ મંત્રજપવિધિનિરૂપણનામા ત્રિંશોડધ્યાય : (૩૦)*

## અધ્યાય : ૩૧

## શ્રીહરિએ પોતાના ભક્તોને ઈષ્ટ સિદ્ધિ આપનાર સર્વથી અધિક એકાદશીનું માહાત્મ્ય કહેલું છે.

**સુવ્રત મુનિ બોલ્યા :** હે રાજન્ ! પછી કારતક સુદી દશમીને દિવસે સૂર્યનારાયણ અસ્ત થયા ત્યારે વિધિ જાણનારા શ્રીહરિ, સાયંકાલીન સંધ્યાનો વિધિ કરી મહાસભામાં અત્યન્ત ઊંચા સિંહાસનમાં બિરાજમાન થઈને પ્રસન્ન મુખારવિંદવાળા થકા સભામાં બેઠેલા ભક્ત જનોને કહેતા હતા. (૧)

श्री नारायणमुनिरुवाच – **शृण्वन्तु मुनयः सर्वे गृहिणश्च स्त्रियोऽखिलाः । हितं वदामि सर्वेषां गुरुत्वादहमादरात् ॥२॥ प्रबोधन्यभिधा श्वोऽस्ति तिथिरेकादशी जनाः ! । व्रतं तस्याः प्रकर्तव्यं सर्वैरेव मदाश्रितैः ॥३॥ अस्माकमिष्टदेवो हि श्रीकृष्णः पुरुषोत्तमः । व्रतं तस्यैतदस्तीति सर्वैः कार्यं प्रयत्नतः ॥४॥ न करोति हि यो मूढ एकादश्यामुपोषणम् । स नरो नरकं याति रौरवं तमसावृतम् ॥५॥ यानि कानि च पापानि ब्रह्महत्यासमानि च । अन्नमाश्रित्य तिष्ठन्ति संप्राप्ते हरिवासरे ॥६॥ तानि पापान्यवाप्नोति यो भुङ्क्ते हरिवासरे । मातृहा पितृहा चैव गुरुहा च स उच्यते ॥७॥ एकादश्यां तु यो भुङ्क्ते पक्षयोरुभयोरपि । प्रतिग्रासं स वै भुङ्क्ते मलं पृथ्वीसमुद्भवम् ॥८॥ निष्कृतिर्ब्रह्महत्यायाः शास्त्रे प्रोक्ता मनीषिभिः । एकादश्यन्नकामस्य निष्कृतिः क्वापि नोदिता ॥९॥ इह पानेन मद्यस्य पातैव नरकं व्रजेत् । एकादश्यन्नकामस्तु पितृभिः सह मज्जति ॥१०॥ वैष्णवः पुरुषः स्त्री च कुर्यादेकादशीव्रतम् । यथा शुक्ला तथा कृष्णा विशेषो नात्र विद्यते ॥११॥ अष्टवर्षाधिको मर्त्यो ह्यशीतिन्यूनवत्सरः । एकादशीमुपवसेत् पक्षयोरुभयोरपि ॥१२॥ ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः । एकादशीव्रतं कार्यं तैश्च स्त्रीभिश्च सर्वशः ॥१३॥ विधवा या भवेन्नारी भुञ्जीतैकादशीदिने । तस्यास्तु सुकृतं नश्येद्ब्रह्महत्या दिने दिने ॥१४॥ सम्प्राप्य वासरं विष्णोर्यो नरः संयतेन्द्रियः । उपवासपरो भूत्वा पूजयेन्मधुसूदनम् ॥१५॥ तत्कथाश्रुतिकीर्तिभ्यां रात्रौ कुर्याच्च जागरम् । स शोधयति पापानि शरदम्बुमलं यथा ॥१६॥ एकादशीसमुत्थेन वह्निना पातकेन्धनम् । भस्मतां याति सकलमपि जन्मशतोद्भवम् ॥१७॥ नेदृशं पावनं किञ्चिन्नराणामिह विद्यते । यादृशं पद्मनाभस्य दिनं पातकहानिदम् ॥१८॥**

---

**શ્રીનારાયણમુનિ બોલ્યા** : હે ભકતો ! સર્વમુનિઓ, ગૃહસ્થો અને સમગ્ર સ્ત્રીઓ, સાંભળો. તમારે મારા વિષે ગુરુપણું હોવાથી તમારું સર્વેનું હિત પ્રેમપૂર્વક કહું છું. (૨) હે જનો ! આવતે દિવસે પ્રબોધિની નામની એકાદશી તિથિ છે. તે એકાદશીનું વ્રત મારા સર્વ આશ્રિતોએ વિશેષપણે કરવું. (૩) પુરુષોત્તમ શ્રીકૃષ્ણ આપણા ઈષ્ટદેવ છે આ એકાદશીનું વ્રત શ્રીકૃષ્ણનું છે માટે મારા આશ્રિતોએ પ્રયત્નથી કરવું. (૪) અજ્ઞાની જે માણસ એકાદશીનો ઉપવાસ કરતો નથી તે માણસ મહાઅંધકારથી વ્યાપ્ત રૌરવ નરકને પામે છે. (૫) બ્રહ્મહત્યાની સમાન જે કોઈ પાપો છે તે સર્વે જ્યારે હરિવાસરનો દિવસ આવે ત્યારે અન્નને આશરીને રહે છે. (૬) જે હરિના દિવસે અન્ન ખાય છે તે પુરુષ બ્રહ્મહત્યા સમાન પાપોને પામે છે. એકાદશીને દિવસે અન્નભોક્તા પુરુષ પોતાની માતાને હણનારો, પોતાના પિતાને હણનારો અને ગુરુહત્યારો કહેવાય છે. (૭) જે પુરુષ કૃષ્ણ પક્ષ અને શુકલ પક્ષની પણ એકાદશીને દિવસે અન્ન ખાય છે તે પુરુષ દરેક ગ્રાસે પૃથ્વીથી ઉત્પન્ન થયેલાં પાપ જ ખાય છે. (૮) બ્રહ્મહત્યાનું પ્રાયશ્ચિત્ત ધર્મશાસ્ત્રમાં બુદ્ધિમાન મન્વાદિએ કહેલું છે. એકાદશીને દિવસે અન્ન જમનાર પુરુષનું પ્રાયશ્ચિત્ત કોઈ પણ ધર્મશાસ્ત્રના ગ્રંથમાં કહ્યું નથી. (૯) આ લોકમાં મદ્યના પાનથી પીનારો કેવળ નરકને પામે, એકાદશીને દિવસે અન્ન જમનારો પોતાના પૂર્વજોની સાથે ઘોર નરકમાં પડે છે. (૧૦) ભગવાનનો ભક્ત પુરુષ અને સ્ત્રી એકાદશી વ્રત કરે. જેમ શુકલ પક્ષની એકાદશી તેવી જ કૃષ્ણ પક્ષની એકાદશી : આ બન્ને એકાદશીઓ સમાન છે. (૧૧) આઠ વર્ષથી અધિક અને એંસી વર્ષથી થોડાં વર્ષોવાળો મનુષ્ય બન્ને પક્ષની એકાદશીનો ઉપવાસ કરે. (૧૨) બ્રહ્મચારી, ગૃહસ્થ, વાનપ્રસ્થ અને સંન્યાસી તે સર્વે તથા સધવા અને વિધવા સ્ત્રીઓએ એકાદશી વ્રત કરવું. (૧૩) જે સ્ત્રી વિધવા હોય તે એકાદશીને દિવસે અન્ન જમે તો તેનું પુણ્ય નાશ પામે અને દિવસે દિવસે બ્રહ્મહત્યાનું પાપ થાય. (૧૪) વિષ્ણુનો દિવસ જે એકાદશીને પામીને જે પુરુષ ઈન્દ્રિયોને વશ કરી ઉપવાસમાં આસક્ત થઈ શ્રીકૃષ્ણને પૂજે; (૧૫) અને એકાદશીની રાત્રિમાં શ્રીકૃષ્ણની કથાનું શ્રવણ અને કીર્તન કરી જાગરણ કરે તે મનુષ્ય જેમ શરદઋતુ જળને સ્વચ્છ કરે છે તેમ પાપોને નાશ કરે છે. (૧૬) શાસ્ત્રવિધિ પ્રમાણે આચરણ કરાયેલા એકાદશીના વ્રતથી ઉત્પન્ન થયેલા અગ્નિથી પૂર્વનાં સો જન્મનાં સમગ્ર પાપરૂપી લાકડાના સમુદાયો બળીને ભસ્મ થાય છે. (૧૭) આ લોકમાં શ્રી કૃષ્ણના દિવસરૂપ જે એકાદશીનું વ્રત તે મનુષ્યોને જેવું પાપની નિવૃત્તિ કરનારું છે એવું કોઈ પણ વ્રત આદિ પાપને શોધનારું નથી. (૧૮)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

तावत् पापानि देहेऽस्मिंस्तिष्ठन्ति हि महान्त्यपि । यावन्नोपोष्यते मर्त्यैः पद्मनाभदिनं शुभम् ।।१९।। कुरुक्षेत्रे तु यत्पुण्यं ग्रहणे चन्द्रसूर्ययोः । गोदानेन भवेत्तत्स्यादेकादश्यामुपोषणात् ।।२०।। तपस्विनो गृहे नित्यं लक्षं यस्य च भुञ्जते । षष्टिवर्षसहस्राणि तस्य पुण्यं तु यद्भवेत् ।।२१।। एकादशीव्रतेनैव तत्पुण्यं प्राप्नुयान्नरः । स्वधर्मदृढनिष्ठश्च वासुदेवपरायणः।।२२।। अश्वमेधसहस्राणि राजसूयशतानि च । एकादश्युपवासस्य कलां नार्हन्ति षोडशीम् ।।२३।। एकादशेन्द्रियैः पापं यत्कृतं पूर्वजन्मसु । एकादश्युपवासेन तत्सर्वं विलयं व्रजेत् ।।२४।। एकादश्या समं किञ्चित्पापत्राणं न विद्यते । व्याजेनापि कृता या तु न दर्शयति भास्करिम् ।।२५।। स्वर्गमोक्षप्रदा ह्येषा शरीरारोग्यदायिनी । सुकलत्रप्रदा ह्येषा राज्यपुत्रप्रदायिनी ।।२६।। न गङ्गा न गया वापि न काशी न च पुष्करम् । न चापि कौरवं क्षेत्रं न रेवा न च देविका ।।२७।। यमुना चन्द्रभागा च तुल्या नैवानया यतः । अनायासेन व्रतिभिः प्राप्यतेऽस्याः परं पदम् ।।२८।। रात्रौ जागरणोपेतं समुपोष्य हरेर्दिनम् । सर्वपापविनिर्मुक्तो विष्णुलोकं व्रजेन्नरः ।।२९।। दशैव मातृके पक्षे तथैव दश पैतृके । प्रियाया दश चात्मानं पुरुषानुद्धरेत्स च ।।३०।। कल्पद्रुचिन्तामणिवन्नृणां वाञ्छितपूरणी । भवत्येकादशी तस्मात्तद्व्रतात्पूर्णकामता ।।३१।। एकादशीं प्रपन्ना ये नरास्ते हि वरोत्तमाः । द्विद्वन्द्वबाहवो भूत्वा नागारिकृतवाहनाः ।।३२।। स्रग्विणः पीतवस्त्राश्च प्रयान्ति हरिमन्दिरम्। प्राप्नुवन्ति पुनर्नैव संसृतिं च कदाचन ।।३३।। एष प्रभावो हि मया ह्येकादश्याः प्रकीर्तितः । पापेन्धनस्य सर्वस्य पावकाख्यो महीतले ।।३४।। माहात्म्यमेकादशिकाव्रतस्य शुष्कार्द्रपापक्षयकारि भक्ताः! । प्रोक्तं मयैतद्धृदयेऽवधार्य तत्कार्यमेव स्वहिताय सर्वैः ।।३५।। इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे प्रबोधन्युत्सवे एकादशीव्रतमाहात्म्यनिरूपणनामैकत्रिंशोऽध्यायः ।।३१।।

હે ભક્તો, મનુષ્યોએ જ્યાં સુધી શુભ એકાદશીની તિથિના ઉપવાસ કરાતા નથી ત્યાં સુધી આ મનુષ્યશરીરમાં મોટાં પણ પાપો રહે છે. એકાદશી વ્રતના આચરણ પછી તો નાશ જ પામે છે. (૧૯) ચંદ્ર અથવા સૂર્યનું ગ્રહણ થાય ત્યારે કુરુક્ષેત્રમાં ગૌદાનથી જે પુણ્ય થાય તે પુણ્ય એકાદશી જે હરિની તિથિમાં ઉપવાસથી થાય. (૨૦) **જે પુરુષના ગૃહમાં સાઠ હજાર વર્ષ સુધી દરરોજ લાખ તપસ્વી ભક્તો જમે તે પુરુષને જે પુણ્ય થાય, તે પુણ્ય પોતાના ધર્મમાં દૃઢ નિષ્ઠાવાળો વાસુદેવપરાયણ મનુષ્ય એકાદશીના વ્રતથી જ પામે છે.** (૨૧-૨૨) હજાર અશ્વમેધ અને સો રાજસૂય યજ્ઞો એકાદશી ઉપવાસના સોળમાં ભાગની સમાન થતા નથી. (૨૩) પૂર્વજન્મમાં અગિયાર ઈન્દ્રિયોથી જે પાપ કરેલું હોય તે સર્વે એકાદશીના ઉપવાસથી નાશ પામે. (૨૪) એકાદશી જે હરિતિથિ તેમાં ઉપવાસની સમાન કોઈ પણ વ્રતાદિ પાપથી રક્ષણ કરનારૂં નથી. કોઈ પણ નિમિત્તથી ઉપવાસ કરાયેલી એકાદશી યમરાજાના દર્શન થવા દેતી નથી. (૨૫) આવા ફળવાળી એકાદશી, સ્વર્ગ અને મોક્ષ આપનારી અને શરીરને આરોગ્ય આપનારી છે. આ એકાદશી ઉપવાસ કરનારને સારી સ્ત્રી આપનારી અને રાજ્ય અને પુત્ર આપનારી છે. (૨૬) આ એકાદશીના સમાન ભાગીરથી ગંગા, ગયા, કાશી, પુષ્કર સરોવર અને કુરુક્ષેત્ર પણ નથી. નર્મદા અને દેવિકા નદી નથી. (૨૭) આની સમાન યમુના કે ચંદ્રભાગા નદી નથી, કારણ કે એકાદશીનું વ્રત કરનાર જનો તો પ્રયાસ વિના સર્વોપરિ પરમાત્માનું ધામ પ્રાપ્ત કરે છે. (૨૮) જે મનુષ્ય રાત્રિમાં જાગરણે સહિત શ્રીકૃષ્ણનો દિવસ જે એકાદશીનો ઉપવાસ કરે તે માણસ સર્વ પાપથી રહિત થઈ વિષ્ણુના લોકમાં જાય. (૨૯) એકાદશીનો ઉપવાસ કરનાર પુરુષ માતાના વંશમાં દશ પુરુષો, પિતાના વંશમાં દશ પુરુષો, સાસરા પક્ષના દશ પુરુષો, અને પોતે, એમ એકત્રીશ પુરુષોને સદ્ગતિ પમાડે છે. (૩૦) એકાદશી કલ્પવૃક્ષ અને ચિન્તામણિની માફક પોતાનું વ્રત કરનાર જનોના મનોવાંછિત પૂર્ણ કરનારી છે, માટે એકાદશીના વ્રતથી પૂર્ણકામપણું થાય. (૩૧) જે પુરુષો એકાદશી વ્રત કરનારા છે તે ઉત્તમોત્તમ પુરુષો ચતુર્ભુજવાળા, ગરુડ ઉપર બેઠેલા વનમાળાઓ ધારણ કરનારા, પીતાંબર ધારણ કરનારા થઈ ભગવાનના ધામમાં દેહના અવસાનમાં જાય છે વળી ફરીથી ક્યારેય સંસારને પામતા નથી. (૩૨-૩૩) હે ભક્તો ! આ પૃથ્વીમાં સર્વ પાપરૂપી કાષ્ઠને અગ્નિ નામવાળો (દાહક) આ એકાદશીનો પ્રસિદ્ધ પ્રભાવ મેં તમને કહ્યો. અજાણથી અથવા જાણીને જે પાપ તેનો વિનાશ કરનાર, એકાદશીના વ્રતનું માહાત્મ્ય મેં કહ્યું તે હૃદયમાં ધારણ કરી સર્વે તમોએ પોતાના હિત માટે એકાદશીનું વ્રત કરવું જ. (૩૪-૩૫)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે પ્રબોધન્યુત્સવે એકાદશીવ્રતમાહાત્મ્ય નિરૂપણનામૈકત્રિંશોડધ્યાયઃ (૩૧)*

सुव्रत उवाच – **एकादश्यास्तु माहात्म्यमित्थं भगवतोदितम् । श्रुत्वाहृषञ्जनाः सर्वे धर्मनिष्ठास्तु निर्भरम् ॥१॥ तेषु ये प्रश्ननिपुणा जनास्तेऽथ प्रणम्य तम् । पप्रच्छुः स्वामिनं भक्त्या बद्धाञ्जलिपुटा नृप ! ॥२॥** जना उचुः – **तिथिरेकादशी स्वामिंस्त्वया सर्वव्रताधिका । प्रोक्ता महाफला चात्र हेतुं नो वक्तुमर्हसि ॥३॥** सुव्रत ऊवाच – **इति पृष्टो निजैर्भक्तैर्भक्तवत्सल ईशिता । तन्माहात्म्याधिक्यहेतुं वक्तुं समुपचक्रमे ॥४॥** श्रीनारायणमुनिरुवाच – **माहात्म्यस्याधिकत्वं तु विष्णोः सम्बन्धतो नृणाम् । सर्वेषां जायते नूनमिति जानीत सुव्रताः ! ॥५॥ साक्षाच्छ्रीवासुदेवस्य देहजत्वात्तथा वरात् । माहात्म्यमीदृशं तस्या यथा जातं तथा ब्रुवे ॥६॥ आसीत्पुरा कृतयुगे नाडीजङ्घाभिधोऽसुरः । तस्य पुत्रो मुरो नाम्ना बभूवातिबलोद्धतः ॥७॥ ब्रह्माणं तपसाराध्य दुष्करेण स दैत्यराट् । देवैः सर्वैरवध्यत्वं वरं लेभे निजेप्सितम् ॥८॥ ततो मदोद्धतः सर्वान्स जित्वा दिक्पतीन् द्रुतम् । चक्रे स्वतेजसैवान्यानिन्द्रादीनेकराट् स्वयम् ॥९॥ ततः सुरगणाः सर्वे स्थानभ्रष्टा हतौजसः । भीता दैत्यपतेश्चेरुः कामरूपा महीतले ॥१०॥ कालेन कियता तेऽथ दुःखितास्त्रिदिवौकसः । ब्रह्माणं शरणं गत्वा स्वीयं दुःखं न्यवेदयन् ॥११॥ अकल्पस्तत्प्रतीकारे सोऽपि तैः शङ्करेण च । साकं जगाम क्षीरोदं श्वेतद्वीपोऽस्ति यत्र तु ॥१२॥ तीरे पयोनिधेस्तस्य समाहितधियः सुराः । उपतस्थू रमाकान्तं निराहारा जितेन्द्रियाः ॥१३॥ एकपादस्थिताः सर्वे ह्यूर्ध्वलोचनबाहवः। चक्रुस्तीव्रं तपोऽव्यग्रास्तत्प्रसादमभीप्सवः ॥१४॥ तेषामत्युग्रतपसा सन्तुष्टः कमलापतिः । प्रादुर्बभूव वैकुण्ठात्तेषामग्रे महाद्युतिः ॥१५॥**

## અધ્યાય : ૩૨ - શ્રીહરિએ એકાદશીની ઉત્પત્તિ તથા શ્રેષ્ઠ વરદાનની પ્રાપ્તિ વગેરે પોતાના ભક્તોને આશ્ચર્ય પમાડનારો પુરાણોક્ત પ્રસંગ કહેલો છે.

**સુવ્રત મુનિ બોલ્યા :** હે રાજન્ ! આ પ્રકારે શ્રીહરિએ કહેલું એકાદશીનું માહાત્મ્ય સાંભળી ધર્મમાં નિષ્ઠાવાળા સર્વે હરિભક્તો અત્યંત હર્ષ પામ્યા. (૧) તે જનોમાં જે પ્રશ્ન પૂછવામાં નિપુણ-ભક્તજનો, તે બન્ને હાથ જોડીને સમગ્ર જગતના એક નિયન્તા શ્રી નારાયણ મુનિને ભક્તિપૂર્વક પ્રણામ કરીને પૂછતા હતાઃ (૨) હે સ્વામિન્ ! તમોએ કહેલી એકાદશી તિથિની સર્વ વ્રતોથી અધિકતામાં અને મહાફળ યુક્તપણામાં જે કારણ હોય તે આપ અમોને કહેવા માટે યોગ્ય છો. (૩) હે રાજન્ ! આ પ્રકારે પોતાના ભક્તોએ પુછાયેલા ભક્તવત્સલ પરમેશ્વરે એકાદશીનો સર્વ વ્રતથી અધિક મહાફલરૂપ મહિમા-વિશેષમાં કારણ કહેવા માટે આરંભ કર્યો. (૪)

**શ્રીનારાયણ મુનિ બોલ્યા :** હે સુંદર વ્રતવાળા ભક્તો ! સર્વે મનુષ્યોના માહાત્મ્યનું અધિકપણું તો વિષ્ણુના સાક્ષાત્ સંબંધથી થાય છે એમ નિશ્ચે જાણો. (૫) પ્રત્યક્ષ વાસુદેવના દેહથી ઉત્પન્ન થવાથી તથા વાસુદેવના વરદાનથી એકાદશીનો આવો મહિમા જે પ્રકારે થયો તે હું તમોને કહું છુંઃ (૬) પૂર્વે સત્યયુગમાં નાડીજંઘ નામનો અસુર હતો તેનો પુત્ર મુરદાનવ, અતિ બળવાન હોવાથી ઉદ્ધત હતો. (૭) સમગ્ર દૈત્યોનો રાજા મુરદાનવ બીજાથી ના થઈ શકે તેવા તપથી બ્રહ્માની આરાધના કરી 'સર્વે દેવોથી વધ ન થઈ શકે' એવા પોતાને ઇચ્છિત વરદાનને પામ્યો. (૮) પછી મદોદ્ધત મુરદાનવ સર્વ ઈન્દ્રાદિ દિગ્પાલોને તત્કાલ પરાભવ કરી તે તે અધિકારોથી ભ્રષ્ટ કરી પોતે એક સમ્રાટ રાજા થઈને પોતાના સામર્થ્યથી પોતાની જાતિના બીજા ઈન્દ્રાદિ દિગ્પાલોની સ્થાપના કરતો હતો. (૯) પછી સ્થાનથી ભ્રષ્ટ થયેલા જેમનું બળ નાશ પામ્યું છે એવા સર્વે ઈન્દ્રાદિ દેવસમૂહો મુરદાનવથી ભય પામેલા સતા પોતાને ઈચ્છિતરૂપ ધારણ કરીને પૃથ્વીમાં જ્યાં ત્યાં વિચરણ કરતા હતા. (૧૦) પછી દુઃખી થયેલા તે ઈન્દ્રાદિ દેવો કેટલાક સમયે બ્રહ્માને શરણે ગયા અને પોતાનું દુઃખ નિવેદન કરતા હતા. (૧૧) તેમના દુઃખનિવારણમાં અસમર્થ બ્રહ્મા પણ તે દેવો અને શંકરની સાથે ક્ષીરસાગર પ્રત્યે ગયા, જ્યાં શ્વેતદ્વીપ રહેલો છે. (૧૨) ક્ષીરસાગરના ઉત્તર કિનારે નિયમિત અંતઃકરણવાળા-ઉપવાસ કરતા એવા-જિતેન્દ્રિય થકા બ્રહ્માદિ દેવો શ્રી વાસુદેવની આરાધના કરતા હતા. (૧૩) એક પગ ઉપર ઊભા રહીને, નેત્ર અને બાહુઓ ઊંચા છે જેમના એવા, સ્થિર મનવાળા થઈને શ્રી વાસુદેવની પ્રસન્નતા ઈચ્છતા બ્રહ્મા-શિવ તથા ઈન્દ્રાદિ દેવો સર્વે તીવ્ર તપ કરતા હતા. (૧૪) દેવોના ઉગ્ર તપથી પ્રસન્ન થયેલા કમલાપતિ, વૈકુંઠથી આવીને ઘણા પ્રકાશવાળા, દેવોની આગળ પ્રગટ થયા. (૧૫)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

तपस्यन्तः सुरास्तेऽथ महान्तं ददृशुस्तदा । अयुतार्कप्रतीकाशं तेजःपुञ्जमतर्कितम् ॥१६॥ तत्र श्रीवासुदेवं ते साक्षाद्विष्णुं जगत्पतिम् । ददृशू रमया साकं सेवितं पार्षदोत्तमैः ॥१७॥ चतुर्भुजं गदापद्मशङ्खचक्रविभूषितम्। इन्द्रनीलमणिश्यामं पद्माक्षं सुस्मिताननम् ॥१८॥ ततस्तं परया भक्त्या नत्वा स्तुत्वा प्रसाद्य च । सर्वं निवेदयामासुः कर्म दैत्यपतेस्तु तत् ॥१९॥ दृष्ट्वा देवगणान् क्लिष्टान्भगवान्करुणानिधिः । प्रदाय तेभ्यो ह्यभयं दैत्यं हन्तुं मनोऽकरोत् ॥२०॥ देवैः सहैव तस्याथ गत्वा चन्द्रवतीं पुरीम् । पाञ्चजन्यं हरिर्दध्मौ तेन त्रेसुः सुरारयः ॥२१॥ अमृष्यमाणस्तं नादं मुरः स युयुधे सुरैः । अशक्तास्तत्प्रहारं ते सोढुं दश दिशो ययुः ॥२२॥ भगवानपि चक्रेण युद्धं कुर्वन् स दारुणम् । हन्तुं शशाक न मुरं सहस्रं वत्सरा ययुः ॥२३॥ ततः श्रान्तो हरिः प्रायात्स्वकीयं बदरीवनम् । गुहां सिंहवतीं तत्र प्राप्य शिश्ये भयादिव ॥२४॥ इन्द्रियाणि दशैकं च स्वस्वरूपोन्मुखानि सः । विधाय स्वीचकाराशु योगनिद्रां क्षणं प्रभुः ॥२५॥ योजनानि द्वादशैव विस्तीर्णामेकनिर्गमाम् । तां गुहां पृष्ठलग्नोऽसौ मुरश्चाप्याययौ द्रुतम् ॥२६॥ तमागतं हरिर्दृष्ट्वा दुर्जयं दैत्यमुद्धतम् । चुक्रोध तस्मै विज्ञाय वरेणावध्यतां विधेः ॥२७॥ एकादशेन्द्रिभवात्तदानीं तस्य तेजसः । दिव्यप्रहरणैका स्त्री बभूवातितपस्विनी ॥२८॥ रूपसौभाग्यसम्पन्नां दृष्ट्वा तां स तु दानवः । मुग्धे ! मां वरयस्वेति प्रार्थयामास सादरम् ॥२९॥ तं कामविह्वलं देवी प्राह सा दैत्य ! मां युधि । जित्वा गृहाण यस्मान्मे व्रतं जेता भवेत्पतिः ॥३०॥ ततस्तया स युयुधे शस्त्रैरस्त्रैश्च दानवः । क्रुद्धा चिच्छेद सा तस्य शिरः खड्गेन दुर्मतेः ॥३१॥

---

પછી તપ કરતા દેવો તે સમયે એકી સાથે દશ હજાર સૂર્ય ઉદય પામેલા હોય તેવો એકદમ પ્રાદુર્ભાવ પામેલો તેજનો સમુદાય જોતા હતા. (૧૬) તે તેજના સમુદાયમાં દેવો પ્રત્યક્ષપણે દેખાતા સર્વાન્તર્યામી જગતપતિ નંદાદિ પાર્ષદોએ સેવેલા શ્રી વાસુદેવને લક્ષ્મીજીની સાથે જોતા હતા; ચાર બાહુવાળા, ગદા, પદ્મ, શંખ, ચક્રથી વિભૂષિત ઈન્દ્ર નીલમણિ સમાન શ્યામ સુંદર, કમલનયન, મંદ હાસ્યયુક્ત મુખવાળા શ્રી વાસુદેવને જોતા હતા. (૧૭-૧૮) પછી દેવો પરમ ભક્તિથી શ્રી વાસુદેવને નમસ્કાર કરીને તથા સ્તુતિ પૂર્વક પ્રસન્ન કરીને દૈત્યપતિ મુર દાનવનું સર્વ કર્મ જે પોતાનાં સ્થાનોમાંથી ભ્રષ્ટ કર્યા વગેરે ક્રિયા તે નિવેદન કરતા હતા. (૧૯) મહાક્લેશ પામેલા દેવસમુદાયોને જોઈને કરુણાસાગર શ્રી વાસુદેવ દેવતાઓને અભયદાન આપીને મુર દાનવને વિનાશ કરવા માટે મન (સંકલ્પ) કરતા હતા. (૨૦) પછી શ્રીહરિ દેવોની સાથે જ મુરદાનવની ચંદ્રાવતી નામની પુરીમાં જઈને પાંચજન્ય નામનો પોતાનો શંખ વગાડતા હતા તેનાથી અસુરો ત્રાસ પામ્યા. (૨૧) ભગવાનના પાંચજન્યના ધ્વનિને સહન નહિ કરતો મુરદાનવ દેવોની સાથે યુદ્ધ કરવા લાગ્યો. મુરદાનવે કરેલા અસ્ત્ર અને શસ્ત્રોના પ્રહારોને સહન કરવા અસમર્થ દેવો દશે દિશાઓમાં નાસી ગયા. (૨૨) ભગવાન શ્રી વાસુદેવ પણ સુદર્શનચક્રથી તીવ્ર યુદ્ધ કરતા સતા મુરદાનવને મારવા માટે સમર્થ થયા નહિ : આ પ્રમાણે હજાર વર્ષ ચાલ્યાં ગયાં. (૨૩) પછી થાકેલા ભગવાન પોતાના બદરિકાશ્રમમાં ગયા, ત્યાં સિંહવતી નામની ગુફામાં જઈને જાણે કે તેના ભયથી જ જેમ તેમ સૂઈ ગયા. (૨૪) પ્રભુ શ્રી વાસુદેવ અગિયાર ઈન્દ્રિયોને પોતાના સ્વરૂપની સન્મુખ કરીને તત્કાલ ક્ષણમાત્ર યોગનિદ્રાને ગ્રહણ કરતા હતા. (૨૫) બાર યોજન વિસ્તારવાળી, એક માત્ર નીકળવાના દ્વારવાળી સિંહવતી ગુફામાં ભગવાનની પાછળ થયેલો મુરદાનવ પણ તત્કાલ ગુફામાં આવ્યો. (૨૬) શ્રીહરિ, યોગનિદ્રામાં રહેલા શ્રી વાસુદેવ પોતાની પાછળ આવેલા દુર્જય ઉદ્ધત દૈત્ય મુરદાનવને (અંતર્દષ્ટિથી) જોઈને બ્રહ્માના વરદાનથી વધ ન થઈ શકે તેમ જાણી બીજા ઉપાયથી મારવા માટે મુરદાનવના પ્રત્યે અત્યન્ત ક્રોધ કરતા હતા. (૨૭) તે સમયે શ્રીવાસુદેવની અગિયાર ઈન્દ્રિયોથી ઉત્પન્ન તેજ થકી દિવ્ય આયુધવાળી અતિ તપસ્વી એક સ્ત્રી ઉત્પન્ન થતી હતી. (૨૮) પોતાના સમાન આકાર (એટલે રૂપવાળી) અને ઐશ્વર્યથી યુક્ત સ્ત્રીને જોઈને દૈત્ય મુરદાનવ 'હે સુંદરી તું મને વર્ય' આ પ્રકારે આદરપૂર્વક પ્રાર્થના કરતો હતો. (૨૯) દિવ્ય રૂપવાળી સ્ત્રીએ કામવિહ્વલ મુરદાનવને કહ્યું : ' હે દૈત્ય, મને યુદ્ધમાં જીતીને ગ્રહણ કર, કારણ કે જે મને યુદ્ધમાં જીતે તે મારો પતિ થાય, આવું મારું વ્રત છે.' (૩૦) પછી મુરદાનવ શસ્ત્રો અને અસ્ત્રોથી સ્ત્રીની સાથે યુદ્ધ કરવા લાગ્યો. ક્રોધ પામેલી તે સ્ત્રીએ દુષ્ટ બુદ્ધિવાળા મુરદાનવનું મસ્તક તરવારથી છેદી નાખ્યું. (૩૧)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

ततः प्रसन्नो भगवान्देवताश्चातिहर्षिताः । प्रशशंसुः पूजयन्तः पप्रच्छुश्चासि केति ताम् ॥३२॥ देव्युवाच - अहमेकादशी स्वामिन् ! शक्तिरस्मि तव प्रभो ! । त्वत्तेजसः समुद्भूता तपोरूपात्तपस्विनी ॥३३॥ ब्रह्माण्डे यानि पापानि लघूनि च गुरूणि च । दैत्याश्च येऽखिलास्तेषामस्मि संहारकारिणी ॥३४॥ तां प्रसन्नः प्रभुः प्राह त्वदीयेऽद्य दिनेऽनघे ! । आनन्दोऽभूत्रिलोक्यां वै सा त्वं वरय मद्वरम् ॥३५॥ एकादश्युवाच- यदि तुष्टोऽसि मे देव ! यदि देयो वरो मतः । तर्हि मद्व्रतकर्तॄणां सर्वं सिद्ध्यतु वाञ्छितम् ॥३६॥ उपवासं तु यः कुर्यान्मदीये व्रतवासरे । सर्वपापविनिर्मुक्तो भुक्तिं मुक्तिं स चाप्नुयात् ॥३७॥ एकभक्तेन नक्तेन तथैवायाचितेन वा । योऽशक्तोऽपि व्रतं कुर्यात्सोऽपि वाञ्छितमाप्नुयात् ॥३८॥ त्रिषु लोकेषु भगवंश्चतुर्ष्वपि युगेषु च । द्वादशस्वपि मासेषु प्रवर्तेत व्रतं मम ॥३९॥ चतुर्विंशतिरूपिण्या मम स्वामी त्वमीश्वर ! । भूत्वानन्दय मां नित्यमित्येतद्याचितं मम ॥४०॥ श्रीभगवानुवाच - भद्रे ! त्वया वरो मत्तो देवेशैरपि दुर्लभः । याचितोऽसौ तथाप्यद्य प्रसन्नोऽहं ददामि ते ॥४१॥ अद्यप्रभृति ये केचित्करिष्यन्ति व्रतं तव । मत्पूजनोत्सवोपेतं ते प्राप्स्यन्त्येव वाञ्छितम् ॥४२॥ व्रतकर्ता तु मोक्षार्थी मोक्षं प्राप्स्यति संसृतेः । सांसारिकसुखार्थी च कामान् सर्वान् हि लप्स्यते ॥४३॥ सर्वान्कामानवाप्स्यन्ति त्वद्व्रतेन यतो नराः । भुक्तिदा मुक्तिदा चातः ख्याता लोके भविष्यसि ॥४४॥ चतुर्विंशतिसङ्ख्याकैः स्वरूपैः केशवादिभिः । चतुर्विंशतिरूपिण्या भविष्यामि पतिस्तव ॥४५॥ श्रीनारायणमुनिरुवाच - प्रभोः प्राप्तवरा सैवं सन्तुष्टैकादशी गता । भगवान्कारयामास व्रतं तस्यास्तदा निजान् ॥४६॥ चक्रुस्तन्मुनयः सर्वे बदरीवनवासिनः । तत आरभ्य लोकेषु व्रतमेतत्प्रवर्तते ॥४७॥

---

મુરદાનવના મરણ પછી પ્રસન્ન થયેલા શ્રી વાસુદેવ અને અત્યંત હર્ષ પામેલા દેવતાઓ તે સ્ત્રીને સત્કાર કરતા થકા પ્રશંસા કરવા લાગ્યા અને તમો કોણ છો ? એમ પૂછવા લાગ્યા. (૩૨) આ પ્રકારે તેમણે પુછાયેલી દેવી ભગવાનના પ્રત્યે બોલી : હે સ્વામિન્ ! હે પ્રભો ! તમારાં અગિયાર ઈન્દ્રિયોના તેજથી ઉત્પન્ન થયેલી છું માટે એકાદશી નામવાળી અને તપથી ઉત્પન્ન થયેલી હોવાથી તપસ્વિની છું, તમારી શક્તિ છું. (૩૩) બ્રહ્માંડમાં જે નાનાં અને મોટાં પાપો તથા સમગ્ર જે દૈત્યો તેમનો સંહાર કરનારી છું. (૩૪) હે ભક્તો ! આ પ્રમાણે બોલતી એકાદશી ઉપર પ્રસન્ન થયેલા શ્રીવાસુદેવ તેના પ્રત્યે આ પ્રમાણે કહેવા લાગ્યા : હે નિષ્પાપ ! આ તારા દિવસે ત્રિલોકીમાં આનંદ થયો છે માટે તમો મારાથી વર માગો. (૩૫) **એકાદશી બોલી** : હે દેવ ! જો તમો પ્રસન્ન થયા હો અને મને વર આપવો હોય તો મારું વ્રત કરનારાઓનું સર્વ ઈચ્છિત સિદ્ધ થાઓ. (૩૬) જે મારા વ્રતને દિવસે ઉપવાસ કરે તે માણસ સર્વ પાપથી મુક્ત થઈ આ લોક પરલોકમાં સુખરૂપ ભુક્તિ અને મુક્તિને પામે. (૩૭) રોગાદિથી ઉપવાસ કરવા અસમર્થ હોય તે પુરુષ એક વાર ભોજન (ફલાહારાદિ) કરીને અથવા રાત્રે (સાયંકાળે) ભોજન કરીને અથવા માગ્યા વિના પ્રાપ્ત થયેલાં ભોજનથી વ્રત કરે તે પણ ઈચ્છિત ફળને પામે. (૩૮) હે ભગવન્ ! ત્રણેય લોકમાં, ચારેય યુગમાં બારેય માસોમાં પણ મારું વ્રત પ્રવર્તે. (૩૯) હે ઈશ્વર ! ચોવીસ રૂપવાળી મારા તમો સ્વામી (પતિ) થઈને મને નિત્ય આનંદ આપો : આ મારી પ્રાર્થના છે. (૪૦) **શ્રી ભગવાન બોલ્યા** : હે ભદ્રે ! તમોએ બ્રહ્માદિ દેવોને પણ દુર્લભ આ વર મારાથી માગ્યો છે તો પણ આજે પ્રસન્ન થયેલો હું તમોને તે વર આપું છું. (૪૧) આજથી (માગશર સુદિ એકાદશીથી) આરંભીને જે કોઈ જનો મારી પૂજાએ સહિત તમારું વ્રત કરશે તે જનો પોતાના ઈચ્છિત ફળને પામશે જ. (૪૨) હે પ્રિયે ! વ્રતકર્તા મોક્ષાર્થી જો હશે તો સંસારથી મોક્ષને પામશે; સાંસારિક સુખની ઈચ્છાવાળો હશે તો સર્વ મનોરથોની સિદ્ધિ પામશે. (૪૩) જે માટે પુરુષો તમારા વ્રતથી સર્વ મનોરથોને પામશે; માટે જ આ લોકમાં ભુક્તિ આપનારી અને મુક્તિ આપનારી તું પ્રસિદ્ધ થઈશ. (૪૪) વળી હું કેશવાદિ ચોવીસ રૂપથી, ચોવીસ રૂપવાળાં તમારો પતિ થઈને તમોને આનંદ આપીશ. (૪૫) **શ્રી નારાયણ મુનિ આ પ્રકારે બોલ્યા** : હે ભક્તો ! પ્રભુથી વરદાન પામેલી એકાદશી દેવી પ્રસન્ન થઈ અંતર્ધાન થઈ ગઈ, પછી ભગવાને પોતાના બધા દેવો પાસે એકાદશીનું વ્રત કરાવ્યું. (૪૬) બદરિકાશ્રમવાસી બધા મુનિઓએ પણ તે વ્રત કર્યું, તે દિવસથી આરંભીને લોકમાં આ વ્રત પ્રવર્તે છે. (૪૭)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

एकादश्यै वरं दत्त्वा व्रतं तस्याश्च भूतले। प्रवर्तयित्वा भगवान्स्वधाम परमं ययौ ।।४८।। एकादशी योगनिद्रा विष्णोर्लब्धवराऽथ सा । तदङ्गवासं लक्ष्मीवत्स्वस्याचीकमत ध्रुवम् ।।४९।। तं प्रसन्नं पुनः कर्तुं श्वेतद्वीपेऽमृतस्थले । तपःप्रिया तपो घोरं साऽकरोच्छतवत्सरान् ।।५०।। तस्या भक्त्या च तपसा स प्रसन्नः पुनर्हरिः । तत्समीपमुपेत्याह वरं वरय मत्प्रिये ! ।।५१।। एकादश्युवाच - यदि प्रसन्नो भवसि प्रभो! मयि तदा निजे । एकस्मिन्नेव मामङ्गे वासय त्वं रमामिव ।।५२।। श्रीभगवानुवाच - अधःकट्या मदङ्गं तु गरुडेनात्मसात्कृतम्। वक्षो लक्ष्म्या च चक्राद्यैरायुधैर्बाहवोऽपि मे ।।५३।। श्रवसी कुण्डलाभ्यां च सरस्वत्या च मे मुखम् । किरीटेन शिरो रुद्धं नेत्रस्थानं तु ते ददे ।।५४।। अतिप्रियस्य हि स्थानं नेत्रमुक्तं मनीषिभिः । लक्ष्म्या अतिप्रियासि त्वमतो नेत्रे निवासये ।।५५।। अद्यास्त्याषाढमासस्य शुक्ला ह्येकादशी तिथिः । इत आरभ्य मन्नेत्रे मासांस्त्वं चतुरो वस ।।५६।। वार्षिकांश्चतुरो मासान्प्रतिवर्षं तपस्विनि! । धारयित्वा स्वनयने स्वप्स्यामि क्षीरनीरधौ ।।५७।। त्वं हि जाता तपोरूपादैन्द्रियात्तेजसो मम । हन्तुं दैत्यं मुरं नाम्ना योगनिद्राऽसि सुन्दरि ! ।।५८।। अब्धौ शेषाहिशयने स्वीकृतायां मया त्वयि । तप एव करिष्यन्ति मद्भक्ता गृहिणोऽपि हि ।।५९।। मत्प्रीतये तपो योगं मत्पूजां वापि ये नराः । चातुर्मास्ये करिष्यन्ति सिद्धिः शीघ्रं भविष्यति ।।६०।। इति दत्त्वा वरं तस्यै वासुदेवोऽमृतोदधौ । नेत्रयोर्धारयित्वा तां शेषेऽशेतेव मञ्चके ।।६१।।
त्यक्त्वेन्द्रियाणामाहारं तत्तद्विषयलक्षणम् । वृत्तीस्तेषां समनसां चकार स्वस्वरूपगाः ।।६२।। निराहारे भगवति योगनिद्रामुपेयुषि। निराहारा चकारास्य पादसंवाहनं रमा ।।६३।। तदा नन्दसुनन्दाद्याः पार्षदास्तस्य सर्वशः । क्षीराब्धेरुत्तरे तीरे निराहारास्तपोऽचरन् ।।६४।। तथा मुनिगणास्तत्र तन्मूर्त्यर्पितदृष्टयः । निर्निमेषमतप्यन्त निराहारा जितेन्द्रियाः ।।६५।।

ભગવાન વાસુદેવ એ રીતે એકાદશીને વર આપીને, તેનું વ્રત લોકમાં પ્રવર્તાવીને સ્વયં સ્વધામ પધાર્યા. (૪૮) પછી વિષ્ણુથી વર પ્રાપ્ત કરેલી, ભગવાનની યોગનિદ્રા અર્થાત્ એકાદશ ઈન્દ્રિયોથી પ્રગટ થયેલી હોવાથી યોગનિદ્રારૂપી એકાદશી લક્ષ્મીજીની માફક શ્રીવાસુદેવના અંગમાં પોતાનો નિશ્ચલ નિવાસ કરવા માટે ઈચ્છતી હતી. (૪૯) તપમાં પ્રીતિવાળી એકાદશી ફરીથી શ્રી વાસુદેવને પ્રસન્ન કરવા માટે મોક્ષના સ્થાનભૂત શ્વેતદ્વીપમાં સો વર્ષ સુધી તીવ્ર તપ કરતી હતી. એકાદશીની ભક્તિ અને તપથી પસન્ન થયેલા શ્રી વાસુદેવે એકાદશીની સમીપમાં આવીને, હે પ્રિયે, મારાથી વર માગો' આ પ્રમાણે કહ્યું (૫૦-૫૦) **એકાદશી બોલી** : હે પ્રભો ! જો મારા ઉપર પ્રસન્ન થયા હો તો લક્ષ્મીજીની માફક મને પોતાના એક અંગમાં નિવાસ આપો. (૫૨) **શ્રી ભગવાન બોલ્યા** : હે પ્રિયે ! મારી કેડની નીચેનો ભાગ ગરુડે આધીન કરેલો છે. મારું હૃદય લક્ષ્મીજીએ સ્વાધીન કર્યું છે. મારા હાથો પણ ચક્રાદિ આયુધોએ પોતાને આધીન કરેલા છે. (૫૩) મારા બન્ને કાન, સાંખ્ય અને યોગના સ્વરૂપ વાળા કુંડળોથી રોકાયેલા છે, મુખ સરસ્વતીએ રોકેલું છે, મારું મસ્તક મુગટે રોકેલું છે, મારું નેત્રસ્થાન તમોને આપું છું. (૫૪) બુદ્ધિમાન પુરુષોએ અતિપ્રિય હોય તેનું સ્થાન નેત્ર કહ્યું છે. (મારે તો તમો આંખ્યને ઠેકાણે છો એમ) તમો લક્ષ્મીથી પણ અતિ પ્રિય છો માટે મારાં બન્ને નેત્રોમાં તમોને નિવાસ આપું છું. (૫૫) આજે અષાઢ માસની શુક્લ એકાદશી તિથિ છે માટે આજથી આરંભીને ચાર માસ સુધી મારા નેત્રસ્થાનમાં તમો નિવાસ કરો. (૫૬) હે તપસ્વિની ! દરેક વર્ષે ચાર માસ તમોને મારા નેત્રમાં ધારણ કરીને ક્ષીરસાગરમાં શયન કરીશ. (૫૭) હે સુંદરી, તમે મુરદાનવ નામના દૈત્યને મારવા માટે તપ રૂપ મારા ઈન્દ્રિયોમાં રહેલા તેજથી ઉત્પન્ન થયા છો માટે નામથી યોગનિદ્રા છો (માટે મારા નેત્રમાં તમારો નિવાસ યોગ્ય છે.) (૫૮) ક્ષીરસાગરમાં શેષ નાગરૂપી પલંગમાં મેં તમારો સ્વીકાર કર્યો હશે. ત્યારે મારા ગૃહસ્થ ભક્તો પણ તપ જ કરશે. (બીજા મંગળ કાર્ય નહિ કરે.) (૫૯) જે મનુષ્યો ચાતુર્માસમાં મારી પ્રીતિ માટે તપ, યોગાભ્યાસ અથવા મારી પૂજા પણ કરશે તે પુરુષોને તપનું ફળ તત્કાલ થશે. (૬૦) હે ભક્તો, આ પ્રકારે વાસુદેવ એકાદશીને વર આપી યોગનિદ્રારૂપ એકાદશીને બન્ને નેત્રોમાં ધારણ કરી ક્ષીર સાગરમાં શેષરૂપી પલંગમાં શયન કરતા હતા. (૬૧) તે તે વિષયોના સ્વાદરૂપ ઈન્દ્રિયોના આહારનો ત્યાગ કરી મને સહિત ઈન્દ્રિયોની વૃત્તિઓ પોતપોતાના સ્વરૂપની સન્મુખ કરતા હતા. (૬૨) સર્વ ઈન્દ્રિયોના આહાર રહિત ભગવાન યોગનિદ્રાને પામ્યાં ત્યારે આહારે રહિત થકા લક્ષ્મી, ભગવાનનાં ચરણકમળ ચાંપતાં હતાં. (૬૩) તે વખતે નંદ સુનંદ આદિક પાર્ષદો ઉપવાસ કરીને ક્ષીરસાગરના કિનારા ઉપર તપ કરવા લાગ્યા. (૬૪) તે પ્રકારે જ મટકું માર્યા વગર જેમ હોય તેમ શ્રી વાસુદેવ ભગવાનની મૂર્તિમાં અર્પણ કરી છે દૃષ્ટિઓ જેમણે એવા શ્વેતદ્વીપના નિવાસી મુનિસમૂહો આહાર કર્યા વિના નિરાહારપણે જિતેન્દ્રિય થઈને ક્ષીરસાગરના ઉત્તર કિનારે તપ કરતા હતા. (૬૫)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

चातुर्मास्ये ततः सर्वैर्यथाशक्ति तपो जनाः! । कर्तव्यं वासुदेवस्य सह लक्ष्म्या च पूजनम् ॥६६॥ योगनिद्रां तपोरूपां हशावित्थं तु बिभ्रति । खिद्यन्ते हृदि ते भक्ताः क्षीराब्धितटवासिनः ॥६७॥ नोग्रेणाप्यात्मतपसा तेषां खेदोऽभवत्क्वचित् । कष्टं तु स्वामिनो वीक्ष्य खिन्नास्ते भक्तभावतः ॥६८॥ भुवि मङ्गलकृत्यानि चातुर्मास्ये बुधाः क्वचित् । गृहिणोऽपि न कुर्वन्ति कुर्वन्त्येव तपस्त्वतः ॥६९॥ चातुर्मास्ये व्यतीतेऽथ कार्तिकैकादशीदिने । जागर्ति भगवांस्तर्हि जायते ह्युत्सवो महान् ॥७०॥ आनन्दं परमं प्राप्य मुनयः पार्षदास्तथा। ब्रह्मेन्द्रमुख्याः सगणा देवाश्चार्चन्ति तं प्रभुम् ॥७१॥ दिव्यैरनेकोपचारैर्वादयन्तः स्वदुन्दुभीन् । योगेश्वरं तमर्चन्ति लक्ष्म्या युक्तं सुरास्तदा ॥७२॥ अत्यानन्दो भवत्येव ब्रह्माण्डेऽप्यखिले जनाः! । एकादश्यामूर्जशुक्ले ततो ह्येषाऽधिका मता ॥७३॥ एषा जन्मतिथिश्चास्ति साक्षाद्धर्मस्य मत्पितुः । आत्रेयमुनिशप्तस्य ततोऽपीष्टाऽस्ति नः खलु ॥७४॥ योगेश्वरो वासुदेवः प्रातरस्यां सह श्रिया । पूज्यश्च भक्त्या सहितो धर्मदेवो मदाश्रितैः ॥७५॥ एकादश्यधिपश्चार्च्यो राधया सहितो जनाः ! । प्रदोषकाले भगवान् प्रीत्या दामोदराभिधः ॥७६॥ उपवासो जागरश्च ब्रह्मचर्यादिभिर्यमैः । सहात्र कार्यो द्वादश्यां पुनश्चोत्तरपूजनम् ॥७७॥ सन्तर्प्य भगवद्भक्तान्ब्राह्मणांश्चेष्टभोजनैः । सह स्वेष्टजनैः कार्या व्रतिभिः पारणा ततः ॥७८॥ आरभ्यैकादशीं भक्ता दिनानां पञ्चकं सुराः । महोत्सवं प्रकुर्वन्ति क्षीराब्धौ मुनिभिः सह ॥७९॥ दिनपञ्चक एतस्मिन्ग्रहदोषोऽपि नास्ति वै । ब्राह्मणानामपि ततो भवेदुद्वाहमङ्गलम् ॥८०॥ प्रबोधन्युत्सवो ह्येष प्रतिवर्षं मदाश्रितैः । अवश्यमेव कर्तव्यः सर्वव्रतफलप्रदः ॥८१॥ औद्धवीये सम्प्रदाये सर्वाप्येकादशी तिथिः । उपोषितव्या पुरुषैर्नारीभिश्चात्मशुद्धये ॥८२॥ एकादशीं वासुदेव आत्मीयामेव यत्तिथिम् । चकारातः सदोपोष्या शुक्ला कृष्णा च साखिलैः ॥८३॥

---

હે ભકતો, માટે ચાતુર્માસમાં સર્વ ભગવાનના ભક્તોએ યથાશક્તિ તપ કરવું અને લક્ષ્મીએ સહિત શ્રી વાસુદેવનું પૂજન કરવું. (૬૬) આ પ્રમાણે શ્રી વાસુદેવે તપરૂપી યોગનિદ્રાને બન્ને નેત્રોમાં ધારણ કરી ત્યારે ક્ષીરસાગરના તટમાં નિવાસ કરનારા પાર્ષદો પોતાના હૃદયમાં ખેદ પામતા હતા. (૬૭) અતિ તીવ્ર તપથી પણ પાર્ષદો વગેરેને ક્યારેય પણ ખેદ થતો ન હતો; પરંતુ પોતાના સ્વામી શ્રી વાસુદેવનું કષ્ટ જોઈને પાર્ષદો વગેરે ભક્તિભાવથી ખેદ પામતા હતા. (૬૮) માટે વિવેકી ગૃહસ્થજનો પણ ચાતુર્માસમાં પૃથ્વીમાં ઉપનયન વિવાહાદિ મંગલ કાર્યો કરતા નથી, પરંતુ તપ જ કરે છે. (૬૯) પછી ચાતુર્માસ વ્યતીત થાય ત્યારે કારતક સુદી એકાદશીને દિવસે ભગવાન જાગે છે ત્યારે મહાન ઉત્સવ થાય છે. (૭૦) મુનિઓ તથા પાર્ષદો અને પોતપોતાના ગણો સહિત બ્રહ્મા, ઈંદ્રાદિ દેવો પરમાનંદ પામીને શ્રી વાસુદેવને પૂજે છે. (૭૧) તે સમયે બ્રહ્માદિ દેવો પોતાનાં દુન્દુભિઓને વગાડતા સતા દિવ્ય ઉપચારોથી લક્ષ્મીએ સહિત શ્રી વાસુદેવને પૂજે છે. (૭૨) હે જનો ! કારતક સુદી એકાદશીને દિવસે સમગ્ર બ્રહ્માંડમાં પણ અત્યાનંદ જ થાય છે, માટે આ પ્રબોધિની એકાદશી અધિક જ માનેલી છે. (૭૩) દુર્વાસાના શાપથી મારા પિતા પ્રત્યક્ષ ધર્મદેવની આ પ્રબોધિની એકાદશી જન્મતિથિ છે. તેથી પણ અમારે ઈષ્ટ જ છે. (૭૪) આ પ્રબોધિની એકાદશીના પ્રાતઃકાળમાં મારાં આશ્રિતજનોએ લક્ષ્મીએ સહિત યોગેશ્વર વાસુદેવ ,અને ભક્તિએ સહિત ધર્મદેવને પૂજવા. (૭૫) હે જનો ! સાયંકાળે પ્રબોધિની એકાદશીના સ્વામી દામોદર નામના ભગવાન શ્રી વાસુદેવને રાધાએ સહિત પ્રીતિપૂર્વક પૂજવા. (૭૬) આ એકાદશીમાં બ્રહ્મચર્યાદિ નિયમોની સાથે ઉપવાસ અને જાગરણ કરવું અને બારસને દિવસે ફરી ઉત્તર પૂજન કરવું. (૭૭) વળી ભગવદ્‌ભક્ત બ્રાહ્મણોને ઈષ્ટ ભોજનોથી તૃપ્ત કરીને પછી એકાદશીનું વ્રત કરનાર જનોએ પોતાના ઈષ્ટજનોની સાથે પારણાં કરવાં. (૭૮) હે ભક્તો ! દેવો મુનિઓની સાથે એકાદશીને આરંભીને પાંચ દિવસ સુધી ક્ષીરસાગરના તટમાં મહોત્સવ કરે છે. (૭૯) આ પાંચ દિવસોમાં ગ્રહોના અસ્તાદિ અશુભ દોષ પણ નથી માટે બ્રાહ્મણોને પણ વિવાહાદિ મંગલ કાર્ય થાય. (૮૦) મારાં આશ્રિતોએ સર્વ વ્રતના ફળને આપનાર આ પ્રબોધિનીનો ઉત્સવ દરેક વર્ષે અવશ્ય કરવો જ. (૮૧) ઉદ્ધવ સંપ્રદાયમાં રહેલાં પુરુષો અને સ્ત્રીઓએ પોતાની શુદ્ધિ માટે બધી એકાદશીઓએ પણ ઉપવાસ કરવો. (૮૨) જે કારણથી વાસુદેવ ભગવાન એકાદશી તિથિને પોતાની જ કરતા હતા માટે મારાં આશ્રિત ભક્તોએ શુકલ પક્ષની અને કૃષ્ણ પક્ષની એકાદશીઓના હંમેશા ઉપવાસ કરવા. (૮૩)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

यतिभिर्विधवास्त्रीभिस्त्वेषोपोष्या विशेषतः । अन्यथा ब्रह्महत्या स्यात्तेषां तासां दिने दिने ॥८४॥ एकादशीनां सर्वासामशक्ता य उपोषणे । कुर्युस्ते फलनक्ताद्यैरनुकल्पैरपि व्रतम् ॥८५॥ ईदृशाः पुरुषा ये स्युरशक्ता योषितोऽपि च । चातुर्मास्यैकादशिकास्तैरुपोष्याः प्रयत्नतः ॥८६॥ तत्राप्यशक्तैः पुरुषैः फलमूलाशनं जनाः ! । विधाय तद्व्रतं कार्यं दानपूजासमन्वितम् ॥८७॥ अपि तादृग्विधैः पुम्भिरुपोष्यास्तिस्र आदरात् । शयी बोधनी चैव तृतीया परिवर्तिनी ॥८८॥ तासामप्यधिका ह्येषा बोधन्यानन्ददायिनी । उपोष्यावश्यमखिलैः सकृद्द्विर्वाम्बुपायिभिः ॥८९॥ एकेनाप्युपवासेन प्रबोधन्याः कृतेन वै । एकादशीनां सर्वासां निराहारफलं भवेत् ॥९०॥ व्यावहारिकविक्षेपो न येषां धनिनश्च ये । महापूजा तु तैः कार्या सर्वास्वेकादशीष्वपि ॥९१॥ श्रीकृष्णो निर्गुणो यस्तु सर्वकारणकारणम् । स मध्यकलशे पूज्यः सर्वतोभद्रमण्डले ॥९२॥ पञ्चरात्रप्रसिद्धाभिः शक्तिभिः सह तस्य याः । मूर्तयः केशवाद्यास्ताः पूज्यास्तत्परिमण्डले ॥९३॥ पञ्चामृतेन स्नपनमभिषेको महांस्तथा । महानैवेद्यदानं च महानीराजनं प्रभोः ॥९४॥ एतत्सर्वं हि शास्त्रोक्तं कार्यमेकादशीदिने । सर्वत्र कर्तुं योऽशक्तः स चातुर्मास्य आचरेत् ॥९५॥ तत्राप्यशक्तो बोधन्यां कुर्यादेव महोत्सवम् । वित्तशाठ्यं न कर्तव्यं धनिकैरत्र मामकैः ॥९६॥ एकादशीतिथिः प्रेष्ठा वासुदेवस्य सद्धियः! । ततस्तत्रोत्सवः कार्यो विशेषेण मदाश्रितैः ॥९७॥ य एतां नैव मन्येत तिथिं स तु पुमाञ्जनाः! । औद्धवीयाध्वनो बाह्यो भवतीत्यवगम्यताम् ॥९८॥

---

ચતુર્થાશ્રમીઓ અને ત્યાગીઓ તથા વિધવા સ્ત્રીઓએ તો વિશેષપણે આ એકાદશીનો ઉપવાસ કરવો; જો એમ ના કરે તો યતિઓ અને વિધવા સ્ત્રીઓને દિવસે દિવસે બ્રહ્મહત્યા થાય. (૮૪) જે પુરુષો સર્વ એકાદશીઓના ઉપવાસમાં અસમર્થ હોય તે પુરુષોએ ફલાહાર, રાત્રિભોજન વગેરે ગૌણ પક્ષથી એકાદશીનું વ્રત કરવું. (૮૫) આ પ્રકારના ફલાહારથી વ્રત કરનારા જે અશક્ત પુરુષો હોય અને અશક્ત સ્ત્રીઓ હોય તેમણે પણ ચાતુર્માસની એકાદશીઓના પ્રયત્નપૂર્વક ઉપવાસ કરવા. (૮૬) હે જનો ! ચાતુર્માસની એકાદશીઓના ઉપવાસમાં પણ અસમર્થ પુરુષોએ ફળ, મૂળ વગેરે જમીને, દાન અને પૂજાથી યુક્ત એકાદશીનું વ્રત કરવું. (૮૭) તેવા ફલાહારાદિથી એકાદશીનું વ્રત કરનારા પુરુષોએ પણ શયની-અષાઢ સુદી એકાદશી, પ્રબોધિની- કારતક સુદી એકાદશી અને ત્રીજી પરિવર્તિની-ભાદરવા સુદી એકાદશી : આ ત્રણ એકાદશીઓના આદરપૂર્વક ઉપવાસ કરવા. (૮૮) આ ત્રણ એકાદશીઓમાં પણ સર્વેને અધિક આનંદ આપનારી આ પ્રબોધિનીનો એકવાર અથવા બે વાર જળપાન કરતા થકા પણ અવશ્ય ઉપવાસ કરવો. (૮૯) પ્રબોધિનીનો એક ઉપવાસ કરવાથી પણ સર્વ એકાદશીઓનું નિરાહાર ઉપવાસના વિધાનનું ફળ થાય. (આ સ્તુતિ છે.) (૯૦) જે ગૃહસ્થોને પોતાના વ્યવહારનો વિક્ષેપ ન હોય અને ઘણા ધનવાળા હોય તે બન્ને પ્રકારના ગૃહસ્થોએ સર્વે એકાદશીઓમાં પણ મહાપૂજા કરવી. (૯૧) સર્વ કારણના કારણ, માયિક ગુણથી રહિત જે શ્રીકૃષ્ણ તેની તો સર્વતોભદ્ર મંડલના મધ્ય કલશમાં પૂજા કરવી. (૯૨) પંચરાત્રમાં પ્રસિદ્ધ શક્તિઓ (સ્ત્રીઓ) સાથે જે શ્રીકૃષ્ણની કેશવાદિ મૂર્તિઓ, તેને શ્રીકૃષ્ણની ચોતરફ મંડલાકાર પ્રદેશમાં પૂજવી. (૯૩) શ્રીકૃષ્ણનું પંચામૃતથી સ્નાન તથા મહાઅભિષેકનું વિધાન અને પક્વાન્નાદિ મહાનૈવેદ્યનું સમર્પણ અને મહાનીરાજન; શાસ્ત્રમાં કહેલા વિધિ પ્રમાણે આ સર્વ એકાદશીને દિવસે કરવું, સર્વે એકાદશીઓમાં મહાપૂજા કરવા માટે અશક્ત હોય તે ચાતુર્માસની એકાદશીઓમાં મહાપૂજા કરે. (૯૪-૯૫) ચાતુર્માસની એકાદશીઓમાં પણ મહાપૂજા કરવા અશક્ત પુરુષ પ્રબોધિની એકાદશીને દિવસે મહાપૂજાનો ઉત્સવ કરે જ. આ મહોત્સવમાં મારા આશ્રિત ધનવાન પુરુષોએ ધનના વ્યયનો સંકોચ કરવો નહિ. (૯૬) હે સદ્બુદ્ધિવાળા ભક્તો, એકાદશી તિથિ વાસુદેવને અતિ પ્રિય છે માટે મારા આશ્રિતોએ એકાદશીના દિવસે વિશેષપણે ઉત્સવ કરવો. (૯૭) હે ભક્તો ! જે પુરુષ આ એકાદશીનો ઉપવાસ વગેરેથી (વ્રતનો) આદર કરતો નથી તે પુરુષ ઉદ્ધવ સંપ્રદાયથી બહાર છે : આ પ્રકારે જાણો. (૯૮)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच – **एतन्निशम्यातिमुदं प्रपन्ना महामुनेस्तस्य वचो जनास्ते । विधिं व्रतस्यास्य बुभुत्सवस्तं पुनः स्म पृच्छन्ति हरिं नरेश ! ॥९९॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे प्रबोधन्युत्सवे एकादश्युत्पत्तितद्वरदानादिनिरूपणनामा द्वात्रिंशोऽध्यायः ॥३२॥

जना ऊचुः– **एकादशीव्रतमिदं विधिना केन सत्पते ! । अस्माभिरिह कर्तव्यं वक्तुमर्हसि तद्धि नः ॥१॥** श्रीनारायणमुनिरुवाच – **एकादशीव्रतविधिं स्मृतिवाक्यैः सनिर्णयम् । मदाश्रितेभ्यो वक्ष्यामि स्निग्धेभ्यो वोऽहमादरात् ॥२॥ उदयात्प्राक् चतस्रस्तु घटिका अरुणोदयः । पलमात्रमपि त्याज्यं दशम्यास्तत्र सर्वथा ॥३॥ शुद्धा विद्धा द्वयी नन्दा त्रेधा न्यूनसमाधिकैः । षट्प्रकाराः पुनस्त्रेधा द्वादश्यूनसमाधिकैः ॥४॥ एवमष्टादशविधा प्रोक्ता पूर्वैर्महर्षिभिः । विद्धायास्तत्र हेयत्वाच्छुद्धायां किञ्चिदुच्यते ॥५॥ आदित्योदयवेलायाः प्राङ्मुहूर्तद्वयान्विता । एकादशी तु सम्पूर्णा शुद्धा च परिकीर्तिता ॥६॥**

---

**સુવ્રતમુનિ કહે છે :** હે નરેશ ! મહામુનિ શ્રીહરિનું આ પૂર્વોક્ત વચન સાંભળી અતિ આનંદ પામેલા સભામાં બેઠેલા પ્રશ્નકર્તા વગેરે જનો આ એકાદશી વ્રતનો વિધિ (અનુષ્ઠાન પ્રકાર) જાણવા ઈચ્છતા સતા ફરીથી તે વિધિ શ્રી સ્વામિનારાયણ ભગવાનને પૂછતા હતા. (૯૯) *ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીયપ્રકરણે પ્રબોધન્યુત્સવે એકાદશ્યુત્પત્તિ તદ્વરદાનાદિનિરૂપણનામા દ્વાત્રિંશોઽધ્યાયઃ (૩૨)*

## અધ્યાય : 33

## શ્રીહરિએ સ્વાશ્રિત જનોને પોતાના ઈષ્ટાર્થની સિદ્ધિને આપનારો વિસ્તારે સહિત એકાદશી વ્રતનો વિધિ કહ્યો છે.

**ભક્તજનો કહે છે :** હે સત્પુરુષોના સ્વામી ! એકાદશીનું વ્રત અમોએ આ લોકમાં કયા વિધિથી કરવું તે વિધિ સહિત અમોને કહેવા માટે યોગ્ય છો જ. (૧) **શ્રી નારાયણ મુનિ બોલ્યા :** હે ભક્તો ! હું નિર્ણયે સહિત એકાદશી વ્રતનો વિધિ સ્મૃતિકારનાં વચનોથી મારે વિષે સ્નેહવાળા મારા આશ્રિત એવા તમોને આદરથી કહું છું. (૨) તેમાં એકાદશી દશમીના વેધવાળી વ્રતમાં ન લેવી. અરુણોદય સમયે પલ માત્ર પણ દશમીનો સંબંધ હોય તો તે એકાદશી વેધવાળી કહેવાય. અરુણોદય તો સૂર્યોદય પહેલાં ચાર ઘડીનો સમય સમજવો. પંચાવન ઘડી ઉપર એક પલ પણ અધિક દશમી હોય તો એકાદશીના પ્રવેશમાં દશમીના વેધવાળી એકાદશીનો ઉપવાસ કરવો નહિ. (૩) નંદા એકાદશી શુદ્ધા અને વિદ્ધા એ રીતે બે પ્રકારની છે. ન્યૂન-સમ અને અધિક એવા ભેદથી બે પ્રકારની એકાદશીના છ ભેદ થાય છે. શુદ્ધ ન્યૂના, શુદ્ધ સમા, શુદ્ધ અધિકા તથા વિદ્ધ ન્યૂના વિદ્ધ સમા, વિદ્ધાધિકા એમ મળીને છ ભેદ થાય છે. તેવી રીતે છ ભેદો પણ દ્વાદશીના જે ન્યૂન સમ અને અધિક ભેદોથી કરી તેના ત્રણ પ્રકારથી એક એક ભેદ ત્રણ પ્રકારે કરવાથી અઢાર ભેદો થાય છે. જેમ કે ૧. શુદ્ધ ન્યૂન, ન્યૂન દ્વાદશિકા ૨. શુદ્ધ ન્યૂન, સમ દ્વાદશિકા ૩. શુદ્ધ ન્યૂન, અધિક દ્વાદશિકા, ૪ શુદ્ધ સમ, ન્યૂન દ્વાદશિકા ૫ શુદ્ધસમ, સમદ્વાદશિકા ૬ શુદ્ધ સમાધિક દ્વાદશિકા ૭ શુદ્ધાધિક ન્યૂન દ્વાદશિકા ૮ શુદ્ધાધિક સમ દ્વાદશિકા ૯ શુદ્ધાધિકાધિક દ્વાદશિકા, ૧૦ વિધ્ધન્યૂન દ્વાદશિકા ૧૧ વિદ્ધન્યૂન, સમ દ્વાદશિકા ૧૨ વિદ્ધન્યૂનાધિક દ્વાદશિકા ૧૩ વિદ્ધ સમ ન્યૂન દ્વાદશિકા ૧૪ વિધ્ધ સમ સમ દ્વાદશિકા, ૧૫ વિદ્ધ સમાધિક દ્વાદશિકા ૧૬ વિદ્ધાધિક ન્યૂન દ્વાદશિકા ૧૭ વિદ્ધાધિક સમ દ્વાદશિકા ૧૮ વિદ્ધાધિકાધિક દ્વાદશિકા, આ પ્રકારે અઢાર પ્રકારની એકાદશીઓ પૂર્વના મહર્ષિઓએ કહી છે તેમાં વિદ્ધાના નવ પ્રકારવાળી એકાદશીનું વૈષ્ણવોએ ત્યાગ કરવાનું હોવાથી કંઈ પણ કહેવાનું રહેતું નથી. શુદ્ધા એકાદશીમાં લગારેક કહીએ છીએ (૪-૫) રાત્રિ એક ઘટિકા બાકી રહે તે રૂપ સૂર્યના ઉદયકાળથી પહેલાં બે મુહૂર્તથી યુક્ત એકાદશી તો સંપૂર્ણ અને શુદ્ધ કહેલી છે. ( તે સમયે દશમીનો વેધ નથી.) (૬)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

एकादशी द्वादशी वाऽधिका चेत्त्यज्यतां दिनम् । पूर्वं ग्राह्यं तूत्तरं स्यादिति वैष्णवनिर्णयः ॥७॥ एकादशी यदा लुप्ता परतो द्वादशी भवेत् । उपोष्या द्वादशी तत्र यदीच्छेत्परमां गतिम् ॥८॥ दशमीमिश्रिता पूर्वा द्वादशी यदि लुप्यते । उपोष्या द्वादशी तत्र त्रयोदश्यां तु पारणम् ॥९॥ सम्पूर्णैकादशी त्याज्या परतो द्वादशी यदि । उपोष्या द्वादशी तत्र द्वादश्यामेव पारणम् ॥१०॥ नवमी पलमेकं स्याद्दशमी परतो यदि । उपोष्या द्वादशी शुद्धा त्रयोदश्यां तु पारणम् ॥११॥ अविद्धैकादशी स्याच्च द्वादशी वृद्धिगामिनी । यदा तदोपवासस्तु शक्तैः कार्यो दिनद्वये ॥१२॥ द्वादश्यामेव चाशक्तैर्विष्णुभक्तैरुपोषणम् । कर्तव्यं सोत्सवं भक्त्या द्वादश्यामेव पारणम् ॥१३॥ एकादशीमुपोष्याथ द्वादशीं समुपोषयेत्। न तत्र विधिलोपः स्याद्देवो यदुभयोर्हरिः ॥१४॥ दशमी पञ्चपञ्चाशद्घटिका यावदेव हि । तावन्न दशमीवेधः प्रोक्तः प्रोक्तस्तदूर्ध्वतः ॥१५॥ एवमेव हि गोस्वामिविठ्ठलेशमतं ततः । मदीयैरपि युष्माभिस्तदेव ग्राह्यमादरात् ॥१६॥ बहुवाक्यविरोधेऽथ सन्देहे च तिथेर्विदाम् । उपोष्या द्वादशी शुद्धा त्रयोदश्यां तु पारणम् ॥१७॥ एकादशी प्रमादेन विस्मृता स्याद्यदा तदा । परेऽह्नि द्वादशीमेव समुपोष्य व्रतं चरेत् ॥१८॥ एकादशेन्द्रियाणां यत्तत्तद्विषयलक्षणम् । हित्वाऽऽहारं वासुदेवसम्मुखत्वमखण्डितम् ॥१९॥ एकादशीव्रतस्यैतन्मुख्यं भवति लक्षणम् । उपवासो निराहार एष एव मतो बुधैः ॥२०॥

---

એકાદશી  સાઠ ઘટિકા પરિમિત હોય અને બીજે દિવસે એક ઘડી હોય તો પૂર્વનો દિવસ ત્યાગ કરવો અર્થાત્ તે દિવસે વ્રત ન કરવું. પછીનાં દિવસમાં એક ઘડી એકાદશી હોય તો તે દિવસ વ્રત કરવું અથવા દ્વાદશી અધિક હોય તો પૂર્વ દિવસ-એકાદશીનો દિવસ ત્યાગ કરવો અને પછીનો દિવસ સાઠ ઘડી રૂપ દ્વાદશીનો દિવસ ગ્રહણ કરવો એવો વૈષ્ણવોનો નિર્ણય છે. (૭)

એકાદશી જ્યારે લોપ પામેલી હોય અર્થાત્ સૂર્યોદય પછી એક ઘડી દશમી હોય પછી પંચાવન ઘડી એકાદશી ક્ષય પામેલી હોય આવી એકાદશીને બીજે દિવસે દ્વાદશી હોય તો પરમ ગતિ ઈચ્છનારે દ્વાદશીનો ઉપવાસ કરવો. (૮) પૂર્વે એકાદશી જો દશમીથી મિશ્રિત હોય અને દ્વાદશીનો લોપ હોય તો દ્વાદશીનો ઉપવાસ કરવો. પારણાં તો ત્રયોદશીને દિવસે કરવા. (૯) જો એકાદશી સંપૂર્ણ  હોય અને પછીથી દ્વાદશી સાઠ ઘડી પર્યંત હોય ત્યારે સંપૂર્ણ એકાદશીનો ત્યાગ કરવો. દ્વાદશીનો (બે દ્વાદશીમાં પ્રથમ દિવસે) ઉપવાસ કરવો અને પારણાં તો બીજી દ્વાદશીમાં જ કરવાં. (૧૦) જો નવમી એક પલ માત્ર હોય અને પછી દશમી હોય અર્થાત્ નવમીમાં દશમીનો ક્ષય હોય ત્યારે તેવા પ્રકારની દશમીને બીજે દિવસે એકાદશીનો ત્યાગ કરી શુદ્ધ એકાદશીનો ઉપવાસ કરવો. ત્રયોદશીમાં પારણાં કરવાં, જ્યારે નવમી બે હોય, બીજી નવમી પલ માત્ર હોય તેમાં દશમી ક્ષય પામેલી હોય ત્યારે બીજે દિવસે એકાદશીનો ત્યાગ કરી દ્વાદશીનો ઉપવાસ કરી તેરસને દિવસે પારણાં કરવાં. (૧૧) જ્યારે એકાદશી દશમીના વેધે રહિત હોય અને બારસ વૃદ્ધિ પામેલી હોય ત્યારે બે ઉપવાસ કરવા. શક્તિમાન હોય તેમણે બે દિવસ  ઉપવાસ કરવા; શુદ્ધ એકાદશીમાં અને પ્રથમ દ્વાદશીમાં ઉપવાસ કરવો અને બીજી દ્વાદશીમાં પારણાં કરવાં. (૧૨) બે ઉપવાસ કરવા અસમર્થ વિષ્ણુભક્તોએ તો પ્રથમ દ્વાદશીમાંજ ઉત્સવ સહિત ઉપવાસ કરી બીજી દ્વાદશીમાં પારણા કરવાં (૧૩) એકાદશીનો ઉપવાસ કરીને પછી દ્વાદશીનો ઉપવાસ કરે તેમાં બંને ઉપવાસમાં, વિધિલોપ (પારણાનો અતિક્રમ દોષ) થાય નહિ, કારણ કે એકાદશી અને દ્વાદશીના દેવ શ્રી વાસુદેવ છે. (૧૪) જ્યાં સુધી દશમી પંચાવન ઘડી જ હોય ત્યાં સુધી દશમીનો વેધ કહ્યો નથી. તેથી ઉપર એક પલ માત્ર હોય તો દશમી વેધ કહ્યો છે; (૧૫) કારણ કે ગોસ્વામી વિઠ્ઠલનાથજીનો મત એવો જ છે મારા આશ્રિત તમોએ પણ તે મત જ આદરપૂર્વક ગ્રહણ કરવો. (૧૬) ઘણાં વાક્યોના વિરોધમાં-જ્યોતિષ જાણનારાઓને દશમી અથવા એકાદશીના સંશયમાં શુદ્ધ દ્વાદશીનો ઉપવાસ કરવો અને તેરસનાં પારણાં કરવાં. (આમાં પ્રમાણ ઉત્સવ-પ્રતાનથી જાણવું.) (૧૭) જો એકાદશી તિથિ પ્રમાદથી ભૂલી જવાય તો બીજે દિવસે બારસનો ઉપવાસ કરી વ્રત આચરણ કરવું. (૧૮) મન સહિત અગિયાર ઈન્દ્રિયોના તેતે વિષય લક્ષણ આહારનો ત્યાગ કરી અખંડ વાસુદેવપરાયણ થવું. તે એકાદશી વ્રતનું મુખ્ય લક્ષણ છે. વિવેકી પુરુષોએ નિરાહાર ઉપવાસ પણ એ જ માનેલો છે. (૧૯-૨૦)

उपावृत्तस्य पापेभ्यो यस्तु वासो गुणैः सह । उपवासः स विज्ञेयः सर्वभोगविवर्जितः ॥२१॥ तज्जप्यजपनं ध्यानं तत्कथाश्रवणादयः । उपवासकृतामेते गुणाः प्रोक्ता मनीषिभिः ॥२२॥ क्षमा सत्यं दया शौचं दानमिन्द्रियनिग्रहः । देवपूजाग्निहवनं सन्तोषः स्तेयवर्जनम् ॥२३॥ एकादशं ब्रह्मचर्यमहिंसा रसवर्जनम् । सर्वव्रतेषु सामान्या धर्मा एते त्रयोदश ॥२४॥ स्मृतिश्चालोकनं गन्धः स्वादनं चापि कीर्तनम् । अन्नस्य सर्वथा वर्ज्यमुपवासं प्रकुर्वता ॥२५॥ पतितान्नास्तिकान्हिंस्रानन्त्यजान्वेदनिन्दकान् । नाभिभाषेत नेक्षेत न स्पृशेच्च व्रती नरः ॥२६॥ अनातुरोऽसकृन्नैव पिबेत्तोयं व्रती क्वचित् । इन्द्रियक्षोभजननं भक्षयेन्न च किञ्चन ॥२७॥ गात्राभ्यङ्गं शिरोभ्यङ्गं ताम्बूलं चानुलेपनम् । व्रतस्थो वर्जयेदेव खट्वायां शयनं तथा ॥२८॥ स्त्रीणां सम्प्रेक्षणात्स्पर्शात्ताभिः सङ्कथनादपि । विपद्यते ब्रह्मचर्यं स्वदारेषु तु सङ्गमात् ॥२९॥ प्राप्त आवश्यके कार्ये भाषणे तु परस्त्रिया । स्पर्शे वापदि संवृत्ते न दोषो गृहिणां स्मृतः ॥ ३०॥ असकृज्जलपानाच्च सकृत्ताम्बूलचर्वणात् । उपवासः प्रणश्येद्वै दिवास्वापाच्च मैथुनात् ॥३१॥ अश्रुप्रपातो रोषश्च कलहस्य कृतिस्तथा । पुरुषं च स्त्रियं सद्यो व्रताद्भ्रंशयति ध्रुवम् ॥३२॥ दानं व्रतं च नियमा ज्ञानं ध्यानं हुतं जपः । यत्नेनापि कृतं सर्वं क्रोधितस्य वृथा भवेत् ॥३३॥ मिथ्यावादे दिवास्वापे बहुशोऽम्बुनिषेवणे । अष्टाक्षरं व्रती जप्त्वा शुद्ध्येदष्टोत्तरं शतम् ॥३४॥ स्तेननास्तिकहिंस्रादिभाषणादौ व्रती पुमान् । अष्टाक्षरं जपेत्स्नात्वा शतत्रयमुदङ्मुखः ॥३५॥ ताम्बूलमद्यमांसादिभक्षणे मैथुने तथा । ग्राम्यवार्ताप्रकथने गालिदाने च ताडने ॥३६॥ तमालभक्षे मदकृद्भक्षे च द्यूतदेवने। अज्ञानादपि सञ्जाते व्रतलोपो भवेद्ध्रुवम् ॥३७॥

પાપોથી નિવૃત્ત થયેલા માણસને (આગળ કહેશે એવા) જપ આદિ ગુણોની સાથે વાસ-સ્થિતિ,સર્વ માયિક ભોગથી રહિત હોય, તે ઉપવાસ જાણવો. (૨૧) વ્રતના ઈષ્ટદેવનો જપવા યોગ્ય મંત્રનો જપ, મૂર્તિના ચિંતવનરૂપ ધ્યાન, ઈષ્ટદેવની કથાનું શ્રવણ, તેમનું પૂજન વગેરે ઉપવાસ કરનારાઓના ગુણો શાસ્ત્ર જાણનારા મુનિઓએ કહ્યા છે. (૨૨) ક્ષમા, સત્ય, દયા, શૌચ, દાન, ઈંદ્રિયોનો નિગ્રહ, વ્રતના ઈષ્ટદેવની પૂજા, વિષ્ણુ દૈવત્ય હોમ, યથાલાભથી સંતોષ, અસ્તેય : આ દસ ગુણો છે. (૨૩) અગિયારમું બ્રહ્મચર્ય, અહિંસા, રસાસ્વાદનો ત્યાગ : આ તેર ગુણ સર્વ વ્રતોમાં સામાન્ય ધર્મો છે. (૨૪) ઉપવાસ કરનારા પુરુષે અન્નનું ચિન્તન, જોવું, ગંધ લેવો, લગારેય પણ રસજ્ઞાનને માટે ભક્ષણ અને ગુણનું વર્ણન સર્વથા ત્યાગ કરવું. (૨૫) વ્રતવાળા મનુષ્યે મહાપાપાચરણોથી પોતાની જાતિથી ભ્રષ્ટ, નાસ્તિક, હિંસા કરનારા, અંત્યજ વગેરે અને વેદની નિન્દા કરનાર, બૌધ્ધ,જૈન વગેરેની સાથે ભાષણ કરવું નહિ, તેને જોવા નહિ, સ્પર્શ પણ કરવો નહિ. (૨૬) વ્રતી આતુરતાએ રહિત છતે વારંવાર જળ ક્યારેય ન પીવે તથા ઈન્દ્રિયોને ક્ષોભ કરનાર કંઈ પણ ભક્ષણ કરે નહિ. (૨૭) વ્રત કરનારે સુગંધી તૈલ વગેરેથી શરીરને ચોળીને સ્નાન, સુગંધી તૈલ વગેરેથી માથાના કેશ વગેરેને ઓળવું; તામ્બુલ અને શરીરે ચન્દનાદિથી અંગરાગ કરવાનો ત્યાગ કરવો તથા ખાટલા ઉપર શયનનો ત્યાગ કરવો. (૨૮) પરસ્ત્રીઓને જોવાથી ,સ્પર્શ કરવાથી અને તેમની સાથે સંભાષણથી તેમજ પોતાની સ્ત્રીના અંગસંગથી બ્રહ્મચર્યવ્રતનો નાશ થાય છે અર્થાત્ તે આ વ્રતનો નાશ કરનારૂં થાય છે. (૨૯) આવશ્યક કાર્ય હોય તો પરસ્ત્રીની સાથે ભાષણમાં અને આપત્કાલમાં કોઈ પ્રયોજન માટે તેના અંગનો સ્પર્શ કરવામાં આવ્યો હોય તો ગૃહસ્થોને બ્રહ્મચર્ય વ્રતના ત્યાગરૂપ દોષ નથી એમ સ્મૃતિમાં કહ્યું છે. (૩૦) વારંવાર જળપાન કરવાથી, એકવાર નાગરવેલનાં પાનના ભક્ષણથી અને દિવસે શયન કરવાથી અને પોતાની સ્ત્રી સાથે મૈથુન કરવાથી ઉપવાસ નાશ પામે છે જ. (૩૧) રડવું, ક્રોધ તથા કલેશ કરવો એ ક્રિયા પુરુષ અને સ્ત્રીને તત્કાલ જ વ્રતથી ભ્રષ્ટ કરે છે જ. (૩૨) દાન, વ્રત, નિયમો, જ્ઞાન, ધ્યાન, હોમ, જપ આ મહા પ્રયત્નથી પણ સંપાદન કરેલું સમગ્ર દાનાદિ ક્રોધવાળા પુરુષનું નિષ્ફળ થાય. (૩૩) મિથ્યાપવાદમાં, દિવસે નિદ્રામાં તથા ઘણી વાર જળ પીવામાં આવે તો વ્રતધારી એકસોઆઠ વાર મંત્ર જપીને શુદ્ધ થાય. (૩૪) ચોર, નાસ્તિક, પ્રાણી હિંસામાં પ્રીતિવાળા વગેરે જેમાં છે એવા પતિત, વેદનિંદાદિ કરનારાઓની સાથે ભાષણ કરવામાં અને તેમનો સ્પર્શાદિ કરવામાં વ્રતી પુરુષ સ્નાન કરી ઉત્તર મુખવાળો થઈને ત્રણસો વાર અષ્ટાક્ષર મંત્ર જપે. (૩૫) તામ્બુલ, મદ્ય, માંસ વગેરે જેમાં છે એવું ડુંગળી, લસણ આદિના ભક્ષણમાં તથા પોતાની સ્ત્રીના સંભોગમાં, ગ્રામ્ય વાર્તા પ્રયોજને રહિત કહેવામાં અને ગાળ દેવામાં તથા તાડન કરવામાં તથા તમાકુ ખાવી, પીવી, સૂંઘવી અને માદક વસ્તુ ખાવામાં, જુગાર રમવામાં, અજ્ઞાનથી આ થયેલાં હોય તોપણ અચૂક વ્રતનો લોપ થાય છે. અર્થાત્ પ્રાયશ્ચિત્તથી તે દોષનો પરિહાર થતો નથી. (૩૬-૩૭)

विभर्तृकायाः स्पर्शस्तु भवेत्पुंसो धिया यदा । तस्याः पुंसोऽथ च स्पर्शो व्रतलोपस्तदोभयोः ॥३८॥ बुद्धिपूर्वं वीर्यपातः पुंसः स्वप्नेऽपि चेद्भवेत् । तदापि व्रतलोपः स्यात्तत्पुमान् बिभियात्स्त्रियाः ॥३९॥ अष्टावेवाव्रतघ्नानि जलं मूलं फलं पयः । हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् ॥४०॥ सर्वभूतभयेनाथ व्याधिनाऽज्ञानतोऽपि वा । व्रतभङ्गो यदि भवेत्तर्हि दोषो न विद्यते ॥४१॥ पूर्वं व्रतं गृहीत्वा यो नाचरेत्काममोहतः । जीवन्भवति चण्डालो मृतः श्वा च स जायते ॥४२॥ क्रोधात्प्रमादाल्लोभाद्वा व्रतभङ्गो भवेद्यदि । दिनत्रयं न भुञ्जीत मुण्डनं शिरसोऽथवा ॥४३॥ जाताशौचे मृताशौचे व्रतप्रारम्भतः पुरा । प्राप्ते नित्यं व्रतं कुर्याद्दानार्चादिविवर्जितम् ॥४४॥ उपावसंश्च नियमान् पालयन्सूतकी स्वयम् । व्रताङ्गदेवपूजादि कारयेद्ब्राह्मणेन वै ॥४५॥ प्रारब्धेऽथ व्रते प्राप्ते सूतके तु व्रती स्वयम् । स्नात्वा व्रताङ्गदेवस्य भक्त्या कुर्वीत पूजनम् ॥४६॥ नारी रजोदर्शने तु कृत्वा स्वयमुपोषणम् । देवार्चनादि चान्येन कारयेत्प्रयता व्रते ॥४७॥ व्रतोपवासदिवसे श्राद्धप्राप्तौ तु पूरुषः । पित्र्यमन्नमुपाघ्राय कुर्वीत व्रतमादरात् ॥४८॥ वैष्णवैस्तु विशेषेण श्राद्धमेकादशीभवम् । द्वादश्यामेव कर्तव्यं पितरो वैष्णवा यतः ॥४९॥ गर्भिणी रोगिणी च स्त्री सूतिका चापदं गता । अन्येनैव व्रतं स्वीयं कारयेन्न तु हापयेत् ॥५०॥ भार्या पत्युर्व्रतं कुर्याद्भार्यायाश्च पतिर्व्रतम् । तदभावे परस्ताभ्यां व्रते प्रतिनिधिर्मतः ॥५१॥ पुत्रं शिष्यं विनीतं वा भगिनीं भ्रातरं च वा । एषामभावे विप्रं वा व्रते स्वस्य नियोजयेत् ॥५२॥ पितृमातृपतिभ्रातृगुर्वर्थे च विशेषतः । य कुर्यादुपवासं स पुण्यं शतगुणं व्रजेत् ॥५३॥ उपवासासमर्थो वा विप्रमेकं सुभोजयेत् । तावद्धनं च वा दद्याद्भुक्तस्य द्विगुणं पुमान् ॥५४॥

જ્યારે પુરુષને વિધવા સ્ત્રીનો બુદ્ધિપૂર્વક સ્પર્શ થાય અને જ્યારે વિધવાને બુદ્ધિપૂર્વક પુરુષનો સ્પર્શ થાય ત્યારે બંનેનો વ્રતલોપ થાય. (૩૮) જો પુરુષને બુદ્ધિપૂર્વક જાણીને જ હસ્તમૈથુનાદિથી વીર્યપાત થાય અને સ્વપ્નમાં પણ વીર્યપાત થાય તો પણ વ્રતલોપ થાય માટે વ્રતવાળો પુરુષ સ્ત્રીથી બીક પામે. (૩૯) જળપાન એક વાર અથવા બે વાર, મૂળોનું ભોજન, ફળનું ખાવું, દૂધપાન, વ્રતને યોગ્ય હવિષ્યાન્ન, બ્રાહ્મણે અનુમતિ આપેલું, ગુરુનું વચન તથા ઔષધભક્ષણ : આ આઠ વસ્તુઓ વ્રતને નાશ કરનારી થતી નથી. (૪૦) ધાડ અથવા પોતાના રાજ્યના ઉપદ્રવથી અથવા પારકા રાજ્યના કોઈ ઉપદ્રવથી સર્વે પ્રાણી માત્રને ભય ઉત્પન્ન થયો હોય અથવા રોગની ઉત્પત્તિથી અથવા અજ્ઞાનથી વ્રતનો ભંગ થાય તેમાં દોષ નથી. (૪૧) જે પુરુષ પ્રથમ વ્રત ગ્રહણ કરીને કામમાં મોહ પામેલો વિષયભોગની ઈચ્છાથી વ્રતનું આચરણ ના કરે તે પુરુષ જીવતો સતો ચંડાળ છે અને મરીને કૂતરાની યોનિને પામે છે. (૪૨) જો ક્રોધ, પ્રમાદ અને લોભથી વ્રતભંગ થાય તો ત્રણ દિવસ સુધી જમે નહિ અથવા શિખા અને દાઢી-મૂછે સહિત મસ્તકનું મુંડન કરાવે. (૪૩) વ્રતના આરંભ દિવસથી પહેલાં જન્મ નિમિત્તે સૂતક અથવા મરણ નિમિત્તે સૂતક આવે તો વ્રત નિત્ય પ્રાપ્ત હોવાથી દાન અને વ્રતના અધિદેવતાનું પૂજન વગેરે જેને છે એવા બ્રાહ્મણ-ભોજનાદિ રહિત વ્રત કરે. (૪૪) સૂતકી પોતે ઉપવાસ કરતો સતો નિયમોનું પાલન કરીને વ્રતના અંગભૂત દેવનું પૂજન વગેરે બ્રાહ્મણ પાસે કરાવે. (૪૫) આરંભ કર્યે સતે જન્મ અને મરણનું સૂતક પ્રાપ્ત થાય તો પોતે વ્રતધારી સ્નાન કરીને વ્રતના અંગદેવતા-પરિવારે સહિત શ્રીકૃષ્ણનું ભક્તિથી પૂજન કરે. (૪૬) સધવા અને વિધવા સ્ત્રી, રજોદર્શન થાય તો પોતે ઉપવાસ કરી આરંભ કરેલા વ્રતના નિયમોમાં તત્પર થઈ દેવપૂજન વગેરે બીજાની પાસે કરાવે. (૪૭) વ્રતના ઉપવાસને દિવસે શ્રાદ્ધ પ્રાપ્ત થાય તો પુરુષ, પિતૃઓને નિવેદન કરેલું અન્ન સુંઘીને આદર પૂર્વક વ્રત કરે. (૪૮) વૈષ્ણવોએ તો એકાદશીમાં પ્રાપ્ત થયેલું શ્રાદ્ધ વિશેષપણે દ્વાદશીમાં જ કરવું, કારણ કે પિતૃઓ વૈષ્ણવો છે. (૪૯) ગર્ભવતી, રોગવાળી, સૂતિકા અને કોઈપણ આપત્કાળને પામેલી સ્ત્રી પોતાનું વ્રત બીજાની પાસે જ કરાવે, પણ ત્યાગ ન કરે. (૫૦) પતિનું વ્રત સ્ત્રી કરે અને પત્નીનું વ્રત પતિ કરે તે બેના અભાવમાં બીજો વ્રતમાં પ્રતિનિધિ માનેલો છે. (૫૧) વિનયવાળો પુત્ર અથવા શિષ્ય અથવા બહેન અથવા ભાઈ એ સર્વેના અભાવમાં ધર્મનિષ્ઠ બ્રાહ્મણને પોતાના વ્રતમાં પ્રતિનિધિ રૂપે યોજના કરવી. (૫૨) પિતા, માતા, પતિ, ભાઈ, ગુરુ તેમના નિમિત્તે જે માણસ વિશેષપણે ઉપવાસ કરે તે માણસ સો ગણા પુણ્યને પામે; (૫૩) અથવા ઉપવાસ કરવામાં અસમર્થ પુરુષ એક સ્વધર્મનિષ્ઠ બ્રાહ્મણને દ્વાદશીમાં મિષ્ટાન્નથી તૃપ્ત કરે અથવા મિષ્ટાન્ન ભોજનની પૂર્તિ થાય તેટલું દ્રવ્ય આપે અથવા ભોજનથી બમણું દ્રવ્ય આપે. (૫૪)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सहस्त्रसंमितां देवीं जपेद्वा प्राणसंयमान् । कुर्याद्द्वादशसङ्ख्याकान् यथाशक्त्यातुरो नरः ॥५५॥ शारीरान्नियमांस्त्वत्र कर्ता कारयिता तथा । पालयेत्सकलान्भक्त्या श्रम एवान्यथा भवेत् ॥५६॥ कांस्यं माषान्मसूरांश्च चणकान्कोरदूषकान् । शाकं मधु परान्नं च पुनर्भोजनमैथुने ॥५७॥ द्यूतमत्यम्बुपानं च मृषावादं तथा कलिम् । गन्धताम्बूलपुष्पादि दशम्यां वैष्णवस्त्यजेत् ॥५८॥ अत्याहारमसत्सङ्गमनृतं च दिवास्वपिम् । त्यजेत्स्वपेन्निशि भुवि शब्दादिविषयोज्झितः ॥५९॥ दिवा दशम्यां लघुभुक् स्नात्वाभ्यर्च्य हरिं निशि । उदङ्मुखो व्रतस्यास्य गृह्णीयान्नियमं नरः ॥६०॥ एकादश्यां तु वा प्रातर्दन्तधावनपूर्वकम् । स्नात्वोपवासनियमं गृह्णीयात्सन्निधौ हरेः ॥६१॥ एकादश्यां निराहारः स्थित्वाहमपरेऽहनि । भोक्ष्यामि पुण्डरीकाक्ष! शरणं मे भवाच्युत ! ॥६२॥ रजन्या अन्तिमे यामे समुत्थाय हरिं हृदि । ध्यात्वा प्रणम्य भक्तांश्च कुर्याच्छौचविधिं पुमान् ॥६३॥ न दन्तधावनं कार्यं काष्ठेनैकादशीदिने । अपां द्वादश गण्डूषैः पर्णाद्यैः शोधयेन्मुखम् ॥६४॥ स्नात्वा स्वं नैत्यकं कर्म विधाय स समाहितः । शक्त्या सम्भृतसम्भारः कुर्यात्कृष्णमहार्चनम् ॥६५॥ व्रतकर्ता पुमानर्चेदेकादश्यधिपैः सह । सशक्तिभिश्च श्रीकृष्णं रुक्मिणीकान्तमादरात् ॥६६॥ एकादशीस्वामिनाम्ना कृष्णं वैकं समर्चयेत् । तच्छक्तिनाम्ना लक्ष्मीं च भक्त्याऽशक्तस्तु पुरुषः ॥६७॥ मार्गशीर्षे शुक्लपक्षे मोक्षदैकादशी मता। पूजनीयश्च मालत्या केशवोऽत्र श्रिया सह ॥६८॥ अर्घ्ये फलं तु नारिङ्गं नैवेद्ये मोदकास्तथा । सप्त धान्यानि देयानि मुख्यान्यत्रोदितानि वै ॥६९॥

---

વ્રત કરવામાં અશક્ત પુરુષ, હજાર વિષ્ણુગાયત્રીનો જપ કરે અથવા બાર સંખ્યાવાળાં પ્રાણાયામો યથાશક્તિ કરે. (૫૫) આ વ્રતમાં શરીર સંબંધી સમગ્ર નિયમોને કર્તા-(પ્રતિનિધિ) અને કરાવનાર (અશક્ત પુરુષ) પ્રીતિથી પાલન કરે. જો નિયમો ન પાલન કરે તો વ્રતનું ફળ પ્રાપ્ત થાય નહિ. (૫૬) વ્રત કરનાર દશમીને દિવસે કાંસાના પાત્રમાં ભોજન, અડદ, મસૂર, ચણા, કોદરા, દશ પ્રકારનું શાક; મધ, પારકા અન્નનું ભોજન અને બીજી વાર ભોજન અને મૈથુન, જુગાર, અતિજળનું પાન, ગ્રામ્યવાર્તા તથા કલેશ; ચંદનથી અંગમાં લેપન કરવું; તામ્બુલ, પુષ્પની માલાઓ વગેરે જેને છે એવા ક્ષાર, મીઠું વગેરે; વૈષ્ણવ દશમીને દિવસે ઉપરોક્ત વસ્તુઓનો ત્યાગ કરે. (૫૭-૫૮) અતિશય અન્નભોજન, અસત્પુરુષનો સંગ, અસત્ય ભાષણ અને દિવસની નિદ્રા વ્રતકર્તા પુરુષ દશમીને દિવસે સર્વ પ્રકારે ત્યાગ કરે. તેમજ માયિક શબ્દાદિ વિષયોનો ત્યાગ કરેલો થકો રાત્રિએ પૃથ્વીમાં શયન કરે. (૫૯) દશમી તિથિને દિવસે મિતાહારી પુરુષ રાત્રિમાં સ્નાન કરી શ્રીહરિને પૂજીને ઉત્તર મુખે થઈને એકાદશી વ્રતનો નિયમ ગ્રહણ કરે; (૬૦) અથવા એકાદશીને દિવસે પ્રાતઃકાળમાં યથાવિધિ દાતણ કરી તીર્થાદિમાં સ્નાન કરી શ્રીકૃષ્ણની પ્રતિમાની સમીપમાં ઉપવાસનો નિયમ ગ્રહણ કરે. (૬૧) 'હું એકાદશીને દિવસે અન્નાદિ-ઈન્દ્રિયોના આહારે રહિત થઈને બીજે દિવસે-બારસને દિવસે અન્ન જમીશ. હે પુંડરીકાક્ષ ! હે અચ્યુત ! મારું રક્ષણ કરનારા થાઓ.' (૬૨) **એકાદશીને દિવસે કરવાનું કહે છે :** વ્રત કરનાર પુરુષ રાત્રિના છેલ્લા પહોરમાં ઊઠીને પોતાના હૃદયમાં શ્રીકૃષ્ણનું ધ્યાન કરી તેમના ભક્તોને પ્રણામ કરી શૌચવિધિ કરે. (૬૩) વ્રતકર્તાએ એકાદશીને દિવસે કાષ્ટથી દાતણ કરવું નહિ, પરંતુ જળથી બાર કોગળા કરવા, પાંદડાં વગેરેથી મુખની શુદ્ધિ કરવી. (૬૪) જિતેન્દ્રિય વ્રત કર્તા પુરુષે સ્નાન કરી પોતાનું નિત્ય પ્રાપ્ત કર્મ કરી પોતાની સંપત્તિને અનુસરી સમગ્ર પૂજાના સરસામાનથી શ્રીકૃષ્ણનું મહાપૂજન કરવું. (૬૫) વ્રત કરતાં પુરુષ-પોતપોતાની શક્તિરૂપ સ્ત્રીઓ સહિત એવા, એકાદશીઓના કેશવાદિ સ્વામીઓની સાથે રૂક્ષ્મણીના સ્વામી શ્રીકૃષ્ણને ભક્તિભાવથી પૂજે. (૬૬) અસમર્થ પુરુષ તો તે એકાદશીના સ્વામી કેશવાદિ નામથી એક કેવલ શ્રીકૃષ્ણનું જ ભક્તિથી પૂજન કરે અને તેમની શક્તિભૂત શ્રી આદિક નામથી રૂકમણીરૂપ લક્ષ્મીની પૂજા કરે. (૬૭) **હવે માસ અને પક્ષના ભેદથી ભિન્ન ભિન્ન એકાદશીઓ, તેના અધિપતિ દેવો, તે દેવોની શક્તિઓ અને તે દેવોની પૂજાનાં ઉપકરણવિશેષોને કહે છે;** માગશર માસના શુકલ પક્ષની એકાદશી **'મોક્ષદા'** નામની કહી છે; તેના અધિષ્ઠાતા **કેશવ** નામે છે, તેમની **શ્રી**નામની પત્નીની સાથે, માલતી-(જાઈ)ના પુષ્પથી આ એકાદશીએ પૂજા કરવી. પૂજામાં નારંગી ફલ કહેલું છે તથા નૈવેદ્યમાં તળેલો લાડુ કહેલો છે. આ એકાદશીમાં સાત ધાન્યનું દાન માનેલું છે. (જવ, ઘઉં, ડાંગર, તલ, કાંગ, શ્યામો અને ચીણો : આ સાત ધાન્ય કહ્યાં છે.) (૬૮-૬૯)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

मार्गशीर्षे कृष्णपक्षे सफलैकादशी मता । सङ्कर्षणोऽत्र सम्पूज्यः सुनन्दासहितः प्रभुः ॥७०॥ पूजायां मुनिपुष्पाणि नैवेद्ये गुडका मताः । अत्रार्घ्ये चामृतफलं स्वर्णदानं च कथ्यते ॥७१॥ पौषे शुक्ला तु सानन्दा कथितैकादशी तिथिः । नारायणोऽत्र सम्पूज्यः पद्मया सह भक्तितः ॥७२॥ कुम्भान्युक्तानि पुष्पेषु चूर्णं नैवेद्यमत्र च । अर्घ्ये च दाडिमफलं देयं च घृतपात्रकम् ॥७३॥ एकादशी पौषकृष्णा तिलदाख्या च कीर्तिता । तस्यां श्रीप्रियया साकं वासुदेवोऽर्च्य उच्यते ॥७४॥ कह्लाराण्यत्र पुष्पाणि नैवेद्ये घृतपूरकाः । ज्ञेया द्राक्षाफलं चार्घ्ये वस्त्रदानमिहोत्तमम् ॥७५॥ माघे शुक्ला जयानाम्नी कथितैकादशी तथा । नित्यया सह सम्पूज्यो माधवस्तत्र हीश्वरः ॥७६॥ पुष्पेषु बकुलान्यर्घ्ये बीजपूरं निवेदने । मण्डकाश्चात्र दाने च तिलद्रोणः प्रकीर्तितः ॥७७॥ एकादशी माघकृष्णे विजयाख्याथ कथ्यते । प्रद्युम्नो व्रतिभिस्तत्र पूजनीयो धिया सह ॥७८॥ पूजायां तुलसी मुख्या तत्र जम्बीरमर्हणे । सोहालिकाश्च नैवेद्ये दाने तूपानहौ मते ॥७९॥ एकादशी फाल्गुने च शुक्ला धात्रीति कीर्त्यते । गोविन्दं पूजयेत्तत्र चन्द्रवत्या सह व्रती ॥८०॥ मन्दाराण्यत्र पुष्पेषु कंसारश्च निवेदने । तिलपात्रं तथा दाने ज्ञेयमक्षोडमर्हणे ॥८१॥ एकादशी फाल्गुने च कृष्णोक्ता पापमोचनी । अनिरुद्धः पूजनीयः सुशीलासहितस्त्विह ॥८२॥ कुन्दपुष्पाणि पूजायां सेवाश्चोक्ता निवेदने । कर्कन्धूफलमर्घ्येऽत्र दाने च तिलगौर्मता ॥८३॥ एकादशी चैत्रशुक्ले विमलाख्या प्रकीर्तिता । कामदाख्या च सैवोक्ता सर्ववाञ्छितदायिनी ॥८४॥ रमया सहितः शक्त्या तत्र विष्णुस्तु पूज्यते । उपचारैः षोडशभिर्यथावित्तं यथाविधि ॥८५॥ अर्घ्ये फलं चिर्भटाख्यमाम्रपुष्पं च पूजने । नैवेद्ये सक्तवश्चात्र दाने पक्वान्नमीरितम् ॥८६॥

માગશર માસના કૃષ્ણ પક્ષમાં **'સફલા'** નામની એકાદશીમાં **સુનંદા** નામની પત્નીએ સહિત પ્રભુ **સંકર્ષણ** નામના એકાદશીના પતિને પૂજવા. (૭૦) આ એકાદશીને દિવસે પૂજામાં અગથિયાનાં પુષ્પો માનેલાં છે. નૈવેદ્યમાં ગોળના લાડુ માનેલા છે. અર્ઘ્યમાં જામફળ કહેવાય છે અને સુવર્ણનું દાન મુખ્ય કહેલું છે. (૭૧) પોષ સુદી એકાદશી **'સાનંદા'** નામની એકાદશી કહી છે. આ એકાદશીને દિવસે **પદ્મા** નામની પત્નીની સાથે **નારાયણ** નામના એકાદશીના સ્વામી ભક્તિપૂર્વક પૂજવા. (૭૨) આ એકાદશીએ ગૂગળ વૃક્ષનાં પુષ્પો વડે ભક્તિથી પૂજા કરવી. નૈવેદ્યમાં ચૂરમાના લાડુ કહ્યા છે. (પૂર્વોક્ત તો મૂઠિયાં તળીને ઘીમાં કરેલો લાડુ સમજવો. અહીં તો રોટલો શેકીને પછી ચૂરમું કરીને લાડુ કરવો એવો ભેદ છે.) અર્ઘ્યમાં દાડમનું ફળ કહ્યું છે અને દાનમાં ઘીથી ભરેલું કાંસાનું પાત્ર આપવું. (૭૩) પોષ માસના કૃષ્ણ પક્ષની એકાદશી **'તિલદા'** નામથી પ્રસિદ્ધ છે. તેના અધિષ્ઠાતા **વાસુદેવ** નામે છે તેમની **શ્રીપ્રિયા** નામની પત્ની સાથે આ એકાદશીએ કલ્હાર નામનું ભૂમિમાં થનારું કમળ; જે લાલ ચણીબોર જેવું હોય છે, તે પુષ્પોથી પૂજા કરવી. અર્ઘ્યમાં દ્રાક્ષાફળ કહ્યું છે. નૈવેદ્યમાં ઘેબર જાણવાં. આમાં દાન તો વસ્ત્રનું ઉત્તમ માનેલું છે. (૭૪-૭૫) માઘ માસની શુકલા એકાદશી **'જયા'** નામની કહી છે. આમાં **નિત્યા** નામની પત્ની સાથે **માધવ** નામના પરમાત્મા આ એકાદશીના સ્વામીને પૂજવા. આ એકાદશીએ બોરસડીનાં પુષ્પો કહ્યાં છે. અર્ઘ્યમાં બીજોરું ફળ કહેલું છે. નૈવેદ્યમાં માંડા કહેલાં છે. દાનમાં દ્રોણ-('બત્રીશ શેર - આ શેર એંસી રૂપિયા ભારનો જાણવો')-પરિમિત તલથી ભરેલું ત્રાંબાનું પાત્ર કહ્યું છે (૭૬-૭૭) માઘ વદી એકાદશી **'વિજયા'** નામથી કહેવાય છે તેમાં વ્રતધારીઓએ **ધી** નામની પત્નીએ સહિત **પ્રદ્યુમ્ન** નામના એકાદશીના અધિપતિની પૂજા કરવી.પૂજામાં તુલસી મુખ્ય માનેલી છે. અર્ઘ્યમાં લીંબુફળ માનેલું છે. નૈવેદ્યમાં સુંહાળિયો અને દાનમાં પગરખાં માન્યાં છે. (૭૮-૭૯) ફાગણ સુદી એકાદશી **'ધાત્રી'** નામથી કહેવાય છે. વ્રતવાળા પુરુષે **ચંદ્રવતી** નામની પત્નીની સાથે **ગોવિંદ** નામના સ્વામીને પૂજવા. આમાં ગુલદાવદીનાં પુષ્પો અને નિવેદનમાં કંસાર જાણવો તથા દાનમાં તિલનું પાત્ર અને અર્ઘ્યમાં 'અખરોટ' નું ફળ જાણવું. (૮૦-૮૧) ફાગણ માસના કૃષ્ણપક્ષની એકાદશી **'પાપમોચની'** નામે પ્રસિદ્ધ છે. તેના અધિષ્ઠાતા **'અનિરુદ્ધ'** નામે છે તેની દેવી **'સુશીલા'** નામે છે. તેની સાથે તે ભગવાનની તે એકાદશીએ નાના મોગરાનાં પુષ્પો વડે પૂજા કરવી. અર્ઘ્યમાં બોરફળ માનેલું છે. નૈવેદ્યમાં સેવો માની છે. દાનમાં તિલધેનુ માની છે. (૮૨-૮૩) ચૈત્ર સુદી એકાદશી જ **'વિમલા'** નામની મનોવાંછિત ફળને આપનારી છે માટે બીજું નામ **'કામદા'** છે તેમાં રમા નામની શક્તિયુક્ત વિષ્ણુ -આ એકાદશીના અધિષ્ઠાતાની પોતાની સંપત્તિ પ્રમાણે શાસ્ત્ર વિધિ પ્રમાણે ષોડશોપચારથી વ્રતધારીઓએ પૂજા કરવી. આવા પૂજનમાં અર્ઘ્ય ફળમાં ચીભડું, પુષ્પમાં આંબાનો મોર, નૈવેદ્યમાં દળના લાડુ કહ્યા છે. દાનમાં પકવાન્ન કહ્યું છે. (૮૪-૮૫-૮૬)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી **શ્રી સ્વા. મંદિર - સરધાર**

**एकादशी कृष्णपक्षे चैत्रे प्रोक्ता वरूथिनी । नन्दया सहितः शक्त्या तत्रार्च्यः पुरुषोत्तमः ॥८७॥ अर्घ्ये जातीफलं प्रोक्तं नैवेद्ये वटकास्तथा । चम्पकानि च पुष्पेषु तत्र दाने च भूर्मता ॥८८॥ एकादशी मोहिनी च वैशाखस्य सितोदिता । माधव्या सह सम्पूज्यस्तस्यां तु मधुसूदनः ॥८९॥ पुष्पेषु मल्लिकात्रोक्ता नैवेद्ये पायसं तथा । अर्घ्ये फलं च पनसं शय्या दानं च कीर्त्यते ॥९०॥ एकादशी त्वपराख्या वैशाखस्यासिता मता । केतकैः पूजनीयोऽत्र सह त्रय्या ह्यधोक्षजः ॥९१॥ अर्घ्ये बहुफलं प्रोक्तं दुग्धौदननिवेदनम् । सवत्सायाश्च गोर्दानं ब्राह्मणायोदितं त्विह ॥९२॥ एकादशी निर्जलाख्या ज्येष्ठशुक्ले प्रकीर्तिता । पद्माक्ष्या सह सम्पूज्यस्त्रिविक्रम इह प्रभुः ॥९३॥ पुष्पेषु यूथिका मुख्या अर्घ्येऽत्राम्रफलं मतम् । नैवेद्ये दधिभक्तं च दाने छत्रं प्रकीर्त्यते ॥९४॥ एकादशी ज्येष्ठकृष्णा योगिनीसंज्ञिका मता । क्षेमङ्कर्या सहात्रार्च्यो नृसिंहाह्वय ईश्वरः ॥९५॥ भृङ्गराजोऽत्र पुष्पेषु ज्ञेयोऽर्घ्ये जाम्बवं फलम् । नैवेद्ये पिण्डकाः प्रोक्ता दानं च जलगोर्मतम् ॥९६॥ आषाढे शुक्लपक्षेऽथ शयन्येकादशी मता । वामनः कमलायुक्तः पूजनीयोऽत्र भक्तितः ॥९७॥ अपामार्गोऽत्र पुष्पेषु नैवेद्ये पूरिकास्तथा। नालिकेरीफलं त्वर्घ्ये दानं च स्वर्णगोर्मतम् ॥९८॥ आषाढकृष्णपक्षे च कामिकैकादशी मता । अच्युतो विजयायुक्तः सम्पूज्यस्तत्र भक्तितः ॥९९॥ पुष्पेषु पारिजातानि बिल्वमर्घ्ये फलं मतम् । शतच्छिद्रं च नैवेद्ये दानं स्त्रीपुंसवस्त्रयोः ॥१००॥ एकादशी पुत्रदाख्या श्रावणस्य सिता मता । श्रीधरः पूजनीयोऽत्र कान्तिमत्या सहैव च ॥१०१॥ शतपत्राणि पुष्पेषु नैवेद्येऽपूपकास्त्विह । प्रोक्ताः सीताफलं चार्घ्ये पादुकादानमुत्तमम् ॥१०२॥ अजाख्या श्रावणे मासि कृष्णैकादश्युदीरिता। सुन्दर्या च सहैवार्च्यस्तस्यां देवो जनार्दनः ॥१०३॥ पुष्पेषु पाटला मुख्या अर्घ्ये पूगीफलं मतम् । दाने च महिषी प्रोक्ता नैवेद्ये गुडमोदकाः ॥१०४॥**

ચૈત્ર વદી એકાદશી **'વરુથિની'** નામથી પ્રસિદ્ધ છે. આ દિવસે **'નંદા'** નામની પત્નીએ સહિત **'પુરુષોત્તમ'** નામના એકાદશીના સ્વામીની પૂજા કરવી. અર્ઘ્યમાં જાયફળ કહેલું છે. નૈવેદ્યમાં વડાં અને પુષ્પોમાં ચંપાનાં પુષ્પો અને દાનમાં પૃથ્વી માનેલી છે. (૮૭-૮૮) વૈશાખ સુદી એકાદશી **'મોહિની'** નામથી પ્રસિદ્ધ છે આમાં **'માધવી'** નામની પત્ની સાથે આ એકાદશીના સ્વામી **મધુસૂદનની** પૂજા કરવી. આમાં મોટા મોગરાથી પૂજા કરવી તથા નૈવેદ્યમાં દૂધપાક અને અર્ઘ્યમાં પનસનું ફળ અને દાનમાં શૈયા કહેલી છે. (૮૯-૯૦) વૈશાખ વદી એકાદશી **'અપરા'** નામથી પ્રસિદ્ધ છે આમાં **ત્રયી** નામની પત્ની સાથે **'અધોક્ષજ'** આ નામના એકાદશીના અધિષ્ઠાતાને કેતકીનાં પુષ્પોથી પૂજવા અને અર્ઘ્યમાં બોફલી - ('ઉમરડાં' નું ફળ) તથા નૈવેદ્યમાં દૂધભાત કહ્યા છે. બ્રાહ્મણને વાછરડીએ સહિત ગાયનું દાન કહેલું છે. (૯૧-૯૨) જેઠ સુદી એકાદશી **નિર્જલા** નામથી પ્રસિદ્ધ છે આમાં **પદ્માક્ષી** નામની પત્ની સાથે આ એકાદશીના અધિષ્ઠાતા **ત્રિવિક્રમને** જૂઈનાં પુષ્પોથી પૂજવા, અર્ઘ્યમાં આંબાનું ફળ માનેલું છે. નૈવેદ્યમાં દહીં-ભાત અને દાનમાં છત્રી કહેલી છે. (૯૩-૯૪) જેઠ વદી એકાદશી **યોગિની** નામથી પ્રસિદ્ધ છે આમાં **ક્ષેમંકરી** નામની પત્ની સાથે **નૃસિંહ** નામના આ એકાદશીના અધિષ્ઠાતાનું ભાંગરાનાં પુષ્પોથી પૂજન કરવું. અર્ઘ્યમાં જાંબુડાનાં ફળો જાણવાં અને નૈવેદ્યમાં પેંડા અને દાન જળધેનુનું માનેલું છે. (૯૫-૯૬) આષાઢ સુદી એકાદશી **દેવશયની** નામથી પ્રસિદ્ધ છે આમાં **કમલા** નામની પત્નીએ સહિત **વામન** નામના એકાદશીના સ્વામીની ભક્તિપૂર્વક અંઘેડાનાં પુષ્પોથી પૂજા કરવી તથા નૈવેદ્યમાં પુરીઓ માનેલી છે.અર્ઘ્યમાં નાળિયેર ફળ માનેલું છે અને દાન સુવર્ણ ધેનુનું માન્યું છે. (૯૭-૯૮) અષાઢ વદી એકાદશી **કામિકા** નામની છે તેમાં **વિજયા** નામની પત્નીએ સહિત **અચ્યુત** નામના એકાદશીના સ્વામીની ભક્તિપૂર્વક પારિજાતનાં પુષ્પોથી (હાર-શણગારથી) પૂજા કરવી. અર્ઘ્યમાં બીલ્વફળ માનેલું છે. નૈવદ્યમાં ખાજાં માનેલાં છે. સ્ત્રી પુરુષના વસ્ત્રનું દાન માનેલું છે. (૯૯-૧૦૦) શ્રાવણ માસની શુકલ પક્ષની એકાદશી **પુત્રદા** નામની પ્રસિદ્ધ છે આમાં **'કાંતિમતી'** નામની પત્ની સાથે **'શ્રીધર'** નામના એકાદશીના સ્વામીની કમળોનાં પુષ્પોથી પૂજા કરવી, નૈવેદ્યમાં માલપુવા કહેલા છે અને અર્ઘ્યમાં સીતાફળ કહેલું છે. અને પાદુકાનું દાન ઉત્તમ કહેલું છે. (૧૦૧-૧૦૨) શ્રાવણ વદી એકાદશી **'અજા'** નામની છે તેમાં સુંદરી નામની પત્ની સાથે **'જનાર્દન'** નામના એકાદશીના અધિષ્ઠાતાની સુંદરશેણીનાં પુષ્પોથી પૂજા કરવી,અર્ઘ્યમાં સોપારી તથા નૈવેદ્યમાં ગોળના લાડુ અને દાનમાં મહિષી (ભેંશ) કહેલી છે. (૧૦૩-૧૦૪)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી **શ્રી સ્વા. મંદિર - સરધાર**

एकादशी भाद्रपदे शुक्ला पद्माभिधा मता । हृषीकेशोऽत्र सम्पूज्यो ह्यपराजितया सह ॥१०५॥ काशपुष्पाणि पूजायां तिलपिष्टं निवेदने । कूष्माण्डमर्घ्ये विज्ञेयं दाने ब्रह्मपुरी मता ॥१०६॥ एकादशी भाद्रपदे कृष्णा च कथितेन्दिरा । उपेन्द्रः सुभगायुक्तः पूज्यो दूर्वाभिरत्र तु ॥१०७॥ अर्घ्ये शिवाफलं प्रोक्तं कर्णवेष्टं निवेदने । कन्यादानं तथात्रोक्तं व्रतसाङ्गफलाप्तये ॥१०८॥ एकादश्याश्विने मासि शुक्ला पाशाङ्कुशाभिधा । पद्मनाभः पद्मवत्या सह पूज्योऽत्र भक्तितः ॥१०९॥ शमीपत्राणि पूजायामर्घ्ये कामफलं मतम् । शालिपिष्टं च नैवेद्ये दाने प्रोक्तास्तु मोदकाः ॥११०॥ आश्विने कृष्णपक्षे तु रमाख्यैकादशी मता । हिरण्यया सहाभ्यर्च्यो हरिस्तस्यामधीश्वरः ॥१११॥ पुष्पेषु मुचुकुन्दानि तत्रार्घ्ये कदलं मतम् । नैवेद्येऽपि च तत्साज्यं दानं घृतघटस्य च ॥११२॥ कार्तिके शुक्लपक्षे तु बोधन्येकादशी मता । राधया सह सम्पूज्यस्तत्र दामोदरः प्रभुः ॥११३॥ पद्मपुष्पाणि पूजायां मुख्यान्यत्र निवेदने । मुद्गचूर्णं पद्मफलमर्घ्ये देयस्तु मञ्चकः ॥११४॥ कार्तिके कृष्णपक्षे स्यादेकादश्यभयाभिधा । कृष्णः सुलक्षणोपेतः पूजनीयोऽत्र च प्रभुः ॥११५॥ तिलपुष्पाणि पूजायां नैवेद्ये च गुडौदनः । ग्राह्यं सदाफलं चार्घ्ये तत्र देयो वृषो मतः ॥११६॥ एकादश्यधिके मासि कमलाख्या च तत्पतिः । पुरुषोत्तम इत्युक्तो विधिस्तन्मासिकोऽपरः ॥११७॥ इत्येकादशिकाधीशा मया प्रोक्ता सशक्तिकाः । तत्तत्पूजाविशेषश्च पूजकेप्सितपूरकः ॥११८॥ अलाभे तूक्तवस्तूनां सर्वास्वेकादशीष्वपि । कार्या पूजा यथाशक्ति यथालब्धोपचारकैः ॥११९॥ फले पूगीफलं देयं पुष्पे च तुलसीदलम् । नैवेद्ये शर्कराखण्डो दाने चान्नं स्वशक्तितः ॥१२०॥ आनूकूल्ये सति पुमाननुकल्पं न कर्हिचित् । गृह्णीयाद्वित्तलोभेन प्रमादाद्वाप्यनादरात् ॥१२१॥

---

ભાદરવા માસની શુકલ પક્ષની એકાદશી **'પદ્મા'** નામની છે આમાં **અપરાજીતા** નામની પત્નીની સાથે **હૃષીકેશ** નામના એકાદશીના અધિષ્ઠાતાની કાશ-(કાહડો)નાં પુષ્પોથી પૂજા કરવી. અર્ધ્યમાં કોળું કહ્યું છે. નિવેદનમાં તલસાંકળી અને દાનમાં બ્રહ્મપુરી (કાશી) કહી છે. (૧૦૫-૧૦૬) ભાદરવા વદી એકાદશી **'ઈન્દિરા'** નામની કહી છે આમાં તો **સુભગા** નામની પત્નીની સાથે **ઉપેન્દ્ર** નામના એકાદશીના અધિષ્ઠાતા ભગવાનની દુર્વાથી પૂજા કરવી. અર્ધ્યમાં આમળીનું ફળ કહેલું છે, નિવેદનમાં જલેબી કહેલી છે તથા વ્રતની અંગે સહિત ફળની પ્રાપ્તિ માટે કન્યાદાન કહેલું છે (૧૦૭-૧૦૮) આસો સુદી એકાદશી **પાશાંકુશા** નામની છે. આમાં **'પદ્મવતી'** નામની પત્નીની સાથે **'પદ્મનાભ'** નામના એકાદશીના અધિષ્ઠાતાને ભક્તિપૂર્વક પૂજવા. (૧૦૯) પૂજામાં શમડીના પત્રો વડે પ્રેમથી પૂજા કરવી, અર્ઘ્યમાં મીંઢળ માનેલું છે. નૈવેદ્યમાં હરિસો અને દાનમાં ઘી અને સાકરયુક્ત, ચોખાના લોટના લાડુઓ કહેલા છે. (૧૧૦) આસો વદી એકાદશી **'રમા'** નામની છે તેમાં **'હિરણ્યા'** નામની પત્નીની સાથે અધીશ્વર **'હરિ'** નામના એકાદશીના અધિષ્ઠાતાને સાતપડા મોગરાનાં પુષ્પોથી પૂજવા. અર્ધ્યમાં કેળાં માનેલાં છે અને નૈવેદ્યમાં પણ ઘી અને સાકરે સહિત કેળાં માનેલાં છે અને દાનમાં ઘીનો ઘડો કહેલો છે. (૧૧૧-૧૧૨) કારતક સુદી એકાદશી **પ્રબોધિની** કહેલી છે. આમાં **'રાધા'** નામની પત્ની સાથે પ્રભુ **'દામોદર'** એ નામના એકાદશીના સ્વામીની કમળનાં પુષ્પોથી પૂજા કરવી. નૈવેદ્યમાં મગદળ અને અર્ઘ્યમાં કમળનાં બીજ, અને દાન મંચ = ખાટલાનું માનેલું છે. (૧૧૩-૧૧૪) કારતક વદી એકાદશી **અભિધા** નામની છે. આમાં **'સુલક્ષણા'** નામની પત્ની સાથે પ્રભુ **'કૃષ્ણ'** નામના એકાદશીના સ્વામીની તિલનાં પુષ્પોથી પૂજા કરવી. નૈવેદ્યમાં ગોળ-ભાત (બિરંજ) માનેલો છે. અર્ધ્યમાં નાળિયેર ગ્રહણ કરવું, વૃષભનું દાન કરવું. (૧૧૫-૧૧૬) અધિક માસમાં **'કમલા'** નામની એકાદશી માનેલી છે. એકાદશીના સ્વામી 'પુરુષોત્તમ' કહેલા છે. બીજો વિધિ તો તે તે (જે માસ અધિક આવે તે) અધિક માસમાં કહેલો (પૂર્વોક્ત) જાણવો. (૧૧૭) આ પ્રકારે મેં પત્નીઓએ સહિત તેતે એકાદશીના અધીશ્વરો કહ્યા અને પૂજા કરનારની ઈચ્છાઓ પૂરણ કરનાર તે તે પૂજાવિશેષ પણ કહ્યો. (૧૧૮) પૂજા વિધિમાં બતાવેલી વસ્તુઓ ના મળે ત્યારે તેને બદલે ફળમાં સોપારી આપવી, પુષ્પમાં તુલસી પત્ર આપવું, નૈવેદ્યમાં સાકર આપવી, દાનમાં પોતાની શક્તિને અનુસરીને અન્ન આપવું. વ્રત કરનાર પુરુષે સર્વ વસ્તુઓની અનુકૂળતા હોય ત્યારે તો પૈસાના લોભથી અથવા પ્રમાદથી અથવા અનાદરથી પણ ગૌણ પક્ષ ક્યારેય પણ ગ્રહણ કરવો નહિ. (૧૧૯-૧૨૦-૧૨૧)

प्रतिमां कारितां शक्त्या श्रीकृष्णस्य सहश्रियः । हैम्यादिं पूजयेद्भक्त्या सर्वतोभद्रमण्डले ॥१२२॥ चतुर्विंशतिसङ्ख्याकैः पूर्वोक्तैः केशवादिभिः । नन्दादिभिः पार्षदैश्च तमर्चेत्स सहश्रियम् ॥१२३॥ अशक्तस्त्वेकमभ्यर्चेत्तण्डुलाष्टदलाम्बुजे । श्रीकृष्णं सश्रियं भक्त्या यथालब्धोपचारकैः ॥१२४॥ एकादश्यधिपो यः स्यात्तन्नाम्ना कृष्णमर्चयेत् । तस्य शक्तिर्भवेद्या च तन्नाम्ना रुक्मिणीं तथा ॥१२५॥ एकादश्यधिपाः सर्वे कृष्णस्यैकस्य पूजया । पूजिताः स्युः शक्तयश्च तेषां लक्ष्म्यास्तु पूजया ॥१२६॥ स्थापयित्वाऽव्रणं कुम्भं रत्नगर्भं सकाञ्चनम् । वस्त्रेण वेष्टिते तस्मिन् स्थापयेत्पात्रमुत्तमम् ॥१२७॥ कमलं द्वादशदलं कृत्वा तत्र सुशोभनम् । तत्रार्चेत्सश्रियं कृष्णं स्थापयित्वा यथाविधि ॥१२८॥ उपचारैः षोडशभिर्महापूजां समाचरेत् । लघुपूजामशक्तस्तु भक्त्या कुर्वीत पूरुषः ॥१२९॥ सहैव वैदिकैर्मन्त्रैर्द्विजः पूजनमाचरेत् । देशकालादि सङ्कीर्त्य मन्त्रानेतांश्च कीर्तयन् ॥१३०॥ तेजोमण्डलमध्यस्थं कोटिकन्दर्पसुन्दरम् । नवीननीरदश्यामं पीताम्बरधरं प्रभुम् ॥१३१॥ दक्षेण पाणिना चक्रं शङ्खं वामेन बिभ्रतम् । रमया सेवितं वामे दिव्यपङ्कजहस्तया ॥१३२॥ अनेकदिव्यालङ्कारं वनमालाविभूषितम् । उपास्यमानं प्रयतैः पार्षदैर्गरुडादिभिः ॥१३३॥ स्तूयमानं मुनिगणैर्देवगन्धर्वकिन्नरैः । कृष्णमेवंविधं ध्यात्वा ततः पूजनमाचरेत् ॥१३४॥ आवाहनीयं देवेशं भक्तानामभयप्रदम् । सुस्निग्धं वरदं शान्तं मनसावाहयाम्यहम् ॥१३५॥ सुवर्णमणिभिर्दिव्यैः खचिते देवनिर्मिते । दिव्यसिंहासने स्निग्धे निषीद त्वं सुराधिप ! ॥१३६॥ गङ्गोदकं सुरश्रेष्ठ! सुवर्णकलशे स्थितम् । गन्धपुष्पाक्षतैर्युक्तं गृहाण रमया सह ॥१३७॥

---

પોતાની સંપત્તિને અનુસરીને કરાયેલી સુવર્ણ વગેરેની લક્ષ્મીએ સહિત શ્રીકૃષ્ણની પ્રતિમાની સર્વતોભદ્રમંડલમાં ભક્તિથી પૂજા કરે. (૧૨૨) વ્રત કરનારો પુરુષ ચોવીસસંખ્યાવાળા પૂર્વે કહેલાં પત્નીઓએ સહિત કેશવાદિ એકાદશીઓના સ્વામીઓ અને નંદાદિ પાર્ષદો સહિત અને લક્ષ્મીએ સહિત શ્રીકૃષ્ણને પૂજે. (૧૨૩) વ્રત કરનાર અશક્ત પુરુષ તો લક્ષ્મીએ સહિત એક કૃષ્ણને ચોખાથી કરેલા આઠ પત્રવાળા કમળમાં યથાશક્તિ પ્રાપ્ત થયેલા ઉપચારોથી ભક્તિથી પૂજે. (૧૨૪) જે એકાદશીનાં અધિપતિ હોય તેના નામથી કૃષ્ણને પૂજે તથા એકાદશીનાં અધિપતિની જે શક્તિ હોય તેના નામથી રૂક્ષ્મણીને પૂજે. (૧૨૫) એક કૃષ્ણની પૂજાથી સર્વે એકાદશીઓના સ્વામીઓ પૂજેલા થાય છે. એક લક્ષ્મીના પૂજનથી સર્વે એકાદશીઓના અધિપતિઓની શક્તિઓ પૂજેલી થાય છે. (૧૨૬) વ્રત કરતાં પુરુષ છિદ્ર વિનાના ઘડાને સ્થાપીને તેમાં જળ ભરીને તેમાં સુવર્ણ તથા પંચરત્નને નાખીને, વસ્ત્રથી વીંટીને તે કુંભની ઉપર એક પાત્ર સ્થાપીને તેમાં સુશોભિત બાર પત્રનું કમળ ચોખાથી કરીને તે કમળમાં શ્રી સહિત કૃષ્ણની સ્થાપના કરીને શાસ્ત્રવિધિ પ્રમાણે ષોડશોપચારથી મહાપૂજા કરે. અશક્ત પુરુષ તો ભક્તિથી અલ્પ પૂજા કરે. (૧૨૭-૧૨૮-૧૨૯) તેમાં ત્રણ વર્ણનો વ્રત કરનાર પુરુષ દેશકાલાદિ (અમુક ગામ-તિથિ વગેરેના સંકલ્પ પૂર્વક) બોલીને વૈદિક મંત્રોની સાથે જ કહેવાશે એવા મંત્રોને બોલતો સતો પૂજન કરે. (૧૩૦)

**એકાદશીઓમાં પૂજાવિધિને કહેતા સતા ધ્યાન, આવાહનાદિ અનુક્રમે કહે છે :** અક્ષર બ્રહ્મના તેજના સમુદાયમાં દિવ્ય સિંહાસનમાં રહેલા કરોડો કામદેવના સમાન સુંદર નવીન મેઘની માફક શ્યામ સુંદર પિતાંબરધારી પોતાના ભક્તોના મનોરથ પૂર્ણ કરવામાં સમર્થ; (૧૩૧) જમણા હાથથી સુદર્શન ચક્ર અને ડાબા હાથથી શંખને ધારણ કરતા; વામ પડખે રહેલાં - હાથમાં સુંદર કમળવાળાં લક્ષ્મીજીએ સેવાયેલા; (૧૩૨) અનેક દિવ્યાલંકારોવાળા, વનની માળાઓથી અલંકૃત થયેલા, સેવાપરાયણ ગરુડાદિ પાર્ષદોએ રાજાધિરાજના ઉપચારોથી આરાધના કરાયેલા; (૧૩૩) નારદાદિ મુનિઓના સમુદાયોએ અને દેવ-ગાંધર્વ અને કિન્નરોએ સ્તુતિ કરાયેલા એવા લક્ષ્મીપતિ કૃષ્ણનું ધ્યાન કરી પછી પૂજનનું આચરણ કરે. (૧૩૪) આવાહ્ન કરવા યોગ્ય, પોતાના સેવકોને અભય આપનારા, પોતાના ભક્તો ઉપર સ્નેહવાળા, ભક્તોને વરપ્રદાતા, સૌમ્ય આકૃતિવાળા, બ્રહ્માદિ દેવોના સ્વામી શ્રીકૃષ્ણને હું મનથી આવાહ્ન કરું છું. (૧૩૫) **હવે આસન આપવાનો મંત્ર કહે છે :** હે દેવાધિપતિ ! દિવ્ય સુવર્ણ અને મણિઓથી જડેલા અને દેવોએ નિર્માણ કરેલા મનને પ્રિય દિવ્ય સિંહાસનમાં તમો બેસો. (૧૩૬) **હવે પાદ્ય અર્પણ કરવાનો મંત્ર કહે છે :** હે દેવાધિપતિ, સુવર્ણના કળશમાં રહેલું ચંદન, પુષ્પ અને અક્ષતથી યુક્ત ગંગાજળ તમો લક્ષ્મીજીની સાથે ગ્રહણ કરો. (૧૩૭)

गन्धपुष्पादिसंयुक्तं स्वर्णपात्रे स्थितं जलम् । अर्घ्यं गृहाण भो देव ! भक्तानामभयप्रद !॥१३८॥ देवदेव ! नमस्तुभ्यं पुराण ! पुरुषोत्तम ! । मया दत्तमिदं तोयं गृह्णीष्वाचमनीयकम् ॥१३९॥ पयो दधि घृतं चैव मधु शर्करया युतम् । पञ्चामृतेन स्नपनं प्रीत्यर्थं प्रतिगृह्यताम् ॥१४०॥ कामधेनुसमुद्भूतं सर्वेषां जीवनं परम् । पावनं यज्ञहेतुस्ते पयः स्नानार्थमर्पये ॥१४१॥ पयसस्तु समुद्भूतं यदम्लद्रव्ययोगतः । दध्यानीतं मया देव ! स्नानर्थं प्रतिगृह्यताम् ॥१४२॥ नवनीतसमुत्पन्नं सर्वसन्तोषकारकम् । यज्ञाङ्गं देवताहारं घृतं स्नानार्थमर्पये ॥१४३॥ वृक्षसारसमुद्भूतं सर्वतेजोविवर्धनम् । सर्वपुष्टिकरं देव ! मधु स्नानार्थमर्पये ॥१४४॥ इक्षुसारसमुद्भूतां शर्करां सुमनोहराम् । मलापहारिणीं स्नातुं गृहाण त्वं मयार्पिताम् ॥१४५॥ नदीनां चैव सरसां मयानीतं जलं शुभम् । गृहाण स्नानमन्त्रेण प्रभो ! स्नानीयमर्पितम् ॥१४६॥ वस्त्रयुग्मं गृहाण त्वं पट्टसूत्रेण निर्मितम् । सूक्ष्मं कार्पासतन्तूनां सुवर्णेन विराजितम् ॥१४७॥ नारायण ! नमस्तेऽस्तु पाहि मां भवसागरात् । ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तम ! ॥१४८॥ केयूरमुकुटैश्चैव नूपुरैरङ्गुलीयकैः । पूजितोऽसि प्रयत्नेन रत्नैराभरणैर्विभो ! ॥१४९॥ चन्दनं मलयोद्भूतं कस्तूर्यगुरुसंयुतम् । कर्पूरेण च संमिश्रं स्वीकुरुष्वानुलेपनम् ॥१५०॥ शतपत्रैः कर्णिकारैश्चम्पकैर्मल्लिकादिभिः ॥ पुष्पैर्नानाविधैश्चैव पूजयामि सुरेश्वर ! ॥१५१॥ दशाङ्गसंज्ञितं धूपं सुगन्धं च मनोहरम् । गृहाण देवदेवेश ! मया भक्त्या समर्पितम् ॥१५२॥

---

**અર્ઘ્ય અર્પણ કરવાનો મંત્ર** : હે ભક્તોને અભય આપનારા! હે દિવ્ય મૂર્તે ! ચંદન, પુષ્પાદિથી સંયુક્ત સુવર્ણ કળશમાં રહેલા અર્ઘ્યને યોગ્ય જળ ગ્રહણ કરો. (૧૩૮) **આચમન કરવા યોગ્ય જળ અર્પણ કરવાનો મંત્ર** : હે દેવ! હે અનાદિ સિદ્ધ મૂર્તિ! હે પુરુષોત્તમ ! તમોને નમસ્કાર થાઓ. મેં અર્પણ કરેલું આચમન કરવા યોગ્ય જળ ગ્રહણ કરો. (૧૩૯) **પંચામૃત સ્નાનનો મંત્ર** : દૂધ, દહીં, ઘી, સાકર, અને મધ આ પંચામૃતથી સ્નાન મારી પ્રસન્નતા માટે તમો ગ્રહણ કરો. (૧૪૦) **જુદાં જુદાં પંચામૃતોથી સ્નાન કરાવતા પ્રથમ દૂધથી સ્નાનનો મંત્ર કહે છે** : કામધેનુથી ઉત્પન્ન થયેલું, સર્વેનું પરમ જીવન, પવિત્રતામાં કારણ, યજ્ઞનું કારણ દૂધ તમોને સ્નાન કરવા માટે અર્પણ કરું છું. (૧૪૧) **હવે દહીંથી સ્નાનનો મંત્ર કહે છે** : હે દેવ ! જે દહીં ખાટા દ્રવ્યનાં યોગવાળા દૂધથી ઉત્પન્ન થયેલું, મેં લાવેલું તે દહીં તમો સ્નાન માટે ગ્રહણ કરો. (૧૪૨) **ઘી સ્નાનનો મંત્ર** : માખણથી ઉત્પન્ન થયેલું સર્વને સંતોષ કરનારું, યજ્ઞના અંગભૂત દેવતાઓના આહાર સ્વરૂપ ઘી સ્નાન માટે હું અર્પણ કરું છું. (૧૪૩) **મધુ સ્નાનનો મંત્ર કહે છે** : હે દેવ ! સમગ્ર વૃક્ષના રસથી ઉત્પન્ન થયેલું, સર્વ તેજને વૃદ્ધિ પમાડનારું, સર્વને પુષ્ટિ કરનાર મધ સ્નાન માટે અર્પણ કરું છું. (૧૪૪) **શર્કરા સ્નાનનો મંત્ર કહે છે** : શેરડીના રસથી ઉત્પન્ન થયેલી, મનોહર, ઘી વગેરેની ચીકાશને નિવૃત્તિ કરનારી મેં અર્પણ કરેલી સાકર તમો સ્નાન માટે ગ્રહણ કરો. (૧૪૫) **શુદ્ધોદક સ્નાનનો મંત્ર કહે છે** : હે પ્રભો ! મેં લાવેલું સ્નાન કરવા માટે યોગ્ય - સ્નાનના મંત્રથી અર્પણ કરેલું ગંગાદિ નદીઓ અને સરોવરોનું શુભ જળ ગ્રહણ કરો. (૧૪૬) **વસ્ત્રાર્પણનો મંત્ર** : કપાસના તંતુઓમાં રેશમી સૂતરથી નિર્માણ કરેલું માટે જ સૂક્ષ્મ, સુવર્ણના તંતુઓથી કોર અને પાલવોથી સુશોભિત; પહેરવાનું અને ઓઢવાનું આ બન્ને વસ્ત્રો ગ્રહણ કરો. (૧૪૭) **યજ્ઞોપવીતનો મંત્ર કહે છે** : હે પુરુષોતમ, નારાયણ ! તમોને નમસ્કાર હો. ભવસાગરથી મારી રક્ષા કરો. મેં અર્પણ કરેલા ઓઢવાના વસ્ત્ર સાથે યજ્ઞોપવીત ગ્રહણ કરો. (૧૪૮) **અલંકાર અર્પણ કરવાનો મંત્ર કહે છે** : હે વિભો ! બાજુબંધ, મુગટ, નૂપુર, વેઢ, વીંટીઓ આદિક અનેક રત્નોનાં આભૂષણોથી પ્રયત્નપૂર્વક સમલંકૃત કરીને આપની પૂજા કરું છું. (૧૪૯) **ચંદન અર્પણ કરવાનો મંત્ર કહે છે** : કસ્તૂરી, કપૂર, અગરથી સંમિશ્રિત મલયાચલમાં ઉત્પન્ન થયેલું અને ઘસેલું ચંદન અંગના શૃંગારમાટે અર્પણ કરું છું તે અંગીકાર કરો. (૧૫૦) **(પુષ્પોને અર્પણ કરવાનો મંત્ર :)** હે સુરેશ્વર! કમળ, કર્ણિકાર (ગરમાળો) ચંપો, મોગરો વગેરે નાના પ્રકારનાં સુગંધીમાન પુષ્પોથી આપની પૂજા કરું છું. (૧૫૧) **(ધૂપ નિવેદનનો મંત્ર કહે છે : )** હે દેવદેવેશ ! દશાંગ નામવાળો સુગંધીમાન અતિમનોહર ધૂપ આપને ભક્તિથી અર્પણ કરું છું. તેને ગ્રહણ કરો. (૧૫૨)

आरात्रिकां सुरश्रेष्ठ ! वर्त्या गोघृतसिक्तया । संयुक्तां तेजसा कृष्ण ! गृहाण सुरपूजित ! ॥१५३॥ अन्नं च पायसं भक्ष्यं सितालेह्यसमन्वितम् । दधिक्षीरघृतैर्युक्तं गृहाण सुरवल्लभ !॥१५४॥ नागवल्लीदलैर्युक्तं पूगीफलसमन्वितम् । कर्पूरखदिरोपेतं ताम्बूलं प्रतिगृह्यताम् ॥१५५॥ बीजपूराम्रपनसखर्जूरीकदलीफलम्। नालिकेरफलं दिव्यं गृहाण भगवन्निदम् ॥१५६॥ न्यूनातिरिक्तपूजायाः सम्पूर्णफलहेतवे दक्षिणां काञ्चनीं देव ! स्थापयामि तवाग्रतः ॥१५७॥ नीराजनं गृहाणेश ! पञ्चवर्तिसमन्वितम् । तेजोराशे ! मया दत्तं लोकानन्दकर ! प्रभो ! ॥१५८॥ जय देव ! जय देव ! जय मङ्गलदाता २ लक्ष्मीवर ! राधावर ! २ शरणागतपाता । ध्रुवपदम् – हर्तुं भारमवन्या जातो भुवि विष्णु २ दितिजानीकमनेकं २ जघनिथ सहजिष्णुः । भीष्मकतनयावरणे विधिसुरपतिमुख्यै २ रभिषिक्तोऽधिपतिस्त्वं २ नरपतिगणमुख्यैः जय देव० ॥१५९॥ पार्थप्रेमवशस्त्वं बहुधा पुरि तेषां २ न्यवसो ननु भवसि त्वं २ जीवनमपि तेषाम् । सौत्यं विदधद्विजयं प्रतिभटनृपसङ्घै २ दुर्जयमुज्झितशस्त्रोऽ २ प्यकरोः सुरसङ्घैः जय देव० ॥१६०॥ नूनं पाण्डवपत्न्या त्वयि कृतबहुदाने २ प्रेमा कार्मणविद्या २ निदधे त्विति जाने । निःस्पृहमुक्तपतिस्त्वं विवशो हि वनादिं २ ययिथ यया स्मृतमात्रो २ हित्वा कमलादिं जय देव० ॥१६१॥ वात्स्यायनमुनिगीतं प्रथमं रसमखिलं २ गोपीषु च भामायां २ विदधिथ तं सफलम् । साकं देवकलत्रैर्निजललनासङ्घैः २ केलिं चाम्बुधिवारिणि २ यदुसुरमुनिसङ्घैः जय देव० ॥१६२॥

---

**(દીપના નિવેદનનો મંત્ર : )** હે દેવોએ પૂજેલા કૃષ્ણ, ગાયના ઘીમાં પલાળેલી વાટોવાળી મંગળ દીપની શિખા વડે આરતી આપને અર્પણ કરું છું. તે સ્વીકારો. (૧૫૩) **(નૈવેદ્ય નિવેદનનો મંત્ર :)** હે દેવોને પ્રિય ! દહીં, દૂધ,ઘીથી યુક્ત આ ભોજ્ય અન્ન તથા સાકર અને લેહ્યગુણે યુક્ત આ દૂધપાક તથા જલેબી આદિક ભક્ષ્ય અને અથાણાં વગેરે ચૂસીને જમવાનાં-ચાર પ્રકારનાં અન્ન ભક્તિથી અર્પણ કરું છું. તેને ગ્રહણ કરો. (૧૫૪) **(તાંબુલ અર્પણ કરવાનો મંત્ર કહે છે :)** કપૂર તથા ખેરના રસે સહિત સોપારીએ સહિત નાગરવેલનાં પાને સહિત એવા તાંબુલને ગ્રહણ કરો. (૧૫૫) **(ફલાર્પણનો મંત્ર કહે છે :)** હે ભગવન્ ! બીજોરું, આંબો, ફણસ, ખજૂરી, કેળ આદિ ફળ તથા નાળિયેરને ગ્રહણ કરો. (૧૫૬) **(દક્ષિણા અર્પણનો મંત્ર કહે છે : )** હે દેવ, પૂજામાં જો કંઈ ન્યૂન-અધિકપણારૂપ દોષ થયો હોય તો તેના નિવારણ માટે તેમજ સંપૂર્ણ ફળની પ્રાપ્તિ માટે સુવર્ણની દક્ષિણા આપની આગળ અર્પણ કરું છું. તેને ગ્રહણ કરો. (૧૫૭) **નાની આરતીનો મંત્ર કહે છે :** હે ઈશ્વર ! હે તેજસમુદાયના આધાર, દિવ્ય તનુવાળા હે લોકોને આનંદ આપનારા, પાંચ વાટોથી યુક્ત નીરાજન ગ્રહણ કરો. (૧૫૮) **(પાંચ પદાત્મક મહાનિરાજન મંત્ર કહે છે :)** હે દેવ દેવ ! તમો જય પામો, જય પામો, હે લક્ષ્મીવર ! હે રાધાવર ! સર્વ મંગલપ્રદાતા, પોતાને શરણે આવેલાં જનોનું રક્ષણ કરનારા તમો પોતાના ઉત્કર્ષનો આવિષ્કાર કરો. પૃથ્વીનો ભાર હરવા માટે, પૃથ્વીમાં પ્રગટ થયેલા છો સર્વાન્તયામી તમોએ અર્જુને સહિત થકા અનેક દૈત્યાંશ રાજાઓના સૈન્ય સમુદાયોને મારેલા છે. રૂકમણિના વિવાહ નિમિત્તે તમો બ્રહ્મા, ઈન્દ્ર વગેરે દેવોએ તથા રૂકમી, શાલ્વ, શિશુપાલાદિ સિવાય બીજા સર્વ શ્રેષ્ઠ રાજાઓએ તમો એક જ અમારા અધિપતિ છો એમ કહીને મહાઅભિષેક કરાયેલા છો. (આ કથા 'હરિવંશ' માં છે.) (૧૫૯) હે કૃષ્ણ ! તમો યુધિષ્ઠિરાદિ પાંડવોના સ્નેહાધીન થઈ તેમના હસ્તિનાપુરમાં ઘણું કરીને નિવાસ કરતા હતા; માટે તેઓનું તમો જીવન પણ છો. આયુધોનો ત્યાગ કર્યો છે તો પણ તમો અર્જુનનું સારથિપણું કરતાં કરતાં અર્જુનને પ્રતિપક્ષી રાજાઓના સમૂહો અને ઈન્દ્રાદિ દેવસમૂહોએ જીતવા માટે અશક્ય કરતા હતા. (આ ભારતયુદ્ધમાં અને ખાંડવ વનના દાહમાં જાણવું.) (૧૬૦) દ્રૌપદીના ઘણા મનોરથો પૂરનાર જે તમારે વિષે તેણે પ્રેમભક્તિરૂપ કામણ કરેલું છે એમ નક્કી હું જાણું છું; કારણ કે નિઃસ્પૃહ અને એકાંતિક ભક્તોના સ્વામી તમો જે દ્રૌપદીએ માત્ર સ્મરણ કરાયેલા જ પરતંત્ર થઈ રૂકમણી આદિ-પાર્ષદો વગેરેનો ત્યાગ કરી દૂર પ્રદેશમાં ગયા. (૧૬૧) વાત્સ્યાયન મુનિએ રચેલ સમગ્ર પ્રથમ જે શૃંગારરસ તે ગોપીઓમાં અને સત્યભામા અને બીજી પત્નીઓમાં સફલ કર્યો. દેવાંગનાઓ અને પોતાની સ્ત્રીઓના સમૂહોની સાથે સમુદ્રના જળમાં ક્રીડા કરી. તથા યાદવો, દેવતાઓ અને મુનિઓના સમૂહો સાથે સમુદ્રના જળમાં રમણરૂપ ક્રીડા કરી. (આ કથા પણ 'હરિવંશ' માં છે. ) (૧૬૨)

चञ्चद्रत्नकिरीटं नवजलदश्यामं २ मकराभश्रुतिभूषण २ मीषत्स्मितरामम् । स्वर्णद्युति वसनं त्वां दधतं च नवीनं २ वन्दे हारिलकण्ठं २ दृशिमोदितदीनं जय देव० ॥१६३॥ अञ्जलिस्थानि पुष्पाणि चार्पयामि जगत्पते ! । गृहाण सुमुखो भूत्वा जगदानन्ददायक ! ॥१६४॥ नमस्ते देवदेवश ! नमस्ते गरुडध्वज ! । नमोऽस्तु विष्णवे तुभ्यं व्रतस्य फलदायक!॥१६५॥ पद्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा दृशा । वचसा मनसा चेति प्रणामोऽष्टाङ्ग ईरितः ॥१६६॥ बाहुभ्यां चैव जानुभ्यां शिरसा वचसा दृशा । पञ्चाङ्गोऽयं प्रणामः स्यात्पूजासु प्रवराविमौ ॥१६७॥ तत्राष्टाङ्गः प्रणामस्तु पुंसामेव हितो मतः । अन्यः पुंसां तथा स्त्रीणां सर्वेषामपि सम्मतः ॥१६८॥ प्रणमेद्दक्षिणे भागे किञ्चिद्दूरे तु दण्डवत् । कराभ्यां दक्षवामाभ्यां पादौ गृह्णन् हरेः क्रमात् ॥१६९॥ गोविन्द ! माधव ! दयालय ! दीनबन्धो ! श्रीमन् ! मनोनयननन्दन! दिव्यमूर्ते ! । दिव्येन्द्रनीलमणिकान्तिमनोहराङ्ग ! श्रीरुक्मिणीरमण ! मामव वासुदेव ! ॥१७०॥ कंसादिदुष्टदमन ! प्रणतैकबन्धो ! कामान्तकादिनुत ! शङ्खरथाङ्गपाणे ! । श्रीद्वारिकापुरपुरन्दर ! पूर्णकाम ! श्री० ॥१७१॥ आनन्दकन्द ! यदुनन्दन ! शारदीयपूर्णेन्दुबिम्बवदनाम्बुजमन्दहास ! । भूभारराजबलनाशन ! शेषबन्धो ! श्री० ॥१७२॥ भामानुरञ्जनसमाहृतपारिजात! प्रद्युम्नतात ! पुरुहूतसभासदस्य ! पट्टाङ्गनाद्विगुणिताष्टसहस्त्रकान्त ! श्री० ॥१७३॥

---

પ્રકાશમાન રત્નોથી જડેલા મુગટવાળા, નવીન મેઘની સમાન શ્યામ વર્ણવાળા, મીનાકાર સમાન શ્રવણના ભૂષણવાળા, મંદહાસ્યથી આનંદ આપનારા, નવીન સુવર્ણ સૂત્રની સમાન કાંતિવાળા પીતાંબરને ધારણ કરનારા, મનોહર ત્રણ રેખાઓથી સુંદર કંઠવાળા, કંઠમાં પુષ્પોના હારો ધારણ કરનારા, દર્શનમાત્રથી આનંદિત કર્યા છે દીન જનો જેમણે એવા તમોને હું નમસ્કાર કરું છું. (૧૬૩) **(પુષ્પાંજલિ નિવેદન મંત્ર કહે છે)** : હે જગત્પતે ! હે જગતને આનંદ આપનાર, અંજલિમાં રહેલાં પુષ્પો તમોને નિવેદન કરું છું. તમો મારી સન્મુખ થઈને ગ્રહણ કરો. (૧૬૪) **(નમસ્કાર વિધિ કહે છે :)** હે દેવદેવેશ ! તમોને નમસ્કાર હો. હે ગરુડધ્વજ, તમોને નમસ્કાર હો. હે વ્રતનાં ફળ આપનાર, વિષ્ણુ ભગવાન તમોને નમસ્કાર હો. (૧૬૫) ૧. બંને પગથી ૨. બંને હાથથી ૩. બંને ઘૂંટણથી ૪. વક્ષઃસ્થળથી ૫. મસ્તકથી ૬. દૃષ્ટિથી ૭. વચનથી અને ૮. મનથી : આ આઠ પ્રકારના પ્રણામ કહ્યા છે. (૧૬૬) બંને હાથ, ઢીંચણ, મસ્તક, વચન અને દૃષ્ટિથી જે પ્રણામ આ પંચાંગ પ્રણામ. આ પંચાંગ અને અષ્ટાંગ પ્રણામ ભગવાનના પૂજનવિધિમાં બંને શ્રેષ્ઠ છે. (૧૬૭) બંને પ્રણામોમાં અષ્ટાંગ પ્રણામ તો પુરુષોને હિતકારક માનેલા છે. અને પંચાંગ પ્રણામ તો પુરુષો અને સ્ત્રીઓને સર્વેને પણ સંમત છે. (૧૬૮) જમણા અને ડાબા હાથથી અનુક્રમે શ્રી હરિના જમણા ચરણને જમણા હાથથી; અને ડાબા હાથથી શ્રીહરિના ડાબા ચરણને ગ્રહણ કરતો થકો જમણા ભાગમાં શ્રીહરિથી લગારેક દૂર પ્રદેશમાં દંડની માફક પ્રણામ કરે. (અહીં ચરણગ્રહણ માનસિક સમજવું. कराभ्याम् એ પ્રમાણે બંને હાથથી પ્રણામ કરે, તે તો એક હાથથી પ્રણામનો નિષેધ છે તે માટે કહેલું છે - 'એક હસ્તપ્રણામશ્ચ એકા વાપિ પ્રદક્ષિણા । અકાલે દર્શનં વિષ્ણોર્હન્તિ પુણ્યં પુરા કૃતમ્' એમ વિષ્ણુ સ્મૃતિમાં કહ્યું છે. તથા 'હરિભક્તિ વિલાસ'માં પણ 'અગ્રે પૃષ્ઠે વામ ભાગે સમીપે ગર્ભમન્દિરે । જપહોમનમસ્કારાન્ ન કુર્યાત્કેશવાલયે' એમ કહ્યું છે.) (૧૬૯) હે ગોવિંદ ! હે માધવ ! હે દયાસાગર ! હે દીનબંધુ ! હે શ્રીમાન ! હે મન અને નેત્રોને આનંદ આપનાર ! હે દિવ્યમૂર્તે ! હે અતિશોભાયમાન એવા ઈન્દ્રનીલમણિની કાંતિ સમાન મનોહર અંગવાળા ! હે લક્ષ્મીજીના પતિ ! હે વાસુદેવ ! સંસારના ભયથી મારું રક્ષણ કરો. (૧૭૦) હે કંસાદિ દુષ્ટજનોનું દમન કરનાર ! પ્રણામ કરનાર પુરુષોના એક બંધુ ! શિવ બ્રહ્માદિકે નમસ્કાર કરાયેલા ! શંખ, ચક્ર ડાબા અને જમણા હાથમાં જેમને છે એવા, પરમ શોભાથી યુક્ત જે દ્વારિકાપુરના ઈન્દ્રના સમાન અધિનાથ ! હે પૂર્ણકામ ! હે લક્ષ્મીપતે ! મારું રક્ષણ કરો. (૧૭૧) હે આનંદની ઉત્પત્તિના કારણ, હે યદુકુળને આનંદ આપનાર! શરદઋતુની પૂર્ણિમાના ચંદ્રના બિંબ સમાન મુખારવિંદમાં મંદ હાસ્યવાળા, પૃથ્વીના ભારભૂત અસુરાંશ રાજાઓના સમુદાયોને નાશ કરનારા, હે શેષાવતાર બળભદ્રના ભાઈ ! (૧૭૨) સત્યભામાની પ્રશંસા માટે ઈન્દ્રની પત્નીના બગીચામાંથી લાવ્યા છે પારિજાત વૃક્ષ જેણે એવા હે પ્રદ્યુમ્નના પિતા ! હે ઈન્દ્રે મોકલેલી સુધર્મા નામની સભાના મહાસભ્ય ! તમો અષ્ટ પટાંગનાઓએ સહિત સોળ હજાર રાણીઓના કાંત ! એટલે કે સ્વામી છો. (૧૭૩)

आत्मीयपाण्डवहिते रत ! जिष्णुसूत ! कृष्णामनोभिलषितप्रदकल्पवृक्ष ! । देवेन्द्रवन्द्य ! गरुडध्वज ! शार्ङ्गपाणे ! श्री० ॥१७४॥ धर्माध्वसेतुरचनोद्यत ! नित्यदानैः सन्तर्पितद्विजवरौघ ! हरे ! मुरारे ! । श्रीनारदादिमुनिगीतपवित्रकीर्ते ! श्री० ॥१७५॥ कारुण्यसागर ! भवाम्बुधिपारदायिन् ! कल्याणकृत्पतितपावननामधेय ! । ब्रह्मण्यदेव ! नरदेवशिखामणे ! त्वं श्री० ॥१७६॥ संसारखिन्नशरणागतजीवरक्षानित्योद्यतोद्धवसमर्पितनैजबुद्धे ! । नानावतारपरिपालितसाधुलोक ! श्री० ॥१७७॥ अन्यथा शरणं नास्ति त्वमेव शरणं मम । तस्मात्कारुण्यभावेन रक्ष रक्ष रमेश्वर ! ॥१७८॥ परमान्नमिदं दिव्यं कांस्यपात्रेण संयुतम् । वाणकं द्विजवर्याय सहिरण्यं ददाम्यहम् ॥१७९॥ इति सम्पूज्य सम्प्रार्थ्य दिवाशेषं नयेत्ततः । श्रीमन्नारायणकथाकीर्तनश्रवणादिभिः ॥१८०॥ न व्यावहारिकं कर्म कार्यमेकादशीदिने । औद्धवीयैर्नृभिः स्त्रीभिः किञ्चिदप्यापदं विना ॥१८१॥ कर्षुकैर्न कृषिः कार्या वणिग्भिः पणनं न च । न क्रयो विक्रयश्चापि कार्यः कस्यापि वस्तुनः ॥१८२॥ स्त्रीभिः शोको रोदनं च न कार्यं सूत्रकर्तनम् । न वृथाभाषणं कार्यं नास्पृश्यस्पर्शनादि च ॥१८३॥ हर्यर्थमेव कर्तव्यमिदं त्वेकादशीदिनम् । मदाश्रितैः कृष्णभक्तैः पुम्भिः स्त्रीभिश्च सर्वथा ॥१८४॥ परतन्त्रो भवेद्यस्तु दरिद्रो दुर्बलोऽथवा। आवश्यकं स कुर्वीत व्यवहारं न चाधिकम् ॥१८५॥ दानं देयं यथाशक्ति द्विजाय प्रीतये प्रभोः । रात्रौ जागरणं कार्यं भगवत्कीर्तनादिभिः ॥१८६॥ विष्ण्वालयं जागरार्थं सन्मण्डलमथापि वा । गच्छतोऽस्त्यश्वमेधस्य फलं पुंसः पदे पदे ॥१८७॥ स्त्रीभिः स्त्रीष्वेव कर्तव्यः पुम्भिः पुंस्वेव जागरः। कथादिभिर्हरेरेव नतु द्यूतादिभिः क्वचित् ॥१८८॥ एकादशीदिने यस्तु भुञ्जीतान्नं कुसङ्गतः । चान्द्रायणेन शुद्धिः स्यात्तस्य पुंसो न चान्यथा ॥१८९॥

---

પોતાના ભક્ત જે પાંડવોના હિતમાં તત્પર, હે અર્જુનના સારથિ ! દ્રૌપદીના મનોરથને આપવામાં કલ્પવૃક્ષ સમાન, હે બ્રહ્માદિ દેવોએ વંદના કરવા યોગ્ય ! હે ગરુડધ્વજ ! હે સારંગપાણિ ! (૧૭૪) વર્ણાશ્રમના સદાચારરૂપી માર્ગની મર્યાદાની રચનામાં ઉદ્યમવાળા, નિત્ય અપાતાં દાનોથી તૃપ્તિ પમાડ્યા છે ઉત્તમ બ્રાહ્મણોના સમુદાયો જેમણે એવા હે હરે ! હે મુરારે! શ્રી નારદાદિ મુનિઓએ ગાયેલી પવિત્ર કીર્તિવાળા હે શ્રીલક્ષ્મીપતે ! મારું રક્ષણ કરો. (૧૭૫) હે કરુણાસાગર ! હે સંસારસમુદ્રને પાર પમાડનાર ! આત્યંતિક કલ્યાણકારી પતિત પાવન છે નામ જેમનું એવા હે બ્રાહ્મણોને દેવની માફક પૂજનારા ! સમગ્ર રાજાઓના સમુદાયમાં શિરોમણિ તમો મારું રક્ષણ કરો. (૧૭૬) સંસારથી ક્લેશ પામેલા માટે જ પોતાના શરણે આવેલા જે જીવોની રક્ષામાં નિત્ય ઉદ્યમવાળા પોતાના એકાંતિક ઉદ્ધવમાં સમર્પણ કર્યું છે પોતાનું જ્ઞાન જેણે એવા; અનેક અવતારોએ કરીને પરિરક્ષણ કર્યા છે સાધુજનો એવા; (૧૭૭) હે લક્ષ્મીકાંત ! મારે તમારા સિવાય આશ્રય નથી. મારે તમારો જ આશ્રય છે માટે કરુણાભાવથી રક્ષણ કરો. રક્ષણ કરો. (૧૭૮) (**હવે વાયન પ્રદાન મંત્ર કહે છે** - )કરેલી પૂજાની સદ્‌ગુણતા માટે દિવ્ય કાંસાના પાત્રથી યુક્ત સુવર્ણ સહિત શુભ પ્રસંગમાં શ્રેષ્ઠ અન્ન (જેને વાયન કહે છે તે મીઠાઈ) હું ઉત્તમ બ્રાહ્મણોને આપું છું. (૧૭૯) હે ભક્તો ! આ પ્રકારે શ્રીકૃષ્ણને પૂજીને પ્રાર્થના કરી પછી શ્રીકૃષ્ણની કથા કીર્તનાદિ વાંચવા-સાંભળવાથી બાકીનો દિવસ નિર્ગમન કરવો. (૧૮૦) ઉદ્ધવ સંપ્રદાયનાં પુરુષો અને સ્ત્રીઓએ એકાદશીના દિવસે આપત્કાળ વિના વ્યાવહારિક કાર્ય કાંઈ પણ કરવું નહિ. (૧૮૧) ખેડૂતોએ ખેતી કરવી નહિ, વાણિયાઓએ નાણું આપવું-લેવું નહિ, કોઈપણ વસ્તુ વેચાતી લેવી નહિ, તેમ જ વેચાતી આપવી નહિ. (૧૮૨) સ્ત્રીઓએ શોક, રડવું, સૂતર કાંતવું વગેરે કરવું નહિ. વૃથા ભાષણ કરવું નહિ, અસ્પૃશ્યનો સ્પર્શ ન કરવો. (૧૮૩) મારા આશ્રિત કૃષ્ણ ભક્તો પુરુષો અને સ્ત્રીઓએ એકાદશીના દિવસે તો સર્વ પ્રકારે શ્રીહરિની નવધા ભક્તિ જ કરવી. (૧૮૪) જે પુરુષ પરાધીન હોય કે દરિદ્ર હોય અથવા શરીરે દુર્બળ હોય : આ ત્રણ પ્રકારના મનુષ્ય આવશ્યક વ્યવહાર કરે, તેનાથી વિશેષ કરે નહીં. (૧૮૫) એકાદશીને દિવસે પ્રભુની પ્રીતિ માટે શક્તિ પ્રમાણે પાત્ર બ્રાહ્મણોને દાન આપવું. રાત્રિમાં ભગવાનના કીર્તનાદિથી જાગરણ કરવું. જાગરણ કરવા માટે વિષ્ણુ મંદિર અથવા સંતોના મંડળ પ્રત્યે જનાર પુરુષને ડગલે ડગલે અશ્વમેધ યજ્ઞનું ફળ થાય છે. (૧૮૬-૧૮૭) સ્ત્રીઓએ શ્રીહરિની કથા વગેરેથી જ સ્ત્રીઓમાં જ જાગરણ કરવું. પુરુષોએ હરિની કથાદિથી પુરુષોમાં જાગરણ કરવું. (૧૮૮) જે પુરુષ નઠારા પુરુષના સમાગમથી એકાદશીના દિવસે અન્ન જમે તે પુરુષ તો ચાંદ્રાયણ વ્રતથી શુદ્ધ થાય, બીજા પ્રકારથી શુદ્ધ થતો નથી. (૧૮૯)

एकभक्तेन नक्तेन तथैवायाचितेन च । उपवासेन दानेन न निर्द्वादशिको भवेत् ॥१९०॥ नक्तं हविष्यान्नमनोदनं वा फलं तिलाः क्षीरमथाम्बु चाज्यम् । यत्पञ्चगव्यं यदि वापि वायुः प्रशस्तमत्रोत्तरमुत्तरं हि ॥१९१॥ प्रातः स्नात्वा पुनः पूजां नित्यनैमित्तिकार्चयोः । कुर्यात्तत्र यथाप्तेन सदन्नेन निवेदनम् ॥१९२॥ तन्त्रेण मूर्त्योरुभयोः समाप्य प्रातरर्चनम् । व्रतं निवेदयेद्भक्त्या हरये स्वकृतं व्रती ॥१९३॥ अज्ञानतिमिरान्धस्य व्रतेनानेन मे हरे ! । प्रसीद सुमुखो भूत्वा ज्ञानदृष्टिप्रदो भव ॥१९४॥ कृष्णमूर्तिं ततो दद्याद्ब्राह्मणाय सदक्षिणाम् । दानानि दद्याच्चान्यानि यथाशक्त्यन्नमेव वा ॥१९५॥ भोजयित्वा ततो विप्रान् शक्त्या साधूंश्च वैष्णवान् । हविष्यान्नेन कुर्वीत पारणां प्रयतो व्रती ॥१९६॥ दिवानिद्रां परान्नं च पुनर्भोजनमैथुने । द्वादश्यां वर्जयेत्तैलं कांस्यपात्रे च भोजनम् ॥१९७॥ पारणाहे तु लभ्येत स्वल्पापि द्वादशी यदि। तत्रैव पारणां कुर्यान्न तामुल्लङ्घयेद्व्रती ॥१९८॥ कलार्धां द्वादशीं दृष्ट्वा निशीथादूर्ध्वमेव हि । आमध्याह्नात्क्रियाः सर्वाः कर्तव्याः शंभुशासनात् ॥१९९॥ यदा भवेदतीवाल्पा द्वादशी पारणादिने। उषःकाले द्वयं कार्यं प्रातर्मध्याह्नकर्म च ॥२००॥ सङ्कटे समनुप्राप्ते द्वादश्यां दैवयोगतः । अद्भिस्तु पारणां कुर्यात्पुनर्भुक्तं न दोषकृत् ॥२०१॥ द्वादश्याः प्रथमः पादो हरिवासरसंज्ञितः । तमतिक्रम्य कुर्वीत पारणं विष्णुतत्परः ॥२०२॥ आभाकासितपक्षेषु मैत्रश्रवणरेवती । सङ्गमे नैव भोक्तव्यं द्वादश द्वादशीर्हरेत् ॥२०३॥

---

**(અશક્ત પુરુષોને વ્રતના આચરણનો ઉપાય બતાવે છે :)** મધ્યાહ્ન પછી એક વાર જમે, તથા નક્તભોજન- પોતાની છાયા બમણી થાય તે સમયે ચારપાંચ વાગ્યે જમે, તથા માગ્યા વિના પ્રાપ્ત થયેલા અન્નથી જમે અથવા ઉપવાસ નિમિત્તે સુવર્ણદાનથી : આ પ્રમાણે ચાર પ્રકારથી એકાદશી વ્રત કરવું તેથી એકાદશી વ્રત કર્યું કહેવાય. (૧૯૦) ઉપવાસના બીજા ગૌણ પક્ષો પણ કહે છેઃ) પૂર્વોક્ત પ્રમાણે નક્ત ભોજન, હવિષ્યાન્ન, ભાતથી રહિત હવિષ્યાન્ન, ખજૂર, નાળિયેર વગેરે ફલાહાર, કાળા તલથી રહિત તલ, યથાયોગ્ય દૂધપાન, જલપાન, થોડું ઘી, પંચગવ્ય, તથા પવનપાન; આ દશ વિકલ્પ મધ્યે નક્ત ભોજનથી આગળ આગળના શ્રેષ્ઠ છે. (૧૯૧) દ્વાદશીના પ્રાતઃકાળમાં સ્નાન કરી પોતાને નિત્ય પૂજવા યોગ્ય અને મંડળમાં સ્થાપના કરાયેલી બંને મૂર્તિઓનું ફરીથી પૂજન કરે. બારસને દિવસે પ્રાપ્ત થયેલા યથાલબ્ધ શ્રેષ્ઠ અન્નથી નિવેદન કરે. (૧૯૨) નિત્ય નૈમિત્તિક બંને અર્ચાઓનું સવારનું પૂજન એકસાથે સમાપ્ત કરી વ્રતધારી પુરુષ પોતે કરેલું વ્રત ભક્તિથી શ્રીકૃષ્ણને નિવેદન કરે. (૧૯૩) હે હરે ! અજ્ઞાનરૂપી અંધકારથી અંધ થયેલા મારા ઉપર તમો આ વ્રતથી પ્રસન્ન થાઓ અને મારી સન્મુખ થઈ જ્ઞાન દૃષ્ટિ આપનારા થાઓ. (૧૯૪) પછી દક્ષિણાએ સહિત મંડળમાં સ્થાપના કરેલી શ્રીકૃષ્ણની મૂર્તિ બ્રાહ્મણને આપે અને બીજાં દાનો અથવા શક્તિ પ્રમાણે અન્ન આપે. (૧૯૫) પછી વ્રતી નર નિયમતત્પર થઈ બ્રાહ્મણો અને સાધુઓને પોતાની સંપત્તિ અનુસારે જમાડીને હવિષ્યાન્નથી પારણાં કરે. (૧૯૬) દિવસે નિદ્રા, પારકા અન્નનો પ્રતિગ્રહ, બીજી વાર ભોજન અને મૈથુન, તૈલભક્ષણ, અને કાંસાના પાત્રમાં ભોજન : આ સર્વ દ્વાદશીમાં ત્યાગ કરવાં. (૧૯૭) જો પારણાને દિવસે થોડી પણ દ્વાદશી હોય તો વ્રતી દ્વાદશીમાં જ પારણાં કરે. થોડી પણ દ્વાદશીનું ઉલ્લંઘન કરવું નહિ. (૧૯૮) મધ્ય રાત્રિ થકી ઉપરનાં એક પહોરરૂપ સમય (નિશીથકાળ) થકી ઉપર અર્ધકળા પણ જો દ્વાદશી હોય તો તે મધ્યરાત્રિથી ઊર્ધ્વ બીજે દિવસે કરવાની સ્નાન-સંધ્યાદિ મધ્યાહ્ન સુધીની ક્રિયાઓ કરી લઈને પારણાં કરે એવું શંભુનું શાસન છે માટે તે સમયે નિત્યક્રિયા કર્યા પછી પારણાં કરવામાં દોષ નથી. (૧૯૯) જ્યારે પારણાંને દિવસે દ્વાદશી અતિ અલ્પ હોય ત્યારે સાક્ષાત્ સૂર્યોદયથી પૂર્વ પાંચ ઘડીરૂપ પ્રાતઃકાળ છે તેમાં જ પ્રાતઃકાળ અને મધ્યાહ્ન કાળમાં કરવાનું સંધ્યાદિ કર્મ કરવું. (૨૦૦) યથાસમયે દ્વાદશીમાં દૈવયોગથી સંકટ પ્રાપ્ત થાય ત્યારે પારણાં તો કેવળ જળથી જ કરે; ફરી અન્ન ભોજન કરે તો તેથી દ્વાદશીમાં બે વખત ભોજન કર્યાનો દોષ લાગતો નથી. (૨૦૧) દ્વાદશીનો પંદર ઘડી સુધીનો સમય પ્રથમ પાદ **'હરિવાસર'** સંજ્ઞાથી કહ્યો છે તેને ઉલ્લંઘન કરીને પછી વૈષ્ણવજન પારણાં કરે (૨૦૨) અષાઢ, ભાદ્રપદ અને કાર્તિક માસની શુકલ દ્વાદશીએ અનુક્રમે અનુરાધા, શ્રવણ અને રેવતી નક્ષત્રનો યોગ હોય ત્યાં સુધી પારણાં ના કરે. જો કરે તો બાર એકાદશીઓના વ્રતનું ફળ નાશ પામે. (૨૦૩)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**मैत्राद्यपादे स्वपितीह विष्णुः श्रुतेश्च मध्ये परिवर्तमेति । पौष्णान्त्यपादे प्रतिबोधमेति सुप्तिप्रबोधपरिवर्तनमेव वर्ज्यम् ॥२०४॥ एकादशीव्रतविधिस्तु मया यथावदुक्तो जनाः! स्मृतिवचोन्वितवर्त्मनेत्थम् । सर्वैर्भवद्भिरयमादरतो विधेयोऽथोद्यापनं विधिवदस्य वदामि सम्यक् ॥२०५॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे प्रबोधन्युत्सवे एकादशीव्रतविधिनिरूपणनामा त्रयस्त्रिंशोऽध्यायः ॥३३॥

श्रीनारायणमुनिरुवाच – **उद्यापनं विना नैव व्रतं हि फलदं भवेत् । तस्मात्प्रयत्नतः कार्यमेकादश्या व्रतस्य तत् ॥१॥ अस्तगे च गुरौ शुक्रे बाले वृद्धे मलिम्लुचे । उद्यापनं न कर्तव्यं कार्यमन्यत्र शक्तितः ॥२॥ महापूजा प्रकर्तव्या विप्रसन्तर्पणं तथा । शक्त्या स्वर्णं च गौर्देया सामान्योद्यापनं त्विति ॥३॥ सकृदेव हविष्याशी दशम्यां प्रयतः पुमान् । ब्रह्मचर्यपरो रात्रौ स्वपेद्भूमौ हरिं स्मरन् ॥४॥ रजन्या अन्तिमे यामे समुत्थाय यथाविधि । अदीर्घसूत्री कुर्वीत शौचस्नानादि नैत्यकम् ॥५॥ पूजोपहारान्सम्भृत्य विधिज्ञं ब्राह्मणं ततः । आहूय स्वस्थचित्तोऽचेंद्भक्त्या श्रीपुरुषोत्तमम् ॥६॥ स्वकीयगेहे सुस्वच्छे पुण्यक्षेत्रेऽथवा शुभे । विष्ण्वालये विशेषेण कुर्यात्पूजाविधिं व्रती ॥७॥ मण्डपे निर्मिते रम्ये कदलीस्तम्भमण्डिते । विधाय सर्वतोभद्रं तन्मध्ये स्थापयेद्धटम् ॥८॥ पञ्चपल्लवसंयुक्ते सूक्ष्मवस्त्राभिवेष्टिते । तस्मिन् पात्रं निदध्याच्च रम्यास्तरणमण्डितम् ॥९॥ कमलं द्वादशदलं नानावर्णोपशोभितम् । अन्तर्द्वादशभिः पत्रैर्युक्तं कुर्यात्तदन्तरे ॥१०॥ तन्मध्ये वासुदेवस्य हैमीं लक्ष्मीयुतस्य च । यथाशास्त्रं कारयित्वा प्रतिमां स्थापयेन्नरः ॥११॥**

---

આ દ્વાદશીમાં અનુરાધાના આદિ ચરણમાં વિષ્ણુ શયન કરે છે, શ્રવણના મધ્ય ભાગમાં વિષ્ણુ પડખું ફેરવે છે, રેવતીના અંતિમ ચરણમાં જાગે છે; શયનસમય, જાગવાનો સમય અને પડખું ફેરવવાનો સમય ત્યાગ કરવો તેમાં પારણાં ન કરવાં. (૨૦૪)

હે ભક્તો ! આ પ્રકારે મેં સ્મૃતિવચનોએ સહિત એકાદશી વ્રતનો વિધિ યથાર્થ કહ્યો. આ એકાદશી વ્રતનો વિધિ તમો સર્વેએ આદરથી કરવો. હવે પછી એકાદશી વ્રતનું ઉદ્યાપન શાસ્ત્ર પ્રમાણે જેમ હોય તેમ કહું છું. (૨૦૫)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે પ્રબોધન્યુત્સવે એકાદશીવ્રતવિધિનિરૂપણ નામા ત્રયસ્ત્રિંશોડધ્યાયઃ (૩૩)*

## અધ્યાય : ૩૪

## શ્રીહરિએ પોતાના ભક્તજનોને વ્રતના પૂર્ણ ફળને આપનારો એકાદશીવ્રતનો ઉદ્યાપનવિધિ કહેલો છે.

**શ્રીનારાયણ મુનિ બોલ્યા** : હે ભક્તો ! ઉદ્યાપન વિના વ્રત ફળ આપનારું થતું નથી માટે એકાદશી વ્રતનું ઉદ્યાપન પ્રયત્નથી કરવું. (૧) ગુરુ શુક્ર અસ્ત પામ્યા હોય ત્યારે તથા તે બંનેનો બાળવૃદ્ધ ભાવનો સમય તથા મળ માસ (અધિક માસ) હોય ત્યારે ઉદ્યાપન ન કરવું. તેથી બીજા-(કારતક, માગશર, માઘ, વૈશાખ, માસમાંથી હર કોઈ એક) સમયે યથાશક્તિ કરવું. (૨) વ્રતના અધિષ્ઠાતા દેવની મહાપૂજા તથા બ્રાહ્મણ ભોજન, સુવર્ણ દાન, ગૌદાન, શક્તિ પ્રમાણે કરવાં : આ સામાન્ય ઉદ્યાપનનો વિધિ છે. (૩) વ્રતકર્તા પુરુષ દશમીને દિવસે એક વાર જ હવિષ્યાન્ન જમે અને નિયમતત્પર થઈ રાત્રિમાં બ્રહ્મચર્ય વ્રતપરાયણ થઈ શ્રીહરિનું સ્મરણ કરતો કરતો પૃથ્વીમાં સૂએ. (૪) રાત્રિના છેલ્લા પહોરમાં ઊઠીને સર્વ ક્રિયાઓ ઉતાવળથી કરનાર વ્રતી શૌચ-સ્નાનાદિ નિત્યકર્મ યથા વિધિ કરે. (૫) પછી પૂજાના ઉપહારોને લાવીને વિધિ જાણનાર ઉદ્ધવ સંપ્રદાયના બ્રાહ્મણને બોલાવીને શ્રીકૃષ્ણ ભગવાનને ભક્તિથી પૂજે. (૬) અતિ સ્વચ્છ એવા પોતાના ગૃહમાં અથવા શુભ પુણ્ય ક્ષેત્રમાં અથવા ભગવાનના મંદિરમાં વ્રતી, વિશેષપણે પૂજાનો વિધિ કરે. (૭) કેળના થાંભલાઓથી શોભાયમાન નિર્માણ કરેલા રમણીય મંડપમાં સર્વતોભદ્ર નામનું મંડળ કરીને તેના મધ્ય ભાગમાં સુવર્ણનો કળશ સ્થાપન કરે. (૮) પીપળો, ઉમરડો, પીપર, આંબો અને વડ : આ પાંચ પલ્લવોએ સહિત સૂક્ષ્મ વસ્ત્રથી વીંટેલા તે કળશ ઉપર સુંદર આચ્છાદન વસ્ત્રથી શોભાયમાન એક પાત્ર સ્થાપન કરે. (૯) તે પાત્રના મધ્યમાં બાર બાહ્યપત્રો અને તેથી સૂક્ષ્મ બીજાં બાર અંદરનાં પત્રોએ યુક્ત નાના વિધ વર્ણો વડે વિરાજમાન કમળ કરે તે કમળના મધ્યમાં લક્ષ્મીએ સહિત વાસુદેવની પ્રતિમા સુવર્ણની યથાશાસ્ત્ર કરાવીને સ્થાપન કરે. (૧૦-૧૧)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

पूर्वाद्यनुक्रमेणैव केशवाद्याः सशक्तयः । तदङ्गदेवताः स्थाप्याः पद्मपत्रेषु सर्वतः॥१२॥ आद्ये दले केशवस्तु स्थापनीयः श्रिया सह । नारायणस्तदग्रे च पद्मया दक्षिणक्रमात् ॥१३॥ माधवो नित्यया साकं गोविन्दश्चन्द्रया सह। रमया सह विष्णुश्च माधव्या मधुसूदनः ॥१४॥ त्रिविक्रमश्च पद्माक्ष्या वामनः कमलायुतः । श्रीधरः कान्तिमत्या च हृषीकेशापराजिते ॥१५॥ पद्मनाभः पद्मवत्या राधादामोदरौ ततः । स्थापनीयाः क्रमेणैवमेता द्वादश देवताः ॥१६॥ तथाभ्यन्तरपत्रेषु स्थाप्या द्वादश देवताः । सङ्कर्षणः पूर्वपत्रे स्थाप्यः सह सुनन्दया ॥१७॥ वासुदेवो हरिण्याथ दक्षिणक्रमतस्ततः। प्रद्युम्नश्च धिया साकमनिरुद्धः सुशीलया ॥१८॥ स्थापनीयः क्रमेणैव नन्दया पुरुषोत्तमः । अधोक्षजस्त्रयीयुक्तः क्षेमङ्कर्या नृकेसरी ॥१९॥ अच्युतो विजयायुक्तः सुन्दर्या च जनार्दनः । उपेन्द्रः सुभगायुक्तो हरिः सह हिरण्यया ॥२०॥ कृष्णः सुलक्षणायुक्तः स्थापनीयोऽन्तिमे दले । ततः पूजां प्रकुर्वीत यथाशक्ति यथाविधि ॥२१॥ पञ्चामृतेन च स्नानं कार्यमभ्यङ्गपूर्वकम् । महाभिषेकः कर्तव्यः कृत्वादौ लघुपूजनम् ॥२२॥ नवीनवस्त्रभूषादि समर्प्य च चतुःसमम् । सर्वगन्धं च वा भक्त्या सुमनोभिः प्रपूजयेत् ॥२३॥ सहस्रतुलसीपत्रैः पूजयित्वाऽमृताह्वयम् । धूपं समर्प्य दीपं च नैवेद्यं तु निवेदयेत् ॥२४॥ मोदकान् गुडकांश्चैव चूर्णानि घृतपूरकान् । सोहालिकाश्च कंसारं सक्तून्सेवाश्च मण्डकान्॥२५॥ वटकान् पायसं दुग्धकूरं दध्योदनं तथा । पिण्डकान् पूरिकाश्चैव शतच्छिद्रांश्च लड्डुकान् ॥२६॥ तिलपिष्टं कर्णवेष्टं शालिपिष्टं सशर्करम् । रम्भाफलं च सघृतं मुद्गचूर्णं गुडौदनम् ॥२७॥ समर्प्येत्यादि नैवेद्यं ताम्बूलं च फलं व्रती । महानीराजनं कृत्वा दद्यात्पुष्पाञ्जलिं ततः ॥२८॥

---

શક્તિ સહિત કેશવાદિક ચોવીસ મૂર્તિઓની અંગદેવતા તરીકે સમગ્ર કમળપત્રોમાં કમળના પૂર્વ દિશામાં રહેલા પત્રથી દક્ષિણ અનુક્રમથી સ્થાપના કરે તેમાં પ્રથમ પત્રમાં કેશવ ભગવાનની શ્રીશક્તિ સાથે સ્થાપના કરે તે થકી આગલા પત્રમાં પ્રદક્ષિણાના ક્રમથી નારાયણ ભગવાનની પદ્મા પત્નીની સાથે સ્થાપના કરે. માધવ ભગવાનની નિત્યા પત્ની સાથે સ્થાપના કરે. ચન્દ્રવતી પત્ની સાથે ગોવિંદની, લક્ષ્મી પત્ની સાથે વિષ્ણુની, માધવી શક્તિ સાથે મધુસૂદન ભગવાનની સ્થાપના કરે. (૧૨-૧૩-૧૪) પદ્માક્ષી પત્ની સાથે ત્રિવિક્રમ ભગવાનની અને તેથી આગલા પત્રમાં કમલા શક્તિ સાથે વામન ભગવાનની, તે પછી કાંતિમતી શક્તિ સાથે શ્રીધર ભગવાનની, અપરાજિતા પત્ની સાથે હૃષીકેશ ભગવાનની, પદ્મવતી પત્ની સહિત પદ્મનાભ ભગવાનની, પછી રાધાદેવી સાથે દામોદર ભગવાનની સ્થાપના કરે : આવા અનુક્રમથી આ કેશવાદિ શુક્લ પક્ષની એકાદશીઓના બાર અધિપતિઓની સ્થાપના કરવી. (૧૫-૧૬) પૂર્વે કહેલા અનુક્રમથી અંદરના પત્રોમાં બાર દેવતાઓ સ્થાપન કરવા, પૂર્વ દિશામાં રહેલા સુનંદા શક્તિ સાથે સંકર્ષણ ભગવાનની સ્થાપના કરવી. (૧૭) પ્રદક્ષિણાના ક્રમથી શ્રીપ્રિયા બીજું નામ હરિણી શક્તિ સાથે વાસુદેવ ભગવાનની, ધી શક્તિની સાથે પ્રદ્યુમ્ન ભગવાનની, સુશીલા પત્ની સાથે અનિરુદ્ધ ભગવાનની સ્થાપના કરવી. (૧૮) નંદા શક્તિ સાથે પુરુષોત્તમ ભગવાનની, ત્રયી પત્ની સાથે અધોક્ષજ ભગવાનની, ક્ષેમંકરી પત્ની સાથે નૃસિંહ ભગવાનની સ્થાપના કરે. (૧૯) વિજયા પત્ની સાથે અચ્યુત ભગવાનની, સુંદરી પત્ની સાથે જનાર્દન ભગવાનની, સુભગા પત્ની સાથે ઉપેન્દ્ર ભગવાનની, હિરણ્યા પત્ની સાથે હરિ ભગવાનની સ્થાપના કરવી. (૨૦) સુલક્ષણા પત્ની સાથે કૃષ્ણ ભગવાનની છેલ્લા પત્રમાં સ્થાપના કરવી પછી શક્તિ પ્રમાણે-શાસ્ત્રવિધિ પ્રમાણે શ્રીકૃષ્ણનું પૂજન કરે. (૨૧) પુષ્પ તેલ (અત્તર) થી અંગ ચોળીને દૂધ વગેરે પંચદ્રવ્યથી સ્નાન કરાવવું. પ્રથમ અલ્પ પૂજા કરી મહાભિષેક કરવો. (૨૨) નવીન વસ્ત્ર તથા આભૂષણો સમર્પણ કરી કુંકુમ-કસ્તૂરી-કપૂરથી યુક્ત ચતુઃસમ નામનું મિશ્ર ચંદન અથવા સર્વગંધ નામનું ચંદન સમર્પણ કરી પુષ્પની માળાઓથી પૂજન કરે. (૨૩) પછી સહસ્ર તુલસી પત્રોથી પૂજીને અમૃત નામનો ધૂપ અને દીપ સમર્પણ કરી નૈવેદ્ય નિવેદન કરવું. (અગરચંદન, નાગરમોથ, લોબાન, કસ્તૂરી : આ સર્વેને સમાન ભાગે કરવું તે 'અમૃત' નામનો ધૂપ કહેલો છે) (૨૪) તળેલા લાડુ, લાકડશી લાડુ, રોટલો બનાવી શેકીને કરેલા બળ્યા લાડુ, ઘેબર, માંડા, સુંહાળિયો, કંસાર, સેવો, દળના લાડુ, વડાં, દૂધપાક, દૂધભાત, દહીંભાત, પેંડા, પુરીઓ, ખાજાં, માલપુવા, ગોળના લાડુ, તલસાંકળી, જલેબી, હરિસો, સાકર અને ઘીએ સહિત કેળાં, મગદળ, બીરંજ વગેરે નૈવેદ્ય સમર્પણ કરી તાંબુલ અને ફળ સમર્પણ કરે. મહાનીરાજન કરી પછી પુષ્પાંજલિ અર્પણ કરે. (૨૫ થી ૨૮)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**समाप्य पूजां दानानि दद्याच्छक्त्यनुसारतः । गोभूतिलहिरण्याश्वगजादीनि दृढव्रतः ॥२९॥ ततो देवस्य पुरतो गोष्ठे वा होममाचरेत् । मन्त्रेणेदं विष्णुरिति समिदाज्यतिलौदनैः ॥३०॥ तैरेव च यजेत्पश्चान्नामभिः केशवादिभिः । गाश्चतुर्विंशतिं दद्याद्दशैकां वाथ काञ्चनम् ॥३१॥ देया गावः श्वेतवर्णाः कपिला वा यथाविधि । रात्रौ जागरणं कृत्वा प्रभाते चार्चयेद्धरिम् ॥३२॥ सुवर्णनिर्मितां मूर्तिं दद्यात्स्वगुरवे हरेः । अलङ्कारांश्च वासांसि दत्त्वा विप्रांश्च भोजयेत् ॥३३॥ चतुर्विंशतिसङ्ख्याकान्सतिलान्नफलोदकान् । घटान्दत्त्वा द्विजेभ्यश्च प्रदद्याद्दक्षिणां नरः ॥३४॥ गन्धपुष्पांशुकाद्यैश्च सम्पूज्या ब्रह्मचारिणः । साधवो भोजनीयाश्च सदन्नैर्विष्णुसेवकाः ॥३५॥ ततश्च पारणां कुर्यात्स्वजनैः सह स व्रती । एवं कृते व्रतमिदं यथोक्तफलदं भवेत् ॥३६॥ इत्येकादशिकाव्रतस्य महिमा सच्छास्त्रवृन्दं मया निर्मथ्योद्धृत आदराद्व्रतविधिः साङ्गश्च सङ्क्षेपतः । प्रोक्तः श्रीरमणाश्रिताखिलजनप्रीत्यै तमेतं नरो यः श्रोष्यत्यथवा पठिष्यति स तु प्राप्स्यत्यभीष्टं फलम् ॥३७॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे प्रबोधन्युत्सवे एकादशीव्रतोद्यापनविधिनिरूपणनामा चतुस्त्रिंशोऽध्यायः ॥३४॥

जना ऊचुः - **केशवादीनि रूपाणि यान्येकादशिकातिथौ । पूज्यान्युक्तानि तेषां त्वं ब्रूहि लक्ष्माणि नः पृथक् ॥१॥** श्रीनारायणमुनिरुवाच - **मूर्तीनां केशवादीनां वासुदेवस्य वो जनाः ! । कथयामि यथाशास्त्रं लक्षणानि पृथक् पृथक् ॥२॥ चतुर्विंशतिरूपिण्या एकादश्याः प्रियाय सः । चतुर्विंशतिमेकोऽपि विष्णुर्मूर्तीर्दधाति वै ॥३॥**

---

દૃઢ વ્રતધારી, પૂજા સમાપ્ત કરી, ગાય, ભૂમિ, તલ, સુવર્ણ, ઘોડા, હાથી, શૈયા વગેરેનાં દાન શક્તિ પ્રમાણે આપે. (૨૯) પછી મંડપમાં સ્થાપના કરેલા ભગવાનની આગળ અથવા ગાયને બાંધવાના સ્થળમાં 'ઈદં વિષ્ણુઃ' આ મંત્રથી સમિધાઓ, ઘી, તલ, ભાતથી હોમ કરવો. (૩૦) પછી કેશવાદિ નામોથી, પૂર્વે કહેલાં હોમ દ્રવ્યોથી એક એક આહુતિ આપે; પછી ચોવીસ ગાયો આપે અથવા દસ ગાયો અથવા એક ગાય અથવા ગૌદાન નિમિત્તે સુવર્ણ આપે. (૩૧) ગાયો શ્વેતવર્ણવાળી યથાવિધિ આપવી અથવા કપિલા આપવી. રાત્રિમાં જાગરણ કરી પ્રભાતમાં શ્રીહરિને પૂજે. (૩૨) સુવર્ણથી નિર્માણ કરેલી મૂર્તિ પોતાના આચાર્યને આપે અને અલંકારો તથા વસ્ત્રો આપીને બ્રાહ્મણોને જમાડે. (૩૩) વ્રતનું ઉદ્યાપન કરનાર પુરુષ તલ, અન્ન, ફૂલો અને જળે સહિત ચોવીસ ઘડા આપી દક્ષિણા આપે. (૩૪) ભગવાનના ભક્ત બ્રહ્મચારી અને સાધુઓને ચંદન-પુષ્પો અને વસ્ત્રો વગેરેથી પૂજે અને શ્રેષ્ઠ મિષ્ટાનોથી જમાડવા. (૩૫) પછી વ્રતી પુરુષ પોતાનાં સ્વજનો સાથે પારણાં કરે : આ પ્રકારે ઉદ્યાપન કરે તો એકાદશીનું વ્રત શાસ્ત્રમાં કહેલા સંપૂર્ણ ફળને આપનારું થાય છે. (૩૬)

હે ભક્તો ! આ પ્રકારે મેં એકાદશી વ્રતનો મહિમા સત્ શાસ્ત્રોનું મંથન કરી ઉદ્‌ધૃત કરેલો શ્રીકૃષ્ણના સમગ્ર આશ્રિતોની પ્રસન્નતા માટે અંગે સહિત વ્રતવિધિ સાથે સંક્ષેપથી આદરથી તમોને કહ્યો. જે મનુષ્ય મહિમા સહિત આ વ્રતવિધિ સાંભળશે અથવા પાઠ કરશે તે પુરુષ પોતાના ઈચ્છિત ફળને પામશે. (૩૭)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે પ્રબોધન્યુત્સવે એકાદશીવ્રતોદ્યાપન વિધિનિરૂપણ નામા ચતુસ્ત્રિંશોઽધ્યાયઃ (૩૪)*

### અધ્યાય : ૩૫

## શ્રીહરિએ પોતાના આશ્રિતોને કેશવાદિ મૂર્તિઓના પૃથક્ પૃથક્ લક્ષણો અનુક્રમથી કહ્યાં છે.

**ભક્તજનો બોલ્યા** : હે સ્વામિન્ ! એકાદશી તિથિએ જે કેશવાદિ રૂપો પૂજ્યપણે કહ્યાં, તેમનાં લક્ષણો આપ જુદાં જુદાં સ્પષ્ટપણે નિરૂપણ કરીને કહો. (૧) **શ્રી નારાયણ મુનિ બોલ્યા** : હે જનો ! શ્રી વાસુદેવ શ્રીકૃષ્ણની ચોવીસ મૂર્તિઓનાં લક્ષણો શાસ્ત્ર પ્રમાણે જુદાં જુદાં તમોને કહું છું. (૨) તે વિષ્ણુ શ્રી વાસુદેવ એક છે પણ ચોવીસ રૂપવાળી એકાદશીઓનું પ્રિય કરવા માટે ચોવીસ મૂર્તિઓરૂપે થાય છે. (૩)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

शङ्खचक्रगदाब्जानां स्थानभेदेन धारणात् । नामान्युक्तानि तासां वै चतुर्विंशतिरेव हि ॥४॥ धारणं स्थानभेदेन शङ्खादीनां यथा तथा । वदामि तत्तु विज्ञेयं दक्षिणाधःकरक्रमात् ॥५॥ पद्मं शङ्खं तथा चक्रं गदां वहति केशवः । शङ्खं पद्मं गदां चक्रं धत्ते नारायणः सदा ॥६॥ गदां चक्रं तथा शङ्खं पद्मं वहति माधवः । चक्रं गदां पद्मशङ्खौ गोविन्दो धरते भुजैः ॥७॥ गदां पद्मं तथा शङ्खं चक्रं विष्णुर्बिभर्ति च । चक्रं शङ्खं तथा पद्मं गदां च मधुसूदनः ॥८॥ पद्मं कौमोदकीं चक्रं शङ्खं धत्ते त्रिविक्रमः । शङ्खं चक्रं गदां पद्मं वामनो धरते सदा ॥९॥ पद्मं चक्रं गदां शङ्खं श्रीधरो धरते भुजैः । हृषीकेशो गदां चक्रं पद्मं शङ्खं दधाति च ॥१०॥ पद्मनाभः करैर्धत्ते शङ्खं पद्ममरिं गदाम् । पद्मं शङ्खं गदां चक्रं धत्ते दामोदरः सदा ॥११॥ सङ्कर्षणो गदाशङ्खपद्मचक्रधरः स्मृतः । वासुदेवो गदाशङ्खचक्रपद्मधरो मतः ॥१२॥ चक्रशङ्खगदापद्मधरः प्रद्युम्न उच्यते । अनिरुद्धश्चक्रगदाशङ्खपद्मधरः स्मृतः ॥१३॥ चक्रं पद्मं तथा शङ्खं गदां च पुरुषोत्तमः । पद्मं कौमोदकीं शङ्खं चक्रं धत्तेऽप्यधोक्षजः ॥१४॥ चक्रं पद्मं गदां शङ्खं नरसिंहो बिभर्ति च । गदां सरोजं चक्रं च शङ्खं धत्तेऽच्युतः सदा ॥१५॥ पद्मं सुदर्शनं शङ्खं गदां धत्ते जनार्दनः । शङ्खं कौमोदकीं चक्रमुपेन्द्रो धरतेऽम्बुजम् ॥१६॥ शङ्खं चक्रं सरोजं च गदां वहति वै हरिः । शङ्खं कौमोदकीं पद्मं चक्रं कृष्णो बिभर्ति च ॥१७॥ इत्येताः केशवाद्या वो मूर्तयो लक्षणैर्मया । निरूपिता भक्तजनाः! पूज्या एकादशीषु ताः ॥१८॥ एकादशीनां शुक्लानामीश्वराः केशवादयः । द्वादशोक्ताश्च कृष्णानां ज्ञेयाः सङ्कर्षणादयः ॥१९॥ मार्गशीर्षे शुक्लपक्षे एकादश्यां तु केशवः । पूज्यस्तथा कृष्णपक्षे तत्र सङ्कर्षणोऽर्चकैः ॥२०॥

---

પાંચજન્ય શંખ, સુદર્શન ચક્ર, કૌમોદકી ગદા, ધર્માદિયુક્ત શુદ્ધ સત્ત્વાત્મક પદ્‌મ (કમળ) : આ ચારને સ્થાનભેદથી ધારણ કરવાથી કેશવાદિ મૂર્તિઓનાં ચોવીસ નામો કહેલાં છે. (૪) સ્થાનભેદથી જે પ્રમાણે ધારણ કરવાથી નામ થાય છે. તે કહું છું. તે ધારણ તો જમણો નીચેનો હાથ તેના ક્રમથી જાણવું. પ્રથમ નીચેનો જમણો હાથ, ત્યાર બાદ જમણો ઊંચો હાથ, ત્યારબાદ ઊંચો રહેલો ડાબો હાથ, પછી નીચેનો ડાબો હાથ એ અનુક્રમ જાણવો. (૫) પદ્‌મ, શંખ, તથા ચક્ર, ગદાને કેશવ ભગવાન વહન કરે છે; શંખ, પદ્‌મ, ગદા, ચક્ર, હંમેશા નારાયણ ધારણ કરે છે. (૬) ગદા, ચક્ર, શંખ અને પદ્‌મ પોતાના હસ્તોથી માધવ ભગવાન ધારણ કરે છે; ચક્ર, ગદા, પદ્‌મ, શંખ પોતાના હાથોથી ગોવિંદ ભગવાન ધારણ કરે છે. (૭) ગદા, પદ્‌મ, શંખ, ચક્ર, વિષ્ણુ ધારણ કરે છે. ચક્ર, શંખ, પદ્‌મ, અને ગદા મધુસૂદન ધારણ કરે છે. (૮) પદ્‌મ, ગદા, ચક્ર અને શંખ ત્રિવિક્રમ ધારણ કરે છે; શંખ, ચક્ર, ગદા, પદ્‌મ, હંમેશા વામન ભગવાન ધારણ કરે છે. (૯) પદ્‌મ, ચક્ર, ગદા, શંખ, શ્રીધર ભગવાન ધારણ કરે છે; ગદા, ચક્ર, પદ્‌મ, શંખ, હૃષીકેશ ધારણ કરે છે. (૧૦) શંખ, પદ્‌મ, ચક્ર, ગદા, પદ્‌મનાભ ધારણ કરે છે, પદ્‌મ, શંખ, ગદા, ચક્ર દામોદર ભગવાન હંમેશા ધારણ કરે છે. (૧૧) સંકર્ષણ ભગવાન ગદા, શંખ, પદ્‌મ અને ચક્રને ધારણ કરનારા કહેલા છે. ગદા, શંખ, ચક્ર અને પદ્‌મને હંમેશા ધારણ કરનારા વાસુદેવ ભગવાન માનેલા છે. (૧૨) ચક્ર, શંખ, ગદા અને પદ્‌મને ધારણ કરનારા પ્રદ્યુમ્ન ભગવાન કહેવાય છે; અનિરુદ્ધ ભગવાન ચક્ર, ગદા, શંખ અને પદ્‌મને ધારણ કરનારા કહેલા છે. (૧૩) ચક્ર, પદ્‌મ, શંખ અને ગદાને પુરુષોત્તમ ભગવાન ધારણ કરે છે; પદ્‌મ, ગદા, શંખ, ચક્રને અધોક્ષજ ભગવાન ધારણ કરે છે. (૧૪) નૃસિંહજી ભગવાન ચક્ર, પદ્‌મ, ગદા, શંખને ધારણ કરે છે. અચ્યુત ભગવાન ગદા, પદ્‌મ, ચક્ર, અને શંખ હંમેશા ધારણ કરે છે. (૧૫) જનાર્દન ભગવાન પદ્‌મ, ચક્ર, શંખ અને ગદાને ધારણ કરે છે; ઉપેન્દ્ર ભગવાન શંખ, ગદા, ચક્ર અને પદ્‌મને ધારણ કરે છે. (૧૬) હરિ નામે ભગવાન શંખ, ચક્ર, કમળ, ગદાને ધારણ કરે છે; કૃષ્ણ ભગવાન શંખ, ગદા, પદ્‌મ, અને ચક્રને ધારણ કરે છે. (૧૭) હે ભક્તજનો ! આ પ્રમાણે મેં આ કેશવાદિ મૂર્તિઓ લક્ષણોથી તમોને નિરૂપણ કરી કહી છે તે મૂર્તિઓ એકાદશીમાં પૂજવી. (૧૮) કેશવાદિ બાર શુકલ પક્ષની એકાદશીઓના ઈશ્વરો કહ્યા, બાર કૃષ્ણ પક્ષની એકાદશીઓના સંકર્ષણ વગેરે ઈશ્વરો જાણવા. (૧૯) માગશર માસના શુકલ પક્ષની એકાદશીમાં કેશવ ભગવાન વ્રત કરનારા ભક્તોએ પૂજવા તથા માગશર માસના કૃષ્ણ પક્ષમાં એકાદશીને દિવસે સંકર્ષણ ભગવાન વ્રતધારી પૂજકે પૂજવા. (૨૦)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**एवं पौषादिमासेषु पक्षयोः शुक्लकृष्णयोः । नारायणादयः पूज्या मले तु पुरुषोत्तमः ॥२१॥ अत्र सङ्कर्षणाद्या याश्चतस्त्रो मूर्तयो मया । प्रोक्तास्तास्तु पृथग्ज्ञेयाश्चतुर्व्यूहस्वरूपतः ॥२२॥ वित्तशाठ्यं न कर्तव्यमेकादश्युत्सवे जनाः! । लक्ष्मीकान्तोऽत्र सर्वासां दाता तुष्यति सम्पदाम् ॥२३॥ यः प्रातरुत्थाय विकुण्ठभर्तुः कृष्णस्य रूपाण्यघनाशनानि । श्रीकेशवादीनि पुमानुत स्त्री स्मरेत्स वै मङ्गलमिष्टमेतु ॥२४॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे प्रबोधन्युत्सवे केशवादिमूर्तिलक्षणनिरूपणनामा पञ्चत्रिंशोऽध्यायः ॥३५॥

सुव्रत उवाच – **इति श्रीहरिणा गीतं माहात्म्यादि निशम्य ते । एकादश्या जनाः सर्वे सन्तुष्टिं परमां ययुः ॥१॥ तमेव हृदि जानन्तः श्रीकृष्णं धर्मनन्दनम् । तदग्र एव नियमं जगृहुस्तद्व्रतस्य ते ॥२॥ स्वस्वस्थानं ततो गन्तुमाज्ञाप्य स्वाश्रितांश्च तान्। स्वावासमगमत्स्वामी वन्द्यमानो जनव्रजैः ॥३॥ एकादशीव्रतविधिमाचरिष्यन् कृताप्लवः । कृष्णं सोऽभ्यर्च्य जग्राह तदग्रे नियमं नृप ! ॥४॥ महानैवेद्यसामग्रीं कारयामास वाडवैः । रम्भास्तम्भादिभिः पूजामण्डपं चाप्यचीकरत् ॥५॥ पूजोपहारान्सम्पाद्य किञ्चित्सुष्वाप भूतले । तृतीयः प्रहरस्तावद्रात्रेः प्रापत्समापनम् ॥६॥ अलब्धनिद्र एवासावुत्तस्थौ सहसा ततः । स्वस्वरूपं हृदि ध्यात्वा साकं भक्तैर्नदीं ययौ ॥७॥ आदौ शौचविधिं कृत्वा गण्डूषान् द्वादशैव च । तस्यामुन्मत्तगङ्गायां चकार विधिनाऽऽप्लवम् ॥८॥**

આ પ્રમાણે પોષમાસાદિ માસોમાં શુકલ અને કૃષ્ણ બંને પક્ષોમાં નારાયણાદિ અને વાસુદેવાદિ પૂજવા. મળ માસ (અધિક માસ)માં તો બંને પક્ષમાં પુરુષોત્તમ પૂજવા એમ જાણવું. (૨૧) આ ચોવીસ વ્યૂહમાં સંકર્ષણાદિ જે ચાર મૂર્તિઓ મેં કહી છે તે મૂર્તિઓ તો ચતુર્વ્યૂહથી ભિન્ન સમજવી. (૨૨) હે જનો ! એકાદશીના ઉત્સવમાં સંપત્તિ હોય તો વિત્તનો સંકોચ કરવો નહિ; કારણ કે સર્વ સંપત્તિઓને આપનારા શ્રીલક્ષ્મીપતિ પ્રસન્ન થઈને ઘણી સંપત્તિ આપે છે. (૨૩)

અને વળી જે પુરુષ અથવા સ્ત્રી વહેલી સવારે ઊઠીને વૈકુંઠ પતિ કૃષ્ણનાં, અગાઉ કહ્યાં એવાં પાપ નિવારનારાં કેશવાદિ રૂપોનું સ્મરણ કરે છે તે તત્કાળ આ લોકમાં અને પરલોકમાં મનવાંછિત મંગળ ફળને પામે છે. (૨૪)

*ઈતિ શ્રીસત્સંગિજીવનેનારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીયપ્રકરણે પ્રબોધન્યુત્સવે કેશવાદિમૂર્તિલક્ષણ નિરૂપણ નામા પંચત્રિંશોઽધ્યાયઃ (૩૫)*

## અધ્યાય : ૩૬

## શ્રીહરિએ પોતાના ભક્તોને ગ્રહણ કરાવવા માટે આચરણ કરેલો એકાદશીના વ્રતનો વિધિ યથાર્થ કહ્યો છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! આ પ્રમાણે શ્રીહરિકૃષ્ણ ભગવાને કહેલો, એકાદશીના માહાત્મ્ય કહેવા પૂર્વક સમગ્ર વ્રતના આચરણનો વિધિ સાંભળીને સભામાં બેઠેલાં સર્વે જનો પરમ સંતોષ પામ્યાં. (૧) તે જનો ધર્મનંદન શ્રીહરિને જ પુરુષોત્તમ-શ્રીકૃષ્ણ સ્વરૂપે પોતાના હૃદયમાં જાણતા હોવાથી શ્રીહરિની સમીપમાં જ આવતી કાલે કરવામાં આવશે એવા પ્રબોધિની એકાદશી વ્રતના નિયમોની પ્રતિજ્ઞા ગ્રહણ કરતા હતા. (૨) ભગવાનશ્રી સ્વામિનારાયણ સભામાં બેઠેલા પોતાનાં ભકતજનોને પોતપોતાના સ્થાનમાં જવા માટે આજ્ઞા આપીને જન સમૂહોએ નમસ્કાર કરાયેલા સતા પોતાના નિવાસ સ્થાનમાં ગયા. (૩) હે રાજન્ ! એકદશીવ્રતનો વિધિ આચરણ કરશે એવા શ્રીનારાયણ મુનિ સ્નાન કરી નિત્ય સેવા કરવાની શ્રીકૃષ્ણની પ્રતિમાનું પૂજન કરી, તેમની સમીપે આવતીકાલે એકાદશીનું વ્રત કરવાની પ્રતિજ્ઞા ગ્રહણ કરતા હતા. (૪) શ્રીહરિ મહાનૈવેદ્યની સામગ્રી રસોયા બ્રાહ્મણોની પાસે કરાવતા હતા. કેળના સ્તંભો વગેરેથી પૂજાનો મંડપ પણ અતિ શોભાયમાન કરાવતા હતા. (૫) શ્રીહરિ પૂજાના ઉપહારોને લાવીને તે રાત્રિએ પૃથ્વીમાં લગારેક સૂઈ ગયા તેટલામાં રાત્રિનો ત્રીજો પહોર સમાપ્ત થયો. (૬) પછી નથી સ્વીકાર કરી યોગનિદ્રા જેમણે એવા શ્રીનારાયણ મુનિ તત્કાળ જ ઊઠ્યા અને સ્વસ્વરૂપનું હૃદયમાં ધ્યાન કરી સમીપમાં રહેલા ભક્તોની સાથે ઉન્મત્તગંગામાં ગયા. (૭) શ્રીહરિ પ્રથમ શૌચવિધિ કરી બાર કોગળા કરી, ઉન્મત્તગંગામાં પ્રાતઃસ્નાનવિધિથી સ્નાન કરતા હતા. (૮)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

स्नानाङ्गं तर्पणं कृत्वा कलशेऽत्युज्ज्वले जलम् । भृत्वाऽर्चनार्थं श्रीविष्णोरार्द्रवासा गृहं ययौ ॥९॥ ईश्वरोऽनेकशिष्योऽपि दर्शयन् हरिसेविनाम्। दासधर्मं स्वयं तोयमानिनाय निजाश्रमम् ॥१०॥ पुष्पाणि च गृह्योद्यानादानीय तुलसीं च सः । धौताङ्घ्रिपाणिः शुचिनी पर्यधात्सितवाससी ॥११॥ उपविश्यासने कौशे गोपीचन्दनमृत्सया । कृत्वा पञ्चोर्ध्वपुण्ड्राणि सन्ध्यावन्दनमाचरत् ॥१२॥ नित्यहोमं ततः कृत्वा ब्राह्मणान्वेदवित्तमान् । पूजाविधिज्ञानाहूय प्रारेभे कृष्णपूजनम् ॥१३॥ तं पूजां कारयामासुर्ब्राह्मणास्ते यथाविधि । विदधुः सर्वतोभद्रमादौ ते मण्डलं शुभम् ॥१४॥ विचित्ररङ्गशोभाढ्यं तस्मिन्कलशमुज्ज्वलम् । सौवर्णं स्थापयामासुर्ब्राह्मणा विधिकोविदाः ॥१५॥ पञ्चपल्लवसंयुक्ते सूक्ष्मवस्त्राभिवेष्टिते । तत्र स्थिते शुभे पात्रे रम्यास्तरणमण्डिते ॥१६॥ कमलं द्वादशदलं नानावर्णोपशोभितम् । अन्तर्द्वादशभिः पत्रैर्युक्तं चक्रुर्मनोहरम् ॥१७॥ तन्मध्ये प्रतिमां हैमीं लक्ष्मीयोगेश्वरस्य ते । प्राणप्रतिष्ठां कृत्वैव स्थापयामासुरादरात् ॥१८॥ तदङ्गदेवताश्चान्याः पार्षदांश्च यथादिशम् । स्थापयामासुरव्यग्रास्तन्त्रोक्तविधिना द्विजाः ॥१९॥ पूर्वाद्यनुक्रमेणैव केशवाद्याः सशक्तयः । बाह्याभ्यन्तरपत्रेषु स्थापिता ह्यङ्गदेवताः ॥२०॥ आद्ये दले केशवस्तु स्थापितस्तैः श्रिया सह । नारायणस्तदग्रे च पद्मया दक्षिणक्रमात् ॥२१॥ माधवो नित्यया साकं गोविन्दश्चन्द्रया सह । रमया सह विष्णुश्च माधव्या मधुसूदनः ॥२२॥ त्रिविक्रमश्च पद्माक्ष्या वामनः कमलायुतः । श्रीधरः कान्तिमत्याऽग्रे हृषीकेशापराजिते ॥२३॥ पद्मनाभः पद्मवत्या राधादामोदरौ ततः । स्थापिता द्वादशैवैता बहिःपत्रेषु देवताः ॥२४॥ मार्गशीर्षादिमासेषु द्वादशस्वप्यनुक्रमात् । एकादशीनां शुक्लानामेता एव हि देवताः ॥२५॥

---

શ્રીહરિ સ્નાનના અંગભૂત તર્પણ કરી અતિ ઉજ્જ્વળ કળશમાં જળ શ્રીવિષ્ણુના પૂજન માટે ભરીને ભીના વસ્ત્રવાળા થકા જ પોતાના ભવનમાં આવ્યા. (૯) શ્રીહરિ અનેક શિષ્યોવાળા છે તોપણ, અને સાક્ષાત્ પરમેશ્વર છે તો પણ, પ્રત્યક્ષ શ્રીકૃષ્ણના સેવક જનોને દાસધર્મ- 'પોતે જ શ્રીહરિની સેવા કરવી' એવો દાસધર્મ પોતાના આશ્રિતોને બોધ આપતા સતા શુદ્ધ કળશમાં ભરેલું ગંગોદક પોતાના આશ્રમમાં લાવ્યા. (૧૦) શ્રીહરિએ ગૃહના બગીચામાંથી પુષ્પો અને તુલસી લાવી, હાથ-પગ ધોઈ, ધોયેલાં અને બીજાના સ્પર્શદોષ રહિત-શ્વેત-સુતરાઉ વસ્ત્રને ધારણ કર્યાં. (૧૧) શ્રીહરિ કુશાસન પર બેસીને ગોપીચંદનની મૃત્તિકાથી પાંચ ઊર્ધ્વપુંડ્ર તિલકો કરી પ્રાતઃસંધ્યાવંદનનો વિધિ કરતા હતા. (૧૨) પછી નિત્ય હોમ કરી અતિ ઉત્તમ વેદ જાણનારા, પૂજાવિધિ જાણનારા બ્રાહ્મણોને બોલાવીને કૃષ્ણપૂજાનો આરંભ કર્યો. (૧૩) તે બ્રાહ્મણો શ્રીહરિને વિધિ પ્રમાણે પૂજા કરાવતા હતા. (તેનો અનુક્રમ બતાવે છે : ) બ્રાહ્મણો પ્રથમ શુભ સર્વતોભદ્રમંડલ કરતા હતા. (૧૪) પૂજાવિધિમાં પ્રવીણ બ્રાહ્મણો વિચિત્ર રંગોથી શોભાયમાન તે મંડલમાં, સુવર્ણથી નિર્માણ કરેલો ઉજ્જ્વળ કળશ સ્થાપન કરતા હતા. (૧૫) પાંચ પલ્લવોએ યુક્ત સૂક્ષ્મ વસ્ત્રોથી અભિવેષ્ટિત કરેલા તે કળશ ઉપર સ્થાપેલા શુભ પાત્રમાં રમણીય વસ્ત્ર પાથરીને તેમાં બાહ્ય અને અંદર; બાર બાર પાંદડાંથી યુક્ત મનોહર કમળને નાનાવિધ રંગોથી કરીને, તેના મધ્યમાં લક્ષ્મી સહિત યોગેશ્વર ભગવાનની સુવર્ણનિર્મિત મૂર્તિને પ્રાણપ્રતિષ્ઠા કરીને જ આદરથી સ્થાપના કરતા હતા. (૧૬-૧૭-૧૮) તે પછી બ્રાહ્મણો શાંત ચિત્તથી બીજા તેમના અંગદેવતા અને નંદાદિ પાર્ષદોને તે તે દિશાઓ પ્રમાણે તંત્રમાં કહેલા વિધિ પ્રમાણે સ્થાપના કરતા હતા. (૧૯) પત્નીઓ સહિત કેશવાદિ અંગદેવતાઓની પૂર્વાદિ દિશાઓના અનુક્રમથી જ બાહ્ય અને આભ્યન્તર પત્રોમાં બ્રાહ્મણોએ સ્થાપના કરી. (૨૦) બ્રાહ્મણોએ પૂર્વ દિશાના પત્રમાં કેશવ-શ્રીની સાથે સ્થાપના કરી, તેની આગળના પત્રમાં દક્ષિણના ક્રમથી નારાયણ-પદ્માની સાથે સ્થાપના કરી. (૨૧) માધવ-નિત્યાની સાથે, ગોવિંદ-ચંદ્રાની સાથે, વિષ્ણુ-રમાની સાથે, મધુસૂદન-માધવીની સાથે સ્થાપના કરી. (૨૨) વિક્રમ-પદ્માક્ષી સાથે, વામન-કમલા સાથે અને શ્રીધર-કાન્તિમતિની સાથે સ્થાપના કરી. આગળ હૃષીકેશ-અપરાજિતાની સાથે સ્થાપના કરી. (૨૩) પદ્મનાભ-પદ્માવતીની સાથે સ્થાપના કરી, પછી દામોદરને રાધાની સાથે સ્થાપ્યા : આ બાર દેવતાઓ બહારના પત્રોમાં સ્થાપ્યા. (૨૪) માગશર વગેરે બાર માસોની શુકલ એકાદશીઓના જ અનુક્રમથી આ પૂર્વે કહેલા કેશવાદિ બાર, અધિપતિ દેવતાઓ છે. (૨૫)

तथाभ्यन्तरपत्रेषु द्वादशस्वपि देवताः । कृष्णैकादश्यधिष्ठात्र्यः स्थापिताश्च सशक्तयः ॥२६॥ सङ्कर्षणः पूर्वपत्रे स्थापितस्तु सुनन्दया । वासुदेवो हरिण्या च सहाग्रे ब्राह्मणैस्ततः ॥२७॥ प्रद्युम्नश्च धिया साकमनिरुद्धः सुशीलया । स्थापितोऽनुक्रमेणैव नन्दया पुरुषोत्तमः ॥२८॥ अधोक्षजस्त्रयीयुक्तः क्षेमङ्कर्या नृकेसरी । अच्युतो विजयायुक्तः सुन्दर्या च जनार्दनः ॥२९॥ उपेन्द्रः सुभगायुक्तो हरिः सह हिरण्यया । कृष्णः सुलक्षणायुक्तो द्वादश स्थापिता इति ॥३०॥ स्थापयित्वाथ नन्दादीन् पार्षदानष्टदिक्षु ते । पूजामकारयन्विप्रा मन्त्रैर्वैदिकतान्त्रिकैः ॥३१॥ तत्रादौ हृदये दध्यौ स्वामी योगेश्वरं प्रभुम् । वामपार्श्वस्थया लक्ष्म्या सह पङ्कजहस्तया ॥३२॥ पद्मासनसमासीनं किञ्चिन्मीलितलोचनम् । घ्राणाग्रदत्तदृष्टिं च श्वेतपद्मोपरि स्थितम् ॥३३॥ मेघश्यामं चतुर्बाहुं कौस्तुभेन विराजितम् । नानाभरणशोभाढ्यं किरीटविलसन्मुखम् ॥३४॥ अङ्के कृत्वा वामदक्षावुत्तानौ च भुजौ स्थितम् । तत्करद्वयपार्श्वस्थे दध्यौ पद्ममहागदे ॥३५॥ ऊर्ध्वे करद्वये तस्य पाञ्चजन्यसुदर्शने । ध्यात्वा तस्मिन्वासुदेवे चकार स्वं मनः स्थिरम् ॥३६॥ उपचारैः षोडशभिस्तत आवाहनादिभिः । नीलकण्ठोऽर्चयामास स्वप्रेष्ठं तमनन्यधीः ॥३७॥ पञ्चामृतेन संस्नाप्य लघुपूजां विधाय च । महाभिषेकविधिना स्नपयामास तं पुनः ॥३८॥ सुगन्धिना कैसरेण चन्दनेन सिताक्षतैः । सुगन्धिभिर्बहुविधैः पुष्पैरानर्च तं ततः ॥३९॥ धूपं दत्त्वा दशाङ्गं च तस्मै दीपान्निवेद्य च । अर्पयामास नैवेद्यं चतुरैः पाचकैः कृतम् ॥४०॥ मोदकान् गुडकांश्चैव चूर्णानि घृतपूरकान् । सोहालिकाश्च कंसारं सक्तून्सेवाश्च मण्डकान् ॥४१॥ वटकान् पायसं दुग्धकूरं दध्योदनं तथा । पिण्डकान् पूरिकाश्चैव शतच्छिद्रांश्च लड्डुकान् ॥४२॥ तिलपिष्टं कर्णवेष्टं शालिपिष्टं सशर्करम् । रम्भाफलं च सघृतं मुद्गचूर्णं गुडौदनम् ॥४३॥ भक्ष्यभोज्यानि चान्यानि समर्प्य च जलं शुचि । ददौ ताम्बूलपूगादि फलानि विविधानि च ॥४४॥

---

તે જ પ્રકારે આભ્યન્તર બાર પત્રોમાં પણ કૃષ્ણ પક્ષની એકાદશીઓના અધિષ્ઠાતા દેવોની પત્નીઓ સહિત સ્થાપના કરી. (૨૬) બ્રાહ્મણોએ પ્રથમ પત્રમાં સુનન્દાની સાથે સંકર્ષણ સ્થાપ્યા પછી આગળ વાસુદેવ હરિણી સાથે સ્થાપ્યા. (૨૭) પ્રદ્યુમ્ન ધીની સાથે, અનિરુદ્ધ સુશીલાની સાથે, પુરુષોત્તમ નંદા સાથે, અનુક્રમથી સ્થાપ્યા. (૨૮) અધોક્ષજ ત્રયી સાથે, નૃસિંહ ક્ષેમંકરી સાથે, અચ્યુત વિજયા સાથે, જનાર્દન સુંદરી સાથે સ્થાપ્યા. (૨૯) ઉપેન્દ્ર સુભગા સાથે, હરિ હરિણી સાથે, કૃષ્ણ સુલક્ષણા સાથે, સ્થાપના કરી. આ પ્રમાણે બાર અંગદેવો સ્થાપ્યા. (૩૦) પછી બ્રાહ્મણો આઠ દિશાઓમાં નંદાદિ પાર્ષદોને સ્થાપીને વૈદિક અને તાંત્રિક મંત્રોથી શ્રીહરિને યોગેશ્વરનું પૂજન કરાવતા હતા. (૩૧) સ્વામી શ્રીનારાયણ મુનિ પ્રથમ ડાબે પડખે રહેલાં જેમના હાથમાં કમળ છે એવાં લક્ષ્મીએ સહિત યોગેશ્વર પ્રભુને પોતાના હૃદયમાં ધ્યાન કરતા હતા. (૩૨) પદ્માસનથી બેઠેલા લગારેક ઉઘાડેલાં છે નેત્રો જેમનાં એવા નાસિકાના અગ્ર ભાગમાં મૂકી છે દૃષ્ટિ જેણે એવા, શ્વેત કમળ ઉપર બેઠેલા; (૩૩) નવીન મેઘની માફક નીલ વર્ણવાળા ચતુર્ભુજ, કૌસ્તુભમણિથી શોભાયમાન અનેક પ્રકારનાં આભૂષણોથી સમલંકૃત મુગટથી પ્રકાશિત મુખવાળા; (૩૪) ડાબો અને જમણો બંને હાથ પોતાના ખોળામાં છતા કરી એકબીજા ઉપર સ્થાપીને ધ્યાનમુદ્રાથી બેઠેલા તે બંને હાથના પડખામાં પદ્મ અને ગદારૂપ દિવ્ય આયુધને અને ઉપલા બંને હાથોમાં શંખ અને ચક્રને ધ્યાન કરતા કરતા વાસુદેવ યોગેશ્વરમાં પોતાનું મન સ્થિર કરતા હતા. (૩૫-૩૬) પછી નારાયણ મુનિ એકાગ્ર મનથી આવાહનાદિ ષોડશોપચારોથી પોતાના ઈષ્ટ શ્રીયોગેશ્વરને પૂજતા હતા. (૩૭) શ્રીહરિ પંચામૃતથી સ્નાન કરાવી લઘુ પૂજા કરી ફરીથી મહાઅભિષેક વિધિથી સ્નાન કરાવતા હતા. (૩૮) પછી સુગંધીમાન કેસરયુક્ત ચંદન, અક્ષત, સુગંધીમાન પુષ્પોથી શ્રીયોગેશ્વરનું પૂજન કરતા હતા. (૩૯) દશાંગ ધૂપ યોગેશ્વરને આપી અને દીવાઓ પ્રગટાવીને ચતુર રસોયાઓએ સ્વચ્છપણે કરાયેલાં નૈવેદ્યો અર્પણ કરતા હતા. (૪૦) તળેલા લાડુ, લાકડશી લાડુ, બળ્યા લાડુ, ઘેબર, માંડા, સુંહાળિયો, કંસાર, સેવો, દળના લાડુ, વડાં, દૂધપાક, દૂધભાત, દહીંભાત, પેંડા, પુરીઓ, ખાજાં, માલપુવા, ગોળના લાડુ, તલ સાંકળી, જલેબી, હરિસો, ઘી-સાકરે સહિત કેળાં, મગદળ, બીરંજ વગેરે અને બીજા પણ ભક્ષ્ય ભોજ્યાદિ અર્પણ કરીને પવિત્ર જળ સમર્પણ કરી સોપારીએ સહિત તામ્બુલ અને નાના પ્રકારનાં ફળો નાળિયેર વગેરે આપતા હતા. (૪૧ થી ૪૪)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**चकार घनसारेण महानीराजनं ततः । गीतवाद्यनिनादोऽभूज्जयशब्दयुतस्तदा ॥४५॥ तदा सुरगणाः सर्वे वादयन्तः स्वदुन्दुभीन्। ववृषुः पुष्पवर्षाणि जगुर्गन्धर्वकिन्नराः ॥४६॥ नीराजनं विधायाथ ददौ पुष्पाञ्जलिं हरिः । नमस्कृत्य च सम्प्रार्थ्य विष्णुं पूजामपूरयत् ॥४७॥ पूजयामास च ततो धर्मदेवं यथाविधि । युक्तं स्वपरिवारेण तण्डुलाष्टदलाम्बुजे ॥४८॥ दश दानानि विप्रेभ्यो व्रताङ्गत्वाद्ददौ ततः। माध्याह्निकं विधायादाद्भक्तेभ्यो निजदर्शनम् ॥४९॥ प्रवर्तयन् धर्मविधिं धरायां स्वयं यथाशास्त्रमिहाचरंस्तम् । आनन्दयामास स धर्मसंस्थान् भक्तव्रजान् भूमिप ! धर्मसंस्थः ॥५०॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे प्रबोधन्युत्सवे नारायणमुनिकृतैकादशीव्रतविधिनिरूपणनामा षट्त्रिंशोऽध्यायः ॥३६॥

सुव्रत उवाच - **एकादश्यां दिने प्रातर्जया साऽथ यथाविधि । प्रातः स्नानादिकं कृत्वा चक्रे भगवदर्चनम् ॥१॥ सौवर्णं पूजयामास लक्ष्मीयोगेश्वरं तु सा । तथैव भक्तिधर्मं च सर्वतोभद्रमण्डले ॥२॥ पञ्चामृतैश्चन्दनेन पुष्पैः सुरभिभिस्तथा । धूपदीपोपहारैश्च फलैर्नानाविधैरपि ॥३॥ पूजयित्वाऽकरोत्प्रेम्णा महानीराजनं ततः। मन्त्रपुष्पाञ्जलिं दत्त्वा प्रणनाम कृताञ्जलिः ॥४॥ ततो भगवतः प्रीत्यै महादानानि साऽकरोत् । धेनूर्दशविधाः प्रादान्मेरून्दशविधांस्तथा ॥५॥ तत्र गोमयलिप्तायां दर्भानास्तीर्य सा भुवि । उदक्पादाः प्राङ्मुखीश्च कल्पयामास गा दश ॥६॥ गुडधेनुं गुडेनैव चतुर्भारमितेन सा । कारयामास तद्वत्सं भारेणैकेन शोभनम् ॥७॥ अनर्घ्यैर्वसनैः सूक्ष्मैर्वेष्टयित्वा च तावुभौ । शोभयामास विविधै रत्नैश्च मणिभिश्च तौ ॥८॥**

ત્યારબાદ કપૂરથી મહાનીરાજન કરતા હતા તે સમયે 'જય' શબ્દની સાથે ગીત વાજિંત્રોનો ધ્વનિ થતો હતો. (૪૫) શ્રી નારાયણમુનિ આરતી કરી પછી પુષ્પાંજલિ આપતા હતા. યોગેશ્વરને નમસ્કાર અને સંપ્રાર્થના કરી પૂજા સંપૂર્ણ કરતા હતા. (૪૬-૪૭) પછી શ્રીહરિ તામ્બુલના આઠ પત્રના કમળમાં ભક્તિ, શ્રદ્ધા, શુભાદિ પોતાના પરિવારે સહિત ધર્મદેવનું (પોતાના પિતાનું) વિધિ પ્રમાણે પૂજન કરતા હતા. (૪૮) પછી શ્રીહરિ વ્રતના અંગભૂત દશ દાનો બ્રાહ્મણોને આપતા હતા. (ગાય, પૃથ્વી, તલ, હિરણ્ય, ઘી, વસ્ત્ર, ધાન્ય, ગોળ, રૂપું, લવણ આ દશ દાનો છે.) પછી માધ્યાહ્નિક નિત્યકર્મ કરી ભક્તોને પોતાનાં દર્શન આપતા હતા. (૪૯)

હે રાજન્ ! ધર્મનિષ્ઠ શ્રીહરિ આ ભારતભૂમિમાં ધર્મનાં વિધિને પ્રવર્તાવવા માટે શાસ્ત્ર પ્રમાણે આચરણ કરતા કરતા ભક્ત સમૂહોને આનંદ આપતા હતા. (૫૦)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીયપ્રકરણે પ્રબોધન્યુત્સવે નારાયણમુનિકૃતૈકાદશી વ્રતવિધિનિરૂપણ નામા ષટ્‌ત્રિંશોઽધ્યાયઃ (૩૬)*

## અધ્યાય : ૩૭

## શ્રીહરિની પ્રસન્નતા માટે જયાએ કરેલો ગુડધેનુ આદિ મહાદાનનો વિધિ કહ્યો છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! જયા પ્રબોધિની એકાદશીને દિવસે પ્રાતઃકાલે સ્નાનાદિ કરી શ્રી યોગેશ્વરનું પૂજન કરતાં હતાં. (૧) જયા સર્વતોભદ્રમંડલમાં સુવર્ણ નિર્મિત લક્ષ્મી-યોગેશ્વર તથા ભક્તિ -ધર્મને પૂજતાં હતાં. (૨) પંચામૃત, ચંદન, તથા સુગંધીમાન પુષ્પો, ધૂપ, દીપ, ઉપહારો અને ફળોથી પણ પૂજન કર્યું. (૩) યથાવિધિ પૂજા કરી પછી પ્રેમથી મહા નીરાજન કરતાં હતાં, પછી મંત્ર-પુષ્પાંજલિ અર્પણ કરી બન્ને હાથ જોડી પ્રણામ કરતાં હતાં. (૪) પછી જયા નારાયણ મુનિની પ્રીતિ માટે મહાદાનો કરતાં હતાં. દશ પ્રકારની ગાયો તથા દશ પ્રકારના મેરુઓ આપતાં હતાં. (૫) જયાએ બે પ્રકારનાં મહાદાનોમાં ગાયના છાણથી લીંપેલી ભૂમિમાં દર્ભો પાથરીને ઉત્તર દિશામાં પગવાળી અને પૂર્વ દિશા તરફ મુખવાળી દશ ગાયોની કલ્પના કરી. (૬) જયા સો શેર ગોળથી ગોળની ગાય કરાવી અને પચ્ચીસ શેર ગોળથી સુન્દર વાછરડો કરાવતાં હતાં. (૭) ગાય અને વાછરડો બહુમૂલ્ય સૂક્ષ્મ વસ્ત્રોથી વીંટીને (ઓઢાડીને) નાના પ્રકારનાં રત્નો અને મણિઓથી ગાય અને વાછરડાને અલંકૃત કરતાં હતાં. (૮)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

शुक्तिकर्णाविक्षुपादौ शुचिमुक्ताफलेक्षणौ । ताम्रपृष्ठौ क्षौमपुच्छौ सितकम्बलकम्बलौ ॥९॥ स्वर्णशृङ्गौ रूप्यखुरौ विद्रुमभ्रुकुटीयुतौ । नानाभरणशोभाढ्यौ कांस्यदोहनसंयुतौ ॥१०॥ एवं विधाय गोवत्सौ पूजयामास सादरम् । तथाविधाश्चकारान्या घृतधेनुमुखाश्च गाः ॥११॥ घृतधेनुं क्षीरधेनुं शर्कराधेनुमुत्तमाम् । तिलधेनुं मधुधेनुं रसधेनुं च साऽकरोत् ॥१२॥ दधिधेनुं चाम्बुधेनुं स्वर्णधेनुं तथान्तिमाम् । यथावत्कल्पयामास शास्त्रोक्तविधिना जया ॥१३॥ चतुर्भारमितेनैव घृतेन परिपूरितान् । कुम्भानस्थापयत्तत्र घृतधेनुविधौ तु सा ॥१४॥ भारेणैकेन वत्सं च विधिमन्यं तु पूर्ववत् । चकार सा बुद्धिमती दुष्करं भूमिपैरपि ॥१५॥ द्रवद्रव्यस्य कुम्भाश्च तिलादीनां तु राशयः । स्थापितास्तत्र सर्वत्र तुरीयांशेन वत्सकाः ॥१६॥ चतुःपलसुवर्णेन स्वर्णधेनुं चकार च । वस्त्रैर्विभूषणैस्ताश्च साऽलञ्चक्रेऽखिला अपि ॥१७॥ सम्पूज्य ताश्च विप्रेभ्यः पूजितेभ्यो दशापि गाः । तदा ददौ जया भक्त्या भगवत्प्रीतये नृप ! ॥१८॥ मेरुसंज्ञान्पर्वतांश्च ततः साऽकल्पयद्दश । वृक्षैः सरोवरैर्युक्तान्नानावस्त्रैर्विराजितान् ॥१९॥ प्रथमो धान्यशैलश्च द्वितीयो लवणाचलः । गुडशैलस्तृतीयश्च चतुर्थो हेमपर्वतः ॥२०॥ पञ्चमस्तिलशैलश्च षष्ठः कार्पासपर्वतः । सप्तमो घृतशैलश्च रत्नशैलस्तथाष्टमः ॥२१॥ रूप्यशैलश्च नवमो दशमः शर्कराचलः । यथाविधि दशैवैते पर्वताः स्थापितास्तया ॥२२॥ मण्डपं कारयामास वासुदेवाङ्गणे शुभम् । तत्र गोमयलिप्तायां भुव्यास्तारीत्कुशानृजून् ॥२३॥ मध्ये व्रीहिमयस्तत्र सहस्रद्रोणसम्मितः ॥ मेरुः कृतोऽथ तत्पूर्वे मुक्तावज्राण्यतिष्ठिपत् ॥२४॥ गोमेदपुष्परागांश्च दक्षिणेऽस्थापयन्मणीन् । तथा नीलान्मरकतान्पश्चिमे सा न्यधारयत् ॥२५॥ वैदूर्यलोहितमणीनुत्तरे मेरुतस्तथा । संस्थाप्य विद्रुमलता अभितस्तं बबन्ध ह ॥२६॥

---

ગાય અને વત્સના કર્ણોને શુક્તિ - (છીપોલી)થી, ચરણને શેરડીના દંડથી, નેત્રને શુદ્ધ મોતીથી, પૃષ્ઠ ભાગને તાંબાથી, પૂંછડાને રેશમી કે શણના વસ્ત્રથી, ગળાની ગોદડીને શ્વેત કામળાથી, શીંગડાને સુવર્ણથી, ખરીઓને ચાંદીથી અને ભ્રકુટીને પ્રવાળાંથી બનાવીને અનેક પ્રકારનાં અલંકારો વડે અલંકૃત કર્યા. (૯) અને કાંસાનું દોહન કરવાનું પાત્ર જયાએ કરાવ્યું. (૧૦) આ પ્રકારે ગાય અને વાછરડાને કરી આદરપૂર્વક પૂજતાં હતાં. બીજી ઘૃતધેનુ વગેરે ગાયો, તેવા પ્રકારે કરતાં હતાં. (૧૧) ઘૃતધેનુ, ક્ષીરધેનુ, ઉત્તમ સાકરધેનુ, તિલધેનુ, મધુધેનુ અને રસધેનુ જયા કરતાં હતાં. (૧૨) દધિધેનુ, જલધેનુ તથા છેલ્લી સુવર્ણધેનુ જયા શાસ્ત્રવિધિ પ્રમાણે યથાર્થ કલ્પના કરતાં હતાં. (૧૩) સર્વ ધેનુઓમાં ઘૃતાદિ દ્રવિત પદાર્થોના ઘડા સ્થાપ્યા, તિલ, ગુડ (ગોળ) અને સાકરોના ઢગલા સ્થાપ્યા. ચોથા અંશથી વત્સો સ્થાપ્યા. જયા ચાર પલ સુવર્ણથી સુવર્ણધેનુ અને એક પલ સુવર્ણથી વત્સ કરતાં હતાં. (ચોસઠ માસાથી એક પલ થાય છે.) સમગ્ર ગાયોને પણ વસ્ત્રો અને અલંકારોથી અલંકૃત કરતાં હતાં. (૧૪-૧૫-૧૬-૧૭) હે નૃપ ! જયા દશ પ્રકારની ગાયો પૂજીને તે સમયે જ યથાવિધિ પૂજા કરાયેલા બ્રાહ્મણોને શ્રીકૃષ્ણ ભગવાનની પ્રસન્નતા માટે પ્રેમથી આપતાં હતાં. (૧૮) પછી જયા વૃક્ષો અને સરોવરોએ યુક્ત અને નાના પ્રકારનાં વસ્ત્રોથી અત્યન્ત શોભતા મેરુ સંજ્ઞાવાળા દસ પ્રકારના પર્વતો કલ્પતાં હતાં. (૧૯) પ્રથમ ડાંગરનો પર્વત, બીજો મીઠાનો પર્વત, ત્રીજો ગોળનો પર્વત, ચોથો સુવર્ણનો પર્વત; (૨૦) પાંચમો તલનો પર્વત, છઠ્ઠો કપાસનો પર્વત, સાતમો ઘૃતનો પર્વત, આઠમો રત્નનો પર્વત; (૨૧) નવમો રૂપાનો પર્વત, દસમો સાકરનો પર્વત, આ દસ પર્વતો જયાએ વિધિ પ્રમાણે સ્થાપ્યા. (૨૨) શ્રી વાસુદેવ ભગવાનના મંદિરના અગ્રભાગમાં શોભાયમાન મંડપ કરાવતાં હતાં; તે મંડપમાં ગાયના છાણથી લીંપેલી પૃથ્વીમાં કોમળ દર્ભોને પથરાવતાં હતાં. (૨૩) દર્ભથી પાથરેલી ભૂમિમાં બત્રીસ શેરનો એક દ્રોણ કહેવાય છે એવા હજાર દ્રોણના પરિમાણવાળો ડાંગરનો મેરુ કર્યો; પછી તે ડાંગરના મેરુની પૂર્વ દિશામાં મોતીઓ અને હીરાઓ સ્થાપન કરતાં હતાં. (૨૪) જયા દક્ષિણ દિશા તરફ ગોમેદ અને પીળા વર્ણવાળા મણીઓ સ્થાપતાં હતાં તથા પશ્ચિમ દિશા તરફ નીલ મણિઓ અને શ્યામ મણિઓને મૂકતાં હતાં. (૨૫) તથા મેરુથી ઉત્તર દિશામાં તથા મેરુના ઉત્તર ભાગમાં વૈદૂર્ય અને લાલ મણિઓની સ્થાપના કરી : એ રીતે સ્થાપના કરીને પ્રવાલ લતાઓ સરત્ન મેરુ પર્વતની ચોતરફ વીંટીને બાંધતાં હતાં. (૨૬)

इक्षुवंशैर्गुहाश्चक्रे शिलास्तस्य च शुक्तिभिः । सा चकार घृतेनैव बहुप्रस्रवणान्यपि ॥२७॥ पूर्वे शुक्लाम्बरचयैर्मेघपङ्क्तिं तथाकरोत् । दक्षिणे पीतवस्त्रैश्च कर्बुरैस्तस्य पश्चिमे ॥२८॥ उत्तरे रक्तवस्त्रैश्च मेघपङ्क्तिं विधाय सा । चक्रे शृङ्गाणि चत्वारि रौप्याणि कटकानि च ॥२९॥ मेरोर्मूर्ध्नि ब्रह्मविष्णुरुद्रार्कांश्च हिरण्मयान् । देवानन्यान्मुनींश्चापि हैमांश्चक्रे स्वशक्तितः ॥३०॥ इन्द्रादीनष्टदिक्पालान् कृत्वा सा राजतान् शुभान् । फलैः पुष्पैश्चन्दनैश्च शोभयामास तं गिरिम् ॥३१॥ तस्योपरि च सौवर्णान् वृक्षांस्त्रीनप्यतिष्ठिपत् । मन्दारं पारिजातं च तृतीयं कल्पपादपम् ॥३२॥ लसन्मुक्तापुष्पहारं वितानं पञ्चवर्णकम् । अबन्धयत्तादृशाद्रेरुपरि क्षितिपात्मजा ॥३३॥ मेरुमेवंविधं कृत्वा तत्तुरीयांशसम्मितान् । साऽवष्टम्भनगांश्चक्रे चतुरस्तच्चतुर्दिशम् ॥३४॥ मन्दराद्रिं यवैः पूर्वे सा चकार फलादिभिः । नानावस्त्रैश्च पुष्पैस्तं शोभमानं च चन्दनैः ॥३५॥ तस्योपरि द्रुमौ द्वौ च हैमौ भद्रकदम्बकौ । वनं रौप्यमयं चापि चक्रे चैत्ररथाभिधम् ॥३६॥ तस्मिंश्च काञ्चनमयं काममस्थापयज्जया । क्षीरोदं चारुणोदाख्यं सरो रौप्यमयं तथा ॥३७॥ चकार दक्षिणे मेरोस्ततः सा गन्धमादनम् । गोधूमैः पर्वतं नानावस्त्रादिभिरलङ्कृतम् ॥३८॥ हेमजम्बूं च तन्मूर्ध्नि तथा रूप्यमयं वनम् । गान्धर्वाख्यं तत्र चासौ रौप्यं यक्षपतिं न्यधात् ॥३९॥ घृतोदं मानसाख्यं च सरो रूप्यमयं तथा । कृत्वा तमद्रिं विविधैर्वस्त्रैः पुष्पैरशोभयत् ॥४०॥ सुमेरोः पश्चिमे साऽथ तिलैर्विपुलपर्वतम् । कृत्वा नानाविधैर्वस्त्रैः शोभयामास तं फलैः ॥४१॥ तस्योपरि च सौवर्णं न्यधाद्धंसं च पिप्पलम् । रौप्यं वैभ्राजाख्यवनं दधिशुद्धोदकं सरः ॥४२॥ मेरोः सौम्ये सुपार्श्वाद्रिं कृत्वा माषमयं ततः । तस्योपरि वटं हैमं हैमीं कामदुघां न्यधात् ॥४३॥ सावित्राख्यं वनं रौप्यं मधुभद्रसरस्तथा । कृत्वा तमद्रिं वस्त्राद्यैर्विविधैः

પછી જયાએ તે મેરુગિરિની ગુહાઓ શેલડીના દંડો અને વાંસના દંડોથી અને પથ્થરોના ખંડો છીંપોલીઓથી કરીને અનેક નિઝરણાં પણ ઘીથી જ કર્યાં. (૨૭) વળી આ મેરુ પર્વતના પૂર્વ ભાગમાં શ્વેત વસ્ત્રો વડે તથા દક્ષિણ ભાગમાં પીળાં વસ્ત્રોથી મેઘની પંક્તિ કરતાં હતાં, તેની પશ્ચિમ દિશામાં કર્બુર વસ્ત્રોથી મેઘપંક્તિ કરતાં હતાં. (૨૮) જયા ઉત્તર દિશા તરફ લાલ વસ્ત્રોથી મેઘની પંકિત કરી ચાર શિખરો ચાંદીનાં કરતાં હતાં. મેરુની તળેટીની ભૂમિ ચાંદીની કરતાં હતાં. (૨૯) મેરુના મસ્તકમાં બ્રહ્મા, વિષ્ણુ, રુદ્ર અને સૂર્યને સુવર્ણમય કરતાં હતાં. બીજા દેવો અને મુનિઓને પણ પોતાની શક્તિ પ્રમાણે સુવર્ણનાં કરતાં હતાં. (૩૦) જયા ઈન્દ્રિાદિ શુભ દિગ્પાલોને રજતમય કરી ફળ, પુષ્પો અને ચંદનથી મેરુ પર્વતને શોભાવતાં હતાં. (૩૧) મેરુના ઊંચા ભાગમાં મંદાર પારિજાત અને કલ્પવૃક્ષ આ ત્રણ વૃક્ષો સુવર્ણમય સ્થાપના કરતાં હતાં. (૩૨) અભય રાજાની દીકરી જયાએ મોતીઓ અને પુષ્પોના હારોથી શોભાયમાન પાંચ વર્ણોનાં વસ્ત્રોવાળો ઉલ્લોચ બંધાવ્યો. (૩૩) એ રીતે મેરુ પર્વત કરી તેના ચોથા ભાગના પરિમાણ (અઢીસો દ્રોણ પરિમાણ)વાળા ચાર મંદરાદિ પર્વતો જવ ધાન્યથી પૂર્વ દિશાના અનુક્રમથી કરાવ્યા. (૩૪) તેમાં મેરુના પૂર્વ ભાગમાં જવથી મંદરાચલ કરી નાના પ્રકારનાં વસ્ત્રો, પુષ્પો, ચંદન, ફળ વગેરેથી મંદરાદ્રિ શોભાયમાન કર્યો. (૩૫) મંદરાદ્રિની ઉપર મંગલ સ્વરૂપ બે કદમ્બનાં વૃક્ષો સુવર્ણમય કર્યાં અને ચૈત્રરથ નામનું વન રૂપામય કર્યું. (૩૬) જયાએ મંદરાચલ ઉપર સુવર્ણમય પ્રદ્યુમ્નરૂપ કામદેવની સ્થાપના કરી તથા ક્ષીરોદ તથા અરુણોદ નામનાં સરોવર રજતથી કરાવ્યાં. (૩૭) પછી જયાએ મેરુ પર્વતની દક્ષિણ દિશામાં નાના પ્રકારનાં વસ્ત્રો વગેરેથી શોભાયમાન ગોધૂમ (ઘઉં)થી ગન્ધમાદન પર્વત કરાવીને, તેને વિવિધ પ્રકારનાં વસ્ત્ર અને પુષ્પો વગેરેથી સમલંકૃત કરીને, તેના મસ્તક પ્રદેશમાં સુવર્ણમય જાંબુડાંના વૃક્ષની સ્થાપના કરી તથા ગંધર્વ નામનું વન રૂપામય સ્થાપન કર્યું તથા માનસ નામનું અને ઘૃતોદ નામનું સરોવર રજતમય રચાવીને, તે ગંધમાદન પર્વતમાં રજતમય યક્ષપતિ કુબેરની સ્થાપના કરી. (૩૮-૩૯-૪૦) તે જયાએ પશ્ચિમ દિશાના ભાગમાં તલોથી વિપુલ નામનો પર્વત કરીને નાના પ્રકારનાં વસ્ત્રો અને ફળોથી સમલંકૃત કર્યો. (૪૧) તે વિપુલ પર્વતની ઉપર હંસ પક્ષી અને પીપળાનું વૃક્ષ સુવર્ણમય કર્યું; વૈભ્રાજ નામનું વન રજતમય કર્યું અને દધિ સરોવર અને શુદ્ધ જળનું સરોવર રજતનું કર્યું. (૪૨) પછી મેરુની ઉત્તર દિશાના ભાગમાં અડદના સમુદાયથી સુપાર્શ્વ નામનો પર્વત કરી તેની ઉપર સુવર્ણમય વડ અને સુવર્ણમય કામદુઘા ગાય કરી. (૪૩) સાવિત્ર નામનું વન તથા મધુભદ્ર નામનું રૂપાનું સરોવર કરી વિવિધ પ્રકારનાં



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

समशोभयत् ॥४४॥ रचयित्वेदृशं मेरुं विधिज्ञैः सा ततो द्विजैः । वाचयित्वा स्वस्त्ययनं ग्रहशान्तिं विधाय च ॥४५॥ आवाह्य पर्वतान् देवांस्तान्सम्पूज्य यथाविधि । पुपूज स्वगुरुं भक्त्या चन्दनांशुकभूषणैः ॥४६॥ मध्यमं पर्वतं तस्मै प्रददौ मेरुसंज्ञकम् । तद्दानसाङ्गतासिद्ध्यै गाश्चतुर्विंशतिं ददौ ॥४७॥ अवष्टम्भगिरीनन्यांश्चतुरश्च ततः परम् । ऋत्विग्भ्योऽदाच्चतुर्भ्यः सा भगवत्प्रीतये तदा ॥४८॥ एतेन विधिना दत्त्वा धान्यशैलं तु सा जया । लवणादिमुखानन्यान् गिरीन्व्यरचयन्नव ॥४९॥ लवणाद्रिं तत्र चक्रे द्रोणैः षोडशभिर्मितम् । विष्कम्भाद्रींश्च चतुरस्तच्चतुर्थांशसम्मितान् ॥५०॥ द्रुमान्सरांसि देवांस्तु यथापूर्वं चकार सा । विविधैर्वसनैः पुष्पैः फलाद्यैस्तमशोभयत् ॥५१॥ गुडाद्रिं दशभिर्भारैः सा चकार ततः शुभम् । सहस्रेण पलानां च विदधे हेमपर्वतम् ॥५२॥ ततश्च सा जया चक्रे हरिप्रीत्यै महामनाः । तिलाद्रिं दशभिर्द्रोणैः पूर्ववच्च यथाविधि ॥५३॥ कार्पासाद्रिं च विंशत्या भारैः परिमितं तथा । कुम्भैर्विंशतिसङ्ख्याकैर्घृताद्रिं च चकार सा ॥५४॥ मुक्ताफलसहस्रेण रत्नाचलमथाकरोत् । तत्पूर्वे मन्दराद्रिं तु गोमेदैर्हीरकैस्तथा ॥५५॥ इन्द्रनीलैः पुष्परागैर्दक्षिणे गन्धमादनम् । वैदूर्यैर्विद्रुमैश्चक्रे पश्चिमे विपुलाचलम् ॥५६॥ पद्मरागैः ससौवर्णैरुत्तरे च सुपार्श्वकम् । चकार शेषं तु विधिं सा पूर्ववदुदारधीः ॥५७॥ अयुतेन पलैश्चक्रे ततो रूप्याचलं च सा । प्राग्यद्यद्राजतं प्रोक्तं हैमं तत्तदिहाकरोत् ॥५८॥ ततो भारैः परिमितं साष्टभिः शर्कराचलम् । यथाविधि विधायैवं वस्त्राद्यैस्तमशोभयत् ॥५९॥ मध्यमाद्रिचतुर्थांशसम्मितांश्चतुरो गिरीन् । सर्वत्रैवाकरोच्चान्यद्विधानं धान्यशैलवत् ॥६०॥

---

વસ્ત્રોથી સમલંકૃત કર્યું. (૪૪)

જયાએ આ પ્રકારના મેરુ પર્વતને રચાવીને પછી વિધિજ્ઞ બ્રાહ્મણો પાસે સ્વસ્તિવાચન કરાવીને ગ્રહશાંતિ કરાવી પછી પર્વતો અને દેવોનું આવાહન કરી તે પર્વતો અને દેવોનું શાસ્ત્રવિધિથી પૂજન કરી ચંદન, વસ્ત્ર, અને અલંકારોથી ભક્તિપૂર્વક પોતાના ગુરુની પૂજા કરી. (૪૫-૪૬) મેરુ નામનો મધ્ય પર્વત પોતાના ગુરુને આપ્યો તથા દાનની અંગે સહિત સિદ્ધિ માટે ચોવીસ ગાયો આપી. (૪૭) પછી જયાએ તે સમયમાં બીજા (મેરુથી જુદા) ચાર ટેકાના પર્વતો મંદરાચળ વગેરે, ચાર ઋત્વિજો (બ્રહ્મા, હોતા, ઉદ્ગાતા, અધ્વર્યુ) ને શ્રીહરિની પ્રીતિ માટે આપ્યા. (૪૮) જયાએ પૂર્વે કહેલા વિધિથી વ્રીહિમય મેરુ પર્વત આપીને લવણાદ્રિ વગેરે બીજા નવ પર્વતોની રચના કરાવી. (૪૯) તે નવ ગિરિઓમાં લવણાદ્રિ સોળ દ્રોણના માપવાળો કરાવ્યો; ચાર ટેકારૂપ પર્વતો ચતુર્થાંશ પરિમિત ચાર દ્રોણના પ્રમાણવાળા કરાવ્યા. (૫૦) જયાએ વૃક્ષો, સરોવરો અને દેવો પૂર્વની માફક ધાન્ય પર્વતમાં હતાં તે પ્રમાણે કરાવ્યાં. (વૃક્ષો, દેવો, સુવર્ણમય; અને સરોવરો રૂપાનાં કરાવ્યાં) લવણાદ્રિને વિવિધ પ્રકારનાં વસ્ત્રો, પુષ્પો અને ફળો વગેરેથી સમલંકૃત કરાવ્યો. (૫૧) પછી જયાએ શુભ ગોળનો પર્વત દસભાર પરિમિત ગોળથી કરાવ્યો. અને હજાર પલોના માપવાળા સુવર્ણથી સુવર્ણ પર્વત કરાવ્યો. (૫૨) પછી ઉદાર મનવાળાં જયાએ શ્રીહરિની પ્રસન્નતા માટે તલનો પર્વત દશ દ્રોણોના પ્રમાણથી ધાન્ય પર્વતની માફક વિધિ પ્રમાણે કરાવ્યો. (૫૩) જયાએ કપાસનો પર્વત વીસ ભારના પરિમાણથી કરાવ્યો તથા વીસ ઘડાઓથી ઘૃતાદ્રિ કરાવ્યો. (એક ઘડો ચોસઠ શેર ઘીનો જાણવો.) (૫૪) પછી એક હજાર મોતીઓથી રત્નાચલ કરાવ્યો તથા તેમની પૂર્વ દિશાના ભાગમાં ગોમેદ અને હીરાઓથી મંદરાચલ કરાવ્યો. (૫૫) રત્નાચલની દક્ષિણ દિશા તરફ ઈન્દ્રનીલ મણિઓ અને પુષ્પરાગ મણિઓથી ગંધમાદન પર્વત કરાવ્યો. પશ્ચિમમાં વૈદૂર્ય અને વિદ્રુમ મણિઓથી વિપુલાચલ કરાવ્યો. (૫૬) મહાબુદ્ધિશાળી જયાએ ઉત્તરમાં સુવર્ણમય પદ્મરાગ મણિઓથી સુપાર્શ્વ પર્વત કરાવ્યો; બાકીનો વિધિ પૂર્વની માફક ધાન્ય પર્વતની માફક જ કરાવ્યો. (૫૭) પછી જયાએ દશ હજાર પલોથી રૂપ્યાચલ કરાવ્યો. પહેલા ધાન્ય પર્વતમાં જે જે રજતમય કહ્યું છે તે તે આ રૂપ્યાચલમાં સુવર્ણમય કરાવ્યું છે. (૫૮) પછી જયાએ આઠ ભાર પરિમાણ શર્કરાચલ કરાવ્યો; પહેલાં કહેલાં પ્રકારથી વિધિ પ્રમાણે શર્કરાચલ કરીને વસ્ત્ર-પુષ્પાદિથી શોભાવ્યો. (૫૯) લવણાચલાદિ નવ પ્રકારના પર્વતોમાં પણ ચાર અવષ્ટંભ (ટેકાવાળા) પર્વતો વચલા અદ્રિના પરિમાણથી ચોથા ભાગના પરિમાણથકી કરાવ્યા. બીજો વિધિ ધાન્ય પર્વતની માફક કરાવ્યો. (૬૦)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**वस्त्राद्यैः शोभितांस्तांश्च सर्वानपि च पर्वतान् । यथाविधि ब्राह्मणेभ्यो ददौ सा प्रीतये हरेः ॥६१॥ एवं स उत्तमो राजा प्रीत्यै भगवतो हरेः । तदाज्ञयैव जयया महादानान्यदीदपत् ॥६२॥ औदार्यमीदृशं तस्य विलोक्यैवाखिला नृपाः । देशान्तरीया लोकाश्च विस्मयं प्रतिपेदिरे ॥६३॥ रात्रौ सा च यथाशास्त्रं राधादामोदरं जया । एकादश्यधिपं भक्त्या पुपूज शुचिमानसा ॥६४॥ वृद्धा युवानः शिशवः पुमांसस्तस्मिन् दिने तु प्रभुतोषणार्थम् । चक्रुर्निराहारव्रतं च योषा राजन् ! यथावन्निशि जागरं च ॥६५॥** इति सत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे प्रबोधन्युत्सवे जयाकृतगुडधेन्वादिमहादानविधिनिरूपणनामा सप्तत्रिंशोऽध्यायः ॥३७॥

सुव्रत उवाच - **तस्मिन्दिने सोऽपि निरन्नमेव व्रतं चकार प्रभुरप्युदारः । मानुष्यलीलां विदधच्च धर्मं पातुं नरेशात्र कृतावतारः ॥१॥ रात्रौ सभायां निजमुच्चपीठमध्यास्य नारायणनामघोषम् । कृत्वा च शुश्राव वसिष्ठगीतं माहात्म्यमेकादशिकातिथेः सः ॥२॥ कुर्वंस्ततो जागरणं मुनींस्तान् जनांश्च गातुं भगवद्गुणान् सः । आज्ञापयामास च गीयमानान् शुश्राव तान्भक्तमनोभिरामान् ॥३॥ ततस्तृतीये प्रहरे निशाया गायत्सु भक्तेषु सतालिवाद्यम् । उत्तीर्य पीठाद्भगवाञ्जयाया द्रष्टुं समायात्स तु पाकशालाम् ॥४॥ विधाप्य पक्वान्नचयान्निषण्णाः क्षणं रमाद्याः स्त्रिय आशु तत्र । समागतं प्रेष्ठमवेक्ष्य दूरादुत्थाय नत्वा ददुरासनं च ॥५॥**

---

જયાએ વસ્ત્રાદિથી અલંકૃત કરેલા સર્વ પર્વતોને પણ શ્રીહરિની પ્રીતિ માટે બ્રાહ્મણોને વિધિ પ્રમાણે આપ્યા. (૬૧) આ પ્રકારે જયાને માથે જેમણે શુકલ પક્ષમાં આવતા મહોત્સવનો કાર્યભાર મૂકેલો છે એવા ઉત્તમ રાજાએ ભગવાન શ્રીહરિની પ્રસન્નતા માટે તેમની જ આજ્ઞાથી પોતાનાં મોટાં બહેન જયા પાસે પૂર્વોક્ત ગુડધેનુ વગેરે મહાદાનો અપાવ્યાં. (૬૨) ભગવાનની પ્રસન્નતા પરાયણ ઉત્તમ રાજાનું આ પ્રકારનું અતિશય ઔદાર્ય જોઈ સમગ્ર રાજાઓ અને બીજા દેશથી આવેલા જનો અતિશય આશ્ચર્ય પામ્યા. (૬૩) શુદ્ધ અંતઃકરણવાળાં જયા રાત્રિમાં પ્રબોધિની એકાદશીના અધિપતિ, રાધાએ સહિત દામોદર ભગવાનની ભક્તિપૂર્વક શાસ્ત્ર પ્રમાણે પૂજા કરતાં હતાં. (૬૪)

હે રાજન્ ! વૃદ્ધો, યુવાનો, બાળકો, પુરુષો અને તેવા પ્રકારની સ્ત્રીઓ પ્રબોધિનીને દિવસે શ્રીહરિની પ્રસન્નતા માટે નિરાહારવ્રત અને રાત્રિએ જાગરણ યથાર્થ કરતાં હતાં. (૬૫)

*ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીયપ્રકરણે પ્રબોધન્યુત્સવે જયાકૃતગુડધેન્વાદિ મહાદાન વિધિનિરૂપણ નામા સપ્તત્રિંશોઽધ્યાયઃ (૩૭)*

**અધ્યાય : ૩૮**

## એકાદશીનું જાગરણ કરતા શ્રીહરિએ રાંધનારી સ્ત્રીઓના પાકનું અવલોકન કર્યું તે કહેલું છે.

**સુવ્રત મુનિ બોલ્યા** : હે નરેશ ! ભાગવત ધર્મનું રક્ષણ કરવા માટે આ મનુષ્યલોકમાં અવતાર જેમણે ધર્યો છે એવા મનુષ્યલીલાઓ કરતા, વ્રતના આચરણમાં પ્રવીણ શ્રીહરિ પણ તે દિવસે વ્રત નિરાહાર જ કરતા હતા. (૧) શ્રીહરિ રાત્રિમાં સાયંકાલે નારાયણધૂન્ય કરી સભામાં પોતાના ઊંચા સિંહાસનમાં બેસી, પુરાણમાં વસિષ્ઠ મુનિએ કહેલું એકાદશી તિથિનું માહાત્મ્ય પોતાના પુરાણીના મુખથી સાંભળતા હતા. (૨) પછી શ્રીહરિ જાગરણ કરતા કરતા ભગવાનના ગુણો ગાવા માટે સભામાં બેઠેલા મુનિઓ અને હરિભક્તોને આજ્ઞા આપતા હતા. તેમજ ભક્તોનાં મનોને આનંદ આપનારા, મુનિઓએ ગવાયેલા ભગવદ્ ગુણોને સાંભળતા હતા. (૩) પછી રાત્રિના ત્રીજા પહોરમાં મુનિ આદિક ભક્તજનો તાળી વગાડવા પૂર્વક ગાયન કરતા હતા, તે સમયે ભગવાન શ્રીહરિ પોતાના સિંહાસનથી ઊતરીને જયાની પાકશાળામાં આવ્યા. (૪) પકવાનના પુંજો કરાવીને ક્ષણ વાર પાકશાળામાં બેઠેલા, રમાદિ સ્ત્રીઓ ત્યાં તત્કાલ આવેલા પોતાને અતિ પ્રિય શ્રીહરિને દૂરથી જોઈને તત્કાલ ઊઠીને પંચાંગ પ્રણામ કરી આસન આપતાં હતાં. (૫)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

तत्रोपविश्य प्रभुरैक्षताग्रे सच्छष्कुलीनां नगराजमेकम् । तत्पार्श्वयोः खाजकगण्डशैलान् स श्वेतवर्णांश्चतुराचितांश्च॥६॥ एतावता किं भविताऽत्र पूर्तिः पाकेन वान्यं विदधीमहीमम् । इत्थं तमूचे ललिता तदानीं कृत्यं तदीयं हृदि जानती वै ॥७॥ तदा स तामाह नरेशकन्ये ! नाहं मुनीँश्चेत्परिवेषयेय । प्राक्पङ्क्तिभाजां तु तदा कथञ्चित्पूर्येत पुण्येन तपस्विनीनाम् ॥८॥ मितस्मिता तं भगवन्तमूचे तदामला सापि वचोविदग्धा । जानासि किं द्वादशिकादिनीयमेतत्प्रभो ! पाञ्चदिनं हि विद्धि॥९॥ स्पर्शो न यावत्तु तपस्विनस्ते पक्वान्नराशेः किल तावदस्य । शङ्का भवत्येवमपूर्णताया जाने करस्पर्शफलं यतस्ते ॥१०॥ इत्थं तथोक्ते हरिमानतास्यं तं धूनयन्तं च शिरः सचिन्तम् । प्रदर्शयामास रमा द्वितीये गेहे तु पाकं किल जायमानम् ॥११॥ स तत्र गत्वाथ ददर्श योषा गङ्गां च रामां यमुनां च रेवाम् । ततश्च ताभिः क्रियमाणमीशः कृतं च पर्यैक्षत पाकमेव ॥१२॥ तुङ्गे चये मौक्तिकलड्डुकानामुत्फुल्लगोलायितपूरिकाणाम् । चये च तत्साम्यदृशिं तदीयो वर्णस्तु पीतश्च सितो न्यषेधीत् ॥१३॥ गोलान् घनीभूतघृतेन शुभ्रान् स लड्डुकानैक्षत चूर्णपूर्वान् । दशप्रभेदान्स्थिरकांश्च तत्र द्विःपीतसत्फाणितशुभ्रवर्णान् ॥१४॥ महान्तिकायां पृथुलं कटाहं निधाय दोर्भ्यां धृतहस्तकाभ्याम् । संहेलयन्त्यौ सममालुलोके संयावमीशो यमुनां च रामाम् ॥१५॥ प्रफुल्लिताः फुलवटीश्च नाथी सम्भृत्य पात्रे पृथलेऽत्र पूपान् । कर्तुं प्रसक्ता ददृशे च तेन मौना च भज्यानि विधाय फेणीम् ॥१६॥

---

પ્રભુ આસનમાં બેસીને પોતાની આગળ જલેબીનો એક પર્વતના સમાન ઢગલો જોતા હતા અને તેની બંને પડખે શ્વેત વર્ણવાળાં ચતુર સ્ત્રીએ ગોઠવણી કરેલાં ખાજાંના ગંડશૈલ સમાન ઢગલાઓ જોતા હતા. (૬) આ પાકશાલામાં તૈયાર કરેલાં આટલાં પકવાનોથી પરિપૂર્ણ થશે કે બીજો આ જલેબી વગેરેનો પાક કરીએ ? આ પ્રકારે શ્રીહરિએ કરેલાં પકવાનોને જોવાના સમયમાં શ્રીહરિએ કરાવેલા અન્નકોટના ઉત્સવમાં કરાવેલો બમણો પાક કરાવવા રૂપ ઔદાર્ય કાર્યને સારી રીતે જાણતાં લલિતાએ શ્રીહરિનો અભિપ્રાય જાણવા કહ્યું. (૭) હે રાજન્, લલિતાનાં વચન સાંભળવાના સમયમાં શ્રીહરિએ લલિતાને કહ્યું : હે નરેશકન્યે ! હું જો મુનિઓને પીરસું નહિ તો શ્રેષ્ઠ તપમાં નિષ્ઠાવાળી તમારા પુણ્યથી પ્રથમ પંક્તિમાં બેઠેલા મુનિઓને પરાણે આટલા પાકથી પૂર્ણતા થાય. (૮) હે રાજન્ ! તે સમયે શુદ્ધ મનવાળી ભાષણમાં ચતુર લલિતા પણ મંદ હાસ્ય યુક્ત અનંત ઐશ્વર્ય સંપન્ન શ્રીહરિને કહેવા લાગી : હે પ્રભો ! આ જલેબી વગેરે પકવાન્નને દ્વાદશીને દિવસે મુનિઓના ભોજન માટે પરિપૂર્ણ જાણો છો શું ? આ તો મુનિ વગેરેને પાંચ દિવસ સુધીનું છે એમ જાણો. (૯) હે હરે ! પકવાન્નરાશિને મહાતપોનિષ્ઠ તમારા કરનો સ્પર્શ જ્યાં સુધી થયો નથી ત્યાં સુધી તો તમોએ કહેલા પ્રકારથી આ પકવાન્નની પરિપૂર્ણતામાં શંકા છે. તમારો સ્પર્શ થયો એટલે શંકાનો અવકાશ નથી. (૧૦) હે રાજન્ ! આ પ્રકારે લલિતાએ કહ્યું ત્યારે લગારેક નીચે નમાવેલા મુખકમળવાળા ચિંતાએ સહિત પોતાનું મસ્તક લગારેક હલાવતા મનુષ્ય-નાટક શોભાડતા શ્રીહરિને, શ્રીહરિની ચિન્તાને નહિ સહન કરતી મહાતપસ્વિની ભક્તા રમા બીજા ગૃહમાં કરેલાં પકવાન્નને દેખાડતાં હતાં. (૧૧) શ્રીહરિ બીજા ગૃહમાં જઈને ગંગા, રામા, યમુના, રેવા અને બીજી સ્ત્રીઓને જોતા હતા પછી ગંગા વગેરે સ્ત્રીઓએ કરાતાં પાકો પણ ચોતરફ જોતા હતાં. (૧૨) ત્યાં સ્થાપન કરેલો મોતિયા લાડુનો અતિ ઊંચો પુંજ અને બરાબર ફુલેલી માટે જ ગોળાકાર રહેલી પુરીઓના મહાપુંજમાં સમાન આકારપણાથી થયેલા એકજાતિપણાના ભ્રમને (બન્નેય પુંજો લાડુઓના જ છે એવી ભ્રાન્તિને) તે બન્નેનો જે પીતવર્ણ અને શ્વેતવર્ણ તે જ નિવારણ કરનારો થયો. પુરીઓના શ્વતેવર્ણનું અને મોતિયા લાડુઓના પીતવર્ણનું જ્ઞાન થયા પછી આ પુરીઓ છે અને આ લાડુ છે એમ જાણવામાં આવ્યું. (૧૩) શ્રીહરિએ ચોતરફથી ગોળ-ઠરી ગયેલા ઘૃતથી ધોળા-ચૂરમાના લાડુઓ જોયા, અને દશ પ્રકારના-બે વાર ચાસણી પાવાથી ઉજ્જ્વળ વર્ણવાળા ઠોર રસોડામાં જોયા. (૧૪) મોટી ચૂલમાં વિશાલ કઢાયાંને બન્ને હાથોથી મૂકીને તેમાં નાખેલા શીરાને હાથમાં ધારણ કરેલા લાકડાના હાથાવાળા તવેથા (કડછા) વડે એકી સાથે હલાવતી યમુના અને રામાએ કરાતો શીરો શ્રીહરિએ જોયો. (૧૫) તે પછી નાથી નામની નારીએ કરેલી વિશાળ પાત્રમાં ભરેલી, ફૂલેલી ફૂલવડી અને તેણીએ કરાતા પુડલા જોયા અને મૌના નામવાળી સ્ત્રીએ કરેલાં ભજિયાં અને કરવા માંડેલી સુતરફેણી ભગવાને જોઈ. (૧૬)

अन्यत्र चापश्यदसौ मुनीशोऽमरीं कृतानेकविचित्रशाकाम् । प्रकुर्वतीं सद्वटकान् गुलालां विधाय सन्मण्डकपुञ्जमाशु ॥१७॥ दौहित्रकग्रन्थिकघुर्घुराणां पुञ्जान्तिके तावदुपेत्य तूर्णम् । स्थितां हसन्तीममृतामवेक्ष्य तत्कर्म तस्या इति स व्यजानात् ॥१८॥ समानयन्त्यौ निजदासिकाभिः पुनः पुनर्दुग्धघटाननेकान् । विधापयन्त्यौ परमान्नमाशु क्षितीशपत्न्यौ स ददर्श तत्र ॥१९॥ ददर्श सत्कान्दविकोपक्लृप्तान्सत्पर्पिकाखण्डकपिण्डकांश्च । रमासमीपे समुपाहरन्तीं पाञ्चालिकां चापि स तत्कनिष्ठाम् ॥२०॥ एवं स्त्रियोऽन्या अपि पाककर्मसक्ता निजप्रीणनमात्रकामाः । ददर्श लाडुं यतिनीं च जीवामुमाकुमारीकुशलासुखाद्याः ॥२१॥ गेहान्तरे चाथ ददर्श दैविः क्षत्राङ्गनाः पाकरताः स्वतुष्ट्यै । क्षेमामलामर्यदितीश्च फुल्लां स रत्नमालारतिदेविकाद्याः ॥२२॥ स्वदृष्टविप्राकृतपाकतुल्यं पाकं कृतं च क्रियमाणमाभिः । स्वप्रीणनार्थं बहुयत्नतोऽसौ ददर्श साश्चर्यमुदारकृत्यः ॥२३॥ स पाकदक्षाभिरुदारधीभिस्तपस्विनीभिः क्रियमाणमित्थम् । पाकं विलोक्य प्रशशंस नारीः सर्वा जयाज्ञावशगा जयां च ॥२४॥ यावांस्तु पाको ललितागृहेऽभूत्ततोऽप्ययं द्वित्रगुणोऽस्ति नूनम् । पदार्थसङ्ख्या त्विह तावतीति ज्ञात्वा स्वचित्ते स जहर्ष भूमा ॥२५॥ ततः समाज्ञाप्य स पाचिकास्ताः सदोदनं च क्वथिकां च सूपम् । प्रातर्विधातुं निजवासमायात्तावच्चुकूजुः कृकवाकवोऽपि ॥२६॥ जागरं सह निजैर्हरिरित्थं भूपते ! स तु विधाय विभाते । निम्नगाप्लवविधिं च विधिज्ञः कर्म नैत्यकमुपाचरदीशः ॥२७॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे प्रबोधन्युत्सवे भगवत्कृतपाकपाचिकादर्शन-निरूपणनामाष्टत्रिंशोऽध्यायः ॥३८॥

મુનિપતિ શ્રીહરિએ બીજા રસોડામાં હાથની ચંચલતાથી અનેક પ્રકારના પાક જેણીએ કર્યા છે એવી અમરી નામની સ્ત્રી જોઈ અને અતિ સુશોભિત માંડાનો સમુદાય તત્કાલ કરી સુંદર વડાં કરતી ગુલાલા નામની સ્ત્રી જોઈ. (૧૭) પછી ભગવાને દહીંથરાં, ગાંઠિયા, ઘૂઘરા આદિ ભક્ષ્યવિશેષોનો પુંજ જોયો તેની સમીપે તે સમયે આવીને ઉભી રહેલી મંદહાસ અને વિનયથી શોભાયમાન મુખવાળી અમૃતા નામની સ્ત્રીને જોઈને તેણીએ જ આ બધું કર્યું છે એમ પણ જાણ્યું. (૧૮) પોતાની દાસીઓ પાસે ઘણા દૂધના ભરેલા ઘડાઓને વારંવાર મંગાવતી દૂધપાક તત્કાલ કરાવતી કુમુદા અને જુહૂ નામની ઉત્તમ રાજાની પત્નીઓને શ્રીહરિએ જોઈ. (૧૯) શ્રેષ્ઠ કંદોઈયા બ્રાહ્મણોએ કરેલી સુંદર બરફી અને પેંડાઓને રમાની સમીપે લાવતી ઉત્તમ રાજાની બંને નાની બહેનો પાંચાલી અને નાનીને પણ શ્રીહરિએ જોઈ. (૨૦) આ પ્રકારે પાક-ક્રિયામાં આસક્તિવાળી પોતાને પ્રસન્ન કરવાની ઈચ્છાઓ જેમને છે એવી લાડુ, યતિની, જીવા, ઉમા, કુમારી, કુશલા, સુખા, વગેરે સ્ત્રીઓ અને બીજી પણ નારીઓને શ્રીહરિ જોતા હતા. (૨૧) પછી ધર્માત્મજ શ્રીહરિ બીજા રસોડામાં પોતાની પ્રસન્નતા માટે પાક-ક્રિયામાં આસક્ત ક્ષેમા, અમલા, અમરી, અદિતિ, ફૂલ્લા, રત્નમાલા, રતિ, દેવિકા વગેરે જેમાં છે એવી ક્ષત્રિય જાતિની સ્ત્રીઓને જોતા હતા. (૨૨) આ ક્ષત્રિય જાતિની સ્ત્રીઓએ પોતાની પ્રસન્નતા માટે બહુ પ્રયત્નથી કરવા માટે આરંભેલો, પ્રથમ પોતે જોયેલો જે બ્રાહ્મણ સ્ત્રીઓએ કરેલો પાક તેના સમાન પાકને ઉદાર કાર્યવાળા શ્રીહરિ આશ્ચર્યપૂર્વક જોતા હતા. (૨૩) શ્રીહરિ આ પ્રમાણે પાકક્રિયામાં ચતુર મહાબુદ્ધિશાળી, તપમાં સ્થિતિવાળી પણ બ્રાહ્મણ અને ક્ષત્રિય સ્ત્રીઓએ કરવા માંડેલા પાકને જોઈને જયાની આજ્ઞામાં વર્તનારી સર્વ સ્ત્રીઓ અને જયાની પ્રશંસા કરતા હતા. લલિતાના ગૃહમાં અન્નકોટના ઉત્સવમાં જેટલા પ્રમાણમાં પાક થયો હતો તેટલા પાકથી પણ જયાના ગૃહમાં થયેલો પાક બમણો અથવા ત્રણ ગણો થયો છે. આમાં પકવાન્ન વગેરે ભોજ્ય પદાર્થની સંખ્યા તો તેટલી જ (એકસો એક) છે : આ પ્રકારે પોતાના મનમાં જાણીને મહાઐશ્વર્યયુક્ત શ્રીહરિ પોતાના મનમાં પ્રસન્ન થયા. (૨૪-૨૫) પછી શ્રીહરિ સુંદર સુગંધીમાન ભાત, કઢી અને દાળ પ્રાતઃકાલે કરવા માટે પાક કરનારી સ્ત્રીઓને આજ્ઞા કરાવીને પોતાના નિવાસ ભવનમાં આવ્યા તેટલામાં તો કૂકડાઓ પણ અવ્યક્ત મધુર વાણી બોલવા લાગ્યા. (૨૬)

હે ભૂપતે ! આ પ્રમાણે કીર્તનો વગેરેથી સર્વેને જાગરણ કરાવનાર શ્રીહરિ પોતાના ભક્તોની સાથે જાગરણ કરીને, પ્રભાતમાં વિધિ જાણનાર શ્રીહરિ ઉન્મત્ત ગંગાના સ્વચ્છ જળમાં સ્નાનવિધિ અને સંધ્યાવન્દનાદિ ક્રિયાને આચરતા હતા. (૨૭)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે પ્રબોધન્યુત્સવે ભગવત્કૃતપાકપાચિકાદર્શનનિરૂપણ નામાષ્ટત્રિંશોઽધ્યાયઃ (૩૮)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच – प्रातःकृत्यं विधायाशु भगवान् द्वादशीदिने । न्यषीदत्पीठमारुह्य वेद्यां निम्बतरोरधः ॥१॥ देशान्तरीयाश्च जनाः कृत्वा नित्यविधिं द्रुतम् । मुनिभिः सह तत्रैत्य निषेदुश्च व्यवस्थया ॥२॥ योगेश्वरस्य कृत्वा च जयाऽप्युत्तरपूजनम् । चकार तन्मूर्तिदानं गोदानादि च सादरम् ॥३॥ वर्णिराट् तावदभ्येत्य दीर्घपाण्डुजटाधरः । पाकसिद्धिरभूत्स्वामिन्नित्युवाच महाप्रभुम् ॥४॥ तदाज्ञप्ता भगवता सर्वेऽपि मुनयो नृप ! । अतिहर्षान्वितास्तूर्णं भोक्तुमायंश्च यूथशः ॥५॥ पञ्चार्द्राः साम्बुपात्राश्च तत्र पङ्क्तिषु सर्वशः । मर्यादया निषेदुस्ते हर्यास्यार्पितदृष्टयः ॥६॥ कटिवस्त्राबद्धकच्छाश्चतुराः परिवेषकाः । भुक्तिपात्राणि चांबूनि ददुरादौ द्विजातयः॥७॥ ततो भक्ष्याणि भोज्यानि लेह्यान्यपि च कृत्स्नशः । यथोचितं यथाभोक्तृ पङ्क्तिशः पर्यवेषयन् ॥८॥ सर्वं सर्वेषु पात्रेषु परिवेषितमित्यसौ। दृष्ट्वा तान् भगवान् भोक्तुमाजिज्ञपदुदात्तदोः ॥९॥ तस्मिन् दिने तु स स्वामी मुक्तानन्दमुखान् सतः । भोक्तुं समुपवेश्यैव चकार परिवेषणम् ॥१०॥ भुञ्जानांस्तान् मुनीन् राजन् ! द्विजैः साकं द्रुतक्रियैः । पर्यवेषयदीशोऽसौ सर्वपङ्क्तिचरो द्रुतम् ॥११॥ पक्वान्नभृतपात्रेभ्यो विधृतेभ्यो द्विजैः प्रभुः । शष्कुलीग्रन्थिकादीनि स मुहुः पर्यवेषयत् ॥१२॥ भोज्यहस्तो ययौ पङ्क्तौ यस्यां यस्यां यदा यदा । भोजकान् याचतोऽपश्यत्तस्यां तस्यां तदा तदा ॥१३॥ पात्रपूरं ततस्तेभ्यो हसन् भोज्यानि सोऽर्पयन् । तर्पयामास सकलान् भुञ्जानांस्तान्मुनीन्नृप ! ॥१४॥ आश्चर्यं जनयन्नॄणां दोर्भ्यां तद्याचितं ददत्। दिव्यदेहागतान्मुक्तानदृश्यानप्यभोजयत् ॥१५॥

## અધ્યાય : ૩૯

## ભોજન કરતા સાધુઓની સર્વ પંક્તિઓમાં શ્રીહરિની પીરસવાની લીલા કહેલી છે.

**સુવ્રત મનિ બોલ્યા** : હે રાજન્ ! ભગવાન શ્રીહરિ બારસને દિવસે પ્રાતઃકાળમાં યોગેશ્વરનું ઉત્તરપૂજન તથા તેમની મૂર્તિનું દાનાદિ કાર્ય તત્કાલ કરીને લીંબડાની નીચે વેદિકાની ઉપર સિંહાસનમાં વિરાજમાન થયા. (૧) મુનિઓની સાથે દેશાન્તરથી આવેલા જનો તત્કાલ નિત્ય વિધિ કરીને શ્રીહરિની સમીપમાં આવીને પોતપોતાની મર્યાદા પ્રમાણે બેઠા. (૨) વળી જયા પણ યોગેશ્વરનું ઉત્તરપૂજન કરી તેમની મૂર્તિનું દાન આચાર્યને આપીને ગાયોનું દાન વગેરે પ્રીતિપૂર્વક કરતા હતા. (૩) તેટલામાં, લાંબી પીત વર્ણવાળી જટા ધારણ કરનારા-મુકુન્દાનંદ નામના વર્ણીરાજે શ્રીહરિની સમીપમાં આવીને હે સ્વામિન્ ! રસોઈ તૈયાર થઈ છે. આવી રીતે મહાપ્રભુને કહ્યું. (૪) હે રાજન્! તે સમયે શ્રીહરિએ આજ્ઞા આપેલા સર્વે મુનિઓ પણ અતિ હર્ષવાળા થઈ જમવા માટે તત્કાલ સમુદાયરૂપે આવ્યા. (૫) હાથ, પગ, મુખ, ધોઈને પવિત્ર થયા સતા જેમના હાથમાં જળ ભરેલાં કમંડલો છે અને પતર (ભોજન પાત્રો) લઈને સર્વે મુનિઓ પરમાત્માના મુખારવિન્દમાં આરોપિત દૃષ્ટિવાળા થકા ત્યાં પંક્તિઓમાં મર્યાદાથી બેઠા. (૬) કેડ્યમાં વસ્ત્રથી બાંધ્યો છે કચ્છ જેમણે એવા પીરસવામાં અતિ ચતુર બ્રાહ્મણો પ્રથમ પતરાવળાં (ભોજનપાત્રો) અને જળ આપતા હતા. (૭) પછી બ્રાહ્મણોએ સમગ્ર જલેબી વગેરે ભક્ષ્ય વસ્તુઓ, બીરંજ વગેરે ભોજ્ય, દૂધપાક વગેરે લેહ્ય વસ્તુઓ અને અથાણાં વગેરે ચોષ્ય વસ્તુઓ યથાયોગ્ય ભોજન કરનારા મુનિઓની રુચિ પ્રમાણે પંક્તિના અનુક્રમથી પીરસી દીધું. (૮) સર્વે જમવાની વસ્તુઓ સર્વેનાં પાત્રોમાં પીરસાઈ ગઈ : આ પ્રમાણે જોઈને શ્રીહરિએ ઊંચા હાથ કરી મુનિઓને જમવાની આજ્ઞા આપી. (૯) તે દિવસે તો મુનિપતિ શ્રીહરિ મુક્તાનંદાદિ સર્વ સાધુઓને જમવા બેસાડીને જ (એકમાત્ર) પોતે જ પીરસતા હતા. (૧૦) હે રાજન્ ! શ્રીહરિ તત્કાલ પીરસવાની ક્રિયાવાળા પીરસનારા બ્રાહ્મણોની સાથે સર્વે પંક્તિઓમાં ફરતાં ફરતાં જમનારા મુનિઓને તત્કાલ પીરસતા હતા. (૧૧) શ્રીહરિ, પોતાની સન્મુખપણે પાછે પગે ચાલવામાં નિપુણ પીરસનારા બ્રાહ્મણોએ પોતાના બન્ને હાથોથી ધારણ કરી રાખેલાં પકવાનનાં પાત્રોમાંથી જલેબી, ગાંઠિયા આદિ ભક્ષ્ય વસ્તુઓ લઈને વારંવાર પીરસવા લાગ્યા. (૧૨) ભોજ્ય વસ્તુઓ હાથમાં જેમને છે એવા શ્રીહરિ જ્યારે જ્યારે જે જે પંક્તિમાં ગયા ત્યારે ત્યારે તે તે પંક્તિમાં જમનારા મુનિઓને 'મને આપો, મને આપો' એમ પ્રાર્થના કરતા જોતા હતા. (૧૩) હે રાજન્ ! પછી શ્રીહરિ હસતા હસતા પાત્રોને પરિપૂર્ણ કરી તે મુનિઓને આપતા સતા જમનારા મુનિઓને તૃપ્ત કરતા હતા. (૧૪) પ્રેક્ષક જનોને આશ્ચર્ય પમાડતા થકા પોતાના બન્ને હાથોથી મુનિઓએ યાચના કરાયેલા પદાર્થોને આપતા શ્રીહરિ, દિવ્ય વિગ્રહોથી ત્યાં આવેલા બીજાઓની દૃષ્ટિમાં નહિ આવેલા અક્ષરધામના મુક્તોને પણ જમાડતા હતા. (૧૫)

तत्कृपाप्राप्तदिव्याक्षास्तदानीं कतिचिन्नराः । नार्यस्तान् ददृशुर्देवानपि तत्र समागतान् ॥१६॥ पक्वान्नानां च बहुशः पर्वतान्रुचिरांस्तथा । घृतकुल्याः पयःकुल्याः पायसादिनदीरपि ॥१७॥ तमेव भगवन्तं ते तेषां सम्परिवेषणम् । कुर्वन्तमैक्षन्त तदा चरन्तं सर्वपङ्क्तिषु ॥१८॥ तत्करार्पितपक्वान्नग्रहणे सादरांस्तु ते । देवादींस्तांस्तथैवैतान् मुनींश्च ददृशुः समान् ॥१९॥ तृप्तेषु तेषु पक्वान्नैः सफूत्कृतिमुखेषु च । द्विजानुवाच भगवान् भक्तमानीयतामिति ॥२०॥ लड्डुकं वामहस्ते च दक्षे पायसभाजनम् । गृहीत्वा परिचक्राम स ततः सर्वपङ्क्तिषु ॥२१॥ ययाचे न यदा कोऽपि प्रत्यागच्छत्तदा स तु । प्रसाददौर्लभ्यवित्तं ब्रह्मानन्दो जुहाव ह ॥२२॥ एह्येहि भगवन्नत्र पात्रं नो विस्मृतोऽस्ययम् । नित्यानन्दो रिक्तपात्रो लज्जते याचितुं मुहुः ॥२३॥ तदा तत्रैत्य स हरिर्भाजने तस्य पायसम् । न्यषिञ्चत्स तदोवाच पश्यंस्तद्दोष्णि लड्डुकम् ॥२४॥ लिह्यां पायसमात्रं चेत्तन्नित्यानन्द एष माम् । पूषणं वक्ष्यति स्वामिंस्तद्गोलकमपि क्षिप ॥२५॥ ततो हसन्स भगवान्हासयंस्तांश्च भोजकान् । तत्पात्रे लड्डुकं क्षिप्त्वा सिंहनादमचीकरत् ॥२६॥ वर्णिराट् तावदागत्य लड्डुकामत्रकं करे । बिभ्रद्धरेः पुरस्तस्थौ द्वौ ततः सोऽग्रहीद्द्रुतम् ॥२७॥ हरिं वीक्ष्यान्तिकप्राप्तं मुक्तानन्दोऽतितृप्तवान् । भुक्तशिष्टं स्वपात्रस्थं लड्डुकं तमदीदृशत् ॥२८॥ अपेक्षितोऽस्य त्वेतावानिति ज्ञात्वा च स प्रभुः । यावत् क्षिपति तं तावत्सोऽकरोत्सिंहगर्जनाम् ॥२९॥ चैतन्यानन्दमालोक्य पात्रे कृत्वा करं शिरः । धूनयन्तं स तत्पात्रे हरिर्लड्डुकमक्षिपत् ॥३०॥

---

તે સમયે શ્રીહરિની કૃપાથી જેમને દિવ્ય દૃષ્ટિ પ્રાપ્ત થઈ છે એવા કેટલાક પુરુષો અને સ્ત્રીઓ તે મુક્તોને જોતાં હતાં તેમજ ત્યાં આવેલા દિવ્ય દેહવાળા, બ્રહ્મા, શિવ, ઈન્દ્રાદિ દેવોને પણ જોતાં હતાં.(શ્રીહરિએ સંકલ્પમાત્રથી નિર્માણ કરેલા) પકવાન્નોના રમણીય ઘણા કરેલા પર્વતો તથા ઘીની કરેલી નદીઓ તથા દૂધની કરેલી નદીઓ, દૂધપાક વગેરે જેમાં છે એવા શીખંડ આદિની નદીઓ પણ દેખી. (૧૬-૧૭) દિવ્ય દૃષ્ટિવાળાં જનો, મુક્તો અને સાધુઓને પીરસતા સર્વ પંક્તિઓમાં ફરતા ભગવાન શ્રીહરિને જ જોતા હતા. (૧૮) દિવ્ય દૃષ્ટિવાળાં સ્ત્રીઓ અને પુરુષો શ્રીહરિએ પોતાના હસ્તકમળથી અર્પણ કરેલાં પકવાન્નોનું ગ્રહણ કરવામાં આદરવાળા તે મુક્તો અને બ્રહ્મા વગેરેને તેમજ પ્રત્યક્ષ પંક્તિમાં બેઠેલા મુક્તાનંદાદિ સાધુઓને પ્રસાદગ્રહણમાં સમાન આદરવાળા જોતા હતા. (૧૯) પકવાન્નોથી તૃપ્ત થયેલા માટે જ મુખેથી શ્વાસ લેતા મુનિઓને જોઈને 'ભાત લાવો' એમ શ્રીહરિએ બ્રાહ્મણોને કહ્યું. (૨૦) ભાત લાવ્યા પછી શ્રીહરિ ડાબા હાથમાં લાડુ અને જમણા હાથમાં દૂધપાકનું પાત્ર ગ્રહણ કરી સર્વ પંક્તિઓમાં ફરતા હતા. (૨૧) જ્યારે કોઈ પણ ભોજન કરનાર કાંઈ પણ યાચના કરતા નહોતા ત્યારે શ્રીહરિ પાછા આવ્યા ત્યારે તો પ્રસાદની દુર્લભતા જાણતા બ્રહ્માનંદ મુનિ શ્રીહરિને સ્ફુટ (સ્પષ્ટ) જેમ હોય તેમ બોલાવતા હતા. : (૨૨) 'હે ભગવન્ ! અહીંયાં આવો, આવો અમારા ખાલી પાત્રને ભૂલી ગયા કે શું ? આ નિત્યાનંદ ખાલી પાત્રવાળા વારંવાર માગવામાં લજ્જા પામે છે. ' (૨૩) તે સમયે બ્રહ્માનંદ મુનિએ બોલાવેલા શ્રીહરિએ બ્રહ્માનંદ મુનિ સમીપે આવી તેમના પાત્રમાં દૂધપાક રેડ્યો, તે સમયે બ્રહ્માનંદ મુનિ શ્રીહરિના હાથમાં મોતિયા લાડુ જોતા સતા બોલ્યા : (૨૪) ' હે સ્વામિન્ ! કેવળ દૂધપાકનો આસ્વાદ લઈશ તો આ નિત્યાનંદ મુનિ મને દાંત વિનાના પુષા દેવતા (બોખો) કહેશે માટે લાડુ પણ આપો.' (૨૫) હે રાજન્ ! પછી ભગવાન શ્રીહરિ હાસ કરતા સતા ભોજન કરતા મુનિઓને હસાવતા સતા બ્રહ્માનંદમુનિના પાત્રમાં લાડુ આપી સિંહનાદ કરાવતા હતા. (૨૬) તેટલામાં વર્ણીરાજ મુકુંદાનંદ આવીને બન્ને હાથમાં લાડુનું પાત્ર ધારણ કરતા સતા શ્રીનારાયણ મુનિની આગળ ઊભા રહ્યા, શ્રીહરિએ તે પાત્રથી બે લાડુઓ તત્કાલ ગ્રહણ કર્યા. (૨૭) અતિ તૃપ્ત થયેલા મુક્તાનંદ મુનિ બે લાડુઓ ગ્રહણ કરી પોતાની સમીપે આવેલા શ્રીહરિકૃષ્ણને જોઈને પોતાના પાત્રમાં ભોજનથી બાકી રહેલો લાડુ શ્રીહરિને બતાવતા હતા. (૨૮) મુક્તાનંદ મુનિને તો આટલો જ અપેક્ષિત છે એમ જાણીને પ્રભુ શ્રીહરિ જેટલામાં લાડુ આપે છે તેટલામાં મુક્તાનન્દ મુનિએ સિંહગર્જના કરી. (૨૯) પોતાના પાત્ર ઉપર જમણો હાથ રાખીને પોતાના મસ્તકને કંપાવતા ચૈતન્યાનંદ મુનિને જોઈને શ્રીહરિએ તેમના પાત્રમાં મોતિયો લાડુ આપ્યો તેથી સિંહગર્જના કરી. (૩૦)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

ऊर्ध्वं शिरो धूनयन्तं नित्यानन्दं हसन्मुखम् । तृप्तं ज्ञात्वा लड्डुकार्धं तत्पात्रेऽक्षिपदीश्वरः ॥३१॥ कृतसिंहरवे तस्मिन्नानन्दानन्दमाययौ । ज्ञात्वा शिथिलदन्तं तं दापयामास पायसम् ॥३२॥ गोपालानन्दमालोक्य मिताहारं हरिर्हसन् । अर्धार्धं लड्डुकस्यादात्कारयन्सिंहगर्जनाम् ॥३३॥ सच्चिदानन्दमेत्यासौ वृथाऽऽदौ सिंहनादिनम् । दृष्ट्वा रिक्तं तु तत्पात्रं लड्डुकद्वयमक्षिपत् ॥३४॥ कृपानन्दं स दृष्ट्वाऽथ प्रतीक्ष्य स्वमवस्थितम् । तत्समीपमुपेयाय गृहीत्वा लड्डुकं करे ॥३५॥ तृप्तं ज्ञात्वा भङ्क्तुकामं लड्डुकं वीक्ष्य सोऽब्रवीत् । एतद्भङ्गेऽङ्गुलीनां ते श्रमः स्यादिति निःक्षिप ॥३६॥ तं च क्षिप्त्वा स तत्पात्रे यावत्क्षिपति चापरम् । उच्चैर्ननाद स तदा शुकानन्दमगात्स च ॥३७॥ पात्रावशिष्टपक्वान्नं चर्वन्तं शष्कुलीं शनैः । अर्धां दत्वा लज्जमानमात्मानन्दं व्यचष्ट सः ॥३८॥ निष्कासितेतः सन्ताड्य ब्रह्मानन्देन तु त्रपा । गृहाण भुङ्क्ष्व तत्स्वेष्टमित्युक्त्वादात्स लड्डुकौ ॥३९॥ शष्कुलीभृतवक्त्रेण ब्रुवते चास्फुटं ददौ । महानुभावानन्दाय करस्थं सार्धलड्डुकम् ॥४०॥ एवमन्यानपि हरिर्भोजकान्परिवेष्य सः । भक्तं च क्वथिकां सूपं दापयित्वाशुधत्करौ ॥४१॥ भुक्त्वा करमुखं ते च विशोध्य स्वस्वकेतनम् । फुल्लतुन्दा ययुः सर्वे भोजका मुखफूत्कृताः ॥४२॥ ततश्च पार्षदान्सर्वान् क्षत्रियादीन्स पूर्ववत् । भोजयामास भक्तास्वानन्यांश्चान्नार्थिनो जनान् ॥४३॥ ततः स पारणां कर्तुं योषाश्चाज्ञाप्य सर्वशः । भोजनार्थं ततस्त्वायन्निजमन्दिरमीशिता ॥४४॥ पाकं विधाय श्रीकृष्णनैवेद्यं वैश्वदेविकम् । कृत्वैव विदधे स्वामी पारणां धर्मवत्सलः ॥४५॥

---

શ્રીહરિના મુખમાં અર્પણ કરેલી ઊંચી દૃષ્ટિ હોવાથી મસ્તક કંપાવતા હસતા મુખવાળા નિત્યાનન્દ મુનિને જોઈને તૃપ્ત થયેલા જાણીને શ્રીહરિએ તેમના પાત્રમાં અર્ધો લાડુ આપ્યો. (૩૧) નિત્યાનન્દ મુનિએ સિંહનાદ કર્યો એટલે શ્રીહરિ આનન્દાનંદ મુનિને પીરસવા માટે આવ્યા. આનંદાનન્દ મુનિને શિથિલ દાંતવાળા જાણીને દૂધપાક બીજાની પાસે પિરસાવતા હતા. (૩૨) મિતાહારી, યોગાભ્યાસથી જઠરાગ્નિ મંદ હોવાથી કર્યો છે અર્ધો આહાર જેમણે એવા ગોપાલાનન્દ મુનિને જોઈને હસતા સતા શ્રીહરિકૃષ્ણે સિંહગર્જના કરાવવા માટે ચોથા ભાગનો લાડુ આપ્યો. (૩૩) શ્રીહરિએ પીરસતા પહેલાં જ જૂઠો સિંહનાદ કરતા સચ્ચિદાનન્દ મુનિને પામીને તેમનું ખાલી પાત્ર જોઈને બે લાડુ આપ્યા. (૩૪) પછી શ્રીહરિ પોતાની પ્રતીક્ષા કરતા કૃપાનંદમુનિને જોઈને હાથમાં લાડુ લઈને તેમની સમીપે આવ્યા.(૩૫) કૃપાનન્દ મુનિને તૃપ્ત થયેલા જાણીને લાડુ ભાંગવા ઇચ્છતા શ્રીહરિને જોઈને કૃપાનન્દ મુનિએ અતિ દૃઢ હોવાથી તમારી આંગળીઓને શ્રમ થાય માટે ભાંગ્યા વગર જ આપો એમ શ્રીહરિને કહ્યું. (૩૬) શ્રીહરિ તેમના પાત્રમાં લાડુ આપીને બીજો લાડુ આપે છે તેટલામાં કૃપાનંદ મુનિ ઉચ્ચ સ્વરથી સિંહનાદ કરતા હતા. (તેમજ તેમના સમીપમાં બેઠેલા સ્વયં પ્રકાશાનંદમુનિને પણ એક લાડુ આપીને બીજો આપે છે તેટલામાં તેઓ પણ સિંહગર્જના કરતા હતાઃ એમ જાણવું.) પછી શ્રીહરિ શુકાનંદ મુનિને પીરસવા આવ્યા. (૩૭) પાત્રમાં બાકી રહેલાં પકવાન્નને ધીમે ધીમે ચાવતા શુકાનંદ મુનિને અર્ધી જલેબી આપી, પછી શ્રીહરિ પોતાની પાસેથી માગવામાં શરમાતા આત્માનંદ મુનિને જોઈને સ્પષ્ટ કહેતા હતા : (૩૮) હે આત્માનંદ મુને ! બ્રહ્માનંદ મુનિએ મારા પ્રત્યે ‘ હે ભગવાન્ અહીં આવો’ વગેરે વચન કહીને લાજને તો સારી રીતે પ્રહાર કરીને કાઢી મૂકી છે માટે પોતાનાં પ્રિય પકવાન્ન ગ્રહણ કરો,’ આ પ્રમાણે કહીને બે મોતિયા લાડુ તેમના પાત્રમાં આપ્યા. (૩૯) જલેબીથી ભરેલા મુખથી અસ્પષ્ટ બોલતા (નિષેધ કરતા) મહાનુભાવાનંદ મુનિને દોઢ લાડુ આપ્યો પછી તેમણે સિંહગર્જના કરી. (૪૦) આ પ્રકારે મુનિઓને પીરસતા શ્રીહરિ, બીજા પણ મુનિઓને પીરસીને વિપ્રો દ્વારા ભાત-કઢી અને દાળ અપાવીને પોતાના બન્ને હાથ જળથી શુદ્ધ કરતા હતા. (૪૧) સર્વે ભોજન કરનારા મુનિઓ જમીને હાથ-મુખને જળથી શુદ્ધ કરીને, ફૂલેલા પેટવાળા અને મુખેથી શ્વાસ લેતા સતા પોતપોતાના સ્થાનમાં ગયા. (૪૨) પછી શ્રીહરિ સર્વે પાર્ષદોને તથા હેમંતસિંહાદિ ક્ષત્રિયાદિ ભક્તો અને બીજા અન્નાર્થી જનોને અન્નકૂટના ઉત્સવની માફક જમાડતા હતા. (૪૩) પછી પરમેશ્વર શ્રીહરિ સર્વે જયા વગેરે સ્ત્રી ભક્તોને પારણાં કરવા આજ્ઞા આપીને પછી પાક કરી ભગવાનને નૈવેદ્ય કરી ભોજન કરવા માટે પોતાના નિવાસ સ્થાનમાં આવ્યા. (૪૪) ધર્મવત્સલ શ્રીનારાયણ મુનિ રસોઈ બનાવીને શ્રીકૃષ્ણને નિવેદન અને વૈશ્વદેવ કરીને જ પારણાં કરતા હતા. (૪૫)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

अकुर्वन्स दिवानिद्रां पार्षदानां पुरो गुणान् । जयाया वर्णयन्नेव तत्र याममुपाविशत् ॥४६॥ एवमेव नृपते ! जगत्पतिः श्रीहरिर्भवति भक्तवत्सलः । दम्भहीननिजसेविमानवान्नाधिकं किमपि तस्य सर्वथा ॥४७॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे प्रबोधन्युत्सवे भोजने हरिपरिवेषणलीलावर्णन-नामैकोनचत्वारिंशोऽध्यायः ॥३९॥

सुव्रत उवाच - **अथ प्रदोषे भगवानुपायात् पुनर्बहिर्वेदिमुदारकीर्तिः । तावज्जनौघा मुनयश्च सर्वे योषाश्च तत्रैत्य मुदा निषेदुः ॥१॥ तत्रोपविश्य प्रभुरात्मपीठे पर्यैक्षत स्वान् विनयावनम्रान् । सुशिक्षितांस्तानपि साधुवर्त्म भूयो विवक्षुः स गिरं जगाद ॥२॥** श्रीनारायणमुनिरुवाच - **यूयं हि वर्णाश्रमिणस्त्यागिनो मुनयस्तथा । सर्वे सम्मिलिताः स्थात्र कृष्णभक्ता यमान्विताः ॥३॥ तेषां मध्ये भवेद्येषां प्रष्टव्यं किमपि प्रजाः! । ते मां पृच्छन्तु निर्भीकाः कश्चिद्वो मास्तु संशयः ॥४॥** सुव्रत उवाच - **एवमुक्ते भगवता राजानस्तत्र संस्थिताः । पुञ्जजिद्वास्तुसूराद्या भक्ताः प्रश्नमकुर्वत ॥५॥ परस्परं ते सम्मन्त्र्य नमस्कृत्य प्रभुं नृप ! । बद्धाञ्जलिपुटाः प्रोचुर्वाचं लोकहितावहाम् ॥६॥** राजान ऊचुः- **वयं सर्वे नृपाः स्वामिन् ! प्रजाश्चेमा निरन्तरम् । प्रवृत्तिधर्मस्थितयस्त्वां श्रिताः स्मो जगद्गुरो ! ॥७॥ तेषां नो यद्भवेत्कार्यमकार्यं यच्च सर्वथा । तत्पृथग्विशदीकृत्य त्वं बोधयितुमर्हसि ॥८॥** सुव्रत उवाच-**इति तैरादरात्पृष्टः प्रसन्नः स मुनीश्वरः । स्मरन्स्वभक्तं विदुरं प्रोवाच वचनं नृपान् ॥९॥**

શ્રીહરિ દિવસની નિદ્રા નહિ કરતા સતા પાર્ષદોની આગળ જયા વગેરેના ગુણોની પ્રશંસા કરતા સતા જ પોતાના નિવાસસ્થાનમાં એક પ્રહર સુધી બેઠા હતા. (૪૬)

હે નૃપતે ! સમગ્ર જગતના એક સ્વામી, શ્રીહરિ આ પ્રમાણે પોતાના એકાંતિક ભકતો ઉપર પ્રીતિવાળા છે; વળી, નિષ્કપટ પોતાની સેવા કરનાર મનુષ્યથી શ્રીહરિને કોઈ પણ અધિક સર્વ પ્રકારે નથી. (૪૭)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે પ્રબોધન્યુત્સવે ભોજને હરિપરિવેષણલીલાવર્ણનનામૈકોન ચત્વારિંશોડધ્યાયઃ (૩૯)*

## અધ્યાય : ૪૦

## પૂંજાજી વગેરે ભક્તોએ પુછાયેલા શ્રીહરિ ભારતમાં વિદુરે કહેલી નીતિનો ઉપદેશ આપતા હતા તે કહ્યું છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! પછી મહાયશસ્વી શ્રીહરિ સાયંકાલે ફરીથી બહાર ઓટા ઉપર સિંહાસનમાં બેઠા, તેટલામાં સર્વે દેશાન્તરથી આવેલા જનસમૂહો સર્વે મુનિઓ અને સ્ત્રીઓ ત્યાં આવીને હર્ષપૂર્વક બેસતાં હતાં. (૧) શ્રીહરિ વેદીમાં પોતાના સિંહાસનમાં બેસીને શ્રી વાસુદેવ નારાયણની આરતીના અંતમાં શ્રી નારાયણ નામનો ધ્વનિ કરીને વિનયથી નમ્ર થયેલા પોતાના ભક્તોને ચોતરફ જોતા હતા. સુશિક્ષિત પોતાના ભક્તોને ફરીથી પણ સન્માર્ગ કહેવા ઈચ્છતા સતા બોલ્યા : (૨) **શ્રીનારાયણ મુનિ બોલ્યા** : હે ભક્તજનો! પ્રત્યક્ષ શ્રીકૃષ્ણના ઉપાસકો અહિંસાદિ ધર્મેયુક્ત, વર્ણાશ્રમ ધર્મેયુક્ત વર્ણીઓ, ગૃહસ્થો તથા ત્યાગીઓ સર્વે તમો આ સભામાં ભેગા થયા છો. (૩) હે મારા આશ્રિતો ! સર્વે જનોમાં જે જનોને કંઈ પણ પૂછવું હોય તે જનો નિર્ભય થઈને મને પૂછો. તમારામાં કોઈએ સંશય રાખવો નહિ. (૪)

**સુવ્રતમુનિ કહે છે** : હે રાજન્ ! શ્રીહરિએ આ પ્રમાણે કહ્યું ત્યારે સભામાં બેઠેલા પૂંજાજી, વસ્તાખાચર, સૂરા ખાચર આદિક હેમન્તસિંહ વગેરે ભક્ત રાજાઓ પ્રશ્ન કરતા હતા. (૫) હે નૃપ ! તે રાજાઓ પરસ્પર મંત્રણા કરીને બન્ને હાથ જોડીને શ્રીહરિને નમસ્કાર કરી સમગ્ર લોકોને હિત કરનારી વાણી બોલ્યા. (૬)

**રાજાઓ બોલ્યા** : હે સ્વામિન્ ! હે જગદ્‌ગુરુ, અમે સર્વે રાજાઓ અને સર્વે પ્રજાઓ નિરંતર પ્રવૃત્તિધર્મમાં રહીને તમારા આશ્રિત થયા છીએ. (૭) તમારા આશ્રિત એવા અમારે સર્વ પ્રકારે કરવા યોગ્ય કર્મ અને ન કરવા યોગ્ય જે અકાર્ય તે સ્ફુટ કરીને તમો બોધ આપવા માટે યોગ્ય છો. (૮) હે રાજન્ ! આ પ્રકારે પોતાના ભક્ત રાજાઓએ આદરપૂર્વક પુછાયેલા મુનીશ્વર શ્રીહરિ પોતાના ભકત વિદુરનું સ્મરણ કરતા સતા પૂંજજીત વગેરે રાજાઓને કહેવા લાગ્યા : (૯)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

श्रीनारायणमुनिरुवाच - **ये पण्डिता इति प्रोक्ताः सच्छास्त्रेषु च साधवः । तेषां यद्वचनं तत्तु कार्यमेवेति निश्चितम् ॥१०॥ तत्रैवोक्ताश्च ये मूर्खा असन्तश्च कुबुद्धयः । तदुक्तं वचनं भक्ता ! अकार्यमिति मे मतम् ॥११॥ पण्डितानां च मूर्खाणां लक्षणानि सविस्तरम् । कार्याकार्ये च विदुरो धृतराष्ट्रं पुराऽवदत् ॥१२॥ प्रोक्ता विदुरनीतिः सा गृहिणां त्यागिनां हिता । तामभ्यस्य ततो ज्ञेयः कार्याकार्यविनिर्णयः ॥१३॥ सर्वेषां नीतिशास्त्राणां सारो वैदुरिको नयः । तेनैव वर्तमानानां युष्माकं सर्वतः सुखम् ॥१४॥ एतत्संशीलिनः क्वापि सन्तापैस्त्रिविधैरपि । पीडितुं नैव शक्यन्ते स्थिता व्यवहृतौ जनाः ॥१५॥ एतदुक्तप्रकारेण वर्तमानाः क्रियास्वपि । यूयं भजन्तः श्रीकृष्णं सुखिनोऽत्र भविष्यथ ॥१६॥** सुव्रत उवाच - **इत्युक्तास्ते नृपतयो राजन्भगवताऽखिलाः । जनाश्च मुनयो हृष्टास्तथेत्यूचुः प्रणम्य तम् ॥१७॥ स्वस्थानं ततो गन्तुमाज्ञप्ता हरिणा च ते । ययुस्ततो हरिरपि स्वीयं मन्दिरमाययौ ॥१८॥ त्रयोदशीतस्त्रिदिने रात्रौ हरिरकारयत् । सभायां पञ्चमस्कन्धकथां पौराणिकेन च ॥१९॥ नोल्लङ्घ्या स्वस्वमर्यादेत्यर्थं तस्या अबूबुधत् । सङ्गदोषं कर्मफलावश्यभोग्यत्वमप्यसौ ॥२०॥ अष्टादशदिनानीत्थं सर्वे ते भगवज्जनाः । लेभिरे परमानन्दं कारुण्येन जगत्पतेः ॥२१॥ पौर्णमास्यां च महता सम्भारेण स सत्पतिः । कारयामास जयया भक्तिजन्ममहोत्सवम् ॥२२॥ उत्सवान्ते निशि जनान्भक्तांस्तान्भगवांस्ततः । आजिज्ञपत्सभासंस्थो गन्तुं देशं निजं निजम् ॥२३॥** श्रीनारायणमुनिरुवाच - **यूयं सर्वे भक्तजना देशान्स्वान्स्वानहर्मुखे । योषितोऽध्वनि रक्षन्तः सावधाना व्रजन्त्वितः ॥२४॥ देहादन्यं ब्रह्मरूपं निश्चित्यात्मानमच्युतम् । भजन्तश्च स्वधर्मस्थास्तद्धाम प्राप्यस्थ ध्रुवम् ॥२५॥ प्राप्य ब्रह्मपुरं तच्च सर्वधामोत्तमोत्तमम् । भोगानलौकिकांस्तत्र तस्मात्प्राप्स्यथ वाञ्छितान् ॥२६॥**

**શ્રીનારાયણમુનિ કહે છે** : હે રાજાઓ ! સત્શાસ્ત્રોમાં જેને પંડિતો અને સાધુઓ કહ્યા છે તેમનું જે વચન છે તે જ કરવા યોગ્ય (કાર્યરૂપ) છે. હે રાજાઓ, સત્શાસ્ત્રોમાં જ જે પુરૂષોને મૂર્ખો અને અસન્તો અર્થાત્ નઠારી બુદ્ધિવાળા કહેલા છે તેમનાં વચન અકાર્ય છે આ પ્રકારે મારો સિદ્ધાંત છે. (૧૦-૧૧) પંડિતો અને મૂર્ખોનાં લક્ષણો, કાર્ય અને અકાર્ય; પૂર્વે વિદુરજીએ ધૃતરાષ્ટ્રના પ્રત્યે વિસ્તાર સહિત કહ્યાં છે. (૧૨) જેને પ્રવૃત્તિમાર્ગમાં રહેલાં ગૃહસ્થજનો અને નિવૃત્તિમાર્ગમાં રહેલા મુનિજનોના હિતને કરનારી **વિદુરનીતિ** કહી છે, તેનો અભ્યાસ કરી તેનાથી કાર્ય અને અકાર્યનો નિર્ણય જાણવો. (૧૩) સમગ્ર નીતિશાસ્ત્રોમાં વિદુરે કહેલો નીતિગ્રંથ શ્રેષ્ઠ મેં માનેલો છે. વિદુરે કહેલી નીતિ પ્રમાણે જ વર્તતા તમો સર્વેને સર્વ પ્રકારે સુખ જ થાય. (૧૪) વિદુરનીતિમાં અભ્યાસવાળાં (જનો) વ્યવહારમાર્ગમાં રહેલાં હોય છતાં તેમને ત્રિવિધ સંતાપો પણ પીડા પમાડવા શક્તિમાન થતા નથી. (૧૫) માટે વિદૂરનીતિમાં કહ્યા પ્રમાણે વ્યવહાર કાર્યમાં વર્તતા થકા શ્રીકૃષ્ણને ભજતા તમો (ક્રિયાપ્રધાન પ્રવૃત્તિ માર્ગમાં રહેલા હોવા છતાં) આ લોક અને પરલોકમાં સુખી થશો. (૧૬) હે રાજન્ ! આ પ્રમાણે શ્રીહરિએ કહેલા સમગ્ર પૂંજાજી વગેરે રાજાઓ અને સમગ્રજનો અને મુનિઓ પ્રસન્ન થઈને શ્રીહરિને પ્રણામ કરી જેમ તમો કહો છો તે પ્રમાણે કરીશું આ પ્રમાણે બોલ્યા. (૧૭) પછી શ્રીહરિએ પોતપોતાના સ્થાનમાં જવા માટે આજ્ઞા આપેલા સભામાં બેઠેલા જનો પોતપોતાના સ્થાનમાં ગયા. પછી ભગવાન શ્રીહરિ પણ પોતાના મંદિર (નિવાસસ્થાન)માં આવ્યા. ( આ શ્રીહરિનું ચરિત્ર દ્વાદશીની રાત્રિનું જાણવું.) (૧૮) શ્રી નારાયણ મુનિ કારતક સુદી તેરસથી આરંભીને ત્રણ દિવસ પર્યન્ત રાત્રિએ સભામાં પ્રયાગજીત પુરાણી પાસે પંચમસ્કંધની કથા કરાવતા હતા. (૧૯) પોતપોતાના સ્થાનની સ્થિતિ કોઈ માણસે ઉલ્લંઘન કરવી નહિ : આવો પંચમસ્કંધ કથાનો અર્થ તેમજ ભગવાન વિના બીજા પદાર્થોમાં આસક્તિરૂપ દોષ અને કર્મનું ફળ અવશ્ય ભોગવવું પડે છે એવો તેનો અર્થ શ્રીહરિ પોતાના ભક્તોને જણાવતા હતા. (૨૦) આ પ્રમાણે સર્વે ભગવાનના ભક્તો અઢાર દિવસ સુધી જગત્ પતિની દયાથી પરમાનંદ પામ્યા. (૨૧) કારતક સુદી પૂર્ણિમાએ મુનિપતિ શ્રીહરિએ મહાઆરંભથી (વિવિધ સામગ્રીથી) ભક્તિ માતાનો જન્મોત્સવ જયા પાસે કરાવ્યો. (૨૨) ઉત્સવને અંતે સભામાં બેઠેલા શ્રીહરિ દેશાન્તરથી આવેલા ભક્તજનોને દુર્ગપત્તનથી પોતપોતાના દેશમાં જવા માટે આજ્ઞા આપતા હતા. (૨૩) તમો ભક્તજનો માર્ગમાં પોતાના સંબંધવાળી સ્ત્રીઓનું રક્ષણ કરતા કરતા સાવધાનપણે પ્રાતઃકાલે અહીંથી પોતપોતાના દેશમાં જાઓ. (૨૪) દેહથી ભિન્ન પોતાના જીવાત્માને બ્રહ્મરૂપ માનીને શ્રીકૃષ્ણને નવધા ભક્તિથી ભજતા પોતાના વર્ણાશ્રમધર્મમાં રહીને તમો શ્રીકૃષ્ણના ધામને દેહાન્તે નિશ્ચે પામશો. (૨૫) સર્વ ધામોમાં સર્વોત્તમ **બ્રહ્મપુર** સંજ્ઞાવાળા શ્રીકૃષ્ણના ધામને પામીને તે ધામમાં અલૌકિક પોતે ઈચ્છેલા ભોગોને શ્રીકૃષ્ણથી પામશો. (૨૬)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच – **इति श्रुत्वा प्रभोर्वाक्यं मुनिभिः सह ते जनाः । नत्वा तं हृष्टमनसः पप्रच्छुरिदमादरात् ॥२७॥** जना ऊचुः– **एकान्तिकाः कृष्णभक्ता ज्ञानवैराग्यभक्तिभिः । सम्पन्ना भगवन् ! धर्मैर्लभन्ते धाम तस्य यत् ॥२८॥ यच्चोच्यते परं धाम त्वया ब्रह्मपुराभिधम् । तद्धि वेदितुमिच्छामो वयं सर्वे स्वरूपतः ॥२९॥ तस्मात्त्वं कृपयास्मभ्यं स्वरूपं तस्य तत्त्वतः । वक्तुमर्हसि भो स्वामिंस्त्वदन्यो नैव वेत्ति तत् ॥३०॥** सुव्रत उवाच–**पृष्टः स इत्थं निजभक्तसङ्घैर्विवित्सुभिर्धाम परं मुरारेः । प्रहर्षयंस्तानवदद्दयालुर्नारायणो भक्तजनैकबन्धुः ॥३१॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे प्रबोधन्युत्सवे विदुरनीत्युपदेशकथननामा चत्त्वारिंशोऽध्यायः ॥४०॥

श्रीनारायणमुनिरुवाच – **भक्ताः ! शृणुत वक्ष्यामि रूपं ब्रह्मपुरस्य वः । एकान्तिकानां भक्तानां प्राप्यस्यातिसुखस्य च ॥१॥ एतद्रहस्यमस्तीति पुराणेषु महर्षिभिः । न सम्यग्विस्तरेणोक्तं प्रोक्तं नामान्तरेण च ॥२॥ छान्दोग्योपनिषद्येतन्मोक्षधर्मेषु भारते । स्कान्दादिषु पुराणेषु सङ्क्षेपेणोपवर्णितम् ॥३॥ युष्माकं चाधिकारित्वान्मद्भक्त्या शुद्धचेतसाम् । कथयामि कथामेतां जना! ब्रह्मपुराश्रयाम् ॥४॥ ब्रह्माण्डगोलके ह्यस्मिन्भुवनानि चतुर्दश । सप्तोर्ध्वं सप्त चाधस्ताद्वर्तन्ते संस्थितानि वै ॥५॥ लोकांश्चतुर्दशैवैतान् पृथिव्यावरणं जनाः ! । कोटियोजनविस्तीर्णमभितो व्याप्य वर्तते ॥६॥ उपर्युपरि तस्यापि जलं तेजो मरुन्नभः । अहङ्कारो महत्तत्त्वमिति चावरणानि षट् ॥७॥ एकैकस्माद्दशदशगुणितं ह्युत्तरोत्तरम् । ज्ञेयं चावरणं पूर्वात्सौक्ष्म्येणाप्यधिकं परम् ॥८॥**

---

આ પ્રકારે શ્રીહરિનું વાક્ય સાંભળી સાધુઓએ સહિત તે જનો પ્રસન્ન મનવાળા થકા શ્રીહરિને નમસ્કાર કરી આદરપૂર્વક પૂછતા હતા. (૨૭) હે ભગવન્ ! જ્ઞાન, વૈરાગ્ય, ભક્તિ તથા પોતાના વર્ણાશ્રમના સદાચારોથી સમ્પન્ન માટે જ એકાંતિક ભક્તો શ્રીકૃષ્ણ એવા તમારા ધામને પામેછે. (૨૮) હે હરે ! તમારું ધામ સર્વે ઉત્તમમાં પણ ઉત્તમ બ્રહ્મપુર નામનું કહેવાય છે તે ધામ અમો સર્વે સ્વરૂપથી જાણવા ઈચ્છીએ છીએ જ. (૨૯) હે સ્વામિન્ ! માટે તમો જ બ્રહ્મપુર ધામનું સ્વરૂપ કૃપા કરી યથાર્થપણે અમોને કહેવા યોગ્ય છો. તમારા વિના બીજા તે ધામનું સ્વરૂપ જાણતા નથી. (૩૦)

હે રાજન્ ! શ્રીહરિકૃષ્ણ ભગવાનનું પરંધામ - બ્રહ્મપુર નામનું ધામ જાણવા ઈચ્છતા પોતાના ભક્તસમૂહોએ આ પ્રકારે પૂછેલા દયાળુ શ્રીહરિ પોતાના ભક્તસમુદાયોને આનંદ પમાડતા સતા કહેતા હતા. (૩૧)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે પ્રબોધન્યુત્સવે વિદુરનીત્યુપદેશકથન નામા ચત્વારિંશોऽધ્યાયઃ(૪૦)*

## અધ્યાય : ૪૧

## શ્રીહરિએ પોતાના એકાંતિક ભક્તોને પ્રાપ્ય પોતાના બ્રહ્મપુર ધામનું વર્ણન કર્યું છે.

**શ્રીનારાયણ મુનિ બોલ્યા :** હે ભક્તો ! એકાંતિક ભક્તોએ પ્રાપ્ય અને અતિ સુખમય બ્રહ્મપુર ધામનું સ્વરૂપ તમોને કહું છું. તે સાંભળો (૧) એ બ્રહ્મપુરનું સ્વરૂપ અતિ રહસ્યમય છે માટે મહર્ષિઓએ પુરાણોમાં વિસ્તારપૂર્વક કહ્યું નથી અને વૈકુંઠ-ગોલોકાદિ નામથી કહેલું છે. (૨) છાન્દોગ્યોપનિષદ્, ભારત, મોક્ષધર્મ અને સ્કન્દાદિ પુરાણોમાં એ બ્રહ્મપુરને સંક્ષેપથી વર્ણવ્યું છે. (છાન્દોગ્યમાં 'એ બ્રહ્મપુર સત્ય છે' વગેરે, મોક્ષધર્મમાં 'અવિનાશી બ્રહ્મપુરને પામીને,' સ્કાન્દમાં 'જેને બ્રહ્મપુર કહે છે.' ઈત્યાદિ વર્ણન છે.) (૩) હે જનો! મારી એકાંતિક ભક્તિથી શુદ્ધ અંતઃકરણવાળા તમો તેમના સ્વરૂપ જ્ઞાનમાં પાત્ર હોવાથી બ્રહ્મપુરને આધારિત કથા કહું છું. (૪) આ બ્રહ્માંડમાં ભૂરાદિ સાત સંખ્યાવાળાં એક એકની ઉપર એ રીતે સાત આવરણો છે, નીચે એક એકની નીચે નીચે અતલાદિ સાત આવરણો છે એવી રીતે ચૌદ ભુવનો રહેલાં છે. (૫) હે જનો ! એક કરોડ યોજન વિસ્તારવાળું પૃથ્વીનું આવરણ છે, તે આ કહેલા ચૌદ લોકોને ચોતરફ વ્યાપીને રહેલું છે. (૬) પૃથ્વીના આવરણની પણ ઉપર ઉપર જળ, તેજ, વાયુ, આકાશ, અહંકાર અને મહતત્ત્વ : આ છ આવરણો વર્તે છે. એક એક આવરણથી ઉત્તરોત્તર આવરણ સૂક્ષ્મતા ગુણથી પણ અધિક જાણવું. (૭-૮)

एतेषामपि सर्वेषां कारणं यत्तदष्टमम् । प्रकृत्याख्यं निगदितं महदावरणं जनाः ! ॥९॥ ततःपरं चिदाकाशमस्ति तेजोमयं महत्। अनाद्यनन्तं तद्धाम परमव्योमसंज्ञितम् ॥१०॥ कोटिचन्द्रार्कवह्नीनां मिलितं यन्महन्महः । तदेकदेशतेजोऽग्रे याति खद्योततां हि तत् ॥११॥ अस्ति तत्रानन्दमयी सुधासिन्धु महानदी । नित्यानन्ता च गम्भीरा यामाहुर्विरजामपि ॥१२॥ सुधासिन्धोरस्ति मध्ये द्वीपः सत्तात्मको महान् । भूरितेजोमयो दिव्यः सुखरूपः सनातनः ॥१३॥ निवहैः कामधेनूनां वृषभैश्चारुविग्रहैः । जुष्टश्चाप्राकृतैरन्यैर्विविधैर्मृगपक्षिभिः ॥१४॥ पारिजातैः कल्पवृक्षैर्मन्दारादिभिरङ्घ्रिपैः । मल्लिकाजातिमुख्याभिर्वल्लीभिः परितो वृतः ॥१५॥ नानाविधैरुपवनैः फलपुष्पसमृद्धिभिः । नदीभिः सरसीभिश्च वापीभिर्मणिपर्वतैः ॥१६॥ एतैस्तेजोमयैः सर्वैः सुखरूपैरलौकिकैः । नित्यश्रीभिः परिवृतः सत्यद्वीपः स राजते ॥१७॥ अस्ति तस्मिन् बृहद्दुर्गं शतशृङ्गाचलाभिधम् । लोकालोकाचलनिभं पुण्डरीकाकृति ध्रुवम् ॥१८॥ महद्भिर्गोपुरै रम्यं चतुर्भिस्तच्चतुर्दिशम् । सुरक्षितं प्रतीहारैः सुबलप्रबलादिभिः ॥१९॥ सुदर्शनादिभिः शस्त्रैर्मूर्तिमद्भिरुपाश्रितम् । अणिमप्रमुखाभिस्तन्महतीभिश्च सिद्धिभिः ॥२०॥ तस्यान्तर्वर्तते दिव्या भूमिस्तेजोमयी शुभा । उपमानं क्वचित्तस्या ब्रह्माण्डे नात्र वर्तते ॥२१॥ अभूतोपमया तां च निर्दिशामि ततो जनाः! । यद्येवं स्यात्क्वचित्तर्हि सोपमीयेत तेन वै ॥२२॥ स्वच्छकाचमयी भूमिरियं सर्वा सपर्वता । तादृश्यः स्युश्चाकृतयः सर्वाः स्थावरजङ्गमाः ॥२३॥ यावत्यश्चान्तरिक्षस्था ग्रहनक्षत्रतारकाः । तावन्त एव सूर्याः स्युः सर्वतः सुप्रकाशकाः ॥२४॥ तैः प्रकाशितया भूम्या काचमय्यातिरम्यया । आश्चर्यरूपया नूनं सा भूमिरुपमीयते ॥२५॥

---

હે જનો ! આ સાતેય મહદાદિ આવરણોનું કારણ જે ત્રણ ગુણની સમાનતારૂપ પ્રકૃતિ નામનું સમસ્ત કહેલા આવરણોને ચોતરફ વ્યાપીને આવરણ છે તે આઠમું આવરણ સર્વથી મોટું છે. (૯) તે પ્રકૃતિના આવરણથી પછી તેજોમય મહત્ અપરિચ્છિન્ન ચિદાકાશ (સ્વયંપ્રકાશ, દ્રવ્યવિશેષ વર્તે છે) આદિ અને અંતે રહિત (દેશ અને કાળથી અપરિચ્છિન્ન) તે ચિદાકાશ પરમ વ્યોમ શબ્દથી કહેલું છે તે આ ધામના એક દેશના તેજની સમીપમાં એકી સાથે ઉદય પામેલા કરોડ પરિમિત ચંદ્ર, સૂર્ય અને અગ્નિનું એક સ્થાને રહેલું મહાતેજ પણ ખદ્યોત (આગિયો-જીવડો) પણાને પામી જાય છે આવું તેજોમય ધામ છે. ' ન તત્ર સૂર્યો ભાતિ' (૧૦-૧૧) તે ચિદાકાશમાં  વિરજા નામે નદી આનંદ પ્રચુર મહા નદી સુધા-પુરમયી અનંતા ગંભીર, નિત્યસિદ્ધ પ્રવહન કરે છે. (૧૨) તે સુધા-સિંધુ સ્વરૂપ વિરજા નદીના મધ્યમાં ગોળાકારે સત્ય સ્વરૂપ અત્યંત તેજથી પૂર્ણ અતિ રમણીય સદા આનંદપૂર્ણ સનાતન મહાન દ્વીપ છે. (૧૩) અમાયિક કામધેનુના સમૂહો, રમણીય દેહવાળા અને દિવ્ય વૃષભોથી અને બીજા અનેક પ્રકારનાં મૃગ-પક્ષીઓથી સેવાયેલો; (૧૪) પારિજાત કલ્પવૃક્ષ મન્દારાદિ વૃક્ષો, મોગરો, જૂઈ વગેરે લતાઓથી ચોતરફ વીંટાયેલો; (૧૫) ફલો અને પુષ્પોની સદા સંપત્તિઓ જેમાં છે એવા વૃન્દાવનાદિ ઘણા  પ્રકાશવાળા બગીચાઓ અને નદીઓ અને પદ્માકરો, વાવ્યો તથા દિવ્ય મણિમય પર્વતોથી વીંટાયેલો છે. (૧૬) તેજોમય, સુખરૂપ, અમાયિક અને નિત્ય શોભાવાળા આ સર્વે કામદુઘાના સમૂહો વગેરેથી વીંટાયેલો સત્યદ્વીપ અતિશય શોભે છે. (૧૭) તે સત્ય દ્વીપમાં લોકાલોક પર્વતને તુલ્ય કમળની પેઠે ગોળાકાર નિત્ય અપ્રાકૃત શતશૃંગ પર્વત નામનો મોટો કિલ્લો વર્તે છે તે આ મહાદુર્ગ સુબળ, પ્રબળ, વગેરે દ્વારપાળ પાર્ષદોએ અધિષ્ઠાન કરેલા ચાર ઊંચા દરવાજાઓ વડે સુશોભિત ચાર દિશાવાળો; સદા મૂર્તિમાન સુદર્શનાદિ દિવ્ય આયુધોએ સંરક્ષણ અને મૂર્તિમાન અણિમાદિ મહા સિદ્ધિઓએ આશ્રય કરાયેલો વર્તે છે. (૧૮-૧૯-૨૦) તેવા પ્રકારના દુર્ગની મધ્યે દિવ્ય અતિ તેજોમય શુભ ભૂમિ વર્તે છે. તે ભૂમિની ઉપમા આ બ્રહ્માંડમાં કોઈ પણ સ્થાને મળતી નથી. (૨૧) હે જનો ! માટે તે ભૂમિને ન હોય તેવી એટલે અભૂતોપમાથી બતાવું છું. જો આ પ્રકારે કદાચિત્ થાય તો તે દૃષ્ટાંતથી ભૂમિની ઉપમા આપી શકાય. (૨૨) સમગ્ર પર્વતોએ સહિત વર્તતી આ સમગ્ર ભૂમિ નિર્મલ કાચની હોય સ્થાવર જંગમરૂપા સર્વે આકૃતિઓ સ્વચ્છ કાચની હોય. (૨૩) જેટલી સંખ્યાવાળા આકાશમાં રહેલા ગ્રહ, નક્ષત્રો અને તારાઓ છે, ચોતરફ અતિ પ્રકાશ કરનારા તેટલી સંખ્યાવાળા સૂર્યો હોય તે સૂર્યોથી પ્રકાશપણાને પમાડેલી અત્યંત મનોહર આશ્ચર્ય રૂપ કાચમયી ભૂમિએ સહિત ભૂમિ તે તુલ્યપણે કહેવાય જ. (૨૪-૨૫)

तदेतत्परमं धाम श्रीकृष्णस्य सनातनम् । गोलोक इति यत्प्राहुर्गोपगोपीगणावृतम् ॥२६॥ दर्शनीयतमं तद्धि सर्वतोऽस्ति मनोहरम् । तत्र यद्यच्च रत्नादि तत्तत्सर्वमलौकिकम् ॥२७॥ मुक्तानां तत्र पुंसां च योषितामपि कोटिशः । दिव्यानि चातिभास्वन्ति मन्दिराणि भवन्ति वै ॥२८॥ तन्मध्येऽस्ति महत्तेजः कोटिकोट्यर्कभासुरम् । मनोहरमतिश्वेतं घनं सच्चित्सुखात्मकम् ॥२९॥ यदाहुरक्षरं ब्रह्म सर्वाधारं तथामृतम् । अनाद्यनन्तं पूर्णं च स्वयंज्योतिः सनातनम् ॥३०॥ योगसंसिद्धिमापन्नाः षट्चक्राणि निजान्तरे । व्यतीत्य मूर्ध्नि पश्यन्ति यच्च कृष्णप्रसादतः ॥३१॥ तदेतदवगन्तव्यं धाम ब्रह्मपुरं हरेः । सर्वधामोत्तमं कालमायादिभयवर्जितम् ॥३२॥ तत्राश्चर्यमयं दिव्यं मन्दिरं वर्तते प्रभोः । तत्सौन्दर्यं न शक्तोऽहं भक्ता ! वर्णयितुं किल ॥३३॥ कोटिसूर्यप्रतीकाशरत्नस्तम्भातिभासुरम् । ऋद्धिभिः सकलाभिश्च जुष्टं तत्सर्वसिद्धिभिः॥३४॥ एकान्तिकानां मुक्तानां कोटिभिस्तत्परिश्रितम् । योषाभिः कृष्णभक्ताभिर्मुक्ताभिश्चापि कोटिशः ॥३५॥ राधालक्ष्म्यादिभिस्तत्र सेव्यमानः स्वशक्तिभिः । रत्नसिंहासने रम्ये श्रीकृष्णो हि विराजते ॥३६॥ न तादृशं हि भवनं क्वापि लोकेषु विद्यते । उपमीयेत तद्येन ततो निरुपमं स्मृतम् ॥३७॥ अनेकशोऽपि मुक्तानां पुंसां स्त्रीणां च तत्र वै । भोगस्थानान्यनेकानि सन्ति दिव्यानि सुव्रताः ! ॥३८॥ भोगा भोगोपकरणान्यपि दिव्यानि सर्वशः । वर्तन्ते सुखरूपाणि तानि नित्यानि तत्र च ॥३९॥ यथेह भौतिका भोगाः पाञ्चभौतिकदेहिनाम् । सन्ति तेषां तथा तत्र चिद्रूपाणां हि चिन्मयाः ॥४०॥ तेजोमयाः सर्व एते गुणातीतास्तथाक्षयाः । सत्यज्ञानानन्दरूपा दिव्या निरुपमाः स्मृताः ॥४१॥

---

શ્રીકૃષ્ણનું સનાતન તે આ પરમધામ છે. ગોપો અને ગોપીઓના સમુદાયોથી વ્યાપ્ત જે ધામ ગોલોક એમ તેને જાણનારા ઉપદેશે છે. (૨૬) જેથી તે ધામ સર્વ પ્રકારે મનોહર માટે અતિશય દર્શનીય છે. તે ધામમાં જે જે રત્નાદિ વસ્તુ સમુદાય છે તે સર્વ દિવ્ય છે. (૨૭) તે ધામમાં પ્રકૃતિથી મુક્તભાવને પામેલા પુરુષો અને સ્ત્રીઓના પણ સુંદર અતિ પ્રકાશમાન અપરિમિત ભવનો છે જ. (૨૮) તેના મધ્ય પ્રદેશમાં કરોડો સૂર્યની માફક મનોહર અતિ શ્વેત વર્ણવાળું સચ્ચિદાનંદરૂપ મહાન તેજ વર્તે છે. (૨૯) જે તેજને અક્ષરબ્રહ્મ, સર્વાધાર તથા અમૃત સંજ્ઞાવાળું, આદિ અને અંતથી રહિત-અપરિચ્છિન્ન-સ્વયં જ્યોતિ-સનાતન, ઉપનિષદો કહે છે. (૩૦) અષ્ટાંગ યોગની સિદ્ધિ પામેલા યોગીઓ પોતાના દેહની અંદર મૂલાધારાદિ છ ચક્રોને ઉલ્લંઘન કરી બ્રહ્મરંધ્રમાં સહસ્રદલપદ્મમાં પ્રત્યક્ષ શ્રીકૃષ્ણના અનુગ્રહથી જે તેજ (અક્ષરબ્રહ્મરૂપ તેજ) જુએ છે. (૩૧) તે એ સર્વ ધામોથી અત્યુત્તમ કાલ માયાના ભયથી રહિત પ્રત્યક્ષ શ્રીકૃષ્ણનું બ્રહ્મપુર ધામ જાણવું. (૩૨) હે ભક્તો ! બ્રહ્મપુર ધામમાં શ્રીકૃષ્ણનું ચોતરફ વિસ્મય પમાડનારું દિવ્ય-અતિ સુંદર ભવન (મંદિર) વર્તે છે તે મંદિરની સુંદરતાને વર્ણન કરવા માટે હું સમર્થ નથી જ. (૩૩) તે મંદિર કરોડો સૂર્યોથી અતિશય પ્રકાશમાન જે રત્નના સ્તંભોથી અતિ પ્રકાશમાન તે મંદિર સમગ્ર સંપત્તિઓ અને અણિમાદિ સમગ્ર સિદ્ધિઓથી સેવાયેલું; (૩૪) એકાંતિક અસંખ્ય મુક્ત પુરુષોએ આશરેલું અને શ્રીકૃષ્ણની એકાંતિકી ભક્તિવાળી મુક્તભાવને પામેલી અસંખ્ય સ્ત્રીઓએ આશ્રય કરાયેલું છે. (૩૫) તે મંદિરમાં રમણીય સિંહાસનમાં રહેલાં; રાધા-લક્ષ્મી વગેરે પોતાની પત્નીઓએ સેવા કરાયેલા શ્રીકૃષ્ણ વિરાજે છે જ. (૩૬) કોઈપણ લોકમાં તેવું ભવન નથી જે, જે ભવનની સાથે શ્રીકૃષ્ણના ભવનની ઉપમા અપાય, માટે ઉપમાએ રહિત પુરાણજ્ઞોએ કહ્યું છે. (૩૭) હે શ્રેષ્ઠ વ્રતવાળા ભક્તો ! તે બ્રહ્મપુર ધામમાં કોટાનકોટિ મુક્ત પુરુષો અને સ્ત્રીઓના અપરિમિત દિવ્ય ભોગસ્થાનો છે જ. (૩૮) તે બ્રહ્મ-ધામમાં મુક્ત સ્ત્રી-પુરુષોના સર્વે ભોગો પણ દિવ્ય સુખરૂપ અને નિત્ય છે અને સર્વે ભોગોપકરણો પણ દિવ્ય, સુખરૂપ અને નિત્ય છે. (૩૯) જેમ પૃથ્વી લોકમાં પૃથ્વી આદિ પંચ ભૂતાત્મક મનુષ્યોના ભોગો પંચભૂતાત્મક છે તેમ બ્રહ્મપુરમાં ચૈતન્યમય દેહોવાળાં તે મુક્ત સ્ત્રી-પુરુષોના ભોગો ચૈતન્યરૂપવાળા છે જ. (૪૦) એ સર્વે ભોગો ભોગવનારા અને ભોગનાં ઉપકરણો તેજોમય, સત્ત્વાદિ પ્રાકૃત ગુણે રહિત, નાશે રહિત, સત્યરૂપ, જ્ઞાનરૂપ અને આનંદરૂપ છે, દિવ્ય તથા ઉપમાએ રહિત કહેલા છે. (૪૧)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

स्त्रियश्च पुरुषाश्चैते भवन्ति दिव्यमूर्तयः । अप्राकृतेन्द्रियप्राणा दिव्यालङ्कारवाससः ॥४२॥ कृष्णादेव सुखेच्छास्ति तत्र तेषां न चान्यतः । सुखं समं हि सर्वेभ्यो ददाति स च सर्वदा ॥४३॥ रूपं समृद्धिरैश्वर्यं स्थानं भोगाः सुखानि च । समान्येतानि सर्वेषां सच्चिदानन्दरूपिणाम् ॥४४॥ न्यूनत्वे चाधिकत्वे वा भोगादेस्तत्र सर्वथा । इच्छैवैकास्ति भोक्तृणां हेतुर्नान्यस्तु कर्हिचित् ॥४५॥ यथा कश्चित्समृद्धोऽपि स्वेच्छयैव नराधिपः । भोगान्भुङ्क्ते न भुङ्क्ते वा तथा तेऽपि निजेच्छया ॥४६॥ न कामवासना तेषां स्त्रीपुंसानां परस्परम् । अस्ति चैकैकरोम्णोऽपि तेषां तेजोऽर्ककोटिवत् ॥४७॥ तादृक्सकलमुक्ताङ्गतेजसोऽप्यधिकं महः । तद्धाम्नो ह्येकदेशस्थं भवतीत्यवगम्यताम् ॥४८॥ तादृशस्यापि तद्धाम्नः सकलं यन्महन्महः । तादृगेकतरस्यास्ति श्रीकृष्णाङ्घ्रिनखस्य वै ॥४९॥ स प्रभुर्द्विभुजस्तत्र राजते श्यामसुन्दरः । निजाङ्गातिमहःपुञ्जा-वृतत्वाच्छ्वेतदर्शनः ॥५०॥ श्रीदामनन्दप्रमुखैः पार्षदैर्दिव्यविग्रहैः । सेव्यमानः सितच्छत्रचामरादिभिरादरात् ॥५१॥ शिवब्रह्मादिभिर्नैकब्रह्माण्डाधीश्वरैर्नतैः । मुक्तैरन्यैश्चार्च्यमानो गन्धपुष्पांशुकादिभिः ॥५२॥ धर्मेण सह भक्त्या च भगैर्वेदैश्च संस्तुतः । आस्ते राजाधिराजश्रीर्भगवान् पुरुषोत्तमः ॥५३॥ स च तेषु स्वभक्तेषु दिदृक्षा स्वस्य यादृशी । येषां स्यात्तादृशं तेभ्यो दर्शनं स्वं ददाति हि ॥५४॥ केचिच्चतुर्भुजं केचित्पश्यन्त्यष्टभुजं तथा । केचित्सहस्रबाहुं तं तस्मिन् बृहति धामनि ॥५५॥

બ્રહ્મપુરધામમાં રહેતા પુરુષો અને સ્ત્રીઓ દિવ્ય મૂર્તિઓ-માયિક ઈન્દ્રિયો અને પ્રાણોએ રહિત-દિવ્ય અલંકારો અને વસ્ત્રો જેમને છે એવા છે. (૪૨) બ્રહ્મપુરધામમાં સ્ત્રીપુરુષોને સાક્ષાત્ શ્રીકૃષ્ણ પરમાત્માથી જ સુખની ઈચ્છા છે બીજી કોઈ વસ્તુથી સુખની ઇચ્છા નથી. તે શ્રીકૃષ્ણ પોતાના સમગ્ર ભક્તજનોને પણ સર્વ કાળે સરખું જ સુખ આપે છે. (૪૩) સચ્ચિદાનંદ રૂપવાળા સર્વેનું શરીર સૌન્દર્ય, સંપત્તિ, ઐશ્વર્ય, નિવાસસ્થાન, ભોગ્ય વસ્તુઓ અને સમૃદ્ધિના (ઉપભોગજન્ય) આનંદો સમાન છે. (૪૪) તે બ્રહ્મપુર ધામમાં ભોગાદિની ન્યૂનતા અથવા અધિકતામાં કારણ તો ત્યાં રહેલા ભોગોને ભોગવનારાં ભક્તજનોની એક કેવળ ઈચ્છા જ સર્વ પ્રકારે છે; બીજો કોઈ હેતુ ક્યારેય પણ નથી. (૪૫) જેમ કોઈ રાજા સમગ્ર ભોગોથી સંપન્ન હોવા છતાં પણ પોતાની ઇચ્છાથી જ ભોગોને ભોગવે છે અથવા નથી ભોગવતો તે પ્રકારે બ્રહ્મધામમાં રહેલા મુક્તો પણ પોતાની ઇચ્છાથી ભોગોને ભોગવે છે અથવા નથી ભોગવતા. (૪૬) બ્રહ્મધામમાં રહેલાં સ્ત્રી-પુરુષોને પરસ્પર કામવાસના નથી પરંતુ સર્વેને એક ભગવાનની સેવા કરવી એ જ વાસના છે; વળી બ્રહ્મપુરના મુક્તોના એક એક રોમનું તેજ પણ કરોડો સૂર્ય સમાન છે. (૪૭) તેવા પ્રકારનાં સમગ્ર મુક્તોના અંગના તેજથી પણ બ્રહ્મપુર ધામના એક અલ્પ પ્રદેશમાં રહેલું મહાતેજ અધિક છે આ પ્રકારે તમે જાણો. (૪૮) તેવા પ્રકારના મહાતેજ યુક્ત બ્રહ્મપુર ધામનું પણ સમગ્ર મહાતેજ છે તે પણ શ્રીકૃષ્ણ ભગવાનના ચરણકમળના સર્વ નખોમાંથી એક નખના તેજ જેટલું જ (અર્થાત્ તેજમાં અંતર્ભાવ પામી જાય તેવું) છે. (૪૯) બ્રહ્મપુરધામની અંદર રહેલા મહામંદિરમાં નવીન મેઘની માફક સ્નેહયુક્ત નીલ વર્ણથી સુંદર પોતાના શરીરના અતિશય તેજના સમુદાયથી આવરણ હોવાથી ચંદ્રમાની માફક શ્વેત વર્ણવાળા શ્રીકૃષ્ણ સદા દ્વિભુજ વિરાજે છે. (૫૦) દિવ્ય વિગ્રહવાળા શ્રીદામા-નંદ વગેરે જેમાં છે એવા સુનંદાદિ પાર્ષદોએ શ્વેત છત્ર અને બે ચામરો અને વીરણના વાળાના પંખાઓથી પરિચર્યા કરાયેલા; (૫૧) અનેક બ્રહ્માંડોના અધિપતિ શિવ, બ્રહ્મા, વિષ્ણુ વગેરે અને બીજા મુક્તોએ ચંદન,પુષ્પ, વસ્ત્રાદિથી પૂજાયેલા; (૫૨) ભક્તિ જે પોતાની પત્નીની સાથે ધર્મ પ્રજાપતિ અને છ ઐશ્વર્યાદિ અને ઋગાદિ ચાર મૂર્તિમાન વેદોએ સ્તુતિ કરાયેલા, અનેક કોટિ બ્રહ્માંડોના રાજાધિરાજની લક્ષ્મીવાળા ભગવાન પુરુષોત્તમ શ્રીકૃષ્ણ સદા વિરાજમાન છે. (૫૩) તે શ્રીકૃષ્ણ પૂર્વે કહેલા પોતાના ભક્તોમાં જે ભક્તોને જેવા પ્રકારની પોતાની મૂર્તિને જોવાની ઈચ્છા હોય તે ભક્તોને તેવા પ્રકારનું પોતાનું દર્શન આપે છે. (૫૪) તે કહ્યા પ્રમાણેના બ્રહ્મપુરમાં કેટલાક ભક્તો શ્રીકૃષ્ણને ચતુર્ભુજ જુએ છે, કેટલાક આઠ ભુજાવાળા જુએ છે તથા કેટલાક હજાર બાહુવાળા જુએ છે. (૫૫)

यदेतत्परमं धाम श्रीकृष्णस्योदितं जनाः! । अतर्क्यं तदगम्यं च सदानन्दरसात्मकम् ॥५६॥ तदीया येऽ वताराः स्युस्तेषामेव ह्युपासया । भक्तैः स्वधर्मनिरतैस्तत्प्रसादात्तदाप्यते ॥५७॥ इत्येतत्परमं गुह्यं मया ब्रह्मपुरं जनाः!। युष्मत्प्रीतिवशादद्य सङ्क्षेपेणोपवर्णितम् ॥५८॥ कृष्णाभक्ताय धूर्ताय नास्तिकाय कदाचन । रहस्यमेतद्वो भक्ता! वक्तव्यं नैव सर्वथा ॥५९॥ सुव्रत उवाच – इत्येतत्परमदयालुना प्रगीतं माहात्म्यं सदसि बृहत्पुरस्य तेन । श्रुत्वा ते सह मुनिभिर्जनाः प्रहर्षं सम्प्राप्य प्रभुमखिला ववन्दिरे तम् ॥६०॥ श्रीकृष्णं ननु भगवन्तमेव ते तं जानन्तस्तदपि च धाम तस्य राजन् !। निश्चित्याथ च वपुषोऽन्त आत्मलभ्यं तद्ध्येवेत्यपि विविदुः प्रहृष्टचित्ताः ॥६१॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे प्रबोधन्युत्सवे ब्रह्मपुरधामवर्णननामैकचत्वारिंशोऽध्यायः॥४१॥

सुव्रत उवाच – अथाज्ञप्ता भगवता स्वस्ववासान् ययुर्नृप! । सर्वे भक्ताः प्रभुं नत्वा स चापि निजमन्दिरम् ॥१॥ अनुत्साहा अपि निजान् देशान् गन्तुं जनाश्च ते । हरेराज्ञापरा रात्रौ पाथेयादीनि चक्रिरे ॥२॥ प्रभोः प्रासादिकं वस्तु भृत्वा पेशीषु युक्तितः । तन्मुखान्यप्यसीव्यंस्ते दूरदेशनयाय वै ॥३॥ वस्त्रपात्राध्वभक्ष्यादि कोष्ठलेषु निभृत्य च । योजयित्वा वाहनानि सज्जा आसन्नहर्मुखे ॥४॥ प्रातःकृत्यं विधायैव तुम्बिकाबद्धरज्जवः । सज्जा बभूवुर्मुनयः स्कन्धलम्बितपुस्तकाः॥५॥

હે જનો ! શ્રીકૃષ્ણનું સદા આનંદરસથી પરિપૂર્ણ સ્વરૂપવાળું જે આ બ્રહ્મપુર નામનું પરમ ધામ કહેલું છે તે સહુકોઈએ અતર્ક્ય અને અગમ્ય છે, પરંતુ શ્રીકૃષ્ણના જે અવતારો થાય તે અવતારોની ઉપાસનાથી પોતપોતાના ધર્મમાં નિષ્ઠાવાળા ભક્તોએ શ્રીકૃષ્ણના અવતારોના અનુગ્રહથી તે બ્રહ્મપુરધામને પમાય છે. (૫૬-૫૭) હે જનો ! આ પ્રકારે મેં અત્યન્ત રહસ્યરૂપ એ બ્રહ્મપુરધામ તમારી પ્રીતિને આધીન થઈને આજે સંક્ષેપથી વર્ણન કર્યું. (૫૮) હે ભક્તો ! શ્રીકૃષ્ણની ભક્તિએ રહિત, જનને ઠગનારો અને નાસ્તિક-જનને આ રહસ્યરૂપ બ્રહ્મપુરને ક્યારેય પણ સર્વ પ્રકારે કહેવું જ નહિ. (૫૯)

**સુવ્રતમુનિ કહે છે** : હે રાજન્ ! આ પ્રકારે પરમ દયાળુ શ્રીહરિએ સભામાં પોતાના ભક્તોને કહ્યું, આ બ્રહ્મપુરનું માહાત્મ્ય સાંભળીને મુનિઓની સાથે સમગ્ર જનો અત્યન્ત પ્રસન્ન થઈને શ્રીહરિને નમસ્કાર કરતા હતા. (૬૦)

હે રાજન્ ! તે મુનિઓ વગેરે સર્વ ભક્તજનો શ્રીહરિકૃષ્ણને જ આ નિશ્ચે ભગવાન જ છે એમ જાણતા સતા બ્રહ્મપુરધામ પણ શ્રીહરિકૃષ્ણનું જ છે એવો નિશ્ચય કરીને પ્રસન્ન ચિત્તવાળા થકા પોતપોતાના દેહના અંત સમયે તે બ્રહ્મપુરધામ જ પોતાને પ્રાપ્ય છે એમ પણ જાણતા હતા જ. (૬૧)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે પ્રબોધન્યુત્સવે બ્રહ્મપુરધામવર્ણન નામૈકચત્વા રિંશોऽધ્યાયઃ (૪૧)*

## અધ્યાય : ૪૨

## મુનિઓના સમુદાયોએ નાના પ્રકારની યુક્તિઓનાં દૃષ્ટાંતોથી શ્રીહરિની સર્વથી અધિકપણે સ્તુતિ કરી છે.

**સુવ્રત મુનિ બોલ્યા** : હે નૃપ ! પછી શ્રીહરિએ આજ્ઞા આપેલા સર્વે ભક્તો શ્રીહરિને નમસ્કાર કરી પોતપોતાના નિવાસસ્થાનમાં ગયા અને શ્રીહરિ પણ પોતાના નિવાસસ્થાનમાં ગયા. (૧) તે જનો પોતાના દેશમાં જવા માટે ઉત્સાહે રહિત હોવા છતાં પણ ભગવાન શ્રી સ્વામિનારાયણની આજ્ઞા-પરાયણ થકા તત્પર થઈને તે રાત્રિએ માર્ગમાં હિતકારી પાથેય (ભાતું) વગેરેની તૈયારી કરતા હતા. (૨) હે જનો ! શ્રીહરિની પ્રસાદીની વસ્તુ - સાકર વગેરે નાની કોથળીઓમાં ભરીને દૂર દેશ લઈ જવા માટે યુક્તિથી તેમનાં મોઢાં સીવતા હતા. (૩) તે જનો વસ્ત્રો, પાત્રો, માર્ગમાં જમવાનું પાથેય અને પ્રસાદી આદિકથી ભરેલી કોથળીઓ વગેરેને મોટા કોથળામાં મૂકી ગાડાં વગેરેમાં બળદ જોડીને પ્રતિપદાના પ્રાતઃકાળમાં તૈયાર થયા. (૪) દેશાન્તરમાં અજ્ઞાની જનોને બોધ આપવા શ્રીહરિએ પ્રથમથી આજ્ઞા કરાયેલા સાધુઓ, પ્રાતઃકાળમાં સ્નાનાદિ નિત્યકર્મ કરીને જ તુંબડાને મોઢે દોરડીઓ કૂવામાંથી જળ કાઢવા માટે જેમણે બાંધી છે અને ખભા ઉપર મૂક્યાં છે પુસ્તકો જેમણે એવા સતા તૈયાર થયા. (૫)

नृपाङ्गणमुपेत्यैव भगवद्दर्शनोत्सुकाः । तस्थुः सर्वेऽपि विप्राद्याः स्वस्कन्धार्पितयष्टयः ॥६॥ नारायणमुनिः सोऽपि तेभ्यो दर्शनदित्सया । भक्तप्रियोऽश्वमारुह्य निर्ययौ नगराद्बहिः ॥७॥ जनसम्मर्दभीत्येव निर्गच्छन्तं पुराद्बहिः । तमन्वयुर्जनाः सर्वे मुनयः पार्षदास्तथा ॥८॥ क्रोशार्धदूरां नृपतेर्दीर्घिकामेत्य च प्रभुः । भक्तानानन्दयंस्तस्थावश्वारूढः स वर्त्मनि ॥९॥ मुनीनां तत्र यूथानि जनसङ्घाश्च भूरिशः । वृन्दानि योषितां चाशु तं समेत्य ववन्दिरे ॥१०॥ अस्माकं नगरे प्रेष्या मुनयो भगवंस्त्वया । पुनस्ते दर्शनं शीघ्रमस्त्विति प्रार्थयन् जनाः ॥११॥ व्रजिष्यन्तोऽथ मुनयो नानादेशांस्तदाज्ञया । बद्धाञ्जलिपुटाः प्रीत्या तं प्रणम्य च तुष्टुवुः ॥१२॥ मुनय ऊचुः- स्वामिंस्त्वं परमेश्वरश्च परमं ब्रह्मासि वेदोदितं धृत्वादौ पुरुषाकृतिं विधिमरीच्यादिक्रमेणाखिलम् । विश्वं स्थावरजङ्गमात्मकमिदं शक्त्या सृजस्यात्मनः पातुं तत्तिमिकूर्मशूकरमुखा धत्से स्वतन्त्रस्तनूः ॥१३॥ देवान्साधुजनांश्च धर्ममभितो रक्षंश्च धर्मद्रुहो दैत्यान्हंसि धृताकृतिः प्रतियुगं धर्मप्रियस्त्वं विभो! । सर्वास्तास्तनवस्तवाखिलनिजैश्वर्येण युक्तास्तथा चक्राद्यायुधदर्शितातिमहसः सन्ति प्रतापश्रुताः ॥१४॥ मूर्तिस्ते भगवन्नियं त्विह नृणामज्ञानविच्छित्तये जाग्रत्स्वप्नसुषुप्तिभिः परिहृताऽवस्थाभिरब्जेक्षण! । धर्मं पारमहंस्यमेव दधती ब्रह्मस्वरूपस्थितिरुन्निद्रा भवपाशमोचनकरी वर्वर्ति सर्वोपरि ॥१५॥ श्रद्धा शान्तिरतिक्षमा निपुणता लज्जा तितिक्षा दया तुष्टिर्मैत्र्यभयं शमो दमतपो विद्या नयः सत्क्रिया । वैराग्योपरती विवेकविनयावष्टाङ्गयोगः स्मृतिरैश्वर्याणि महान्ति सन्ति भगवन्नेतानि मूर्ताविह ॥१६॥

હરિજનો અને મુનિઓ સર્વે પણ શ્રી સ્વામિનારાયણ ભગવાનના દર્શનમાં ઉત્સાહવાળા થઈ ઉત્તમ રાજાના ભવનના આંગણામાં આવીને જ ઊભા રહ્યા. તેમજ પોતાના ખભા ઉપર અર્પણ કરેલી છે વાંસની લાકડીઓ જેમણે એવા વિપ્ર વગેરે સર્વ જનો પણ ઊભા રહ્યા. (૬) ભક્તપ્રિય તે નારાયણ મુનિ પણ તેમને પોતાનાં દર્શન આપવાની ઈચ્છાથી પોતાના અશ્વ ઉપર બેસીને નગરથી બહારપ્રદેશમાં ગયા. (૭) જનોના ભીડાથી ભય પામેલા હોય ને શું ? એમ પુરથી બહાર નીકળતા શ્રી નારાયણ મુનિની પાછળ પાછળ સર્વે જનો અને મુનિઓ તથા પાર્ષદો પણ ચાલવા લાગ્યા. (૮) પ્રભુ શ્રીહરિ અર્ધો ગાઉ દૂર વર્તતી ઉત્તમ રાજાની વાવ્ય (રાધા વાવ્ય) ને પામીને ભક્તોને આનંદ આપતા સતા ઘોડા ઉપર બેઠા થકા માર્ગમાં ઊભા રહ્યા. (૯) મુનિઓના સંઘો તથા ઘણા જનસમૂહો અને હરિભક્ત સ્ત્રીઓના સમૂહો તત્કાલ ત્યાં શ્રીહરિને પામીને નમસ્કાર કરતા હતા. (૧૦) હે ભગવન્! તમોએ અમારાં નગરો અને ગામોમાં મુનિઓ મોકલવા. તમારાં દર્શન ફરીથી તત્કાળ થાઓ. આ પ્રમાણે જનો શ્રીહરિની પ્રાર્થના કરતાં હતાં. (૧૧) પછી મુનિઓ શ્રીહરિની આજ્ઞાથી નાના પ્રકારના દેશોમાં જતા સતા બન્ને હાથ જોડીને પ્રીતિપૂર્વક શ્રીહરિને પ્રણામ કરી સ્તુતિ કરવા લાગ્યા. (૧૨) હે સ્વામિન્ ! તમો વેદમાં કહેલા પરમેશ્વર છો.( 'तमीश्वराणां परमं महेश्वरम्' )એવી શ્રુતિ છે અને વેદમાં કહેલા પરમ બ્રહ્મ છો. ('नारायणःपरंब्रह्म' એવી શ્રુતિ છે.) પ્રથમ પુરુષાકૃતિ સહસ્ત્રશીર્ષ પુરુષ રૂપ સ્વીકાર કરીને ('जगृहे पौरुषं रूपम्' એમ ભાગવતમાં કહ્યું છે.) બ્રહ્મા અને તેમના પુત્ર મરીચિ વગેરે ક્રમથી સમગ્ર સ્થાવર જંગમાત્મક આ વિશ્વ પોતાના યોગૈશ્વર્યથી સર્જો છો તે વિશ્વનું રક્ષણ કરવા માટે સ્વતંત્રપણે મત્સ્ય, કચ્છ, વરાહ નૃસિંહાદિ મૂર્તિઓ ધારણ કરો છો. (૧૩) હે વિભો ! ધર્મવત્સલ તમો દરેક યુગે અવતાર ધારણ કરીને દેવો, સાધુજનો અને ધર્મનુ ચોતરફ રક્ષણ કરવા માટે ધર્માદિનો દ્રોહ કરનારા દૈત્યોનો નાશ કરો છો, તમારી તે મૂર્તિઓ સમગ્ર પોતાના ઐશ્વર્યથી યુક્ત તથા સુદર્શનાદિ-કૌમોદકી ગદા વગેરે આયુધોથી બતાવ્યું છે અતિશય તેજ જેમણે એવી અને પોતાના પ્રતાપથી પ્રસિદ્ધ છે એવી છે. (૧૪) હે ભગવન્ ! હે કમલનયન ! તમારી આ અમારા નેત્રના વિષયવાળી મૂર્તિ તો આ લોકમાં વર્તતા મનુષ્યોના માયાના સ્વરૂપવાળા અજ્ઞાનની નિવૃત્તિ માટે પ્રાદુર્ભાવ પામી છે; જાગૃત, સ્વપ્ન અને સુષુપ્તિ અવસ્થાઓથી રહિત દિવ્ય છે. પારમહંસ્ય ધર્મને જ ધારણ કરતી, જેના ધ્યાનથી સ્વાશ્રિતજનો નિરંતર બ્રહ્મ-સ્વરૂપની સ્થિતિ પામે છે એવી; માયાના કાર્યરૂપ નિદ્રાથી રહિત, સંસારના પાશથી મુકાવનારી તમારી મૂર્તિ સર્વોપરી અતિશય વર્તે છે. જે માટે તમો અવતારી, મત્સ્યાદિ સર્વે તમારા અવતારો છે. (૧૫) હે ભગવન્ ! શ્રદ્ધા, શાંતિ, અતિ ક્ષમા, નિપુણતા, લજ્જા, તિતિક્ષા, દયા, તુષ્ટિ, (સંતોષ) મૈત્રી, અભય, શમ, દમ, તપ, વિદ્યા, નય, (નીતિ) સદાચાર, વૈરાગ્ય, ઉપરતિ, વિવેક, વિનય, અષ્ટાંગયોગ, સ્મૃતિ : આ શ્રદ્ધા વગેરે મહાઐશ્વર્યો આ મૂર્તિમાં નિત્ય વર્તે છે. (૧૬)

निष्कामत्वमनन्यसाध्यमुरुधा निःस्वादनिर्लोभते निःस्नेहत्वममानिता विमदता ज्ञानं च विज्ञानयुक् । इत्याद्याः खलु शक्तयस्तु भगवन्मूर्त्याऽनयाऽऽविष्कृतास्तन्वा नापरयाऽस्त्यतो मुनिवरब्रह्मादिसेव्या त्वियम् ॥१७॥ येऽत्रात्मीयकुकर्मतो भुवि नरा जाताश्च नीता वशं सर्गेणालमधर्मजेन भगवंस्तान्दुर्निवार्यात्ततः । को वा मोचयितुं क्षमस्त्वदपरो दैत्यांशपाषण्डिनां शास्त्रैः कल्पितयुक्तितर्कनिवहैर्बम्भ्रम्यमाणान्भुवि ॥१८॥ स्वीयानां पासि सदा ह्यधर्मजनकुलात्त्वं दम्भमायाकलिहिंसा-क्रोधदुरुक्तिमृत्युनिकृतिव्यामोहमुख्याज्जनान् । तामिस्रादिमपञ्चकादपि च तानाविद्यकात्पालयन्नष्टं पारमहंस्यमात्ममहसा धर्मं मुदाऽपप्रथः ॥१९॥ ये केचिद्गुरवोऽत्र वैन्यमखरुट्शक्रात्तहाताकृतीर्बिभ्राणा धनलोलुपा विनियमा जैह्वे च शैश्ने रताः । शास्त्रार्थांश्च कुतर्कयुक्त्यभिहतान्स्वान्बोधयन्तो जनांस्तेऽद्य त्वन्महसा तमांसि तरणेर्भासेव यान्ति क्षयम् ॥२०॥ लोकेऽस्मिन्हि नराः स्त्रियश्च कलिना कामेन चाप्यर्दिताः सर्वे वानरतुल्यतामुपगताः सन्ति प्रभो ! निस्त्रपाः। यक्षा अत्तुमिव द्रुता विधिमपि प्रायो नराः साम्प्रतं स्वैरिण्यादय एव सन्ति वनितास्त्रेधा बलास्योद्गताः ॥२१॥ तानेतान्कृपया त्वमेव सदय ! त्रातुं समर्थोऽसि वै प्रागुक्तान्स्वसमानशीलिन इमे यस्माद्भजन्ते गुरून् । प्रायः शिष्यपरम्परां तु गुरवो धावन्त्यदेवा यथा ब्रह्माणं जघनोद्भवाः खलु गतिस्तेषां कथं स्याच्छुभा ॥२२॥

---

હે ભગવન્ ! તમારા વિના બીજા કોઈથી પણ સાધ્ય કરવા માટે અશક્ય; ઘણા પ્રકારે નિષ્કામપણું, નિઃસ્વાદીપણું, નિર્લોભપણું, નિઃસ્નેહતા, નિર્માનિતા, મદેરહિતપણું, વિજ્ઞાને સહિત જ્ઞાન, આ બધા અનન્ય સાધ્ય છે તે સર્વે નિષ્કામત્વાદિ શક્તિઓ આ મૂર્તિથી આવિષ્કાર કરેલી છે બીજા કોઈ અવતારે આવિષ્કાર કરેલી નથી માટે આ મૂર્તિ સનત્કુમારાદિ નિવૃત્તિધર્મમાં નિષ્ઠાવાળા શ્રેષ્ઠ મુનિઓ અને બ્રહ્મભાવને પામેલા શ્વેત મુક્તો વગેરે મુખ્ય જેમાં છે એવા અક્ષરમુક્તોએ સેવા કરવા યોગ્ય છે. બીજા તમારા અવતારોના ઉપાસ્યપણામાં પણ અનન્ય સાધારણ નિત્ય ગુણોના નિધિ અવતારી તમો એક જ અમારે પરમ ઉપાસ્ય છો. (૧૭) હે ભગવન્ ! આ પૃથ્વીમાં પોતાના પાપના કર્મવશથી ઉત્પન્ન થયેલા, દુર્નિવાર્ય અધર્મ સર્ગ જે લોભ-કામાદિરૂપથી અત્યન્ત વશપણાને પમાડેલા જે મનુષ્યો છે અને વળી જેઓ દૈત્યોના અવતારો જે વેદ વિરુદ્ધ આચારવાળા ગુરુઓ તેમણે પોતાની કલ્પિત બુદ્ધિથી રચેલા-વિતંડાના વાદોના સમૂહો જેમાં છે એવાં શાસ્ત્રોના શ્રવણથી પૃથ્વીમાં વારંવાર વિભ્રાંત બુદ્ધિવાળા થયા હોય; તે પુરુષોને દુઃખથી પણ નિવારણ કરવા માટે અશક્ય એવા અધર્મસર્ગથી રક્ષણ કરવા માટે તમારાથી બીજો કોણ શક્તિમાન છે ? કોઈ પણ નથી. (૧૮) તમો દંભ, કપટ, ક્લેશ, હિંસા, ક્રોધ, કષ્ટજનક વચનો, મૃત્યુ, શઠતા, મૂઢભાવ વગેરે મુખ્ય જેમાં છે એવા અધર્મ વંશના સમૂહથી પોતાનાં જનોનું નિરંતર રક્ષણ કરો છો. અવિદ્યાનાં કાર્યોથી અને તામિસ્ર મુખ્ય જેમાં છે એવા પંચકથી -(તામિસ્ર, અંધતામિસ્ત્ર, તમ, મોહ, મહામોહ એ જે અવિદ્યાની આવૃત્તિ રૂપ પંચક તે થકી) પોતાનાં જનોનું રક્ષણ કરતાં તમોએ કાલબલથી નષ્ટપ્રાય થયેલો પારમહંસ્યધર્મ અહિંસા બ્રહ્મચર્યાદિ લક્ષણ સદાચારનો પોતાનાં સામર્થ્યથી વિસ્તાર કર્યો. (૧૯) પૃથુ રાજાના સોમા અશ્વમેધ યજ્ઞ નિમિત્તે ક્રોધવાળા ઈન્દ્રે પ્રથમ ગ્રહણ કરેલા છત્રીસ પાખંડ વેષો તેને લોકોને ઠગવા માટે ધારણ કરનારા, ધનના લોભવાળા, શૌચાદિ નિયમોથી રહિત, રસના ઈન્દ્રિયના પોષણમાં તથા શિશ્ન ઈન્દ્રિયની તૃપ્તિમાં તત્પર, પોતે જ કુતર્કની યુક્તિઓથી ખંડન કરાયેલા શાસ્ત્રના અર્થનો પોતાના સ્વાર્થ માટે સ્વાશ્રિતોને અવળો ઉપદેશ કરતા, આ લોકમાં જે અસુર ગુરુઓ તે હાલમાં સૂર્યની કાંતિથી અંધકારો જ જેમ તેમ તમારા પ્રતાપથી નાશ પામે છે. (૨૦) હે પ્રભો ! આ લોકમાં સર્વે પુરુષો અને સ્ત્રીઓ કલિયુગ અને કામથી પીડા પામેલા માટે જ વાનરોની સમાનતાને પામ્યા સતા લાજે રહિત છે. બ્રહ્માને પણ ભક્ષણ કરવા માટે દોડતા યક્ષો જેમ તેમ હાલમાં ઘણું કરી પુરુષો છે. બલ નામના દૈત્યના મુખથી ઉત્પન્ન થયેલી ત્રણ પ્રકારની સ્વૈરિણી, કામિની અને પુંશ્ચલી સ્ત્રીઓ છે. (૨૧) હે દયાસાગર ! માટે આ પ્રકારનાં પૂર્વે કહેલાં પાપબુદ્ધિવાળાં જનો પ્રથમ કહેલા પોતાના સમાન સ્વભાવ અને આચરણવાળા ગુરુઓને ભજે છે; માટે અતિ દુષ્ટ એ સ્ત્રીઓ અને પુરુષોને તમો જ કૃપા કરી દુરાચારની પ્રવૃત્તિમાં કારણભૂત કલિ અને કામથી રક્ષણ કરવા માટે સમર્થ છો. એમના ગુરુઓ તો જેમ બ્રહ્માના જઘનથી ઉત્પન્ન થયેલા અસુરો બ્રહ્માની પાછળ મૈથુન કરવા દોડ્યા હતા તે પ્રકારે પોતાના શિષ્ય, પુત્ર, પૌત્રાદિને લાજે રહિત થઈને મૈથુન કરવા દોડે છે તેવા પ્રકારના શિષ્યો અને ગુરુઓની શુભ ગતિ કેમ થાય ? ના જ થાય માટે તમો રક્ષણ કરવા સમર્થ છો. (૨૨)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

ईदृक्पातकदुर्विधान् हतधियस्तान् सम्पदाऽऽसुर्यया ऋद्धान्संसृतिकष्टतस्त्वमवितुं स्वैश्वर्यमाविष्कुरु। दैवीं सम्पदमाश्रितांस्तु भगवंस्त्वद्भक्तिबोधोद्यताः सद्यः साधव एव धाम परमं ते प्रापयन्ति क्षितौ ॥२३॥ सच्छास्त्रीयपदैश्च युक्तिसहितैस्तान्सत्पथं बोधयन्नन्तर्यामितया तदीयहृदयाभीष्टांश्च देवान्विदन्। तत्तन्मूर्तिधरो मनांसि सहसा स्वस्मिंस्त्वमाकर्षयन्नैश्वर्येण निजेन तद्धृदयगो भूयाः समाधौ विभो! ॥२४॥ ऐश्वर्यं महदेतदेव तव वै प्रोक्तं ह्यसाधारणं दुष्टानामपि यन्मनोनियमनं मूर्तौ तव स्याद्द्रुतम् । कामाहङ्कृतिकोपमत्सरमुखैर्दैत्यैर्हतैस्त्वद्यशः पुत्राणां हननाद्दितेरतितरां ख्यातं भविष्यत्यपि ॥२५॥ दैत्या ये बलिनो हिरण्यकशिपुप्राधानिकाश्चात्मनो रूपैर्दिक्पतिचन्द्रभास्करमुखैर्यज्ञेषु भागग्रहाः। स्वीयं तेऽपि मनो न यन्तुमशकन्कामक्रुधाद्यैर्भृशं क्लिष्टास्तद्भगवंस्त्वमान्तररिपून्निघ्नन्नसीशेश्वरः ॥२६॥ कर्तुं नैव पराभवं तव तु ते किञ्चित्कथञ्चित्क्वचित्कामाद्या बलिनोऽपि वैरिण इमे शक्ता भवन्ति प्रभो! । यस्मात्त्वत्पदसेवका अपि च ये जेतुं समर्था न तान्साक्षात्तर्हि परात्परे भगवति त्वय्येव के नाम ते ॥२७॥ ये दैत्यास्तु पुरा त्वया विनिहता रूपैर्नृसिंहादिभिस्ते देवारितया प्रसिद्धिमगमन्वेदे च लोकेऽखिले । एते तु प्रथिता भवन्त्यगणितब्रह्माण्डकोटिभ्रमज्जीवेशारय इत्यमून्हतवता सर्वोपरि स्थीयते ॥२८॥

---

આ પ્રકારે દુર્ગતિને પામેલા, નાશ પામેલી બુદ્ધિવાળા, આસુરી સંપત્તિથી યુક્ત તે જનોને સંસાર કષ્ટથી તમો રક્ષણ કરવા માટે તમો પોતાના પ્રતાપને અતિશય પ્રગટ કરો. (શંકા કરે છે : તમો પણ સમર્થ છો માટે તમો રક્ષણ કરો એમ કહેતા હો તો કહીએ છીએ.) હે પ્રભો ! પૃથ્વીમાં દૈવી સંપત્તિવાળાં જનોને તમારી ભક્તિના આચરણના ઉપદેશપરાયણ સાધુઓ તમારા પરમ ધામને તત્કાલ પમાડીએ છીએ પરંતુ દુર્ગતિને પામેલાઓના રક્ષણ કરવામાં અમો શક્તિમાન નથી માટે તમો જ તેમનું રક્ષણ કરો. (૨૩) હે વિભો ! તમો યુક્તિઓએ સહિત વેદાદિ સત્શાસ્ત્રોનાં વાક્યોથી તે જનોને સન્માર્ગનો ઉપદેશ આપતા થકા તે તે જનોના મનમાં ઈચ્છેલા દેવોને અન્તર્યામીપણે જાણતા સતા પોતાના સ્વરૂપમાં તેમનાં મનોને તત્કાલ જ આકર્ષણ કરતા પોતાના આશ્ચર્યથી તેના તેના અભીષ્ટ દેવની મૂર્તિ ધારણ કરીને સમાધિમાં તેમના હૃદયમાં પ્રાપ્ત થયેલા થાઓ : એમ કરવાથી તો તમારું ઐશ્વર્ય જોઈને આનંદ પામેલા તે તમોને સર્વ કારણ જાણી તમારો આશ્રય કરી શુદ્ધપણાને પામેલા તમારા ધામમાં જશે જ. (૨૪) હે સ્વામિન્ ! તમારી મૂર્તિમાં, દુર્ગતિવાળાં જનોને પણ મનનું નિયમન તત્કાલ થાય એ તમારું અતિશય અને અસાધારણ ઐશ્વર્ય કહેલું છે. તમારાં આશ્રિત થયેલા દુષ્ટ જનોનાં અંતઃકરણોથી નાશ પમાડ્યાં છે કામ, અહંકાર, ક્રોધ, મત્સર, મુખ્ય જેમાં છે એવા અધર્મસર્ગરૂપ દૈત્યોના વિનાશથી તમારો યશ, દિતિના હિરણ્યકશિપુ વગેરે પુત્રો (દૈત્યો)ના નાશ કરવા થકી પણ અત્યન્ત પ્રસિદ્ધિ પામશે. (૨૫) હે ભગવન્ ! દિશાઓના ઈશ્વરો, ચંદ્ર અને સૂર્ય મુખ્ય જેમાં છે એવાં પોતાનાં રૂપોથી (તેમના દ્વારા) યજ્ઞોમાં હવિષ્યાન્નના ભાગને અપહરણ કરનારા હિરણ્યકશિપુ મુખ્ય જેમાં છે એવા મહાબલવાન અસુરો અને દૈત્યો તેપણ કામ, ક્રોધાદિથી અત્યન્ત પીડા પામ્યા સતા પોતાના મનને વશ કરવા સમર્થ થયા નહિ તે અન્તઃશત્રુઓ; કામાદિને નાશ કરનારા તમો ઈશ્વરોના પણ ઈશ્વર પરમેશ્વર છો. (૨૬) હે પ્રભો ! અતિશય બળવાન એવા પણ તે કામાદિ શત્રુઓ તે તમારો કંઈ પણ પરાભવ કરવા માટે ક્યારેય પણ શક્તિમાન થતા નથી; જે માટે તમારાં ચરણકમળનાં ઉપાસક એવા જે જનો તેને પણ તે શત્રુઓ પરાભવ પમાડવા માટે શક્તિમાન થતા નથી, તો સર્વથી પર જે અક્ષર તેથી પણ પર-અનંત ઐશ્વર્યના નિધિ તમારે વિષે તે કામાદિનું કંઈ જોર ચાલે નહિ, તેમાં શું કહેવું ? (૨૭) તમોએ પૂર્વે નૃસિંહાદિરૂપ-અવતારોથી જે હિરણ્યકશિપુ વગેરે અસુરોનો નાશ કર્યો તેતો વેદ, સ્મૃતિ, ઈતિહાસ, પુરાણાદિમાં તથા સમગ્ર ભુવનમાં દેવોના શત્રુપણે પ્રસિદ્ધિ પામેલા હતા; એ કામાદિ તો અસંખ્ય બ્રહ્માંડોની કોટીઓમાં ભમતાં સ્થાવર-જંગમ પ્રાણીઓ અને બ્રહ્મા-શિવ વગેરેને પણ અનંત દુઃખ અને દુષ્કીર્તિ આપનારા શત્રુઓ પ્રસિદ્ધ છે : આવા પ્રકારના કામાદિને નાશ કરનારા તમોએ અવતારી હોવાથી સર્વોપરિ-સર્વ અવતારોના ઉપરપણે રહેવાય છે. (૨૮)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

ये त्वां संसृतिबन्धमुक्तय इह ध्यातुं यतन्ते जनास्तेषां विघ्नकरा अपि ध्रुवमिमे सन्तीत्यतः पाहि तान् । देत्यानां हननं पुरा यदकरोस्तस्मादपि ज्यायसीमेतां ते तु कृतिं विदन्ति भुवि ये ते सूक्ष्मदर्श्युत्तमाः ॥२९॥ देवा वा दनुजा नराश्च ऋषयस्तेषां च नार्योऽपि वा लब्ध्वा प्राक्पदवीमिहातिमहतीं ये ये च्युतास्तत्पदात् । ते कामेन च मत्सरेण च रुषा मानेन लोभेन वा तस्मात्त्वं भुवि तेभ्य एव जनतां पातुं सदैवार्हसि ॥३०॥ धन्यः कोसलदेशजः सह निजैः श्रीदेवशर्मा द्विजो धन्या प्रेमवती च योषिदपि यन्नारायणोऽभूः स्वयम् । धन्यास्तिष्यभवा अपीह च वयं त्वत्पादपद्मेक्षणास्तस्मै श्रीहरये नमो भगवते तुभ्यं महावर्णिने ॥३१॥ सुव्रत उवाच – इति विधाय हरेः स्तवनं च तं मुनिगणाः क्षितपाल ! ववन्दिरे । सपदि तानभिनन्द्य धरातले विचरितुं नृहिताय स चादिशत् ॥३२॥ यथावन्मानयित्वैव भक्तान् सर्वान्स ईश्वरः। आज्ञाप्य गच्छन्त्विति तान्साश्रुनेत्रान्यवर्तत ॥३३॥ अध्येतुं किमु वेगसौष्ठवमसौ पांशुच्छलेनागतैश्चेतोभिः समुपास्यमानचरणं नृणामणुत्वाङ्कितैः । अश्वं काञ्चनवर्णमात्मचरणस्पर्शेन सन्द्रावयन्सद्यः प्राप पुरं पुरातनमुनिः सङ्गीतकीर्तिर्निजैः ॥३४॥ नैपुण्यं निजवाजिनः स भगवानास्कन्दिते धौरिते पश्यन् रेचितवल्गितप्लुत इति ह्यानन्दयन्स्वाश्रितान्। सद्यः प्राप्य पुनर्मुनींश्च जनतामग्रेऽपि तेषां व्रजन् हृष्टांस्तान्विदधत् पुनश्च नगरीं प्रायात्स्वचेतोहरः॥३५॥

---

હે હરે ! આ લોકમાં જે જનો સંસારના બંધનથી મુક્તિ માટે તમોને ધ્યાન કરવા માટે પ્રયત્ન કરે છે તેઓને દેશકાલાદિથી લગારેક પ્રમાદ કરતા જનોને પણ વિઘ્ન કરનારા આ કામાદિ નિશ્ચે છે માટે કામાદિથી તમારા આશ્રિતોનું રક્ષણ કરો. હે ભગવન્ ! પૂર્વે હિરણ્યકશિપુ વગેરેનું હનન, જે તમોએ કર્યું તેથી પણ અંતઃશત્રુ કામાદિના નાશરૂપ તમારું મહાન ઐશ્વર્ય પૃથ્વીમાં જે જનો સૂક્ષ્મ બુદ્ધિવાળા છે તે તો સર્વ ઐશ્વર્યથી અધિક જાણે છે; સ્થૂળ બુદ્ધિવાળા જાણતા નથી. (૨૯) હે ભગવન્ ! દેવો, દાનવો, નરો, ઋષિઓ અને તેઓની સ્ત્રીઓ પણ આ લોકમાં પ્રથમ અતિ મોટી પદવી પામીને જે જે દેવાદિક પોતાના સ્થાનથી ભ્રષ્ટ થયેલા છે તે કામ, મત્સર, ક્રોધ, માન અથવા લોભથી ભ્રષ્ટ થયેલા છે માટે તમો જ પૃથ્વીમાં સ્વાશ્રિત સમુદાયને કામાદિથી રક્ષણ કરવા હંમેશા યોગ્ય છો. (૩૦) હે ભગવન્ ! કોસલ દેશમાં ઉત્પન્ન શ્રી દેવ શર્મા બ્રાહ્મણ શ્રી ધર્માવતાર હરિપ્રસાદ જેમનું બીજું નામ છે તે પોતાનાં સંબંધી જનોની સાથે કૃતાર્થ છે; મૂર્તિના અવતારરૂપ ભક્તિ તેમનાં પત્ની પણ ધન્ય છે જેનાથી નારાયણ મુનિ નામે પુરુષોત્તમ તમો આવિર્ભાવ પામેલા છો. આ લોકમાં કલિયુગમાં ઉત્પન્ન થયેલા મુનિઓ, તમારા આશ્રિતો અને બીજાં પણ જનો જે તમારા ચરણકમળના દર્શન કરતા થકા ધન્ય થયાં છીએ; એવા ભગવાન-મહાવર્ણી તમો શ્રીહરિને અમો શરીર, વાણી અને મનથી નમસ્કાર કરીએ છીએ. (૩૧)

**સુવ્રત મુનિ કહે છે :** હે પ્રતાપસિંહ રાજન્ ! આ પ્રકારે મુનિગણો શ્રી હરિકૃષ્ણ ભગવાનની સ્તુતિ કરીને શ્રીહરિને વંદન કરવા લાગ્યા. તે શ્રીહરિ મુનિગણોની પ્રશંસા કરી પોતાની એકાંતિક ભક્તિના ઉપદેશથી સમગ્રજનોના કલ્યાણ માટે પૃથ્વીમાં વિચરણ કરવા માટે તત્કાલ આજ્ઞા આપતા હતા. (૩૨) મહા સમર્થ પરમેશ્વર દેશાન્તરથી આવેલાં પોતાનાં ભક્તજનોને યથાયોગ્ય માન આપીને જ પોતાના વિરહની વ્યથાથી આંખમાં આંસુવાળાં જનોને, સુખેથી પોતપોતાના દેશમાં જાઓ : આ પ્રકારે આજ્ઞા આપી પાછા ફર્યા. (૩૩) પોતાનાં ભક્તજનોએ ગાયેલી છે સત્કીર્તિ જેમની એવા પુરાતનમુનિ શ્રીહરિ અશ્વના ખુરોથી ઊડેલી ધૂળના નિમિત્તથી શિષ્યભાવથી આવેલાં, (જાણે કે ધૂળનાં કણરૂપે ગતિ વિશેષ શીખવા આવેલા), જનારાં ભક્તજનોનાં અણુપરિમાણ મનોએ વેગનું વિશેષ સામર્થ્ય ભણવા માટે સમુપાસ્યમાન છે ચરણ જેનાં (જેમ શિષ્યો ગુરુનાં ચરણો સેવે છે તેમ રજકણો પણ અશ્વોનાં ચરણોને સેવે છે.) એવા લાલ-પીળા (સોનેરી) વર્ણવાળા અશ્વને પોતાના ચરણના સ્પર્શથી ગતિવિશેષ દેખાડવા માટે દોડાવતા સતા તત્કાલ પુરમાં આવ્યા. (૩૪) શ્રીહરિ અતિ વેગવાળા પોતાના અશ્વની આસ્કન્દિત, ધૌરિત, રેચિત, વલ્ગિત અને પ્લુત : આ પાંચ પ્રકારની ગતિઓમાં પ્રવીણપણું જોતા અને બીજાં જનોને બતાવતા પોતાના દેશમાં જતાં ભક્તોને આનંદ આપતા ફરી તત્કાલ જ રાધાવાવ્યથી આગળ જતા મુનિઓને પોતાનાં દર્શન આપવાથી હર્ષિત કરતા પોતાના જનોનાં ચિત્તો પોતાની મૂર્તિમાં આકર્ષણ કરતા ફરીથી પણ દુર્ગપુરમાં ગયા. (૩૫)

**ते तु भक्तजनाः सर्वे यथादृष्टं तमीश्वरम् । ध्यानेन पथि पश्यन्तः स्वस्वदेशान् ययुस्ततः ॥३६॥ हरिश्च तत्र नगरे संप्राप्य नृपमन्दिरम् । स्ववेदिमभितश्चाश्वं काष्ठामक्रामयद्धसन् ॥३७॥ आनन्दयन् जयामुख्या योषितोऽपि स ईश्वरः । अश्वेन कारयामास गतमर्धपुलायितम् ॥३८॥ ततो वाहात्समुत्तीर्य नारायणमुनिर्नृप !॥ निजमन्दिरमभ्येत्य निषसादासने सुखम् ॥३९॥ स्वस्थचित्तस्ततः स्वामी प्रसन्नमुखपङ्कजः । स्तुवन् जयां च ललितां सोमादीन्प्राह पार्षदान् ॥४०॥ आसीन्मद्धृदये यादृक्तादृगेवोत्सवो महान् । जातोऽयं तेन हृदि मे भृशं हर्षोऽद्य विद्यते ॥४१॥ नैव किञ्चिदपि न्यूनमासीन्नूनमिहोत्सवे । न शक्यो हि नृपैः कर्तुमीदृशस्तु महोत्सवः ॥४२॥ न सन्त्येतादृशा अत्र मनुष्यास्तु भुवस्तले ललितेव जयैकास्ति जयेव ललिता ननु ॥४३॥ उत्तमस्तूत्तमो नूनं पितुरप्यधिको गुणैः । राजाऽनुपम एवास्ति भक्त आत्मनिवेदनी ॥४४॥** सुव्रत उवाच - **निजभक्तजनप्रशंसनं विदधत्येवमुदारकर्मणि । क्षितिपाल! महामुनीश्वरे तमुपायन्नबलाः समर्चितुम् ॥४५॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे प्रबोधन्युत्सवे देशान्तरागतभक्तसङ्घप्रत्येषणे मुनिसङ्घकृतनारायणस्तुति-निरूपणनामा द्विचत्वारिंशोऽध्यायः ॥४२॥

सुव्रत उवाच -**ब्रह्मचर्यव्रतपरा जया च ललिता रमा । समीपमाययुस्तस्य गृहीतार्हणपाणयः ॥१॥ अमरीप्रमुखाश्चान्या योषितोऽप्यर्चनोत्सुकाः । नारायणस्य तास्तिस्रो मुख्या अन्वाययुस्तदा ॥२॥**

માર્ગે ચાલ્યાં જતા સર્વે ભક્તજનો મુનિઓ વગેરે તો જેવા જોયા હતા તેવા શ્રીહરિને ધ્યાનથી માર્ગમાં અને પોતાના હૃદયમાં પણ જોતા સતા દુર્ગપુરથી પોતપોતાના દેશમાં ગયા. (૩૬) શ્રીનારાયણ મુનિ દુર્ગપત્તનમાં ઉત્તમરાજાના ભવનને પામીને લીંબડાના વૃક્ષ નીચે વર્તતી વેદિકાની ચોતરફ હસતા સતા પોતાનો અશ્વ થોડો સમય (પાંચ ક્ષણપર્યંત) ફેરવતા હતા. (૩૭) શ્રીહરિ જયા વગેરે સ્ત્રીઓ અને ઉત્તમાદિ ભક્તોને આનંદ પમાડતા સતા પોતાના ઘોડા પાસે 'અર્ધ પુલાયિત' નામની ગતિવિશેષ કરાવતા હતા. (૩૮) હે રાજન્ ! પછી નારાયણ મુનિ પોતાના અશ્વથી ઊતરીને પોતાના નિવાસ ભવનમાં આવીને સુખેથી પોતાના શ્રેષ્ઠ આસનમાં બિરાજમાન થયા. (૩૯) તે પછી સર્વના સ્વામી શ્રીહરિ તે સમસ્ત ભક્તજનો અને મુનિઓને વિદાય આપીને સ્વસ્થ ચિત્તથી તેમનો પોતા વિશે વર્તતો ભક્તિપ્રકર્ષ અનુસ્મરણ કરીને પ્રસન્ન મુખકમળવાળા થઈને ભગવત્સેવૈકપરાયણ જયા -લલિતાની પ્રશંસા કરતા થકા સોમવર્મા વગેરે પાર્ષદોને કહેવા લાગ્યા : (૪૦) હે પાર્ષદો ! મારા મનમાં જેવો ઉત્સવ કરવાનો હતો તેવોજ આ મહોત્સવ થયો તેથી મારા મનમાં આજે અતિશય હર્ષ છે. (૪૧) આ ઉત્સવમાં કંઈ પણ ન્યૂનતા હતી નહિ, નિશ્ચે આવો મહોત્સવ તો રાજાઓથી પણ કરવા માટે શક્તિમાન થવાય નહિ. (૪૨) આ ભૂતલમાં જયાદિ સમાન તો કોઈ મનુષ્યો જ નથી. જયા લલિતાના જેવાં એક જ છે અને લલિતા જયાની જેવાં એક જ છે. (૪૩) સ્વધર્માદિ ગુણોથી પોતાના પિતાથી પણ અતિ શ્રેષ્ઠ આત્મનિવેદી ભક્ત ઉત્તમ રાજા તો સર્વોત્તમ છે માટે જ ઉપમા રહિત અનુપમ જ નિશ્ચે છે. (૪૪)

હે પૃથ્વીપાલ ! આ પ્રકારે મહાચરિત્રવાળા મુક્તાનંદાદિ મહામુનિઓના પતિ શ્રીહરિ પોતાનાં ભક્તજનોની પ્રશંસા કરતા હતા તે સમયે (આગળ કહે છે તેવી) ભક્ત સ્ત્રીઓ શ્રીહરિને પૂજવા માટે આવી. (૪૫)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે પ્રબોધન્યુત્સવે મુનિસંઘકૃતનારાયણસ્તુતિ નિરૂપણનામા દ્વિચત્વારિંશોऽધ્યાયઃ (૪૨)*

## અધ્યાય : ૪૩

## ગઢપુરમાં રહેનારાં જયા, રમા વગેરે ભક્ત સ્ત્રીઓએ આદરપૂર્વક શ્રીહરિની સ્તુતિ કરી તે નિરૂપણ કરેલું છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! જયા, લલિતા અને રમા પોતાને યોગ્ય બ્રહ્મચર્યવ્રતના આચરણપરાયણ, ગ્રહણ કરી છે પૂજાની સામગ્રીઓ હાથમાં જેમણે એવી સતી શ્રીહરિની સમીપમાં આવી. (૧) તે સમયે અમરી છે મુખ્ય જેમાં એવી અમલા વગેરે બીજી પણ કેટલીક સ્ત્રીઓ શ્રીહરિકૃષ્ણ ભગવાનની પૂજા કરવામાં ઉત્સાહવાળી થઈને જયાદિ ત્રણ સ્ત્રીઓની પાછળ આવી પહોંચી. (૨)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

साङ्गोपाङ्गोत्सवस्यैव समाप्त्या स्वस्थचेतसः। कृतनित्यविधानास्ताः शुचयस्तं ववन्दिरे ॥३॥ तं स्मेरवदनाम्भोजं दृष्ट्वा स्वस्थं समास्थितम् । पूजनावसराभिज्ञाः पूजयन्ति स्म भक्तितः ॥४॥ सुगन्धिना चन्दनेन कुङ्कुमागुरुकेसरैः । कस्तूर्या चाक्षतैर्नानापुष्पहारैश्च शेखरैः ॥५॥ वस्त्रैर्नानाविधैः सूक्ष्मैरनर्घ्यै रत्नभूषणैः । धूपदीपोपहारैश्च कर्पूरारार्त्रिकादिभिः ॥६॥ सम्पूज्य विधिवद्भक्त्या प्रभुं नत्वा निजं निजम् । भावं प्रकटयन्त्यस्तास्तुष्टुवुस्तं पृथक् पृथक् ॥७॥ जयोवाच – नमामि कृष्णाय हरेऽखिलात्मनां सदात्मने श्रीपुरुषोत्तमाय ते । अनन्तकोट्यण्डभवादिहेतवे ह्यशेषकल्याणनिकेतमूर्तये ॥८॥ अधोक्षजायाक्षरधामवासिने स्वभक्तहृद्वाञ्छितमूर्तिधारिणे । अनेकमायापुरुषेश्वराय ते नमो नियन्त्रेऽखिलदेहधारिणाम् ॥९॥

अचिन्त्यमानन्दमयं च निर्गुणं वदन्ति वेदान्तविदोऽव्ययं च यत् । परं परंब्रह्म परात्मशब्दितं तदेव साक्षाद्भगवांस्त्वमेव हि ॥१०॥ सुखं प्रदातुं स भवानिहाद्य नो निजाश्रितेभ्यो नृतनुं हि शिश्रिये । इमां तपोधर्मविरक्तिवेदनैर्निषेवितां नित्यमनन्यसंश्रयैः॥११॥ निजेच्छया स्वीकृतयाऽनया विभो! मनुष्यतन्वा सुरवृन्दवन्द्यया । त्वमाददानः कृपयास्मदर्चनं महोत्सवैर्नः सुखयस्यथेदृशैः ॥१२॥ सुखं तनोति श्रवणं च कीर्तनं स्मृतिर्नतिः पूजनमङ्घ्रिसेवनम् । प्रभो! सखित्वं च तवात्र दासता वपुष्मतामात्मनिवेदनं तथा ॥१३॥

---

આરંભેલા મહોત્સવની અંગ અને ઉપાંગે સહિત વિઘ્નેરહિત પરિસમાપ્તિ થવાથી સ્વસ્થ ચિત્તવાળી તેમજ કરેલો છે સમગ્ર નિત્યવિધિ જેમણે એવી બાહ્ય અને આભ્યન્તરશુદ્ધિવાળી જયાદિ સ્ત્રીઓએ શ્રીહરિને પ્રણામ કર્યા. (૩) શ્રીહરિના પૂજનનો યોગ્ય સમય જાણનારી જયા વગેરે સ્ત્રીઓ મંદ હાસ્યયુક્ત મુખારવિન્દવાળા પોતાના સિંહાસનમાં બેઠેલા શ્રીહરિને સ્થિર મનવાળા જોઈને પ્રીતિપૂર્વક પૂજન કરતી હતી. (૪) શ્રેષ્ઠ કુંકુમ, અગરુ ચન્દન, કેસર, કસ્તૂરીએ યુક્ત સુગંધીમાન ચંદન, અક્ષત નાના પ્રકારનાં પુષ્પોના હારો, તોરાઓ, સૂક્ષ્મ તંતુઓથી નિર્માણ કરેલાં નાના પ્રકારનાં વસ્ત્રો, બહુ મૂલ્યવાળા રત્નોનાં આભૂષણો, ધૂપ, દીપ, ફૂલો વગેરેથી અને કર્પૂરથી નીરાજનાદિ, પ્રદક્ષિણા વગેરેથી તે જયા વગેરે સ્ત્રીઓ ભક્તિથી શ્રીહરિનું પૂજન કરી પંચાંગ પ્રણામ કરી પોતપોતાનો અભિપ્રાય પ્રકટ કરતી સતીઓ ભિન્ન ભિન્ન સ્તુતિ કરતી હતી. (૫-૬-૭) **જયા સ્તુતિ કરે છે** : હે હરે ! કૃષ્ણ નામવાળા, સમગ્ર વિશ્વના જીવોના અંતર્યામી, અનંત કોટી બ્રહ્માંડોની ઉત્પત્તિ સ્થિતિ વગેરેના કારણ, સમગ્ર અક્ષય સુખોની સ્થાનભૂત મૂર્તિ જેની છે એવા શ્રી પુરુષોત્તમ ભગવાન તમોને હું નમસ્કાર કરું છું. (૮) અભક્તોના ઈન્દ્રિયોના અવિષય, (પરમાત્મા) બ્રહ્મપુરના નિવાસી, પોતાના ભક્તોના મનને ઈચ્છિત મૂર્તિને ધારણ કરનારા, અપરિમિત પ્રધાન પુરુષોના ઈશ્વર, સમગ્ર દેહધારીઓના નિયામક એવા તમોને નમસ્કાર થાઓ. (૯) અભક્તજનોએ ચિન્તવન કરવા અયોગ્ય, આનંદપૂર્ણ, માયિક ગુણો રહિત, અવિનાશી, સર્વોપરિ જેને પરમાત્મા શબ્દથી કહેલું જે પરબ્રહ્મ વેદાંતને જાણનારા કહે છે તે જ પરંબ્રહ્મ ભગવાન અમારા નેત્રના વિષયભૂત પ્રત્યક્ષ તમો જ છો. (૧૦) એવા આપ, આ લોકનાં સ્વાશ્રિત જનો જે અમોને હાલમાં પોતાની મૂર્તિનાં દર્શનાદિ આનંદ આપવા માટે; આપના જ એક અનન્ય આશ્રયવાળાં અસાધારણ-તપ, ધર્મ, વૈરાગ્ય અને જ્ઞાન તેમણે નિત્ય સેવા કરાયેલી, આ અમારા નેત્રની આગળ મનુષ્યભાવથી જણાતી શોભાયમાન મૂર્તિને આશરેલા છો. (૧૧) હે વિભો ! પોતાની ઈચ્છાથી સ્વીકાર કરેલી બ્રહ્માદિ દેવોના સમુદાયોએ વંદના કરાયેલી આ મનુષ્ય-તનુથી અમોએ અર્પણ કરેલા પૂજાના ઉપહારો કૃપાથી સ્વીકાર કરનારા, તમો મંગલરૂપ આવા અન્નકૂટોત્સવ-પ્રબોધન્યુત્સવાદિથી અમોને અત્યંત આનંદ યુક્ત કરો છો. (૧૨) હે પ્રભો ! તમારાં ચરિત્રોનું શ્રવણ, તમારા નામનું કીર્તન, તમારી સ્મૃતિ, તમારી મૂર્તિનું ચિન્તન, તમારી આગળ સાષ્ટાંગ પ્રણામનું આચરણ, તમારું પૂજન, તમારા ચરણની સેવા, તમારી સાથે સખાપણું, તમારું દાસપણું તથા આત્માનું નિવેદન (હું તમારો છું,તમારે આધીન છું) : આ પ્રકારે તમારે વિષે નવધા ભક્તિ થાય તે આ લોકમાં મનુષ્યદેહધારી જનોને સુખ જ આપે છે. (૧૩)

तवात्र मूर्तौ यदि भक्तिलक्षणं दृढं भवेदेकतमं नवस्वपि । जनस्य यस्यात्र स कार्यकारणात्मकं हि तीर्णः सहसा तमोम्बुधिम् ॥१४॥ कृतार्थ एवाजनि सोऽत्र भूतले ह्यभूदघौघोऽपि च तस्य भस्मसात्। बभूव मुक्तिः किल तस्य जीवतः प्रभो! वयं विद्म इति स्वचेतसि ॥१५॥ स्वभक्तसंरक्षणतत्परस्य ते न जन्मनामन्त उतास्ति कर्मणाम् । अशेषदुःखप्रशमैकहेतवे नमोऽस्तु तस्मै परमेश्वराय ते ॥१६॥ स वै भवान्सद्व्ययमेव सम्पदामिह प्रकुर्वन्सुखदः सदैव नः । स्थितिः शरीरस्य तु यावदेव नः प्रभो ! निवस्तुं खलु तावदर्हसि ॥१७॥ सुव्रत उवाच – इति स्तुत्वा हरिं भक्त्या विरराम जया ततः । बद्धाञ्जलिपुटाऽस्तौषीत्तं प्रणम्य रमा नृप ! ॥१८॥ रमोवाच – स्वामिंस्त्वच्चरणाम्बुजं भवदवक्लिष्टात्मनां सौख्यदं देहान्तःकरणेन्द्रियासुभिरहं वन्दे नतं सज्जनैः । भूयस्यामिह संसृतौ स्वविहितैः कर्माख्यपाशैर्दृढं बद्धान्मोचयितुं ततः खलु जनान्मायाधिपस्त्वं प्रभुः ॥१९॥ मायायाः परः परश्च भगवान्सर्वेश्वरः श्रीहरिः स त्वं पुंप्रकृतीः प्रविश्य कुरुषेऽनेकाण्डसर्गादिकम् । तत्रापीश ! न बध्यसे प्रकृतिभिर्नित्यं स्वतन्त्रः प्रभुर्निलेपः पवनो यथाऽखिलगतश्चेष्टाः प्रकुर्वन्नपि ॥२०॥ आत्मीयेन सुखेन नित्यसुखवानेकस्त्वमेवासि वै देवादेवनराः परे तु सुखिनः स्त्रीवित्तधामादिभिः । त्वद्भक्तास्तु सदा त्वयैव सुखिनो दुःखानि जानन्ति तान् शब्दादीन्विषयांश्च येऽत्र रसिता यच्छन्ति वै संसृतिम् ॥२१॥ ब्रह्माद्या जगतीह ये तनुभृतस्ते कालशक्त्यैव ते वर्तन्ते हि नियन्त्रिता निजनिजामाजीविकां त्वत्कृताम् । आश्रित्यैव विभो! वृषा इव नसि प्रोताः कृषिं कुर्वतः सर्वे ते तु वशे भवन्ति तव वै यावन्निजायुःक्षयः ॥२२॥

હે ભગવન્ ! આ લોકમાં જે જનને શ્રવણાદિ નવ પ્રકારની ભક્તિમાંથી એક પણ ભક્તિનું લક્ષણ તમારી આ મૂર્તિમાં જો દૃઢ થાય તો તે જન કાર્યકારણાત્મક પ્રકૃતિ-પ્રાકૃતાત્મક તમરૂપી માયાસાગરને તત્કાળ તરી જાય છે. (૧૪) હે પ્રભો ! આ ભૂતળમાં જેને એક ભક્તિનું લક્ષણ દૃઢ થયું હોય તેવો માણસ કૃતાર્થ થયેલો જ છે તેવા માણસના પાપના સમુદાયો પણ ભસ્મ થયેલા છે તેવો માણસ જીવતો છે તો પણ સંસારથી મુક્ત થયેલો છે : આ પ્રકારે અમો પોતાના મનમાં જાણીએ છીએ. (૧૫) પોતાના ભક્તોના રક્ષણમાં તત્પર, તે તમારા પ્રાદુર્ભાવો અને ચરિત્રોનો પાર નથી. સમગ્ર દુઃખોના નિવારણમાં અનન્ય કારણ, પરમેશ્વર તમોને નમસ્કાર થાઓ. (૧૬) હે પ્રભો ! તે તમો અમારી સંપત્તિઓનો સત્કાર્યમાં સુંદર વ્યય કરાવતા જ અમોને આનંદ આપતા સતા શરીરની સ્થિતિ જ્યાં સુધી હોય ત્યાં સુધી આ અમારા ભવનમાં નિરંતર નિવાસ કરવા યોગ્ય છો જ. (૧૭) હે રાજન્ ! આ પ્રકારે જયા સ્નેહથી શ્રીહરિની સ્તુતિ કરીને વિરામ પામી પછી રમા બંને હાથ જોડીને શ્રીહરિને પ્રણામ કરી સ્તુતિ કરવા લાગ્યાં. (૧૮) **રમા બોલ્યાં** : હે સ્વામિન્ ! સંસારરૂપી વનમાં અગ્નિથી સંતાપવાળા શરણાગત આત્માઓને સુખ આપનારા, સાધુજનોએ નમસ્કાર કરાયેલાં, તમારાં ચરણકમળોને હું શરીર, મન, ઈન્દ્રિયો અને પ્રાણોથી નમસ્કાર કરું છું. અતિ મહાન આ સંસારમાં પોતે કરેલા કર્મરૂપી પાશોથી દૃઢ બંધાયેલાં જનોને તેનાથી મુકાવવા માટે માયાના નિયન્તા તમો સમર્થ છો. (૧૯) મૂળ પ્રકૃતિથી પર અક્ષરબ્રહ્મથી પણ સ્વરૂપ સ્વભાવ, ગુણ, વિભૂતિ અને ઐશ્વર્યાદિથી અત્યુત્કૃષ્ટ ભગવાન, માટે જ સર્વેશ્વર શ્રીહરિ તમો પુરુષોથી યુક્ત પ્રકૃતિઓમાં પ્રવેશ કરી અનેક બ્રહ્માંડોની ઉત્પત્તિ વગેરે કરો છો. હે પરમેશ્વર ! હંમેશા સ્વતંત્ર, અતિસમર્થ, પ્રાણાદિ રૂપે સર્વ શરીરીઓની અંદર રહેલા; સમગ્ર ઈન્દ્રિયો આદિના વ્યાપારો કરાવતા સતા પણ વાયુ જ જેમ, તેમ તેમાં રહેલા દોષથી રહિત તમો પ્રકૃતિઓથી બંધાતા નથી. (૨૦) પોતાના અસાધારણ આનંદથી સદા આનંદ યુક્ત તમો એક જ છો. બીજા દેવો, અસુરો, મનુષ્યો તો સ્ત્રીઓ, ધન, ધામ, વગેરે તથા વાહનો વગેરે માયિક પદાર્થોથી સુખી થાય છે. તમારા ભક્તો તો સદા તમારાં દર્શન-ધ્યાનાદિથી સુખિયા છે. સ્ત્રી આદિ શબ્દાદિ વિષયોને દુઃખરૂપ જાણે છે; જે શબ્દાદિ વિષયો આ લોકમાં પુરુષોએ શ્રવણાદિથી ભોગવાયેલા સતા સંસારને આપે છે. (૨૧) હે પ્રભો ! આ વિશ્વમાં બ્રહ્માદિ જે શરીરધારીઓ તમારી કાલશક્તિએ વશ કરેલા સતા તમોએ કરેલી પોતપોતાની આજીવિકાના કારણભૂત વૃત્તિનો આશ્રય કરીને જ વર્તે છે. નાથેલા બળદિયાઓ ખેડૂતને વશ વર્તે છે તેમ તે બ્રહ્માદિ શરીરધારીઓ જ્યાં સુધી પોતાના આયુષ્યનો ક્ષય થાય ત્યાં સુધી તમારા વશમાં રહેલા છે જ. (૨૨)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

मर्यादां रचितां त्वयैव भगवन् ! कालोऽपि सम्पालयन्नाविर्भावयति क्षितौ दिवि तथा नानाऋतूनां गुणान् । वायुर्वाति दिवाकरो भ्रमति खे वर्षत्यमर्त्येश्वरो मृत्युर्धावति सर्वतश्च सभयं नेशस्तदुल्लङ्घने ॥२३॥ योषाहेमविभूषणांशुकगृहग्रामादिषु श्रीहरे ! त्वन्मायारचितेषु सङ्गमपि यन्नैव क्वचिल्लिप्यसे । और्वोऽग्निर्जलधौ वसन्नपि पराभूतिं जलैर्नाप्नुवंस्तान्यश्नन्नुत वर्धते खलु यथा त्वं तद्वदत्र प्रभो ! ॥२४॥ त्यक्ताः प्राकृतिका मया तु निखिला मुक्तैस्तथान्यैर्गुणा ये तेभ्योऽपि वयं बिभीम उरुधा त्वत्प्रेमवृद्धीप्सवः । तेषु त्वं तु वसन्नपीश्वरतया नो बध्यसे नाज्यसे व्योमेव स्थिरजङ्गमस्थमघहन्न स्पृश्यसे तद्गुणैः ॥२५॥ ईशत्वं तव चैतदेव नृतनोर्मायागुणानञ्जनं जानन्त्यत्र महाजना हि सुधियो भक्तप्रिय ! श्रीहरे ! । त्वय्येवास्तु मनो मदीयमनिशं त्वां प्रार्थयामीत्यहं त्वन्मायागुणतः सदास्मदवनं कर्तुं त्वमेवार्हसि ॥२६॥ सुव्रत उवाच - इति स्तुत्वा रमा भक्त्या नारायणमुनिं नृप ! । तूष्णीमासाथ ललिता तं तुष्टाव कृताञ्जलिः ॥२७॥ ललितोवाच - श्रीवासुदेव पुरुषोत्तम ! पादपद्मं भक्त्या नमामि तव कायवचोमनोभिः । संसारवारिधिनिमज्जदनेकजीवप्रोत्तारणप्लवमहं श्रुतिवृन्दवन्द्यम् ॥२८॥ मायापरोऽपि जगदुद्भवपालनान्तलीलार्थमात्तविधिविष्णुशिवादिरूपः । अप्राकृतैर्गुणगणैरभिसेविताङ्घ्रिस्त्वं राजसे हि परमेऽक्षरधाम्नि भूमन्! ॥२९॥ त्वं प्राकृताख्यतमसः पर एव तस्मिन् धाम्न्यृद्धिभिश्च महतीभिरुपासितोऽसि । राधारमाप्रमुखशक्तिभिरानताभिर्भक्त्याऽनुवेलमभिसेवितपादपद्मः ॥३०॥

---

હે ભગવન્ ! કાળ પણ તમોએ કરેલી મર્યાદાને ભયપૂર્વક પાલન કરતાં સતા જ પૃથ્વીમાં તથા આકાશમાં નાના પ્રકારની ઋતુઓના ગુણોને પ્રગટ કરે છે, વાયુ સર્વત્ર વાય છે, સૂર્ય આકાશમાં ભમે છે, ઈન્દ્ર સમય સમય પ્રમાણે જલ વર્ષાવે છે, મૃત્યુ સર્વ પ્રાણીઓમાં દોડે છે અને અગ્નિ બાળે છે. તમારી કરેલી મર્યાદાને ઉલ્લંઘન કરવામાં કોઈ સમર્થ નથી. (૨૩) હે શ્રી હરે ! હે પ્રભો ! આપ તમારી માયાએ રચેલી સ્ત્રીઓ, સુવર્ણાદિ ધન, આભૂષણો, બહુમૂલ્ય વસ્ત્રો, ગૃહો, ગામો વગેરે જેમાં એવાં નગર, વાહનો વગેરે તેમાં પ્રસંગ પામતા સતા ક્યારેય પણ આસક્ત થતા નથી; જેમ સમુદ્રમાં વડવાનલ સમુદ્રનાં જલથી પરાભવ નહિ પામતો સતો જળોને ખાતો સતો જેમ ઊલટો વૃદ્ધિ પામે છે તેની માફક તમો સ્ત્રી આદિમાં પ્રથમના કરતાં મહાપ્રતાપે યુક્ત વર્તો છો જ. (૨૪) હે પાપોને નાશ કરનારા, મેં તથા બીજા મુક્ત ભાવને પામેલા મુક્તાનંદાદિ મુનિઓએ ત્યાગ કર્યા છે માયિક સમગ્ર જે વિષયો તેનાથી પણ, તમારામાં પ્રેમવૃદ્ધિને ઈચ્છનારા અમો સર્વે અત્યન્ત ભય પામીએ છીએ. તમો તો પ્રાકૃત ગુણોમાં વર્તતા છતાં પણ સ્થાવર જંગમમાં રહેલા આકાશની માફક પ્રકૃતિના ગુણદોષથી ઈશ્વર-માયાના નિયન્તા હોવાથી લેપાતા નથી. બંધાતા નથી અને સ્પર્શાતા નથી. (૨૫) હે ભક્તપ્રિય ! જે માયાના ગુણોથી નિર્લેપપણું એ જ માનુષ્ય મૂર્તિ એવા તમારું ઈશ્વરપણું છે. આ લોકમાં શ્રેષ્ઠ બુદ્ધિવાળા સત્ પુરુષો તે તમારું નિયન્તાપણું જાણે છે. હે શ્રીહરે ! માટે મારું મન નિરંતર તમારામાં જ રહો : આ પ્રમાણે હું તમારી પ્રાર્થના કરું છું. તમો તમારી માયાના ગુણોથી સદા અમારું રક્ષણ કરવા યોગ્ય છે. (૨૬) હે રાજન્ ! આ પ્રકારે રમા નારાયણ મુનિની સ્નેહથી સ્તુતિ કરી મૌન રહી, પછી **લલિતા** બન્ને હાથ જોડીને **શ્રી નારાયણ મુનિની સ્તુતિ કરવા લાગ્યાં** : (૨૭) હે વાસુદેવ ! હે પુરુષોત્તમ ! સંસારરૂપી સમુદ્રમાં ડૂબતા અનેક જીવોને તારવા માટે નૌકારૂપ વેદોના સમુદાયોએ વંદન કરવા યોગ્ય તમારાં ચરણારવિન્દને હું શરીર, વાણી અને મનથી ભક્તિપૂર્વક નમસ્કાર કરું છું. (૨૮) હે ભૂમન્ ! પ્રકૃતિથી ભિન્ન છો તો પણ તમો અનેક બ્રહ્માંડની ઉત્પત્તિ, સ્થિતિ અને લયરૂપી લીલા માટે ગ્રહણ કર્યાં છે બ્રહ્મા, વિષ્ણુ અને શિવરૂપો જેમણે એવા; વળી અમાયિક સત્ય શૌચાદિ ગુણસમુદાયોએ સેવેલાં છે ચરણકમળ જેમનાં એવા તમો, સર્વોત્તમ અક્ષરધામમાં સદા વિરાજમાન છો જ. (૨૯) હે હરે ! તમો પ્રાકૃત નામના અંધકારથી પર બ્રહ્મપુરધામમાં મહા સમૃદ્ધિઓથી ઉપાસના કરાયેલા છો અને પ્રણામ કરતાં રાધા, રમા, મુખ્ય જેમાં છે એવી શક્તિઓએ સ્નેહથી સમય સમય પ્રમાણે સેવાયેલાં છે ચરણકમળ જેમનાં એવા તમો છો. (૩૦)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

मूर्तौ वृषात्त्वमभवः खलु मानवानां नारायणर्षिरभवाय पुरात्र खण्डे । प्रादुर्बभूविथ सुतोऽद्य तयोर्नृतन्वोः श्रीनीलकण्ठ इति कोसलदेश ईश ! ॥३१॥ हीनो गुणैस्त्रिभिरधीश्वर ! मायिकैस्त्वं नृत्वेऽपि दिव्यतनुरित्यसि निर्गुणाख्यः । सम्पोषणं विदधदेव तयोः स्वपित्रोः कल्याणमत्र तनुषे श्रितदेहभाजाम् ॥३२॥ वर्णाश्रमेषु सकलेष्वपि कालनष्टं धर्मं प्रवर्तयितुमीश ! सनातनं त्वाम् । जातं वदन्ति कतिचित्कतिचिच्च भूमन् ! पाषण्डिभिन्नमिह पारमहंस्यधर्मम् ॥३३॥ केचिद्वदन्ति पृथुयज्ञमहेन्द्रहातपाषण्डलिङ्गगुरुभिः कृशतां हि नीतम् । सत्सम्प्रदायमनघोद्धवसम्प्रणीतं पुष्टं विधातुमिह जात इति प्रभो! त्वाम् ॥३४॥ पुष्टिं विधातुमिह धर्मयुजः स्वभक्तेर्धर्मारिगुर्वसुरसङ्घतनूकृतायाः । प्रादुष्कृतद्विजवराकृतिरित्यहं तु जाने भवन्तमखिलार्थदमाश्रितेभ्यः ॥३५॥ शृण्वन्ति ये तव गुणानिह नाथ ! सद्भ्यो गायन्ति वा स्वहृदये श्रुतिगान् स्मरन्ति । तेषां च ये विदधतेऽप्यनुमोदनं वा ते यान्ति धाम तव संसृतिबन्धमुक्ताः ॥३६॥ भक्तिं तवाथ तव वापि सतां प्रसङ्गं हित्वात्मबोधमुपलब्धुमिहाञ्जसा ये । क्लिश्यन्ति भूरिनियमैस्त इतो लभन्ते क्लेशं फलं ननु यथेह पुलाककण्डाः ॥३७॥ मुख्या मया तु तव भक्त्यधिकारिणो ये वैराग्यधर्मनिजबोधयुतास्त एव । सद्भ्यः श्रुता इति वपुर्वचनात्मभिस्ते सेवां करोमि निजशक्त्यनुसारिणीं वै ॥३८॥ स्याद्यत्र यत्र मम जन्म च तत्र तत्र ह्यत्राप्यमुत्र च निरन्तरमेकभक्त्या । निष्काममेव तव सेवनमीश ! मे स्तादित्यर्थयाम्यहमतिप्रणयाद्भवन्तम् ॥३९॥

---

હે ઈશ ! તમો જે બ્રહ્મપુરાધિપ પ્રથમ આ ભારતખંડમાં પોતાનાં ભક્ત મનુષ્યોની અનાદિ સંસૃતિના બન્ધનથી મુક્તિ થાય માટે ધર્મ પ્રજાપતિથી મૂર્તિ પત્નીમાં નારાયણ ઋષિ થયા તે પોતે જ બ્રહ્મપુરાધિપતિ તમો હાલમાં કોસલ દેશમાં દુર્વાસાના શાપથી મનુષ્યપણાને પ્રાપ્ત થયેલા ભક્તિ અને હરિપ્રસાદના નામવાળાં મૂર્તિ અને ધર્મનાં, નીલકંઠ નામથી પ્રસિદ્ધ પુત્ર થઈ પોતાના ઐશ્વર્ય સહિત જ પ્રાદુર્ભાવ પામેલા છો. (૩૧) હે અધીશ્વર! મનુષ્યભાવમાં પણ દિવ્ય દેહવાળા તમો પ્રાકૃત સત્ત્વાદિ ત્રણ ગુણોથી રહિત છો માટે નિર્ગુણ નામવાળા છો. પોતાનાં માતા, પિતા, ભક્તિ અને ધર્મનું પોષણ કરતા થકા જ આ લોકમાં સ્વાશ્રિત જીવોના આત્યંતિક મોક્ષને વિસ્તારો છો. (૩૨) હે ઈશ ! હે ભૂમન્ ! તમોને કલિકાલના બળથી નાશ પામેલો સનાતન ધર્મ સમગ્ર વર્ણાશ્રમવાળાં જનોમાં પ્રવર્તાવવા માટે પ્રકટ થયેલા હોવાનું કેટલાક મુનિઓ કહે છે. તેમજ કેટલાક તો આ લોકમાં પાખંડી જનોએ ઊખેડી નાખેલો પરમહંસને પ્રિય સદાચાર તેને પ્રવર્તાવવા માટે પ્રાદુર્ભાવ પામેલા છો એમ કહે છે. (૩૩) હે પ્રભો ! પૃથુના જે યજ્ઞમાં ઈન્દ્રે યજ્ઞના ભંગ માટે ગ્રહણ કરીને ત્યાગ કરેલાં પાખંડોનાં ચિહ્નોવાળા-અસુર ગુરુઓએ દુર્લભતાને પમાડેલો, નિષ્પાપ ઉદ્ધવજીએ પ્રવર્તાવેલો અત્યંત સુશોભિત એકાન્તિક ધર્મમાર્ગ આ લોકમાં વૃદ્ધિ પમાડવા માટે પ્રાદુર્ભાવ પામેલા છો : આવી રીતે કેટલાક તમોને કહે છે. (૩૪) હે ભગવન્ ! હું તો સ્વાશ્રિતજનોને સમગ્ર પુરુષાર્થને આપનારા તમોને ધર્મનો દ્રોહ કરનારા જે ગુરુરૂપ દૈત્યોના સમૂહોએ દુર્લભતાને પમાડેલી સ્વધર્મે સહિત ભગવાનની ઉપાસનાની આ લોકમાં પુષ્ટિ કરવા માટે પ્રગટ કરી છે શ્રેષ્ઠ બ્રાહ્મણની આકૃતિ જેણે એવા, આ પ્રકારે જાણું છું. (૩૫) હે નાથ ! આ લોકમાં જે જનો તમારા ગુણોને સાધુઓથી સાંભળે છે અને સાંભળેલા તમારા ગુણોનું ગાન કરે છે અને પોતાના મનમાં સ્મરણ કરે છે અને તમારા ગુણોને અનુમોદન આપે છે તે સર્વે જનો સંસારના બંધનથી મુકત થઈને તમારા ધામને પામે છે. (૩૬) આ લોકમાં જે પુરુષો તમારી ભક્તિ અથવા તમારા આશ્રિત સાધુઓના સમાગમનો પણ ત્યાગ કરી પોતાના જીવાત્માના સ્વરૂપનું જ્ઞાન તત્ત્વથી પામવા માટે ઘણા નિયમોનાં આચરણોથી ઘણા પ્રયત્નથી થતા કલેશને અનુભવે છે તે પુરુષો આ લોકમાં કુશકા ખાંડનારા પુરુષો જ જેમ તેમ એ નિયમોથી કલેશરૂપી ફળને જ પામે છે. (૩૭) જે પુરુષો વૈરાગ્ય, સ્વધર્મ અને આત્મ સ્વરૂપનાં જ્ઞાને યુક્ત છે તે પુરુષો જ મુખ્ય તમારી ભક્તિમાં અધિકારી થાય છે. એવું મેં તમારા સાધુ મુક્તાનંદજી વગેરે મહામુનિઓએ સભામાં કરેલી વાર્તાના પ્રસંગથી સાંભળેલું છે. આ પ્રકારનું તમારું માહાત્મ્ય હોવાથી શરીર, વાણી અને મનથી પોતાની શક્તિને અનુસરીને તમારી ભક્તિ સ્વધર્માદિ સહિત આચરણ કરું છું. (૩૮) હે ઈશ, હે શ્રી હરે ! આ લોકમાં અને સ્વર્ગાદિ પરલોકમાં પણ જે જે યોનિઓમાં જન્મ થાય ત્યાં ત્યાં મને નિરંતર અનન્ય ભાવથી નિષ્કામ તમારી સેવા જ પ્રાપ્ત થાય : આ પ્રકારે હું અતિ સ્નેહથી તમારી પાસે યાચના કરું છું. (૩૯)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच - **ललिता ललितैः पद्यैरिति स्तुत्वा निजं प्रभुम् । तूष्णीमासीत्ततश्चान्याः स्त्रियो भक्तास्तमस्तुवन् ॥४०॥** अमर्युवाच - **वन्देऽहं नमदमरीललाटभूषाहीरालिद्युतिविलसन्नखेन्दुकान्ति । पादाब्जं तव सुरसिद्धसङ्घसेव्यं सद्भक्त्या निगमसरस्वतीप्रगीतम् ॥४१॥ नित्यं ते चरणयुगे ममास्तु चित्तं संसारे स्वजनादिषु क्वचिन्मा। सङ्गस्ते चरणसरोजलग्नहृद्भिर्योषाभिर्भवतु भवे सदैव चास्मिन् ॥४२॥** अमलोवाच - **भक्तानामभिलषितार्थदानदक्षं तं त्वाहं निजहृदये दधामि नित्यम् । भक्तिं मे ध्रुवमधिमान्य यस्त्वमल्पां कारुण्यादधिकमुपैषि हि प्रसादम् ॥४३॥ चित्तं मे गुणमणिमण्डने हि तस्मिंस्त्वय्येव प्रकटदयागुणे च भूम्नि । संलग्नं भवतु विहाय दैहिकानां संसर्गं धरणिवदस्तु तत्स्थिरं च ॥४४॥** मेनोवाच - **भक्त्याहं तव पदसारसं दयालो ! वन्दे तत्प्रणतजनार्तिनाशशीलम् । यत्स्पर्शादखिलमिदं पुनाति विश्वं रूपैः स्वैस्त्रिभिरमरेश्वरांश्च गङ्गा ॥४५॥ तत्तेऽहं दृढतरभावतः पदाब्जं सेवे वै गृहधनतोऽपकृष्य चित्तम् । नेच्छामि ध्रुवममरादिभोगजातं त्वत्तोऽन्यत्तत इह मां सदा निधेहि ॥४६॥** सर्वाः स्त्रिय ऊचुः- **अतिमनोहरं सर्वसुन्दरं तिलकलक्षणं चञ्चलेक्षणम् । विबुधवन्दितं स्वामिनाथ ! ते वपुरिहास्तु नो नित्यदर्शने ॥४७॥ मदनमोहनं प्रेमदोहनं नयनगोचरं भक्तसञ्चरम्। भुवि सुदुर्लभं स्वामि० ॥४८॥**

---

હે રાજન્, આ પ્રકારે લલિતા સુંદર પદોથી પોતાના પ્રભુ શ્રીહરિની સ્તુતિ કરી મૌન રહ્યાં પછી ભગવાનની ભક્તિવાળી બીજી અમરી વગેરે સ્ત્રીઓ શ્રીહરિની સ્તુતિ કરવા લાગી. (૪૦) **અમરી સ્તુતિ કરે છે :** હે ભગવન્ ! નમસ્કાર કરતી દેવસ્ત્રીઓ જે સાવિત્રી વગેરે તેમનાં જે લલાટનાં ભૂષણોમાં હીરાની પંક્તિઓની કાન્તિઓથી શોભાયમાન નખરૂપી ચંદ્રમાઓનો પ્રકાશ જેમાં છે એવા; બ્રહ્માદિ દેવો અને શુક-સનકાદિ સિદ્ધોના સંઘોએ સેવવા યોગ્ય વેદો અને સરસ્વતીએ વર્ણન કરાયેલા એવાં તમારાં ચરણકમળોને હું સુશોભિત ભક્તિથી નમસ્કાર કરું છું. (૪૧) હે હરે! મારું ચિત્ત નિત્ય તમારા ચરણ યુગલના ધ્યાનમાં આસક્ત રહો. આ સંસારમાં માતાપિતા વગેરે સંબંધી જનો અને ધન વગેરે જેમને છે એવા ગૃહક્ષેત્ર વગેરેમાં ક્યારેય પણ મારું ચિત્ત આસક્ત ના થાઓ. આ સંસારમાં તમારાં ચરણકમળમાં આસક્ત મન જેમનું છે એવી રમા વગેરે સ્ત્રીઓની સાથે સદૈવ મારે સમાગમ થાઓ. (૪૨) **અમલા સ્તુતિ કરે છે :** હે હરે ! જે તમો અલ્પ એવી પણ મારી સેવાને અતિ દયાળુ હોવાથી અધિક માનીને અતિશય અનુગ્રહ કરો છો જ. ભક્તોના ઈચ્છિત પુરુષાર્થોને આપવામાં વિચક્ષણ એવા તમારું હું મારા હૃદયમાં નિત્ય ચિન્તવન કરું છું. (૪૩) મારું ચિત્ત દેહને સુખ આપનારાં સ્વજનો અને ધનાદિ પદાર્થોના સંબંધનો ત્યાગ કરી, અન્ય શૌચાદિ ગુણરૂપી રત્નોથી સુશોભિત પ્રત્યક્ષ દેખાતા દયારૂપી ગુણવાળા અપાર મહિમા યુક્ત તમારે વિષેજ સંલગ્ન થાઓ. તમારે વિષે સંલગ્ન થયેલું મારું ચિત્ત પૃથ્વીની માફક અચલ રહો.(૪૪) **મેના સ્તુતિ કરે છે :** હે દયાળુ ! તમારાં ચરણકમળના સ્પર્શથી ભાગીરથી ગંગા પોતાનાં ત્રણ રૂપોથી-મન્દાકિની, ગંગા, ભોગવતી સંજ્ઞાઓથી સમગ્ર આ વિશ્વને અને બ્રહ્મા, શિવાદિ દેવાધિપતિઓને પવિત્ર કરે છે. નમસ્કાર કરનારા લોકોની પીડાને નાશ કરવાના સ્વભાવવાળાં એવા તમારાં ચરણકમળને હું ભક્તિથી વંદના કરું છું. (૪૫) હું ધામ, વિત્ત વગેરેથી ચિત્તને ખેંચી અતિદૃઢ ભાવથી તમારાં ચરણકમળને જ સેવું છું. તમારાથી અન્ય દેવાદિ ભોગસમુદાયને તમારાથી ઈચ્છતી નથી જ, માટે મને આ લોકમાં તમારાં ચરણકમળની સેવામાં નિરંતર રાખો. (૪૬)

**હવે અમૃતા કુમારી વગેરે સર્વ સ્ત્રીઓ સ્તુતિ કરે છે :** હે સ્વામિનાથ ! અક્ષરાદિના અધિપતિ, દર્શન કરનારાં જનોને અતિ મનોહર, સર્વ સૌન્દર્યો જેમાં છે એવા, લલાટનું ભૂષણરૂપી તિલકનું ચિહ્ન જેમાં છે એવા, સમગ્ર પોતાના ભક્ત જનોને જોવા માટે ચંચલ નેત્રવાળા, બ્રહ્માદિ દેવોએ વંદના કરાયેલા દિવ્યવિગ્રહધારી તમારી આ મૂર્તિ આ નગરમાં અમોને નિત્ય દર્શન આપવામાં જ રહો. (સર્વદા અમારાં નયનગોચર થાઓ.) (૪૭) કામને પણ પોતાના સૌન્દર્યથી મોહ પમાડનારા, દર્શન કરનારાં જનોને સ્નેહથી પૂર્ણ કરનારા, અતિ કરુણાથી સર્વ જનોનાં નેત્રના વિષયપણાને પામેલા, ભક્તોની સાથે ફરનારા, પૃથ્વીમાં તમારી કરુણા વિના દુષ્પ્રાપ્ય એવા તમો અમોને નિત્ય દર્શન આપવામાં જ રહો. (૪૮)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી **શ્રી સ્વા. મંદિર - સરધાર**

निजजनैः सदा वाञ्छितं हृदा परसुखावहं हृत्तमोपहम् । परममङ्गलं स्वामि० ॥४९॥ हृदयरोचनं बद्धमोचनं विगतशोचनं दीर्घलोचनम् । मृदुसिताम्बरं स्वामि० ॥५०॥ मधुरभाषणं पुष्पभूषणं विजितदूषणं शोकशोषणम्। प्रहसदाननं स्वामि० ॥५१॥ कुसुमशेखरं कोमलान्तरं सदयदर्शनं दुःखकर्शनम् । विधिहरार्चितं स्वामि० ॥५२॥ परमपावनं लोकभावनं कुटिलकुन्तलं पुष्पकुण्डलम् । भवभयापहं स्वामि० ॥५३॥ सकलसिद्धिभिः सर्वत्रर्द्धिभिः श्रितपदं सदा योगिभिर्मुदा । तदिदमेव हि स्वामि० ॥५४॥ तव निवासतो दुर्गपत्तनं जयति भूतले सर्वतोऽधिकम् । भवदुपाश्रया मुक्तिरत्र यद्वसति सर्वदाऽन्यत्र दुर्लभा ॥५५॥ कुमतदुर्वनाद्घोरयौवनाद्रसनवृश्चिकाल्लोभलुब्धकात् । बहुतरापदो भूरिसम्पदो मुहुरिह त्वया रक्षिता वयम् ॥५६॥ प्रबलसंशयाद्दुष्टसंश्रयान्मदबिलेशयात्कुत्सिताशयात् । स्मरसरीसृपान्मानकोणपान्मुनिपते! वयं मोचितास्त्वया ॥५७॥ अशुभभावतः क्रोधदावतो मृतिजनुर्भयात्पापदुर्नयात् मधुमहाविषात्सर्वथामिषाद्यतिपते ! वयं रक्षितास्त्वया ॥५८॥ विषयवारिधेस्तारिता यथा करुणया वयं भूरिशस्तथा । तव पदाम्बुजासक्तिविघ्नतः सततमेव नः पातुमर्हसि ॥५९॥ क्वचन मानसं त्वत्पदाम्बुजाद्व्रजतु माऽन्यतो नाथ नः सदा । इति वयं मुहुः प्रार्थयामहे निजजनप्रियं त्वामधीश्वरम् ॥६०॥ सुव्रत उवाच - इति ताभिः स्वभक्ताभिर्योषाभिः संस्तुतो हरिः । प्रसन्नः सोऽभयं प्रादात्ताभ्यो भक्तपतिर्नृप !॥६१॥ श्रीनारायणमुनिरुवाच - भवतीनां हि सर्वासां यो यो हृदि मनोरथः । वर्तते स स संपूर्णो भविष्यति न संशयः ॥६२॥ देहदैहिकसम्बन्धं दुस्त्यजं ह्यपि योगिभिः । मयि प्रेम्णा तृणमिव हित्वा मां भजथाबलाः! ॥६३॥

પોતાના ભક્ત જનોએ પોતાના મનથી હંમેશા દર્શનાદિ સુખ પ્રાપ્તિ માટે ઈચ્છાયેલા, સર્વોપરી સુખ પમાડનારા, હૃદયમાં રહેલા અનાદિ અજ્ઞાનાન્ધકારને નાશ કરનારા અત્યુત્કૃષ્ટ મંગલ સ્વરૂપ તમો સર્વદા અમારાં નયનગોચર થાઓ. (૪૯) ભક્તજનોના હૃદયમાં રુચિકર, માયાના પાશથી બંધાયેલા જીવોને મુક્ત કરનારા, જેનાથી શોક નાશ પામ્યો છે એવા, કર્ણ પર્યન્ત વિશાળ નેત્રોવાળા, કોમળ ઉજ્વલ વસ્ત્રો જેમને છે એવા; (૫૦) મધુર વાણીવાળા, નાના પ્રકારના પુષ્પોના હારો, બાજુબંધ વગેરે ભૂષણોવાળા, જીત્યાં છે દૂષણો જેમણે એવા પોતાના ભક્ત જનોના શોકને હરનારા, મંદ હાસ્યયુક્ત મુખારવિન્દવાળા; (૫૧) મસ્તકના મોળિયા ઉપર પુષ્પોના તોરાઓવાળા, કોમળ અંતઃકરણવાળા, દયાસહિત દર્શનવાળા, ભક્તજનોનાં દુઃખોને નાશ કરનારા, બ્રહ્માદિ દેવોએ પૂજેલા તમારા શરીરનાં મને દરરોજ દર્શન આપો. (૫૨) અતિ પવિત્રતાના કારણ, લોકોનું પાલન કરનારા, વાંકા અને સુંવાળા કેશવાળા, પુષ્પોનાં કુંડળોવાળા, જીવોના સંસારિક ભયને નાશ કરનારા; (૫૩) અણિમાદિ સમગ્ર સિદ્ધિઓ, સમગ્ર સમ્પત્તિઓ અને સનકાદિ સમગ્ર યોગીઓએ હર્ષપૂર્વક સર્વદા સમાશ્રય કરેલા છે ચરણકમળ જેમનાં એવા હે સ્વામિન્! અમોને નિરંતર દર્શન આપો. (૫૪) હે હરે! દુર્ગપત્તન તમારા નિવાસથી આ પૃથ્વીમાં સમગ્ર તીર્થક્ષેત્રાદિથી પણ અધિક સર્વોત્કર્ષપણે વર્તે છે, જે માટે તમારા આશ્રયવાળી મુક્તિ આ દુર્ગપત્તનમાં સર્વદા વસે છે. બીજે તો દુર્લભ છે. (૫૫) વળી આ લોકમાં અતિશય વિપત્તિઓ જેમાં છે એવી ઘણી સમ્પત્તિઓથી તમોએ અમારું વારંવાર રક્ષણ કરેલું છે. (૫૬) હે મુનિપતે ! ધર્માદિ વિષયમાં પ્રબળ સંશય રૂપી શલ્યોથી-ધર્મભ્રષ્ટ દુર્જનોના આશ્રયથી તથા મદરૂપી કાળો નાગ, દુષ્ટ વિષયવાસના,કામરૂપી અજગર અને માનરૂપી રાક્ષસથી અનેકપ્રકારે તમોએ તેની નિવૃત્તિના સદુપદેશથી અમોને મુકાવેલાં છે. (૫૭) હે યતિપતે ! નઠારો સ્વભાવ, ક્રોધરૂપી દાવાનળ, જન્મમરણનો ભય, પાપરૂપી દુષ્ટ નીતિ, મદ્યરૂપી મહાઝેર તથા સર્વ પ્રકારે માંસભક્ષણથી તમોએ અમારું રક્ષણ કર્યું છે. (૫૮) હે ભગવન્ ! તમોએ ઘણી દયાથી અમોને શબ્દાદિ વિષયોરૂપ સાગરથી જે પ્રકારે બૂડવાથી તાર્યા છે એજ રીતે તમારાં ચરણકમલમાં આસક્તિમાં જે અન્તરાયો તેનાથી અમારૂં નિરંતર રક્ષણ કરવા માટે યોગ્ય છો. (૫૯) હે સ્વામિન્ ! અમારું મન તમારાં ચરણકમળથી બીજા કોઈ પદાર્થમાં ક્યારેય પણ જાય નહિ આ અમો પોતાના જનો જેમને પ્રિય છે એવા સમગ્ર ઈશ્વરોના ઈશ્વર તમારી પાસે સદા પ્રાર્થીએ છીએ. (૬૦) હે રાજન્ ! આ પ્રકારે પોતાની સેવા કરનારી સ્ત્રી ભક્તોએ સ્તુતિ કરાયેલા ભક્તપતિ શ્રીહરિએ અત્યન્ત પ્રસન્ન થઈને જયાદિ સ્ત્રીઓને અભયદાનનું વચન આપ્યું : (૬૧) હે ભક્તો ! તમારા સર્વેના હૃદયમાં જે જે મનોરથ વર્તે છે તે તે સંપૂર્ણ થશે, એમાં સંશય નથી. (૬૨) કારણ કે હે અબળાઓ ! યોગીઓએ પણ ત્યાગ કરવો અશક્ય, દેહ અને દેહનાં સંબંધીઓનો જે સ્નેહાનુબંધ તેનો મારે વિષે પ્રેમથી તૃણની માફક ત્યાગ કરીને તમો મને ભજો છો માટે તમારા મનોરથ પૂર્ણ થવામાં સંશય નથી. (૬૩)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच – **इत्यादिभिः सुमधुरैर्वचनैर्विचित्रैस्तं तोषयन्तमृषिनायकमात्मनस्ताः। नत्वा नरेश! वनिताः सकलास्तदानीं पप्रच्छुरेतदनघाश्च तदेकचित्ताः ॥६४॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे प्रबोधन्युत्सवे दुर्गपुरस्थजयादियोषिन्मण्डलकृतभगवत्स्तुति-निरूपणनामा त्रिचत्वारिंशोऽध्यायः ॥४३॥

जयादय ऊचुः- **नारायणमुने ! स्वामिन् ! भक्तवत्सल ! सत्पते ! । पृच्छामस्त्वां वयं किञ्चित्कृपया तच्छृणु प्रभो ! ॥१॥ त्वां प्रसादयितुं प्रोक्ताः शास्त्रेषु बहवो गुणाः । दानयज्ञतपोयोगजपच्छन्दोव्रतादयः ॥२॥ तेषु मुख्योऽस्ति कः स्वामिन् ! येन संसेवितेन वै । नितरां त्वं प्रसन्नः स्याः स्वभक्तेभ्यो वरप्रदः ॥३॥ प्राप्तेन येन चैकेन प्राप्ताः स्युः सकला गुणाः । अप्राप्ते च गुणे यस्मिन् गताः स्युरपरे गुणाः ॥४॥ वयं वेदितुमिच्छामः सर्वास्त्वं त्वदुपासिकाः । वक्तुमर्हसि तस्मात्त्वं वासुदेव! सुनिश्चितम् ॥५॥** श्रीनारायणमुनिरुवाच – **भक्त्यैवाहं प्रसन्नः स्यां यथा भक्तास्तथेतरैः । साधनैर्नैव तुष्यामि जानीतेति सुनिश्चितम् ॥६॥ दानयज्ञतपोयोगजपच्छन्दोव्रतादिभिः । तुष्येय सत्कृतैः किन्तु यथा भक्त्या न तैस्तथा ॥७॥ न विप्रत्वं न देवत्वं नोत्कृष्टं जन्म चापरम् । मत्प्रीतिकारणं किन्तु भक्तिरेकास्ति सर्वथा ॥८॥ स्नेहेन सेवनं यत्तु माहात्म्यज्ञानपूर्वकम् । तदेव लक्षणं ज्ञेयं भक्तेरिह महाव्रताः! ॥९॥ नराकृतिरपि कृष्णः सकलैश्वर्यसंयुतः। दिव्यविग्रह एवेति माहात्म्यं ज्ञेयमस्य च ॥१०॥**

**સુવ્રત મુનિ કહે છે :** હે નરેશ ! આ કહ્યાં વગેરે અત્યન્ત મનોજ્ઞ નાના પ્રકારનાં વચનોથી પોતાનાં જનોને પ્રસન્ન કરતા મુનિપતિ શ્રીહરિને નમસ્કાર કરીને દોષે રહિત શ્રીહરિના સ્વરૂપમાં એકચિત્તવાળી સમગ્ર જયા વગેરે સ્ત્રીઓ તે સમયે પ્રશ્ન પૂછતી હતી. (૬૪)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીયપ્રકરણે પ્રબોધન્યુત્સવે દુર્ગપુરસ્થ જયાદિયોષિન્મંડલકૃત ભગવત્સ્તુતિ નિરૂપણનામા ત્રિચત્વારિંશોઽધ્યાયઃ (૪૩)*

## અધ્યાય : ૪૪

## ભગવાન શ્રીહરિએ જ પોતાના મુખારવિન્દથી શ્રીહરિનો અતિ સંતોષ કરનારો (ભક્તિ નામનો) ગુણ કહ્યો છે.

**જયાદિ સ્ત્રીઓ બોલી :** હે નારાયણ મુને, હે સ્વામિન્ ! હે ભક્તવત્સલ, હે સત્પતે, હે પ્રભો ! અમો તમોને લગારેક પૂછીએ છીએ તે કૃપા કરી સાંભળો. (૧) હે ભગવન્ ! શાસ્ત્રોમાં દાન, યજ્ઞ, તપ, યોગ, જપ, સ્વાધ્યાય અને વ્રતો જેમાં છે એવા ઘણા ગુણો તમોને પ્રસન્ન કરવા કહેલા છે. (૨) હે સ્વામિન્ ! તે દાનાદિ ગુણોમાં મુખ્ય કયો ગુણ છે. જે સેવા કરાયેલા મુખ્ય ગુણથી પોતાના ભક્તને વરપ્રદાતા તમો અત્યંત પ્રસન્ન થાઓ. (૩) વળી પ્રાપ્ત થયેલા એક મુખ્ય ગુણથી બીજા સમગ્ર ગુણો અન્તર્ગત આવી જાય અને જે પ્રાપ્ત નહિ થયે સતે બીજા ગુણો ચાલ્યા જાય અર્થાત્ વિનિષ્ટપ્રાય થાય; (૪) હે વાસુદેવ! તમારી ઉપાસના કરનારી અમો સર્વે તમારા દ્વારા તમોને અતિ સંતોષ કરનારો મુખ્ય ગુણ જાણવા માટે ઈચ્છીએ છીએ માટે સુનિશ્ચિત નિર્ણય કહેવા માટે એક તમે જ યોગ્ય છો. (૫)

**શ્રીનારાયણ મુનિ બોલ્યા :** હે ભક્તાઓ ! હું જે પ્રકારે ભક્તિથી પ્રસન્ન થાઉં તેવો બીજાં સાધનોથી પ્રસન્ન થતો નથી : આ પ્રકારે મારો નિર્ણય તમો જાણો. (૬) સુયોગ્ય પ્રકારે આચરણ કરેલાં દાન, યજ્ઞ, તપ, યોગ, જપ, સ્વાધ્યાય અને વ્રતાદિ સાધનોથી પ્રસન્ન થાઉં પરંતુ જેવી રીતે ભક્તિથી પ્રસન્ન થાઉં. તેવો તે સાધનોથી પ્રસન્ન થતો નથી. (૭) વળી મારી પ્રીતિમાં કારણ બ્રહ્મપણું નથી, દેવપણું નથી, અને દીક્ષા સ્વરૂપ ઉત્કૃષ્ટ જન્મ પણ નથી, પરંતુ કેવળ ભક્તિ સર્વે પ્રકારે મારી પ્રીતિમાં કારણ છે. (૮) હે મહાવ્રતાઓ ! માહાત્મ્ય જ્ઞાન પૂર્વક દેશ, કાળ અને ક્રિયાદિથી વિઘ્ન આવી શકે નહીં એવા અતિ પ્રેમથી નવ પ્રકારે ભગવાનની જે સેવા છે, તે જ ભક્તિનું લક્ષણ જાણવું. (૯) **માહાત્મ્ય જાણવાનો પ્રકાર બતાવે છે :** ધારણ કરેલા મનુષ્યાકારમાં પણ કૃષ્ણ સમગ્ર ઐશ્વર્ય સંપન્ન બ્રહ્મપુરાદિ પોતાના ધામમાં રહેલા દિવ્ય ઐશ્વર્ય પાર્ષદાદિ સહિત જ દિવ્ય વિગ્રહ જ છે : આ પ્રમાણે શ્રીકૃષ્ણનું માહાત્મ્ય જાણવું. (૧૦)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

तादृग्भक्तिगुणे प्राप्ते प्राप्ताः सर्वे गुणाः किल । भवन्ति तस्मिंश्चाप्राप्ते गता इव परे गुणाः ॥११॥ क्रियमाणापि भक्तिस्तु माहात्म्यज्ञानमन्तरा । न वर्धते नच गुणास्तं भजन्ति शमादयः ॥१२॥ साप्यारम्भदशायां तु वर्धमानापि निर्बला । ध्रुवं नश्यति तारूण्यात्प्राक् स्त्रीव क्षयरोगिणी ॥१३॥ तस्यां च क्षीयमाणायां प्रागुपात्ताः परे गुणाः । रक्ष्यमाणा अपि बलाद्ध्रियन्त्येव न संशयः ॥१४॥ माहात्म्यज्ञानपूर्वं सा क्रियमाणा त्वनुक्षणम् । विवर्धतेऽतिबलिनी दाववह्निशिखा यथा ॥१५॥ तपोमुख्याश्च नियमा ब्रह्मचर्यादयो यमाः । तथा शमदमाद्याश्च प्रोच्यन्ते विबुधैर्गुणाः ॥१६॥ माहात्म्यज्ञानहीनो हि तेषु चैकतमो गुणः । न तिष्ठेन्मनुजे तर्हि कुतः सर्वगुणा तु सा ॥१७॥ विज्ञातं येन माहात्म्यं यावत्तस्य तु तावती । श्रद्धा कृष्णे भवेत्स्याच्च भक्तिः श्रद्धानुरूपिणी ॥१८॥ विज्ञाय तस्य माहात्म्यं श्रद्धया या कृता दृढम् । भक्तिः सैकैव मेऽत्यन्तं प्रसन्नत्वस्य कारणम् ॥१९॥ भवतीनां तु सर्वासामस्ति माहात्म्यवेदनम् । किन्तु तद्दृढतासिद्ध्यै श्रोतव्याः सत्कथाः सदा ॥२०॥ वेदेषु कृष्णमाहात्म्यं वर्णितं वर्तते भृशम् । दुर्ज्ञेयो हि तदर्थस्तु विद्वद्भिरपि सर्वथा ॥२१॥ तेनैवातस्तदर्थस्तु व्यासरूपेण सद्धियः! । पुराणेष्वितिहासे च सुज्ञेयोऽस्ति निरूपितः ॥२२॥ सारः सर्वपुराणादेः श्रीमद्भागवतं स्त्रियः ! । तस्यापि दशमस्कन्धः सार इत्यस्ति मे मतम् ॥२३॥ कृष्णाकारस्य तत्रास्ति स्थापनं भक्तिधर्मयोः । आश्रयस्येत्यसौ नूनं मया सर्वाधिको मतः ॥२४॥ तस्मादवश्यं श्रोतव्यः पठनीयश्च सोऽन्वहम् । माहात्म्यज्ञानदार्ढ्यं स्यात्ताभ्यां भक्तिश्च वर्धते ॥२५॥

તેવા પ્રકારની ભક્તિરૂપ ગુણ પ્રાપ્ત થયો હોય તો બીજા સર્વે ગુણો તપ વગેરે ગુણો પણ પ્રાપ્ત થયેલા છે. તેવા પ્રકારનો ભક્તિગુણ પ્રાપ્ત થયો ના હોય તો સર્વ ગુણો હોય તો પણ નાશ પામેલા સમાન જ જાણવા, કારણ કે ફળ આપનારા નથી. (૧૧) દરરોજ આચરણ કરાયેલી ભક્તિ પૂર્વે કહેલા ભગવાનના મહિમા વિના તો વૃદ્ધિ પામતી નથી. માહાત્મ્ય જ્ઞાન વિના કેવળ ભક્તિનિષ્ઠાવાળા શ્રીકૃષ્ણના ભક્તને શમાદિ ગુણો પ્રાપ્ત થતા નથી. (૧૨) અને માહાત્મ્ય જ્ઞાને રહિત ભક્તિ આરંભ દશામાં વધતી હોય તો પણ બળે રહિત, જન્મથી ક્ષય રોગવાળી સ્ત્રી તરુણાવસ્થાથી પ્રથમ જ જેમ તેમ નિશ્ચે વિનાશ પામે છે. (૧૩) માહાત્મ્ય જ્ઞાન રહિત ભક્તિ ક્ષય પામ્યે સતે પ્રથમ ભક્તિની સિદ્ધિ માટે સંપાદિત કરેલા તપ વગેરે બીજા ગુણો પણ પ્રયત્ન કરવા છતાં પણ નાશ પામે છે જ, તેમાં સંશય નથી. (૧૪) માહાત્મ્ય જ્ઞાનપૂર્વક કરાતી ભક્તિ તો પ્રતિક્ષણ અત્યંત બલવાળી સતી વનના અગ્નિની જ્વાળાની માફક વૃદ્ધિ જ પામે છે. (૧૫) તપ વગેરે નિયમો બ્રહ્મચર્ય વગેરે યમો (જે શ્રીમદ્ ભાગવતમાં વિગતે કહેલા છે તે) તથા શમ, દમાદિ સાધનો એ સર્વે વિદ્વાન જનોએ ગુણો કહેલા છે. (૧૬) તપ આદિ ગુણોમાં એક પણ ગુણ માહાત્મ્ય જ્ઞાને રહિત જો હોય તો તે માણસમાં રહેતો નથી તો સર્વ ગુણના આધારભૂત ભક્તિ તો કયાંથી રહે ? (૧૭) જે ભક્તે જેટલું માહાત્મ્ય જાણ્યું હોય તે ભક્તજનને તેટલી વિશ્વાસપૂર્વક શ્રીકૃષ્ણની ભક્તિના આચરણમાં ત્વરા (શ્રદ્ધા) થાય અને શ્રદ્ધાનુસારે શ્રીકૃષ્ણ ભગવાનમાં ભક્તિ થાય. (૧૮) શ્રીકૃષ્ણનું માહાત્મ્ય સારી પેઠે જાણીને શ્રદ્ધાથી દઢપણે કરેલી જે ભક્તિ તે જ એક મને અતિશય પ્રસન્ન કરવામાં કારણ છે. (૧૯) મારા ભક્ત એવી તમારે વિષે તો માહાત્મ્ય જ્ઞાન છે પરંતુ તેની દઢતાની સિદ્ધિ માટે ભગવાનના માહાત્મ્યનો બોધ આપનારી કથાઓ નિરંતર સાંભળવી. (૨૦) વેદમાં કૃષ્ણનું માહાત્મ્ય અત્યંત વર્ણન કરેલું છે. વેદનો અર્થ તો શાસ્ત્રજ્ઞોએ પણ સર્વ પ્રકારે જાણવા માટે અશક્ય છે, જ. (૨૧) તે માટે હે સદ્‌બુદ્ધિ સંપન્ન સન્નારીઓ ! તે શ્રીકૃષ્ણે જ વ્યાસરૂપે વેદનો અર્થ બ્રાહ્માદિ અઢાર પુરાણોમાં અને ભારતાદિ ઈતિહાસોમાં સુખેથી બોધ થાય તેમ નિરૂપણ કર્યો છે. (૨૨) હે મારા ભક્ત સ્ત્રીઓ ! શ્રીમદ્ ભાગવત પુરાણ સર્વ પુરાણાદિનો સાર છે. (જેમ દહીંનો સાર માખણ છે તેમ છે.) શ્રીમદ્ ભાગવતનો પણ સાર દશમસ્કંધ છે. આ પ્રકારે મારો સિદ્ધાંત છે. (૨૩) દશમ સ્કંધમાં ભક્તિધર્મના આશ્રયભૂત દિવ્ય અને મનુષ્યભાવથી જણાતા શ્રીકૃષ્ણની આકૃતિનું પ્રતિપાદન છે માટે દશમસ્કંધ મેં સર્વથી અધિક માનેલો છે. (૨૪) માટે દશમસ્કંધ દરરોજ અવશ્ય સાંભળવો અને વાંચવો તેનાથી માહાત્મ્ય જ્ઞાનની દઢતા થાય અને ભક્તિ વૃદ્ધિ પામે છે. (૨૫)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच – **इति श्रुत्वा भगवतो वाक्यं ता योषितोऽखिलाः । लब्ध्वैव परमानन्दं सादरं तं ववन्दिरे ॥२६॥ ततो भगवताऽऽज्ञप्तास्ता ययुः स्वस्वमन्दिरम् । तद्गुणानेव गायन्त्यश्चक्रुः कर्म च नैत्यकम् ॥२७॥ नारायणश्च सकलान्भक्तानानन्दयन्निजान् । उवास मन्दिरे स्वीये श्रेयोमूर्तिः स सत्पतिः ॥२८॥ नृपतिरुत्तम आप्तमनोरथो भगवतः कृपया खलु तस्य सः । अचलभक्तिभरेण तमन्वहं परिचचार नरेश ! गतस्मयः ॥२९॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे प्रबोधन्युत्सवे भगवददतितोषकगुणनिरूपणनामा चतुश्चत्वारिंशोऽध्यायः ॥४४॥

सुव्रत उवाच – **अथ ता भगवद्भक्ता योषितः सकला नृप ! । समेता अभवन्सायं ललितायास्तु मन्दिरे ॥१॥ विशाले मन्दिरे तत्र हरिनामध्वनिं ततः । मुहूर्तं चक्रिरे हर्षात्कुर्वन्त्यस्तालिकाध्वनिम् ॥२॥ नाममन्त्रं भगवतो जप्तुं ताः शुचयः स्त्रियः। गृहीतमालिकाः सर्वा निषेदुश्चासनेष्वथ ॥३॥ धौतवस्त्रपरीधानाः स्वस्तिकासनमास्थिताः । ऋजुकायाश्चिन्तयन्त्यो यथादृष्टं हरिं हृदि ॥४॥ विशुद्धहृत्प्रस्फुरिते भगवद्वपुषि स्वकम् । मनः संयोज्य तन्मन्त्रं जपन्ति स्म स्थिरेक्षणाः ॥५॥ ध्यानस्थिता रमा तत्र जया च ललिताऽमरी । अमला कमलाद्यास्ताश्चित्रयोषा इवाभवन् ॥६॥ भगवन्मूर्तिसंलग्नमनःसु स्त्रीषु तासु च । इत्थं स्थितासु तत्रैकमाश्चर्यं नृपतेऽभवत् ॥७॥ तासां तपःस्थभक्तानां मध्य आविर्बभूव ह । सहसा तेजसः पुञ्जः स च द्राग्व्याप तद्गृहम् ॥८॥ अयुतेन्दुप्रतीकाशं घनीभूतं च तन्महः । बभौ पिञ्जितकार्पासचयश्वेतं मनोहरम् ॥९॥**

હે રાજન્ ! આ પ્રકારે શ્રીહરિનું વાક્ય સાંભળી સમગ્ર તે જયાદિ સ્ત્રીઓ પરમાનંદ પામીને જ શ્રીહરિને આદરે સહિત નમસ્કાર કરતી હતી. (૨૬) પછી ભગવાને આજ્ઞા આપેલી જયા આદિ સ્ત્રીઓ પોતપોતાના ભવનમાં ગઈ. શ્રીહરિકૃષ્ણ ભગવાનનાં ગુણચરિત્રોનું ગાયન કરતી થકી જ નિત્ય કર્મ, ભગવાનનાં નામ જપ વગેરે કરતી હતી. (૨૭) કલ્યાણમૂર્તિ સત્ પુરુષોના સ્વામી નારાયણમુનિ નામવાળા શ્રીહરિ પોતાના સમગ્ર ભક્તોને આનંદ પમાડતા સતા પોતાના મંદિરમાં નિવાસ કરતા હતા. (૨૮)

હે નરેશ ! ભગવાન શ્રીહરિની કૃપાથી પ્રાપ્ત થયેલા મનોરથવાળા ઉત્તમરાજા ગર્વે રહિત નિર્માની થઈને અચલ ભક્તિથી પ્રતિદિન સેવા કરતા હતા. (૨૯)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે પ્રબોધન્યુત્સવે ભગવદતિતોષક ગુણનિરૂપણ નામા ચતુશ્ચત્વારિંશોઽધ્યાયઃ (૪૪)*

### અધ્યાય : ૪૫

## રમાદિ સ્ત્રીઓને આશ્ચર્ય કરનારું ભક્તિદેવીનું પ્રત્યક્ષ દર્શન વગેરે કહેલું છે.

**સુવ્રત મુનિ બોલ્યા :** હે રાજન્ ! ભગવાનની ભક્ત રમાદિ સ્ત્રીઓ સાયંકાળે લલિતાના ભવનમાં ભેગી થઈ હતી. (૧) પછી તે અત્યંત વિશાળ મંદિરમાં તાળીઓનો ધ્વનિ કરતી થકી તે સ્ત્રીઓ આનંદથી બે ઘડી હરિનામની ધ્વનિ કરતી હતી. (૨) પછી રમા વગેરે સર્વ સ્ત્રીઓ હાથ-પગ ધોઈને જમણા હાથમાં માળા ગ્રહણ કરી શ્રીહરિનો અષ્ટાક્ષર મંત્ર જપવા માટે ધોળી કામળી આદિકનાં પોતપોતાનાં આસનોમાં બેઠી હતી. (૩) ધોઈને સૂકવેલાં વસ્ત્રો ધારણ કરી સ્વસ્તિકાસનમાં રહેલી સમાન શરીર, મસ્તક અને ડોક જેઓની છે એવી જેવા જોવાયેલા હતા તેવા શ્રીહરિને પોતાના હૃદયમાં ચિંતવન કરતી, સ્થિર નેત્રવાળી રમા વગેરે સ્ત્રીઓ નિર્મલ હૃદયમાં આવિર્ભાવ પામેલા ભગવાનના સ્વરૂપમાં પોતાનું ચિત્ત જોડીને અષ્ટાક્ષર મંત્ર જપતી હતી. (૪-૫) તે સ્ત્રીઓમાં રમા, જયા, લલિતા, અમરી, અમલા, કમલા વગેરે સ્ત્રીઓ ધ્યાનમાં રહી સતી ચિત્તમાં ચિતરેલી હોય ને શું ? એમ સ્થિર દેહવાળી થઈ ગઈ. (૬) હે નૃપતે ! આ પ્રકારે બેઠેલી સ્ત્રીઓ ભગવાનની મૂર્તિમાં સંલગ્ન મનવાળી થઈ ત્યારે તે સ્થળમાં એક આશ્ચર્ય થયું. (૭) હે રાજન્ ! આ પ્રકારે તપમાં નિષ્ઠાવાળી ભગવાનની ભક્ત સ્ત્રીઓ રમાદિ સ્ત્રીઓની મધ્ય પ્રદેશમાં તેજનો સમુદાય એકદમ પ્રગટ થયો અને તે તેજઃપુંજ તે ગૃહમાં તત્કાળ જ વ્યાપી ગયો. (૮) સાથે ઉદય પામેલા દશ હજાર ચંદ્રમાઓના સમાન આકારવાળું, ઘાટું માટે જ પીંજેલા રૂના સમાન શ્વેત મનોહર મહાતેજ શોભતું હતું. (૯)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

तस्मिन् गृहेऽथ तत्तेजोवियत्याकस्मिकाभ्रवत् । प्रादुर्भूतमपि स्थैर्यं प्राप विद्योतयद्दिशः ॥१०॥ सप्तस्वरास्त्रयो ग्रामा मूर्च्छनाश्चेकविंशतिः । नादो बहुविधश्चासीत्तस्मिञ्छ्रोतृमनोहरः ॥११॥ स्वमाधुर्येणाचकृषत् स तासामपि योषिताम् । मानसं भगवन्मूर्तेर्बहिरित्यद्भुतं महत् ॥१२॥ ससम्भ्रमं ततस्ताश्च ददृशुस्तन्महन्महः । साश्चर्यं शुश्रुवुर्नादान् तस्मिंश्च मधुरान्नृप ! ॥१३॥ सादरं वीक्षमाणासु योषास्वित्थं रमादिषु । तस्मिन्नदृश्यतैका स्त्री दिव्यरूपा मनःप्रिया ॥१४॥ दिव्यकौसुम्भवसना दिव्यालङ्कारमण्डिता । रूपानुरूपावयवा प्रसन्नमुखपङ्कजा ॥१५॥ सुवर्णगौरी तन्वङ्गी सर्वावयवसुन्दरा। समानकर्णाभरणा सुकपोलोन्नसानना ॥१६॥ नवयौवननिर्वृत्तस्तनभारकृशोदरी । मुखामोदानुरक्तालिझङ्कारोद्विग्नलोचना ॥१७॥ बिभ्रती केशभारेण मालामुत्फुल्लमल्लिकाम् । सव्रीडसुस्मितोत्क्षिप्तभ्रूविलासावलोकना ॥१८॥ विरजाम्बरसंवीतनितम्बद्वीपशोभया। काञ्च्याऽतिशोभना वल्गुचरणस्वर्णनूपुरा ॥१९॥ रत्नेन्द्रकण्ठाभरणा करकङ्कणभूषिता। मोहयन्ती मनांसि स्वलावण्येनापि योषिताम् ॥२०॥ वादयन्तीं विपञ्चीं स्वां सख्यानुपूरितस्वरा । मानं हरन्ती गीत्येव गन्धर्वाप्सरसामपि ॥२१॥ प्राक्तनानि चरित्राणि नारायणमुनेर्मुदा । गायन्तीं तां समीक्ष्यैव मुमुहुः सकलाः स्त्रियः ॥२२॥ ततो वितर्कयन्ति स्म दिव्यां तां प्रमदां प्रति । इयं किंनु भवेल्लक्ष्मी राधा वापि सरस्वती ॥२३॥ सावित्री वापि शर्वाणी स्वर्गलक्ष्मीश्च वा किमु । अन्या वा देवता काचित्समायातेयमत्र किम् ॥२४॥

---

પછી આકાશમાં એકદમ ઉદય પામેલા વાદળની માફક પ્રાદુર્ભાવ પામેલું, દશ દિશાઓને પ્રકાશ કરતું તે તેજ તે ઘરમાં નિશ્ચલતા પામ્યું. (૧૦) તે તેજમાં ષડજાદિ સાત સ્વરો, સ્વરોના સારરૂપ ત્રણ ગ્રામો અને એકવીસ મૂર્ચ્છનાઓ જેમાં છે એવો; અને વળી નાના પ્રકારના રાગવાળાં ગાયનો યુક્ત શ્રવણેંદ્રિયને મનોહર નાદ થયો. (૧૧) તે નાદ પોતાની માધુર્યતાથી શ્રીહરિના સ્વરૂપના ધ્યાનમાં નિષ્ઠાવાળી રમાદિ સ્ત્રીઓનું ચિત્ પણ ભગવાનની ધ્યેયમૂર્તિમાંથી બહાર પ્રદેશમાં અતિશય ખેંચતો હતો આ મહા આશ્ચર્ય હતું. (૧૨) હે રાજન્ ! પછી તે રમાદિ સ્ત્રીઓ તેવું મહાતેજ વ્યગ્રચિત્ત સહિત જોતી હતી તે તેજમાં અતિમનોહર સ્વર, ગ્રામ, મૂર્ચ્છનાદિ યુક્ત ગાયનના ધ્વનિઓને આશ્ચર્યપૂર્વક સાંભળતી હતી. (૧૩) આ પ્રકારે રમા આદિ સ્ત્રીઓ આદરપૂર્વક જોતી હતી ત્યારે ઘાટા તેજમાં દિવ્ય રૂપવાળી, જોનારી સ્ત્રીઓના મનને આનંદ આપનારી એક સ્ત્રી દેખાઈ આવી. (૧૪) સુંદર અગ્નિશિખાની માફક રંગેલું વસ્ત્ર જેનું છે એવી, દિવ્ય અલંકારોથી શોભાયમાન, રૂપને અનુરૂપ અવયવોવાળી, પ્રસન્ન મુખકમળવાળી; (૧૫) સુવર્ણના સમાન ગૌર શરીરના વર્ણવાળી, કોમલાંગી, રમણીય સર્વ અવયવોવાળી, સમાન કર્ણનાં આભૂષણોવાળી, સુંદર બન્ને કપોલો જેમાં છે અને ઊર્ધ્વ નાસિકા જેમાં છે એવા મુખવાળી; (૧૬) નવયૌવનથી વૃદ્ધિ પામેલા સ્તનોના ભારથી કૃશ થયેલા ઉદરવાળી, મુખની સુગંધીમાં પ્રીતિવાળા-ભ્રમરાઓના ગણગણાટથી સંભ્રમે સહિત નયનકમળોવાળી; (૧૭) પ્રફુલ્લિત મોગરાનાં પુષ્પોની માલા પોતાના કેશકલાપમાં ધારણ કરતી, લજ્જાએ સહિત સુંદર હાસ્યથી કંપાવેલી ભ્રકુટિઓના વિલાસની સાથે જોતી, શુદ્ધ વસ્ત્રથી વિંટાયેલા નિતંબો રૂપી દ્વીપોની શોભાયુક્ત એવી કાંચી-(કંદોરા)થી અતિ શોભાયમાના, સુંદર ચરણોમાં સુવર્ણનાં નૂપુરો જેને છે એવી, શ્રેષ્ઠ રત્નો પદકાદિ-કંઠનાં આભૂષણોમાં જેને છે એવી, કરનાં કંકણોથી અલંકૃતા, પોતાના અંગના સૌંદર્યથી પોતાને જોનારી રમા વગેરે સ્ત્રીઓના મનોને પણ મોહ પમાડતી, પોતાની વીણાને મધુરસ્વરથી વગાડતી, સુકંઠી (મધુરસ્વરવાળી) પોતાની સખીએ અનુગાનથી પુરાયેલા સ્વરોવાળી, ગંધર્વ સહિત અપ્સરાઓના પણ માનને ગાનમાત્રથી જ હરનારી, નારાયણ મુનિના શ્રીકૃષ્ણ નામના પૂર્વના અવતારોએ કરેલાં ચરિત્રોને ગાન કરતી દિવ્ય સ્ત્રીને જોઈને રમાદિ સમગ્ર સ્ત્રીઓ પણ મોહ પામી ગઈ, જ. (૧૮થી૨૨) પછી દિવ્ય પ્રમદાને જોઈને રમાદિ સ્ત્રીઓ તર્ક કરવા લાગી : આ સ્ત્રી લક્ષ્મી છે કે શું ? અથવા સ્વયં રાધા હશે કે શું ? અથવા સરસ્વતી હશે કે શું ? (૨૩) આ સ્ત્રી સાવિત્રી અહીંયાં આવેલાં છે કે શું ? અથવા શિવની પત્ની પાર્વતી આવેલાં છે કે શું ? અથવા સ્વર્ગની અધિષ્ઠાત્રી પોતે લક્ષ્મી અહીં આવ્યાં કે શું ? અથવા બીજા કોઈ દેવતા અહીં આવ્યા છે કે શું ? (૨૪)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

नारायणमुनेः किंवा निरता पादसेवने । साक्षान्मुक्तिरियं दत्ते कृपया नः स्वदर्शनम् ॥२५॥ किंवा भगवता पूर्वं मोहनार्थं शिवस्य यत् । गृहीतं मोहिनीरूपं तत्तेनैव प्रदर्श्यते ॥२६॥ तद्रूपगानमाधुर्यमोहिता इति ताः स्त्रियः । बहुधा तर्कयन्त्योऽपि निश्चयं नापुरञ्जसा ॥२७॥ उत्सुका अपि तां प्रष्टुं तेजसाऽस्याः प्रधर्षिताः । ताः स्त्रियः शेकिरे नैव वक्तुं किञ्चिदपि ध्रुवम् ॥२८॥ विरक्तास्वग्रगण्याथ रमापि स्वं मनो हरिम् । विहाय तद्गतं बुद्ध्वा चिन्तयामास चेतसि ॥२९॥ अहो अत्यद्भुतं ह्येतन्ममापि सुदृढं मनः अस्यां योषित्यभूल्लुब्धं सद्यो दर्शनमात्रतः ॥३०॥ एकं हरि विना क्वापि ब्रह्माण्डेऽत्र नराकृतौ । क्वापि मोहं न यत्प्राप मोहितं तत्कथं स्त्रियाम् ॥३१॥ ऐहिके च सुखे क्वापि तथा वै पारलौकिके । विरक्तं मानसं यन्मे तत्कथं मुह्यति स्त्रियाम् ॥३२॥ अलौकिकेषु यत्पुंसु स्त्रीषु धामसु भूरिषु । नाभूत्समाधिदृष्टेषु सक्तं क्वापि मनो मम ॥३३॥ तदस्यां योषिति कथं त्यक्त्वैव हरिचिन्तनम् । सद्य एवाभवल्लुब्धमित्याश्चर्यं महन्ननु ॥३४॥ हरेरन्यत्र मे चित्तं जयाललितयोरपि । अमर्यादेश्च न क्वापि सज्जेतेत्यस्ति निश्चयः ॥३५॥ तस्मादिदं हरेरेव किञ्चित्कर्तव्यमस्ति वै । अन्यथा कः समर्थः स्यान्मनो मोहयितुं हि नः ॥३६॥ सान्निध्येऽपि स्त्रिया नित्यं स्वचित्ताक्षोभसम्भवम् । दर्पं यथाहरच्छम्भोर्मोहिनीरूपधृद्धरिः ॥३७॥ तथैवास्मत्परीक्षार्थं तादृग्रूपधरः पुनः । हरिरेव मनो नूनमस्माकं मोहयत्यसौ ॥३८। छलयन्तं निजा भक्ता अस्मान्रूपान्तरेण हि । पृच्छेयैनं कस्य पुत्री कस्य भार्येति नर्मणा ॥३९॥ इति निश्चित्य मनसा सा रमाऽतिदृढव्रता । पप्रच्छ नत्वा विनयाद्गायन्तीं तां हरेर्गुणान् ॥४०॥

---

અથવા શ્રી સ્વામિનારાયણ ભગવાનના ચરણકમળની પરિચર્યા કરવામાં નિરંતર આસક્ત પ્રત્યક્ષ મૂર્તિમન્ત આ મુક્તિ છે કે શું ? (એ મુક્તિ જ) કૃપા કરી આપણને પોતાનાં દર્શન આપે છે કે શું ? અથવા પ્રથમ શ્રીહરિએ શિવના મોહ માટે ગ્રહણ કરેલું જે મોહિનીસ્વરૂપ તે ભગવાને જ બતાવ્યું છે કે શું ? (૨૫-૨૬) હે રાજન્ ! આ પ્રકારે સ્ત્રીનું રૂપ અને ગાયનની મધુરતાથી મોહ પામેલી રમાદિ સ્ત્રીઓ ઘણા પ્રકારે વિતર્ક કરતી સતી પણ તત્ત્વથી નિશ્ચયને પામી નહીં. (૨૭) તે સ્ત્રીને 'તમો કોણ છો ?' એમ પૂછવા માટે ઉત્સાહવાળી હોવા છતાં પણ આ સ્ત્રીના તેજથી પરાભવ પામેલી રમાદિ સ્ત્રીઓ લગારેય પણ બોલવા માટે નિશ્ચે સમર્થ ના થઈ શકી. (૨૮) ભગવાન વિના અન્યમાં વૈરાગ્યવાળી સ્ત્રીઓમાં અગ્રેસર રમા પણ પોતાનું મન પોતાના પ્રાણપ્રિય શ્રીહરિકૃષ્ણ ભગવાનને ત્યાગ કરી તે સ્ત્રીમાં આસક્ત થયેલું જાણી પોતાના મનમાં ચિંતવન કરવા લાગી. (૨૯) અહો !!! (આ ખેદની વાત છે) જે સુદૃઢ મારું મન પણ કેવળ દર્શન માત્રથી આ સ્ત્રીમાં તત્કાળ જ આના દર્શનાદિમાં અભિલાષા યુક્ત થયું : આ અદ્ભુત આશ્ચર્ય છે ! (૩૦) જેનું મન કેવળ અલૌકિક સર્વ સૌંદર્યના આધારભૂત શ્રીહરિકૃષ્ણ ભગવાનના આકાર વિના આ બ્રહ્માંડમાં કોઈ પણ નરાકૃતિમાં ક્યારેય પણ મોહ પામ્યું નથી તે મન આ સ્ત્રીમાં કયા કારણથી મોહ પામ્યું ? (૩૧) આ લોક સંબંધી તથા પરલોક સંબંધી કોઈ પણ સુખમાં અત્યંત વિરક્ત એવું જે મારું મન તે આ સ્ત્રીમાં કેમ મોહ પામ્યું ? (૩૨) સમાધિમાં અલૌકિક ઘણા પુરુષોમાં અને અલૌકિક સ્ત્રીઓમાં અને અલૌકિક સ્થાનોમાં ક્યારેય પણ જે મન આસકત થયું નથી તે મન શ્રીહરિકૃષ્ણ ભગવાનના ધ્યાનને ત્યાગ કરીને જ આ સ્ત્રીમાં તત્કાલ જ શાથી લોભ પામ્યું ? આ અતિ આશ્ચર્ય છે, જ. (૩૩-૩૪) મારું ચિત્ત તથા જયા-લલિતા અને અમરી વગેરે સ્ત્રીઓનું ચિત્ત પણ શ્રીહરિના સ્વરૂપથી બીજામાં આસક્ત થાય જ નહીં : આવો નિર્ણય છે. માટે આ શ્રીહરિકૃષ્ણ મહારાજનું જ કંઈ પણ કર્તવ્ય છે, જ; એમ ના હોય તો અમારું મન મોહ પમાડવા માટે કોણ સમર્થ થાય? કોઈ ના થાય. (૩૫-૩૬) પાર્વતીની સાથે સર્વદા સમીપમાં હોવા છતાં પણ પોતાના ચિત્તનું ક્ષોભે રહિતપણું જાણવાથી ઉત્પન્ન થયેલા શિવના ગર્વને શ્રીહરિ મોહિનીરૂપ ધારણ કરીને જેમ હરતા હતા તે પ્રકારે જ અમારી પરીક્ષા લેવા માટે શ્રીહરિ ફરીથી મોહિનીરૂપ ધારણ કરીને અમારા મનને મોહ પમાડે છે, જ. (૩૭-૩૮) પોતાની ભક્ત સ્ત્રીઓ અમોને સ્ત્રીના બીજા રૂપથી છેતરતા શ્રીહરિને પરિહાસથી તમો કોની પુત્રી, કોની પત્ની છે ? આ પ્રમાણે હું પૂછું છું. (૩૯) હે રાજન્ ! આ પ્રમાણે પોતાના ચિત્તથી નિશ્ચય કરી (શ્રીહરિને સ્ત્રીરૂપે ભાસમાન જાણી તમે કોણ છો ? કોની પુત્રી છો ? કોની પત્ની છો ? આ પ્રકારે પુછવાનું મનમાં નક્કી કરીને) અતિ દૃઢ વ્રતવાળાં તે રમા પ્રણામ કરી વિનય અને વિનમ્રપણે શ્રીહરિના ગુણ ગાતી તે સ્ત્રીને કહેવા લાગ્યાં. (૪૦)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

रमोवाच - नारायणि ! नमस्तुभ्यं मनोनयननन्दिनि ! । कासि कस्यासि पुत्री त्वं भार्या कस्यासि सुन्दरी ॥४१॥ भक्तानां स्वात्मनि मनः कर्षन्ती कापि देवता । नूनं भवसि मातस्त्वं ब्रूहि नः स्वचिकीर्षितम् ॥४२॥ अस्माकं भगवद्ध्याने विक्षेपो जायते ध्रुवम् । उक्त्वातः स्वस्य कर्तव्यं गच्छ मातर्यथागतम् ॥४३॥ इति पृष्टा महाबुद्ध्या तीव्रवैराग्यसम्पदा । तया सा मधुरं प्राह धर्मपट्टाङ्गना वचः ॥४४॥ भक्तिरुवाच - रमाद्या योषितो भक्ताः ! सर्वाः शृणुत मद्वचः । साक्षाच्छ्रीधर्मदेवस्य पत्नीं भक्तिमवैत माम् ॥४५॥ नारायणमुनेर्नित्यमन्तिकेऽहं सभर्तृका । वसामि दिव्यदेहेति न मां पश्यन्ति मानवाः ॥४६॥ प्रीणिताहं किल जयाललिताभ्यां विशेषतः। अन्नकूटे प्रबोधन्यामुत्सवेन च भूयसा ॥४७॥ भवतीभिश्च सर्वाभिरनादृत्य निजास्तनूः । श्रमः कृतो महानेव सादरं ह्युत्सवद्वये ॥४८॥ अत आभ्यां च युष्मभ्यं सर्वाभ्योऽपि प्रसन्नया । मया स्वदर्शनं दत्तमिति वित्त तदाज्ञया ॥४९॥ नान्यथा दर्शनं मे स्यात्प्रत्यक्षं योगिनामपि । वरं वृणीत तुष्टाया यूयं मत्स्वाभिवाञ्छितम् ॥५०॥ सुव्रत उवाच - इति भक्तेर्वचः श्रुत्वा प्रहृष्टा गतसंशयाः । साश्चर्यं च सरोमाञ्चं प्रणेमुस्तां रमादयः ॥५१॥ ततो बद्धाञ्जलिपुटाः प्रसन्नमुखपङ्कजाः। तामूचुर्योषितः सर्वा नारायणमनःप्रियाम् ॥५२॥ रमादय ऊचुः- नमस्ते सर्वकल्याणि! । भक्ते ! भगवति ! ध्रुवे! त्वद्दर्शनान्महानेव हृद्यानन्दोदयोऽस्ति नः ॥५३॥ यदि प्रसन्ना भवसि तर्हि त्वं सर्वमङ्गले ! कुरु स्थितिं हृत्स्वस्माकं सर्वासामपि सर्वदा ॥५४॥ एतमेव वरं देहि महाराज्ञि ! त्वमद्य नः । एतदन्यत्तु नास्माकं प्रार्थनीयं त्वदीश्वरि ! ॥५५॥ गाने त्वदीये चित्तं नो लुब्धं भवति वै भृशम् । तस्मात्त्वं ब्रूहि किं मातर्गायस्यतिमनोहरम् ॥५६॥

**રમા કહે છે** : હે નારાયણી ! તમને પ્રણામ છે. દર્શન માત્રથી આપ મન સહિત મારાં નયનને આનંદ આપો છો તેમજ જોનારા સમગ્ર માનવના પણ મનોનયનને આનંદ આપનારાં તેજસ્વી સ્વરૂપવાળાં છો : આવાં તમો દેવગંધર્વ આદિક અમાનુષ જાતિમાં કઈ જાતિનાં છો ? અને કેનાં દીકરી અને કેનાં પત્ની છો ? (૪૧) હે માતઃ ! ભગવાનના ભક્ત જે અમો તે અમારું મન પોતાના સ્વરૂપમાં આકર્ષણ કરનારાં આપ કોઈપણ દેવતા છો એમ હું નિશ્ચે જાણું છું. આપને ઈચ્છિત જે કર્તવ્ય હોય તે કહો. (૪૨) હે માતઃ ! અમારે ભગવાનના ધ્યાનમાં વિક્ષેપ થાય છે જ, માટે તમારું કર્તવ્ય કહીને જેમ આવ્યાં હો તેમ જાઓ. (૪૩) હે રાજન્ ! આ પ્રમાણે અતિ તીવ્ર બુદ્ધિમતી રમાએ પૂછાયેલી, હરિપ્રસાદના નામથી પ્રગટ થયેલા શ્રીધર્મ પ્રજાપતિની મુખ્ય પત્ની મૂર્તિ, જેમનું બીજું નામ 'ભક્તિ' છે તે મધુર વાણીથી બોલ્યાં : (૪૪) હે રમાદિ ભક્ત સ્ત્રીઓ ! તમો મારું વચન સાંભળો. સાક્ષાત્ શ્રી ધર્મદેવની પત્ની ભક્તિ મને જાણો. (૪૫) સ્વામીએ સહિત હું દિવ્ય દેહવાળી તમારા ઉપાસ્ય, મારા પુત્ર શ્રીહરિકૃષ્ણ ભગવાનની સમીપે સર્વદા નિવાસ કરું છું : આ પ્રમાણે મારા દિવ્ય દેહથી નિવાસ કરું છું તેથી મનુષ્યો મને જોતા નથી. (શ્રીહરિની કૃપાથી પ્રાપ્ત થયેલી દિવ્ય દૃષ્ટિવાળાં જનો તો જુએ છે.) (૪૬) હું જયા અને લલિતાએ અન્નકૂટ અને પ્રબોધિની એકાદશીમાં અતિ મોટા ઉત્સવથી વિશેષ પ્રસન્નતા પમાડેલી છું, જ. (૪૭) અને સર્વે તમોએ પોતાના તપથી કૃશ શરીરોનો અનાદર કરી બન્ને ઉત્સવોમાં પ્રેમે સહિત અતિશય પ્રયાસ કરેલો છે, જ. (૪૮) માટે પ્રસન્ન થયેલી મેં શ્રીનારાયણ મુનિની આજ્ઞાથી જયા-લલિતા અને તમો સર્વેને મારાં દર્શન આપ્યાં : આ પ્રમાણે તમો જાણો. (૪૯) એમ ના હોય તો યોગીજનોને પણ મારું પ્રત્યક્ષ દર્શન થાય નહિ; વળી, તમો તમારી ભક્તિથી અતિ પ્રસન્ન થયેલી મારાથી પોતાનો ઈચ્છિત વર માગો. (૫૦) હે રાજન્ ! આ પ્રકારે ભક્તિનું વચન સાંભળી અત્યંત પ્રસન્નતા પામેલી તેના રૂપાદિ વિષયમાં સંશયે રહિત રમાદિ સ્ત્રીઓ આશ્ચર્ય સહિત, રોમાંચે સહિત જેમ હોય તેમ ભક્તિને પંચાંગ પ્રણામ કરતી હતી. (૫૧) પછી બંને હાથ જોડી અતિ હર્ષયુક્ત મુખકમળવાળી સર્વે રમાદિ સ્ત્રીઓ, શ્રીનારાયણ મુનિનાં અત્યંત પ્રેમના સ્થાનભૂત માતા ભક્તિને કહેવા લાગ્યાં. (૫૨)

**રમાદિ સ્ત્રીભક્તો બોલ્યાં** : હે સર્વનું કલ્યાણ કરનારા ! હે નિત્ય, પૂજ્ય, ભક્તિદેવી ! તમોને નમસ્કાર હો. તમારાં દર્શનથી અમારા હૃદયમાં મહાઆનંદનો ઉદય થયો છે. (૫૩) હે સર્વમંગલે ! જો તમો પ્રસન્ન થયાં હો તો અમારાં સર્વેનાં હૃદયમાં સર્વદા સ્થિતિ કરો. (૫૪) હે શ્રી ધર્મપત્ની, હે ઈશ્વરી ! તમો અમોને આ પૂર્વોક્ત વર આજે આપો; આના વિના અમારે તમારાથી પ્રાર્થના કરવા યોગ્ય નથી. (૫૫) હે માતા ! તમારા ગાયનમાં અમારું ચિત્ત અત્યંત આસક્ત થાય છે. માટે જ અતિ મધુર તે તમો શું ગાયન કરો છો ? તે કહો. (૫૬)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

इति ताभिः प्रार्थिता सा प्रसन्ना भक्तिराह ताः। श्रूयतां वचनं भद्रा ! यथार्थं मम निश्चितम् ॥५७॥ यत्र धर्मो वसेत्तत्र वासो भवति मे ध्रुवम् । यतश्चापसरेद्धर्मस्ततो गच्छामि तत्क्षणम् ॥५८॥ पतिव्रताया मम वै प्रतिज्ञैषास्ति योषितः । नाहं जहामि तं स्निग्धं स्निग्धां मां न जहाति सः ॥५९॥ वशीकृतोऽस्ति स तु वै भवतीभिर्यतात्मभिः । यमैश्च नियमैस्तस्मादहमस्मि वशीकृता ॥६०॥ अतः सहैव पत्याहं वासं युष्मास्वभीप्सता । भवतीनामपि हृदि स्थास्याम्यत्र न संशयः ॥६१॥ किं गायसीति यत्पृष्टं श्रूयतां च तदुत्तरम् । सुखयेत्स्वं यस्तु तस्य गेयं यश इति स्थितिः ॥६२॥ अत्र नारायणमुनिः साक्षात्कृष्णो हि वर्तते । सोऽरक्षदसुरेभ्यो नः प्राक्तेभ्योऽद्य च रक्षति ॥६३॥ प्राक्तनानि चरित्राणि व्यासस्तस्य जुगुम्फ ह । गायामि तान्यहं नित्यं मनआनन्ददानि हि ॥६४॥ अग्रे त्वद्यतनान्यस्य चरित्राणि महामुनिः । गुम्फिष्यति शतानन्दस्तानि गास्यामि च स्त्रियः! ॥६५॥ सुव्रत उवाच - इति ताभ्यो वरं दत्त्वा तत्प्रश्नस्य च सोत्तरम् । तिरोबभूव सहसा विद्युल्लेखेव भूपते! ॥६६॥ साश्चर्यं भृशमानन्दं प्राप्तास्ताश्च तदीक्षणे । हेतुं तु श्रीहरेरेव प्रसादं मेनिरेऽबलाः ॥६७॥ एवं भगवता तेन स्वभक्तानां मनोरथाः । पूर्यन्ते सकला राजन् ! रक्ष्यन्ते ते च सर्वतः ॥६८॥ एतादृशान्भूरिश एव तत्र महोत्सवान्भक्तमनोभिरामः । स कारयामास नृप ! स्वभक्तैर्निषेव्यमाणः प्रथयन् यशः स्वम् ॥६९॥ पवित्रमेतद्भगवच्चरित्रं यः श्रावयेद्यः शृणुयाच्च भक्त्या। विमुच्य तौ संसृतिसंज्ञपाशाद्धित्वा वपुर्ब्रह्मगतिं लभेताम् ॥७०॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे प्रबोधन्युत्सवे रमादीनां भक्तेः प्रत्यक्षदर्शनादिनिरूपणनामा पञ्चचत्वारिंशोऽध्यायः ॥४५॥

હે રાજન્ ! આ પ્રકારે રમાદિ નારીઓએ પ્રાર્થના કરાયેલાં, અતિ પ્રસન્ન થયેલાં ભક્તિમાતા રમા વગેરે સ્ત્રીઓને કહેવા લાગ્યાં : હે કલ્યાણીઓ ! મારું યથાર્થ નિશ્ચયવાળું વચન સાંભળો. (૫૭) જેઓમાં મારા પતિ ધર્મ નિવાસ કરે તેમાં મારો નિવાસ નિશ્ચે થાય છે. ધર્મ જેનાથી દૂર જાય તેનાથી હું પણ તત્કાળ જ દૂર જાઉં છું. (૫૮) હે સ્ત્રીઓ ! પતિવ્રતા એવી મારી આ (પૂર્વોક્ત પ્રમાણે) પ્રતિજ્ઞા છે કે જેથી હું મારા સ્નેહના આધાર સ્વરૂપ મારા પતિને ક્યારેય ત્યાગ કરતી નથી. (૫૯) નિયમમાં મનવાળી તમોએ અહિંસા, સત્યાદિ યમો અને શૌચ-તપાદિ નિયમો વડે તે ધર્મને તો વશ કરેલા છે માટે હું પણ વશ થયેલી છું. (૬૦) માટે તમારામાં વાસ ઈચ્છતા મારા પતિ ધર્મની સાથે જ હું પણ તમારા હૃદયમાં રહીશ, તેમાં સંશય નથી. (૬૧) વળી તમોએ પૂછયું કે શું ગાયન કરો છો ? તેનો ઉત્તર સાંભળો : જે પોતાને સુખી કરે તેનું યશગાયન કરવું : આ પ્રકારની લૌકિક અને વૈદિકી મર્યાદા છે. (૬૨) આ ઉત્તમ રાજાના ભવનમાં પ્રત્યક્ષ સ્વયં બ્રહ્મપુરાધિપતિ શ્રીકૃષ્ણ જ નારાયણ મુનિ છે તે નારાયણ મુનિ પહેલાં ધારણ કરેલા કૃષ્ણાવતારવાળા અમોને અસુરોથી રક્ષા કરતા હતા અને હાલમાં પણ અસુરોથી રક્ષા કરે છે. (૬૩) તે શ્રીહરિકૃષ્ણ ભગવાનનાં શ્રીકૃષ્ણ રૂપે કરેલાં ચરિત્રો જેમ હોય તેમ વ્યાસજી ભાગવતાદિ રૂપે ગૂંથતા હતા. હું મનને આનંદ આપનારાં તે ચરિત્રોનું નિત્ય ગાન કરું છું. અને આ પ્રત્યક્ષ શ્રી હરિકૃષ્ણ ભગવાને હાલના સમયમાં કરેલા જે ચરિત્રો છે તેને શતાનંદ નામના મહામુનિ આગળ ઉપર (થોડા સમયમાં) નિબંધ-ગ્રંથ રૂપે ગૂંથશે તેનું ગાન કરીશ.(૬૪-૬૫) **સુવ્રતમુનિ કહે છે** : હે ભૂપતે ! આ પ્રકારે ભક્તિ, રમાદિ સ્ત્રીઓને વર આપીને અને તેમના પ્રશ્નનો ઉત્તર આપીને વીજળીની માફક તત્કાળ જ અન્તર્હિત થયાં. (૬૬) આશ્ચર્ય સહિત જેમ હોય તેમ અત્યન્ત આનંદ પામેલી તે રમાદિ અબળાઓ શ્રીભક્તિ માતાના દર્શનમાં કારણ તો શ્રીહરિની પ્રસન્નતા જ માનતી હતી. (૬૭) હે રાજન્ ! આ પ્રકારે સકલૈશ્વર્ય નિધિ ભગવાન શ્રી નારાયણમુનિ પોતાના એકાંતિક ભક્તોના સમગ્ર મનોરથો પૂર્ણ કરે છે અને પોતાના ભકતોની સર્વ વિઘ્નોથી રક્ષા કરે છે. (૬૮) હે રાજન્ ! ભક્તોનાં મનોને પ્રસન્ન કરનાર શ્રીહરિ, જયા-ઉત્તમાદિ ભક્તજનોએ યથાયોગ્ય સેવાયેલા સતા પોતાના યશને વિસ્તારતા થકા આવા અન્નકૂટ પ્રબોધિનીના ઉત્સવ સમાન ઘણા જ મહોત્સવો ગઢપુરમાં કરાવતા હતા. (૬૯)

પવિત્રતાના કારણભૂત, આ શ્રી સ્વામિનારાયણ ભગવાનનું ચરિત્ર જે પુરુષ સ્નેહથી સંભળાવે અને જે સાંભળે તે બન્ને -વક્તા અને શ્રોતા સંસારના પાશથી માયિક શરીરનો ત્યાગ કરી બ્રહ્મપુરધામમાં બ્રહ્મ શરીરથી શ્રીહરિના પાર્ષદપણાને પામે છે. (૭૦)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે પ્રબોધન્યુત્સવે રમાદિનાં ભક્તેઃ પ્રત્યક્ષદર્શનાદિનિરૂપણ નામા પંચચત્વારિંશોऽધ્યાયઃ (૪૫)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच – **यथा भगवता राजन् ! दुर्गपत्तन उत्सवाः । कृताः स तादृशानेवान्यत्रापि विदधे बहून् ॥१॥ वृत्तालये श्रीनगरे जीर्णदुर्गादिषु प्रभुः । उत्सवान्महतश्चक्रे सुखयन्नात्मसंश्रितान् ॥२॥ द्वितीये वा तृतीयेऽब्दे जीर्णदुर्गे महोत्सवम् । चक्रे श्रीनगरे त्वेष प्रत्यब्दं स्वजनार्थितः ॥३॥ वृत्तालये त्वब्दमध्ये द्विस्त्रिर्वापि क्वचिच्चतुः । गत्वोत्सवांश्चकारासौ भक्तिधर्मौ प्रपोषयन् ॥४॥ एकादश्यां मोक्षदायां सफलायां च कर्हिचित् । सानन्दायां चकारासौ तिलदायां तथोत्सवम् ॥५॥ जयायां विजयायां च धात्र्यामपि चकार सः । तत्पुरे पापमोचन्यामेकादश्यां महोत्सवम् ॥६॥ विमलायां वरुथिन्यां मोहिन्यामपि कर्हिचित् । अपरायां निर्जलायां योगिन्यां चाकरोन्महम् ॥७॥ शयन्यां कामिकायां च पुत्रदायां च कर्हिचित् । अजायां क्वापि पद्मायामिन्दिरायां च स प्रभुः ॥८॥ पापाङ्कुशाभिधायां च रमाख्यायां च कर्हिचित् । बोधन्यामभयायां च महोत्सवमकारयत् ॥९॥ जन्माष्टम्यादिषु तथा कृष्णजन्मतिथिष्वपि । शिवरात्र्यां पुरे तत्र चक्रे क्वापि महोत्सवम् ॥१०॥ दीपावल्यादिषु तथा स कुर्वन्नुत्सवं प्रभुः । स्वभक्तान् सुखयामास पुरुषान् योषितस्तथा ॥११॥ देशान्तरीया लोकाश्च भक्ता भगवतोऽखिलाः । प्रत्यब्दभाविनो ह्येतान् जानन्ति स्म महोत्सवान् ॥१२॥ समीपस्था हरेर्भक्ता ये ते तु प्रतिवत्सरम् । प्रत्युत्सवं समाजग्मुः सोऽवसद्यत्र तत्र वै ॥१३॥ द्वित्रेषु मध्यदेशीया उत्सवेष्वाययुर्जनाः । दूरस्थास्तु समाजग्मुर्यत्र तत्रैककोत्सवे ॥१४॥**

## અધ્યાય : ૪૬

## કથા-શ્રવણના હર્ષથી પ્રતાપસિંહ રાજાએ વૃત્તાલયમાં કરેલા ઉત્સવોનો પ્રકાર જાણવા સુવ્રતમુનિને પ્રશ્ન પુછ્યો, તેનું વર્ણન કરેલું છે.

**સુવ્રત મુનિ બોલ્યા :** હે રાજન્ ! ભગવાન શ્રીહરિએ ગઢડામાં ઉત્સવો કર્યા, તેવા જ ઉત્સવો બીજાં ગામોમાં, પણ કર્યા. (૧) વડતાલ, ગુજરાતની રાજધાની અમદાવાદ, જૂનાગઢ અને ડભાણ, જેતલપુર વગેરે ગામોમાં શ્રીહરિએ પોતાના આશ્રિત ભક્તજનોને સુખ આપવા માટે મોટા ઉત્સવો કર્યા. (૨) ભક્તજનોએ શ્રીહરિને પ્રાર્થના કરી, તેથી બીજા અથવા ત્રીજા વર્ષમાં જૂનાગઢમાં ઉત્સવ કર્યો. અમદાવાદમાં તો દરેક વર્ષે શ્રીહરિ મહોત્સવ કરતા હતા. (૩) શ્રીહરિ, ભક્તિ અને ધર્મનું પોષણ કરવા માટે વડતાલમાં દર વર્ષે અને ક્યારેક તો વર્ષમાં બે-ત્રણ-ચાર વખત જઈને મોટા ઉત્સવો કરતા હતા. (૪) આવી રીતે દરેક વર્ષે શ્રીહરિ ક્યારેક માગશર સુદી **મોક્ષદા એકાદશી,** ક્યારેક માગશર વદી **સફલા એકાદશી,** ક્યારેક પોષ સુદી **સાનંદા એકાદશી,** ક્યારેક પોષ વદી **તિલદા એકાદશી** વગેરે તિથિએ ઉત્સવ કરતા હતા. (૫) શ્રીહરિ વડતાલમાં ક્યારેક મહાસુદી **જયા એકાદશી,** ક્યારેક મહાવદી **વિજયા એકાદશી**ની તિથિ ઉપર, ક્યારેક ફાગણ સુદી **ધાત્રી એકાદશી,** ક્યારેક ફાગણ વદી **પાપમોચની એકાદશી**નો મહોત્સવ કરતા હતા. (૬) ક્યારેક ચૈત્ર સુદી **વિમલા એકાદશી,** ચૈત્ર વદી **વરૂથિની એકાદશી,** ક્યારેક વૈશાખસુદી **મોહિની એકાદશી,** વૈશાખવદી **અપરા એકાદશી,** જેઠ સુદી **નિર્જલા એકાદશી,** જેઠ વદી **યોગિની એકાદશી**નો મહોત્સવ કરતા હતા. (૭) ક્યારેક અષાડ સુદી **શયની એકાદશી,** અષાડ વદી **કામિકા** એકાદશી, શ્રાવણ સુદી **પુત્રદા** એકાદશી, શ્રાવણ વદી **અજા** એકાદશી, ભાદરવા સુદી **પદ્મા** એકાદશી, ભાદરવા વદી **ઈન્દિરા** એકાદશીનો ઉત્સવ શ્રીહરિ કરતા હતા. (૮) ક્યારેક આસો સુદી **પાશાંકુશા** એકાદશી, આસો વદી **રમા** એકાદશી, કારતક સુદી **પ્રબોધિની** એકાદશી, કારતક વદી **અભયા** એકાદશીએ શ્રીહરિ મહોત્સવ કરાવતા હતા. (૯) વડતાલમાં શ્રી નારાયણ મુનિએ શ્રાવણ વદી ૮ **જન્માષ્ટમી** આદિક શ્રીકૃષ્ણની પ્રાદુર્ભાવ તિથિઓમાં તથા ક્યારેક **મહાવદી ૧૪ મહાશિવરાત્રિ** નો મહોત્સવ કર્યો. (૧૦) તેવી જ રીતે **દીપોત્સવી**નો ઉત્સવ પણ વડતાલમાં કરીને શ્રીહરિ પોતાનાં સર્વ સ્ત્રીપુરુષ હરિભક્તોને સુખ આપતા હતા. (૧૧) દેશાન્તરથી આવેલાં શ્રીહરિનાં સમગ્ર ભક્તજનો, દરેક વર્ષે થનારા આ મહોત્સવોને જાણતા હતા. (૧૨) વડતાલ અને ગઢડાની સમીપે રહેવાવાળા ભક્તજનો તો દરેક વર્ષે, ઉત્સવમાં આવે જ. (૧૩) મધ્યદેશના ભક્તજનો બે-ત્રણ વાર આવતા તો દૂરના દેશવાસીઓ એકાદ ઉત્સવમાં આવતા. (૧૪)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

क्वचित्तत्राकरोत्स्वामी विष्णुयागाभिधं मखम् । विष्णुमन्त्रजपं क्वापि कारयामास वाडवैः ॥१५॥ विष्णुस्तोत्रपुरश्चर्यां क्वापि विप्रैरकारयत् । कर्हिचिल्लक्षहोमं च कोटिहोमं च कुत्रचित् ॥१६॥ ब्राह्मणान्भोजयामास क्वचित्तत्र सहस्त्रशः । दानान्येव ददौ क्वापि विप्रेभ्यः स महान्ति च ॥१७॥ क्वचिद्विप्रकुमाराणां मौञ्जीबन्धानकारयत् । क्वचिच्च भगवन्मूर्तिसंस्थापनमहोत्सवम् ॥१८॥ क्वचिदिष्टोत्सवं तत्र क्वचित्पूर्तोत्सवं च सः । चकार तेन भगवद्धर्मः पुष्टिमगात् पराम् ॥१९॥ यत्र यत्रावसत्स्वामी पुरे ग्रामेऽथवा वने । तत्र तत्र जना आयन् शतशश्च सहस्त्रशः ॥२०॥ तांस्तान् जनान्विमोच्यासावधर्मान्वयपाशतः । सन्मार्गे वर्तयामास स्वप्रतापेन भूपते ! ॥२१॥ अधर्मोऽदृश्यतां यातः कलिर्निर्बलतां ययौ । प्राप धर्मः प्रतिष्ठां च तस्मिन्वसति भूतले ॥२२॥ इति ते कथिता राजन्नारायणकथा मया । तव प्रश्नानुसारेण किं भूयः श्रोतुमिच्छसि ॥२३॥ इति श्रुत्वा स नृपतिः सुव्रतोक्तां हरेः कथाम् । भूयस्तामेव पप्रच्छ मुमुक्षुस्तं महामुनिम् ॥२४॥ राजोवाच – न तृप्तिमधिगच्छामि पीत्वा हरिकथामृतम् । पुनस्तत्पातुमिच्छामि पिपासुर्मुनिसत्तम ! ॥२५॥ वृत्तालये भगवता कृता बहव उत्सवाः । इत्युक्तं हि त्वया ब्रह्मन् ! श्रोतुमिच्छामि तानहम् ॥२६॥ अन्यच्च भगवान् यद्यद्धृतमानवविग्रहः । चकार चरितं तत्तद्वक्तुमर्हसि मे मुने! ॥२७॥ कथारसविदा तेन पृष्ट इत्थं महीभुजा । हरिसंस्मरणानन्दः सुव्रतस्तमुवाच सः ॥२८॥ सुव्रत उवाच–साधु पृच्छसि भूपाल ! मतिस्ते विमला ननु । नारायणकथामेव श्रोतुमिच्छसि यत्पुनः ॥२९॥ विस्तरेण चरित्राणि नरनाट्यधृतः प्रभोः । सकलानि न शक्नोमि वक्तुं वच्मि समासतः ॥३०॥ प्रतिवर्षं दुर्गपुराद्धरिर्वृत्तालयं पुरम् । मुहुर्जगाम नृपते ! धर्मस्थापन उद्यतः ॥३१॥

શ્રી સ્વામિનારાયણ ક્યારેક વડતાલમાં વિષ્ણુયાગ યજ્ઞ કરતા, ક્યારેક બ્રાહ્મણો પાસે શ્રી વિષ્ણુના અષ્ટાક્ષર આદિ મંત્રજપ કરાવતા હતા. (૧૫) ક્યારેક બ્રાહ્મણો પાસે શ્રી વિષ્ણુ સહસ્ર નામના સ્તોત્રનું પુરશ્ચરણ કરાવતા, ક્યારેક લક્ષ હોમ (એક લાખ આહુતિ પ્રદાનવાળો) તો ક્યારેક કોટિ હોમ કરાવતા હતા. (૧૬) વડતાલમાં શ્રીહરિ કયારેક હજારો બ્રાહ્મણોને અને સાધુઓને જમાડતા, તો ક્યારેક સુપાત્ર બ્રાહ્મણોને ગુડધેનુ, ધાન્યપર્વતાદિ દશ પ્રકારનાં મહાદાનો પણ આપતા હતા. (૧૭) ક્યારેક બ્રાહ્મણોના કુમારોને ઉપનયન સંસ્કાર (જનોઈ) અપાવતા હતા, તો ક્યારેક શ્રીકૃષ્ણની મૂર્તિ પ્રતિષ્ઠા ઉત્સવ કરાવતા હતા. (૧૮) વડતાલમાં શ્રી હરિ 'ઈષ્ટકર્મ' તથા 'પૂર્તકર્મ'નો મહોત્સવ કરાવતા હતા. (અગ્નિહોત્ર, તપ, સત્ય, વેદોનું ધારણ, આતિથ્ય, વૈશ્વદેવ - આ 'ઈષ્ટકર્મ' કહેવાય છે; તથા દેવમંદિર, બગીચા, કૂવા, વાવ અને દેવની આજીવિકાનું સાધન-આ 'પૂર્તકર્મ' કહેવાય છે.) તેથી, શ્રીહરિએ કરાવેલા વિષ્ણુયાગાદિથી ભાગવત એકાંતિક ધર્મ અતિશય પોષણને પામ્યો. (૧૯) શ્રીહરિકૃષ્ણ ભગવાન જે જે પુર, ગામ કે વનમાં જતા અને નિવાસ કરતા ત્યાં સેંકડો અને હજારોની સંખ્યામાં લોકો આવતાં. (૨૦) હે ભૂપતિ ! તે સર્વ જનોને, શ્રીહરિ પોતાના પ્રતાપથી, અધર્મના પરિવાર રૂપ, બંધનમાંથી મુકાવીને સન્માર્ગે વર્તાવતા હતા. (૨૧) પૃથ્વીમાં શ્રીહરિકૃષ્ણ ભગવાનના નિવાસ કરવા સમયે અધર્મ અદૃશ્ય થયો, કલિયુગ નિર્બલતાને પામ્યો અને ધર્મ પ્રતિષ્ઠાને પામ્યો. (૨૨) હે રાજન્ ! મેં તમારા પ્રશ્નને અનુસરીને શ્રીહરિચરિત્રની કથા તમોને કહી. (હવે) ફરીથી શું સાંભળવા ઈચ્છો છો ? (૨૩) આ પ્રમાણે મુમુક્ષુ રાજા પ્રતાપસિંહ, સુવ્રત મુનિએ કહેલી શ્રીહરિની કથા સાંભળીને, ફરીથી સુવ્રત મુનિને શ્રીહરિની જ કથા પૂછતા હતા. (૨૪) **પ્રતાપસિંહ રાજા કહે છે** : હે મુનિશ્રેષ્ઠ! હરિકથામૃતનું પાન કરીને તૃપ્તિ થતી નથી. માટે વારંવાર પાન કરવાની ઈચ્છાવાળો હું ફરીથી પણ શ્રીહરિકથામૃત જ પાન કરવા ઈચ્છું છું. (૨૫) હે બ્રહ્મન્ ! શ્રી નારાયણ મુનિએ વડતાલમાં ઘણા ઉત્સવો કર્યા. એ વાત તમોએ કરી, તે ઉત્સવોને હું સાંભળવા ઈચ્છું છું. (૨૬) હે મુનિ, મનુષ્યશરીરધારી એવા શ્રીહરિએ બીજાં પણ જે જે ચરિત્રો કર્યાં હોય, તે તે સમગ્ર મને કહેવા માટે યોગ્ય છો. (૨૭) આ પ્રમાણે પ્રશ્ન પૂછવાથી તે કથારસ જાણનારા રાજા- પ્રતાપસિંહ પ્રત્યે સુવ્રત મુનિ, શ્રીહરિ-સ્મરણથી આનંદ પામ્યા અને પ્રતાપસિંહરાજાને કહેવા લાગ્યા. (૨૮) **સુવ્રતમુનિ કહે છે** : હે રાજન્ ! તમોએ સારું પૂછ્યું, તમારી બુદ્ધિ નિર્મળ છે; કારણ કે તમે ફરીથી પણ શ્રીનારાયણની જ કથા સાંભળવા ઈચ્છો છો. (૨૯) નરનાટકધારી શ્રીહરિની સમગ્ર કથા કહેવા માટે હું શક્તિમાન નથી, તેથી સંક્ષેપમાં કહું છું. (૩૦) હે રાજન્, એકાંતિક ધર્મના સ્થાપન માટે ઉત્સાહી-ઉદ્યમી શ્રી સ્વામિનારાયણ ભગવાન દરેક વર્ષે વારંવાર ગઢપુરથી વડતાલ આવતા હતા. (૩૧)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**तेनोत्सवास्तत्र महान्त एव कृता ह्यनेकेऽखिलसौख्यकर्त्रा । वदामि तत्रैकतमं समासात्तेनानुमेया इतरेऽपि तद्वत् ॥३२॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे वृत्तालयपुरोत्सवप्रश्ननिरूपणनामा षट्चत्वारिंशोऽध्यायः ॥४६॥

सुव्रत उवाच – **अस्ति वृत्तालयं नाम गुर्जरेषु पुरं महत् । चत्वारोऽपि यत्रत्या भेजुर्वर्णा हरिं मुदा ॥१॥ तेऽचीकमन्त सर्वेऽपि जनाः स्वनगरे हरिम् । आनीय दुर्गपुरतः कर्तुं दोलोत्सवं नृप ! ॥२॥ कुबेरो यौवनाश्वश्च तत्र द्वावधिकारिणौ । तौ तैः सह विनिश्चित्य सम्भारांश्चक्रतुर्बहून् ॥३॥ भ्रातरं प्रेषयामास यौवनाश्वो निजं ततः । नारायणमुनेः पार्श्वं सोऽपि माघ्यामुपाययौ ॥४॥ स तं प्राप्य प्रभुं नत्वा भक्तमण्डलमध्यगम् । प्रार्थयामास बहुधा पुरं नः पावयेति च ॥५॥ ततः प्रसन्नो भगवान् भक्तवत्सल ईश्वरः । अनन्यभक्तांस्तान् जानंस्तत्राजिगमिषत्पुरे ॥६॥ प्राहाथ सुन्दराख्यं तं दूतं हरिरुदारधीः । गच्छाधुनाऽऽगमिष्यामि त्वत्पुरं मासि फाल्गुने ॥७॥ इत्युक्तः स प्रहृष्टात्मा तूर्णं स्वपुरमेत्य तत् । पौरानूचेऽथ ते हृष्टास्तं प्रतीक्ष्यावतस्थिरे ॥८॥ उद्घोषः सुमहानासीद्भुवि दिक्षु विदिक्षु च । स्वामिनारायणो वृत्तालयमायास्यतीति ह ॥९॥ पत्रदूतैश्च मुन्यादीन्नानादेशस्थितान् स च । स्वभक्तान् ज्ञापयामास वृत्तान्तमिममीश्वरः ॥१०॥ सौराष्ट्रादिषु देशेषु ये भक्ता मुनयश्च ते । सहैव हरिणा गन्तुमाययुर्दुर्गपत्तनम् ॥११॥**

---

સમગ્ર ભક્તજનોને સુખ આપનારા શ્રીહરિએ વડતાલમાં અનેક મોટા ઉત્સવો કરેલા જ છે. તે અનેક ઉત્સવોમાંથી એક ઉત્સવનું વર્ણન હું સંક્ષેપમાં કરું છું. તેને આધારે બીજા ઉત્સવો કેવા થયા હશે, તેનું અનુમાન કરી લેવું.(૩૨)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે, ધર્મશાસ્ત્રે તૃતીયપ્રકરણે વૃત્તાલયપુરોત્સવ પ્રશ્નનિરૂપણ નામા ષટ્ચત્વારિંશોઽધ્યાયઃ (૪૬)*

## અધ્યાય : ૪૭

## અતિ હર્ષથી દેશોદેશના ભક્તોનું આગમન અને શ્રીહરિનું ગઢપુરથી વડતાલમાં આવીને 'પુષ્પદોલોત્સવ' કે જે સર્વને આનંદ પમાડનારો છે, તેનું વર્ણન છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! ગુજરાત દેશમાં વડતાલ નામનું પ્રસિદ્ધ નગર છે. જે વડતાલનાં રહેવાસીઓ, ચારેય વર્ણના લોકો પોતાના સ્વધર્મમાં રહીને હર્ષપૂર્વક શ્રી નારાયણ મુનિને ભજતા હતા. (૧) હે રાજન્, ચારેય વર્ણના સર્વ ભક્તજનો શ્રીહરિને ગઢપુરથી પોતાના વડતાલ નગરમાં લાવીને ફાગણ વદી પ્રતિપદાનો પુષ્પદોલોત્સવ કરવા ઈચ્છતા હતા. (૨) કુબેર અને જોબન પગી આ બન્ને વડતાલના મુખ્ય અધિકારી હતા. તે બન્ને ભક્તો નગરજનો સાથે પુષ્પોદોલોત્સવનો નિર્ણય કરી ઘણી ઉત્સવની સામગ્રીઓ તૈયાર કરતા હતા. (૩) પછી જોબન પગી પોતાના સગા ભાઈ સુંદરજીને નારાયણ મુનિ સમીપે ગઢપુરમાં મોકલતા હતા. સુંદર પગી પણ સંવત્ ૧૮૭૫ ના મહા સુદી પૂર્ણિમાને દિવસે ગઢપુરમાં ગયા. (૪) ભક્તમંડળમાં, લીંબડાના વૃક્ષ નીચે, દિવ્ય સિંહાસનમાં વિરાજમાન એવા શ્રીહરિને પામીને સુંદરજીએ સાષ્ટાંગ પ્રણામ કર્યા અને બહુ પ્રકારે પ્રાર્થના કરી કે 'હે પ્રભુ ! અમારા વડતાલ ગામને પાવન કરો.' (૫) પછી ભક્તવત્સલ શ્રી સ્વામિનારાયણ ભગવાન, વડતાલના લોકોને પોતાના એકાંતિક ભક્તો જાણીને પ્રસન્ન થયા, અને વડતાલ જવા ઈચ્છા કરી. (૬) પછી ઉદાર બુદ્ધિવાળા, ઉત્સવ કરાવવામાં પ્રવીણ, પોતાનાં આશ્રિતોને જન્મમરણરૂપી સંસૃતિનો નાશ કરનારા શ્રી સ્વામિનારાયણ પ્રભુ આ સંદેશો લાવનાર સુંદરજીને કહેવા લાગ્યા : 'હે સુંદર, તમે હાલમાં તમારે ગામ જાઓ. હું ફાગણ માસમાં તમારા ગામે આવીશ.' (૭) હે રાજન્, આ રીતે શ્રીહરિએ તે સુંદરજીને વાત કરી, તેથી આનંદિત થઈ, તત્કાલ વડતાલ આવી, જોબન અને કુબેરજી સહિત સર્વ નગરજનોને શ્રીહરિના આગમનનો સંદેશ આપ્યો. પછી કુબેરજી વગેરે નગરજનો પ્રસન્ન થઈને શ્રીહરિની પ્રતીક્ષા કરતાં હતાં. (૮) શ્રી સ્વામિનારાયણ વડતાલમાં આવશે, એવો મહાન ઉદ્‌ઘોષ પૃથ્વી ઉપર આઠેય દિશામાં વ્યાપી ગયો. (૯) ભગવાન શ્રીહરિ પણ અનેક દેશોમાં રહેલા પોતાના આશ્રિત મુનિઓ તથા ભક્તજનોને આ પોતાનું વડતાલ-આગમનનું વૃત્તાંત પત્રદૂતો દ્વારા આમંત્રણ-પત્રિકાઓ મોકલાવીને જણાવતા હતા. (૧૦) સૌરાષ્ટ્રના ગૃહસ્થ ભક્તો અને ત્યાગી ભક્તો - તે સર્વ શ્રીહરિકૃષ્ણ ભગવાનની સાથે જ વડતાલ જવા માટે ગઢડામાં આવ્યા. (૧૧)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

तस्मिन् विकृतवर्षेऽथ सम्प्राप्ते फाल्गुने हरिः । वृत्तालयपुरं गन्तुं ततः षष्ठत्यां विनिर्ययौ ॥१२॥ तद्देशे धर्मरक्षार्थमुत्तमं नृपतिं हरिः । आयास्यामो वयं शीघ्रमित्युक्त्वाऽऽस्थाप्य तं ययौ ॥१३॥ जया च ललिताद्याश्च योषितोऽपि सहस्रशः । तमन्वीयुर्वाहनस्थाः पौरा लोकाश्च सर्वशः ॥१४॥ सहस्रशो मुनिगणैर्वर्णिभिश्च सहस्रशः । सहस्रशो गृहस्थैश्च सहैव भगवान् ययौ ॥१५॥ सौराष्ट्रीयादिभिर्भक्तैरनुयातः सहस्रशः । सहस्रशोऽश्ववारैश्च वेष्टितश्च पदातिभिः ॥१६॥ अश्वां माणिक्यवर्णां द्रुततरगमनां सोऽधिरूढोऽर्ककान्तिः पीतं भाले विशाले तिलकमथ दधत्कैसरं स्मेरवक्त्रः । चञ्चत्कुन्तप्रवेष्टैर्निजचरणरतैरश्ववारैः परीतो वल्गां दोष्णा दधानः सितवसनधरो नन्दयन्स्वाञ्जगाम ॥१७॥ यात्रायां मङ्गलार्थं द्विजवररचितं साक्षतं कौङ्कुमं स्वे बिभ्रच्छोणं ललाटे मुनिहृदयहरं चन्द्रकं चारुनेत्रः । शृण्वन्बन्द्योघवाचं निजगुणरचनां चित्रवादित्रघोषैः सम्बद्धामूर्ध्वहस्तैर्जयजयवचनैर्भक्तसङ्घैर्नुतश्रीः ॥१८॥ नानाग्रामागतैः स्वैरनुपदमभितः सङ्गतैः पूज्यमानो दृष्ट्यैवानन्दवृष्ट्या स च पथि सुखयंस्तान् ययौ पूर्णकामः । देवैराकाशसंस्थैः सितकुसुमचयैश्चाभिवृष्टः सहासं पस्पर्शाभ्यस्ततूर्णाञ्चननिजवडवां पार्ष्णिना किञ्चिदेव ॥१९॥ सहमाना न तत्स्पर्शमात्रमप्यतिवेगिनी । गत्या जितमरुत्तूर्णं पुप्लुवे ताक्ष्र्यवत्तु सा ॥२०॥ पशुजातेरपि स्वस्याः प्रभोः स्पर्शाद्धि भाविनीम् । दर्शयन्तीवोर्ध्वगतिमूर्ध्वं दुद्राव सा जवात् ॥२१॥

પછી વિક્રમ સંવત્ **૧૮૭૫ ફાગણ સુદી ૬** ને દિવસે શ્રીહરિ વડતાલ જવા માટે ગઢપુરથી નીકળ્યા. (૧૨) શ્રીહરિ ઉત્તમ રાજાને 'અમો જલદી આવીશું' આ પ્રમાણે કહી; પંચાલ દેશમાં ધર્મ - રક્ષા માટે ઉત્તમ રાજાને રાખીને ગઢપુરથી ચાલ્યા. (૧૩) જયા અને લલિતા સહિત હજારો સ્ત્રીઓ પણ રથ જેવાં વાહનોમાં બેસીને શ્રીહરિની પાછળ ચાલતા હતાં. ગઢપુરનાં નિવાસી ભક્તજનો પણ પાછળ ચાલતાં હતાં. (૧૪) હજારો સાધુજનો, હજારો બ્રહ્મચારીઓ અને હજારો ગૃહસ્થજનોની સાથે જ શ્રીહરિ ચાલતા હતા. (૧૫) સૌરાષ્ટ્ર દેશના હજારો ભક્તોની સાથે - હજારો અસવારો અને હજારો પાર્ષદો અનુગમન કરતાં, વીંટળાયેલા હતા. (૧૬) લાલ મણિ સમાન રૂપવાળી, ઉતાવળી ગતિવાળી ઘોડી ઉપર બેઠેલા, સૂર્યની સમાન કાન્તિવાળા અને વિશાલ લલાટમાં કેસરયુક્ત સુગંધીમાન અને હળદરની માફક પીળી કાન્તિવાળા તિલકની મધ્યમાં કુંકુમના ચાંદલા સહિત ઊર્ધ્વપુંડ્રને ધારણ કરતા, મંદહાસ્ય યુક્ત મુખારવિંદવાળા, ચળકતા ભાલાઓ જેમના હાથમાં છે એવા, પોતાના ચરણકમળમાં આસક્ત સોમ વર્મા આદિ અસવારોથી વીંટાયેલા, લગામને પોતાના ડાબા હસ્તકમળથી ધારણ કરતા, શ્વેત વસ્ત્રધારી શ્રીહરિ પોતાનાં ભક્તજનોને હર્ષ પમાડતાં પમાડતાં માર્ગમાં ચાલતા હતા. (૧૭) આ યાત્રાના મંગલ પ્રયાણ માટે શ્રેષ્ઠ બ્રાહ્મણ મયારામ ભટ્ટે, મુનિઓનાં હૃદયને હરનાર એવો ચોખા સહિત કુંકુમનો લાલ રંગનો ચાંદલો શ્રીહરિના લલાટમાં કર્યો હતો. સ્વાભાવિક મનોહર નયન રૂપી કમળવાળા, સ્વગુણોની રચનાવાળી અને વિવિધ વાજિંત્રોના ઘોષ પૂર્વક અનેક બંદીજનોએ ગાન કરેલી પોતાના ગુણચરિત્રના વર્ણનવાળી મધુર વાણીને શ્રવણ કરતા, તેના શ્રવણથી ઊપજેલા પ્રેમને પ્રદર્શાવનારા પ્રફુલ્લિત લોચનવાળા તથા બન્ને હાથ જોડીને ઊંચા કરીને જય જય એવો ઉચ્ચ સ્વરથી જયનાદને કરતા ભક્તસંઘોએ સ્તુતિ કરી છે અને પ્રસ્થાનને ઉચિત શોભા છે જેમની એવા ભગવાન શ્રીહરિ પોતાના ભક્તોને આનંદ આપતા ચાલી નીકળ્યા. (૧૮) માર્ગમાં જે વિવિધ ગામો થકી આવીને, પગપાળા ચાલતાં ચારે બાજુએથી ભેગા થઈ ગયેલાં, તે સર્વ ભક્તજનોએ નાનાવિધ ઉપહારો વડે પૂજા કરેલા, પ્રેમ પ્રવાહ ગર્ભિત આનંદધારામયી દૃષ્ટિ વડે માર્ગમાં આવેલાં ભક્તજનોને સુખ આપતા, વિમાનમાં બેસી આકાશમાં સંઘથી ભેગા થયેલા બ્રહ્માદિ અમરગણોએ સફેદ ફૂલોના પુંજો વડે વધાવેલા તે આ પૂર્ણકામ ભગવાન શ્રીહરિ ગઢપુરથી ચાલી નીકળ્યા. પછી મંદ સ્મિત કરતા, શ્રીહરિએ ઘણા સમયથી ઉતાવળી ચાલનો અભ્યાસ જેને સહેજે થઈ ગયો છે એવી પોતાની માણકી ઘોડીને મંદહાસ્ય સહિત પગની પેનીથી સહેજ સ્પર્શ કર્યો. (૧૯) સ્પર્શ માત્રને પણ સહન નહીં કરનારી, અતિ વેગીલી, અને પોતાની ગતિથી જેણે વાયુને પરાભવ પમાડ્યો છે એવી, માણકી ઘોડી ગરુડની માફક તત્કાલ દોડી. (૨૦) પોતે પશુ જાતિની છે તો પણ શ્રીહરિના સ્પર્શથી નિશ્ચે ભવિષ્યમાં થનારી બ્રહ્મપુરપ્રાપ્તિરૂપ ઊર્ધ્વગતિને બતાવતી હોય ને શું ? એમ માણકી ઘોડી વેગથી દોડી. (૨૧)

धावन्त्या अतिवेगेन पादन्यासं न भूतले । तस्यास्तदा जनः पश्यन् विस्मयं प्राप सर्वशः ॥२२॥ दष्टाधराः पादहताश्वतुन्दाः कशाभिरश्वानतिवेगिनोऽपि । घ्नन्तोऽश्ववारा हरिपृष्ठबद्धदृशोऽन्वधावंश्च सहस्रशोऽथ ॥२३॥ प्रान्तैश्चलद्भिः पृथुवेष्टनानां तद्धय्यनुद्रावितवाजिलोलाः । अदृश्यरूपैर्बभुरादितेयैः संवीज्यमाना इव चामरैस्ते ॥२४॥ श्रमेण स्विन्नगात्राश्च श्रमफेनमुखान्हयान् । ताडयन्तोऽपि न प्रापुरश्वारूढं प्रभुं तु ते ॥२५॥ अश्वैः सहातिस्विन्नांस्तानथ विश्रमयन्प्रभुः । स्वाश्वां नियम्य प्रसभं स प्रत्यैक्षत वर्त्मनि ॥२६॥ अथापश्यन्दूराच्चपलतुरगीकेसरकरं करेणैकेनोर्ध्वां दधतमुरुपुष्पाम्रलतिकाम् । हसन्तं दृष्ट्वा स्वान्दृढपरिकरं चारुनयनं श्रमस्विन्नाङ्गास्ते पथि गतरजोधूसरपटम् ॥२७॥ विलोक्य तं प्रभुं साश्वं तूर्णं सम्प्राप्य सादिनः । ते सर्वे जहृषुर्भक्तास्तद्दर्शनगतश्रमाः ॥२८॥ तानाश्वास्याथ भगवान्साकं तैश्च शनैः शनैः । चचाल मार्गे मधुरैर्वाक्यैः स्वान्हासयन् हसन् ॥२९॥ हरिरागच्छतीत्येवमुद्घोषः सुमहान्भुवि । पूःषु ग्रामेषु खेटेषु खर्वटेष्वप्यभूत्तदा ॥३०॥ अनेकेभ्यश्च देशेभ्यो भगवद्दर्शनोत्सुकाः। ईयुर्वृत्तालयं लोका वृद्धबालपुरःसराः ॥३१॥ कोसलाः काशिदेशीया मैथिलाश्च सहस्रशः । तथैव गौडदेशीया लोकाः किलकिलाश्रिताः ॥३२॥ पुरुषोत्तमपूर्जाता वङ्गदेशोद्भवास्तथा । गयन्तीनगरस्थाश्च प्रयागप्रान्तवासिनः ॥३३॥ शोणभद्रतटस्थाश्च वृन्दावननिवासिनः । माथुराः शूरसेनाश्च तत्रावन्त्या उपागमन् ॥३४॥ एते चान्येऽपि बहवः पूर्वदेशात्समागमन् । तथा काश्मीरदेशीया हरिद्वारनिवासिनः ॥३५॥ कुरुक्षेत्रगता ये च पुष्करप्रान्तवासिनः। मरुधन्वोद्भवा लोका अर्बुदाचलसम्भवाः ॥३६। जनाः सिद्धपदस्थाश्च शतशोऽथ सहस्रशः । वृत्तालयमुपाजग्मुरुदीच्या एत आदृताः ॥३७॥

---

તે સમયે અતિ વેગથી તે ઘોડીના પગ પૃથ્વી ઉપર પડતા ન હતાં. તે જોતા જોતા સર્વે જનો આકાશમાં જાણે કે ચાલે છે, એમ આશ્ચર્ય પામતા હતા. (૨૨) પછી હોઠને દાંતોથી પીસતાં, અશ્વોનાં પેટો જેમણે એડીઓથી તાડન કર્યાં છે એવા, ઘોડાઓને ચાબુકથી તાડન કરતા હજારો ઘોડેસવારો શ્રીનારાયણ મુનિની પાછળ, પોતાની વૃત્તિને ઈરાદાપૂર્વક બાંધીને, શ્રીહરિની પ્રાપ્તિ માટે (ઈરાદાપૂર્વક) પછવાડે દોડતા હતા. (૨૩) શ્રીહરિની ઘોડી પાછળ દોડતા ઘોડાઓથી ઊછળતા દેહોવાળા ઘોડેસવારો, મસ્તક ઉપર રહેલા મોટા મોળિયાના ચલાયમાન છેડાઓથી અલક્ષ્ય દેહવાળા દેવો જાણે કે ચામરોથી વાયરો નાંખતા હોય તેમ શોભતા હતા. (૨૪) ઘોડાઓને દોડાવવાના પરિશ્રમથી પરસેવાવાળા ઘોડેસવારો ગતિનાં પરિશ્રમથી મુખમાં ફીણવાળા, એવા ઘોડાઓને ચાબુકોથી તાડન કરતા હતા, તો પણ માણકી ઘોડી ઉપર બેઠેલા શ્રીહરિને પહોંચી શક્યા નહીં. (૨૫) પછી શ્રીહરિ અશ્વોની સાથે અતિ ખેદયુક્ત તે ઘોડેસવારોને આરામ આપવા માટે, પોતાની ઘોડીને પરાણે રોકીને માર્ગમાં પ્રતીક્ષા કરતા હતા. (૨૬) પછી પરિશ્રમથી જેને પરસેવો થયો છે તેવા અસવારો સ્વભાવથી ચંચળ એવી માણકી ઘોડીની કેશવાળી હાથમાં જેમને છે, અને બીજા હાથથી, ઊંચી પુષ્પોવાળી આંબાની ડાળખીને ધારણ કરતા, પોતાના સાથીઓને જોઈને હસતા, દૃઢ કેડ બાંધેલી છે એવા, સુંદર નેત્રોવાળા, માર્ગમાં જે ધૂળ લાગેલી તેનાથી બોરસલીના પુષ્પ સમાન લગારેક પીળાશ પડતાં છે વસ્ત્રો જેમનાં એવા શ્રીહરિને દૂરથી જોતા હતા. (૨૭) ભક્તો અને સર્વ અસવારો, માણકી ઘોડીએ સહિત શ્રીહરિને જોઈને હર્ષ પામ્યા અને દર્શન માત્રથી માર્ગનો પરિશ્રમ નાશ પામ્યો. (૨૮) પછી શ્રીહરિ, તે અસવારોને આશ્વાસન આપીને મધુર વચનોથી તેમને હસાવતા અને પોતે પણ સાથે હસતા, ઘોડેસવારોની સાથે ધીમે ધીમે માર્ગમાં ચાલતા હતા. (૨૯) તે સમયે ‘શ્રીહરિ-શ્રી સ્વામિનારાયણ ભગવાન આવે છે’ એવો મહાન ઉદ્‌ઘોષ ગામેગામ, અને નગરેનગરમાં વ્યાપી ગયો. (૩૦) ભગવાનનાં દર્શન માટે ઉત્સાહી જે સમુદાયોની આગળ બાળકો અને વૃદ્ધો પણ ચાલતા હતાં, એવા ભક્તજનો વિવિધ દેશોમાંથી વડતાલ આવતાં હતાં. (૩૧) કોસલ દેશ, કાશી દેશ, મિથિલ દેશ, ગૌડ દેશ, કિલકિલ દેશ, એ બધા દેશનાં નિવાસી હજારો લોકો આવતાં હતાં. (૩૨) પુરુષોત્તમપુરી, બંગાલ દેશ, ગયા, પ્રયાગ વગેરે દેશનાં હજારો લોકો આવતાં હતાં. (૩૩) શોણભદ્રા નદીને તીરે રહેનારા, વૃન્દાવનવાસી, મથુરાવાસી, શૂરસેન દેશવાસી, અવન્તી નગરીનાં જનો વગેરે હજારો લોકો વડતાલ આવતાં હતાં. (૩૪) પૂર્વોક્ત કોસલ આદિક દેશ અને તેના અવાન્તર દેશવાસી પૂર્વ દેશના ભક્તો પણ આવ્યા તથા કાશ્મીર દેશના, હરદ્વાર, કુરુક્ષેત્ર, પુષ્કર પ્રાન્ત, મરુદેશ, ધન્વદેશ, અર્બુદાચલ, સિદ્ધપદ વગેરે દેશોમાં વસનારાં સેંકડો અને હજારો લોકો પ્રેમે સહિત વડતાલ આવતાં હતાં. (૩૫-૩૬-૩૭)

तथाऽऽययुः पश्चिमतः सैन्धवाः कच्छदेशजाः । सौराष्ट्रा अपि पाञ्चालाः सौवीराश्च सहस्रशः ॥३८॥ तथा दक्षिणतस्तत्र लोकाश्चायन्सहस्रशः । सेतुबन्धोपकण्ठस्था वेङ्कटाचलजास्तथा ॥३९॥ श्रीरङ्गप्रान्तसञ्जाताः काञ्चीपुरनिवासिनः । दण्डकारण्यवासाश्च मलयाद्रिभवास्तथा ॥४०॥ विन्ध्याचलसमुद्भूतास्तापीतटनिवासिनः । नर्मदातीरवासाश्च गौर्जराश्च सहस्रशः ॥४१॥ भगवद्दर्शनोत्कण्ठैः स्त्रीबालस्थविरैः सह । शकटाभृतसंभारास्तत्राजग्मुर्जनास्तु ते ॥४२॥ यातुं शक्तिर्यदि स्यात्पथि चलत तदेत्येवमुक्ताः सुतैः प्राग्गेहे ये जीर्णदेहा हरिचरणयुगं द्रष्टुमुत्कण्ठचित्ताः । धृत्वा यष्टीश्चलन्तः सह तरुणजनैः श्वासफुल्लारदास्यैर्नामान्युच्चैर्वदन्तो द्रुततरमगमंस्तत्र कृष्णस्य तेऽपि ॥४३॥ पालयन्त्योऽथ मर्यादां योषाश्च भगवत्कृताम् । पुंसोऽस्पृशन्त्यो मार्गेऽपि तत्राजग्मुस्त्वरान्विताः ॥४४॥ अहं पूर्वमहं पूर्वं द्रक्ष्यामि श्रीहरिं त्विति । पुरश्चरन्तो धावन्तः शिशवोऽप्याययुर्द्रुतम् ॥४५॥ नानादेशसमायातैर्जनैस्तैरतिसङ्कुलम् । महीसाभ्रमतीवेत्रवतीनामन्तरं ह्यभूत् ॥४६॥ तावान् स भुवि देशोऽपि वर्ततेऽप्रतिमो नृप ! । येनोपमा भवेत्तस्य देशोऽन्यो नास्ति तादृशः ॥४७॥ रसाला सकला भूमिः सर्वर्तुषु सुखप्रदा । वर्तते यत्र देशे च कर्षकाणां मनःप्रिया ॥४८॥ मृष्टोदका निर्विकारा वाप्यः कूपाः सरांसि च । वर्ततेऽनुपदं यत्र ग्रामे ग्रामे वने वने ॥४९॥ आम्राणां क्षीरिकाणां च यत्र सङ्ख्या न विद्यते । अन्येऽपि बहवः सन्ति वृक्षा यत्र सुखप्रदाः ॥५०॥ उदुम्बराः कपित्थाश्च वटाः प्लक्षाश्च पीलवः । अम्लिकाश्वत्थगुन्द्राश्च नालिकेरास्तृणद्रुमाः ॥५१॥ बीजपूरकनारङ्गजम्बीराम्रातकास्तथा । नागकेसरपुन्नागबकुलाशोकपाटलाः ॥५२॥ सुवर्णकेतकीजातीशतपत्र्यश्च मल्लिकाः । पञ्चकाः करवीराश्च शमीबिल्वद्रुमोत्पलाः ॥५३॥ बदर्यः किंशुकाः पूगाः कदम्बाश्च कुरण्टकाः । पनसाश्च कदल्यश्च बन्धुजीवकयूथिकाः ॥५४॥ निम्बजम्बूमधूकाद्याः पत्रपुष्पफलादिभिः । सुखयन्तो जनान्सर्वे वर्तन्ते यत्र सर्वतः ॥५५॥

---

સિન્ધુ દેશ, કચ્છ, સૌરાષ્ટ્ર, પંચાલ, સૌવીર દેશનાં હજારો લોકો ગઢપુર આવતાં હતાં. (૩૮) દક્ષિણ દેશથી, સેતુબંધના કિનારેથી વેંકટાદ્રિમાં રહેનારાં, શ્રીરંગક્ષેત્ર સમીપે રહેનારાં, કાંચીપુરનાં, દંડકારણ્ય, મલય પર્વત, વિન્ધ્યાચલની તલાટીમાં વસનારાં, તાપી-નર્મદાને કાંઠે રહેનારાં, ગુજરાતનાં હજારો ભકતજનો આનંદપૂર્વક વડતાલમાં આવતાં હતાં. (૩૯-૪૦-૪૧) પૂર્વે વર્ણવેલાં, ચારે દિશાઓથી આવતાં ભક્તજનો, શ્રીહરિનાં દર્શન માટે અત્યંત ઉત્સાહવાળાં હતાં. તેઓ અન્ન અને પાત્રોની સામગ્રી ગાડામાં ભરીને વડતાલમાં આવતાં હતાં. (૪૨) વૃદ્ધોને ઘેરથી ચાલવા સમયે પોતાના ગૃહમાં જ પુત્રોએ કહેલું કે, 'જો માર્ગમાં ચાલવાની શક્તિ હોય તો અમારી સાથે ચાલો' એમ કહ્યું તો પણ શ્રીહરિનાં ચરણકમળનાં સાક્ષાત્ દર્શન કરવા માટે ઉત્સાહી 'અમો ચાલીશું' એમ કહીને ચાલતાં વૃદ્ધજનો પણ હાથમાં વાંસની લાકડીઓ ધારણ કરીને યુવાનોની સાથે ચાલતાં, શ્વાસથી ફૂલેલા ગાલવાળા- દાંત વગરના મુખોથી શ્રીહરિનાં નામો 'સ્વામિનારાયણ' વગેરે ઉચ્ચ સ્વરે ઉચ્ચારણ કરતાં કરતાં વડતાલમાં અતિ ઉત્સાહથી આવ્યાં. (૪૩) શ્રીહરિની બાંધેલી મર્યાદાનું પાલન કરતી, માટે જ માર્ગમાં પણ પુરુષોને સ્પર્શ ન કરતી સધવા અને વિધવા સ્ત્રીઓ ઉતાવળથી ચાલતી ચાલતી વડતાલમાં આવતી હતી. (૪૪) શ્રીહરિને તો પ્રથમ હું જોઈશ. બીજો કહે : પ્રથમ હું જોઈશ, આ પ્રકારે બોલતાં, આગળ ચાલતાં, કેટલાંક દોડતાં બાળકો પણ તત્કાલ આવતાં હતાં. (૪૫) પૂર્વે કહેલાં, વિવિધ દેશનાં જનોથી મહી, સાબરમતી અને વેત્રવતી નદીઓના મધ્યમાં વર્તતો પ્રદેશ અતિ સાંકડો થયો. (૪૬) હે રાજન્, તેટલો દેશ ભારતવર્ષની ભૂમિમાં અનુપમ છે. મહી નદી વગેરે ત્રણ નદીઓના પ્રદેશની સમાન થાય તેવો બીજો દેશ નથી. (૪૭) આ સમગ્ર ભૂમિ, આ દેશમાં, સમગ્ર રસોની ઉત્પત્તિમાં કારણભૂત, વસંત આદિ સર્વ ઋતુઓમાં સુખ આપનારી અને ખેડૂતોને અત્યંત પ્રીતિ કરનારી છે. (૪૮) જે દેશમાં, દરેક ગામમાં અને દરેક વનમાં મધુર અને શુદ્ધ જળવાળા, વાવ-કૂવાઓ અને સરોવરો પગલે પગલે રહેલાં છે. (૪૯) જે દેશમાં આંબા, રાયણ, ઉમરડા, કોઠીઓ, વડ, પીંપર, પીલુડી, આમલી, પીપળા,ગુંદાં, નાળિયેરી, તાડ, ખજૂરી, નારંગી, લીંબુ, આમ્રાતક,(એકજાતનો આંબો) નાગકેસર, ચંપો, પુન્નાગ, બોરસલી, અશોક, પાટલ, સુવર્ણ કેતકી, ચમેલી, બીજોરી, આમળી, બટમોગરો, પીળી જૂઈ, કરેણ, શમડી ,બીલી, ખડચંપો, બોરડી, ખાખરો, સોપારી, કદમ્બ, પીળા કાંટાશેરિયા, ફણસ, કેળ, બપોરિયા, જૂઈ, લીમડો, જાંબુડાં, મહુડાં આદિક અનેક વૃક્ષો તથા લતાઓ; પત્ર-પુષ્પ-ફળ છાયાથી સર્વજનોને સુખી કરતા થકા જે દેશમાં ચોતરફના પ્રદેશમાં છે. (૫૦ થી ૫૫)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**वनेऽपि यत्र पान्थानां गृहाकारद्रुमान्विते । छायाफलोदकप्राप्त्या ग्रामकार्यं न शिष्यते ॥५६॥ तावान्देशः पुण्यभूमिर्वृन्दावनमिवोत्तमः । साधवो भगवद्भक्ताः प्रायशो विचरन्ति यत् ॥५७॥ ईदृशे तत्र देशे ते निवासांश्चक्रिरे जनाः । वृत्तालयं वेष्टयित्वा सर्वतो हृष्टमानसाः ॥५८॥ तटेषु सरसां केचिन्नदीनां पुलिनेषु च । केचित्कूपोपकण्ठेषु न्यवसन्कतिचिज्जनाः ॥५९॥ गृहाकारान् द्रुमानेव न्यूषुराश्रित्य केचन । ग्रामेषु केचिन्न्यवसन् यथासुखमतन्द्रिताः ॥६०॥ कृतावासाश्च ते सर्वे दशम्यां तत्र सङ्गताः । भुक्त्वा पीत्वा सुखासीनाः प्रत्यैक्षन्तागमं हरेः ॥६१॥ पञ्चालदेशं समतीत्य भद्रां तीर्त्वा व्यतिक्रम्य च भाल्लदेशम् । तीर्त्वा ततः साभ्रमतीं हरिश्च प्रापत्तुरीयेऽह्नि चरोत्तरं सः ॥६२॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे वृत्तालयदोलोत्सवे भगवत्प्रयाणदेशान्तरीयजनसङ्घागमननिरूपणनामा सप्तचत्वारिंशोऽध्यायः ॥४७॥

सुव्रत उवाच – **तं देशं च रसालादीन् प्रशंसन्बहुधा द्रुमान् । पञ्चमेऽहनि मध्याह्ने पिप्पलावनमागमत् ॥१॥ तत्र तत्र च तत्रत्यैः फलपुष्पादिभिर्नृप ! । उपायनैर्बहुविधैः पूजितः सादरं जनैः ॥२॥ अनुगृह्णंश्च मधुरैर्वाक्यैस्तान्दशमीदिने । सायं वृत्तालयं प्राप जनानान्दयन्प्रभुः ॥३॥ प्रतीच्यां दिशि लोकाश्च ते सर्वे बद्धदृष्टयः । श्रुत्वागमं हरेर्हृष्टाः सद्य उत्तस्थुरादरात् ॥४॥ प्राणागमे यथाङ्गानि प्रोत्थितास्तेऽथ तत्क्षणम् । प्रत्युज्जग्मुः प्रहर्षेण तं प्रभुं लक्षशो जनाः ॥५॥**

---

જે દેશમાં ગૃહના આકારવાળાં વૃક્ષોયુક્ત વનમાં ચાલનારાંને પણ માર્ગમાં છાયા, ફળ, જળની પ્રાપ્તિથી ગ્રામનું કાર્ય બાકી રહેતું નથી. (૫૬) શ્રીહરિના વિચરણથી તેટલો દેશ વૃન્દાવનની માફક પુણ્યભૂમિ જેવો ઉત્તમ થયો છે. વળી જે દેશમાં ભગવાનના પ્રત્યક્ષ સાધુઓ ઘણું કરીને વિચરે છે માટે વૃન્દાવનથી પણ અતિ ઉત્તમ છે. (૫૭) પૂર્વે કહેલાં તે જનો, પ્રસન્ન મનવાળાં, વડતાલની ચોતરફ વીંટાઈને આવા પ્રકારના દેશમાં નિવાસ કરતાં હતાં. (૫૮) કેટલાંક જનો મહા સરોવરોને કિનારે, કેટલાંક નદીઓને કિનારે, કેટલાંક કૂવાઓના સમીપના પ્રદેશમાં નિવાસ કરતાં હતાં. (૫૯) કેટલાંક જનો ગૃહ સમાન આકારવાળાં વૃક્ષોનો આશ્રય કરી નિવાસ કરતાં હતાં. કેટલાંક આળસે રહિત થકા ગ્રામોમાં સુખપૂર્વક રહેતાં હતાં. (૬૦) આ પ્રકારે જેમણે નિવાસો કરેલાં છે એવાં પૂર્વોક્ત સર્વે જનો ભોજન કરી, તેમ જ પાણી પીને સુખેથી બેઠાં બેઠાં, ફાગણ સુદી દશમી તિથિએ વડતાલમાં ભેગાં થઈ, શ્રીહરિના આગમનની પ્રતીક્ષા કરતાં હતાં. (૬૧)

ગઢપુરથી નીકળેલા શ્રીહરિ પંચાલ દેશોને ઉલ્લંઘી, ભદ્રા નદી ઊતરીને, ભાલ દેશો ઓળંગી, સાબરમતી નદી તરીને ચોથે દિવસે ચરોતર દેશમાં આવ્યા. (૬૨)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે વૃત્તાલયદોલોત્સવે ભગવત્પ્રયાણ દેશાન્તરીય જનસંઘાગમન નિરૂપણનામા સપ્તચત્વારિંશોઽધ્યાયઃ (૪૭)*

## અધ્યાય : ૪૮

## ઉત્સાહી મનવાળાં ભક્તોને પરિવાર સહિત શ્રીહરિના દર્શનનો આનંદ કહ્યો છે.

**સુવ્રત મુનિ કહે છે :** હે રાજન્ ! ચરોતર દેશ અને આંબા વગેરે વૃક્ષોની ઘણા પ્રકારે પ્રશંસા કરતા શ્રીહરિ ગઢપુરથી નીકળીને પાંચમે દિવસે બપોરે 'પીપળાવ' ગામમાં આવ્યા. (૧) હે રાજન્ ! માર્ગમાં શ્રીહરિને જે જે ગામો આવ્યાં, તે તે ગામોના લોકોએ ફળો-ફૂલો સહિત સાકર-પેંડા-બરફી વગેરેનાં પડીકાં અર્પણ કર્યાં. ઘણી જ પ્રીતિપૂર્વક પૂજાયેલા, મધુર વચનામૃતોથી ભક્તજનોને અનુગ્રહ કરતા કરતા શ્રીહરિ વડતાલમાં આવેલાં દેશદેશનાં ભક્તોને આનંદ આપવા માટે દશમીને દિવસે સાંજના સમયે વડતાલમાં પધાર્યા. (૨-૩) ભગવાનના પધારવાની રાહ જોઈને પશ્ચિમ દિશા તરફ દૃષ્ટિ રાખી રહેલાં તે દેશાંતરનાં સમગ્ર જનો, શ્રીસ્વામિનારાયણ ભગવાનનું આગમન સાંભળીને પ્રસન્ન થઈ તત્કાળ જ આદરપૂર્વક સન્મુખ જવા ઊભાં થયાં. (૪) મૂર્છા પામેલાઓને જેમ પ્રાણ આવવાથી અંગોનું હલનચલન થવા લાગે, તેમ લાખો માણસો ઊભાં થયાં. અને આનંદિત થઈ શ્રીહરિની સન્મુખ ગયાં. (૫)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

तत्पूर्निवासिनः सर्वे ब्राह्मणाः क्षत्रिया विशः । शूद्राः कोलाश्च शतशो हरिभक्तास्तथा स्त्रियः ॥६॥ श्रुत्वा हरिमुपायातं तद्दर्शनमहोत्सवाः । प्रत्युद्गन्तुं तमुत्तस्थुः पौराः सर्वे ससम्भ्रमम् ॥७॥ श्रुत्वा हरेरागमनं प्रेमविह्वलचेतसः । प्रीता बभूवुः सकलास्तदानीं पौरयोषितः॥८॥ वाससां भूषणानां च तदानीमतिसम्भ्रमात् । बभूव व्यत्ययस्तासां हर्षाश्रुप्लुतचक्षुषाम् ॥९॥ यथातथाधृताभूषा यत्तद्विधृतवाससः । उत्कास्तदैव तं द्रष्टुं गृहेभ्यस्ता विनिर्ययुः ॥१०॥ मार्जयन्त्यो गृहान्काश्चिल्लिम्पन्त्यश्चापराः स्त्रियः । स्नान्त्यः काश्चित्स्त्रियः सद्यस्त्यक्त्वा तत्सत्वरं ययुः ॥११॥ काश्चित्पाकं प्रकुर्वत्यः काश्चिद्गोदोहनं तथा । सुतान् पयः पाययन्त्यस्त्यक्त्वा तत्काश्चनागमन् ॥१२॥ ध्यायन्त्यः काश्चन हरिं काश्चित्तत्पदकार्चनम् । कुर्वत्यस्तद्विहायैव साक्षात्तं ययुरीक्षितुम् ॥१३॥ काश्चित्समाधौ पश्यन्त्यो हरिं सद्यस्तिरोहितम् । ससम्भ्रमं समुत्थाय ययुरुन्मत्तवत्स्त्रियः ॥१४॥ प्रत्युज्जग्मुर्हरिं प्रीत्या गीतवाद्यपुरःसरम् । जयध्वनिं प्रकुर्वन्तस्तदा पौराः सयोषितः ॥१५॥ सत्वरं ते चलन्तोऽपि वाद्यघोषं हरेः पुरः । श्रुत्वा दूराज्जायमानमधावन्दर्शनोत्सुकाः ॥१६॥ हरेः पुरःसरांस्तावच्छतशश्च सहस्रशः । दृष्ट्वा मुनीन्प्रणम्याथ साक्षादैक्षन्त ते प्रभुम् ॥१७॥ अश्वाधिरूढं धृतचारुवल्गं सहासवक्त्राम्बुजमब्जनेत्रम् । मार्गे जनैश्चन्दनपुष्पहारैः सम्पूजितं भक्तमनोभिरामम् ॥१८॥ चञ्चच्चलत्प्रान्तसितांशुकेन तूर्णं दृढाबद्धकटिं कटाक्षैः । संवीक्ष्य भक्तानभि धावतः स्वं हसन्तमाश्चर्यवशादिवोच्चैः ॥१९॥ करेण चैकेन समाव्रजद्भ्यो भक्तव्रजेभ्यो ह्यभयं ददानम् । तमश्ववारैर्वृतमाशु दृष्ट्वा ववन्दिरे येऽग्रगतास्त आदौ ॥२०॥

---

વડતાલ નિવાસી હરિભક્તો - બ્રાહ્મણ, ક્ષત્રિય, વૈશ્ય અને શૂદ્રો, તેમ જ ક્ષત્રિય જાતિથી ઊતરતા ક્ષત્રિયો (કોળી) તથા સેંકડો બ્રાહ્મણીઓ, હરિભક્તોની સ્ત્રીઓ, વગેરે સમીપ પ્રદેશવાળા હરિભક્તો, શ્રી સહજાનંદ ભગવાન આવવાના છે, તે સાંભળીને તેમનાં દર્શન માટે ઉત્સાહી સર્વ પુરવાસીઓ આદરપૂર્વક શ્રીહરિની સન્મુખ જવા માટે ઊભા થયાં. (૬-૭) શ્રી સ્વામિનારાયણ ભગવાનનું આગમન સાંભળીને પ્રસન્ન થયેલી વડતાલની અંગનાઓ-સ્ત્રીઓ પ્રેમથી વિભ્રાંત ચિત્તવાળી થઈ ગઈ. (૮) તે સમયે હર્ષાશ્રુ-સહિત નેત્રોવાળી સ્ત્રીઓને અતિ ઉત્સાહને કારણે પોતાના અંગ ઉપર ધારવાનાં વસ્ત્રો, અલંકારોના સ્થાનમાં ફેરફાર થઈ ગયો. (૯) હર્ષાવેશમાં આવીને અસ્થાને વસ્ત્રાલંકાર ધારણ કરેલી સ્ત્રીઓ, શ્રીહરિને જોવા માટે ઉત્સાહવાળી બની. શ્રીહરિના આગમનનાં શ્રવણ સમયે જ પોતાના ઘરમાંથી બહાર નીકળી. (૧૦) કોઈ સ્ત્રી ઘરને વાળતી હતી, કોઈ લીંપતી હતી, કોઈ સ્નાન કરતી હતી, તે સર્વ સ્ત્રીઓ પોતાનાં કામ પડતાં મૂકીને તુરત જ ચાલવા માંડી. (૧૧) કોઈ સ્ત્રી ભાત અને પાક જેવી રસોઈ બનાવતી હતી. કોઈ ગાયને દોહન કરતી હતી. કોઈ પોતાના પુત્રને સ્તનપાન કરાવતી હતી. તે સર્વે પાકાદિ ક્રિયાઓનો ત્યાગ કરીને શ્રીહરિ તરફ જવા લાગી. (૧૨) કોઈ સ્ત્રી શ્રીહરિનું મનમાં ચિંતવન કરતી, કોઈ માનસિક ઉપચારોથી શ્રીહરિના ચરણકમળનું પૂજન કરતી, કોઈ તેમનું ધ્યાન અને પૂજનનો ત્યાગ કરી, પ્રત્યક્ષ શ્રીહરિને દર્શને સન્મુખ જતી હતી. કોઈ સ્ત્રી સમાધિમાં શ્રીહરિને જોતી હતી, તત્કાલ જ અંતર્હિત થયેલા જાણી, ઉતાવળથી ઊઠીને ઉન્મત્તની માફક ચાલતી થઈ. તે સમયે સ્ત્રીઓ સહિત પુરનાં નિવાસી ભક્તજનો 'જય જય' નાદ કરતાં પ્રીતિપૂર્વક વાજિંત્ર સહિત ગીત ગાતાં શ્રીહરિ સન્મુખ જતાં હતાં. (૧૩-૧૪-૧૫) આ સર્વ જનો, ઉતાવળે ચાલતા, પુર તરફ પધારતા શ્રીહરિની આગળ થતો વાજિંત્રોનો અવાજ દૂરથી સાંભળી, બહુ ઉત્સાહમાં આવી જઈ સર્વ પ્રથમ પહોંચવા દોડવા લાગ્યા. (૧૬) આ દોડતાં પુરજનો, પ્રથમ શ્રીહરિની આગળ ચાલનારા સેંકડો અને હજારો સાધુઓને જોઈને નમસ્કાર કરી, પછી પ્રત્યક્ષ શ્રીહરિનાં દર્શન કરતાં હતાં. (૧૭) માણકી ઘોડી ઉપર બેઠેલા, ડાબા હાથમાં લગામ ગ્રહણ કરી છે એવા, સ્વાભાવિક મંદ હાસ્યયુક્ત મુખારવિન્દવાળા, પ્રફુલ્લિત કમળ સરખાં નેત્રોવાળા, માર્ગમાં લોકોએ ચંદન અને પુષ્પના હારોથી પૂજાયેલા, ભક્તોના મનને આનંદ આપનારા, ચળકતા ચંચલ અગ્રભાગોવાળા વસ્ત્રથી દૃઢ બાંધી છે કેડ્ય જેમણે એવા, પોતાની સન્મુખ તત્કાલ દોડતાં વડતાલનાં રહેવાસી ભક્તજનોને, કૃપાકટાક્ષોથી જોઈને, આશ્ચર્યવશ થઈ ઊંચેથી હસતા, પોતાની સન્મુખ આવતા, પોતાના ભક્તવૃન્દને એક હાથથી અભયદાન આપતા, હજારો અસવારોથી વીંટાયેલા શ્રીહરિને જોઈને પુરના જે ભક્તો દોડીને આગળ ગયા તે પ્રથમ તત્કાલ નમસ્કાર કરતા હતા. (૧૮-૧૯-૨૦)

कुबेरमुख्याः सकलाश्च पौरा भक्ताः पुमांसो द्रुतमेत्य तत्र । तं भूरिहर्षस्त्रवदश्रुनेत्राः प्रीत्या प्रभुं दण्डवदाशु नेमुः ॥२१॥ स्त्रीणां च वृन्दानि सहस्त्रशोऽथ द्रष्टुं तमुत्कण्ठितमानसानि । तदावलोक्य प्रभुमाशु हर्षान्निधाय शीर्षाणि भुवि प्रणेमुः ॥२२॥ दृष्ट्वा तमात्मपरमप्रियमम्बुजाक्षं नार्यः प्रहर्षमतुलं समवाप्य तूर्णम् । दृग्भिर्निधाय हृदयेषु हरिं मनोभिरालिङ्ग्य ताः पुलकिताङ्गरुहा बभूवुः ॥२३॥ देशान्तरीयः सर्वोऽपि जनो हरिसहागतान् । परिरेभे ब्रुवन् हर्षाज्जय श्रीकृष्ण इत्यसौ ॥२४॥ देशान्तरीया नार्योऽथ प्रभुणा सह चागताः । पाश्चात्या योषितो दृष्ट्वा परिरब्धुं विदुद्रुवुः ॥२५॥ स्तनोपपीडमौत्सुक्याद्धर्षेण महता वृताः । जय श्रीकृष्ण इत्येवं वदन्त्यः परिरेभिरे ॥२६॥ देशान्तरेभ्य आगत्य स्थिताः कुञ्जेष्वितस्ततः । त्यागिनो भगवद्भक्तास्तत्राजग्मुः सहस्त्रशः ॥२७॥ यथान्तरिक्षगा हंसा लक्ष्यीकृत्यैव मानसम् । सरस्तथा हरिं ते च दूरादभ्यपतन् द्रुतम् ॥२८॥ तत्रागत्य हरिं नत्वा दण्डवत्तेऽथ संस्थिताः । तानालोक्य जनास्ते तु प्रणेमुः समुपेत्य च ॥२९॥ कुर्वन्तश्च जय स्वामिन्नारायण इति ध्वनिम् । जानन्तस्तान्हरेः प्रेष्ठान् हर्षेण विलुलोकिरे ॥३०॥ तानागतान् यथायोग्यं मानयामास स प्रभुः । प्रणतानात्मनो भक्तान्सर्वान्सन्तोषयन्नृप ! ॥३१॥ करस्पर्शेन कांश्चिच्च कांश्चित्सम्भाषणेन च । कांश्चिच्चाभयदानेन कांश्चित्सस्मितवीक्षणैः ॥३२॥ सम्भाव्येति जनान् सर्वान्स्त्रियश्च भगवांस्ततः । जयध्वानैः स्तूयमानः सह तैः पुरमाययौ ॥३३॥ कुबेरो यौवनाश्वश्च गृहीत्वा चामरे उभौ । वीजयामासतुर्भक्तौ तं तत्पार्श्वचरौ तदा ॥३४॥

---

તે સમયે મુખ્ય ભક્તો કુબેરભાઈ, જોબન વગેરે ભક્તજનો તત્કાલ શ્રીહરિને પામીને, ઘણા હર્ષથી નેત્રોમાં અશ્રુ સાથે શ્રીહરિને સ્નેહથી સાષ્ટાંગ દંડવત્ પ્રણામ તત્કાળ કરવા લાગ્યા. (૨૧) તે વેળાએ શ્રીહરિનાં દર્શન કરવામાં ઉત્સાહિત મનવાળી હજારો સ્ત્રીઓના સમુદાયો શ્રીહરિનાં દર્શન કરી હર્ષથી તત્કાલ મસ્તકો પૃથ્વી ઉપર મૂકી, પંચાંગ પ્રણામ કરવા લાગી. (૨૨) આ સ્ત્રીઓ આત્માના પરમ પ્રિય, કમલનયન શ્રીહરિને જોઈને અનુપમ અતિ હર્ષ તત્કાલ પામીને, શ્રીહરિને નેત્રોની વૃત્તિઓથી પોતાના હૃદયકમળમાં આરોપણ કરી, પોતાનાં અંતઃકરણોથી આલિંગન કરી, રોમાંચિત શરીરવાળી થતી હતી. (૨૩) દેશાન્તરથી શ્રીહરિ સન્મુખ આવેલાં સર્વજનો તે વેળા **'જય શ્રીકૃષ્ણ'** શબ્દ ઊંચા સ્વરે બોલીને અતિહર્ષથી શ્રીહરિ સાથે આવેલા ભક્તજનોને ભેટતાં હતાં. (૨૪) પછી દેશાન્તરથી આવેલી સર્વ સ્ત્રીઓ, શ્રીહરિની સાથે આવેલી પશ્ચિમ દેશની સ્ત્રીઓને, રમા-જયા વગેરેને જોઈને આલિંગન કરવા માટે દોડતી હતી. (૨૫) દેશાન્તરની આ સ્ત્રીઓ અતિશય હર્ષયુક્ત બની **'જયશ્રીકૃષ્ણ'** શબ્દ ઉચ્ચારતી, ઉત્સાહથી બન્ને સ્તનોને પીડા પામે તેમ આલિંગન કરતી હતી. (૨૬) શ્રીહરિની આજ્ઞાથી દેશાન્તરમાં જઈને ફરી શ્રીહરિની પત્રિકા શ્રવણથી વડતાલ આવીને, જ્યાંત્યાં લતાદિ કુંજોમાં રહેલા હજારો ત્યાગી-સાધુઓ, શ્રીહરિ વડતાલ પધારશે એવું જાણીને શ્રીહરિ સન્મુખ જવા લાગ્યા. (૨૭) આકાશ માર્ગે ગતિ કરનારા શ્વેત હંસો માનસરોવરને લક્ષ્ય કરીને જ જેમ પડે છે (એકદમ નીચે ઊતરે) તેમ ત્યાગીઓ દૂરથી શ્રીહરિને લક્ષ્ય કરીને જ તત્કાલ દોડતા હતા. (૨૮) પછી ત્યાગીઓ શ્રીહરિની સમીપમાં આવી શ્રીહરિને સાષ્ટાંગ પ્રણામ કરી ઊભા રહ્યા. ત્યાગીઓને જોઈને શ્રીહરિની સાથે આવેલા સર્વે લોકો તો તેમની સમીપમાં જઈ પ્રણામ કરતા હતા. (૨૯) **'જય શ્રી સ્વામિનારાયણ'** આ પ્રમાણે જયનાદ કરતા ત્યાગીઓને શ્રીહરિના અતિપ્રિય જાણીને શ્રીહરિની સાથે આવેલા જનો અતિ આનંદથી જોતા હતા. (૩૦)

હે રાજન્! શ્રીહરિ પોતાની સન્મુખ આવેલા પ્રણામ કરતા પોતાના એકાંતિક ઉપાસક સર્વેને આનંદ આપતા હતા અને યોગ્ય સંભાવના કરતા હતા. (૩૧) કેટલાક લોકોને હાથના સ્પર્શ, કેટલાક લોકોને 'સુખી છો ?' એમ પૂછવાથી, કેટલાક લોકોને અભયદાનની મુદ્રાના દર્શનથી, કેટલાક લોકોને મંદહાસ્ય યુક્ત દર્શનથી સન્માન કરતા હતા. (૩૨) શ્રીહરિએ આ પ્રકારે સર્વ સ્ત્રીપુરુષોની યથાયોગ્ય સંભાવના કરી; સ્તુતિરૂપે 'જય જય' એવા ઊંચા સ્વરે જેનાં ગુણચરિત્ર ગવાયાં છે, એવા શ્રી હરિ વડતાલ નગરમાં પધાર્યા. (૩૩) તે વેળાએ કુબેરજી તથા જોબન એ બે ભકતો શ્રીહરિની પડખે ચાલતા ચાલતા રત્નદંડવાળા ચામરો વીંઝતા હતા. (૩૪)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सहस्त्रशो दीपिकानां महता तेजसा तदा । चन्द्रकान्त्या च तिमिरं सर्वदिश्यं व्यलीयत ॥३५॥ शङ्खभेरीमृदङ्गानां झर्झराणां सहस्त्रशः । कांस्यानां डिण्डिमानां च तत्र ध्वानो महानभूत् ॥३६॥ तस्मिंस्तु तुमुले घोषे कोऽपि केनचिदीरितम् । वाक्यं न किञ्चिच्छुश्राव करसंज्ञाऽभवत्तदा ॥३७॥ बहिराम्रवणे पुर्याः स्वावासस्थानमीश्वरः। अकारयच्चोद्धरिष्यन्स जन्तूंस्थावरानपि ॥३८॥ जनौघवेष्टितः स्थानं तत्प्रापत्स शनैः शनैः । पुर्या उदग्दिशि श्रेष्ठं सर्वलोकमनोहरम् ॥३९॥ तत्रोत्तरत्यथ विभौ तुरङ्ग्याः पार्श्विकः पुमान् । यावत्करं धारयति तावत्तस्थौ स भूतले ॥४०॥ स्वदर्शनं भवेदेव सर्वेषामिति स प्रभुः । उच्चं पीठं चतुष्पादं तस्थावारुह्य शोभनम् ॥४१॥ सहागतानां सर्वेषां स्थानान्यथ यथोचितम् । दापयामास भगवान्निषसादासने ततः ॥४२॥ किञ्चित्तत्र च विश्रम्य पीत्वा वारि ततो जनान् । नानादेशसमायातानवैक्षत समन्ततः ॥४३॥ तत्रासन् प्रायशो भक्ताः प्रेक्षका अपि केचन । तत्र स्थितिभिया केचित्स्वीयान्नेतुमुपागताः ॥४४॥ यत्र यत्रैक्षत विभुस्तत्र तत्र सुसङ्कुलान् । जनानेव स्थितान्स्वस्मिन्बद्धदृष्टीनवैक्षत ॥४५॥ पुरःस्थिताश्च यावन्तस्तावन्तः पार्श्वयोरपि । स्वपृष्ठतोऽपि तावन्तो दृष्टा भगवता जनाः ॥४६॥ दुर्गे क्षेत्रेषु सर्वेषु सरोवरतटेषु च । जनान्कूपोपकण्ठेषु शकटादिषु चैक्षत ॥४७॥ प्रतिवृक्षं च शाखासु ह्युपर्युपरि संस्थितान् । पुरे प्रतिच्छदिस्तद्वल्लोकानेव समैक्षत ॥४८॥ पश्यन्नेवं स उत्थाय दिशासु विदिशासु च । जनानेव समीक्ष्यैव जहास च भृशं प्रभुः ॥४९॥ सविस्मयं शिरः स्वं च धूनयन्सोऽप्यहो अहो । वदन्निति पुनः पीठे निषसाद हसन्नृप ! ॥५०॥ ऊर्ध्वौ कृत्वा भुजौ स्वस्य ततः स्थापनमुद्रया। उपावीविशदीशोऽसौ तिष्ठतः सकलाञ्जनान् ॥५१॥

તે વેળાએ હજારો વાળંદોએ ધારણ કરેલા મહાદીવાઓની જ્યોતના અત્યંત તેજથી તથા ચન્દ્રની કાંતિથી સર્વ દિશામાં રહેલું અંધારું લીન થઈ ગયું. (૩૫) તે વેળાએ હજારો શંખો-ભૂંગળો-મૃદંગોના ઝણઝણાટ અને કાંસીજોડાં તથા નગારાંઓનો મહાન ધ્વનિ થયો. (૩૬) અતિશય ઘોષ થયો ત્યારે કોઈ માણસે ઉચ્ચારેલું વાક્ય કોઈ પણ માણસ, કંઈ સાંભળતો ન હતો. ત્યારે હાથની સંજ્ઞાઓથી જ કહેવાના અર્થોની સૂચના થતી હતી. (૩૭) શ્રીહરિએ સ્થાવર જાતિનાં જંતુઓનું પરમ શ્રેય સંપાદન કરવા, વડતાલથી બહાર, આંબાના વનમાં જ પોતાનો ઉતારો કરાવ્યો. (૩૮) જન સમુદાયથી વિંટાયેલા શ્રીહરિ, નગરની ઉત્તર દિશામાં રહેલા સર્વ લોકને આનંદ આપનાર એવા અત્યુત્તમ સ્થાનમાં ધીમે ધીમે આવ્યા. (૩૯) પછી તે પોતાના નિવાસસ્થાનમાં શ્રીહરિ માણકી ઘોડી ઉપરથી ઊતર્યા ત્યારે પડખે રહેલા પોતાના પાર્ષદ રત્નજીત્ જેટલામાં શ્રીહરિનાં હાથને અવલંબન આપવા ગ્રહણ કરે ત્યાં તો શ્રીહરિ સ્વયં લાઘવતાથી ભૂમિ ઉપર ઉતર્યા. (૪૦) શ્રીહરિ સર્વજનોને દર્શન થાય એવા હેતુથી ત્યાં સ્થાપેલા ચાર પાયાવાળા ખૂબ ઊંચા રમણીય સિંહાસન (મંચ) ઉપર ચડીને થોડીવાર ઊભા રહ્યા. (૪૧) ત્યારબાદ શ્રીહરિ પોતાની સાથે આવેલાં સર્વ જનોને યથાયોગ્ય નિવાસસ્થાનો અપાવતા હતા. પછી શ્રીહરિ પોતે સિંહાસનમાં બેઠા. (૪૨) તે આસનમાં થોડી વાર વિસામો કરી, નારાયણાનંદ બ્રહ્મચારીએ લાવેલા જળનું પાન કરી, વિવિધ દેશોથી આવેલા લોકોને ચોતરફ જોતા હતા. (૪૩) તે જનોમાં ઘણું કરીને તો પોતાનાં ભક્તજનો હતાં. કેટલાંક જનો આશ્ચર્ય જોનારાં હતા. કેટલાંક જનો વૃત્તાલય અથવા શ્રીહરિની સમીપમાં મહાસુખમય દર્શન માટે ઘણા સમય સુધી નિવાસના ભયથી(અર્થાત્ ત્યાંજ રોકાઈ જશે એવા ભયથી) પોતાનાં ભ્રાતાપુત્રાદિક સંબંધીઓને લેવા આવેલા હતા. (૪૪) શ્રીહરિ જ્યાં જ્યાં અને જે જે દિશામાં દૃષ્ટિ નાખતા હતા, ત્યાં ત્યાં માણસોની અત્યંત ભીડ જામેલી જોવામાં આવતી હતી. તે બધાં પોતાની મૂર્તિનાં દર્શન સ્થિર દૃષ્ટિથી કરતાં હતાં. (૪૫) જેટલા લોકો પોતાની આગળ રહેલા તેટલી જ સંખ્યામાં ડાબે પડખે અને જમણે પડખે, તથા પાછળના પ્રદેશમાં પણ તેટલા જ લોકો હતા, આ સર્વને શ્રીહરિએ દૃષ્ટિથી જોયા. (૪૬) વડતાલની ચારે તરફ બધાં ખેતરો, સરોવરના કિનારા, કૂવાના કાંઠાઓ તથા ગાડાંઓ વગેરે સ્થાનોમાં રહેલા લોકોને શ્રીહરિએ જોયા. (૪૭) દરેક વૃક્ષોની ડાળીઓમાં, ઉપરા ઉપરી તેમજ પુરમાં દરેક છદિઓ (મકાનનાં બંને પડાળો)ઉપર રહેલા લોકોને શ્રીહરિ જોતા હતા.(૪૮) ચારે દિશાઓ અને દિશાઓના ખૂણામાં લોકોને જોઈને શ્રીહરિ અત્યંત રાજી થયા. (૪૯) હે રાજન્ ! શ્રીહરિ વિસ્મય પામ્યા હોય તેમ પોતાના મસ્તકને હલાવતા 'અહો !! અહો !!' આમ બોલતા અને હસતા હસતા, પાછા પોતાના સિંહાસનમાં બેઠા. (૫૦) પછી શ્રીહરિ પોતાના બન્ને હાથ ઊંચા કરી લોકોને બેસી જવા માટે સંકેત કરતા હતા. (૫૧)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**आज्ञाकराश्च ते सर्वे लोकास्तत्करसंज्ञया । निषेदुर्बोधिताः सद्यो लक्षशोऽप्येकचेतसः ॥५२॥ उपविष्टांश्च तान्भूयो भगवान्मौनमुद्रया । चकार संयतगिरस्तालिकावाद्यपूर्वकम् ॥५३॥ तूष्णीं तेषूपविष्टेषु भगवान्भक्तवत्सलः । सर्वेषां स्वागतं तेषां सुखावासं च पृष्टवान् ॥५४॥ एकैकदेशमुख्यांश्च द्वित्रान्द्वित्रान्निजान्तिके । आहूय तत्तद्देशीयं वृत्तान्तं समपृच्छत ॥५५॥ तस्कराद्यप्रवेशार्थं ततस्तानन्वशात्प्रभुः । स्वस्वावासेष्वविज्ञातो निष्कास्यः पुरुषस्त्विति ॥५६॥ आज्ञप्तास्तेऽथ हरिणा तं प्रणम्य जना ययुः । स्वस्वावासान्निजं भाग्यं मन्यमाना महत्तरम् ॥५७॥ स्वे स्वे वासे चैकमेकं मनुष्यं संस्थाप्यैते भूय एत्याग्रतोऽस्य । तस्थुः सर्वे द्रष्टुमुत्कास्तमीशं यावत्तस्येक्षाऽभवत्तावदेव ॥५८॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे वृतालयदोलोत्सवे भक्तानां सपरिवारभगवद्दर्शनानन्दनिरूपणनामाऽष्टचत्वारिंशोऽध्यायः ॥४८॥

सुव्रत उवाच – **एतस्मिन्नन्तरे तत्र प्रभोस्तस्य तु सोदरौ । नराकृतिधरस्योभावाजग्मतुरकल्मषौ ॥१॥ यस्मिन्दिनेऽसौ भगवान्नीलकण्ठाभिधो गृहम् । हित्वा प्रवव्राज निजांस्तद्दिनात्तच्छुचाकुलौ ॥२॥ रामप्रतापेच्छारामसंज्ञौ बुद्धिमतां वरौ । भगवद्विरहक्षामौ नित्यं तच्चिन्तने रतौ ॥३॥ देशान्तरे विचरतामागतानां स्ववेश्मनि । मुखान्मुनीनां तद्वार्तां श्रुत्वा तद्दर्शनोत्सुकौ॥४॥ तत्स्नेहिभिश्च बहुभिर्बन्धुभिः सहितौ निजैः । सद्यो निर्ययतुर्ग्रामात्साश्चर्यौ कृतमङ्गलौ ॥५॥ यदा तौ निर्गतौ ग्रामाद्भ्रातरौ कृतनिश्चयौ । तदा तत्परिवारोऽपि साकं ताभ्यां च निर्ययौ ॥६॥**

---

શ્રીહરિની આજ્ઞાને તત્કાલ પાળનાર શ્રીહરિના સ્વરૂપમાં નિષ્ઠાવાળા લાખો માણસો શ્રીહરિના હાથના સંકેતથી સમજી જઈને તરત બેસી ગયા. (૫૨) શ્રીહરિએ ફરીથી પણ પોતાની આંગળી નાસિકા ઉપર મૂકી, તાળી પાડી શાંત રહેવા સંકેત કર્યો. તેથી બધા શાંત થઈ ગયા. (૫૩) સર્વ સભા શાંત થઈ ત્યારે ભક્તવત્સલ શ્રીહરિએ સર્વજનોને સુખના સમાચાર પૂછ્યા; તેમજ ઉતારા વગેરેની સગવડથી સંતોષ થયો છે, એમ પૂછતા હતા. (૫૪) વળી, એક એક દેશમાં આગેવાન એવા બબ્બે અથવા ત્રણ ત્રણ પોતાના ભક્તને પોતાની સમીપે બોલાવી તે તે દેશની માહિતી અર્થાત્ પૂર્વે કહેલાં અન્નકૂટ ઉત્સવની માફક, લોકોમાં સંભાળતી જે પોતાની અને પોતાના સાધુ વગેરેની જનશ્રુતિ આદિક વૃત્તાંત પૂછતા હતા. (૫૫) શ્રીહરિ દરેક ભક્તોને સૂચના આપતા હતા કે તમારા ઉતારામાં કોઈ અજાણ્યો પુરુષ આવે, તો બહાર કાઢી મૂકજો ,આવા સમુદાયમાં ચોર લોકો ચોરી કરવાની પ્રવૃત્તિ કરતા હોય છે. માટે તમારે દરેકે સાવધાન રહેવું : આમ સમયોચિત દરેકને સૂચના આપી. (૫૬) પછી શ્રીહરિએ પોતપોતાનાં ઉતારે જવાની આજ્ઞા આપેલાં તે ભક્તજનો શ્રીહરિના દર્શનાદિથી પોતાનું અહોભાગ્ય માનતા થકા તે શ્રીહરિને પ્રણામ કરી પોતાને ઉતારે ગયાં. (૫૭)

એ સર્વે જનો પોતપોતાના સ્થાનમાં એક એક મનુષ્યને મૂકીને જ ઉત્સાહપૂર્વક ફરીથી પણ શ્રીહરિની સમીપે આવીને જ્યાં સુધી શ્રીહરિનાં દર્શન થાય ત્યાં સુધી (તેટલા સમય સુધી) તે ભક્તો શ્રીહરિનાં દર્શન કરવા બેસતા હતા. (૫૮)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે વૃત્તાલયદોલોત્સવે ભક્તાનાં સપરિવાર ભગવદ્દર્શનાનંદનિરૂપણનામા અષ્ટચત્વારિંશો અધ્યાયઃ (૪૮)*

## અધ્યાય : ૪૯

## રામપ્રતાપ-ઈચ્છારામજી વગેરે શ્રીહરિના બંધુજનોનું આગમન કહ્યું છે.

**સુવ્રત મુનિ બોલ્યા :** હે રાજન્ ! આ પ્રકારના મહોત્સવની પ્રવૃત્તિમાં નરાકૃતિ ધારણ કરનાર શ્રીહરિના નિષ્પાપ બન્ને પૂજ્ય નાના અને મોટા ભાઈઓ વૃત્તાલયમાં આવેલા શ્રીહરિની સમીપે આવ્યા. (૧) નીલકંઠ નામધારી શ્રીહરિ જે દિવસે પોતાનું નિવાસસ્થાન અને પોતાનાં સંબંધીઓનો ત્યાગ કરી, ફરી પાછા નહીં આવવા માટે વનમાં ગયા, તે દિવસથી આરંભીને શ્રીહરિના વિરહશોકથી વ્યાકુળ મનવાળા, રામ પ્રતાપ અને ઈચ્છારામ : આ બન્ને ભાઈઓ, બુદ્ધિમાનોમાં શ્રેષ્ઠ, પોતાના ભાઈ શ્રીહરિના વિરહથી કૃશ શરીરવાળા, પ્રતિદિન ધ્યાનમાં તત્પર વિવિધ દેશોમાં વિચરણ કરતા, પોતાને ઘેર આવેલા, માયાજીતાનંદ આદિક મુનિઓના મુખથી શ્રીહરિની વારતા સાંભળી અને શ્રીહરિના દર્શનમાં ઉત્સાહી મનવાળા, શ્રીહરિમાં પ્રીતિવાળાં પોતાનાં સગાઓ કે જે મામાના પુત્રો, ઈચ્છારામજીના સાળા, તેમની પત્ની વગેરે બન્ધુજનો સાથે આવ્યાં. સંતોના મુખથી શ્રીહરિની વારતા સાંભળી તે સમયે આશ્ચર્યપૂર્વક મંગલ કરી ઈચ્છારામજી અને રામપ્રતાપજી પ્રસ્થાન કરતા હતા ત્યારે, શ્રીહરિની પાસે જવા માટે નિશ્ચિત મનવાળા, બન્ને ભાઈઓની સાથે પરિવાર સાબદો થયો. (૨-૩-૪-૫-૬)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

योषा रामप्रतापस्य भगवद्वीक्षणोत्सुका । नाम्ना सुवासिनी ख्याता पतिभक्तिपरायणा ॥७॥ तथा रामप्रतापस्य त्रयः पुत्राः सुबुद्धयः । नन्दरामष्ठाकुरोऽयोध्याप्रसाद इति श्रुताः ॥८॥ तथा तस्य सुता चैका नाम्ना सिद्धिरिति श्रुता । नन्दरामस्य योषाऽथ दिनमानाभिधा शुभा ॥९॥ तत्सुतौ रामशरणनारायणसमाह्वयौ । मेधानाम्नी च तस्यैव तनया शुभलक्षणा ॥१०॥ ठाकुराख्यस्य भार्याऽथ नाम्ना शिवकुमारिका । गोविन्दाकुन्तिनाम्न्यौ च तस्य पुत्र्यावुभे अपि ॥११॥ भार्याऽयोध्याप्रसादस्य सुनन्दासंज्ञिका तथा । तस्यैव तनया नाम्ना यमुनेत्यभिविश्रुता ॥१२॥ इच्छारामस्य भार्याऽथ ख्याता नाम्ना वरीयसी । पुत्राश्च तस्य प्रवराः पञ्च द्वे कन्यके अपि ॥१३॥ गोपालो रघुवीरश्च तथा वृन्दावनाभिधः । सीतारामश्च बदरीनाथ इत्यात्मजाः श्रुताः ॥१४॥ ख्याते फुल्लसरीफुल्लझरीसंज्ञे तु कन्यके । स्त्री गोपालस्य मण्डाख्या विरजाऽस्यानुजस्य च ॥१५॥ सुफलाख्यस्तथा चैक इच्छारामस्य शालकः । मानसारामसंज्ञोऽस्य मातुलेयश्च बुद्धिमान् ॥१६॥ एतैरन्यैश्च सहितौ बन्धुभिर्भ्रातरौ च तौ । भगवद्दर्शकैः पान्थैः साकं तत्रोपजग्मतुः ॥१७॥ प्रतिग्रामं पूज्यमानौ मार्गेऽपि भगवज्जनैः । स्वस्वामिसम्बन्धितया विनयेनादरेण च ॥१८॥ तत्र तत्र तदैश्वर्यं श्रुत्वा विस्मितमानसौ । तत्पुरस्योपकण्ठे तौ दूराद्धरिमपश्यताम् ॥१९॥ लक्षणैरात्मबन्धुं तं स्वानुभूतैरवेत्य तौ । दूराद्दुद्रुवतुः प्रेम्णा परिरब्धुं मुदान्वितौ ॥२०॥ आयातौ निजदर्शनार्थमथ तौ त्यक्त्वा गृहं दूरतः प्रेमाश्रुस्रुतिलोचनावतिमुदौ दृष्ट्वा स तद्भाववित् । भ्रातृस्नेहविहीनधीरपि तदा भक्तप्रियत्वात्प्रभुः पीठादुत्तरति स्म हासविकसद्वक्त्राम्बुजः सत्वरम् ॥२१॥ तावत्तौ द्रुतमेत्य तं स्वपरमप्रेष्ठं क्रमेणादराद्दोर्भ्यां सम्परिरभ्य हर्षविवशावास्तां चिरं भ्रातरौ । तौ सम्मान्य यथोचितं स भगवानन्यांश्च बन्धून्निजान्मित्रादीन्परिरभ्य साश्रुनयनानानन्दयामास तान् ॥२२॥

---

ભગવાનનાં દર્શન માટે ઉત્સાહી, પતિભક્તિપરાયણ, રામપ્રતાપજીનાં પત્ની સુવાસિની તથા નંદરામ, ઠાકુરરામ અને અયોધ્યા પ્રસાદ - આ સન્મતિવાળા ત્રણ જે રામપ્રતાપના પુત્રો અને સિદ્ધા નામની પુત્રી તથા દિનમાના નામે નંદરામની પતિવ્રતા સ્ત્રી, રામશરણ અને નારાયણ, બે નંદરામના પુત્રો અને મેધા નામની સુલક્ષણા નંદરામની પુત્રી, આ બધાં સાથે હતાં. (૭-૮-૯-૧૦) શિવકુમારી નામે ઠાકુરરામની પત્ની તથા ગોવિંદા અને આકુંતી નામની બે પુત્રીઓ પણ સાથે હતી. (૧૧) અયોધ્યાપ્રસાદજીની સુનન્દા નામે પત્ની તથા યમુના નામે કન્યા સાથે હતી. (૧૨) વરિયસી (વરિયાલી) નામે ઈચ્છારામનાં પત્ની તથા સ્વધર્માદિ ગુણથી શ્રેષ્ઠ પાંચ પુત્રો અને બે કન્યાઓ પણ હતી. (૧૩) ઈચ્છારામજીનાં સંતાનોનાં નામ આ પ્રમાણે છે : ગોપાલ, રઘુવીર, વૃન્દાવન, સીતારામ,બદ્રીનાથ આ પાંચ પુત્રો; તથા ફૂલસરી અને ફૂલજરી આ બે કન્યાઓ, તેમજ ગોપાલની મંડા નામની પત્ની અને રઘુવીરનાં વિરજા નામે પત્ની તે પણ સાથે હતાં. (૧૪-૧૫) ઈચ્છારામનો સુફલ નામનો સાળો અને ઈચ્છારામના મામાનો પુત્ર, બુદ્ધિમાન મંછારામ પણ સાથે હતા. (૧૬) એ બધાં, અને બીજા બંધુઓની સાથે રામપ્રતાપ અને ઈચ્છારામ બંને ભાઈઓ ભગવાનનાં દર્શન માટે ચાલ્યા. માર્ગમાં સંઘની સાથે ચાલતાં વૃત્તાલય આવ્યાં. (૧૭) માર્ગમાં જે જે ગામો આવતાં તે ગામોમાં રહેલા સત્સંગીઓ તે આ બધાંને શ્રીહરિનાં સંબંધીઓ જાણીને વિનયથી અન્ન-જળ અને ઉતારો આપી સત્કાર કરતાં. (૧૮) તે તે ગામમાં શ્રીહરિનું ઐશ્વર્ય આ સંઘની આગળ હરિભક્તો કહેતાં, તે સાંભળી બંને ભાઈઓ વિસ્મય પામતા. આમ, બંને ભાઈઓ વૃત્તાલય આવી શ્રીહરિને સભામાં બેઠેલા દૂરથી જોતા હતા. (૧૯) તે બંને ભાઈઓ શ્રીહરિના ગૃહનિવાસ સમયે બાળપણામાં સહજીવનથી પરિચિત એવી મુખાકૃતિ તથા ડાબા કાનમાં કાળો તલ (શ્યામ બિંદુ) વગેરે ચિહ્નો જોઈ આ બંને ભાઈઓએ, ‘આ પોતાના ભાઈ **ઘનશ્યામ** જ છે’ એમ જાણી પ્રેમપૂર્વક પોતાના ભાઈને ભેટવા માટે દોડ્યા. (૨૦) અતિ દૂર એવા અયોધ્યાથી પોતાના ઘરનો ત્યાગ કરી, પોતાને દર્શને આવેલા અને અતિ સ્નેહથી નેત્રમાં હર્ષનાં બિંદુવાળા અતિશય આનંદિત પોતાના બન્ને ભાઈઓને જોઈ, બન્ધુભાવને જાણનારા શ્રીહરિ તત્કાલ પોતાના સિંહાસનથી ઊતર્યા. (૨૧) પોતાને અતિપ્રિય શ્રીહરિને બંને ભાઈઓ અનુક્રમે તત્કાલ આવી બન્ને ભુજાથી આલિંગન કરી, ઘણા સમય સુધી મહાઆનંદમાં નિમગ્ન થયા. શ્રીહરિ, બંને ભાઈઓ અને બીજા તેમની સાથે આવેલા બન્ધુઓની યથાયોગ્ય સંભાવના કરી, પોતાના મિત્રાદિને આલિંગન કરી, આંખમાં પ્રેમાશ્રુવાળા ભાઈ વગેરે સંબંધીજનોને આનંદ પમાડતા હતા. (૨૨)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

रामप्रतापं ज्येष्ठं तं नारायणमुनिस्तदा । प्रणनाम कनिष्ठत्वादिच्छारामस्तमादरात् ॥२३॥ इतरानपि बन्धून् स्वानेवमेव यथोचितम्। ववन्दे भगवान् केऽपि तं नमश्चक्रुरुत्सुकाः ॥२४॥ चिरेण दृष्ट्वा ते सर्वे प्राणप्रेष्ठं तमीश्वरम् । जहुर्विरहजं तापं लेभिरे परमं सुखम् ॥२५॥ उपवेश्यासने तांश्च भगवान् पीठमास्थितः । पप्रच्छ स्वागतं तेषां वृत्तान्तं कुशलं तथा ॥२६॥ मुनयोऽथ जनास्ते च पार्षदा योषितस्तथा । भ्रातरौ तौ प्रभोर्ज्ञात्वा प्रणेमुस्तमिवादरात् ॥२७॥ ततस्तेषां निवासार्थं प्रासादं स त्वदीदपत्। शुश्रूषायां यौवनाश्वं मुकुन्दं चाप्ययूयुजत् ॥२८॥ ते सर्वेऽपि तदैश्वर्यं दृष्ट्वा श्रुत्वा च विस्मिताः । मेनिरे वासुदेवं तमात्मबन्धुं नराकृतिम् ॥२९॥ यथासुखं वसन्ति स्म प्रासादे तत्र तेऽखिलाः । खानपानोपहाराद्यैः सेव्यमाना हरिप्रियैः ॥३०॥ रामप्रतापमुख्येषु प्रभोर्बन्धुषु तेष्वथ । गतेष्वावासमीशं तमानन्दानन्द ऊचिवान् ॥३१॥ पृच्छामि भगवन्नेकं संशयं त्वाधुनोदितम्। ज्येष्ठं सहोदरं वीक्ष्य साकेतादागतं तव ॥३२॥ प्रणेमे स त्वयैवादौ ददे प्रणमितुं न सः । तत्र किं त्वयि तद्भक्तेर्न्यूनतास्ति वृषात्मज !॥३३॥ मर्यादारक्षणार्थं वा सदाचारस्य किं त्वया । तथाचरितमेतन्मे वक्तुमर्हसि सत्पते !॥३४॥ तदा स भगवानूचे सर्वेषां शृण्वतां च तम् । अस्य भक्तिर्मयि मुने ! श्वाफल्केरिव वर्तते ॥३५॥ आगच्छन् गोकुलं मार्गे मथुरायाः स यादृशम् । प्राप्तो भावं तादृशं वै प्राप्तो भवति मय्यसौ ॥३६॥ भक्तौ न्यूनत्वशङ्काऽतो मास्तु ते मुनिसत्तम! । कृतं प्रणामादानं तु मर्यादास्थितये मया ॥३७॥

---

તે સમયે નારાયણ મુનિએ પોતાના મોટાભાઈ, રામપ્રતાપ જ્યારે પોતાને પ્રણામ કરવા ઉદ્યુક્ત થયા ત્યારે તેમને નિવારી તે મોટા હોવાથી તેમને પોતે નમસ્કાર કર્યા. ઈચ્છારામ નાના ભાઈ હોવાથી તેમણે શ્રી નારાયણ મુનિને પ્રેમથી નમસ્કાર કર્યા. (૨૩) શ્રીહરિ આ પ્રકારે પોતાનાં બીજાં બંધુજનોને પણ યથાયોગ્ય નમસ્કાર કરતા હતા. કેટલાક બંધુઓ ઉત્સાહે સહિત શ્રીહરિને નમસ્કાર કરતા હતા. (૨૪) તે સર્વે ભાઈઓ વગેરે બંધુઓ પ્રાણથી પણ પ્રિય શ્રીહરિને ઘણે સમયે જોઈને વિરહજન્ય દુઃખનો ત્યાગ કરતા હતા, અને સુખ પામતા હતા. (૨૫) પોતાના બંધુજનોને યોગ્ય આસને બેસાડીને શ્રીહરિ પોતાના સિંહાસનમાં બેઠા. પછી પૂછ્યું જે, તમે સર્વ કુશળ છો ને ? અહીં સુખેથી પધાર્યા ? હું અહીં છું તેમ કેવી રીતે જાણ્યું ? વગેરે કુશળ સમાચાર પૂછતા હતા. (૨૬) પછી મુક્તાનંદ વગેરે સાધુઓ, દેશદેશથી આવેલા ભક્તો, મયારામ, હેમંતસિંહ વગેરે સત્સંગીઓ, મુકુન્દાનંદ આદિ વર્ણીઓ, સોમ વર્મા આદિ પાર્ષદો તથા જયા-રમા વગેરે સ્ત્રીઓ તે રામ પ્રતાપ-ઈચ્છારામ બંને શ્રીહરિના ભાઈઓ છે એમ જાણી, શ્રીહરિની માફક જ સ્નેહથી યથાયોગ્ય પ્રણામ કરતા હતા. (૨૭) પછી શ્રીહરિએ પોતાનાં બંધુજનોને સારો મહેલ (રાજાને યોગ્ય હવેલી=પ્રાસાદ) ઉતારો કરાવવા અપાવ્યો અને તેમની સેવા માટે જોબનપગી તથા મુકુન્દાનંદ બ્રહ્મચારીને રાખ્યા. (૨૮) તે બધા ભાઈઓ શ્રીહરિનું મહાન ઐશ્વર્ય જોઈને તથા સાંભળીને આશ્ચર્ય પામ્યા, તેમ જ શ્રીહરિને માનવ શરીરધારી બ્રહ્માંડાધિપતિ શ્રીકૃષ્ણ માનવા લાગ્યા. (૨૯) શ્રીહરિનાં બન્ધુજનોને જોબન વગેરે ભક્તો અન્નપાન આદિ તથા પેંડા-બરફી આદિ-ફળ, શાક વગેરે વસ્તુઓથી સેવતા હતા. અને અયોધ્યાવાસી બધાં સુખપૂર્વક પોતાના સ્થાનમાં રહેતાં હતાં. (૩૦) રામપ્રતાપ વગેરે શ્રીહરિના બંધુઓ પોતાને ઉતારે ગયા ત્યારે આનંદાનંદ મુનિ પરમેશ્વરને કહેવા લાગ્યા : (૩૧) હે ભગવન્ ! અયોધ્યાથી આવેલા તમારા મોટાભાઈ રામપ્રતાપને જોઈને આ સમયે મારા મનમાં એક સંશય થયો છે, એટલે તમોને પૂછું છું. (૩૨) હે ધર્મપુત્ર ! તમોએ રામપ્રતાપને પ્રથમ પ્રણામ કર્યા અને રામપ્રતાપ તમોને નમસ્કાર કરવા આવ્યા, તેમને તમે નમસ્કાર કરવા દીધા નહીં. તો મોટા હોવા છતાંય તમોને તે નમસ્કાર કરે છે, છતાંય તેમની ભક્તિ ઓછી છે કે શું ? (૩૩) અથવા હે સત્પતે ! શિષ્ટાચારની મર્યાદાનું રક્ષણ કરવા માટે તમે તેમને નમસ્કાર કરવા દીધા નહીં ? આ મારા પ્રશ્નનો ઉત્તર આપ મને કહેવાને યોગ્ય છો. (૩૪) એ સમયે સભામાં બેઠેલાં સર્વ ભક્તજનો સાંભળે તેમ શ્રીહરિએ આનંદસ્વામીને કહ્યું કે, હે મુનિ ! જેમ અક્રૂર શ્રીકૃષ્ણને વિષે ભક્તિવાળા હતા, તેમ રામપ્રતાપ મારા વિષે ભક્તિવાળા છે. (૩૫) અક્રૂર મથુરાથી ગોકુળમાં આવ્યા ત્યારે માર્ગમાં જેમ શ્રીકૃષ્ણને ભક્તિપૂર્વક સંભારતા હતા, તેમ રામપ્રતાપ પણ અયોધ્યાથી અહીં આવ્યા ત્યારે તે રીતે મને સંભારતા સંભારતા અહીં આવ્યા છે. (૩૬) માટે હે મુનિશ્રેષ્ઠ આનંદાનંદ ! શ્રી રામપ્રતાપને મારા વિષે ઓછી ભક્તિ છે એવી શંકા રાખતા નહીં. અને મેં જે રામપ્રતાપજીને પ્રણામ કર્યા, તે તો સદાચારની મર્યાદાનું પાલન કરવા કર્યા છે. (૩૭)

इति वाक्यं प्रभोः श्रुत्वा स महर्षिस्तथाऽपरे। सदःस्थिताः प्रजहृषुर्जनाः प्रापुश्च विस्मयम् ॥३८॥ देशान्तरेभ्यः समुपागतानां तस्मिन् दिने तत्र नरेश! नृणाम् । हरीक्षणानन्दभरेण तेषां मार्गश्रमार्तिस्तु तिरोहिताऽभूत् ॥३९॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे वृत्तालयदोलोत्सवे रामप्रतापादिभगवद्बन्धुजनागमननिरूपणनामैकोनपञ्चाशत्तमोऽध्यायः ॥४९॥

सुव्रत उवाच – पुरे तत्र हरेः पौराः सेवायां नृप ! तत्पराः । बभूवुः सानुगमुनेर्भक्ता दायादयो द्विजाः ॥१॥ यौवनाश्वः सुन्दरश्च जूषस्तक्षा च बादरः । खोडादयः क्षत्रवीरा भक्त्या पर्यचरंश्च तम् ॥२॥ कुबेरो रणछोडस्तं मूलजिद्भयजिन्मुखाः । वैश्या नारायणगिरिर्गोस्वामी च सिषेविरे ॥३॥ रल्लयाता जिते द्वे च मान्या रामादयः स्त्रियः । भक्तास्तत्परिचर्यायां बभूवुस्तत्परास्तदा ॥४॥ अथ प्रीतः स भगवानेकादश्या उपोषणम् । परेद्युरस्तीत्यनुगान्भोजयिष्यञ्जगाद तान् ॥५॥ हे सोम! सूर ! खट्वाङ्ग ! मान्त्रिकालर्क ! मूलजित् ! । सायन्तनाशनं कर्तुमिच्छा चेद्ब्रूत सत्वरम् ॥६॥ एकादश्यस्ति महती श्वो नूनं धात्रिकाभिधा। अन्नानि नैव भक्ष्याणि यत्र नारायणाश्रितैः ॥७॥ इति श्रुत्वा प्रभोर्वाक्यं वीक्षमाणाः परस्परम् । उपवासावश्यकतां विदन्तस्तेऽब्रुवन्निदम् ॥८॥ पार्षदा ऊचुः– स्वामिन्मार्गे लड्डुकादि ग्रामे वै पिप्पलावने । अत्तं तेन क्षुधा सम्यङ्नोदरे विद्यतेऽधुना ॥९॥ तथापि स्वामिनो वाक्यं पालनीयं हि सेवकैः । अत्स्यामस्तेन भगवन्भक्ष्यं किञ्चित्तु साम्प्रतम्॥१०॥ त्वत्प्रसादस्य माहात्म्यमेकादश्यधिकं प्रभो! । जानीमोऽथापि ते प्रीत्यै नैवात्स्यामः परेऽहनि ॥११॥

શ્રીહરિની આવી વાણી સાંભળી, આનંદાનંદ મુનિ અને સભામાં બેઠેલા મુનિ, તથા અન્ય ભકતો અતિશય હર્ષિત થયા અને આશ્ચર્ય પામ્યા. (૩૮)

હે નરેશ ! વૃત્તાલયમાં દેશાન્તરથી આવેલા મનુષ્યોને દશમી તિથિએ શ્રીહરિના દર્શનથી થયેલા આનંદના અતિરેકથી માર્ગના પરિશ્રમનો થાક ભુલાઈ ગયો. (૩૯)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે વૃત્તાલયદોલોત્સવે રામપ્રતાપાદિ ભગવદ્‌બંધુજન આગમનનિરૂપણ નામા એકોનપંચાશત્તમો અધ્યાયઃ (૪૯)*

### અધ્યાય : ૫૦

## શ્રીહરિના પાર્ષદ આદિનું શ્રીહરિના અનુગ્રહથી મહાભોજનના આનંદનું વર્ણન કરેલું છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! વૃત્તાલય નગરમાં પુરનાં ભક્તજનો ખાસ કરીને ડાહ્યાભાઈ તથા વનમાળી વગેરે બ્રાહ્મણો પોતાના મુનિઓ અને પાર્ષદો સહિત શ્રીહરિની સેવામાં તત્પર રહેતા હતા. (૧) જોબન, સુંદર, જીુષો, તખો, બાદર, ખોડાભાઈ વગેરે શ્રેષ્ઠ, વીર ક્ષત્રિયો શ્રીહરિની ભક્તિપૂર્વક સેવા કરતા હતા. (૨) કુબેર, રણછોડ, મૂળજી, ભયજી વગેરે વૈશ્યો, થોભણ, દાદુભાઈ, નરોત્તમ વગેરે વૈશ્યો, અને ગોસ્વામી નારાયણગિરિ એ સર્વે ભક્તો શ્રીહરિને સેવતા હતા. (૩) રળિયાતા, બે જીતા નામની, માન્યા, રમા આદિક અબળાઓ તે સમયે ભક્તિથી ભગવાનની પરિચર્યામાં તત્પર હતી. (૪) પછી પ્રસન્ન થયેલા ભગવાન શ્રીહરિ બીજે દિવસે એકાદશીનો ઉપવાસ છે, માટે પોતાના અનુયાયીઓને આ દિને ક્ષુધા પરિશ્રમને ટાળવા માટે ભોજન કરાવશે એવા થકા પ્રીતિપૂર્વક બોલ્યા : (૫) હે સોમવર્મા!, હે સૂર !, હે ખટ્‌વાંગ !, હે માંત્રિક !, હે અલર્ક !, હે મૂલજી ! સાંજે ભોજન કરવા માટે જો તમારે ઈચ્છા હોય તો તત્કાલ કહો. (૬) આવતી કાલે ધાત્રિકા નામની, આમલકી એકાદશી છે, તે મોટી એકાદશી છે. આ એકાદશીમાં નારાયણના આશ્રિતોએ ભગવાનને નિવેદન કરેલું ભોજન પણ જમવું નહીં. (૭) હે રાજન્ ! આ પ્રમાણે શ્રીહરિની અમૃતવાણી સાંભળીને એકબીજાનાં મુખ સામે જોતાં સોમાદિ પાર્ષદોએ ઉપવાસ અવશ્ય કરવાનો મનમાં નિર્ણય કરીને શ્રીહરિને કહ્યું. (૮) **પાર્ષદો બોલ્યા** : હે સ્વામિન્ ! માર્ગમાં પીપલાવ ગામમાં લાડુ વગેરે જમ્યા છીએ તેથી હાલમાં તો પેટમાં સારી ભૂખ લાગી નથી. (૯) હે ભગવન્ ! તો પણ, અમારે સેવકોએ તમારા વાક્યનું પાલન કરવું જોઈએ, માટે હાલમાં થોડું ભોજન કરીશું. (૧૦) હે પ્રભો, તમારા પ્રસાદીરૂપ અન્નનું માહાત્મ્ય એકાદશીના ઉપવાસથી અધિક જાણીએ છીએ, તો પણ સદ્‌ધર્મના રક્ષક, પ્રવર્તક સાક્ષાત્ તમારી પ્રસન્નતા માટે એકાદશી તિથિમાં પ્રસાદીનું અન્ન પણ જમીશું નહીં. (૧૧)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

श्रुत्वेति वचनं तेषां तदिङ्गितविदीश्वरः । कोऽस्ति पौरजनोऽत्रेति प्रहसन्नुत्थितोऽब्रवीत् ॥१२॥ बद्धाञ्जलिपुटस्तावत्कुबेरः प्राह तं वचः । एष दासोऽस्ति भगवन्नाज्ञा देया यथारुचि ॥१३॥ तमाह भगवान् पाकः कारितोऽस्त्यत्र वा न वा । स प्राह सिद्ध एवास्ति पाकोऽत्र क्षीरिकातले ॥१४॥ गणेशजयरामाद्यैर्विप्रैः सत्वरकारिभिः । प्रचुराज्यसिताः कृत्वा स्थापिताः सन्ति गोलकाः ॥१५॥ ओदनश्चाढकीसूपः क्वथिका वाटिकान्विता । व्यञ्जनानि विचित्राणि कृतानि सन्ति भूरिशः ॥१६॥ तच्छ्रुत्वा वचनं तस्य पाकशालां स सत्वरम् । गत्वा दृष्ट्वा हरिः पाकं चिन्तयामास भूपते ! ॥१७॥ प्रसादमाहात्म्यविदां पत्तीनां त्यागिनां तथा । एतेषां खलु नैतावान् पाकः पर्याप्त ईक्ष्यते ॥१८॥ ततो हरिर्यौवनाश्वं कर्णे प्राह पुराद्द्रुतम् । आनाय्यतां पिण्डकादि भक्ष्यमन्यत् घृतादि च ॥१९॥ तेनाथ प्रेरिताः प्रेष्याः पुरं गत्वैव सत्वरम् । भृत्वा भक्ष्याणि पात्रेषु गृहीत्वा तानि चाययुः ॥२०॥ तावद्भगवतः प्रीत्यै जनाः सूर्यपुरागताः । पर्पिकापिण्डकापूर्णपात्रस्कन्धा उपाययुः ॥२१॥ समयोचितसेवां तां दृष्ट्वा तेषां हसन्हरिः । प्रसन्नः प्रशशंसैव भालचन्द्रमुखांस्तु तान् ॥२२॥ माथुरास्तावदेत्याशु हरेश्चरणयोः पुरः । भीता इवापरिचयाच्चक्रुः पिण्डकपर्वतम् ॥२३॥ ततोऽतिहृष्टः स महामुनीशः सर्वान् समाहूय च पार्षदान्स्वान् । इहासतां भोक्तुमरं भवन्तो यथोचितं पङ्क्तिश इत्युवाच ॥२४॥ उपाविशंस्ते शुचयोऽथ भूत्वा हर्याज्ञया पङ्क्तिश एव सर्वे । तावद्विचिन्त्य प्रभुराजुहाव मुनीनपि स्वाननुगांश्च भोक्तुम् ॥२५॥ हर्याहूत्याऽतिहृष्टा युगपदपहृतस्वासनस्थानकन्था उत्फुल्लाम्भोजवक्त्राः करधृतकरकान्धूनयन्तोऽतिवेगात् । पञ्चार्द्रा भोक्तुमाययुर्हरिवदनदृशः साधुसङ्घा हसन्तो भिक्षापात्राणि हर्षाद्द्रुतपदगमना बिभ्रतस्ते शुचीनि ॥२६॥

હે રાજન્ ! આ પ્રમાણે સોમ આદિ પાર્ષદોનું વચન સાંભળીને પાર્ષદોનો હૃદયગત અભિપ્રાય જાણનારા શ્રીહરિએ હસતાં હસતાં પોતાના આસનથી ઊઠીને કહ્યું કે સભામાં વૃત્તાલયપુરના કોઈ છે ? (૧૨) તે સમયે કુબેરજી બન્ને હાથ જોડી શ્રીહરિને કહેવા લાગ્યા : હે ભગવન્ ! આ તમારો ચરણસેવક છે માટે રુચિ પ્રમાણે આજ્ઞા આપો. (૧૩) હે રાજન્ ! શ્રીહરિએ કુબેરજીને કહ્યું : હે ભક્ત ! આ તમારા પુરમાં રસોઈ તૈયાર છે કે નથી ? તે સમયે કુબેરજી શ્રીહરિને કહેવા લાગ્યા : હે ભગવન્ ! રાયણની નીચે પાકશાળામાં રસોઈ કરનાર ગણેશ, જયરામ, વિજયરામ વગેરે મુખ્ય બ્રાહ્મણો-રસોયાઓએ ઘણા જ ઘીસાકર યુક્ત લાડવા કરી રાખ્યા છે. (૧૪-૧૫) ભાત, તુવેરદાળ, કઢી, ફૂલવડી અને વિવિધ પ્રકારના ઘણાં શાકભાજી તૈયાર કર્યાં છે. (૧૬) હે રાજન્ ! કુબેરજીનું એવું વચન સાંભળીને શ્રીહરિએ તત્કાલ પાકશાળામાં જઈને પોતાના મનમાં વિચાર કર્યો : (૧૭) 'પ્રસાદનું માહાત્મ્ય જાણનારા ભગુજી વગેરે પાર્ષદો તથા મુક્તાનંદ આદિ મુનિઓને આટલી રસોઈ પૂરી થાય તેમ જણાતું નથી'. (૧૮) આ પ્રમાણે મનમાં ચિંતવન કરી શ્રીહરિએ જોબનના કાનમાં કહ્યું કે, હે જોબન ! પાકથી જુદું જ બીજું એવું - પેંડા વગેરે ખાદ્ય પદાર્થો અને ઘી વગેરે પુરમાંથી તત્કાલ લાવો. (૧૯) હે રાજન્ ! જોબનને આ પ્રમાણે કહેવાથી, જોબને પ્રેરણા કરેલા સેવકો તત્કાલ જ પુરમાં જઈને ભોજ્ય પદાર્થો-પેંડા વગેરે ત્રાંબા અને પિત્તળનાં વાસણોમાં ભરી, થાળ માથે લઈ શ્રીહરિની સમીપે આવ્યા. (૨૦) તે સમયે સુરતથી આવેલા ભાલચન્દ્ર વગેરે હરિભક્તો શ્રીનારાયણ મુનિની પ્રસન્નતા માટે, બરફી-પેંડાથી પૂર્ણ ભરેલા થાળ ખભા ઉપર લઈ શ્રીહરિ સમીપે આવ્યા. (૨૧) તેમની પેંડા લાવવાની સમયોચિત સેવા જોઈને ભાલચન્દ્ર વગેરે ભક્તો ઉપર પ્રસન્ન થઈ સેવાને વખાણતા હતા. (૨૨) તે સમયે મથુરાથી આવેલા હરિભક્તો તત્કાલ આવીને, પરિચય ન હોવાથી જાણે કે ભયભીત થયા અને શ્રીહરિ આગળ પર્વત આકારે પેંડા ગોઠવીને ધર્યા. (૨૩) પછી અતિ પ્રસન્ન થયેલા મહામુનિઓના સ્વામી શ્રીહરિએ પોતાના સર્વ પાર્ષદોને બોલાવડાવી, તમો યથાયોગ્ય પંક્તિબદ્ધ જમવા માટે તત્કાલ આ સ્થાને બેસો, એમ કહ્યું. (૨૪) પછી તે સર્વ પાર્ષદો હાથ-પગ-મુખ વગેરે ધોઈને શ્રીહરિની આજ્ઞાથી પંક્તિબદ્ધ બેસી ગયા. તેટલામાં શ્રીહરિએ વિચાર કર્યો કે મુનિઓની પંક્તિ પ્રથમ કરાવવી, તેથી પોતાની સાથે આવેલા અને દેશાન્તરથી આવેલા પોતાના મુનિઓને બોલાવ્યા. (૨૫) શ્રીહરિએ બોલાવાયેલા હોવાથી અત્યંત આનંદિત, પોતાના આસનસ્થાન અને કંથાનો એક સાથે જ ત્યાગ કરનારા, હર્ષથી પ્રફુલ્લિત મુખકમળ જેમનાં છે એવા, પોતાના હાથમાં કમંડળો ધારણ કરેલાં છે એવા, કાષ્ટતુંબીનાં શુદ્ધ ભિક્ષાપાત્રોને ધારી રહેલા, ભગવાનના પ્રસાદમાં અધિક આદરને લીધે તીવ્ર વેગવાળા, ભગવાનના મુખકમલને જોઈ રહેલા એવા મુનિમંડળો હાથ-પગ-મુખ ધોઈ આચમન કરી, જમવા માટે હસતા હસતા આવ્યા. (૨૬)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

तानागतान्प्रणमतो मुकुन्दो हर्यनुज्ञया । यथोचितं यथास्थानमुपावीविशदस्मयः ॥२७॥ ततः सूता मागधाश्च गायका वाद्यवादकाः । निषेदुर्भोक्तुमागत्य बन्दिनश्चाज्ञया हरेः ॥२८॥ दीपानां राजयस्तत्र बभूवुर्हि सहस्रशः । दुर्गाण्यासन्प्रेक्षकाणां भोजकानभितो नृणाम् ॥२९॥ मर्यादयोपविष्टेपु तेषु सर्वेषु पङ्क्तिशः । आज्ञापयामास विभुः परिवेष्टुं द्विजांस्ततः ॥३०॥ दक्षा द्विजा ये शतशः प्रीतये सद्गुरोः प्रभोः । बद्धकच्छाः क्षणेनैव चक्रुस्ते परिवेषणम् ॥३१॥ दत्त्वादौ भोज्यपात्राणि ततस्ते जलगर्गरीः। गृहीत्वा बिभरामासुरुदपात्राणि सत्वरम् ॥३२॥ ततः पङ्क्तिक्रमेणैव यथोचितमसम्भ्रमाः । अन्योन्यास्पृष्टशाकादि परिवेषणमाचरन् ॥३३॥ दृष्ट्वाथ गौर्जरीं रीतिं परिवेषणचातुरीम् । पाश्चात्त्या जहसुः केचित्प्रशशंसुश्च दाक्षिणाः ॥३४॥ व्यञ्जनानि विचित्राणि पर्पीपिण्डकलड्डुकाः । सर्वेषामेव पात्रेषु नाऽऽपुरन्योन्यमिश्रताम् ॥३५॥ सर्वं सर्वेषु पात्रेषु परिवेषितमीश्वरः । विलोक्याज्ञापयामास भोक्तुं सर्वान्निजाश्रितान् ॥३६॥ सुस्वादु भोजनं प्रीत्या कुर्वद्भ्यस्तेभ्य ईश्वरः । लड्डुकान् दापयामास पिण्डकांश्च पुनः पुनः ॥३७॥ तृप्तान् सर्वान् सदन्नैस्तानिच्छतः स्वकरार्पितम् । ज्ञात्वा स्वयं शुचिर्भूत्वा चकार परिवेषणम् ॥३८॥ तृप्तानामपि तेषां तत्प्राप्तं भगवतः करात् । नाभूदरोचकं किञ्चिल्लड्डुकादि मुहुर्मुहुः ॥३९॥ ओदने भुज्यमानेऽथ धारयैव ददद्घृतम् । रुचिं समापयामास तेषां वै भोजने प्रभुः ॥४०॥ तक्रान्तं भोजनमिति वदतः पार्षदानथ । सशर्करं पयोऽपिप्यत्तर्हीङ्गितविदीश्वरः ॥४१॥ निषिच्यमानं हरिणा पयः पात्रेषु धारया । आपूर्य तानि भूमौ च प्रयाति स्म ततस्ततः ॥४२॥ सम्मुखस्थस्य सोमस्य पयःश्वेतास्यदर्शनात् । भृशं जहासालर्कस्तु स्वयं भूयः पयः पिबन् ॥४३॥ पात्रमस्यापतद्भूमावट्टहासं प्रकुर्वतः । अहसत्तेन भगवान्हासयन्नाश्नतोऽखिलान् ॥४४॥

---

ગર્વ રહિત મુકુન્દાનંદ વર્ણીએ ભોજન માટે આવેલા અને શ્રીહરિને પ્રણામ કરતા સાધુઓના સમુદાયોને શ્રીહરિની આજ્ઞાથી યથાયોગ્ય આસને બેસાડ્યા. (૨૭) ત્યારબાદ શ્રી હરિની આજ્ઞાથી સૂત, માગધ, ગાયક, વાદ્ય-વાદક, બન્દીજનો આદિ બીજાઓ પણ આવીને જમવા માટે બેસી ગયા. (૨૮) ત્યાં હજારો દીવાઓ પંક્તિબદ્ધ પ્રકટ્યા હતા જમનારા મુનિઓ વગેરેની ચોતરફ-ભોજન કરતા સંતો તથા તેમની પંક્તિમાં ફરતા શ્રીહરિનાં દર્શન કરતા એવા મનુષ્યોનો સમુદાય ઘાટા કિલ્લાની માફક ગોઠવાયો હતો. (૨૯) સર્વે મુનિઓ વગેરે પંક્તિબદ્ધ મર્યાદાથી બેઠા. પછી શ્રીહરિએ પીરસવા માટે પાચક બ્રાહ્મણોને આજ્ઞા આપી. (૩૦) પીરસવામાં નિપુણ સેંકડો રસોયાઓ કેડ્ય બાંધીને સત્પુરુષોના ગુરુ શ્રીહરિની પ્રસન્નતા માટે ક્ષણમાં જ પીરસતા હતા. (૩૧) તે બ્રાહ્મણો પ્રથમ પતરાવળાં અને પડિયા આપીને પછી જલની ગાગરો ગ્રહણ કરીને કમંડળ વગેરે જળપાત્રો તત્કાળ જળથી ભરી દેતા હતા. (૩૨) આ શાંત સ્વભાવના બ્રાહ્મણો પંક્તિના ક્રમથી યથાયોગ્ય શાકાદિ પીરસતા હતા. (૩૩) પિરસવામાં પ્રવીણ એવી ગુજરાત દેશની રીતિ જોઈને પશ્ચિમ દેશનાં જનો હસતાં હતાં. કેટલાંક દક્ષિણ દેશનાં જનો પ્રશંસા કરતાં હતાં. (૩૪) વિવિધ પ્રકારનાં શાક, બરફી, પેંડા, લાડુ વગેરે તે સર્વેનાં પાત્રોમાં, પરસ્પર એકબીજાને અડકે નહીં, તેમ પીરસતા હતા. (૩૫) શ્રી હરિએ સર્વેનાં પાત્રોમાં સમગ્ર વસ્તુઓ પીરસાઈ ગયેલી જોઈને, પોતાના આશ્રિત સર્વેને જમવાનું શરૂ કરવાની આજ્ઞા આપી. (૩૬) શ્રીહરિ સર્વેને દર્શન આપવા માટે પંક્તિમાં વિચરતા હતા અને અતિ સ્વાદિષ્ટ ભોજન, પ્રીતિએ સહિત, મુનિ વગેરેને લાડુ-પેંડા વારંવાર પિરસાવતા હતા. (૩૭) સ્વાદિષ્ટ ભોજનથી તૃપ્તિ પામેલા તે સર્વે મુનિઓને પોતાના હસ્તથી આપેલા લાડુ વગેરે જમવા ઈચ્છતા જાણી શ્રીહરિ પોતાના હાથ ધોઈ, પોતાના હાથે જ લાડુ પીરસવા લાગ્યા. (૩૮) શ્રીહરિના હાથથી વારંવાર પ્રાપ્ત થયેલા લાડુ વગેરે જમીને મુનિઓ તૃપ્ત થયા. તેમને જરા પણ અરુચિકર તે લાડુ થયા નહીં. (૩૯) પછી ભાત જમવા માટે આરંભ કર્યો ત્યારે શ્રીહરિએ ધારા વડે ઘી પીરસવા માંડ્યું અને ભોજન કરનારાઓને રુચિ પૂર્ણ કરાવી. (૪૦) ‘ભોજનને અંતે છાશ ઉત્તમ’ એમ બોલનારા સોમ આદિ પાર્ષદોને જોઈને, તેમના મતને જાણનારા શ્રીહરિ સાકર યુક્ત દૂધ પિવડાવતા હતા. (૪૧) શ્રી નારાયણ મુનિએ સોમ આદિના પાત્રોમાં ધારથી રેડવા માંડેલું દૂધ પાત્રો છલકાવીને ઉપરથી ઢોળાઈ ભૂમિ પર જતું હતું. (૪૨) પોતાની સન્મુખ બેઠેલા સોમ વર્માનું મુખ દૂધ પીવાથી ધોળું થઈ જવાથી અલૈયો પોતે ફરીથી દૂધ પીતો પીતો અત્યન્ત હસતો હતો. (૪૩) અતિશય હસતા અલૈયાના હાથમાંથી દૂધનું પાત્ર નીચે પડી ગયું તેથી શ્રીહરિ ભોજન કરનારાઓને સર્વને હસાવતા હતા અને પોતે પણ હસતા હતા. (૪૪)

एवमानन्दयन्भक्तान्भोजयामास सोऽनघ ! । सन्तृप्तांस्तांश्च विज्ञाय चक्रे स्वकरशोधनम् ॥४५॥ अन्योन्यस्योपरि जनाः स्वपादस्पर्शकाम्यया । पतिष्यन्तीति तत्स्थानाद्गन्तुमैच्छद्धरिस्ततः ॥४६॥ अथोच्चैस्तान् हरिः प्राह प्रेक्षका भोजकाश्च भो ! । स्वं स्वं स्थानं प्रयाताद्य श्वश्चाऽऽयायात सत्वरम् ॥४७॥ भवन्तः सम्यगश्नन्तु पाचकाः परिवेषकाः । इति चाज्ञापयामास पाचकादीनपि प्रभुः ॥४८॥ इत्यनुज्ञाप्य तान्सर्वान्भक्तकल्पद्रुमः प्रभुः । जय सच्चिदानन्देति प्रोच्य स्वं पीठमाययौ ॥४९॥ सम्यग्भुक्तीक्षणेन प्रमुदितवदनः स्वीयपादाश्रितानां पश्यन्बद्धाञ्जलींस्तानतिमधुरदृशा भक्तनारीनरौघान् । कट्यां दत्तैकपाणिश्चपलतरपदैर्धावितस्वानुयायी बिभ्रद्दोष्णा च वेत्रं हरिरखिलगुरुः पीठमध्यारुरोह ॥५०॥ भुक्त्वाऽऽचान्ताश्च ते सर्वे पार्षदाद्या मुहुर्मुदा । वीक्षमाणा हरिं दूरात्स्वं स्वं स्थानं ययुस्ततः ॥५१॥ उच्चपीठं समासीने तदा योगीश्वरे प्रभौ । जनसङ्घो नृपागच्छद्भृगुकच्छपुराद्द्रुतम् ॥५२॥ प्रणम्य स हरिं भक्त्या मानितस्तेन सादरम् । उपहारानुपानीतानर्पयामास तत्क्षणम् ॥५३॥ विलम्बकारणं पृष्टस्तदानीं हरिणा स च । गन्त्रीभङ्गं महीनद्यामुक्त्वावासाय जग्मिवान् ॥५४॥ तदर्पितानिक्षुदण्डान्सुवर्णकदलानि च । वीक्ष्यामृतफलानीशः स्वपुरस्तादवैक्षत ॥५५॥ स्वस्य पौराणिकं विप्रं दृढाबद्धकटिं स्थितम् । नतांसं मयरामं च नाचिकेतं समैक्षत ॥५६॥ प्रयागजितमाहाथ प्रहसन्भगवान्वचः । अद्याशनेच्छा भवतां वर्तते वा न वा द्विज ! ॥५७॥ प्राहास्ति क्षुदुद्बोधस्तथाप्यध्वश्रमार्दनात् । नाद्य पाकं करिष्यामः स्वप्स्यामः प्राश्य वै पयः ॥५८॥

---

હે રાજન્ ! શ્રીહરિ આ પ્રકારે મુનિ વગેરે ભક્તજનોને આનંદ પમાડતા હતા અને ભોજન કરાવતા હતા. તે ભક્તોને તૃપ્ત થયેલા જાણીને પોતાના હાથની શુદ્ધિ કરી. (૪૫) પોતાના ચરણસ્પર્શ કરવા માટે લોકો ઉપરાઉપરી પડશે, એમ વિચારીને શ્રીહરિ તે સ્થાનથી જવા માટે ઇચ્છતા હતા. (૪૬) શ્રીહરિએ તે જનોને ઉચ્ચ સ્વરથી કહ્યું : હે મારા દર્શનાર્થીઓ ! હે મુનિજનો ! આજે તમે પોતાના સ્થાને જાઓ ! કાલે તત્કાલ આવજો. (૪૭) હે રસોયાઓ, હે પીરસણિયાઓ ! તમે સર્વ સારી રીતે જમી લો : આ રીતે શ્રીહરિએ રસોયાઓને પણ આજ્ઞા આપી. (૪૮) ભક્તજનોના મનોરથ પૂર્ણ કરવામાં કલ્પતરુ સમાન પ્રભુ શ્રીહરિએ આ પ્રકારે સર્વ ભક્તજનોને આજ્ઞા કરી અને પોતે 'જય સચ્ચિદાનંદ' કહીને પોતાના સિંહાસને આવ્યા. (૪૯) એકાંતિક ભાવથી પોતાના ચરણકમળનાં આશ્રિતો મુનિજનો વગેરેએ સારી રીતે ભોજન કર્યું, માટે પ્રભુ રાજી થયા. શ્રીહરિના દર્શન માટે બન્ને હાથ જોડી ઊભા રહેલાં સ્ત્રી-પુરુષોને અતિ અમૃતભરી દૃષ્ટિથી નિહાળતા થકા શ્રીહરિ પોતાની કેડ્ય ઉપર ડાબો હાથ મૂકીને ઉતાવળથી ચાલતા હતા તેથી અનુયાયીઓ પણ દોડતા હતા, જમણા હાથમાં નેતરની સોટી ધારણ કરી હતી : એવા સમગ્ર જનસમૂહના ગુરુ શ્રીનારાયણ મુનિ સિંહાસન ઉપર બેઠા. (૫૦) પાર્ષદો અને મુનિજનો જમીને, ચળુ કરીને શુદ્ધ થયા. સિંહાસનમાં બેઠેલા શ્રીહરિને દૂરથી વારંવાર જોતા જોતા સ્વ-સ્થાને ગયા. (૫૧) હે રાજન્ ! યોગીશ્વર શ્રીહરિ ઊંચા સિંહાસનમાં બેઠા ત્યારે ભરૂચપુરથી હરિભક્તોનો સમૂહ તત્કાલ આવ્યો. (૫૨) તે સંઘનાં જનોએ ભક્તિપુરઃસર શ્રીહરિને પ્રણામ કર્યા. શ્રીહરિએ તેઓનો સત્કાર કર્યો. તેઓ શેરડી અને કેળાનો ઉપહાર લાવેલા, તેનો આદર પૂર્વક શ્રીહરિ પાસે ઢગલો કર્યો. (૫૩) તે સમયે શ્રીહરિએ પૂછ્યું કે, 'કયા કારણે તમોને માર્ગમાં વિલંબ થયો ?' તેના પ્રત્યુત્તરમાં જનસમૂહે કહ્યું કે 'મહી નદીમાં ગાડું ભાંગી ગયું હતું તેથી વિલંબ થયો.' એમ કહીને ઉતારો કરવા માટે ગયા. (૫૪) તેમણે અર્પણ કરેલા શેરડીના સાંઠા, સોનેરી કેળાં તથા જામફળો - ગુજરાત દેશમાં અતિપ્રસિદ્ધ ફળો જોઈને શ્રીહરિ પોતાની આગળ સભામાં બેઠેલા ભક્તોની સામે જોતા હતા. (૫૫) દૃઢ કેડ્ય બાંધી છે એવા અને સભામાં બેઠેલા પ્રયાગજી નામના પુરાણી બ્રાહ્મણને તથા નમેલા ખભાવાળા મયારામ અને નાચિકેત બ્રાહ્મણને પોતાની આગળ જોઈને શ્રીહરિએ હસતા મુખે કહ્યું કે, હે દ્વિજ પ્રયાગજી! તમારે ત્રણને જમવાની ઇચ્છા છે કે નહીં ? પ્રયાગજીએ કહ્યું, પેટમાં ભૂખ તો લાગી છે, તો પણ માર્ગના પરિશ્રમની પીડાથી હાલમાં રસોઈ બનાવીશું નહીં. માત્ર જળ પીને સૂઈ જઈશું. (૫૬-૫૮)

हरिस्तमाहाथ हसन्कदलानि घृतं सिताम् । भवन्तः सम्यगश्नन्तु श्वः कर्तव्यं व्रतं यतः ॥५९॥ इत्युक्तवन्तं तं प्राह स प्रहस्य द्विजोत्तमः । इच्छेयं सफलैवास्तु कृपानाथ ! तवाधुना ॥६०॥ ततो ददौ स भगवांस्तेभ्यस्त्रिभ्योऽपि भूरिशः । रम्भाफलानि पक्वानि शर्करां चातिनिर्मलाम् ॥६१॥ इयतीयतीति गिरा निषेधद्भ्योऽपि पाणिभिः । तेभ्यः पुनः पुनः प्रादात्कदलानि च पर्पिकाम् ॥६२॥ ततश्च दापयामास प्रस्थत्रयमितं घृतम् । पयोभृतां च कलशीं भगवान्ब्राह्मणप्रियः ॥६३॥ दत्तं भगवता सर्वं गृहीत्वा तच्च ते त्रयः । जग्मुः स्वोत्तरणस्थानं भारावनतकन्धराः ॥६४॥ फलानां हरिदत्तानां माधुर्यं ते मुहुर्मुहुः । प्रशंसन्तः फलाहारं चक्रिरे तत्र वाडवाः॥६५॥ सन्तृप्तास्ते ततः प्रोचुस्तुन्दभ्रामितपाणयः । फलाहारः सदैवास्तु मास्तु पाकपरिश्रमः ॥६६। सर्वान् सन्तोषयित्वेत्थं भक्तांस्तत्रागतान्निजान् । अचिकीर्षद्धरिरपि कर्म सायन्तनं स्वकम् ॥६७॥ उत्तीर्य पीठात्करसंज्ञयैव दूरे प्रकुर्वन् जनतां जनेशः । युक्तस्तदा पञ्चषपार्षदैः स्वैर्निवेशनं स्वीयमुपाजगाम ॥६८॥ स्नात्वा विशुद्धे वसने वसित्वा प्रवासधर्मानुसृतो यथावत् । सन्ध्यादि कर्माचरदीश्वरोऽपि वेदोदितं ग्राहयितुं स्वकीयान् ॥६९॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे वृत्तालयदोलोत्सवे भगवत्पार्षदादिभोजनानन्दनिरूपणनामा पञ्चाशत्तमोऽध्यायः ॥५०॥

सुव्रत उवाच – **पुरेऽपि भक्तैः पुरुषैः स्त्रीभिश्च नृप ! तत्कृते । फलाहारस्य सामग्री तदर्हा समसाध्यत ॥१॥ धर्मस्थया**

પછી આ પ્રમાણે કહેતા પ્રયાગજીને શ્રીહરિએ હસતાં હસતાં કહ્યું કે હે વિપ્ર ! આવતી કાલે એકાદશી છે, તેનું વ્રત હોવાથી ઉપવાસ કરવાનો છે માટે તમે ત્રણેય જણ ઘી-કેળાં અને સાકર સારી રીતે જમો. (૫૯) આ પ્રકારે જ્યારે શ્રીહરિએ કહ્યું ત્યારે પ્રયાગજી બ્રાહ્મણે થોડું હસીને કહ્યું : હે કૃપાનાથ ! તમારી ઈચ્છા પ્રમાણે હમણાં જ પ્રસાદ લઈ લેશું. (૬૦) પછી શ્રીહરિએ ઘણું ઘી, પાકેલાં કેળાં તેમજ અતિ નિર્મળ સાકર, તે બ્રાહ્મણોને આપી. (૬૧) 'આટલી ઘણી, આટલું બસ' આવી વાણીથી; હાથના હલાવવાથી, નિષેધ કરતા હતા તો પણ ત્રણેય બ્રાહ્મણોને કેળાં અને બરફી વારંવાર આપતા હતા. (૬૨) પછી બ્રાહ્મણપ્રિય શ્રીહરિ ત્રણ શેર ઘી અને દૂધથી પરિપૂર્ણ પીત્તળનો ઘડો અપાવતા હતા. (૬૩) તે ત્રણ બ્રાહ્મણો શ્રીહરિએ આપેલું, તે સર્વ ગ્રહણ કરી ભારથી ડોક નમાવીને પોતાના નિવાસસ્થાને ગયા. (૬૪) તે બ્રાહ્મણો શ્રીહરિએ આપેલાં ફળોની મધુરતાની વારંવાર પ્રશંસા કરતાં કરતાં પોતાને ઉતારે ફલાહાર કરતા હતા. (૬૫) પછી સારી રીતે તૃપ્ત થયેલા, પોતાના ઉદર ઉપર હાથ ફેરવતા બ્રાહ્મણો 'નિરંતર આવો ફલાહાર થાઓ, રસોઈ કરવાનો પરિશ્રમ ન થાઓ' એમ બોલતા હતા. (૬૬) શ્રીહરિ આ પ્રકારે વૃત્તાલયમાં આવેલા પોતાના ભક્તોને સંતોષ પમાડીને પોતે સાયંકાળમાં ઉચિત સંધ્યા-વંદનાદિ કર્મ કરવા ઈચ્છતા હતા. (૬૭) તે સમયે સમગ્ર લોકના સ્વામી શ્રીહરિ પોતાના સિંહાસનથી ઊતરીને પોતાના હાથની ચેષ્ટાથી જનસમુદાયને દૂર કરતા, પોતાના પાંચ-છ પાર્ષદોએ સહિત, પોતાના નિવાસસ્થાનમાં આવ્યા. (૬૮)

પ્રવાસ ધર્મને અનુસરીને શ્રીહરિ સ્નાન કરી, શુદ્ધ વસ્ત્રો ધારણ કરી, ઈશ્વર હોવા છતાં પણ પોતાના આશ્રિત બ્રાહ્મણોને ગ્રહણ કરાવવા વેદોક્ત સંધ્યાવંદનાદિ વિધિસર આચરતા હતા. (૬૯)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે વૃત્તાલયદોલોત્સવે ભગવત્પાર્ષદાદિભોજનાનંદનિરૂપણનામા પંચાશત્તમોઽધ્યાયઃ (૫૦)*

## અધ્યાય : ૫૧

## ભક્તોને આનંદ આપનારું શ્રીહરિનું સુંદર ફળાહાર લીલાનું ચરિત્ર યથાર્થ વર્ણન કર્યું છે.

**સુવ્રત મનિ બોલ્યા** : હે રાજન્ ! નગરમાં કુબેર આદિ ભક્તો અને માન્યા વગેરે સ્ત્રીભક્તોએ શ્રીહરિ માટે તેમને યોગ્ય ફલાહાર સામગ્રી તૈયાર કરી. (૧)ધર્મનિષ્ઠાવાળાં શ્રીહરિની એકાંતિક ભક્તિવાળાં ગંગા નામનાં બ્રાહ્મણીએ સૂરણ, રતાળુ, બટાકા, વગેરેનું શાક, ઘીથી જ પકવેલું; ખારેકની ખીર, શ્રેષ્ઠ શીગોડાંની પૂરી, શ્વેત પેંડા તથા સુંદર બરફી વગેરે બનાવીને ઉજ્જ્વળ થાળમાં ભરીને, પૂરજનોમાં મુખ્ય, જોબન પગી, કુબેર પટેલ વગેરે ભક્તોને કહ્યું કે, ફલાહાર તૈયાર



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

भक्तया च गङ्गानाम्न्या तु विप्रया । सूरणादि घृतेनैव पच्यते स्म विशोधितम् ॥२॥ खारिकाक्षीरिका चक्रे सच्छृङ्गाटकपूरिकाः। तया च पिण्डकाः शुभ्राः पर्पिका च मनोहरा ॥३॥ कृत्वैतच्चोज्ज्वले पात्रे निधायाह पुरौकसः । मुख्यान्भक्तान्भवन्तोऽत्र हरिमानयतेति सा ॥४॥ यौवनाश्वादिभिरथो एत्य तत्र स चार्थितः । पुरागमाय भुक्त्यर्थं प्रभुस्तान्प्रत्युवाच ह ॥५॥ अत्यन्तजनसम्मर्दे कथं पुरि ममागमः । भवेत्ततोऽत्राऽऽनयत किञ्चिद्भक्ष्यं पयोऽथ वा ॥६॥ ततस्तैः प्रेषितो दूतो गत्वा ताः प्राह योषितः । नायात्यत्र हरिस्तस्माद्भक्ष्यं नयत तत्र वै ॥७॥ आज्ञाकर्योऽथ ताः सर्वा भक्ता मान्यामुखाः स्त्रियः । श्रुत्वा तद्दूतवचनं गङ्गामाहुस्तथैव ताः ॥८॥ नायात्यत्र हरिस्तस्मात् खाद्यं पात्रे निधाय तत् । त्वमायाहि गृहीत्वैव वयं गच्छेम तत्पुरः ॥९॥ धर्मज्ञा सा ततो मार्गे ह्यस्पृश्यस्पर्शशङ्कया । घृतपक्वादि तत्खाद्यं सर्वं पात्रे बभार ह ॥१०॥ पिधायान्येन पात्रेण तद्बध्वा शाणवाससा । करेणैकेन जग्राह द्वितीयेन गलन्तिकाम् ॥११॥ खाद्यपात्रकरा गङ्गा ताश्च नार्यस्ततो ययुः । राजमार्गं विहायैव मार्गेणान्येन सत्वरम् ॥१२॥ पुराद्बहिश्च निर्यान्ति भक्तास्ता यावदुत्सुकाः । तावत्तत्रापि सङ्घातो जनानामभवन्महान् । ॥१३॥ यावत्तास्तत्स्थलादीषत्परावृत्तिं प्रकुर्वते । तावत्कुबेरभक्तेन जनान् दूरयितुं पथि ॥१४॥ प्रेषिता आययुर्वेगाच्छूरा राजभटाः पुरः । करेषु यष्टीर्दधतो दूरदूरेति वादिनः ॥१५॥ पुरःसरैश्च तैः पद्भैरूर्ध्वहस्तैः कृते पथि । चेलुस्ताः शतशो योषा दूरादैक्षन्त च प्रभुम् ॥१६॥ अवाच्यां सोऽपि ता दूराद्दृष्ट्वा वेत्रधरांस्तथा। जहास च विवेदैव खाद्यमानीतमित्यपि ॥१७॥ उपेत्य तास्तं नृप ! भक्तयोषा नत्वा हरिं दूरत एव तस्थुः । तद्भक्ष्यपात्रं पुरतोऽस्य भूमौ धृत्वा ततः सापि ननाम गङ्गा ॥१८॥

થઈ ગયું છે, તો તમો ભગવાનને અહીં તેડી લાવો. (૨-૩-૪) પછી તથાસ્તુ કહીને જોબન પગી વગેરે મુખ્ય ભક્તોએ ભગવાનની સમીપમાં જઈને ફળાહાર નિમિત્તે પુરમાં પધારવાની પ્રાર્થના કરતાં, તેમના પ્રત્યે મહાપ્રભુ શ્રીહરિ એમ બોલ્યા જે, 'જન સમાજની ઘણી ગીર્દીવાળા નગરમાં મારાથી કેમ અવાય ? તો જે કંઈ જમવાનું હોય તે અથવા માત્ર દૂધ જ અહીં લાવો.' (૫-૬) ભગવાનનું આવું વચન સાંભળીને, જોબન પગી વગેરે ભક્તોએ મોકલેલા સેવકે પુરમાં જઈને માન્યા વગેરે સ્ત્રીઓને કહ્યું : 'શ્રી નારાયણ મુનિ અહીંયાં આવશે નહીં, માટે જમવાનું જ ત્યાં લઈ જાઓ.' (૭) પછી શ્રીહરિની આજ્ઞા પાળનારી માન્યા વગેરે સ્ત્રીઓએ સેવકનું આ વચન સાંભળી તેમણે ગંગાને સેવકનો કહેલો, ભગવાનનો સંદેશો કહ્યો. (૮) હે ગંગે ! શ્રીહરિ અહીં આવશે નહિ. માટે ખાવાની ચીજો થાળમાં મૂકીને તે થાળ તમો જ લઈને અમારી સાથે ચાલો. આપણે સર્વ શ્રીહરિની સમીપે જઈએ. (૯) પછી ધર્મને જાણનારી તે ગંગા, માર્ગમાં અસ્પૃશ્યના સ્પર્શની શંકાથી ઘીમાં પકવેલાં સૂરણ વગેરેના તે સર્વ ભોજન એકબીજામાં ભેગાં ન થાય તે પ્રમાણે ચાંદીના થાળમાં ભરતાં હતાં. (૧૦) બીજાં પાત્ર વડે થાળ ઢાંક્યો. શણના વસ્ત્રથી બાંધ્યો, એક હાથે ગ્રહણ કર્યો. બીજા હાથે સુવર્ણની ઝારી ગ્રહણ કરી. (૧૧) ગંગા અને માન્યા વગેરે સ્ત્રીઓ રાજમાર્ગ ત્યજીને બીજા માર્ગે તત્કાલ હાથમાં ખાદ્ય પદાર્થોનો થાળ લઈ ચાલવા લાગ્યાં. (૧૨) ગંગા આદિ સ્ત્રી ભક્તો ફળાહારની લીલા આચરતા શ્રીહરિના દર્શનની ઉત્સાહવાળી થઈને, જ્યારે પૂરમાંથી બહાર નીકળી ત્યારે પુરના બહારના ભાગે ભક્તોની ભીડ થઈ ગઈ. (૧૩) ગંગા આદિ સ્ત્રીઓ જ્યાં તે સ્થળેથી લગારેક પાછું ફરવાનું કરે છે, તેટલામાં કુબેર ભક્તે માર્ગમાં આવતા જતા લોકોને દૂર કરવા શીઘ્ર પ્રેરણા કરી મોકલાવેલા શૂરવીરો, પોતાના હાથથી લાકડીઓ ધારણ કરી લોકોને 'દૂર જાઓ' 'દૂર જાઓ' એમ બોલતા રાજ્યના સિપાહીઓ વેગથી સ્ત્રીઓની આગળ આવ્યા. (૧૪-૧૫) સ્ત્રીઓની આગળ ચાલનારા, ઊંચા હાથવાળા, પગેથી ચાલનારા, રાજ્યના સિપાહીઓએ લોકોને દૂર ખસેડ્યા, ત્યારે માર્ગમાં સેંકડો સ્ત્રીઓ ચાલીને જવા લાગી, જે દૂરથી શ્રીહરિનાં દર્શન કરતી હતી. (૧૬) શ્રીહરિ પણ પોતાના આસનથી, દક્ષિણ દિશામાં દૂરથી સ્ત્રીઓને તથા નેતરની સોટીઓને ધારણ કરનારા રાજ્યના સિપાહીઓને જોઈને હસતા હતા. અને ભોજન અહીં લાવ્યા છે, તે પણ જાણી ગયા હતા. (૧૭) હે રાજન્ ! તે ભક્તા સ્ત્રીઓ શ્રીહરિને પ્રાપ્ત કરી, નમસ્કાર કરી, દૂરથી જ ઊભી રહી. પછી ગંગાએ પણ જે ફલાહાર લાવેલી, તે થાળમાંની સામગ્રી શ્રીહરિ સમીપે પૃથ્વી ઉપર મૂકી નમસ્કાર કર્યા. (૧૮)

सायन्तनं सोऽपि विधिं विधाय प्रक्षिप्य कन्दादिषु सैन्धवं तत् । निवेद्य कृष्णाय च भक्ततुष्ट्यै भोक्तुं स्वयं पूर्वमुखो न्यषीदत् ॥१९॥ पीतं वासो वसानः सिततिलकधरः स्कन्धदत्तोत्तरीयः स्वाङ्गुल्याऽऽस्पृश्य कन्दाद्यपि च तदभिधां पूर्वमापृच्छ्य गङ्गाम् । स्त्रीपुंसैरात्मभक्तैर्मितहसितमुखैरीक्ष्यमाणः स दूराद्ग्रासे ग्रासेऽम्बुपानं विदधदखिलदृग्भूपतेऽभुक्त भूमा ॥२०॥ मधुरांस्तु निजाङ्गुल्या पदार्थानस्पृशत्प्रभुः । सर्वेषां प्रीतये किञ्चिद्बुभुजेऽन्यत्सतांपतिः ॥२१॥ तृप्तोऽस्मीति ततश्चोक्त्वा शिष्टखाद्यममत्रकम् । दासेभ्यो दापयित्वैव जग्राह चुलुकोदकम् ॥२२॥ प्रक्षाल्य हस्तौ च मुखं स्वापस्थानमगात्ततः । स्वं स्वं स्थानं ययुः सर्वे तदा भक्तास्तदीक्षकाः ॥२३॥ क्षणं सुप्त्वाऽथ चोत्थाय पार्षदं प्राह सत्वरम् । अश्वं समानयेतीशः सोऽश्वमप्यानयद्द्रुतम् ॥२४॥ तमारुरोह भगवान्भक्ताभीष्टफलप्रदः । सर्वावासान् द्रष्टुकामः परिमेयपुरःसरः ॥२५॥ दूरदेशेभ्य आयाता मदर्थं हि जना इमे। माभूवन्क्वापि ते स्थाने क्लिष्टा इति ययौ स तान् ॥२६॥ ततो जनानां सर्वेषामावासेषु पृथक् पृथक् । गत्वा तत्स्वास्थ्यमापृच्छ्य न्यूनं यत्तददापयत् ॥२७॥ सविस्मयं जनैः सर्वैः प्रणतोऽभिष्टुतश्च सः । पुनः स्वस्थानमागत्य सुखं सुष्वाप भूपते ! ॥२८॥ भक्तिं परां निरुपधिं पुरमानवानां देशान्तरागतनृणां च मुहुः प्रशंसन् । अग्रे स्वसन्निधिनिविष्टबृहद्व्रतानां निद्रां स किञ्चन दृगग्र उरीचकार ॥२९॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे वृत्तालयदोलोत्सवे भगवतः फलाहारलीलावर्णननामैकपञ्चाशत्तमोऽध्यायः ॥५१॥

---

શ્રીહરિ પણ સાયંકાળનો વિધિ કરી, સૂરણ વગેરે શાકોમાં સીંધાલૂણ નાખીને તે ભોજનને શ્રીકૃષ્ણને નિવેદિત કરી, ભક્તોની પ્રસન્નતા માટે પૂર્વાભિમુખે ભોજન કરવા બેઠા. (૧૯) એ શ્રીહરિ, રેશમી પીતામ્બર ધારણ કરનારા, લલાટમાં ગોપીચંદનનો શ્વેત તિલક ચાંદલો જેમણે કર્યો છે તેવા, ખભા ઉપર રેશમી ઉત્તરીય વસ્ત્ર ધારણ કરી રહેલા,શ્રીહરિના ભોજન ચાતુર્યથી મંદહાસ્યવાળા, પોતાનાં ભક્તજનો સ્ત્રી-પુરુષોએ દર્શન કરેલા, દર્શનાર્થી સમગ્ર જનોને કૃપાથી નિરીક્ષણ કરતા અતિશય શ્રેષ્ઠ ગુણવાળા, શ્રીહરિ પોતાની તર્જની વડે સ્પર્શ કરી કન્દાદિ ભોજનમાં તે તે વસ્તુના નામ પ્રથમ ગંગાને પૂછીને કોળિયે કોળિયે જળપાન કરતાં કરતાં ફલાહાર કરતા હતા. (૨૦) સત્પરુષોના સ્વામી શ્રીહરિ મિષ્ટ પદાર્થો-પેંડા, બરફી વગેરે ભોજ્ય પદાર્થોને પોતાની તર્જની વડે માત્ર સ્પર્શ જ કરતા હતા. બીજુ પોતાના ભક્તોની પ્રસન્નતા માટે શીંગોડાંની પૂરી અને સૂરણ વગેરે થોડું જ જમતા હતા. (૨૧) 'હું તૃપ્ત થયો છું. ' આ પ્રમાણે કહીને શ્રીહરિએ બાકીના ભોજનનું પાત્ર પોતાના પાર્ષદોને અપાવીને ચળું કર્યું. (૨૨) બન્ને હાથ અને મુખનું પ્રક્ષાલન કરી, પછી શયન સ્થાનમાં ગયા, તે સમયે શ્રીહરિનાં દર્શન કરનારા સર્વે ભક્તો પોતપોતાના નિવાસસ્થાનમાં ગયાં. (૨૩) શ્રીહરિએ મુહૂર્ત માત્ર શયન કરીને પછી ઊઠીને ' અશ્વ તુરત લાવો' એમ 'નાન્ના' નામના પાર્ષદને કહ્યું અને તે પાર્ષદ તત્કાલ અશ્વ લાવ્યા. (૨૪) ભક્તોને ઈચ્છિત ફળ આપનાર, શ્રીહરિ સમગ્ર ભક્તોના નિવાસોને જોવા માટે થોડા પાર્ષદોએ સહિત ઘોડા ઉપર બેઠા. (૨૫) આ સર્વ જનો મારાં દર્શન માટે અને મને પ્રસન્ન કરવાની ઈચ્છાથી દૂર દેશથી અહીં આવ્યા છે માટે તે જનો કોઈ પણ નિવાસસ્થાને ક્લેશ પામે નહિ, એવો વિચાર કરી શ્રીહરિ દેશાન્તરનાં જનોનાં નિવાસોમાં ગયા. (૨૬) પછી સર્વે જનોના જુદા જુદા નિવાસોમાં જઈને તે જનોને કોઈ પ્રકારનું દુઃખ તો નથી ને ? એમ પૂછીને જેને જે ચીજની જરૂર હતી, તેને તે અપાવતા હતા. (૨૭) હે રાજન્ ! સમગ્ર દેશાન્તરથી આવેલા જનોએ આશ્ચર્યપૂર્વક નમસ્કાર કરાયેલા અને સ્તુતિ કરાયેલા શ્રીહરિ ફરીથી પોતાના સ્થાનમાં આવીને સૂઈ ગયા. (૨૮) શ્રીહરિ પુરનાં મનુષ્યો અને દેશાન્તરથી આવેલાં જનોની કપટ રહિત સર્વોત્તમ ભક્તિ વિષે, પોતાની સમીપમાં બેઠેલા નૈષ્ઠિક બ્રહ્મચારી મુકુન્દાનંદ આદિ આગળ વારંવાર પ્રશંસા કરતા થકા નેત્રોની આગળ યોગનિદ્રાની સેવાને લગારેક અંગીકાર કરતા હતા. (૨૯)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે વૃત્તાલય દોલોત્સવે ભગવતઃ ફલાહારલીલાવર્ણન નામૈકપંચાશત્તમોऽધ્યાયઃ (૫૧)*

सुव्रत उवाच - **अथ निशोऽन्तिमयाम उपागते निपुणबन्दिजनैः समुदीरिताम् । मधुरमङ्गलगीततर्तिं प्रभुर्द्रुतमबोधि निशम्य स भूपते! ॥१॥ कृतदृढासन आत्मनि चात्मना निजमलौकिकमक्षरतः परम् । अचलरूपमसौ पुरुषोत्तमा-भिधमचिन्तयदेकमखण्डितम् ॥२॥ स च ततः कृतशौचविधिः प्रभुर्झटिति भक्तजनाहृतवारिभिः । शुचितरैः स्नपनं विदधे ततः परिदधौ शुचिनी सितवाससी ॥३॥ समुपविश्य कुशासन उत्तमे तिलकमूर्ध्वमसावकरोत्ततः । प्रथममेव चकार च नैत्यकं विधिमशेषजगद्गुरुरीश्वरः ॥४॥ अथ तस्मिन् दिने चक्रे श्रीकृष्णस्य महार्चनम् । एकादशीषु सर्वासु क्रियते तेन यत्सदा ॥५॥ आहूता ब्राह्मणास्तेन तत्राजग्मुश्च वैदिकाः । शास्त्रोक्तलक्षणैर्युक्ताः पूजाविधिविशारदाः ॥६॥ तं पूजां कारयामासुर्ब्राह्मणास्ते यथाविधि । जानन्तो धर्मर्यादास्थापनार्थां हरेः कृतिम् ॥७॥ मण्डलं सर्वतोभद्रं नानारङ्गोपशोभितम् । कृत्वा तन्मध्यभागे च हैमं कलशमादधुः ॥८॥ पञ्चपल्लवसंयुक्तं सूक्ष्मवस्त्राभिवेष्टितम् । तस्योपरि शुभे पात्रे रम्यास्तरणमण्डिते ॥९॥ शोभनां प्रतिमां हैमीं श्रीकृष्णस्य मनोहराम् । प्राणप्रतिष्ठां कृत्वैव स्थापयामासुरादरात् ॥१०॥ तदङ्गदेवताश्चान्याः पार्षदांश्च यथादिशम् । स्थापयामासुरव्यग्रास्तन्त्रोक्तविधिना द्विजाः ॥११॥ पूजाद्रव्याणि चाहृत्य स्वसमीपेऽखिलानि ते । पूजामकारयन्विप्रा मन्त्रैर्वैदिकतान्त्रिकैः ॥१२॥ नारायणेन मुनिना कुर्वता धर्मपोषणम् । पूजायां क्रियमाणायामानन्दो भुव्यजायत ॥१३॥ वीणावेणुमृदङ्गाश्च शङ्खदुन्दुभयस्तथा । नानाविधानि वाद्यानि तत्रावाद्यन्त वै मुहुः ॥१४॥ तावत्सहस्रशस्तत्र हरेर्भक्ता हि योषितः । इतस्ततः समाजग्मुः पुरुषाश्च सहस्रशः ॥१५॥**

## અધ્યાય : ૫૨

## એકાદશીને દિવસે ભગવાન શ્રીહરિએ કરેલો શ્રીકૃષ્ણની મહાપૂજાનો મહોત્સવ, ભક્તની શિક્ષાને માટે વર્ણવ્યો છે.

**સુવ્રત મુનિ બોલ્યા** : હે ભૂપતે ! પછી રાત્રિના બ્રાહ્મમુહૂર્ત પ્રાપ્ત થયું ત્યારે ગીત-વાજિંત્રમાં કુશળ બન્દીજનોએ સ્પષ્ટ ઉચ્ચારણ કરાયેલી મધુર-શ્રવણપ્રિય માંગલિક ગીતોની પંક્તિ ગાઈને શ્રીહરિને જગાડ્યા. (૧) શ્રીહરિ પોતાના પલંગમાં જ દૃઢ પદ્માસન કરીને અલૌકિક, સર્વથી પર, અક્ષરબ્રહ્મથી પર, પુરુષોત્તમ સંજ્ઞાવાળું, અદ્વિતીય, અચ્યુત, પોતાનું અનાદિ સિદ્ધ સ્વરૂપ પોતાના અંતઃકરણમાં, પોતાની બુદ્ધિથી ચિન્તવન કરતા હતા. (૨) પછી શૌચવિધિ કરીને શ્રીહરિએ તત્કાલ અતિપવિત્ર, અતિસુંદર, પોતાના ભક્તો વડે લવાયેલા જળથી સ્નાન કર્યું અને પવિત્ર શ્વેત વસ્ત્રો પોતાના શરીર ઉપર ધારણ કર્યાં. (૩) સમગ્ર જગતના ગુરુ, મહા શક્તિશાળી શ્રીહરિએ શ્રેષ્ઠ દર્ભાસનમાં બેસીને ચાંદલાએ સહિત ઊર્ધ્વપુંડ્ર તિલક કર્યું, પછી પ્રાતઃસન્ધ્યાદિ નિત્ય વિધિ પ્રથમ કરી. (૪) પછી શ્રીહરિએ સર્વ એકાદશીઓમાં જે શ્રીકૃષ્ણનું મહાપૂજન સદા કરાય છે, તે મહાપૂજન ફાગણ સુદી એકાદશીના દિવસે કર્યું. (૫) શ્રીહરિએ બોલાવેલા બ્રાહ્મણો શ્રીહરિ સમીપે આવ્યા. તે બ્રાહ્મણો વેદને જાણનારા, શાસ્ત્રમાં કહેલાં શમદમાદિ બાર લક્ષણો યુક્ત, પૂજાવિધિમાં વિશારદ હરિશર્મા આદિ બ્રાહ્મણો હતા. (૬) શ્રીનારાયણ મુનિ પાસે આવેલા આ વિપ્રો ધર્મ મર્યાદા સ્થાપન માટે પ્રકટ થયેલા ભગવાનની આ બધી (વિધિ પ્રમાણે પૂજાદિક) કૃતિ, પૂજા વિધાનની પ્રવૃત્તિ માટે છે, એમ જાણીને શ્રીહરિ પાસે યથાવિધિ પૂજા કરાવતા હતા. (૭) તે બ્રાહ્મણોએ લાલ-પીળો-નીલ આદિ વિવિધ રંગોથી સુશોભિત સર્વતોભદ્ર મંડલ કરીને તેના મધ્ય ભાગમાં પંચ પલ્લવ યુક્ત, સૂક્ષ્મ વસ્ત્રે વીંટેલા, સુવર્ણ કળશને સ્થાપન કરીને તેની ઉપર સ્થાપેલા રમણીય આચ્છાદન વસ્ત્રથી સુશોભિત શુભ પાત્રમાં શ્રીકૃષ્ણની શોભાયમાન, સુવર્ણમયી, મનોહર પ્રતિમા સ્થાપન કરીને, પ્રાણ પ્રતિષ્ઠા કરીને, તેની પૂજા કરાવવાનો આરંભ કર્યો. (૮-૯-૧૦) શાંત ચિત્તવાળા બ્રાહ્મણો, બીજા કેશવાદિ અંગ દેવતા અને નંદ સુનંદાદિ પાર્ષદોની દિશાઓ પ્રમાણે તંત્રોક્ત વિધિથી સ્થાપના કરતા હતા. (૧૧) સમગ્ર પૂજાનાં દ્રવ્યો-ચન્દનાદિ-પોતાની સમીપે લાવીને તે બ્રાહ્મણો વૈદિક અને તાંત્રિક મંત્રોથી પૂજા કરાવતા હતા. (૧૨) સદ્ધર્મની પુષ્ટિ કરતા શ્રીહરિએ પૂજા કરાતી હતી તે સમયે પૃથ્વીમાં આનંદ ઉત્પન્ન થયો. (૧૩) વીણા, વાંસળી, મૃદંગ, શંખ, નગારાં અને વિવિધ પ્રકારનાં વાદ્યો તે સમયે વારંવાર વાગતાં હતાં. (૧૪) તે સમયે શ્રીહરિનાં હજારો સ્ત્રી-ભક્તો તથા હજારો પુરુષ ભક્તો ચોતરફથી શ્રીહરિની સમીપે આવ્યાં. (૧૫)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**सर्वे मङ्गलगीतानि तदाऽगायन्मुदा भृशम् । वेदघोषं द्विजाश्चक्रुरुच्चैः सस्वरमुत्सुकाः ॥१६॥ ब्राह्मणोक्तक्रमेणैव चकाराभ्यर्चनं प्रभोः । उपचारैः षोडशभिर्हरिरावाहनादिभिः ॥१७॥ पञ्चामृतेन संस्नाप्य श्रीकृष्णं पयआदिना । चक्रेऽभिषेकं शुद्धोदैर्महापुरुषविद्यया ॥१८॥ अमूल्यवस्त्राभरणैः पूजयामास तं स च । सुगन्धिना चन्दनेन पुष्पहारैर्मनोहरैः ॥१९॥ दत्त्वा दशाङ्गं धूपं च दीपांश्च शतशो हरिः । नैवेद्यमर्पयामास विविधं सुमनोहरम् ॥२०॥ ततश्च मध्ये पानीयमुत्तरापोशनं तथा । दत्त्वा ताम्बूलपूगादि चक्रे नीराजनं प्रभोः ॥२१॥ दत्त्वा पुष्पाञ्जलिं भक्त्या नत्वा साष्टाङ्गमादरात् । अर्थयित्वा हरिस्तं च पूजां तामसमापयत् ॥२२॥ पूजां समाप्य विधिवन्नित्यदानं विधाय च । ब्राह्मणान् पूजयामास सर्वांस्तत्र समागतान् ॥२३॥ धेनूनां च शतं प्रादात्ततः स्वर्णं तिलांस्तथा । शतशो रूप्यमुद्राश्च ब्राह्मणेभ्यो ददौ प्रभुः ॥२४॥ नानाविधानि वसनानि विभूषणानि दत्त्वा ततः सकलभक्तजनेभ्य ईक्षाम् । दातुं निजं स्ववसतेर्बहिरेत्य पीठमुच्चं समारुहदुदारयशाः स भूप ! ॥२५॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे वृत्तालयदोलोत्सवे भगवत्कृतश्रीकृष्णमहापूजोत्सवनिरूपणनामा द्विपञ्चाशत्तमोऽध्यायः ॥५२॥

सुव्रत उवाच – **तदा जय जयेत्येवं सर्वत्रैकोऽभवद्ध्वनिः । साष्टाङ्गं प्रणिपत्यादौ चक्रुस्तद्दर्शनं जनाः ॥१॥ मुहूर्तमेवं सर्वेभ्यो दत्त्वा दर्शनमात्मनः । तांश्चोपवेशयामास हरिः स्थापनमुद्रया ॥२॥ यथोचितं च ते तत्र निषेदुः सकला जनाः । स्त्रियश्च मुनयः सर्वे वीक्षमाणाः प्रभोर्मुखम् ॥३॥ तत्र ज्ञानतपोवृद्धा मुनयस्त्वग्रतो हरेः । तेषां च पृष्ठतः सर्वे निषेदुर्मुनयोऽपरे ॥४॥**

તે સમયે સર્વ હરિભક્તો હર્ષથી મંગલ ગીતો ગાતા હતા. અને બ્રાહ્મણો ઉત્સાહે સહિત પોતપોતાના વેદનાં સ્વરો સહિત મંત્રોના ઉચ્ચારણોનો ધ્વનિ, ઉચ્ચ સ્વરે કરતા હતા. (૧૬) શ્રી નારાયણ મુનિ, બ્રાહ્મણોએ કહેલા અનુક્રમથી આહ્‌વાન આદિ ષોડશોપચારોથી શ્રીકૃષ્ણનું પૂજન કરતા હતા. (૧૭) દૂધ વગેરે પંચામૃતથી શ્રીકૃષ્ણને સ્નાન કરાવી, મહાપુરુષ વિદ્યા - **'જિતં તે પુંડરિકાક્ષ'** ઈત્યાદિ સ્તોત્રથી શુદ્ધોદકથી અભિષેક કરતા હતા. (૧૮) શ્રીનારાયણ મુનિ અમૂલ્ય વસ્ત્રો તથા આભૂષણો, સુંગધિમાન ચન્દન અને મનોહર પુષ્પોના હારોથી શ્રીકૃષ્ણને પૂજતા હતા. (૧૯) પછી શ્રીહરિ દશાંગ ધૂપ સમર્પણ કરી અને હજારો દીવાઓ અર્પણ કરીને ઘણા પ્રકારે અત્યન્ત મનોહર નૈવેદ્ય અર્પણ કરતા હતા. (૨૦) વિધિની વચમાં અને અંતે જળપાન, સોપારી, લવિંગ, જાવંત્રીથી યુક્ત પાનબીડી રૂપ મુખવાસ આપી શ્રીકૃષ્ણની આરતી કરતા હતા. (૨૧) શ્રીહરિ પુષ્પાંજલિ આપી, ભક્તિ પૂર્વક સાષ્ટાંગ નમસ્કાર કરી, શ્રીકૃષ્ણની પ્રાર્થના કરી, પૂજાની સમાપ્તિ કરાવતા હતા. (૨૨) વળી શ્રીહરિએ પૂજાને સમાપ્ત કરી અને વિધિ પ્રમાણે નિત્ય દાન કરીને પોતે કરેલી પૂજાના સ્થાનમાં આવેલા સર્વ બ્રાહ્મણોની પૂજા કરી. (૨૩) પછી શ્રીહરિએ સુલક્ષણા એવી સો ગાયો, સુવર્ણ અને તલ, બ્રાહ્મણોને આપ્યા તથા બ્રાહ્મણોને સો એ સો રૂપામુદ્રાઓ આપી. (૨૪)

હે રાજન્ ! મહાકીર્તિવાળા શ્રીહરિ નાના પ્રકારનાં વસ્ત્રો અને આભૂષણો બ્રાહ્મણોને આપીને પછી સમગ્ર જનોને પોતાનાં દર્શન આપવા માટે, પોતાના નિવાસ સ્થાનથી બહાર આવીને પોતાના ઉચ્ચ સિંહાસનમાં બેઠા. (૨૫)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે વૃત્તાલયદોલોત્સવે ભગવત્કૃતશ્રીકૃષ્ણ મહાપૂજોત્સવનિરૂપણ નામા દ્વિપંચાશત્તમોऽધ્યાયઃ (૫૨)*

## અધ્યાય : ૫૩

## ગુજરાત દેશનાં ભક્તજનોએ સભામાં બેઠેલા શ્રીહરિનું પૂજન કર્યું તેનું સારી રીતે નિરૂપણ કર્યું છે.

**સુવ્રત મુનિ બોલ્યા :** હે રાજન્ ! તે સમયે સર્વ દિશાઓમાં 'જય જય' એવો ધ્વનિ થયો. આવેલા સર્વ હરિભક્તો પ્રથમ સાષ્ટાંગ પ્રણામ કરી શ્રીહરિનાં દર્શન કરતા હતા. (૧) શ્રીહરિ ઊભાં રહેલાં સર્વ જનોને પોતાનાં દર્શન મુહૂર્ત માત્ર આપીને તે સર્વેને સ્થાપન મુદ્રાથી (બેસી જવાના સંકેતથી) બેસાડતા હતા. (૨) તે સર્વ જનો અને મુનિઓ, સ્ત્રીઓ વગેરે દર્શન કરવા શ્રીહરિની સન્મુખ યથાયોગ્ય બેઠાં. (૩) તે સર્વ જનોમાં જ્ઞાન અને તપથી શ્રેષ્ઠ મુનિઓ તો શ્રીહરિની સમીપમાં દક્ષિણ ભાગમાં બેઠાં. બીજા સર્વે મુનિઓ તેમની પાછળ બેઠા. (૪)

गृहस्था लक्षशस्तांश्च संवेष्ट्यैवार्धचन्द्रवत् । निषेदुर्दक्षिणे भागे सम्मुखाश्च हरेर्नृप! ॥५॥ अग्रे वृद्धाश्च तत्रापि युवानो मध्यदेशगाः । पृष्ठतश्च किशोराद्यास्तस्थुर्मर्यादयाऽखिलाः ॥६॥ पुरतो वामभागे च हरेः सङ्घास्तु योषिताम् । निषेदुरस्पृशन्तो नॄन्समेता अर्धचन्द्रवत् ॥७॥ तस्थुर्मर्यादया तत्र योषास्ता अपि सर्वशः । पार्षदाः सोममुख्याश्च पार्श्वयोस्तस्थुरीशितुः ॥८॥ स्त्रीपुंसानां मध्यभागे हरिपूजनयायिनाम् । धनुःप्रमाणविततं वर्त्माकार्यत दण्डवत् ॥९॥ मुनिभिश्च जनैः सर्वैर्मानितौ तावुभावथ। रामप्रतापेच्छारामौ हरेरग्रे निषेदतुः ॥१०॥ सानन्दमेवं सर्वेषु निषण्णेष्वथ गायकाः । मुनयः स्वस्ववीणादिवाद्यानि समसज्जयन् ॥११॥ विपञ्चिका मृदङ्गांश्च कांस्यतालान्सझर्झरान् । सज्जीकृत्य स्वरालापं कृत्वा गायनमाचरन् ॥१२॥ मुहूर्तं तेषु गायत्सु भगवान्सर्वदर्शनः । देशान्तरीयानद्राक्षीत् सज्जवाद्यान् स गायकान् ॥१३॥ ततो मुनीननुज्ञाप्य गातुं तान्प्रैरयत्प्रभुः । तेषां गायनचातुर्यं ज्ञात्वा तानत्यमानयत् ॥१४॥ सज्जतासादिवाद्यां च दृष्ट्वाऽथो वादकावलिम् । गायकान्विरमय्यैव प्रैरयन्स करेण ताम् ॥१५॥ अत्युत्सुकाश्च ते सर्वे स्वस्ववाद्यान्यवादयन् । तद्धस्तलाघवं दृष्ट्वा प्रशशंस च तान् स्वयम् ॥१६॥ वस्त्राणि च ददौ तेभ्यः सन्तुष्टो भगवांस्तदा । उत्थाय स ततोऽपश्यत् सर्वां जनमयीं भुवम् ॥१७॥ पूजोपहारपात्राणि धृत्वा तान्समवस्थितान् । अज्ञासीत्पूजनं स्वस्य कर्तुमत्युत्सुकाञ्जनान् ॥१८॥ तेषां मनोरथं पूर्णं कर्तुं भक्तप्रियः स च । मेघगम्भीरया वाचा तानुवाच दयानिधिः ॥१९॥ एकैकग्रामलोका ये ते संहत्य परस्परम् । पृथक्पृथगिहायान्तु यूथशः सत्वरं जनाः!॥२०॥ पूजने दीर्घसूत्रित्वं न कार्यं चात्र केनचित् । आगन्तव्यं गते यूथे ह्येकस्मिन्नपरेण च ॥२१॥

હે રાજન્ ! લાખો હરિભક્તો તે મુનિઓને અર્ધચન્દ્રની માફક વીંટાઈને શ્રીહરિની સન્મુખ જમણે ભાગે બેઠા. (૫) તે ગૃહસ્થોમાં પણ વૃદ્ધ પુરુષો આગળ, યુવાનો વચમાં અને કિશોરો વગેરે જુવાનોની પાછળ - આ પ્રકારની મર્યાદાથી સમગ્ર ગૃહસ્થો પણ બેઠા. (૬) શ્રીહરિનાં દર્શન માટે ભેગા થયેલા સ્ત્રીઓના સમુદાયો પુરુષોને સ્પર્શ ન થાય તે રીતે, શ્રીહરિ સમીપે ડાબે પડખે અર્ધ ચંદ્ર માફક બેઠા. (૭) સમગ્ર સ્ત્રીઓ પણ શ્રીહરિની સમીપમાં પહેલાં વૃદ્ધા પછી યુવતિઓ અને પછી કિશોરીઓ વગેરે મર્યાદાથી બેઠી.સોમવર્મા આદિક પાર્ષદો શ્રીહરિની પાછળ બંને બાજુ ઊભા રહ્યા. (૮) સ્ત્રીઓ અને પુરુષોના મધ્ય ભાગમાં શ્રીહરિની પૂજા કરવા માટે આવતાં જનોને માટે ચાર હાથ પહોળો અને દંડાકાર લાંબો માર્ગ શ્રીહરિએ કરાવ્યો. (૯) પછી રામપ્રતાપ અને ઈચ્છારામ બન્ને ભાઈઓ તે મુક્તાનંદ આદિ સાધુઓ તથા મયારામ ભટ્ટ આદિ- સર્વ સત્સંગીઓ વડે સત્કાર પામી શ્રીહરિની આગળ સમીપે બેઠા. (૧૦) આ પ્રકારે આનંદપૂર્વક સર્વ જનો બેઠા ત્યારે, ગવૈયા પ્રેમાનંદ આદિ જેમાં છે એવું સાધુ મંડળ - દેવાનંદ, મુક્તાનંદ, વિજ્ઞાનાનંદ આદિ સાધુઓ પોતપોતાનાં વાદ્યોને સ્વરોની સાથે મેળવણી કરી તૈયાર કરતા હતા. (૧૧) વીણા, મૃદંગ, કાંસીજોડાં તૈયાર કરી, સ્વર આલાપ કરી, મુક્તાનંદ આદિ મુનિઓએ રચેલાં ભક્તિ પ્રધાન કીર્તનો ગાવા લાગ્યા. (૧૨) મુનિઓએ બે ઘડી સુધી ગાયન કર્યું ત્યારે, સર્વના અભિપ્રાય જાણનારા શ્રીહરિએ પોતાપોતાના સજ્જ કરી રહેલાં વાજિંત્રોવાળા-દેશાન્તરથી આવેલા ગવૈયાઓને જોયા. (૧૩) પછી શ્રીહરિએ પ્રેમાનંદ આદિ સાધુઓને (તમો એક મુહૂર્ત વિશ્રામ કરો) - એવી આજ્ઞા આપીને દેશાન્તરના ગવૈયાઓને ગાવા માટે પ્રેરણા કરી. તે ગવૈયાઓનું ગાયનચાતુર્ય જાણીને, તે ગાયકોને શ્રીહરિ મધુર વાણીથી અત્યંત સત્કારતા હતા. (૧૪) પછી શ્રીહરિએ સજ્જ કરેલાં તાસાંદિ વાદ્યો વગાડનારાની મંડળી જોઈને, ગાયકજનોને વિશ્રામ કરવાની હસ્ત વડે સંકેત કરી આજ્ઞા આપી. (૧૫) તે સર્વે તાસાં આદિ વાદ્યો વગાડનારા અતિ ઉત્સાહે સહિત પોતપોતાનાં વાદ્યો વગાડતા હતા. વાદ્યો વગાડવામાં હાથની ચપળતા જોઈને સ્વયં શ્રીહરિએ વાદકોની પ્રશંસા કરી. (૧૬) તે સમયે ભગવાન શ્રીહરિએ તેમના ઉપર પ્રેમે સહિત વાદનચાતુર્યથી પ્રસન્ન થઈને, વગાડનારાઓને પોતાના અંગ ઉપર ધારણ કરેલાં મહાવસ્ત્રો આપ્યાં. પછી પોતાના સિંહાસનમાં જ ઊભા થઈને, સર્વ પૃથ્વી ઘણા મનુષ્યોવાળી જોઈ. (૧૭) પૂજાની સામગ્રીનાં પાત્રો પોતપોતાના હાથોમાં ધારણ કરી ઊભેલાં જનોને પોતાનું પૂજન કરવા માટે અતિ ઉત્સાહવાળા છે એમ શ્રીહરિ જાણતા હતા. (૧૮) ભક્તોને પ્રિય દયાસાગર શ્રીહરિએ તે જનોના મનોરથ પૂર્ણ કરવા માટે, મેઘની માફક ગંભીર વાણીથી તે લોકોને કહ્યું : (૧૯) હે ભક્તજનો ! એક એક ગામના લોકો પરસ્પર ભેગા થઈને, સમુદાયથી જુદા જુદા તત્કાલ મારી સમીપે આવો. (૨૦) કોઈ પણ માણસે મારા પૂજનમાં બહુ વાર લગાડવી નહીં. એક સંઘ જાય, ત્યારે બીજા સંઘે આવવું. (૨૧)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच-**प्रभो! तथा करिष्याम इत्याज्ञां शिरसा हरेः । गृहीत्वा ते जनाश्चक्रुस्ततो भगवदर्चनम् ॥२२॥ तत्रादौ गौर्जरा लोका ह्यल्पसत्त्वाः पृथक् पृथक् । कोलाहलं प्रकुर्वन्तो यूथशस्तत्र चाययुः ॥२३॥ ददुर्भगवते तस्मै वस्त्राणि रुचिराणि ते । चन्दनैः पुष्पहारैश्च पूजयामासुरादृताः ॥२४॥ अलङ्कारांश्च विविधान्सौवर्णान्मणिमण्डितान् । अर्पयित्वोपहारांश्च तदग्रे निदधुस्ततः ॥२५॥ अतीव जल्पतस्तांश्च तर्जन्या नसि दत्तया । न्यवारयत्स भगवान् पूजान्ते च व्यसर्जयत् ॥२६॥ तैः कृताः पीतसाराणां पिण्डकानां च राशयः । फलानां विविधानां च विरेजुर्गिरिसानुवत् ॥२७॥ तद्देशीया योषितश्च फलपुष्पादिपाणयः । हरेः पूजां विधायाशु जग्मुः स्नेहाधिका हरौ ॥२८॥ निरपेक्षोऽपि भगवान्भक्तानामेव तुष्टये । भूषणादीनि कृपया स्वीचकार सतां प्रियः ॥२९॥ भक्तोपनीतान् पृथुकञ्चुकादीन् नीहारचन्द्राभिधतुन्नवायः । सेवारतोऽस्यैव विधाय सद्यस्तद्धारणार्हांस्तमधारयच्च॥३०॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे वृत्तालयदोलोत्सवे गुर्जरदेशस्थभक्तकृतभगवत्पूजननिरूपणनामा त्रिपञ्चाशत्तमोऽध्यायः ॥५३॥

सुव्रत उवाच – **प्राच्योदीच्यास्ततो लोका नृपाजग्मुर्हरेः पुरः । महाबलाः प्रौढदेहा दीर्घनेत्रा महाभुजाः ॥१॥ अमूल्यानि च वस्त्राणि पुष्पहारान्मनःप्रियान् । सहस्रशो मौक्तिकानां स्रजस्ते च समार्पयन् ॥२॥ तथाविधाः स्त्रियस्तेषां धृत्वा पात्राणि पाणिषु । प्रभुं पुपूजुरागत्य भृतानि शर्करादिभिः ॥३॥**

---

હે રાજન્ ! ત્યાર પછી તે જનો, 'હે પ્રભો ! તમારા કહ્યા પ્રમાણે જ કરીશું.' આ પ્રકારે શ્રી સ્વામિનારાયણ ભગવાનની આજ્ઞા મસ્તકે ગ્રહણ કરી શ્રી હરિનું પૂજન કરતા હતા. (૨૨) તે જનોમાં અલ્પ બળવાળાં ગુજરાત દેશનાં જનો પ્રથમ કોલાહલ કરતાં કરતાં એક એક ગામના નિવાસી સમુદાયપૂર્વક ભેગા થઈ જુદા જુદા સંઘથી શ્રીહરિની સમીપે આવ્યાં. (૨૩) ગુજરાતી જનોએ અતિ આદરથી સુંદર વસ્ત્રો ભગવાન શ્રીહરિને અર્પણ કર્યાં અને ચંદન પુષ્પના હારથી પૂજન કર્યું. (૨૪) સુવર્ણનાં વિવિધ પ્રકારનાં મણિઓથી જડેલાં અલંકારોને અર્પણ કરી, પછી શ્રી હરિની આગળ ભેટો મૂકી. (૨૫) ભગવાન શ્રીહરિ અત્યંત કોલાહલ કરતાં તે જનોને નાસિકાના અગ્રભાગમાં, તર્જની આંગળી મૂકીને નિવારણ કરતા હતા. અને પૂજાને અંતે, અનુગ્રહ કરવાપૂર્વક દૂરપ્રદેશમાં જવા માટે આજ્ઞા આપતા હતા. (૨૬) ગુજરાતનાં પૂજક જનોએ શ્રીહરિની આગળ અર્પણ કરેલાં પતાસાં, પેંડા અને વિવિધ પ્રકારનાં ફળોના ઢગલાઓ પર્વતના શિખરની માફક (ગોઠવીને ધરેલાં) શોભતા હતા. (૨૭) જામફળ વગેરે ફળો, મોગરાનાં પુષ્પો, તેના હાર વગેરે વસ્ત્રાભૂષણો ધારણ કરેલી સ્ત્રીઓ, શ્રીહરિમાં અધિક સ્નેહવાળી ગુજરાતણો, શ્રીહરિનું પૂજન કરી તત્કાલ જ જતી રહી. (૨૮) સત્પુરુષોના સ્વામી ભગવાન શ્રીહરિ પૂર્ણકામ હોવાથી, વસ્તુ માત્રની સ્પૃહાએ રહિત છે, તોપણ ભક્તોની પ્રસન્નતા માટે જ તેમના ઉપર દયા કરી, અલંકારો વગેરે ભેટ સ્વીકારતા હતા. (૨૯)

શ્રીહરિની સેવામાં પ્રીતિવાળા નિહારચન્દ્ર નામના દરજી, ભક્તજનોએ પોતાની બુદ્ધિ પ્રમાણે-નિર્ધારેલા માપથી સીલાઈ કરીને લાવેલા વિશાળ જામો-(અંગરખું) વગેરે, શ્રીહરિને પહેરવા-યોગ્ય બને તેમ સીવીને તત્કાળ શ્રીહરિને પહેરાવતા હતા. (૩૦)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણ ચરિત્રે, ધર્મશાસ્ત્રે તૃતીય પ્રકરણે વૃત્તાલયદોલોત્સવે ગુર્જરદેશસ્થ ભક્તકૃત ભગવત્પૂજન નિરૂપણ નામા ત્રિપંચાશત્તમો અધ્યાયઃ (૫૩)*

## અધ્યાય : ૫૪

## સમગ્ર ભક્ત - સમૂહોએ શ્રીહરિનું નાના પ્રકારના ઉપચારોથી પૂજન કર્યું, તેનું શ્રેષ્ઠ નિરૂપણ છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! પછી અતિશય શારીરિક બળવાળા, પ્રૌઢ શરીરવાળા, લાંબાં નેત્રોવાળા, મહાભુજાવાળા, પૂર્વ દિશા તથા ઉત્તર દિશાના હરિભક્તો શ્રીહરિ સમીપે પૂજા માટે આવ્યા. (૧) તે જનોએ અમૂલ્ય વસ્ત્રો, શાલ-દુશાલા, મનોગમ્ય પુષ્પોના હારો, હજારો મોતીની માળાઓ શ્રીહરિને ધારણ કરાવી. (૨) મહા-બલિષ્ઠ પુરુષોની તેવા પ્રકારની સ્ત્રીઓ, સાકર વગેરેથી ભરેલાં પાત્રોને હાથમાં ધારણ કરી શ્રીહરિની સમીપે આવી પૂજા કરતી હતી. (૩)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

उपहारान्समर्प्याथ गच्छद्भ्यस्तेभ्य ईश्वरः । स्वकण्ठतः पुष्पहारानुत्तार्यैव ददौ मुदा ॥४॥ फलानां नैकजातीनां शर्कराणां च राशयः । व्यराजन्त प्रभोरग्रे गण्डशैला इवोन्नताः ॥५॥ अथागच्छन्दाक्षिणात्या वर्तुलोष्णीषमण्डिताः । बद्धकच्छाश्च तन्नार्यश्चपला इव विद्युतः ॥६॥ उपचारैः षोडशभिस्त आनर्चुर्यथाविधि । तेषां पूजनचातुर्यं दृष्ट्वा तुष्टोऽभवद्धरिः ॥७॥ परिधाप्य च वासांसि सितपीतारुणानि ते । भूषणान्यप्यनर्घ्याणि यथास्थानं न्यधारयन् ॥८॥ कटकानि शृङ्खलानि करयोश्चाप्यधारयन् । अङ्गुलीषु प्रभोस्ते च सद्रत्ना ऊर्मिकाः शुभाः ॥९॥ केयूरादीनि बाह्वोश्च कण्ठे सन्मौक्तिकस्रजः । शिरस्यधारयन्दिव्यं किरीटं सूर्यवर्चसम् ॥१०॥ कर्णयोः कुण्डले तस्य हीरकावलिभासुरे । धारयित्वा बबन्धुश्च गोधौ मौक्तिकदामनीम् ॥११॥ काञ्चीं रत्नमयीं कट्यां नूपुरादीनि पादयोः । धारयित्वोपहारांश्च निदधुस्तस्य चाग्रतः ॥१२॥ नानाविधानि खाद्यानि कदलानि सहस्रशः । आर्द्रद्राक्षाफलानीक्षून्भक्त्या तस्मै न्यवेदयन् ॥१३॥ महानीराजनं चाथ गीतवादित्रपूर्वकम्। कृत्वा पुष्पाञ्जलिं दत्त्वा प्रणम्य च ततो ययुः ॥१४॥ प्रासादिकानि तेभ्योऽ दात्फलानि भगवान्मुदा । पुष्पाणां च समूहा ये मुनिभ्यो व्यभजत्तु तान् ॥१५॥ उत्थाय तस्थौ पीठे च ततः सद्यः स ईश्वरः । तदा जय जयेत्येवं त्रिलोक्यामभवद्ध्वनिः ॥१६॥ भास्वद्भासुरसत्किरीटविलसत्पूर्णेन्दुबिम्बाननो नानालङ्कृतिभूषणाङ्गमधुरः श्रोणिस्थपाणिद्वयः। कण्ठात्पादतलावधिक्रमगतैः पौष्पैश्च मुक्तामयैर्हारैर्भक्तमनोहरः स भगवान्पर्यैक्षताऽऽत्मप्रियान् ॥१७॥ तावत्पाश्चात्यपुरुषा आययुः स्थूलवेष्टनाः । गुणैर्द्वादशभिर्युक्ता ब्राह्मणा भगवत्प्रियाः ॥१८॥ शस्त्रास्त्रविद्यानिपुणाः क्षत्रिया दृढनिश्चयाः । तदोपविश्य तत्पूजां प्रभुरङ्गीचकार सः ॥१९॥

શ્રીહરિ પોતે ઉપહારો સ્વીકારી, પછી વિદાય લેતાં પૂર્વ અને ઉત્તર દેશનાં ભક્તજનોને પોતાના કંઠેથી પુષ્પહારો કાઢીને હર્ષપૂર્વક આપતા હતા. (૪) અનેક જાતનાં વૃક્ષોથી થયેલા-દાડમ, વગેરે ખાવા યોગ્ય ફળો તથા સાકરના ઢગલાઓ જાણે કે ઊંચા પર્વતો હોય તેમ શોભતા હતા. (૫) પછી ગોળ પાઘડીથી શોભાયમાન અને કચ્છ - ધારી એવાં દક્ષિણ દેશનાં જનોની, વીજળીની માફક ચંચળ શરીરવાળી સ્ત્રીઓ શ્રીહરિને પૂજવા માટે આવી. (૬) તે ષોડશોપચારોથી શાસ્ત્ર વિધિ પ્રમાણે શ્રીહરિની પૂજા કરતાં હતાં. તેમની પૂજા કરવાની ચતુરતા જોઈને શ્રીહરિ પ્રસન્ન થયા. (૭) દક્ષિણી જનો ધોળાં, પીળાં, અને લાલ વસ્ત્રો પહેરાવી અમૂલ્ય આભૂષણો પણ યથાસ્થાને ધારણ કરાવતાં હતાં. (૮) તે જનોએ શ્રીહરિના બન્ને હાથના કાંડામાં કડાં અને સાંકળાં ધારણ કરાવ્યાં. પ્રભુની આંગળીઓમાં શ્રેષ્ઠ રત્નોવાળી શોભાયમાન વીંટીઓ પહેરાવી, ભુજાઓમાં બાજુબંધ ધરાવ્યા, ગળામાં શોભાયમાન ઉત્તમ મોતીઓના હારો ધરાવ્યા, મસ્તકમાં સૂર્યના સમાન તેજસ્વી દિવ્ય મુગટ ધરાવ્યો, કાનમાં હીરાની પંક્તિથી પ્રકાશમાન મકરાકાર કુંડળ ધરાવીને લલાટમાં મોતીની દામણી બાંધી, કેડ્યમાં રત્નજડિત કંદોરો અને ચરણમાં નૂપુરાદિ પહેરાવીને શ્રીહરિની આગળ વિવિધ પ્રકારની ભેટો મૂકીને, નાના પ્રકારના પેંડા-બરફી વગેરે ખાદ્ય પદાર્થો, હજારો કેળાં, લીલી દ્રાક્ષ, શેરડીના સાંઠા, ભક્તિપૂર્વક ભગવાનને નિવેદિત કર્યાં. (૯ થી ૧૩) તે પછી ગીતવાજિંત્ર સહિત મહા આરતી કરીને પુષ્પાંજલિ સમર્પણ કરી, સાષ્ટાંગ પ્રણામ કરીને પૂજા સમાપ્ત કરી ત્યાંથી ગયા. (૧૪) પોતાની પૂજા કરી પાછા વળતાં દક્ષિણી જનોને શ્રીહરિએ વિવિધ પ્રકારના પ્રસાદીભૂત ફળો હર્ષથી આપ્યાં અને પોતાની પ્રસાદીના હારો હતા તે તો મુનિઓને યથાયોગ્ય વહેંચી આપ્યા. (૧૫) તે પછી શ્રીહરિ ઘણા સમય સુધી બેસી રહેવાના પરિશ્રમને ટાળવા માટે સિંહાસનમાં જ ઊભા રહ્યા. તે સમયે સમગ્ર ત્રિલોકીમાં 'જય જય' એવો ધ્વનિ થયો. (૧૬) સૂર્યની સમાન ચળકતો જે મુગટ તેનાથી શોભાયમાન, પૂર્ણ ચન્દ્રમા સમાન મુખ જેમનું છે, નાના પ્રકારનાં અલંકારોને અલંકૃત કરનારાં અંગોથી મનોહર, કેડ્ય ઉપર મૂકી છે બન્ને ભુજાઓ જેમણે, કંઠ પ્રદેશથી આરંભીને, પગના તલ પર્યન્ત એક એકથી નીચે અનુક્રમે મળીને રહેલા નાના પ્રકારના પુષ્પના હારો અને અમૂલ્ય મોતીમય હારોથી અલંકૃત, પોતાના દર્શન કરનારા ભક્તજનોના મનને હરનારા ભગવાન શ્રીહરિએ પોતાના ભક્તજનોને ચારેય બાજુએ જોયાં. (૧૭) તે સમયે મસ્તકે મોટા ફેંટા બાંધી રહેલાં પશ્ચિમ દેશનાં જનો પૂજા કરવા આવ્યાં. ધર્મ, સત્ય, દમ વગેરે બાર ગુણોથી યુક્ત ભગવાનને પ્રિય એવા બ્રાહ્મણો અને શસ્ત્રાસ્ત્ર વિદ્યામાં નિપુણ, શૌર્ય-બલ આદિક ક્ષાત્ર સ્વભાવે સંપન્ન, ભગવાનમાં દૃઢ નિશ્ચયવાળા ક્ષત્રિયો તથા બીજા વૈશ્યો તથા શૂદ્રો : આ સર્વે સમૂહમાં શ્રીહરિની સમીપે આવ્યા. તે સમયે શ્રીહરિએ તે જ સિંહાસનમાં તેમણે કરાતી પૂજા અંગીકાર કરી. (૧૮-૧૯)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

विधिना कुर्वतः पूजां दृष्ट्वा तानप्यतद्विदः । भृशं जहास भगवान्हासयन्मुनिमण्डलम् ॥२०॥ पूजयित्वाथ ते तस्मै वस्त्राण्याभरणानि च । दत्त्वोपहारान्विविधान् ययुर्नत्वा तमीश्वरम् ॥२१॥ तद्देशीयाः स्त्रियश्चाथ तोषयन्त्यो मनःप्रियैः । प्रभुं वचोभिर्मधुरैरुपाजग्मुः सहस्रशः ॥२२॥ गाढस्नेहा भगवति कृशाङ्ग्यश्च तपोव्रतैः । आतिथ्ये हरिभक्तानां निपुणाश्च जितेन्द्रियाः ॥२३॥ खर्जूरखारिकापूगनालिकेरैर्भृतानि ताः । गृहीत्वा चारुपात्राणि तत्रागत्यार्चयन्प्रभुम् ॥२४॥ पीतसाराणि शुभ्राणि पिण्डकांश्च मनोहरान् । दधानाः पृथुभिः स्थालै रूप्यमुद्राश्च काश्चन ॥२५॥ शर्करापात्रहस्ताश्च पर्पीपात्रकराः स्त्रियः । तमभ्यर्च्योपहारांश्च तदग्रे निदधुर्मुदा ॥२६॥ एवं सर्वेऽपि ते लोकाः स्वस्वशक्त्यनुसारिणीम् । पूजां भगवतश्चक्रुर्भक्त्या परमया युताः ॥२७॥ पत्रं पुष्पं फलं वाऽपि दरिद्रा अपि पुरुषाः । ददुर्यत्तत्स्वीचकार भावगम्यः स ईशिता ॥२८॥ राजानो रङ्कजीवाश्च दरिद्रा धनिनोऽपि च । तुल्या भक्तप्रियस्यैते सर्वे सन्ति हरेः किल ॥२९॥ प्रेम्णा भक्तेन पुंसा यत्पत्रं पुष्पं फलं जलम् । स्तुतिदूर्वादि वा दत्तं प्रीत्या गृह्णाति तत्प्रभुः ॥३०॥ अथो मुनीनपि ज्ञात्वा स्वपूजनसमुत्सुकान् । पूर्णं कर्तुं ह्यादिदेश तेषामपि मनोरथम् ॥३१॥ यथालब्धोपचारैस्ते पत्रपुष्पफलादिभिः। पूजां भगवतश्चक्रुः प्रणमन्तस्तपोधनाः ॥३२॥ एवं भगवता तत्र भक्तकल्पद्रुमेण वै । सत्सङ्गिनां हि सर्वेषां कृताः पूर्णा मनोरथाः ॥३३॥ परितश्च हरेरासन् भूषणानां सुवाससाम् । पुष्पाणां चोपहाराणां विचित्राः पर्वताः किल ॥३४॥ दिव्योच्चपीठमासीनस्तन्मध्ये भगवान्बभौ । मेरुस्थ इव पूर्णेन्दुः केसराचलमध्यतः ॥३५॥ तदैव ब्राह्मणेभ्योऽथ स प्रभुर्भूषणानि च । वासांसि चाप्यनर्घ्याणि ददौ सद्यो जगत्पतिः ॥३६॥

દક્ષિણીજનોની માફક પૂજા કરવા પ્રવર્તેલા, પ્રેમપૂર્વક ષોડશોપચારથી સંપૂર્ણ જ્ઞાને રહિત છે તો પણ, ભક્તિથી તેવા પ્રકારની પૂજા કરતાં અનન્ય પાશ્ચાત્ય ભક્તજનોને જોઈને ભગવાન મુનિમંડળને હસાવતા હતા અને સ્વયં અત્યંત હસતા હતા. (૨૦) પાશ્ચાત્યજનોએ પ્રભુની પૂજા કરીને તેમને અમૂલ્ય વસ્ત્રો, આભૂષણો અને ઘણા પ્રકારની ભેટો સમર્પણ કરીને સર્વેશ્વરને પ્રણામ કરીને ત્યાંથી ગયા. (૨૧) પછી પશ્ચિમ દેશની હજારો સ્ત્રીઓ, શ્રીહરિના મનને પ્રસન્ન કરનારાં મધુર વચનો બોલતી શ્રીહરિની પૂજા માટે આવી. (૨૨) શ્રીહરિમાં ગાઢ સ્નેહવાળી, તપ અને વ્રતોથી દુર્બળ શરીરવાળી, હરિભક્તોના આતિથ્યસત્કારમાં નિપુણા અને જિતેન્દ્રિયા, પશ્ચિમ દેશની સ્ત્રીઓ ખજૂર, ખારેક અને નાળિયેરથી ભરેલાં સુન્દર પાત્રો ગ્રહણ કરી શ્રીહરિની સમીપમાં આવી શ્રીહરિની પૂજા કરતી હતી. (૨૩-૨૪) કેટલીક સ્ત્રીઓ શ્વેત પતાસાંનો મોટો થાળ ગ્રહણ કરી, કેટલીક સ્ત્રીઓ રૂપાની મુદ્રાઓ (રૂપિયા) મોટા થાળમાં મૂકીને, કેટલીક સ્ત્રીઓ સાકરનાં ભરેલાં પાત્રો હાથમાં લઈને, કેટલીક સ્ત્રીઓ બરફી ભરેલાં પાત્રો લઈને, શ્રીહરિની સમીપે જઈને પ્રભુની પૂજા કરતી હતી. આવી રીતે પૂજન કરીને શ્રીહરિની આગળ ઉપહારો હર્ષપૂર્વક અર્પણ કરતી હતી. (૨૫-૨૬) આવી રીતે પરમ ભક્તિથી યુક્ત તે સર્વ સ્ત્રીઓ પોતપોતાની શક્તિને અનુસરીને શ્રીહરિની પૂજા કરતી હતી. (૨૭) ધનથી દુર્બળ પુરુષો પણ જે તુલસીપત્ર, મોગરાનાં પુષ્પો, કેરી, અથવા ધાન્ય અર્પણ કરતા હતા. તે પત્ર - પુષ્પ ફળાદિને, પ્રેમથી પ્રાપ્ય એવા શ્રીહરિ આ ચીજો ભક્તિપૂર્વક અર્પણ કરેલી હોવાથી અંગીકાર કરતા હતા. (૨૮) રાજાઓ, દીનજનો, દરિદ્રો, ધનવાનો એ સર્વ ભક્તોનું ભક્તપણું સમાન હોવાથી શ્રીહરિને ખૂબજ પ્રિય હતાં. (૨૯) ભક્તજનોએ અર્પણ કરેલાં પત્ર, પુષ્પ, ફળ, જળ, પ્રાર્થના અને દુર્વા વગેરે જેને છે, એવા પત્રાદિ સર્વે શ્રીહરિ પ્રીતિપૂર્વક ગ્રહણ કરે છે. (૩૦) પછી પોતાની પૂજા કરવામાં ઉત્સાહી સાધુઓને પણ જાણીને મુનિઓના મનોરથોને પણ પૂર્ણ કરવા માટે આજ્ઞા આપી. (૩૧) શ્રીહરિની આજ્ઞાથી તપસ્વી મુનિઓ નમસ્કાર કરતા કરતા પ્રાપ્ત થયેલાં પત્ર, પુષ્પ, ફળાદિથી શ્રીહરિની પૂજા કરતા હતા. (૩૨) આવી રીતે કલ્પદ્રુમની માફક સમગ્ર ભક્તજનોના મનોરથ પૂર્ણ કરનાર શ્રીહરિએ વૃત્તાલયમાં સર્વ સત્સંગીઓના મનોરથ પૂર્ણ કર્યા. (૩૩) કડાં, સાંકળાં વગેરે અલંકારો મહામૂલ્ય વસ્ત્રો, નાના પ્રકારના પુષ્પહારો તથા કેળાં વગેરે ફળોના નાના પ્રકારના પર્વતો શ્રીનારાયણ મુનિની ચોતરફ હતાં, જ. (૩૪) તે પર્વતોની વચ્ચે દિવ્ય, ઊંચા સિંહાસનમાં બેઠેલા ભગવાન શ્રીહરિ કુરરાદિ વીશ કેસરાચળોના મધ્યભાગમાં રહેલા મેરુ પર્વતની ઉપર રહેલો પૂર્ણ ચન્દ્ર હોય તેમ શોભતા હતા. (૩૫) પછી જગત્પતિ શ્રી પ્રભુએ અમૂલ્ય આભૂષણો અને વસ્ત્રો પણ તે સમયે જ, તત્કાલ જ, સ્વધર્મનિષ્ઠ બ્રાહ્મણોને આપી દીધાં. (૩૬)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

याचकेभ्यस्तथान्येभ्यो दरिद्रेभ्यो विशेषतः । अधनेभ्यः कुटुम्बिभ्यो ददौ भूरि धनं प्रभुः ॥३७॥ तोयं घनाघन इव प्रववर्ष ततः प्रभुः । द्रव्यं भूरितरं प्रीतो गृहस्थेभ्योऽपि तत्र सः ॥३८॥ तस्मिन्नेव क्षणे सर्वमेवं दत्त्वाप्यविस्मयः। सर्वान्विस्मापयामास कुर्वन्कर्म ह्यमानवम् ॥३९॥ अत्युदारधिय ऊर्जितश्रियः श्रीहरेर्वितरणोद्यतस्य तु । वस्तु नाप किमपि ह्यदेयतां भूपते ! स्वधृतवाससी विना ॥४०॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे वृत्तालयदोलोत्सवे सकलभक्तसङ्घकृतभगवत्पूजननिरूपणनामा चतुःपञ्चाशत्तमोऽध्यायः ॥५४॥

सुव्रत उवाच-तस्मिन्दिने जनाः सर्वे एकादश्या उपोषणम् । चक्रुः स्वयं स भगवान्मर्यादारक्षणाय वै ॥१॥ नागदेवात्समारभ्य मुहूर्तात्पूजनोत्सवः । आर्यम्णावधि तत्राभूत्तद्दिने तस्य भूपते ! ॥२॥ भाग्ये मुहूर्तेऽथ हरिर्ब्राह्मणांस्तत्र संस्थितान् । सायंसन्ध्यावन्दनार्थं गच्छतेत्यादिदेश ह ॥३॥ स्वधर्मपालनं प्रेष्ठं प्रभोरस्तीति ते द्विजाः । निश्चित्य सरसस्तीरं जग्मुः सर्वे तदाज्ञया ॥४॥ जनानामपि विश्रामो मुहूर्तं स्यादिति स्वयम् । तुङ्गासनात्समुत्तीर्य स्वावासान्तर्विवेश सः ॥५॥ ततो जनाश्च मुनयः स्वस्वावासान्समेत्य ते । किञ्चिद्विश्रम्य पीत्वाम्भः पुनराश्वगमन्सभाम् ॥६॥ कृत्वा सन्ध्याविधिं तूर्णं ते चागत्य पुनर्द्विजाः । निषेदुस्तत्र सदसि यथास्थानं यथोचितम् ॥७॥ तावत्स चापि भगवान्प्रणतार्तिहन्ता विश्रम्य किञ्चिदथ सान्ध्यविधिं विधाय । नैसर्गिकस्वगतिधावितपार्षदौघो लोलत्सदुत्तरपटोऽधिरुरोह पीठम् ॥८॥

---

પ્રભુ બન્દીજનો વગેરે યાચકોને તથા બીજાં દરિદ્ર જનો અને કુટુંબીજનોને અને વિશેષપણે નિર્ધનોને ઘણું ધન આપતા હતા. (૩૭) પછી શ્રીહરિ પ્રસન્ન થઈને, વરસાદના જળની જેમ ઘણું દ્રવ્ય ગૃહસ્થોને પણ તે સમયે પાત્ર-અપાત્રનો વિચાર કર્યા વિના મેઘની માફક આપતા હતા. (૩૮) આ પ્રકારે તે સમયે સર્વ પૂજામાં આવેલા ભૂષણાદિ વસ્તુઓનો પુંજ આપીને અભિમાન રહિત, મનુષ્યોથી ના થઈ શકે એવું ચરિત્ર કરતા શ્રીહરિ સભામાં બેઠેલા સર્વ દર્શનાર્થી જનોને વિસ્મય પમાડતા હતા. (૩૯)

હે ભૂપતે ! અતિ ઉદાર, બુદ્ધિશાળી, સર્વાતિશય ઐશ્વર્યવાળા, આપવામાં ઉત્સાહી શ્રીહરિ પાસે પોતે ધારણ કરેલાં બે વસ્ત્રો વિના કોઈ પણ વસ્તુ ન આપવા જેવી ન હતી; અર્થાત્ સર્વ પણ દાનને યોગ્ય હતું. (૪૦)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે વૃત્તાલયદોલોત્સવે સકલભક્તસંઘકૃત ભગવત્પૂજનનિરૂપણ નામા ચતુઃપંચાશત્તમોઽધ્યાયઃ (૫૪)*

## અધ્યાય : ૫૫

## શ્રીહરિનો સાયંકાળનો વિધિ અને એકાદશીની રાત્રિમાં જાગરણની લીલા કહી છે.

**સુવ્રત મુનિ કહે છે :** હે રાજન્ ! એકાદશીને દિવસે સર્વ જનો એકાદશીનો ઉપવાસ કરતાં હતાં. સ્વયં શ્રીહરિ પણ સદ્ધર્મની રક્ષા માટે, મર્યાદાનું પાલન કરવા ઉપવાસ કરતા હતા. (૧) હે રાજન્ ! સર્પ દૈવતવાળા મુહૂર્તથી આરંભીને, અર્થાત્ દિવસના બીજા મુહૂર્તથી આરંભીને આર્યમ્ણ મુહૂર્ત (દિવસના ચૌદમા મુહૂર્ત) પર્યન્ત વૃત્તાલયમાં ફાગણ સુદી એકાદશીને દિવસે શ્રીહરિના પૂજનનો મહોત્સવ થયો. (૨) પછી શ્રીહરિએ ભાગ્ય મુહૂર્તમાં (દિવસના પંદરમા મુહૂર્તમાં) સભામાં બેઠેલા બ્રાહ્મણોને સાયં-સંધ્યા-વિધિ કરવા સરોવરમાં જવાની આજ્ઞા આપી. (૩) શ્રીહરિને સ્વધર્મનું પાલન અતિપ્રિય છે, આવો નિશ્ચય કરી તે સર્વે બ્રાહ્મણો શ્રીહરિની આજ્ઞાથી સરોવરને તીરે ગયા. (૪) સભામાં બેઠેલાં સત્સંગીજનોને બે ઘડી વાર વિશ્રામ થાય એવા હેતુથી પોતે શ્રીહરિ પણ પોતાના સિંહાસનથી ઊતરીને પોતાના નિવાસમાં ગયા. (૫) પછી સભામાં બેઠેલાં જનો અને મુનિઓ પોતપોતાના નિવાસસ્થાનમાં જઈને લગારેક વિશ્રામ કરી, જલપાન કરી, તત્કાલ આવીને ફરી સભામાં યથાયોગ્ય સ્થાનમાં બેઠાં. (૬) સરોવરકાંઠે ગયેલા તે બ્રાહ્મણો, ભગવાનનાં દિવ્ય મંગળ વિગ્રહનાં દર્શન કરવામાં ઉત્કટ ઉત્સાહવાળાં હોવાથી સંધ્યાવિધિને જલદી કરી આવીને ફરીથી તે સભામાં પોતપોતાના સ્થાનમાં યથાયોગ્ય બેસી ગયા. (૭) તે અવસરમાં નમસ્કાર કરતાં જનોની પીડાને હરનારા, ભગવાન શ્રીહરિ પણ લગાર વિશ્રામ કરી, સંધ્યા વિધિ કરી, પછી સ્વાભાવિક એવી પોતાની શીઘ્ર ગતિથી ચાતુર્યપૂર્વક પોતાના અનુયાયીઓને-પાર્ષદોને પોતાની પાછળ દોડાવ્યા તે સમયે શ્રીહરિએ ઓઢેલું વસ્ત્ર ફરફરતું શોભતું હતું. શ્રીહરિ પોતાના સિંહાસનમાં બેઠા. (૮)

तत्र स्थितः स्वपरितो निजभक्तसङ्घान्पश्यन्दृढं स्वकटिबन्धपटं विधाय । नारायणस्य च वदन्नभिधाः स उच्चैस्तालध्वनिं परिततान हरिः कराभ्याम् ॥९॥ तदानीं तु जनाः सर्वे स्त्रियश्च मुनयस्तथा । तालिकावादनं चक्रुः कीर्तयन्तोऽभिधा हरेः ॥१०॥ लक्षशस्तालिकाध्वानैस्तत्कालोत्थैश्च मिश्रितः । भगवन्नामनिनदस्त्रिलोकीं व्यानशे तदा ॥११॥ ऊर्ध्वैर्जनानां लोलद्भिर्बभौ भूः करपल्लवैः । वातोल्लोलैः स्थलाम्भोजैः प्रफुल्लैरिव मण्डिता ॥१२॥ हस्तलाघवचातुर्याद्योजनं च वियोजनम् । भगवत्तलयोः कश्चित् पृथग्वेत्तुं शशाक नो ॥१३॥ सहस्रशो दीपिकाश्च तत्रासन्नथ सर्वतः । दिवेव तत्प्रकाशेन ज्योत्स्नया च बभौ निशा ॥१४॥ तदा विठ्ठलदासश्च कृष्णदास उभौ हरेः । तस्थतुः पार्श्वयोरूर्ध्वप्रवेष्टघृतदीपिकौ ॥१५॥ कीर्तनान्ते नमन्ति स्वं यावत्ते मुनयो जनाः । तावत्स्वयं जनान्तःस्थमुपविश्य स्वमानमत् ॥१६॥ विस्मितास्तस्य तद्दृष्ट्वा ह्युपवेशनलाघवम् । तं नमस्कृत्य मुनयस्तुष्टुवुस्ते निजं प्रभुम् ॥१७॥ गोविन्द ! नारायण ! वासुदेव ! श्रीकृष्ण ! सङ्कर्षण! पद्मनाभ !। नरानिरुद्धेश्वर ! लोकनाथ ! हरे ! मुकुन्दाद्य ! नमो नमस्ते ॥१८॥

પોતાના સિંહાસનમાં ઊભા રહી, શ્રીહરિ ચોતરફ પોતાના ભક્ત સમુદાયને જોતા રહ્યા. તેમણે પોતાની કેડનું વસ્ત્ર દૃઢ બાંધેલું હતું. નારાયણના નામનો ઉચ્ચ સ્વરે ઉચ્ચાર કરતા હતા. બન્ને હાથથી તાલીઓનો ધ્વનિ વિસ્તારતા હતા. (૯) તે સમયે સર્વે જનો અને મુનિઓ, સર્વ સ્ત્રીઓ શ્રી હરિકૃષ્ણ ભગવાનના નામનો ઉચ્ચ સ્વરે ઉચ્ચાર કરી તાલીઓ વગાડતા હતા. (૧૦) તે સમયે, એક જ સાથે ઉત્પન્ન થયેલો લાખો તાલીઓનો ધ્વનિ, તથા તેની સાથે ભળી ગયેલો ભગવાનના નામનો ઉચ્ચ ધ્વનિ, ત્રણે ભુવનમાં વ્યાપી ગયો. (૧૧) ઊંચે ચાલતા કર પલ્લવોથી પૃથ્વી, ઉત્તમ વાયુના વેગથી ચલાયમાન પ્રફુલ્લિત ગુલાબ પુષ્પોથી અલંકૃત થયેલી હોય તેમ શોભતી હતી. (૧૨) શ્રીહરિની જે લાઘવથી બન્ને હાથનો સંયોગ અને વિયોગની પ્રાવીણ્યસભર મુદ્રા તેને જાણવા પામવા માટે કોઈ પણ મનુષ્ય સમર્થ થયો નહિ. (૧૩) સભામાં હજારો દીવાઓ હતા. સર્વ સ્થળે દીવાઓના પ્રકાશથી અને ચંદ્રનાં કિરણોથી એકાદશીની રાત્રિ દિવસમાં પલટાઈ ગઈ અને શોભિત થઈ. (૧૪) તે સમયે વિઠ્ઠલદાસ અને કૃષ્ણદાસ બન્ને વાળંદોએ ઊંચા બન્ને હાથમાં મશાલો ધારણ કરી શ્રી સ્વામિનારાયણ ભગવાનને જમણે અને ડાબે પડખે ઊભા રહ્યા. (૧૫) નારાયણ ધૂન્યની સમાપ્તિમાં સભામાં બેઠેલા સાધુઓ તથા જનસમુદાયો જ્યાં પોતાને નમસ્કાર કરવા જાય છે, ત્યાં સ્વયં શ્રીહરિએ સિંહાસનમાં બેસીને લોકોનાં અંતઃકરણમાં રહેલા પોતાના આત્માને નમસ્કાર કર્યો. (૧૬) શ્રીહરિની તેવી બેસવાની શીઘ્ર રીતિ જોઈને વિસ્મય પામેલા મુનિઓ અને ભક્તો પોતાના પ્રભુ શ્રીહરિને નમસ્કાર કરી સ્તુતિ કરવા લાગ્યા. (૧૭) **હે ગોવિન્દ !** ગાં-ભૂમિને વિન્દતિ - પામે છે તે ગોવિન્દ કહેવાય. વરાહ અવતારે નષ્ટ થયેલી પૃથ્વીને રસાતલથી લાવ્યા માટે ગોવિંદ કહેવાય છે. અથવા ગાઃ ગિરાઓને વિન્દતિ - પામે છે માટે ગોવિંદ કહેવાય છે. સંતોએ અને દેવતાઓએ કરાયેલી સ્તુતિ રૂપી વાણીના વિષય છો માટે ગોવિંદ કહેવાઓ છો; **હે નારાયણ !** નાર-નર થકી થયેલાં જળો તે અયન-આશ્રય છે તમને (જળનો આશ્રય કરી રહેલા ) માટે તમે નારાયણ કહેવાઓ છો. **હે વાસુદેવ** ! વાસુશ્ચાસૌ દેવઃ સર્વમાં નિવાસ કરીને, અન્તર્યામી પણે રહેલા, એવા દેવ તે વાસુદેવ કહેવાય છે. હે શ્રી કૃષ્ણ ! શ્રી શબ્દ અનવધિકાતિશય શોભા વિશિષ્ટ, કૃષ ધાતુ ભૂ અર્થાત્ વિપુલતાનો વાચક છે અને ણઃ તે નિર્વૃતિ અર્થાત્ સુખનો વાચક તેથી આનંદમય સુખના નિધિ, માટે શ્રીકૃષ્ણના નામથી પ્રસિદ્ધ છો. **હે સંકર્ષણ !** - સંહાર સમયે એકી સાથે પ્રજાઓને ખેંચે છે માટે સંકર્ષણ નામથી પ્રસિદ્ધ છે. **હે પદ્મનાભ !** બ્રહ્માની ઉત્પત્તિ સ્થાન જે પદ્મ તે તમારી નાભિમાં છે, માટે પદ્મનાભ. **હે નર !** 'ર' જે ક્ષયે રહિત તે નર કહેવાઓ અથવા નયતિ ઈતિ નરઃ । પરમપદને પમાડો છો માટે નર કહેવાઓ છો. **હે અનિરુદ્ધ !** તમારી અનંત ચેષ્ટાઓ કોઈનાથી રોકી શકાતી નથી માટે અનિરુદ્ધ કહેવાઓ છો. **હે ઈશ્વર !** સર્વ શક્તિવાળા હોવાથી અક્ષર પુરુષાદિના પણ નિયંતા છો. **હે લોકનાથ !** અનંત કોટી બ્રહ્માંડો રૂપી લોકોના સ્વામી છો. **હે હરે !** સ્મરણ માત્રથી સંસાર રૂપી પાપનો નાશ કરો છો, માટે હરિનામથી પ્રસિદ્ધ છો. **હે મુકુન્દ !** સ્વાશ્રિત જનને મુક્તિ આપનારા, **હે આદ્ય** ! સર્વ અક્ષરાદિના આદિ (કારણ) છો એવા તમોને વારંવાર નમસ્કાર થાઓ. (૧૮)

आनन्दकन्दाच्युत ! सुन्दराङ्ग ! दयानिधे ! माधव ! मङ्गलात्मन्! । विष्णो ! हृषीकेश ! परावरेश ! प्रद्युम्न ! पद्मानन ! ते नमोऽस्तु ॥१९॥ विशुद्धमूर्ते ! मधुसूदनाज! दामोदर ! श्रीधर ! सर्ववन्द्य ! । ब्रह्मण्यदेवाक्षर ! पूर्णकाम ! प्रभो ! विभो ! नाथ ! नमो नमस्ते ॥२०॥ वैकुण्ठ ! सत्योत्तम! सत्त्व ! भूमन्! हिरण्यगर्भ ! त्रिककुत्कलेश ! । विश्वोत्तमश्लोक! विधे ! महर्षे ! प्राणेश ! विश्वेश्वर ! ते नमोऽस्तु ॥२१॥ वृषाकपे ! केशव ! धर्म ! धीर ! शुचिश्रवो ! भूतपते ! परात्मन् ! पुण्याङ्ग ! यज्ञेष्टद ! पुण्यकीर्ते ! सुधीर्नमस्ते ! पुरुषोत्तमाय ॥२२॥

**હે આનંદકંદ !** નિરતિશય આનંદના મૂલસ્ત્રોત; **હે અચ્યુત !** સ્વરૂપ, સામર્થ્ય, ગુણ, વિભૂતિ વગેરેથી પડેલા નથી, પડતા નથી, અને પડશે પણ નહિ; માટે અચ્યુત; **હે સુંદરાંગ !** સુંદર અંગોથી અતિશય શોભાયમાન, **હે દયાનિધે !** કારણ વિના પણ દયાના સાગર; **હે માધવ !** માયાઃ વિદ્યાયાઃ ધવઃ - પતિઃ માધવ ! વિદ્યા રૂપી માયાના પતિ હોવાથી માધવ નામધારી; **હે મંગલાત્મન્ !** મંગલ સ્વરૂપવાળા, **હે વિષ્ણો !** પોતાની વિભૂતિભૂત સર્વ વિશ્વમાં 'વિશતિ' તમો અનુપ્રવેશ કરો છો, માટે વિષ્ણુ સંજ્ઞાથી પ્રસિદ્ધ છો. **હે હૃષીકેશ !** હૃષીક-ઈન્દ્રિયોના ઈશ નિયંતા છો માટે હૃષીકેશ છો. **હે પરાવરેશ !** પર - અક્ષરાદિ અને અવર બ્રહ્માદિના ઈશ-સ્વામી છો, માટે તમો પરાવરેશ છો. **હે પ્રદ્યુમ્ન !** પ્રકુષ્ટ દ્યુમ્ન - આત્મ પ્રદ્યોત સ્વરૂપ ઐશ્વર્ય જેમનું છે, અર્થાત્ સ્વયં પ્રકાશ સ્વભાવવાળા છો માટે પ્રદ્યુમ્ન કહ્યા છે. **હે પદ્માનન !** પદ્મની માફક પ્રફુલ્લિત આનન-મુખવાળા છો, અર્થાત્ નિરંતર મંદ સ્મિત - મનોહર મુખવાળા છો, માટે પદ્માનન કહ્યા છે. એવા તમોને નમસ્કાર છે. (૧૯) **હે વિશુદ્ધ મૂર્તે !** જે તમારી મૂર્તિ હંમેશા માયાના ગુણોએ રહિત દિવ્ય મૂર્તિ હોવાથી, વિશુદ્ધ છો. માટે વિશુદ્ધ મૂર્તિ નામથી પ્રસિદ્ધ છો. **હે મધુસૂદન !** મધુ નામના દૈત્યનો નાશ કરનારા; **હે અજ !** કોઈ દિવસ ઉત્પન્ન નહિ થનારા, સર્વદા સ્વયંભૂ - સ્વતઃ સિદ્ધ સ્વરૂપવાળા; **હે દામોદર !** યશોદાએ દામણાથી ઉદરમાં બાંધેલા હોવાથી દામોદર નામધારી; **હે શ્રીધર !** સર્વાતિશય સંપત્તિને ધારણ કરનારા માટે શ્રીધરનામધારી; **હે સર્વવંદ્ય !** અક્ષરાદિ સર્વદેવોને વંદના કરવા યોગ્ય; **હે બ્રહ્મણ્યદેવ !** તપ, વેદો, સત્ય, જ્ઞાન આ બ્રહ્મ સંજ્ઞાવાળાને હિત કરનારા હોવાથી, બ્રહ્મણ્ય એવા દેવ, તે બ્રહ્મણ્યદેવ, અથવા બ્રાહ્મણોનું હિત કરનારા દેવ; **હે અક્ષર !** દેશકાલાદિની વિષમતાને લીધે પણ સ્વ-સ્વરૂપની સ્થિતિથી નાશ નહિ પામનારા; **હે પૂર્ણકામ !** પૂર્ણ છે સંકલ્પો જેના એવા, અર્થાત્ સત્ય સંકલ્પ; **હે પ્રભો !** સર્વ ક્રિયાઓમાં અતિશય સામર્થ્ય હોવાથી પ્રભુ; **હે વિભો !** જીવ ઈશ્વરાદિમાં અંતર્યામી રૂપે તેનાં કર્મફળ આપવા માટે વ્યાપનારા હોવાથી વિભુ છો; **હે નાથ !** જગત સર્ગાદિ ઐશ્વર્ય માટે મહત્ આદિ તત્ત્વોએ પ્રાર્થના કરાયેલા માટે નાથ છો, એવા તમોને નમસ્કાર છે. (૨૦) **હે વૈકુંઠ !** વિવિધ પ્રકારની કુંઠા જે ગતિ તે વિકુંઠા, તેને રોકનારા; માટે વૈકુંઠ કહેવાય છે. **હે સત્ય !** સદા સત્ય સ્વરૂપ હોવાથી સત્ય નામવાળા, **હે ઉત્તમ !** અક્ષરાદિથી અતિશય ઉત્તમ હોવાથી જીવોનું અનાદિ અજ્ઞાન રૂપી 'તમ'ને ઉત્ - નિવૃત્તિ પમાડો છે, માટે ઉત્તમ કહેવાઓ છો. **હે સત્ત્વ!** શુદ્ધ અંતઃકરણવાળા; **હે ભૂમન્ !** અપાર મહિમાવાળા; **હે હિરણ્યગર્ભ !** પોતાના ભક્તોના રક્ષણ માટે અનેક અવતારોએ કરીને હિરણ્યમય અંડની અંદર વર્તવાથી હિરણ્યગર્ભ નામે પ્રસિદ્ધ છો; **હે ત્રિકકુત્ !** ત્રણ-કકુદ- ઉચ્ચ પ્રદેશો =(ખંધોલો, મુખાગ્રભાગ, અને દાઢ્યો.) જેનાં ઊંચા છે એવા તમે છો. અર્થાત્ વરાહ અવતાર તમે છો; માટે ત્રિકકુત્ કહેવાઓ છો; **હે કલેશ !** કલા-માયાના ઈશ - નિયંતા, માટે કલેશ; **હે વિશ્વ !** વિશ્વ જે જગતના કારણપણાથી ભગવાન વિશ્વ કહેવાય છે (કારણમાં કાર્યનો ઔપચારિક પ્રયોગ છે.) હે ઉત્તમ શ્લોક ! જેનાથી 'તમ' નાશ પામે છે, તે ઉત્તમ છે કીર્તિ જેની તે ઉત્તમ શ્લોક કહેવાય. **હે વિધે !** પુરુષ દ્વારા વિશ્વને વિધાન કરે છે, અર્થાત્ રચાવે છે; **હે મહર્ષે !** મહાન એવા ઋષિ; **હે વિશ્વેશ્વર !**, અનંત કોટિ બ્રહ્માંડોના ઈશ્વર; **હે પ્રાણેશ !** અતિશય પ્રીતિવાળા ભક્તોના સ્વામી, તમોને નમસ્કાર છે. (૨૧) **હે વૃષાકપે !** સર્વ પુરુષાર્થના વર્ષનાર હોવાથી વૃષ-અનુપમ ધર્મરૂપ છો. અને कात् જળ થકી પૃથ્વીનું રક્ષણ કર્યું માટે કપિ-શ્રેષ્ઠ વરાહરૂપ છો, માટે વૃષાકપિ નામધારી છો; **હે કેશવ !** કેશ સંજ્ઞાવાળા, સૂર્ય વગેરેમાં મળેલાં કિરણોવાળા હોવાથી કેશવ નામધારી છો, **હે ધર્મ !** સર્વ ભૂતોને ધારણ કરનાર હોવાથી ધર્મ કહેવાય છે; હે ધીર ! धियं સ્વ સ્વરૂપમાં દઢ બુદ્ધિ राति આપે છે માટે ધીર કહેવાય છે; **હે શુચિશ્રવઃ !** જેની કીર્તિ શ્રોતા અને વક્તા માટે પવિત્રકર છે; **હે ભૂતપતે !** પોતાના ભક્તોનું પોતાના

अधोक्षज! श्रीकर ! कञ्जनेत्र ! वेदैकविद्वेदकृदव्ययात्मन् ! । अव्यक्त ! संश्रितपर ! सौख्य! हेतो ! आनन्द ! विद्याधिपते ! नमोऽस्तु ॥२३॥ ज्ञेयादिदेव ! प्रियभक्त ! पूज्य ! प्रेष्ठ ! प्रजेशामरवर्य ! सर्व ! । ब्रह्मागुणागम्य ! सदर्चनीय ! प्रमाणहीनाधिपते ! नमोऽस्तु ॥२४॥ स्वामिन्महेशामलधाम ! देव ! ज्ञानप्रदागोचर ! सद्गुणाऽऽप्त! । सहस्त्रमूर्ते ! पुरुषाप्तकाम! प्रकाशकाकाशवपुर्नमस्ते ॥२५॥ स्वतन्त्र ! मायाधिप ! सर्वशक्ते ! सदा प्रसन्नो भव पाहि चास्मान् । त्वमेव सर्वाश्रयणीय एकस्तस्मै मुहुस्ते भगवन्नमोऽस्तु ॥२६॥

---

પાર્ષદો દ્વારા રક્ષણ કરે છે; **હે પરાત્મન્ !** દેહ-ઇન્દ્રિયોથી પર વર્તતા જીવાત્માઓના અંતર્યામી; **હે પુણ્યાંગ !** ધર્મનું અંગની માફક રક્ષણ કરનારા; **હે યજ્ઞ !** રુચિ પ્રજાપતિથી યજ્ઞ નામે ઉત્પન્ન થયેલા હોવાથી યજ્ઞ, **હે ઈષ્ટદ** ! પોતાના ભક્તોને ઈષ્ટ વસ્તુઓ આપે છે માટે ઈષ્ટદ; **હે પુણ્યકીર્તે** ! પુણ્ય-પવિત્ર કીર્તિ જેની છે એવા; **હે સુધીઃ !** પોતાના ભક્તોના હિતનું અત્યંત ચિંતન કરનારા; ચેતન અને અચેતનથી સ્વરૂપ- સ્વભાવ-ગુણ ઐશ્વર્યાદિથી અતિ ઉત્કૃષ્ટ હોવાથી પુરુષોત્તમ એવા તમને નમસ્કાર છે. (૨૨) **હે અધોક્ષજ !** સ્વધર્મનિષ્ઠપણું હોવાથી જે જિતેન્દ્રિયોમાં ઉત્પન્ન થનારા; **હે શ્રીકર !** સ્તુતિ કરનારા ભક્તોને શ્રી-લક્ષ્મી આપનારા; **હે કંજનેત્ર !** પ્રફુલ્લિત કમલ આકારનાં સદા પ્રસન્ન નેત્રોવાળા; **હે વેદૈકવિત્ !** વેદાર્થને યથાર્થપણે એક માત્ર જ જાણનારા; **હે વેદકૃત્ !** ઋગાદિ વેદોને પોતાના નિઃશ્વાસ દ્વારા ઉત્પાદન કરનારા; **હે અવ્યક્ત !** કૃપાયુક્ત તમારી ઈચ્છા વિના કોઈ સાધનથી પણ વ્યક્ત નહિ થનારા; **હે સત્ !** ત્રણેય કાળમાં સત્ય સ્વરૂપ; **હે ચિત્ !** જગતની સૃષ્ટિ માટે મૂલ પ્રકૃતિને અક્ષર પુરુષ દ્વારા બોધ કરો છો માટે ચિત્ કહેવાઓ છો; **હે પર !** પર એવા અક્ષર થકી પર શ્રુતિમાં નિરૂપણ કરેલા છે માટે પર છો; **હે સૌમ્ય !** પોતાના એકાંતિક ભકતોને અવિનાશી સુખ આપો છો માટે સૌમ્ય નામથી પ્રસિદ્ધ છો; **હે હેતો !** જગતના કારણભૂત પ્રકૃતિ પુરુષાદિના હેતુ હોવાથી હેતુ સંજ્ઞા છે. **હે આનંદ!** નાના અવતારોનાં ચરિત્રોથી એકાંતિક ભક્તોને આનંદ પમાડો છો, માટે આનંદ નામધારી છો; **હે વિદ્યાધિપતે** ! વેદત્રયી વગેરે વિદ્યાઓના અધિપતિ, એવા તમોને નમસ્કાર છે. (૨૩) **હે જ્ઞેય !** સત્સંગથી જાણવા યોગ્ય; **હે આદિ દેવ !** સમગ્ર જગતના આદિ, પોતાના અક્ષરધામમાં સ્વભક્તોના સમુદાયોની સાથે દિવ્યતિ - અર્થાત્ ક્રીડા કરે છે - માટે આદિ દેવ; **હે પ્રિયભક્ત !** ભક્તો છે પ્રિય જેને એવા; **હે પૂજ્ય !** સ્વરૂપ, સ્વભાવ, ગુણોથી અનન્ય હોવાથી સર્વને આ જ પૂજનીય છે. **હે શ્રેષ્ઠ !** પરમ પ્રેમના સ્થાનભૂત ! **હે પ્રજેશ !** સર્વ જીવ-ઈશ્વરાદિ રૂપ પ્રજાઓના નિયન્તા; **હે અમરવર્ય !** અર્થાત્ બ્રહ્માદિ દેવોમાં શ્રેષ્ઠ; **હે સર્વ** ! જે સર્વને એકી સાથે પ્રત્યક્ષ જાણે છે, માટે સર્વ શબ્દથી કહેવામાં આવે છે. **હે બ્રહ્મ !** નિરતિશય પોતાના મહિમાથી વૃદ્ધિ પામે છે, માટે બ્રહ્મ કહ્યા છે. **હે અગુણ!** માયિક સત્ત્વાદિ ગુણોએ રહિત; **હે અગમ્ય !** જેની પ્રસન્નતા વિના જે કોઈનાથી પણ પ્રાપ્ય નથી. **હે સદર્ચનીય !** શતાનંદ, મુક્તાનંદ આદિ સાધુ પુરુષોને અર્ચનીય, પ્રસન્નતા માટે પૂજનીય છે. **હે પ્રમાણહીન !** સ્વરૂપ, ગુણ વિભૂતિ વગેરેથી આટલા જ છે એમ પ્રકૃષ્ટપણે માપ કરવા માટે અશક્ય; **હે અધિપતે !** આ સર્વેના સ્વામી છો. એવા તમોને નમસ્કાર છે. (૨૪) **હે સ્વામિન્ !** સ્વં સર્વના કરતાં અધિક છે ઐશ્વર્ય જેનું તેથી સ્વામિન્; **હે મહેશ !** ઈશ્વરોના પણ ઈશ્વર; **હે અમલધામ !** માયાના ગુણે રહિત હોવાથી નિર્મલધામ જે અક્ષરધામ તે જેને છે એવા, **હે દેવ !** પોતાના ધામમાં મૂર્તિમાન વેદોએ સ્તુતિ કરાયેલા, **હે જ્ઞાનપ્રદ !** સ્વ સ્વરૂપનો બોધ, પોતાના ભક્ત મુન્યાદિ દ્વારા આપનારા, **હે અગોચર !** અસુરોને પ્રત્યક્ષ નહિ થનારા; **હે સદ્‌ગુણ !** સારા ગુણો જે સત્યાદિ તે જેને છે એવા, **હે આપ્ત !** સર્વેના હિતકારી, **હે સહસ્ર મૂર્તે !** અપરિમિત અવતારો જેના છે એવા; **હે પુરુષ !** પુરુષાકાર હોવાથી પુરુષ, **હે આપ્તકામ !** આપ્ત જે પોતાના એકાંતિક ભક્તોમાં 'કામઃ' હંમેશા નિવાસની ઈચ્છા જેમને છે એવા; **હે પ્રકાશક !** અનવધિકાતિશય, પોતાના પ્રકાશથી પોતાના અક્ષરધામના મુક્તોને પ્રકાશ આપનારા; **હે આકાશવપુઃ !** આકાશની જેમ નિર્લેપ શરીરવાળા એવા તમોને નમસ્કાર છે. (૨૫) **હે સ્વતંત્ર !** સર્વેશ્વર હોવાથી સ્વાધીન; **હે માયાધિપ !** માયાથી, સ્વાશ્રિત જનોને અજ્ઞાનરૂપ પ્રકૃતિથી રક્ષણ કરનારા; **હે સર્વશક્તે !** સર્વ કાલમાયાદિ સ્વરૂપવાળી શક્તિઓવાળા; **હે ભગવન્ !** સમગ્ર ઐશ્વર્ય - ધર્મ-યશ-લક્ષ્મી-વૈરાગ્ય અને મોક્ષ આ છ ભગશબ્દ વાચ્ય છે જેમને એવા, તમો સદા અમારા ઉપર પ્રસન્ન થાઓ. અને અમારું રક્ષણ કરો. તમો એક સર્વને આશ્રય કરવા યોગ્ય



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

ततश्च प्रार्थयामासुः सर्वे भक्तजनाः प्रभुम् । बद्धाञ्जलिपुटा भक्त्या तन्मुखार्पितदृष्टयः ॥२७॥ अस्माकं स्खलने क्षुते च पतने व्याधौ तथा जृम्भणे मूर्च्छायां मरणेऽपि वा विवशतां सम्प्राप्स्यतां नित्यदा । त्वन्नामान्यखिलाघदुःखनिचयध्वंसातिशौर्याणि वै वाचायां विलसन्तु निश्चलतया भक्तप्रिय! श्रीहरे ! ॥२८॥ मा देहगेहद्रविणेषु बुद्धिर्व्रजेद्भवत्पादयुगं विहाय । अस्माकमित्येव हरेऽभियाचितं सम्पूरयाधीश! भव प्रसन्नः ॥२९॥ इति सम्प्रार्थ्य ते सर्वे भक्तास्तद्गतमानसाः । निषेदुश्च यथास्थानं तं प्रणम्येश्वरं पुनः ॥३०॥ उपविष्टेषु सर्वेषु सर्वेषां हितकृत्प्रभुः । किञ्चिद्विवक्षुस्तांस्तूष्णीमकरोत्करसंज्ञया ॥३१॥ तूष्णीं तेषूपविष्टेषु स्वास्यैककृतदृष्टिषु । मेघगम्भीरया वाचा प्रोवाच भगवानिदम् ॥३२॥ श्रीनारायणमुनिरुवाच- शृण्वन्तु मामकाः सर्वे मुनयश्च नराः स्त्रियः । अव्यग्रमनसो भक्ता ! वाच्यमानं मया वचः ॥३३॥ व्रतं जागरणेनैव सम्पूर्णफलदं भवेत् । अतोऽद्य जागरः कार्यः श्रीकृष्णगुणकीर्तनैः ॥३४॥ इत्युक्त्वा गापयामास कृष्णपद्यानि भूरिशः । संस्कृतानि प्राकृतानि मुक्तानन्दादिभिश्च सः ॥३५॥ तालिकावादनं कुर्वन्नुच्चैस्तैरपि कारयन् । स्वयं च तैः सह जगौ भक्तसङ्घमनोहरः ॥३६॥ आनन्दयन्भक्तजनान्स इत्थं तान्कारयञ्जागरणं नरेश ! । शुश्राव दीर्घं कृकवाकुशब्दं निशोऽन्तिमे याम ऋषिः पुराणः ॥३७॥

---

છો. આ પ્રકારે સર્વ શાસ્ત્રોમાં પ્રસિદ્ધ તમોને વારંવાર નમસ્કાર છે. [આ એકસોને આઠ નામની માલાના નિમિત્તથી શ્રીહરિના સ્વરૂપના જ્ઞાન માટે મુનિ વગેરેએ શ્રીહરિની સ્તુતિ કરી છે] (૨૬)

હે રાજન્ ! ત્યારબાદ સર્વે મુનિઓ અને હરિભક્તો બન્ને હાથ જોડીને શ્રીહરિના મુખારવિન્દમાં આરોપણ કરી છે નેત્રની વૃત્તિઓ એવા થકા શ્રીહરિને ભક્તિથી પ્રાર્થના કરવા લાગ્યાઃ હે ભક્તપ્રિય શ્રીહરે ! અમો પ્રાર્થના કરીએ છીએ. આપનાં હરિ,કૃષ્ણ, હરિકૃષ્ણ, નારાયણ મુનિ, સહજાનંદ, સ્વામિનારાયણ આદિ નામો જે સમગ્ર પાપના સમુદાયોને તથા દુઃખના સમૂહોને મૂળમાંથી નાશ કરવામાં મહાશૂરવીર સર્વ મંગલકારી છે. તે અમારી વાણીમાં નિશ્ચલપણે સર્વકાળમાં નિવાસ કરો. કારણકે વાણીનું સાફલ્ય આ જ છે કે ઠેસ ખાતાં, છીંક ખાતાં, પડી જતાં, જ્વર આદિ વ્યાધિમાં, બગાસું ખાતાં કે મૂર્છા મરણ અવસરમાં પરવશતાને પામીએ તો પણ અમારી વાણીમાં તમારાં નામામૃતો નિત્ય નિશ્ચલ નિવાસ કરો. હે સર્વાધીશ ! હે શ્રીહરે ! આપના પદારવિન્દને ત્યાગ કરીને ક્યારેય પણ દેહ, ગેહ, દ્રવ્યાદિકમાં અમારું મન પ્રવેશ કરો નહિ. પંરતુ આપના ચરણારિવન્દમાં જ આસકત રહો. આટલી જ અમારી અભિલાષા છે. તેને કૃપા કરી પૂર્ણ કરો અને અમારી ઉપર પ્રસન્ન થાઓ. (૨૭-૨૮-૨૯) હે રાજન્ ! આ પ્રકારે સર્વે ભક્તોએ પ્રાર્થના કરીને શ્રીહરિની મૂર્તિમાં એકાગ્ર ચિત્તવાળા ભક્તો અને સંતો શ્રીહરિને ફરી નમસ્કાર કરી યથાયોગ્ય સ્થાને બેઠા. (૩૦) બધા બેસી ગયા પછી સમગ્ર સ્વ-ભક્તમંડળનું હિત કરનારા શ્રીહરિએ કંઈ પણ કહેવાની ઈચ્છાથી સમગ્રજનોને હાથના સંકેતથી મૌન કર્યા. (૩૧) તે સર્વે ભક્તો મૌન બેઠાં, અને પોતાના મુખારવિંદમાં એકાગ્ર દષ્ટિવાળા થયા, પછી ભગવાન શ્રીહરિ મેઘની માફક ગંભીર વાણીથી બોલ્યા. (૩૨)

**શ્રી નારાયણમુનિ કહે છે** : હે ભક્તો ! મારા આશ્રિત મુનિઓ, પુરુષો તથા સ્ત્રીઓ તમે સર્વે એકાગ્રચિત્ત થઈ મારું વચન સાંભળો. (૩૩) એકાદશી આદિ જે કંઈ પણ વ્રત જાગરણથી જ સંપૂર્ણ ફળ આપનારું થાય. માટે આજે એકાદશીના વ્રતમાં શ્રીકૃષ્ણના ગુણકીર્તનોથી જાગરણ કરવું. (૩૪) હે રાજન્ ! આ પ્રકારે કહીને શ્રીહરિ સંસ્કૃત અને પ્રાકૃત એવાં ઘણાં કીર્તનો-શ્રીકૃષ્ણનાં પદો - મુક્તાનંદાદિ સાધુઓ દ્વારા ગવડાવતા હતા. (૩૫) ભક્તસંઘોના મનને હરનાર, સ્વયં શ્રીહરિ ઊંચેથી તાલીઓ વગાડતા સતા સાધુઓ પાસે કીર્તનાદિ ગવડાવતા હતા અને સાથે પોતે પણ ગાતા હતા. (૩૬) હે નરેશ ! આ પ્રમાણે અનાદિ-સ્વતઃસિદ્ધ સ્વરૂપ જેમનું છે એવા ઋષિ અર્થાત્ આદિ-આશ્રમનિષ્ઠ મુનિઓના ધર્મમાં નિષ્ઠાવાળા શ્રીહરિ ભક્તજનોને આનંદ આપતા જાગરણ કરાવતા સતા રાત્રિના છેલ્લા પ્રહરમાં ઉચ્ચ સ્વરે કૂકડાનો શબ્દ સાંભળતા હતા. (૩૭)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**आज्ञाप्य सर्वान् समुनीञ्जनांस्तांस्ततो विधातुं स च नित्यकर्म । नमस्कृतस्तैः पटमण्डपं स्वं समेत्य कर्माण्यकृतात्मनः षट् ।।३८।।** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे वृत्तालयदोलोत्सवे सायन्तनविधिनिरूपणनामा पञ्चपञ्चाशत्तमोऽध्यायः ।।५५।।

सुव्रत उवाच - **श्रीकृष्णस्याथ विधिवत्स कृत्वोत्तरपूजनम् । हैमीं मूर्तिं द्विजेन्द्राय प्रददौ धरणीपते ! ।।१।। ब्राह्मणान्भोजयामास शतशश्च सहस्रशः । यथेष्टघृतखण्डाढ्यैर्भक्ष्यैर्भोज्यैश्च तत्प्रियैः ।।२।। भोजयित्वा मुनीन्सम्यक् पार्षदादींश्च पूर्ववत् । पाकं कर्तुं समारेभे स्वावासे च स्वयं हरिः ।।३।। रामप्रतापेच्छारामौ सभार्यौ च तदैत्य तम् । प्रार्थयामासतू राजन्बहुधा विनयानतौ ।।४।। एतावत्कालपर्यन्तं त्वया पाकः स्वयं कृतः । स्वज्ञातिविप्रस्याभावाद्युक्तं तत्तव धर्मिणः ।।५।। साम्प्रतं तु वयं सर्वे त्वामेव शरणं गताः । त्वदन्तिके च स्थास्यामो यावज्जीवं सहान्वयाः ।।६।। अतोऽस्माभिः कृतं पाकमुपयोक्तुं त्वमर्हसि । कृतार्था हि भविष्याम एतावत्यैव सेवया ।।७।।** सुव्रत उवाच - **इति सोदरयोर्वाक्यं स निशम्य कृपानिधिः । तयोर्निष्कपटं भावं विदन्स्वस्मिन्नुवाच तौ ।।८।। एवमेवाचरिष्यामि मान्यत्वाद्युवयोरपि । निर्दम्भं मयि भावं वां जाने सपरिवारयोः ।।९।। एकैकस्मिन् दिने भोक्ष्य एकैकस्य गृहे हि वाम् । विधाय कृष्णनैवेद्यमाह्वातव्योऽहमन्वहम् ।।१०।। आमान्नादि मदर्थं च दद्युर्भक्तजनास्तु यत् । भवद्भ्यां तद्ग्रहीतव्यं पाकः कार्यो विशोध्य तत् ।।११।।**

---

પછી શ્રીહરિએ મુનિઓ સહિત તે સર્વ જનોને નિત્ય કર્મ કરવા માટે આજ્ઞા આપી. તેથી જનારા ભક્તોએ નમસ્કાર કર્યા. શ્રીહરિએ પોતાના પટમંડપ (તંબુ) માં જઈને પોતાનું ષટ્ કર્મ- સ્નાન સંધ્યા, જપ, હોમ, સ્વાધ્યાય, પિતૃતર્પણ અને દેવતાનું પૂજન કર્યું. (૩૮)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીયપ્રકરણે વૃત્તાલયદોલોત્સવે સાયંતનવિધિનિરૂપણ નામા પંચપંચાશત્તમોઽધ્યાયઃ (૫૫)*

## અધ્યાય : ૫૬

## શ્રીહરિની રામપ્રતાપ અને ઈચ્છારામના ગૃહોમાં અનુક્રમે ભોજનવ્યવસ્થા તથા દોલોત્સવનો નિર્ણય કહેલો છે.

**સુવ્રત મુનિ બોલ્યા :** હે ભૂમિપતે ! પછી શ્રીહરિએ સર્વતોભદ્ર મંડલમાં સ્થાપેલી કૃષ્ણની પ્રતિમાનું યથાવિધિ પૂજન કરીને સુવર્ણમયી તે કૃષ્ણની મૂર્તિ વિપ્રવર્ય શિવ યાજ્ઞિક બ્રાહ્મણને આપી. (૧) તે પછી હજારો બ્રાહ્મણોને યથેષ્ટ ઘૃત સાકરે યુક્ત માટે જ બ્રાહ્મણપ્રિય એવાં ભોજનો વડે સંતૃપ્ત કર્યા. (૨) મુનિઓને અને પાર્ષદો વગેરેને દશમીની રાત્રિની પેઠે રૂડી રીતે જમાડીને સ્વયં શ્રીહરિએ પોતાના ઉતારામાં રસોઈ કરવાનો આરંભ કર્યો. (૩) હે રાજન્ ! તે સમયે રામપ્રતાપ અને ઈચ્છારામ બંને ભાઈઓ, પત્નીઓ સાથે ભગવાનની સમીપે આવીને વિનયથી નમ્રતા યુક્ત ઘણા પ્રકારે પ્રાર્થના કરવા લાગ્યા. (૪) હે નીલકંઠ વર્ણીન્દ્ર ! આટલા સમય સુધી પોતાની જ્ઞાતિના વિપ્રના અભાવથી તમોએ પોતાના હાથથી રસોઈ કરી તે તો ધર્મિષ્ઠ તમોને યોગ્ય જ છે. (૫) હાલમાં તો પરિવારે સહિત અમો સર્વે તમારે શરણે આવેલાં છીએ અને જીવન પર્યન્ત તમારી સમીપમાં જ રહીશું. (૬) માટે અમોએ કરેલી રસોઈ જમવા માટે યોગ્ય છો. નાના પ્રકારનાં અન્ન રાંધીને તમોને જમાડવા રૂપી સેવાથી જ કૃતાર્થ થઈશું. (૭) **સુવ્રત મુનિ કહે છે :** હે રાજન્ ! આ પ્રમાણે બંને ભાઈઓનું વચન સાંભળીને કૃપાનિધિ શ્રીહરિ પોતાને વિષે તેમનો કપટે રહિત ભાવ જાણતાં પોતાના ભાઈઓ પ્રત્યે બોલ્યા. (૮) હે ભાઈઓ ! તમે બન્ને ભાઈઓ સત્કાર કરવા યોગ્ય હોવાથી તમારા કહ્યા પ્રમાણે આચરણ કરીશું, વળી પરિવારે સહિત તમારાં બંનેનો મારે વિષે નિષ્કપટ ભાવ યથાર્થપણે જાણું છું. (૯) તમારા બેમાં એક એકના ભવનમાં અનુક્રમે એક એક દિવસ ભોજન કરીશ. માટે દરરોજ કૃષ્ણને થાળ નિવેદિત કરીને મને બોલાવશો. (૧૦) ભક્તજનો મારા માટે કાચું સીધું વગેરે આપે, તે તમો બંનેએ ગ્રહણ કરવું તે શુદ્ધ કરી, રસોઈ કરવી. (૧૧)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

इत्युक्तौ तौ च तद्भार्ये आस्तां सुप्रीतमानसौ । प्रसन्नाश्चाभवन्सर्वे भक्ता अपि तदा नृप! ॥१२॥ रामप्रतापस्यावासे तस्मिन्नेव दिने ततः । पाकः कृतः सुवासिन्या पारणां तत्र सोऽकरोत् ॥१३॥ ततः स्वदर्शनं दातुं सर्वेभ्यो नृभ्य आत्मनः । पीठमुच्चमुपेत्याशु न्यषीदत्तत्र नाडिके ॥१४॥ कृताह्निकानां यूथानि नृणां तद्दर्शनाय च । आजग्मुर्दर्शनं कृत्वा जग्मुश्च कतिचित्ततः ॥१५॥ ब्रह्मचर्यव्रतस्थत्वाद्दिवानिद्रामनाचरन् । ततः स जनविश्रान्त्यै प्राविशद्दूष्यमात्मनः ॥१६॥ तत्रापि सोमसूराद्यैः पार्षदैर्वर्णिभिश्च सः । मुकुन्दाद्यैः सेविताङ्घ्रिर्निषसादासने शुभे ॥१७॥ ततोऽपराह्णसमये पीठमुच्चमुपेत्य सः। निषसाद वृतः स्वीयैः पार्षदादिभिरीश्वरः ॥१८॥ मुनयश्च जनाः सर्वे तावत्तत्रैत्य सत्वरम् । स्त्रियश्च गायकाद्याश्च यथोचितमुपाविशन् ॥१९॥ परितो वीक्षणेनैव भक्तान्सन्तोष्य तान्स्थितम् । प्रभुं प्रणम्य पप्रच्छुः कुबेराद्याः पुरौकसः ॥२०॥ दोलोत्सवस्तिथौ कस्यां नरनारायणप्रभोः । कर्तव्य इह तद्ब्रूहि सम्भारान्कारयाम भोः ! ॥२१॥ श्रीनारायणमुनिरुवाच - फाल्गुन्यां फाल्गुने मासि नक्षत्रेऽर्यमदैवते । नरनारायणस्याऽऽसीज्जन्म स्वायंभुवान्तरे॥२२॥ तदैव दिव्यदोलायामारोप्य विबुधाधिपैः । आन्दोलितोऽस्ति भगवान्प्रथितोऽसौ ततो महः ॥२३॥ भगवज्जन्म यत्र स्याच्छैशवादिक्रमेण तु । प्राधान्यं तत्र हि तिथेरन्यत्रर्क्षस्य निश्चितम् ॥२४॥ अस्माकं पूज्यदेवोऽस्ति नरनारायणः प्रभुः । स षोडशाब्दिको धर्मान्मूर्तौ जातो हि वर्णिराट् ॥२५॥ नक्षत्रव्रतमेवैतदार्यम्णर्क्षे ततोऽखिलैः । सूर्योदयस्पृशि जनैः कार्यमस्मन्मताश्रितैः ॥२६॥

---

હે રાજન્ ! આ પ્રકારે શ્રીહરિએ કહેલાં, બન્ને ભાઈઓ અને તેમની પત્નીઓ અત્યંત પ્રસન્ન મનવાળાં થયાં. તે સમયે સર્વે ભક્તો પણ પ્રસન્ન થયાં. (૧૨) પછી તે જ દિવસે (બારશને દિવસે) રામપ્રતાપના નિવાસમાં તેમની પત્ની સુવાસિનીએ રસોઈ કરી. શ્રીહરિએ રામપ્રતાપના નિવાસમાં પારણાં કર્યાં. (૧૩) પછી શ્રીહરિ સર્વ મનુષ્યોને પોતાનાં દર્શન આપવા માટે પોતાના ઊંચા સિંહાસનમાં તત્કાલ, બે ઘડીવાર માટે બેઠા. (૧૪) પછી આહ્નિક વિધિ પતાવીને કેટલાક માનવસમુદાયો શ્રીહરિનાં દર્શન કરવા આવ્યા. અને કેટલાક દર્શન કરીને ગયા; (૧૫) પછી શ્રીહરિ, બ્રહ્મચર્યવ્રતમાં રહેલા હોવાથી બીજાઓની શિક્ષાને અર્થે દિવસની નિદ્રાને નહિ કરતા છતાં બીજા લોકોને વિશ્રાંતિ આપવા માટે પોતાના તંબૂમાં ગયા. (૧૬) શ્રીહરિ, પોતાના તંબૂમાં પણ સોમ-સૂરાદિ- પાર્ષદો અને મુકુન્દાનંદાદિ વર્ણીઓએ સેવાયેલાં છે ચરણકમળ જેમનાં એવા થકા સુંદર પલંગ ઉપર બેઠા. (૧૭) પછી શ્રીહરિ સાંજના સમયે પોતાના પાર્ષદોથી વીંટાયેલા સતા ઊંચા પોતાના સિંહાસનની સમીપમાં જઈને તેમાં બેઠા. (૧૮) તેટલામાં સર્વે મુનિજનો, સ્ત્રીઓ અને ગાયકો તત્કાલ ત્યાં આવીને યથાયોગ્ય સ્થાને બેઠાં. (૧૯) સભાની સર્વ બાજુએ પોતાના કૃપાવલોકનથી જ સભામાં બેઠેલા ભક્તોને સંતોષ પમાડી રહેલા શ્રીહરિને કુબેરાદિ પુરના નિવાસીઓ પ્રણામ કરી પૂછતા હતા : (૨૦) હે હરે ! નારાયણ પ્રભુનો દોલોત્સવ આ પુરીમાં કઈ તિથિએ કરવાનો છે, તે કહો. જેથી તેને યોગ્ય સામગ્રીઓ અમો લાવીએ. (૨૧)

**શ્રી નારાયણ મુનિ બોલ્યા** - હે ભક્તો ! સ્વાયંભુવ મન્વંતરમાં, ફાગણ માસમાં, ફાગણ સુદી પૂર્ણિમાને દિવસે, અર્યમા દેવતાવાળા, ઉત્તરા ફાલ્ગુની નક્ષત્રમાં નરનારાયણનો પ્રાદુર્ભાવ થયો. (૨૨) તે જન્મ સમયે જ બ્રહ્માદિ દેવોએ શ્રીનરનારાયણને અલૌકિક દોલામાં બેસાડીને, સારી પેઠે હિંડોળ્યા હતા. તે દિવસને આરંભીને આ ઉત્સવ પ્રસિદ્ધ છે. (૨૩) જે દિવસે ભગવાનનો બાળભાવાદિ અનુક્રમથી જન્મ હોય તે દિવસે તો પ્રાદુર્ભાવનો ઉત્સવ તિથિપ્રાધાન્યથી પ્રવર્તે છે. બીજે ઠેકાણે તો અર્થાત્ એકદમ કિશોરભાવથી પ્રાદુર્ભાવમાં તો નક્ષત્રનું પ્રાધાન્ય નિર્ણય કરેલું છે. આપણા પૂજ્ય દેવ વર્ણીરાજ નરનારાયણ પ્રભુ તો ધર્મ થકી મૂર્તિમાં સોળ વર્ષની વયથી પ્રકટ થયા હતા માટે નક્ષત્ર પ્રાધાન્ય છે. (૨૪-૨૫) માટે આ ઉત્સવ નક્ષત્રવ્રતાત્મક હોઈને સૂર્યોદય સમયના સ્પર્શવાળા ઉત્તરા ફાલ્ગુની નક્ષત્રમાં જ અમારા ઉદ્ધવ મતમાં રહેલા સર્વ કોઈ જનોએ કરવો. (૨૬)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच – **इत्युक्त्वा तान्स भगवानपृच्छत्पुरतः स्थितम् । तदृक्षं मयरामाख्यं ज्योतिःशास्त्रविदं द्विजम् ॥२७॥ निष्कास्य वेष्टनात्सद्यस्तिथिपत्रं विलोक्य सः । ऊचे कृष्णप्रतिपदि तदृक्षं भवतीति तम् ॥२८॥ अथाह भगवान् पौरान् महः प्रतिपदि प्रभोः । कर्तव्य इति ते जग्मुस्तदुद्योगपराः पुरम् ॥२९॥ सत्सङ्गिनोऽन्यदेशीयास्तावदेत्य सहस्त्रशः । नत्वा तं प्रार्थयामासुर्भोजनार्थं पृथक् पृथक् ॥३०॥ ममावासेऽखिलैः साकं मुनिभिः पार्षदैर्द्विजैः । आगन्तव्यं भोजनार्थं श्वः परश्वोऽथवा त्वया ॥३१॥ इत्थं पृथक्पृथक्सर्वाञ्जनान्प्रार्थयतः प्रभुः । विलोक्य प्रहसन्नाह श्रूयतां मद्वचो जनाः ! ॥३२॥ भक्त्यैव खलु युष्माकं प्रीतोऽस्मि मुनिभिः सहः । पृथक् पृथग्भोजनार्थं कर्तव्यो नाऽऽग्रहस्ततः ॥३३॥ एकैकस्मिन्दिने भक्ता ! एकैकस्य गृहे पृथक् । अपि वर्षशतेनैतत्कथं पूर्येत भोजनम् ॥३४॥ तस्मादेकैकदेशीयैः संहत्यैव पृथक् पृथक् । मुनिसन्तर्पणं कार्यमेकैकस्मिन् दिने जनाः ! ॥३५॥ भक्ष्यैर्भोज्यैश्च विविधैर्लेह्यैश्चोष्यैश्च सद्रसैः । तृप्तेष्वेतेषु तृप्तोऽहमिति जानीत निश्चितम् ॥३६॥ साक्षान्मद्भोजनेच्छा चेद्युष्माकं तर्हि शोधितम्। मद्भ्रात्रावास आमान्नं भवन्तः प्रापयन्त्विह ॥३७॥ एवं कृते हि सर्वेषां सेत्स्यन्त्येव मनोरथाः । इत्युक्तास्ते जना जग्मुः स्वं स्वं स्थानं तथाऽऽचरन् ॥३८॥ ततः सायं स भगवान् नामसङ्कीर्तनं प्रभोः। चकार गापयामास तद्गुणांश्च महर्षिभिः ॥३९॥ स्वावासान् गन्तुमाज्ञाप्य पूर्वेद्युः कृतजागरान् । निजभक्तांस्ततः स्वामी जगाम स्वावमोचनम् ॥४०॥ तत्र नित्यविधिं कृत्वा धौतपादकराम्बुजः । सुखं निदद्रौ निद्रेशो ध्यान्नेव हितं सताम् ॥४१॥**

**સુવ્રત મુનિ બોલ્યા,** હે રાજન્ ! આ પ્રકારે ભગવાન શ્રીહરિ કુબેરાદિ ભક્તોને કહીને પોતાની આગળ બેઠેલા જ્યોતિષ શાસ્ત્રને જાણનાર મયારામ વિપ્રને ઉત્તરા ફાલ્ગુની નક્ષત્ર પૂછતા હતા. (૨૭) મયારામ વિપ્ર તત્કાલ જ પોતાની પાઘડીમાંથી પંચાંગ કાઢીને તેમાં જોઈને તે નક્ષત્ર ફાગણ વદી પડવાને દિવસે છે - આ પ્રમાણે શ્રીહરિને કહેતા હતા. (૨૮) પછી ભગવાન શ્રીહરિએ નરનારાયણનો મહોત્સવ ફાગણ વદી પડવાને દિવસે કરવાનો છે એમ કહ્યું. આ પ્રમાણે કહેવાયેલા પુરના ભક્તો ઉત્સવની સામગ્રી લાવવામાં તત્પર થઈને પુરમાં ગયા. (૨૯) તે સમયે બીજા દેશથી આવેલા સત્સંગીઓ શ્રીહરિની સમીપે આવીને નમસ્કાર કરી રસોઈમાં નાના પ્રકારના પાકો કરાવી શ્રીહરિને જમાડવા માટે પૃથક્ પૃથક્ પ્રાર્થના કરવા લાગ્યા. (૩૦) હે પ્રભો ! તમોએ સર્વ મુનિઓ, પાર્ષદો તથા બ્રહ્મચારી વગેરે તમારા અનુયાયિ બ્રાહ્મણોની સાથે ભોજન કરવા માટે મારા ભુવનમાં (ઉતારામાં) કાલે અથવા પરમ દિવસે આવવું. (૩૧) હે રાજન્ ! આ પ્રકારે જુદા જુદા પ્રાર્થના કરતા તે સર્વ જનોને જોઈને શ્રીહરિ હસતા હસતા બોલ્યા, હે જનો ! મારું વચન તમો સાંભળો. (૩૨) હું મુનિઓની સાથે તમારી ભક્તિથી જ પ્રસન્ન થયેલો છું. માટે ભિન્ન ભિન્ન ભોજન માટે આગ્રહ કરવો નહિ. (૩૩) હે ભક્તો ! એક એક દિવસે, એકએકના ગૃહમાં જુદું, તમોએ યાચના કરેલું ભોજન, સો વર્ષે પણ કેવી રીતે પૂર્ણ થાય ? કારણ કે સત્સંગીઓ તો લાખો છે અને સો વર્ષના દિવસો તો ૩૬ હજાર થાય માટે ભિન્ન ભિન્ન ભોજન બની શકે નહિ. (૩૪) માટે હે ભક્તજનો ! તમોએ એક એક દેશના સત્સંગીઓએ ભેગા થઈને જ મુનિઓને એક એક દિવસ પૃથક્ પૃથક્ ભોજન સંતર્પણ કરાવવું. (૩૫) સારા રસયુક્ત નાના પ્રકારના ભક્ષ્ય, ભોજ્ય, લેહ્ય, ચોષ્ય ભોજનોથી આ મુનિઓ તૃપ્ત થતાં, હું તૃપ્ત થયેલો છું. આ પ્રમાણે સત્ય જ તમે જાણો. (૩૬) જો તમારે પ્રત્યક્ષ મને ભોજન કરાવવાની ઈચ્છા હોય તો શુદ્ધ કરેલું કાચું અન્ન આ પુરમાં મારા ભાઈના નિવાસમાં મોકલો. (૩૭) આ પ્રમાણે કરશો તો સર્વેના મનોરથો સિદ્ધ થશે જ. હે રાજન્ ! આવી રીતે શ્રીહરિએ કહેલા ભક્તજનો પોતાને સ્થાને ગયા. શ્રીહરિએ કહ્યા પ્રમાણે જ આચરણ કરતા હતા. (૩૮) પછી ભગવાન શ્રીહરિ સાયંકાળે શ્રીકૃષ્ણનું નામ સંકીર્તન કરતા હતા. અને મુક્તાનંદાદિ મહામુનિઓની પાસે શ્રીકૃષ્ણના ગુણો ગવડાવતા હતા. (૩૯) પછી શ્રી સ્વામિનારાયણ ભગવાન એકાદશીને દિવસે જાગરણ કરનારા પોતાના ભક્તજનોને પોતાનાં નિવાસોમાં જવા માટે આજ્ઞા આપીને પોતાના ઉતારામાં ગયા. (૪૦) ત્યાં જઈને શ્રીહરિએ જળ વડે હસ્ત-પાદનું પ્રક્ષાલન કર્યું. સાંજનો નિત્યવિધિ પૂર્ણ કરી. પોતાના એક આશ્રયવાળી યોગનિદ્રાને સેવાનો અવસર આપતાં, સ્વાશ્રિત સાધુઓનું હિત-ચિંતન કરતાં, સુખપૂર્વક નિદ્રામાં પોઢ્યા. (૪૧)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

उषस्युत्थाय च पुनश्चक्रे नित्यविधिं हरिः । उत्सवोचितसम्भारांस्ततः पौरैरकारयत् ॥४२॥ चतुर्दश्यामपि प्रातः कृत्वा नित्यविधिं स्वकम् । पौरैः कृतांस्तु सम्भारान् सोऽर्थितस्तैर्ददर्श च ॥४३॥ लोके कुसङ्गिजनवन्मदुपाश्रयैस्तु होलादिनेषु पुरुषैर्न कदापि कार्यम् । गुह्याङ्गशब्दभषणं च खरावरोह इत्यात्मसंश्रितजनान्स तदाऽन्वशाच्च ॥४४॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे वृत्तालयदोलोत्सवे दोलोत्सवनिर्णयनिरूपणनामा षट्पञ्चाशत्तमोऽध्यायः ॥५६॥

सुव्रत उवाच – अथापरेद्युः कृतनित्यकर्मा पीठं स्वमुच्चं स उपेत्य राजन् ! । अध्यारुरोहाखिलभक्तसङ्घैस्तोष्टूयमानो विनयावनम्रैः ॥१॥ पौराङ्गनाः पूजयितुं तमीयुः सहस्रशस्तावदुदारभावाः । गृहीतसच्चन्दनपुष्पपात्राः पुंसोऽस्पृशन्त्यो नतगात्रवल्ल्यः ॥२॥ विज्ञाय तासां दृढभावमीश आज्ञापयामास निजार्चनाय । तदैव ता हर्षभृतान्तरङ्गाः प्रेम्णा तमात्माधिपतिं पुपूजुः ॥३॥ सुगन्धिना केसरचन्दनेन काश्मीरमिश्रेण सदक्षतैश्च । विचित्रवर्णोत्तमपुष्पहारैर्वस्त्रैः पुपूजुश्च विभूषणैस्तम् ॥४॥ सुस्वादुनानाफलपूरितानि निधाय पात्राणि तदन्तिके ताः। प्रेमाश्रुरुद्धेक्षणवृत्तयस्तं प्रणम्य जग्मुः शनकैश्च दूरम् ॥५॥ गता तिथिः पञ्चदशी तु नारीसम्पूजनस्वीकरणादिनैव । निद्राय किञ्चिन्निशि सार्धयामे शेषे जजागार स जागरूकः ॥६॥ उत्थाप्य तर्ह्येव मुकुन्दमुख्यान्स्वसेवकाञ्श्रीबदरीश्वरस्य । पूजां विधातुं महतीमशेषान्संसाधयामास महोपहारान् ॥७॥

શ્રીનારાયણ મુનિ ત્રયોદશીના પ્રાતઃકાળમાં ઊઠીને નિત્યવિધિ કરતા હતા. પછી પુરનાં જનો દ્વારા ઉત્સવને યોગ્ય સામગ્રી તૈયાર કરાવતા હતા. (૪૨) શ્રીહરિ ચૌદશને દિવસે પણ પ્રાતઃકાળમાં પોતાનો નિત્યવિધિ કરીને, પુરવાસી જે કુબેરાદિ ભક્તોએ પ્રાર્થના કરી તેથી તેમણે સંપાદન કરેલી ઉત્સવોપયોગી સામગ્રીને જોવા ગયા અને તે જોઈને તેમનો ઉત્સાહ વધે તે પ્રમાણે પ્રશંસા કરતા થકા શ્રીહરિ ભક્તોને કહેવા લાગ્યા : (૪૩)

હે ભક્તો ! મારો આશ્રય કરનારા પુરુષોએ લોકમાં કુસંગીજનોની માફક હોળીના દિવસોમાં સ્ત્રીપુરુષોનાં ગુહ્યાંગના શબ્દોનું ઉચ્ચારણ કરવું નહિ અને ગધેડા ઉપર ક્યારેય બેસવું નહિ. આ પ્રકારે શ્રીહરિ તે સમયે પોતાનાં આશ્રિતજનોને ઉપદેશ આપતા હતા. (૪૪)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીયપ્રકરણે વૃત્તાલયદોલોત્સવે, દોલોત્સવનિર્ણયનિરૂપણનામા ષટ્પંચાશત્તમોઽધ્યાયઃ (૫૬)*

## અધ્યાય : ૫૭

## હિંડોળામાં વિરાજમાન, ધર્મના પુત્રો નારાયણ અને નરનું પૂજન, શ્રીહરિએ લોક સંગ્રહાર્થે કર્યું તેનું વર્ણન છે.

**સુવ્રત મુનિ કહે છે :** હે રાજન્ ! પછી પૂર્ણિમાને દિવસે શ્રીહરિ નિત્યવિધિ પૂર્ણ કરીને સભાસ્થાનમાં, પોતાના સિંહાસન સમીપે ગયા અને ત્યાં વિનયથી નમ્ર સમગ્ર ભક્તજનોના સમુદાયોએ સ્તુતિ કર્યા થકા શ્રીહરિ સિંહાસન પર બિરાજમાન થયા. (૧) તે સમયે અતિ ભક્તિવાળી, ચંદન, પુષ્પોના સુંદર હાર હસ્તે ગ્રહણ કરી, પુરૂષોના સ્પર્શ રહિત સ્ત્રીઓ, સ્વાભાવિક લજ્જાથી જેમનો અંગ લતારૂપ દેહ નમેલો છે એવી, પુરની હજારો સ્ત્રીઓ શ્રીહરિને પૂજવા માટે આવી. (૨) શ્રીહરિએ પુરની સ્ત્રીઓનો અતિ દૃઢ પ્રેમ છે, એમ જાણીને પૂજન માટે તે સ્ત્રીઓને આજ્ઞા આપી. (૩) કંકુએ સહિત, કેસરે યુક્ત ચંદન, અક્ષત, નાના પ્રકારના વર્ણવાળા પુષ્પોના હારો અને નાના પ્રકારના અમૂલ્ય વસ્ત્રો અને વિચિત્ર અલંકારોથી શ્રીહરિને પૂજતી હતી. (૪) પુરની આ સ્ત્રીઓ અતિ સ્વાદિષ્ટ, નાના પ્રકારનાં ફળોથી ભરેલાં પાત્રો શ્રીહરિની સમીપમાં મૂકીને, સ્નેહનાં આંસુઓથી રોકેલી છે નેત્રની વૃત્તિ જેમણે એવી સ્ત્રીઓ શ્રીહરિને પ્રણામ કરીને ધીમે ધીમે દૂર જતી હતી. (૫) પૂર્ણિમા તિથિએ તો પુરની સ્ત્રીઓએ કરેલા પૂજનને અંગીકાર કરવાથી જ વ્યતીત થયેલી રાત્રિમાં, અલ્પનિદ્રા કરીને જાગવાના સ્વભાવવાળા શ્રીહરિ જાગ્યા. (૬) શ્રીહરિ તે સમયે જ મુકુંદાનંદ વર્ણી વગેરે હંમેશા પોતાની સેવામાં પ્રીતિવાળા પાર્ષદોને ઉઠાડીને શ્રીબદ્રિકાશ્રમના સ્વામી-શ્રીનરનારાયણ ભગવાનની મહાપૂજા કરવા માટે સમગ્ર મહાઉપચારોને ભેગા કરતા હતા. (૭)

स्नात्वा विधिं नैत्यकमाशु कृत्वा विप्रान्समाहूय विधिप्रवीणान् । नारायणस्याथ नरस्य मूर्तिं हैमीं समानर्च च पूर्ववत्सः ॥८॥ उपचारैः षोडशभिरावाहनपुरस्कृतैः । नरनारायणं भक्त्या पूजयित्वाऽभ्यवन्दत ॥९॥ सद्योऽथ कारिते दिव्ये नानास्तम्भोपशोभिते । दोलामबन्धयद्धैमीं मण्डपे सुमनोहरे ॥१०॥ तस्यां सुवर्णदोलायां युक्तायां मणिराजिभिः । बदरीशं स्थापयित्वा प्रणम्याभ्यर्चयत्पुनः ॥११॥ कस्तूरीकेसरोपेतं कर्पूराद्यभिमिश्रितम् । तस्मै भगवते प्रीत्या सोऽर्पयामास चन्दनम् ॥१२॥ नानाविधान् पुष्पहारान्नैवेद्यं च समर्प्य सः । आन्दोलयित्वा घटिकां चक्रे नीराजनं महत् ॥१३॥ हैमं पात्रं कराभ्यां विरचितकमलं मौक्तिकैः कान्तिमद्भिर्मध्ये कर्पूरदीपं स दधदभिमुखं श्रीविशालेश्वरस्य । तिष्ठंस्तद्ध्याननाट्यं विदधदथ शनैर्मण्डलाकारमूर्ध्वं पात्रं तद्भ्रामयन्वै निजजनहृदयान्याहरद्दोर्विलासैः ॥१४॥ नीराजने भगवता क्रियमाणे तु सर्वशः । भूमौ दिवि च वाद्यानि समवाद्यन्त भूरिशः ॥१५॥ देशान्तरीयाश्च तदा लोकाः सर्वे कृताह्निकाः । श्रुत्वा वाद्यध्वनिं शीघ्रं तत्राजग्मुः समुत्सुकाः ॥१६॥ चन्दनानि सुगन्धीनि पुष्पाणि विविधानि च । निधाय पात्रेषु तथा पूजाद्रव्याण्यनेकशः ॥१७॥ उपायनानि भूरीणि गृहीत्वा च पृथक् पृथक् । स्वस्वग्रामस्थलोकाश्च संहत्यैव परस्परम् ॥१८॥ नानाविधानि वाद्यानि वादयन्तोऽतिहर्षिताः। हरेर्मङ्गलगीतानि गायन्तस्ते समाययुः ॥१९॥ नीराजनस्य समये सर्वे ते तत्र सङ्गताः । चक्रुर्वाद्यध्वनिं हृष्टा मुखैरपि जयध्वनिम् ॥२०॥ स घोषस्तुमुलो जातो लक्षशश्च तदा नृणाम् । तालिकाध्वनिभिर्मिश्रो व्यानशे ककुभो दश ॥२१॥ गृहीत्वा रूप्यपात्रेभ्यो गुलालं प्रसृतैर्भृशम् । उच्चिक्षिपुः पार्षदाद्यास्तदा दोलान्तिके स्थिताः ॥२२॥ देवा ब्रह्मादयः सर्वे विस्मिताः खे तदा स्थिताः । कुर्वन्तः पुष्पवर्षाणि दुन्दुभींश्चाप्यवादयन् ॥२३॥

શ્રીહરિએ સ્નાન કર્યા બાદ નિત્યવિધિ કરી, પૂજાવિધિમાં પ્રવીણ બ્રાહ્મણોને બોલાવીને પછી નારાયણ અને નરની સુવર્ણ મૂર્તિ પધરાવીને એકાદશીની તિથિએ પૂજન કર્યું. (૮) આહ્‌વાન વગેરે ષોડશોપચારોથી ભક્તિપૂર્વક નરનારાયણને પૂજીને શ્રીહરિએ તે બન્નેની વંદના કરી. (૯) પછી પોતાના શિલ્પી પાસે તત્કાલ, નાનાવિધ સ્તંભોથી શોભાયમાન અત્યંત મનોહર હિંડોળો કરાવ્યો. (૧૦) પંચ વર્ણના મણિઓથી યુક્ત, તે સુવર્ણ દોલામાં બદરીશ શ્રી નરનારાયણની સ્થાપના કરી, પ્રણામ કરી ફરીથી પૂજા કરી. (૧૧) શ્રીહરિએ કસ્તૂરી, કેસરથી યુક્ત, કર્પૂરાદિથી મિશ્રિત, ચંદન ભગવાન શ્રીનારાયણને પ્રીતિથી અર્પણ કર્યું. (૧૨) શ્રીહરિએ નાના પ્રકારના પુષ્પના હારો અને દૂધપાક, બદરીનાં ફળો વગેરે તેમને અર્પણ કરી, એક ઘડી સુધી હિંડોળે હિંચકાવીને મહા નીરાજન (આરતી) કરી. (૧૩) અત્યંત દેદીપ્યમાન મોતીઓથી મધ્યમાં રચેલા કમળવાળું, પદ્‌મનાં મધ્યમાં (કર્ણિકામાં) કપૂરના દીપકવાળું,સુવર્ણમય પાત્ર બન્ને હાથથી ધારણ કર્યું. શ્રી નરનારાયણની સન્મુખ ઊભા રહીને અને શ્રી નરનારાયણનું ધ્યાન કરતાં શ્રીહરિ મધ્યમાં કપૂરના દીવાયુક્ત સુવર્ણ પાત્રને ધીરે ધીરે ઊંચે ગોળાકાર જેમ હોય તેમ ફેરવતા ફેરવતા, પોતાના હાથોના વિલાસોથી સ્વભક્ત જનોનાં હૃદયોને પોતાની મૂર્તિમાં ખેંચતા હતા. (૧૪) ભગવાન શ્રીહરિએ આરતી કરી તે વેળાએ પૃથ્વીમાં અને સ્વર્ગમાં સર્વે વાજિંત્રો, દુંદુભિ વગેરે અતિશય વાગતાં હતાં. (૧૫) તે સમયે દેશાન્તરના સર્વે જનોએ આહ્નિક વિધિ પતાવીને વાદ્યોનો ધ્વનિ સાંભળ્યો. તેથી હરિદર્શનની ઉત્કંઠા થઈ. અને તત્કાલ શ્રી નરનારાયણના મંડપમાં આવ્યા. (૧૬) સુગંધીમાન ચંદન તથા વિવિધ પ્રકારનાં પુષ્પો તથા અનેક પ્રકારની પૂજાની સામગ્રીઓ પાત્રોમાં મૂકીને તેમજ ઘણી ભેટો પાત્રોમાં મૂકીને, જુદાં જુદાં ગ્રહણ કરી, પોતપોતાના ગામના લોકો પરસ્પર મળીને જ નાના પ્રકારના તાસ, ઝાંઝ, મૃદંગ, વગેરે વાજિંત્રો વગાડતા, અતિ હર્ષ પામેલા સતા શ્રીહરિનાં માંગલિક ગીતો ગાતા ગાતા ત્યાં આવ્યા. (૧૭-૧૮-૧૯) શ્રીહરિએ કરેલી નારાયણની આરતીના સમયમાં, મંડપની સમીપમાં આવેલા સર્વે લોકો હર્ષ પામીને, વાદ્ય ધ્વનિ તથા મુખેથી જયનાદનો શબ્દોચ્ચાર કરતા હતા. (૨૦) તે સમયે તે ઘોષ લાખો માણસોના તાળીઓના ધ્વનિથી મળેલો, માટે જ અત્યંત તીવ્ર થયો અને દશે દિશામાં વ્યાપી ગયો. (૨૧) તે સમયે હિંડોળાની સમીપે રહેલા મુકુંદાનંદ વર્ણી વગેરે પાર્ષદો ચાંદીનાં પાત્રોથી ગુલાલને મૂઠીએ મૂઠીએ ગ્રહણ કરી અતિશય ફેંકતા હતા. (૨૨) તે સમયે આકાશ માર્ગમાં પોતપોતાના વિમાનોમાં રહેલા વિસ્મય પામેલા બ્રહ્માદિ સર્વ દેવો પુષ્પોનો વરસાદ કરતા હતા. અને અતિ આનંદથી દુંદુભિઓ વગાડતા હતા. (૨૩)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

तुष्टुवुर्मुनयः सर्वे गन्धर्वाश्च जगुर्भृशम् । नृत्यमप्सरसश्चक्रुर्देवाश्चान्ये जयध्वनिम् ॥२४॥ महोत्सवे जायमाने सर्वत्रैवं स सत्पतिः । कुर्वन्नीराजनं तस्य प्रभोरित्यवदत्स्वयम् ॥२५॥ जय देव! जय देव ! जय मङ्गलधामन् ! २ नारायण! पुरुषोत्तम ! २ नरसख ! सकलात्मन् ! जय देव ! २ । ध्रुवपदम् । भास्करचारुरुचौ च प्रसरद्बहुकिरणे २ नानारत्नसमुच्चित २ मणिनिकराभरणे । मण्डपमध्यविराजितदोलासनसारे २ वन्दे त्वां स्थितमीशं २ सुरनरपरिवारे जय देव० ॥२६॥ हीरकवरपरिकान्तं दधतं द्युतिविमलं २ वन्दे त्वां मकराकृति २ कुण्डलवरयुगलम् । रत्नोज्ज्वलतरमुकुटं शिरसा च दधानं २ चञ्चललोचनवीक्षण २ कृतबहुसुखदानं जय देव० ॥२७॥ चञ्चद्वस्त्रनिवीते विद्युद्द्युतिवलये २ केयूरे च कराभ्यां २ दधति त्वयि निलये । नानाहारविराजितहृदये मम चित्तं २ रमतां सुखदे नित्यं २ त्वदनुस्मृतिवित्तं जय देव० ॥२८॥ नूपुरशोभितचरणं करधृतवरकमलं २ ईषद्धास्यविसर्पित २ दशनद्युतिपटलम् । ध्यायामि प्रभुमेकं सततं हृदयेऽहं २ त्वामिति पाहि सदा मां २ निजजनमतिगेहं जय देव० ॥२९॥ सर्वशः सकलात्मा सुरनरमुनिपाता २ स्वामी सम्मत एक २ स्त्वमतोऽखिलधाता । मामिति शरणायातं ह्युद्धर भवसिन्धो २ र्नारायण! बदरीश्वर ! २ देव ! दयासिन्धो ! जय देव० ॥३०॥ इत्थं सङ्कीर्तयन्नेव कृत्वा नीराजनं हरिः । मन्त्रपुष्पाञ्जलिं दत्त्वा चक्रे तस्य प्रदक्षिणाम् ॥३१॥ प्रणामं च पुनः कृत्वा दण्डवद्भक्तिसंयुतः । बद्धाञ्जलिपुटोऽस्तौषीन्नरनारायणं प्रभुम् ॥३२॥

સર્વે મુનિઓ શ્રીહરિની સ્તુતિ કરતા હતા. ગંધર્વો અતિશય ગાન કરતા હતા. અપ્સરાઓ અતિ હર્ષથી નાચ કરતી હતી. બીજા દેવો જયધ્વનિ કરતા હતા. (૨૪) આવી રીતે આખા બ્રહ્માંડમાં મહોત્સવ થતો હતો, ત્યારે સત્પુરુષોના સ્વામી શ્રીહરિ ભારતવર્ષના અધિપતિ શ્રી નરનારાયણની આરતી કરતાં કરતાં નિરાજન (આરતી) નું પદ બોલતા હતા. (૨૫) હે દેવ ! તમો જય પામો તમો, જય પામો. ભારતવાસી પોતાના એકાંતિક ભક્ત જનોના ધર્મની વૃદ્ધિ માટે, પોતાનો ઉત્કર્ષ પ્રકટ કરો. હે મંગલોના આશ્રય ! હે નારાયણ ! હે પુરુષોત્તમ ! હે નરના મિત્ર ! હે સર્વના અંતર્યામી ! તમો જય પામો, જય પામો. સૂર્ય સમાન મનોહર કાંતિવાળા, માટે જ કિરણો પ્રસારિત કરનારા, અનેક પ્રકારના મણિઓથી મિશ્રિત થયેલા, જે ઉત્તમ મણિઓના સમુદાયોના આભૂષણ-ધારણ કરનારા, જેની ચોતરફ દેવો અને મનુષ્યો વીંટાયેલા ઊભા છે એવા, મંડપના મધ્યમાં રહેલા દોલામાં વિરાજમાન પરમેશ્વર, તમોને હું નમસ્કાર કરું છું. (૨૬) અંદર જડેલા ઉત્તમ પ્રકારના હીરાઓથી સર્વ પ્રકારે મનોહર અત્યંત નિર્મલ, મકરાકૃતિવાળા શ્રેષ્ઠ કુંડલની જોડીને બંને કર્ણમાં ધારણ કરનારા, મધ્યમાં જડેલા ઉત્તમ રત્નોથી અતિ ચળકતો જે મુકુટ તેને મસ્તક ઉપર ધારણ કરનારા, ચંચલ બન્ને નેત્રો રૂપી કમળોથી, કૃપાપૂર્વક જોવાથી, જેમણે પોતાના ભક્તોને ઘણું સુખ આપ્યું છે, એવા તમોને હું નમસ્કાર કરું છું. (૨૭) સુવર્ણ સૂત્રોથી નિર્માણ કરેલ હોવાથી પ્રકાશમાન જે વસ્ત્ર, (કોર-પાલવ યુક્ત) તેને કંઠમાં હારની માફક લાંબું બન્ને તરફ ધારણ જેમણે કર્યું છે એવા, વીજળીની માફક કાંતિવાળા કડાં અને બાજુબંધો બન્ને હાથમાં ધારણ કરનારા, પોતાના ભક્તજનોના રમવાના સ્થળ રૂપ, નાના પ્રકારના પુષ્પોના હારોથી શોભાયમાન હૃદયવાળા, સુખ આપનારા, તમારા વિષે, તમારી અનુસ્મૃતિ છે ધન, જેને એવું મન, નિત્ય ક્રીડા કરો. અર્થાત્ હંમેશાં તમારું ચિંતવન કરો. (૨૮) નૂપુરોથી શોભાયમાન ચરણકમળો જેનાં છે એવા, જમણા હાથમાં ધારણ કર્યું છે, ઉત્તમ કમળ જેમણે એવા, મંદ હાસ્યથી ચોતરફ પ્રસરતા દાંતની કાંતિના સમૂહો જેના છે એવા અનુપમ પ્રભુને હું નિરંતર હૃદયમાં ધ્યાન કરું છું. નૈષ્ઠિક ધર્મમાં રહેલા આ પોતાના સેવક એવા મારું હંમેશા રક્ષણ કરો. (૨૯) હે નારાયણ ! હે બદરીશ ! હે દિવ્ય મૂર્તે ! હે દયાસિન્ધો ! સર્વના અધિપતિ ! સર્વાધાર ! તમે દેવો, મનુષ્યો-ભારતવાસી જનો, તથા મુનિઓ જે, નારદાદિ ઋષિઓનું રક્ષણ કરનારા તેમજ સમગ્રનું પોષણ કરનારા છો માટે એક તમો જ સમગ્ર ઐશ્વર્યના સાગર માનેલા છો. આવી રીતે ચિન્તવન કરી શરણે આવેલા મને સંસારસાગરથી ઉદ્ધાર(= પાર) કરો. (આ ભક્તજનોને શિક્ષા માટે કહ્યું છે.) (૩૦)

હે રાજન્ ! આ પ્રકારે શ્રીહરિએ આરતીનું પદ બોલતાં બોલતાં જ આરતી કરી. અને પુષ્પાંજલિ આપીને શ્રીનરનારાયણની પ્રદક્ષિણા કરી. (૩૧) પરમ પ્રેમે સહિત શ્રીહરિ ફરીથી દંડવત્ પ્રણામ કરીને બન્ને હાથ જોડીને પ્રભુ શ્રીનરનારાયણની સ્તુતિ કરતા હતા. (૩૨)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**अथौत्सुक्येन सम्प्रार्थ्य तं प्रणम्य ततो द्विजान् । नारायणमुनिः प्रीत्या पूजयामास सर्वशः ॥३३॥ वस्त्रैराभरणै रत्नैर्गोभूस्वर्णगजादिभिः । तान्प्रीणयित्वा भगवान् पूजां तामसमापयत् ॥३४॥ न ब्राह्मणेभ्य इह तस्य किमप्यभीष्टं न ब्राह्मणेभ्य उत तस्य किमप्यदेयम् । तान्प्रीणयन्ननुसवं तदभीष्टदानैर्ब्रह्मण्यदेव इति स प्रथितस्ततोऽभूत् ॥३५॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे वृत्तालयदोलोत्सवे दोलारूढनरनारायणार्चनविधिनिरूपणनामा सप्तपञ्चाशत्तमोऽध्यायः ॥५७॥

सुव्रत उवाच - **ततो वृतः सोममुकुन्दमुख्यैः स्वभृत्यवर्गैर्निजपीठमेत्य । सिताम्बरोऽध्यारुहदाशुकारी स भक्तसङ्घेक्षणवृत्तिहारी ॥१॥ तदा जयेति ध्वनिरास भूयान्वादित्रघोषश्च महान्बभूव । प्रभुश्च भक्तानखिलानुपेतानतीतृपत् स्निग्धसमीक्षणेन ॥२॥ तदा कुबेरः सहयौवनाश्वस्तक्षादयश्चामुमुपेत्य भक्त्या । महार्हवस्त्राभरणैश्च गन्धैः पौष्पैश्च हारैर्विविधैः पुपूजुः ॥३॥ आनर्चुरन्येऽपि जनास्तमीशं देशान्तरीया ननु पूर्ववच्च । वस्त्रैश्च नानाविधभूषणाद्यै राजोपचारैः स्तुतिभिश्च नत्या ॥४॥ तावत्तु पौरा महतः कटाहानानिन्यिरे केसररङ्गपूर्णान् । भृतानि शोणैरपि गर्गरीणां रङ्गैः शतानि द्रुतमाहरंश्च ॥५॥ ह्रदांश्च कुम्भैरपि कृत्रिमांस्ते त्वानीय रङ्गान् बिभराम्बभूवुः । तत्राऽऽहरन् जानपदास्तु सर्वे भृतान् गुलालैः पृथुकोष्टलांश्च ॥६॥ सहस्रशो रङ्गविमोचनानि यन्त्राणि हर्षेण सरेचकानि। तत्राहरन्पौरजनाः समेतास्तेनात्मभर्त्रा सह रन्तुकामाः ॥७॥**

---

હે રાજન્ ! પછી શ્રીનારાયણ મુનિએ ઉત્સાહથી શ્રીનરનારાયણને પ્રાર્થના કરી, પ્રણામ કરી, સર્વે બ્રાહ્મણોની પ્રીતિથી પૂજા કરી. (૩૩) શ્રીહરિએ વસ્ત્રો, આભૂષણો, રત્નો, ગાયો, પૃથ્વી, સુવર્ણ અને હાથી-અશ્વો, વગેરેનું બ્રાહ્મણોને દાન કરી, સંતોષ પમાડી, પૂજાની સમાપ્તિ કરી. (૩૪)

આ લોકમાં શ્રીહરિને બ્રાહ્મણોથી અતિશય બીજું કાંઈ પ્રિય નથી. અર્થાત્ સર્વથા બ્રાહ્મણો જ પ્રિય છે અને વળી બ્રાહ્મણોને ન આપવા યોગ્ય તેમને કોઈ વસ્તુ નથી પરંતુ સર્વ વસ્તુ દાન કરવા યોગ્ય છે, માટે શ્રીહરિ બ્રાહ્મણોને તેમના અભીષ્ટ દાનોથી સર્વકાળે પ્રસન્ન કરવાથી આ ભૂમિમાં બ્રહ્મણ્યદેવ એટલે કે બ્રાહ્મણોના હિતકારી એવા સાર્થક નામથી વિખ્યાત થયા. (૩૫)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે વૃત્તાલયદોલોત્સવે દોલારૂઢનરનારાયણાર્ચનવિધિનિરૂપણ નામા સપ્તપંચાશત્તમોઽધ્યાયઃ (૫૭)*

## અધ્યાય : ૫૮

## દોલોત્સવમાં શ્રીહરિની રંગક્રીડાનું અને ભક્તોની પરસ્પર રંગક્રીડાનું નિરૂપણ કરેલું છે.

**સુવ્રત મુનિ બોલ્યા :** હે રાજન્ ! પછી શ્વેત વસ્ત્રધારી તત્કાલ કાર્યકારી શ્રીહરિ, સોમવર્મા અને મુકુન્દવર્ણી મુખ્ય જેમાં છે એવા પોતાના પાર્ષદ સમૂહોથી વીંટાયેલા ભક્તોના સંઘોની નેત્રવૃત્તિને હરનારા, પોતાના સિંહાસનની સમીપમાં આવીને તે ઉપર બેઠા. (૧) તે સમયે 'જય જય' આ પ્રકારનો મહાધ્વનિ સમગ્ર જનોએ ઉચ્ચાર્યો. મહાવાજિંત્રોનો ધ્વનિ થયો. શ્રીહરિ પ્રીતિયુક્ત દૃષ્ટિથી સમગ્ર જનોને જોતા હતા. ભક્તોને પ્રસન્ન કરતા હતા. (૨) તે સમયે જોબનપગીએ સહિત કુબેર ભક્ત અને તખોપગી વગેરે પુરનાં જનો શ્રીહરિની સમીપમાં આવીને મહા અમૂલ્ય વસ્ત્રો, આભૂષણો, ચંદન અને વિવિધ પ્રકારના પુષ્પહારો વડે ભક્તિ પૂર્વક પૂજા કરતા હતા. (૩) બીજાં દેશાન્તરથી આવેલાં જનો પણ વસ્ત્રો અને નાના પ્રકારના આભૂષણો, પુષ્પના હારો, છત્ર, ચામર, મુકુટાદિ મહારાજાને યોગ્ય ઉપચારોથી અને સ્તુતિઓ, સાષ્ટાંગ નમસ્કાર વગેરેથી પૂર્વની માફક (એકાદશીની માફક) પૂજા કરતાં હતાં. (૪) તે સમયમાં કુબેર, જોબન વગેરે પુરના ભક્તો, કેસરિયા રંગથી ભરેલાં મોટાં કઢાયાં અને લાલ રંગથી પરિપૂર્ણ ઘણા ઘડાઓ જલદી ઉપાડીને લાવ્યા. (૫) પછી પુરના ભક્તોએ ઘડે ઘડે રંગજળ લાવીને, ઊંડા હોઝ ભરી દીધા. દેશાન્તરના લોકો તો ગુલાલ ભરેલા મોટા કોથળા ઉપાડી લાવ્યા. (૬) પોતાના સ્વામી શ્રીહરિની સાથે રંગે રમવાની ઈચ્છાથી ભેગાં થયેલાં પુરજનો, રંગ ઉડાડવાની પિચકારી, સુવર્ણાદિ ધાતુની અને વાંસની હજારો પિચકારીઓ, યંત્રો(બંબા) એ સહિત શ્રીહરિ સમીપે લાવતા હતા. (૭)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

विलोक्य तान्बद्धकटीनुपेतान्विहर्तुकामान्निजभक्तसङ्घान् । मनोरथं पूर्णमसौ नरेश ! तेषां निजानामचिकीर्षदाशु ॥८॥ दत्त्वा स्वभूषादि ततो द्विजेभ्यो बध्वा कटिं पीतपटेन तूर्णम् । जग्राह हैमं स तु रेचकं स्वे पाणौ हसन्हासितभक्तसङ्घः ॥९॥ स्त्रीणां तु वृन्दान्यतिदूरतोऽसौ विधाय सद्यः करसंज्ञयैव । विक्रीडितुं भक्तजनान्यथेष्टमाज्ञापयामास गृहीतरङ्गः ॥१०॥ प्रवर्षयामास स रङ्गधाराः साकं गुलालप्रसृतैर्महद्भिः । समीपवर्तिष्वपि दूरदेशसंस्थेषु भक्तेषु समानवर्ती ॥११॥ चक्रेऽभिषेकः परितश्च तस्मिन्मुनिव्रजै रेचकमुक्तरङ्गैः । क्षिपद्भिराराच्च गुलालमुष्टीन् गायद्भिरेवास्य गुणान्हसद्भिः ॥१२॥ परस्परस्योपरि यूथशस्ते रङ्गं गुलालं च भृशं क्षिपन्तः । हरेः समीपे मुनयो जनाश्च जरद्युवार्भाश्च चिरं विजह्रुः ॥१३॥ यूथक्रीडां विहायैव चिक्रीडुर्द्वन्द्वशस्ततः । प्रीणनार्थं भगवतो मुनयः पार्षदादयः ॥१४॥ रामप्रतापेच्छारामौ निजदेशानुसारिणीम्। कुर्वन्तौ रेचकक्रीडां हासयामासतुर्हरिम् ॥१५॥ मुक्तानन्देन गोपालानन्दश्चिक्रीड सन्मुनिः । ब्रह्मानन्दस्तदा नित्यानन्देन मुनिराड् नृप! ॥१६॥ सच्चिदानन्दमुनिना शतानन्दश्च मद्गुरुः । चिक्रीड भूधरानन्दः शुकानन्देन चर्षिणा ॥१७॥ मुनी गुणातीतानन्द आनन्दानन्द इत्युभौ । रेमाते च दयानन्दो निष्कुलानन्द इत्युभौ ॥१८॥ महानुभावानन्देन प्रेमानन्दः स्म खेलति । चैतन्यानन्दमुनिना पूर्णानन्दस्तथा मुनिः ॥१९॥ रेमाते भजनानन्दः परमानन्द इत्युभौ । स्वयंप्रकाशानन्दश्च वृद्धात्मानन्द इत्युभौ ॥२०॥ रेमे च राघवानन्दो ज्ञानानन्देन साधुना । रेमाते चाद्भुतानन्दः सर्वज्ञानन्द इत्युभौ ॥२१॥ आत्मानन्देन भगवदानन्दोऽरंस्त तत्क्षणम् । योगानन्दशिवानन्दौ रेमाते च तथेतरे ॥२२॥

---

હે નરેશ ! દૃઢ કેડ્યો બાંધીને આવેલા,પોતાની સાથે ક્રીડા કરવા ઈચ્છતા તે ભક્તોના સમૂહો જોઈને શ્રીહરિ પોતાનાં ભક્તજનોના મનોરથ પૂર્ણ કરવા માટે તત્કાલ ઈચ્છા ધરાવતા હતા. (૮) પછી શ્રીહરિ પોતાના અલંકારો વગેરે બ્રાહ્મણોને આપીને તત્કાલ કેસરી વસ્ત્રથી કેડ્ય બાંધીને સ્વયં હસતા જાય અને ભક્તસમૂહને હસાવતા જાય, તેમ કરતાં હસ્તે સુવર્ણની પિચકારી ગ્રહણ કરી. (૯) શ્રીહરિએ પોતાના હસ્તના સંકેતથી સ્ત્રી-સમુદાયોને અતિદૂર કરીને, પોતાના સમીપે રંગપાત્ર લઈને સમગ્ર ભક્તજનોને પોતાની ઈચ્છાપૂર્વક રમવાની આજ્ઞા આપી. (૧૦) શ્રીહરિએ મોટા ગુલાલના ખોબા સાથે, પિચકારીઓથી ફેંકેલી રંગની ધારાઓની, સમીપે રહેલા ભક્તો અને દૂર રહેલા ભક્તો ઉપર પણ સમાન પણે વૃષ્ટિ કરી. (૧૧) પિચકારીઓથી નાખેલા રંગો અને ગુલાલની મૂઠીઓ, દૂર અથવા સમીપમાં ફેંકતા, શ્રીહરિના ગુણોને ગાતા અને હસતા મુક્તાનંદાદિ મુનિ સમૂહોએ શ્રીહરિની ઉપર ચોતરફથી રંગ અને ગુલાલનો અભિષેક કર્યો. (૧૨) વૃદ્ધો, યુવાનો અને કુમારો, મુનિઓ અને ભક્તો - પરસ્પર ઉપર રંગ અને ગુલાલ અતિશય ફેંકતા હતા. શ્રીહરિની સમીપે સમગ્ર સમુદાય અંદરો અંદર લાંબા સમય સુધી રંગક્રીડા કરતો હતો. (૧૩) પછી મુનિઓ અને પાર્ષદો વગેરે સમૂહ ક્રીડાનો ત્યાગ કરીને ભગવાનને પ્રસન્ન કરવા માટે બે-બે જણ ક્રીડા કરતા હતા. (૧૪) રામપ્રતાપ અને ઈચ્છારામ બે ભાઈઓ પોતાના દેશને અનુસરી રંગક્રીડા કરતાં કરતાં શ્રીસ્વામિનારાયણ ભગવાનને હસાવતા હતા. (૧૫) હે રાજન્ ! તે સમયે મુક્તાનંદ મુનિ સાથે તુલ્ય ગુણવાળા શ્રેષ્ઠ સાધુ ગોપાલાનંદ મુનિ રમતા હતા. મુનીંદ્ર બ્રહ્માનંદ નિત્યાનંદ મુનિની સાથે રંગક્રીડા કરતા હતા. (૧૬) (સુવ્રત મુનિ કહે છે કે) મારા ગુરુ શતાનંદ મુનિ સચ્ચિદાનંદ મુનિની સાથે રંગક્રીડા કરતા હતા. ભૂધરાનંદ મુનિ શુકાનંદ મુનિ સાથે ક્રીડા કરતા હતા. (૧૭) ગુણાતીતાનંદ-આનંદાનંદ બન્ને મુનિઓ અને દયાનંદ, નિષ્કુળાનંદ બન્ને મુનિઓ ક્રીડા કરતા હતા. (૧૮) પ્રેમાનંદ મુનિ મહાનુભાવાનંદ મુનિની સાથે ખેલતા હતા તથા પૂર્ણાનંદ મુનિ ચૈતન્યાનંદ મુનિ સાથે રમતા હતા. (૧૯) ભજનાનંદ- પરમાનંદ આ બન્ને મુનિઓ અને સ્વયંપ્રકાશાનંદ-વૃદ્ધાત્માનંદ આ બન્ને મુનિઓ રંગે રમતા હતા. (૨૦) રાઘવાનંદ મુનિ જ્ઞાનાનંદ સાધુની સાથે રમતા હતા. અદ્‌ભુતાનંદ-સર્વજ્ઞાનાનંદ આ બન્ને મુનિઓ રમતા હતા. (૨૧) ભગવદાનંદ મુનિ, યુવાન(નાના) આત્માનંદ મુનિની સાથે તે સમયે રમતા હતા. યોગાનંદ, શિવાનંદ આ બન્ને રમતા હતા. તેવીરીતે કૃપાનંદ-અક્ષરાનંદ વગેરે બીજા મુનિઓ બેબે જણ થઈને પરસ્પર રમતા હતા. (૨૨)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

मुकुन्दानन्दवर्णीन्द्रो जयानन्देन वर्णिना । सह सोमेन सूरश्च रेमे भृगुजिताऽलयः ॥२३॥ हेमन्तसिंहेन समं वास्तुश्चिक्रीड भूपतिः । साकं च मयरामेण क्रीडां चक्रे प्रयागजित् ॥२४॥ चिक्रीड यौवनाश्वश्च कुबेरेण समं तदा । द्वन्द्वीभूयैवमन्येऽपि रेमिरे मुदिता जनाः ॥२५॥ अजानन् रेचकक्रीडां सोमो रङ्गभृतं घटम् । सद्यो गृहीत्वा सूरस्य मूर्ध्न्यसिञ्चद्धसन्भृशम् ॥२६॥ तदा सूरो बलिष्ठत्वात्पातयित्वैव तं भुवि। गुलालप्रसृतैस्तस्य मुखं नेत्रेऽभरद्धसन् ॥२७॥ सूरेण पातितं सोमं ब्रह्मानन्दोऽवलोक्य च । नित्यानन्दं विसृज्यैव सूरं जग्राह तत्क्षणम् ॥२८॥ रङ्गक्लिन्नं मुखं तस्य गुलालेन व्यलिम्पयत् । तावत्सूरोऽपि जग्राह तं शिखायां स्वपाणिना ॥२९॥ गुलालं पुष्टमुष्ट्यैव तद्दृशोः प्रक्षिपन्भृशम् । चकार सम्भ्रान्तमिव तं मुनिं स तु भूपते ! ॥३०॥ दृग्रोधव्याकुलस्तस्य खल्वाटत्वं स विस्मृतः । पुनः पुनः शिखां धर्तुं करं चिक्षेप शीर्षणि ॥३१॥ तदा हसन् स भगवान्पीठादुत्प्लुत्य सत्वरम् । सूरं गृहीत्वा तन्मूर्ध्नि न्यषिञ्चद्रङ्गगर्गरीम् ॥३२॥ गुलालस्याञ्जलींस्तस्मिन्प्रक्षिप्य च पुनः पुनः । जनयामास लोकानां पद्मरागोच्चयभ्रमम् ॥३३॥ अकस्मान्मयरामेण प्रक्षिप्तेनावरुद्धदृक् । गुलालेनाशु जग्राह रङ्गकुम्भं प्रयागजित् ॥३४॥ रङ्गबिन्दोः पातभयान्स्वमुखे स तु वाडवः । नतपृष्ठो हासितेशः कुम्भं दृष्ट्वाऽपलायत ॥३५॥ द्वन्द्वशः क्रियमाणासु क्रीडास्वित्थं स ईश्वरः । रङ्गक्लिन्नां दर्शयितुं सर्वानैच्छन्निजां तनुम् ॥३६॥ अश्वं जविनमारुह्य गीयमानगुणो जनैः । प्रदक्षिणीचकाराशु जनसङ्घानशेषतः ॥३७॥ रङ्गं गुलालं च भृशं प्रक्षिपन्तः पदे पदे । तमन्वधावन्मुनयो जनयूथानि च प्रभुम् ॥३८॥

---

મુકુન્દાનંદ વર્ણીન્દ્ર, જયાનંદવર્ણિની સાથે અને સુરાખાચર સોમલાખાચરની સાથે, અલૈયો ભગુજીની સાથે એમ (એકબીજાની જોડે) રમતા હતા. (૨૩) વસ્તા નૃપતિ હેમંતસિંહ રાજાની સાથે અને પ્રયાગજી જે શ્રીહરિના પુરાણી, તે મયારામ ભટ્ટની સાથે ક્રીડા કરતા હતા. (૨૪) તે સમયે જોબન પગી કુબેર પટેલની સાથે, અને એ રીતે બે-બેની જોડીમાં બીજા પણ ભક્તજનો અતિ પ્રસન્ન થઈને રમતા હતા. (૨૫) સોમવર્મા રંગક્રીડા જાણતા ન હતા. છતાં અત્યંત પ્રસન્ન હતા. અને રંગનો ઘડો ભરીને તત્કાલ જ ગ્રહણ કરીને સૂરા ખાચરના મસ્તક ઉપર રેડ્યો. (૨૬) તે સમયે સુરા ભક્તે હસતાં હસતાં સોમાભક્તને પાડી દીધા, કારણ કે પોતે વધુ બળવાન હતા. સોમવર્માના મુખમાં અને નેત્રોમાં ગુલાલ ખોબાથી પૂરી દીધો. (૨૭) બ્રહ્માનંદ મુનિએ, સુરાખાચરે નીચે પાડેલા સોમલા ખાચરને જોઈને નિત્યાનંદ મુનિનો ત્યાગ કરી સુરાખાચરને તત્કાલ પકડ્યા. (૨૮) બ્રહ્માનંદ મુનિએ સોમલાખાચરે નાંખેલા રંગથી ભીનું થયેલું સુરાખાચરનું મુખ, ગુલાલથી લીંપી દીધું. એટલામાં સુરા ખાચરે પણ પોતાના હાથથી બ્રહ્માનંદ મુનિની શિખા(ચોટલી) પકડીને મોટી મૂઠીમાં ભરેલો ગુલાલ તે મુનિના નેત્રોમાં ભરી દીધો અને મુનિને મૂંઝવી દીધા. (૨૯-૩૦) નેત્રોમાં ગુલાલ ભરાઈ જવાથી દૃષ્ટિ બંધ થઈ, તેથી મનમાં વિભ્રાંત થયા. એટલે સુરા ખાચરને માથામાં ટાલ છે, એ વાત ભૂલી ગયા અને સુરા ખાચરની ચોટલી પકડવાની ઈચ્છાથી તે દરબારને માથામાં વારંવાર હાથ ફેરવતા હતા. (૩૧) એ સમયે શ્રીહરિએ હસતા હસતા તત્કાલ સિંહાસનથી નીચે કૂદી પડીને સુરા ખાચરને પકડી લીધા. અને એના મસ્તક ઉપર રંગની ભરેલી ગાગર રેડી. (૩૨) વળી, શ્રીહરિ સુરા ખાચર ઉપર ગુલાલ ખોબેખોબે વારંવાર ફેંકી, તેને રંગમાં રોળતા હતા. આ પ્રકારની લીલા જોનારાં ભક્ત જનોને સુરા ખાચરને જોઈ, રાતા રંગથી ભરેલ પર્વત ઊભો હોય તેવું લાગતું હતું. (૩૩) મયારામભટ્ટે ઓચિંતા જ પ્રાગજી પુરાણી ઉપર ગુલાલ નાખ્યો. તેથી પ્રાગજી પુરાણીની આંખો ગુલાલથી ભરાઈ ગઈ અને દેખી શકતા ન હતા. પ્રાગજી પુરાણી તત્કાલ જ રંગથી ભરેલો ઘડો મયારામ ઉપર રેડવા માટે ગ્રહણ કરતા હતા. (૩૪) મયારામ ભટ્ટ, પ્રાગજીએ ગ્રહણ કરેલા રંગના ઘડાને જોઈને, રંગનું ટીપું પડવાના ભયથી પૃષ્ઠ ભાગથી નીચે નમેલા થકા ત્યાંથી નાસી ગયા. આ જોઈ શ્રીહરિ પણ હસવા લાગ્યા. (૩૫) આવી રીતે બે બે જણ થઈને ખેલન-ક્રિયા કરતાં હતા. તે સમયે શ્રીહરિ રંગથી ભીનાં વસ્ત્રો સહિત, પોતાના શરીરને સમગ્ર ભક્તજનોને ધ્યાનમાં આવે તેમ બતાવવા ઇચ્છતા હતા. તેથી શીઘ્ર ગતિવાળા ઘોડા ઉપર બેસીને,ભક્તોવડે ગુણાનુવાદ કરાયેલા શ્રીહરિ સર્વ જનસમુદાયોને તત્કાલ પ્રદક્ષિણા કરતા હતા. (૩૬-૩૭) પગલે પગલે અત્યંત રંગ અને ગુલાલ પરસ્પર ફેંકતા થકા અથવા ભગવાન ઉપર છાંટતા થકા મુનિઓ અને ભક્તજન સમૂહો શ્રીહરિની પાછળ દોડતા હતા. (૩૮)

**एवं परिभ्रमन् दत्त्वा सर्वेभ्योऽपि स्वदर्शनम् । महानैवेद्यसमयं ज्ञात्वा पद्माकरं ययौ ॥३९॥ तत्र कृत्वा जलक्रीडां स्नात्वा भक्तैः सहाखिलैः । स्वस्वस्थानं जनान् गन्तुमाज्ञाप्यायात्स्वकेतनम् ॥४०॥ तत्र स्नात्वा भगवते नरनारायणाय सः । नैवेद्यमर्पयामास षट्पञ्चाशद्विधं नृप ! ॥४१॥ ततो नीराजनं कृत्वा प्रेङ्खादुत्तार्य तं पुनः । सम्पूज्य दत्त्वा विप्राय मुन्यादीन्समभोजयत् ॥४२॥ पीताम्बरं शोणपटेन बद्ध्वा दृढं स कट्यां परिवेषयंस्तान् । द्रुतक्रमाङ्घ्र्यम्बुज आर्षपंङ्क्तिष्वानन्दयामास मुहुश्चरंस्तान् ॥४३॥ भक्ष्यैर्भोज्यैश्च लेह्यैश्च पक्वान्नैर्विविधैस्तथा । प्रचुराज्यसितामिश्रैस्तर्पयामास तान् प्रभुः ॥४४॥ ततो भुक्त्वा स्वयं स्वामी स्वानुजावास आत्मनः । स्थानमेत्य विशश्राम मुहूर्तद्वितयं नृप ! ॥४५॥ पुनरुच्चं निजं पीठमारुरोह स सत्पतिः । सूर्यश्चास्तगिरिं प्रापद्दीपिकाश्च दिदीपिरे ॥४६॥ नामसङ्कीर्तनं कृत्वा भक्तैः साकं तदाऽऽगतैः । उपावीविशदेतांश्च हरिः स्वकरसंज्ञया ॥४७॥ आलोकयन् सदसि तान्सहसोपविष्टांस्तूष्णीं-स्थितान्स्ववदनाहितदृष्टिवृत्तीन् । भक्तव्रजानथ तदीयहितोद्यतोऽसौ राजन्नशिक्षयदनन्तगुणाढ्य इत्थम् ॥४८॥** इति श्री सत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे वृत्तालयदोलोत्सवे रङ्गकीडानिरूपणनामाऽष्टपञ्चाशत्तमोऽध्यायः ॥५८॥

श्रीनारायणमुनिरुवाच - **श्रूयतां मद्वचो भक्ताः सर्वेषां वच्म्यहं हितम् । नोल्लङ्घ्या क्वापि मर्यादा शास्त्रीया हि मदाश्रितैः ॥१॥ पुम्भिः स्त्रीभिस्त्यागिभिश्च सर्वैरेव मदाश्रितैः । स्वस्वधर्मस्थितैर्नित्यं सङ्गः कार्यः सतां सताम् ॥२॥**

આ પ્રમાણે ચોતરફ સંચરણ કરતા શ્રીહરિ સમગ્ર ભક્ત જનોને પોતાનાં દર્શન આપીને શ્રી નરનારાયણને મહા નૈવેદ્યનો સમય થયો છે, એમ જાણીને પુરથી દક્ષિણ દિશામાં ધના નામક તળાવમાં ગયા. (૩૯) ત્યાં સમગ્ર ભક્ત જનોની સાથે જલક્રીડા કરીને તથા સ્નાન કરી, લોકોને પોતપોતાના સ્થાને જવા આજ્ઞા કરી, પોતે પણ સ્વસ્થાને ગયા. (૪૦) હે રાજન્ ! શ્રીહરિએ પોતાના નિવાસે ફરી સ્નાન કરી, ભગવાન શ્રી નરનારાયણને છપ્પન પ્રકારનાં નૈવેદ્ય અર્પણ કર્યાં. (૪૧) પછી શ્રીહરિએ આરતી કરી. શ્રીનરનારાયણને હીંડોળેથી ઉતારી, ફરી પૂજન કરી, બ્રાહ્મણને સોંપી, મુનિ વગેરેને સારી રીતે ભોજન કરાવ્યું. (૪૨) શ્રીહરિ લાલ ઉત્તરીય વસ્ત્રથી અર્થાત્ (ડાબે ખભે કરીને, પૃષ્ઠ ભાગમાં લાંબું કરેલા, ઓઢેલા લાલ પીતાંબરથી) પહેરેલા પીતાંબરને કેડમાં દઢ બાંધીને મુનિ વગેરેને પીરસાવતાં, તત્કાલ ચાલતાં ચરણારવિન્દવાળા, મુનિમંડળોની પંક્તિઓમાં વારંવાર પીરસવા પૂર્વક વિચરતા થકા મુનિઓને આનંદ આપતા હતા. (૪૩) શ્રીહરિ ઘણા ઘી સાકરે યુક્ત, ભક્ષ્ય, ભોજ્ય, લેહ્ય, ચોષ્ય તથા વિવિધ પ્રકારનાં પકવાન્નોથી મુનિ વગેરેને તૃપ્ત કરતા હતા. (૪૪) હે રાજન્ ! પછી શ્રીહરિ પોતાના નાનાભાઈ ઈચ્છારામના નિવાસમાં જમીને, પોતાના સ્થાનમાં આવીને, ચાર ઘડી સુધી વિશ્રાંતિ કરતા હતા. (૪૫) સત્પુરુષોનાં સ્વામી શ્રીહરિ, પોતાના ઊંચા સિંહાસનમાં ફરીથી બેઠાં અને સૂર્ય આથમી ગયો, તે સમયે વિઠ્ઠલદાસ આદિ વાળંદોએ પ્રકટાવેલી દીપિકાની શિખાઓ અત્યંત શોભવા લાગી. (૪૬) શ્રીહરિએ તે સમયે સભામાં આવેલા ભક્તોની સાથે નામસંકીર્તન કરીને, એ ભક્તોને પોતાના હાથની સંજ્ઞાથી બેસાડી દીધા. (૪૭)

હે રાજન્ ! પછી સભામાં તત્કાલ જ મૌન ભાવથી બેઠેલા, પોતાના મુખારવિંદમાં આરોપણ કરી છે નેત્રની વૃત્તિઓ જેમણે એવા ભક્ત સમૂહોને સભામાં જોતાં તેમનું હિત કરવામાં ઉદ્યમવાળા દયા આદિ અનંત ગુણોથી પરિપૂર્ણ શ્રીહરિ આ (આગળ કહેશે તે) પ્રમાણે તેમને ઉપદેશ આપતા હતા. (૪૮)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે વૃત્તાલયદોલોત્સવે રંગક્રીડાનિરૂપણ નામાઽષ્ટ પંચાશત્તમોઽધ્યાયઃ (૫૮)*

## અધ્યાય : ૫૯

## સત્પુરુષ અને અસત્પુરુષનાં લક્ષણોમાં મુક્તોને પણ યથેષ્ટાચરણ (ઈચ્છા મુજબ વર્તન) નો નિષેધ કરેલો છે.

**શ્રી નારાયણમુનિ બોલ્યા :** હે ભક્તો ! મારું વચન સાંભળો. હું સર્વેના હિતનું વચન કહું છું. મારાં આશ્રિત જનોએ ક્યારેય પણ સત્ શાસ્ત્રોમાં કહેલી મર્યાદાનો લોપ કરવો નહિ. (૧) મારા આશ્રિત સર્વ ત્યાગીઓ, ગૃહસ્થ પુરુષો તથા સધવા અને વિધવા સ્ત્રીઓએ પોતપોતાના ધર્મમાં રહીને જ સત્ શાસ્ત્રમાં કહેલા લક્ષણવાળા સાચા સાધુઓનો કે સાંખ્ય યોગિની સ્ત્રીઓનો સંગ દરરોજ યથાયોગ્ય કરવો. (૨) આ ઘોર કળિયુગમાં જીવોને સંસારના બંધનથી તત્કાલ મુકાવવા



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

घोरे कलौ युगे ह्यत्र जीवान् संसृतिबन्धनात् । सद्यो मोचयितुं शक्ताः सन्त एवामलान्तराः ॥३॥ लक्षणैरेव साधुत्वासाधुत्वे सदसत्स्थितैः । विज्ञातव्ये स्वया बुद्ध्या सेव्याः सन्तस्ततः सदा ॥४॥ सदाभासा हि बहवो वञ्चयन्ति जनान्भुवि । तस्मात्तेऽपि परीक्ष्यैव दूराद्धेया मुमुक्षुभिः ॥५॥ स्त्रीद्रव्यरससंसक्तास्तदर्थं जनवञ्चकाः । बाह्यतस्त्यागिवेषा ये ते ज्ञेयाः कलिरूपिणः ॥६॥ स्त्रैणानामसतां तेषां मूढानां खण्डितात्मनाम् । योषित्क्रीडामृगाणां च सङ्गः कार्यो न कर्हिचित् ॥७॥ स्त्रैणसङ्गाद्यथा पुंसो भवेन्मोहश्च बन्धनम् । न तथाऽन्यप्रसङ्गेन जानीतेति सुनिश्चितम् ॥८॥ ईदृशा बहवः सन्ति साधुसंज्ञाः कलौ युगे । मुमुक्षाया अङ्कुरोऽपि यत्सङ्गान्नश्यति ध्रुवम् ॥९॥ ततः प्रवृत्तिर्जीवानां निरयद्वार्षु हि त्रिषु । स्त्रीद्रव्यहिंसासंज्ञेषु जायते नात्र संशयः ॥१०॥ आदौ स्वभावतो लोकाः सन्ति सक्ता हि तत्त्रिके । तादृक्साधुप्रसङ्गाच्च सज्जन्तेऽतीव तेषु ते ॥११॥ देहान्ते तादृशाः सन्तस्तच्छिष्याश्चाखिला जनाः । कुम्भीपाकेषु पच्यन्ते यावच्चन्द्रदिवाकरौ ॥१२॥ एतच्छ्रीमद्भागवते कपिलोऽगायदञ्जसा । श्रीकृष्णश्चैलगीतेन स्पष्टमाह सविस्तरम् ॥१३॥ तस्मान्नैवासतां सङ्गः कर्तव्यः क्वापि केनचित् । साधूनां सेवनीयानां लक्षणान्यथ वच्मि वः ॥१४॥ स्त्रीसङ्गमष्टधा त्यक्त्वा ब्रह्मचर्यं दृढं श्रिताः । तथैव धनमात्रस्य संसर्गं ये त्यजन्ति च ॥१५॥ मादकं नैव यत्किञ्चिद्भक्षयन्ति कदाचन । नानाविधरसास्वादं त्यक्त्वा जिह्वा जिता तु यैः ॥१६॥

---

માટે શુદ્ધ અંતઃકરણવાળા સાધુઓ જ સમર્થ છે. (૩) સાધુઓ અને અસાધુઓમાં રહેલાં લક્ષણોથી સાધુત્વ અને અસાધુત્વ સત્‌શાસ્ત્ર અનુસારે પોતાની બુદ્ધિથી જાણવું અને તે પછી સાધુના લક્ષણેયુક્ત સંતોને જ હંમેશા સેવવા; (૪) કારણ કે પૃથ્વીમાં વેશ માત્રથી સાધુ સમાન ઘણા પુરુષો જનોને છેતરે છે. માટે સાધુઓનાં લક્ષણોથી પરીક્ષા કરીને મુમુક્ષુ જનોએ અસાધુઓનો દૂરથી જ ત્યાગ કરવો. (૫) સ્ત્રી, દ્રવ્ય અને નાના પ્રકારના રસાસ્વાદમાં આસક્તિવાળા અને તેની પ્રાપ્તિ માટે જનોને છેતરનારા, ઉપરથી ત્યાગીના સરખો વેશ રાખનારા જે અસાધુઓ છે, તે મૂર્તિમાન કલિયુગ-સ્વરૂપ જ જાણવા. (૬) સ્ત્રીઓના ઉપભોગમાં લંપટ, માટે જ સ્ત્રીઓના ક્રીડામૃગોની માફક-વિપરીત બુદ્ધિવાળા અને દેહને જ આત્મા માનનારા; અસત્પુરુષોનો સંગ ક્યારેય પણ કરવો નહીં. (૭) સ્ત્રીઓના પ્રસંગવાળા અસત્ સાધુ પુરુષોના સંગથી પુરુષને જે પ્રકારે મોહ અને બંધન થાય, તેવો મોહ અને બંધન બીજાના પ્રસંગથી થાય નહીં. આ વાત તમે નિશ્ચિત જાણો. (૮) જે અસત્ પુરુષોના સંગથી મુમુક્ષુને પોતાની મુમુક્ષાનો અંકુર નાશ પામે છે, આ પ્રકારની સાધુ સંજ્ઞાવાળા અસત્પુરુષો કળિયુગમાં ઘણા હોય છે. (૯) અસાધુઓના પ્રસંગથી મુક્તિની ઈચ્છાનો અંકુર નષ્ટ થયા પછી નરકની પ્રાપ્તિના દ્વારરૂપ પરસ્ત્રી સેવન-પારકું દ્રવ્ય અને હિંસા નામના દોષોમાં જીવોની પ્રવૃત્તિ થાય છે, આ વાતમાં શંકા જ નથી. (૧૦) જે જનો તો પ્રથમથી પોતાના સ્વભાવથી જ સ્ત્રી આદિ ત્રણમાં અતિ આસક્ત છે જ, તે લોકો તેવા અસાધુ પુરુષના પ્રસંગથી સ્ત્રી વગેરેમાં અત્યંત આસક્ત થાય છે. (૧૧) અસાધુજનોના શિષ્યો અને સમગ્ર જનો, પોતપોતાના દેહના નાશ પછી સૂર્ય ચંદ્ર રહે ત્યાં સુધી કુંભીપાક નામે નરકમાં પડે છે. (૧૨) આ મેં જે કહ્યું તે શ્રીમદ્ ભાગવતમાં તૃતીય સ્કંધના એકત્રીશમા અધ્યાયમાં સબીજસાંખ્યના આચાર્ય ભગવાન કપિલે યથાર્થપણે પોતાનાં માતુશ્રી દેવહૂતિને ઉપદેશ આપ્યો ત્યારે કહેલું છે તથા એકાદશ સ્કંધમાં છવ્વીશમા અધ્યાયમાં પોતાના ભક્ત ઉદ્ધવને શ્રીકૃષ્ણ ભગવાને પણ કહ્યું છે. (૧૩) માટે મારા આશ્રિત કોઈ પણ ભક્તોએ, ક્યારેય પણ અસત્પુરુષોનો સંગ કરવો જ નહીં. હવે મુમુક્ષુ પુરુષોએ સેવા કરવા યોગ્ય સત્પુરુષોનાં લક્ષણો હું તમોને કહું છું: (૧૪) જે સાધુઓ અષ્ટ પ્રકારે સ્ત્રી પ્રસંગનો ત્યાગ કરીને દઢ બ્રહ્મચર્યને સિદ્ધ કરતા હોય, તથા સ્ત્રીસંગની માફક દ્રવ્ય માત્રનો સંબંધ ત્યજે છે; (૧૫) જે સાધુઓ કાંઈ પણ માદક વસ્તુઓ ક્યારેય પણ ભક્ષણ કરતા નથી; જે સાધુઓ નાના પ્રકારના રસાસ્વાદનો ત્યાગ કરીને રસના ઈન્દ્રિયને વશ કરે છે. (૧૬)

मनोवाक्तनुभिर्ये च स्वपरद्रोहवर्जिताः। जितेन्द्रिया जितक्रोधा निर्वासनिकचेतसः ॥१७॥ देहादिषु पदार्थेषु निःस्नेहाः कृष्णसंश्रयाः । द्यूतादिव्यसनैर्हीना ये ते सन्तो मया मताः ॥१८॥ धनुर्मात्रान्तरेणैव स्त्रीभ्यो दूरे चरन्ति ये । ऋषभार्षभवन्नित्यं निर्मानास्ते हि साधवः ॥१९॥ प्रमादादपि जातायां स्वकीयनियमच्युतौ । प्रायश्चित्तं यथोक्तं ये कुर्वते ते च साधवः ॥२०॥ एकाकिनो न गच्छन्ति यत्र कुत्रापि ये सदा। ऋते सतां साहचर्यात्ते ज्ञेया भुवि साधवः ॥२१॥ श्रीकृष्णश्रवणादीनि विनैकोऽपि क्षणः क्वचित् । येषां न वितथो याति ते सन्तो मम सम्मताः ॥२२॥ समागमस्तु कर्तव्य ईदृशानां सदा जनैः । हर्याश्रितानां साधूनां भवपाशान्मुमुक्षुभिः ॥२३॥ एतल्लक्षणहीनो यः स्वैरचारी भवेदिह । सत्साधुतुल्यवेषोऽपि दूराद्धेयोऽन्त्यजादिवत् ॥२४॥ सुव्रत उवाच - श्रुत्वैतद्भगवद्वाक्यं निःश्वसन्त्योऽथ योषितः। तमेव स्वहितं प्रष्टुं प्रैरयन्स्वान्विचक्षणान् ॥२५॥ तासां दृक्करसंज्ञाभिर्ज्ञातभावाश्च ते नराः । वक्तुं विचक्षणा वाक्यमेवमूचुर्हरिं नृप ! ॥२६॥ जना ऊचुः- सर्वाराध्य ! प्रभो ! स्वामिंस्त्वया सम्यक्प्रदर्शिता । सदसद्व्यक्तिरस्मभ्यं विज्ञेया या मुमुक्षुभिः॥२७॥ स्त्रीद्रव्ययोस्तु संसर्गत्यागः प्रोक्तस्त्वया सताम् । मुक्तानां च मुमुक्षूणामविशेषेण सत्पते ! ॥२८॥ स्त्रीणामनुमतेनेदं तत्रास्माभिश्च पृच्छ्यते । तच्छ्रुत्वा भगवन्नद्य ब्रूहि तत्रोचितोत्तरम् ॥२९॥ सन्तोऽत्र द्विविधाः सन्ति मुक्ताश्चाथ मुमुक्षवः । मुक्ताः सिद्धदशां प्राप्ताः साधकास्तु मुमुक्षवः ॥३०॥ महदेवान्तरं तेषामुभयेषां परस्परम् । वर्ततेऽतः कथं स्वामिन्साधने तुल्यता भवेत् ॥३१॥

---

જે સાધુઓ મન-વાણી અને શરીરથી પારકો અને પોતાનો દ્રોહ નથી કરતા, જિતેન્દ્રિય હોય છે. ક્રોધ રહિત હોય, વાસના રહિત ચિત્તવાળા હોય, શરીર અને તેના સંબંધી પદાર્થમાં આસક્તિ રહિત હોય; અને પ્રત્યક્ષ હરિકૃષ્ણ ભગવાનનો દૃઢ આશ્રય હોય, જુગાર આદિ વ્યસનો રહિત હોય, આવા લક્ષણવાળાને મેં સાચા સાધુ માનેલા છે. (૧૭-૧૮) જે સાધુઓ સ્ત્રીઓથી ચાર હાથ દૂર ચાલે છે. જડ ભરતની માફક હંમેશા માન રહિત હોય, તે સાચા સાધુ છે. (૧૯) જે સાધુઓ પોતાના ધર્મના નિયમમાં અજ્ઞાનથી પણ ભંગ થાય, તો પણ શાસ્ત્ર પ્રમાણે પ્રાયશ્ચિત્ત કરે છે - તે સાચા સાધુઓ છે. (૨૦) જે સાધુઓ, જોડી વિના કોઈ પણ સ્થાનમાં ક્યારેય એકાકી જતા નથી, પૃથ્વીમાં તે સાચા સાધુઓ જાણવા. (૨૧) જે સાધુઓને શ્રીકૃષ્ણની શ્રવણાદિ ભક્તિ વિના એક ક્ષણ પણ વ્યર્થ ક્યારેય જતી નથી, તે મેં સાચા સાધુઓ માનેલા છે. (૨૨) સંસારના બંધનથી પોતાના આત્માને મુક્ત કરવા ઈચ્છનાર જનોએ ઉપર કહેલાં લક્ષણોવાળા શ્રીહરિના આશ્રિત સાધુઓનો જ સમાગમ હંમેશા કરવો. (૨૩) આ લોકમાં જે સાધુઓના મેં કહેલાં લક્ષણોથી રહિત-યથેષ્ટ આચરણ કરનાર હોય; અને તે જો ઉપરથી સાધુના જેવો વેશ રાખતા હોય, તો પણ તેનો શ્વપચની માફક દૂરથી જ ત્યાગ કરવો. (૨૪)

**સુવ્રતમુનિ કહે છે** : હે રાજન્ ! આ પ્રકારે શ્રીહરિનું વચન સાંભળી, હરિભક્ત સ્ત્રીઓએ નિસાસો નાંખ્યો. કારણકે હવે સંતોની વાણી સાંભળવા નહીં મળે. તેથી પોતાના પતિ-પુત્રાદિક દ્વારા પોતાનું હિત શ્રીહરિને પૂછવા માટે નેત્ર અને હાથ વગેરેની સંજ્ઞાથી તેઓને પ્રેરણા કરતી હતી. (૨૫) હે રાજન્, તે સ્ત્રીઓના અભિપ્રાયને જાણીને સભામાં બેઠેલા તેમના સબંધી પુરુષો શ્રીનારાયણ મુનિને આ પ્રમાણે પૂછવા લાગ્યા. (૨૬) **ભક્તજનો કહે છે** : સમગ્ર જનોને આરાધના કરવા યોગ્ય હે પ્રભુ ! તમોએ સાધુ-અસાધુનાં લક્ષણોનું જ્ઞાન વિક્તિ સહિત સારીરીતે અમોને કહ્યું, જે સત્પુરુષ અને અસત્પુરુષોની વિક્તિ મુમુક્ષુઓએ અવશ્ય જાણવી જોઈએ. (૨૭) હે સત્પતે ! તમોએ સ્ત્રીદ્રવ્યના સંસર્ગનો ત્યાગ, મુક્ત સાધુઓને અને મુમુક્ષુ સાધુઓને સરખી રીતે કહ્યો. (૨૮) હે ભગવન્, તમોએ કહેલા મુક્ત સાધુઓ અને મુમુક્ષુ સાધુઓને સાધારણ રીતે સ્ત્રી અને દ્રવ્યના ત્યાગમાં (અષ્ટ પ્રકારે સ્ત્રી દ્રવ્ય ત્યાગ બાબતે) સ્ત્રીઓની સંમતિથી અમે પૂછીએ છીએ. તે આ અમારો પ્રશ્ન સાંભળીને તેનો ઉત્તર તમે હાલમાં યથાયોગ્ય કહેવાને યોગ્ય છો.(૨૯) આ લોકમાં મુક્તો અને મુમુક્ષુ-બે પ્રકારના સંતો છે. તેમાં મુક્ત સંતો સિદ્ધ દશાને પામેલા છે. મુમુક્ષુ સંતો સાધનદશાવાળા છે. (૩૦) હે સ્વામિન્ ! તે બન્ને સત્પુરુષોમાં પરસ્પર અતિશય ભેદ છે. માટે સાધનમાં, સ્ત્રી દ્રવ્યાદિકના ત્યાગરૂપ નિયમમાં તે બન્નેની સમાનતા કયે પ્રકારે થાય ? અર્થાત્ ન જ થાય (૩૧)

मुमुक्षूणां भवेदेव स्त्रीप्रसङ्गो हि बन्धदः । तेषामपक्वदोषत्वाद्युक्तं तद्वर्जनं प्रभो ! ॥३२॥ ये तु सन्तो जितप्राणमनोबुद्धीन्द्रिया इह । स्वातन्त्र्येणैव देहे स्वे वर्तमाना मनीषिणः ॥३३॥ ब्रह्मस्वरूपमात्मानं सम्प्राप्यैव समाधिना । नारायणं परंब्रह्म ये च साक्षादुपासते ॥३४॥ प्रतिमेषोन्मेषमेव ये तं पश्यन्ति सर्वदा । मुक्तास्त एव सम्प्रोक्ताः सन्तः संसारतारकाः ॥३५॥ तेषां सद्गुणगानादौ को दोषो योषितां पुरः । स्त्रियश्च पुरुषास्तेषां सन्ति हेयतया समाः ॥३६॥ मुक्तानां ब्रह्मनिष्ठानां यथेष्टाचरणं प्रभो !। न दोषायेति कतिचिद्विद्वांसोऽपि वदन्ति हि ॥३७॥ न ब्रह्मस्थितिमाप्तानामङ्गस्पर्शोऽपि दोषकृत् । स्त्रीणां सम्भाषणे तर्हि को दोषस्तादृशां भवेत् ॥३८॥ प्रदीप्तवह्नितुल्या हि ब्रह्मनिष्ठास्तु साधवः । लभन्ते खलु तत्साम्यं येऽत्र तत्सङ्गिनो जनाः ॥३९॥ धनुर्मात्रान्तरे दूरादुपविश्य च योषिताम् । पुरः कृष्णकथाकीर्तौ तेषां दोषोऽत्र कः प्रभो! ॥४०॥ तादृशा यदि नो कुर्युस्तद्वार्तां योषितां पुरः । अधर्माद्वापि तद्रक्षां तदा स्त्रीणां गतिस्तु का ॥४१॥ मुमुक्षवः साधका ये तत्कथास्ते तु सत्पते!। योषितां पुरतो नैव कुर्युः स्वव्रतभङ्गतः ॥४२॥ स्त्रैणा ये साधुवेषाश्च चरन्त्येकाकिनो भुवि। ते तु वार्ताः प्रकुर्वन्ति नारीणां पुरतः स्वयम् ॥४३॥ तेभ्यस्तु क्वापि ता नैव शृण्वन्ति तत्कथा अपि । जानन्त्येव यतस्तास्तान् स्त्रैणान्धूर्तानिति प्रभो ! ॥४४॥ तस्मात्स्त्रीषु कृपां कृत्वा कृष्णभक्तिविवृद्धये । मुक्तांस्तदग्रे तद्वार्तां कर्तुमाज्ञापय प्रभो! ॥४५॥ ब्रह्मचर्यं ह्यष्टविधं यत्त्वयात्र प्रकीर्तितम् । मुक्तानां तादृशानां तदस्तु सप्तविधं हरे ! ॥४६॥

હે પ્રભો ! મુમુક્ષુ સાધુઓને સ્ત્રીઓનો પ્રસંગ બંધન કરનારો થાય જ. મુમુક્ષુઓને કામાદિ દોષ યથાર્થ બળી ગયેલા ન હોવાથી સ્ત્રી આદિનો ત્યાગ યોગ્ય જ છે. (૩૨) આ લોકમાં જે સંતો આત્માપરમાત્માનાં સ્વરૂપને યથાર્થ જાણનારા માટે જ પ્રાણ મન અને બુદ્ધિ ઇન્દ્રિયો જેમણે વશ કરેલાં છે, અને સ્વતંત્રપણે દેહમાં રહેલા છે (જેથી ઇન્દ્રિયો આદિકને આધીન નથી.) (૩૩) અને જે સંતો બ્રહ્મભાવને પામેલા પોતાના આત્મામાં સમાધિ દ્વારા પરબ્રહ્મ નારાયણ એવા તમોને પ્રત્યક્ષપણે ઉપાસના કરે છે. (૩૪) અને જે સંતો મેષોન્મેષથી પોતાના નેત્રને ઉઘાડી અને બંધ કરી, સર્વદા તમોને જ જુએ છે; એવા સંતો પોતાના આશ્રિત સેવકોને સંસારના બંધનથી તારવાને શક્તિમાન કહેલા છે. (૩૫) આવા મુક્ત સાધુઓને સ્ત્રીઓની આગળ શ્રીહરિનાં ગુણચરિત્રો કહેવા વગેરેમાં શો દોષ છે ? અમને તો કોઈ દોષ જણાતો નથી. કારણ કે મુક્ત સાધુઓને સ્ત્રી અને પુરુષ સમાન ભાવે હોવાથી ત્યાજ્યપણે તુલ્ય છે તેઓને કોઈ પ્રયોજન નથી. (૩૬) હે પ્રભુ ! બ્રહ્મનિષ્ઠ મુક્ત સાધુઓને યથેષ્ટ આચરણ દોષ માટે થતું નથી. આ પ્રમાણે કેટલાક વિદ્વાનો પણ બોલે છે. (૩૭) પોતાના આત્મા સાથે બ્રહ્મ રૂપે રહેલા એ મુક્ત સાધુઓને સ્ત્રીઓનો અંગસ્પર્શ પણ દોષ કરનારો ન જ થાય તો સ્ત્રીઓની સાથે બોલવામાં શો દોષ છે ? કાંઈ પણ દોષ નથી. (૩૮) બ્રહ્મનિષ્ઠ સાધુઓ તો બળતા અગ્નિની સમાન તેજસ્વી હોય છે, જ. માટે જ આ લોકમાં જે જનો તેવા સાધુઓનો પ્રસંગ કરે છે તે જનો પણ સાધુના સમાન બ્રહ્મભાવને નિશ્ચે પામે છે. (૩૯) માટે હે પ્રભુ ! આ લોકમાં ચાર હાથ દૂરથી બેસી, સ્ત્રીઓની આગળ શ્રીકૃષ્ણનાં ગુણચરિત્રો કહેવામાં, મુક્ત સાધુઓને કયો દોષ છે ? અમને તો કોઈ દોષ જણાતો નથી. (૪૦) જો તેવા પ્રકારના મુક્ત સાધુઓ સ્ત્રીઓની આગળ શ્રીકૃષ્ણની વાર્તા ન કરે અથવા અધર્મ માર્ગની પ્રવૃત્તિથી તે સ્ત્રીઓનું રક્ષણ ન કરે તો સ્ત્રીઓની શી ગતિ થાય ? (કઈ રીતે તેમનો સંસૃતિથી ઉદ્ધાર થાય ?) (૪૧) હે સત્પતે ! સાધન દશામાં રહેલા જે મુમુક્ષુ સંતો તે તો પોતાના વ્રતના ભંગથી સ્ત્રીઓની આગળ શ્રીકૃષ્ણની કથાવાર્તા ન કરે, તે તો ઠીક છે. (૪૨) જે સ્ત્રીલંપટ સાધુવેશવાળા, પૃથ્વીમાં એકલા ફરે છે. તે તો સ્ત્રીઓની આગળ પોતાની ઈચ્છાથી વાર્તાઓ કરે છે. (૪૩) હે પ્રભો! તમારા આશ્રયવાળી સ્ત્રીઓ, કહેલા સ્ત્રીલંપટ સાધુઓથી શ્રીકૃષ્ણના ગુણચરિત્રની કથા પણ ક્યારેય સાંભળતી નથી. કારણ કે તે સ્ત્રીઓ એકલા ફરતા સાધુઓને સ્ત્રીલંપટ અને ધુતારા જાણે છે. (૪૪) હે પ્રભો ! માટે તમારા આશ્રિત મહિલાઓ ઉપર કૃપા કરી, ભગવદ્ ભક્તિની વૃદ્ધિ માટે સ્ત્રીઓની આગળ શ્રીકૃષ્ણનાં ગુણચરિત્રોની કથા કરવા માટે તમારા આશ્રિત મુક્ત સાધુઓને આજ્ઞા કરો. (૪૫) હે હરે ! તમોએ સાધુનાં લક્ષણ કહેવામાં જે આઠ પ્રકારનું બ્રહ્મચર્ય કહ્યું છે, તેવા પ્રકારના મુક્ત સાધુઓને સાત પ્રકારનું રાખવા કૃપા કરો. (૪૬)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सुव्रत उवाच - **इति सम्प्रार्थितो लोकैः कल्याणायैव योषिताम् । सर्वधर्मरहस्यज्ञः प्रोवाचेति हसन् हरिः ।।४७।।** श्रीनारायणमुनिरुवाच - **शृण्वन्तु भो नराः सर्वे स्त्रियश्च मुनयस्तथा । कल्याणं स्याद्यथा स्त्रीणां तमुपायं वदामि वः ।।४८।। यथा कृष्णं श्रिता नार्यस्तत्कथामपि कर्हिचित् । पुंसःकुयोगिनो वक्त्रान्न शृण्वन्ति हितामपि ।।४९।। तथैव मुक्तपुरुषमुखादपि कथा हरेः । स्वातन्त्र्येण न वै श्रव्या स्त्रीभिः क्वापि विना नरात् ।।५०।। स्त्रीणामेव पुरो मुक्तः कुर्याच्चेत्तत्कथामपि । त्यागिधर्मच्युतः सद्यः स भवेन्नात्र संशयः ।।५१।। तस्य स्त्रैणस्य तु मुखाच्छृणुयाद्या च तत्कथाः । सापि स्वाद्भ्रश्यते धर्मात्ततो यात्यधमां गतिम् ।।५२।। महान्तं प्राप्नुतोऽनर्थं महापातकिनौ हि तौ । अब्रवीदिति मां पूर्वं श्रीरामानन्द उद्धवः ।।५३।। इयं वार्तैवमेवास्ति नास्ति कोऽप्यत्र संशयः । पुंसः स्त्री च पुमान्नार्या बुद्धिभ्रंशस्य कारणम् ।।५४।। पूर्वं हि बहवो मुक्ताः पुमांसश्च स्त्रियोऽपि च । अन्योन्यस्य प्रसङ्गेन भ्रष्टा याता अधोगतिम् ।।५५।। स्त्रीप्रसङ्गो न कर्तव्यो मुक्तेनापि कदाचन । श्रीमद्भागवतोक्तानि पद्यान्यत्र वदामि वः ।।५६।। सङ्गं न कुर्यात्प्रमदासु जातु योगस्य पारं परमारुरुक्षुः । मत्सेवया प्रतिलब्धात्मलाभो वदन्ति या निरयद्वारमस्य ।।५७।। योषिद्धिरण्याभरणाम्बरादिद्रव्येषु मायारचितेषु मूढः । प्रलोभितात्मा ह्युपभोगबुद्ध्या पतङ्गवन्नश्यति नष्टदृष्टिः ।।५८।। मात्रा स्वस्रा दुहित्रा वा ना विविक्तासनो भवेत् । बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ।।५९।।**

---

**સુવ્રતમુનિ કહે છે :** હે રાજન્, આ પ્રકારે હરિભક્તોએ સ્ત્રીઓના કલ્યાણ માટે જ પ્રાર્થના કરી, એ સાંભળીને સર્વ ધર્મના સિદ્ધાંતોને જાણનારા શ્રી નારાયણ મુનિ હસતા હસતા આ પ્રમાણે બોલ્યા. (૪૭) **શ્રીનારાયણમુનિ કહે છે :** હે ભક્તો ! સર્વગૃહસ્થો પુરુષો, સ્ત્રીઓ અને મુનિઓ સાંભળો. જે પ્રકારે સ્ત્રીઓનું કલ્યાણ થાય, તે હું તમોને કહું છું. (૪૮) જે પ્રકાર (તમોએ કહ્યા પ્રમાણે) શ્રીકૃષ્ણની આશ્રિત સ્ત્રીઓ હિતકારી એવી પણ શ્રીકૃષ્ણની કથા એકલા ફરતા સ્ત્રીલંપટ-કુયોગી પુરુષના મુખથી ક્યારેય સાંભળતી નથી. એજ રીતે આગળ કહેલા મુક્ત પુરુષના મુખથી પણ શ્રીકૃષ્ણની કથા મારા આશ્રિત સ્ત્રીઓએ સ્વતંત્ર રીતે ક્યારેય ન સાંભળવી. (પરંતુ પુરુષોની હાજરીમાં મર્યાદાપૂર્વક સાંભળવી.) (૪૯-૫૦) જે મુક્ત સાધુ સ્ત્રીઓની આગળ શ્રીકૃષ્ણની કથા કરે તો તે મુક્ત સાધુ પણ તત્કાલ ત્યાગીના ધર્મથી ભ્રષ્ટ થાય. એમાં સંશય નથી. (૫૧) ત્યાગીના ધર્મથી પડેલો, માટે જ સ્ત્રીઓનો પ્રસંગ રાખનાર-મુક્ત સાધુના મુખથી જે સ્ત્રી કૃષ્ણકથા સાંભળે, તે સ્ત્રી પણ પોતાના ધર્મથી ભ્રષ્ટ થાય છે. માટે અતિ નીચ ગતિને પામે છે. (૫૨) તેવા પ્રકારની સ્ત્રીઓ અને મુકત સાધુ મહા પાપયુક્ત થઈને મહા અનર્થને પામે છે. આ પ્રમાણે ઉદ્ધવ-શ્રી રામાનંદ સ્વામીએ પહેલાં મને કહેલું છે.(૫૩) આ મેં કહેલી વાર્તા આ પ્રકારે જ છે, એમાં કોઈ પ્રકારનો સંશય જ નથી. કારણ કે પુરુષની બુદ્ધિની ભ્રષ્ટતાનું કારણ નારી જ છે. એજ રીતે નારીની બુદ્ધિની ભ્રષ્ટતાનું કારણ  પુરુષ છે. (૫૪) પૂર્વે પણ ઘણા મુક્ત પુરુષો અને ઘણી સ્ત્રીઓ પણ અન્યોન્યના પ્રસંગથી પોતપોતાના ધર્મથી પડેલા છે. અને અધોગતિને પામેલા છે. (૫૫) મુક્તોએ પણ સ્ત્રીનો પ્રસંગ ક્યારેય કરવો નહીં. આ અર્થમાં શ્રીમદ્ ભાગવતમાં કહેલા શ્લોકો તમોને કહું છું : (૫૬) ભક્તિયોગ આદિની સિદ્ધ દશાને પામવા ઈચ્છતો મુમુક્ષુ અને મારી ઉપાસનાથી બ્રહ્મભાવને પામેલા (સિદ્ધ દશાને પામેલા) મુક્ત (તે પણ) ક્યારેય પણ સ્ત્રીઓમાં સંભાષણ આદિ પ્રસંગ કરે નહીં, કારણ કે જે સ્ત્રીઓ મુમુક્ષુ અને મુક્તને પણ નરકપ્રાપ્તિના દ્વારભૂત છે એમ સિદ્ધ દશાવાળા મુનિઓ કહે છે (આ તૃતીય સ્કંધમાં કપિલદેવનું વચન છે.) (૫૭) માયાએ સર્જેલા - નારી, સુવર્ણનાં અલંકારો, વસ્ત્રો, પુષ્પોની માળા, ચંદન વગેરે પદાર્થોમાં ઉપભોગ બુદ્ધિથી વિમોહિત મનવાળો, માટે જ મૂઢ, તેમજ નાશ પામેલા વિવેકવાળો, મુક્ત પુરુષ, જેમ પતંગિયું દીવાને જોઈને તેના રૂપમાં ઉપભોગ બુદ્ધિથી તેમાં પડીને નાશ પામે છે, તેની માફક નાશ પામે છે. (આ એકાદશ સ્કંધમાં દત્તાત્રેયનું વચન છે.) (૫૮) પોતાની માતા, બહેન અથવા દીકરી સાથે પણ એકાંતમાં આસન (અર્થાત્ બેસવું વગેરે) કરવું નહીં. કારણ કે ઈન્દ્રિયોનો સમૂહ અતિ બળવાન છે, તે જ્ઞાનનિષ્ઠ મુક્ત પુરુષોને પણ મુક્ત ભાવથી પાડે છે. (૫૯)

**तस्माज्जितस्य मनसो विश्वासेन कदाचन । मुक्तो न कुर्यात्स्त्रीसङ्गं पुंप्रसङ्गं तथाऽबला ॥६०॥ मदाज्ञापि न मन्तव्या स्त्रीप्रसङ्गो भवेद्यया । मुक्तैरपि तथा स्त्रीभिः पुंप्रसङ्गो भवेद्यया ॥६१॥ भक्ता ! भवद्भिर्यत्तूक्तं प्रदीप्तानलसन्निभाः । मुक्ताः सन्तीति तत्सङ्गस्तासां भवति मुक्तये ॥६२॥ तत्त्वाचारविरुद्धं हि सतां लोके च गर्हितम् । निन्दितं वेदशास्त्रेषु तन्मतं महतां न च ॥६३॥ मुक्तप्रसङ्गो नारीणां मुक्तिहेतुरिदं वचः । एकस्मिन्नेव श्रीकृष्णे नित्यमुक्ते हि सम्भवेत् ॥६४॥ कृष्णं विना तु मर्यादा वैदिकी येन येन च । उल्लङ्घिता स सोऽद्यापि लोके वेदे च निन्द्यते ॥६५॥ ब्रह्मशङ्करशक्राश्च शशाङ्काङ्गिरसादयः । कामादुल्लङ्घ्य मर्यादां वैदिकीं गर्ह्यतां गताः ॥६६॥ अस्तु प्रसङ्गो दूरेऽयं वीक्षामात्रमपि स्त्रियाः । मुक्तानामपि सिद्धानां पातित्यायैव जायते ॥६७॥ यथेष्टाचरणं ये तु न दोषाय सतामिति । वदन्ति ते तु विज्ञेया महापातकिनो जनाः ॥६८॥ तस्मान्मुक्तेषु शङ्काऽपि यथेष्टाचरणस्य तु । न क्वापि केनचित्कार्या यत्ते धर्मस्य रक्षकाः ॥६९॥ प्राप्तोऽपि भक्तिं च दृढात्मनिष्ठां मुक्तोऽपि भक्ता! वनिताप्रसङ्गात् । भ्रष्टो भवेत्स्त्री च तथाविधापि भ्रष्टा भवेदेव नरप्रसङ्गात् ॥७०॥**

इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे वृत्तालयदोलोत्सवे जनशिक्षायां सदसल्लक्षणेषु मुक्तानां यथेष्टाचरणनिषेधनिरूपणनामैकोनषष्टितमोऽध्यायः ॥५९॥

---

માટે મુક્ત પુરુષોએ પણ વશ કરેલ મનનો વિશ્વાસ કરીને નારીનો પ્રસંગ કરવો નહીં. તે જ રીતે મુક્તભાવને પામેલી સ્ત્રીઓએ પણ પોતે જીતેલા મનના વિશ્વાસથી પુરુષનો સંગ ક્યારેય કરવો નહીં. (૬૦) જે મારી આજ્ઞાથી સ્ત્રીનો પ્રસંગ થાય, એવી મારી આજ્ઞા પણ મુક્તોએ (મુનિઓએ)પણ ન માનવી. તેમજ જેનાથી પુરુષનો પ્રસંગ થાય એવી મારી આજ્ઞા મુક્ત સ્ત્રીઓએ પણ માનવી નહિ. (૬૧) હે ભક્તો ! ‘મુક્તો બળતા અગ્નિ સમાન છે. માટે સ્ત્રીઓને મુક્તોનો પ્રસંગ કલ્યાણ માટે થાય છે’, એમ જે તમોએ કહ્યું છે, એ વચન તો સદાચાર પ્રમાણથી વિરુદ્ધ છે. શાસ્ત્રમાં અને લોક વ્યવહારમાં એ વાત નિંદિત છે. મહાપુરુષોએ તમોએ કહેલું વચન માન્ય કરેલું નથી. (૬૨-૬૩) ‘મુક્તોનો પ્રસંગ સ્ત્રીઓને મુક્તિમાં કારણ છે’ આ વચન નિત્યમુક્ત-સત્પતિ અને સદા પોતે જ મુક્તભાવવાળા એક શ્રીકૃષ્ણમાં જ સંભવે છે. (૬૪) એક શ્રીકૃષ્ણ વિના જે જે જીવ અથવા ઈશ્વરે વેદાદિમાં કહેલી મર્યાદા ઉલ્લંઘન કરી, તે તે જીવ અને ઈશ્વર પણ અદ્યાપિ લોકમાં અને શાસ્ત્રમાં નિંદાય છે. (૬૫) જગતની સૃષ્ટિ કરતાં બ્રહ્મા, વિશ્વસંહાર કરનારા શંકર, ત્રિલોકના પાલક ઈન્દ્ર, ઔષધિનો અધિપતિ ચન્દ્ર, સમગ્ર દેવોના ગુરુ બૃહસ્પતિ, વગેરે તથા સૌભરિ વગેરે;અંતઃ શત્રુ કામને આધીન થઈ વૈદિક મર્યાદાનું ઉલ્લંઘન કરી નિંદ્યપણાને પામ્યા છે. (૬૬) માટે આ તમે કહેલો સ્ત્રીઓનો સંભાષણ રૂપ સંબંધ તો દૂર જ રહો, કારણ કે સ્ત્રીના દર્શન માત્રથી પણ સિદ્ધ દશાને પામેલા મુક્તો પણ પોતાની સ્થિતિમાંથી પડી જાય છે. (૬૭) જે જનો મુક્ત-સાધુઓનું ઈચ્છા પ્રમાણે આચરણ દોષરૂપ થતું નથી આવું બોલે છે, તે જનો તો મહા પાપી જાણવા. (૬૮) માટે મુક્તોમાં ઈચ્છા પ્રમાણે આચરણની શંકા (સંભાવના) પણ કોઈ પુરુષે ક્યારેય પણ કરવી નહીં. કારણ કે તેવા મુક્ત પુરુષો જ ધર્મની રક્ષા કરનારા છે. (વિધિ નિષેધનું પાલન કરતા થકા જનોને ધર્મમાં પ્રવર્તાવે છે.) (૬૯)

હે ભક્તો ! પ્રેમે સહિત નવ પ્રકારની ભક્તિ અને અતિ દૃઢ બ્રહ્મભાવને પામેલો મુક્ત પણ નારીના પ્રસંગથી ભ્રષ્ટ થાય જ. તેવા પ્રકારની, શ્રીકૃષ્ણની ભક્તિ અને દૃઢ આત્મનિષ્ઠા પામેલી મુક્ત સ્ત્રી પણ, પુરુષના પ્રસંગથી ભક્તિ અને આત્મનિષ્ઠાથી ભ્રષ્ટ થાય છે. (૭૦)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીયપ્રકરણે, વૃત્તાલય દોલોત્સવે, જનશિક્ષાયાં, સદસલ્લક્ષણેષુ, મુક્તાનામ્ યથેષ્ટાચરણ નિષેધ નિરૂપણ નામૈકોનષષ્ટિતમોઽધ્યાયઃ (૫૯)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

श्रीनारायणमुनिरुवाच – **मुक्तोऽपि पुरुषो यस्तु प्राप्तः सिद्धदशामिह । स्त्रीभ्यस्तेनापि भेतव्यमन्यथा पतितो भवेत् ॥१॥ अयं पुमानियं स्त्रीति भेददृष्टिर्न यस्य च । स्त्रीसङ्गाद्भ्रश्यते सोऽपि ऋष्यशृङ्ग ऋषिर्यथा ॥२॥ ऋष्यशृङ्गकथा सर्वैः श्रुताऽस्त्येव ततो जनाः! । वर्तितव्यं सावधानैर्मुक्तैरपि मुमुक्षुभिः ॥३॥ मदाज्ञया वा धर्मस्य रक्षार्थमपि कर्हिचित् । स्त्रीप्रसङ्गो न कर्तव्यो मुक्तेनापि मनीषिणा ॥४॥ मुक्तानामात्मनिष्ठानामपि स्त्र्यवयवेक्षणम् । स्वस्थितेर्भ्रंशकं ज्ञात्वा त्याज्यं तत्सर्वथा बुधैः ॥५॥ अत्रेतिहासं प्राचीनं सर्वे शृण्वन्तु सादरम् । मुक्तावपि यथा क्लिष्टौ पुरा नारदपर्वतौ ॥६॥ पर्वतो नारदश्चोभौ पुरा स्वस्त्रीयमातुलौ । ब्रह्मनिष्ठावृषी सिद्धौ पुण्यक्षेत्राणि चेरतुः ॥७॥ तावेकदाम्बरीषस्य विष्णुभक्तस्य भूपतेः । गृहमाजग्मतू रत्नैर्विविधैरुपशोभितम् ॥८॥ पूजितौ तेन राज्ञा तौ विविधैरुपचारकैः । तर्पितौ परमान्नेन सुखेनैव निषेदतुः ॥९॥ तस्य राज्ञोऽभवत्कन्या जयन्त्याख्या सुलोचना । रूपेणाप्रतिमा भूमौ शीललक्षणशालिनी ॥१०॥ तस्या योग्यं वरं प्रष्टुं भूपतिः स तु तावृषी । नत्वाभिवादयित्वा तामुपविश्याब्रवीदिदम् ॥११॥** राजोवाच – **युवां हि ज्ञानसम्पन्नौ ब्रह्मनिष्ठौ तपोधनौ । नास्त्येवाविदितं किञ्चित्त्रिलोकीचारिणोर्हि वाम् ॥१२॥ पृच्छामि तौ युवां प्रश्नमेकं प्रश्नविदांवरौ । तच्छ्रुत्वा चोत्तरं ब्रूतं विचार्यैव यथोचितम् ॥१३॥ जयन्तीसंज्ञिकेयं मे दुहितास्ति सुलक्षणा । निश्चेतुं नैव शक्नोमि तस्या योग्यं वरं त्वहम् ॥१४॥ तस्माद्युवां कृपां कृत्वा सर्वज्ञौ सर्वसौख्यदौ । योग्यमस्या वरं ब्रूतं चिन्तया व्याकुलं हि माम् ॥१५॥ इत्युक्तौ तावृषी राज्ञा तां दृष्ट्वैव विमोहितौ । सुलक्षणां च चार्वङ्गीं कामयामासतुः स्वयम् ॥१६॥ प्रार्थयामासतुर्भूपं निर्लज्जौ काममोहितौ । आवाभ्यां देहि ते कन्यां श्रेयस्तव भविष्यति ॥१७॥**

## અધ્યાય : ૬૦

## સ્ત્રીઓના પ્રસંગથી દેવર્ષિ નારદ અને પર્વતમુનિની દુર્દશાની ગતિ કહેલી છે.

**શ્રી નારાયણ મુનિ બોલ્યા :** હે ભક્તો ! આ લોકમાં સિદ્ધ દશાને પામેલા મુક્ત પુરુષે પણ નારીઓથી ભય પામવો. એમ ન કરે તો પતિત થાય. (૧) આ પુરુષ છે કે આ સ્ત્રી છે એવી ભેદ દૃષ્ટિ જેને ન હોય એવો પણ મુક્ત પુરુષ, ઋષ્ય શૃંગ ઋષિ જેમ સ્ત્રીના પ્રસંગથી ભ્રષ્ટપણાને પામ્યા હતા તેમ ભ્રષ્ટ થાય છે. (૨) હે જનો ! ઋષ્યશૃંગની કથા તો તમે સર્વેએ સાંભળેલી જ છે. માટે મુક્તોએ અને મુમુક્ષુઓએ પણ સ્ત્રીના પ્રસંગનો ત્યાગ વગેરેમાં સાવધાનપણે વર્તવું. (૩) બુદ્ધિમાન મુક્ત પુરુષે પણ મારી આજ્ઞાથી સ્ત્રીના ધર્મની રક્ષા માટે પણ સ્ત્રીનો પ્રસંગ ક્યારેય પણ કરવો નહીં. (૪) સ્ત્રીના કર-ચરણાદિ અવયવનું દર્શન આત્મનિષ્ઠ મુક્તોને પણ પોતાની સ્થિતિથી પાડનાર છે, એમ જાણીને મારા આશ્રિત મુક્ત સાધુઓએ સ્ત્રીના અવયવોનું દર્શન સર્વ પ્રકારે ત્યાગવું. (૫) આ અર્થમાં પ્રાચીન ઈતિહાસને તમે સર્વ આદરપૂર્વક સાંભળો. જે પ્રકારે પૂર્વે મુક્તદશાને પામેલા એવા પણ નારદ અને પર્વત નામના મુનિઓ મહાક્લેશને પામ્યા હતા તે કથા કહું છું : (૬)

પૂર્વે ભાણેજ અને મામા, પર્વત અને નારદ બંને સિદ્ધ હતા. બન્ને ઋષિઓ પુણ્ય ક્ષેત્રોમાં ફરતા ફરતા. એક સમયે વિષ્ણુભક્ત અંબરીષ રાજાના નાના પ્રકારના અમૂલ્ય રત્નોથી અતિ શોભાયમાન ગૃહમાં આવ્યા. (૭-૮) અંબરીષ રાજાએ નાના પ્રકારના ઉપચારોથી પૂજેલા દૂધપાક વગેરે શ્રેષ્ઠ અન્નોથી તૃપ્ત કરેલા નારદ અને પર્વત સુખેથી બેસતા હતા. (૯) રાજાની, સુલોચના-પૃથ્વીમાં શરીર સૌંદર્યથી અનુપમા-પતિવ્રતાને બોધન કરનારાં સારાં લક્ષણોથી શોભતી 'જયંતિ' નામની કન્યા હતી. (૧૦) રાજા અંબરીષ 'જયંતિ' કન્યાને યોગ્ય વર અંગે પૂછવા માટે, બન્ને ઋષિઓને પ્રણામ કરી, પોતાની કન્યા પાસે પણ નમસ્કાર કરાવીને તે કન્યાની સાથે, ઋષિઓની સમીપે બેસીને બન્ને પ્રત્યે બોલ્યા : (૧૧) હે ઋષિઓ ! તમો બ્રહ્મનિષ્ઠ, તપ રૂપી ધનવાળા બન્ને, જ્ઞાન સંપન્ન ત્રિકાલદર્શી છો. માટે ત્રિલોકમાં અપ્રતિહત ગતિવાળા તમારા બન્નેને કંઈ પણ અજાણ્યું નથી. (૧૨) પ્રશ્ન જાણનારાઓમાં શ્રેષ્ઠ તમો બન્નેને એક પ્રશ્ન પૂછું છું. તે પ્રશ્ન સાંભળી અને વિચાર કરીને જ યથાયોગ્ય ઉત્તર કહો. (૧૩) હે ઋષિઓ ! સુલક્ષણા એવી 'જયંતિ' નામની આ મારી કન્યા છે આને યોગ્ય વર નિશ્ચિત કરવા માટે હું શક્તિમાન નથી. (૧૪) માટે સર્વજ્ઞ, સર્વ સુખને આપનારા, તમો કૃપા કરીને યોગ્ય વર ચિંતાથી વ્યાકુળ મનવાળા મને કહો. (૧૫) હે ભક્તો ! રાજા અંબરીષે આ પ્રકારે કહેવાયેલા બન્ને નારદ-પર્વત, સુલક્ષણા, રૂપાનુરૂપ અવયવવાળી 'જયંતિ' ને જોઈને જ મોહ પામ્યા અને સ્વયં બન્ને ઋષિઓ જ પરણવા માટે ઈચ્છા કરવા લાગ્યા. (૧૬) કામથી મોહ પામેલા, માટે જ લાજ વિનાના થઈને બન્ને પણ એક જ સમયે પ્રાર્થના કરવા લાગ્યા, 'હે ભૂપતે ! તમારી કન્યા અમો બન્નેને આપો, તેથી તમારું શ્રેય થશે. (૧૭)

तयोरिति वचः श्रुत्वा भूपतिः स तु विस्मितः । किञ्चिद्विचार्य तावाह जानन्नैष्ठिकतां तयोः ॥१८॥ राजोवाच - ब्रह्मनिष्ठौ युवां ख्यातौ नैष्ठिकब्रह्मचारिणौ । कन्यां वृणीथो मे यत्तद्विनोदो वा ऋतं वचः ॥१९॥ तावूचतुः-ब्रह्मचर्यं च गार्हस्थ्यं वनित्वं भिक्षुता तथा । भगवत्प्रीतये नास्ति भक्तिमेकां दृढां विना ॥२०॥ यस्मिन्कस्मिन्नाश्रमे वा स्थित्वा भगवतो यशः । गातव्यं मोक्षमिच्छद्भिस्तेन तुष्यत्यधोक्षजः ॥२१॥ एतावत्कालपर्यन्तं ब्रह्मचर्येण तद्यशः । वर्णितं कीर्तयिष्यावो गार्हस्थ्येनाथ भूपते ! ॥२२॥ निःसंशयस्ततो विद्धि राजन् ! निश्चय आवयोः । कन्याया ग्रहणेऽस्तीति देहि नौ त्वं सुखी भव ॥२३॥ वाक्यं श्रुत्वेति राजापि काममूढधियोस्तयोः । शापभीतोऽथ तावाह चिन्ताव्याकुलमानसः ॥२४॥ राजोवाच - एका कन्या मदीयेयं युवां द्वाविच्छथश्च ताम् । लोकशास्त्रविरुद्धं तद्दानं कुर्यामहं कथम् ॥२५॥ एकस्य भार्ये द्वे दृष्टे नैका भार्या द्वयोः क्वचित् । वरिष्यति ततः कन्या स्वयमेवेप्सितं वरम् ॥२६॥ प्रातः स्वयंवरं चास्याः कारयिष्यामि निश्चितम् । आगन्तव्यं युवाभ्यां च तत्र नारदपर्वतौ ॥२७॥ इत्युक्तौ तौ ततो यातौ चिन्तयन्तौ च तां हृदि । राजापि कारयामास स्वयंवरसभां ततः ॥२८॥ कन्या कामयते रूपं नान्यदित्यवधार्य तौ । तपसा विकृतं रूपं स्वं रम्यं कर्तुमैच्छताम् ॥२९॥ तयोरपीर्ष्या महती परस्परमभूज्जनाः ! । कन्या वरिष्यति ह्येकमिति हेतोः सकामयोः ॥३०॥ अन्यस्य विकृतं रूपं स्वस्य रम्यं भवेदिति । गूढं स्वस्य त्वभिप्रायं नोचतुस्तौ परस्परम् ॥३१॥ एकैकं वञ्चयित्वा तौ भक्ताभीष्टफलप्रदम् । वैकुण्ठे विष्णुमेवेशं रूपार्थं शरणं गतौ ॥३२॥ तत्रादौ नारदो गत्वा नत्वा सत्वरमच्युतम् । स्वस्य भार्यासमीहां तु गूहमानोऽब्रवीदिदम् ॥३३॥

હે ભક્તો ! આ પ્રકારે નારદ-પર્વત બન્નેનું વચન સાંભળી આશ્ચર્ય પામેલા રાજાએ થોડો સમય વિચાર કરીને બન્ને ઋષિઓની નૈષ્ઠિકતા જાણતા હતા, તેથી બન્ને ઋષિઓને કહ્યું : (૧૮) તમે બન્ને બ્રહ્મનિષ્ઠ, નૈષ્ઠિક બ્રહ્મચારી તરીકે પ્રસિદ્ધ છો. અને કન્યાને પરણવાનું કહો છો એ વચન વિનોદ માટે છે ? કે સત્ય બોલો છો ? (૧૯) બન્ને ઋષિઓ બોલ્યા : હે રાજન્ ! બ્રહ્મચર્યાશ્રમ તથા સંન્યસ્તાશ્રમ તે એક દૃઢ ભક્તિ વિના ભગવાનની પ્રીતિ માટે નથી. (ભક્તિનો ત્યાગ કરીને ભગવાનને પ્રસન્ન કરવા માટે કોઈ પણ આશ્રમ શક્તિમાન નથી.) (૨૦) મોક્ષને ઈચ્છનારા જનોએ જે કોઈ આશ્રમમાં રહીને ભગવાનનું યશોગાન કરવું, તેનાથી ભગવાન અધિક પ્રસન્ન થાય છે, (૨૧) હે ભૂપતે ! આટલા સમય સુધી બ્રહ્મચર્યાશ્રમમાં રહીને ભગવાનની કીર્તિનું વર્ણન કર્યું. હવે ગૃહસ્થાશ્રમમાં રહીને ભગવાનનું યશોગાન કરશું. (૨૨) હે રાજન્ ! માટે અમારા બન્નેનો કન્યા ગ્રહણમાં નિશ્ચય છે. આ વાત સંશય રહિત જાણજો માટે અમોને બન્નેને કન્યાદાન કરો, તમે સુખી થાઓ. (૨૩)

હે ભક્તો ! આવી રીતે કામથી મૂઢ બુદ્ધિવાળા બન્ને ઋષિઓનું વચન સાંભળીને શાપથી ભય પામેલા, ચિંતાથી વ્યાકુલ મનવાળા અંબરીષ રાજા પણ ઋષિઓને કહેવા લાગ્યા. (૨૪) હે બન્ને ઋષિઓ, આ મારી કન્યાને તમો બે જણ માટે હું લોકશાસ્ત્ર વિરુદ્ધ કન્યાદાન કેવી રીતે કરું ? (૨૫) એક પુરુષને બે પત્નીઓ હોય છે. બે પુરુષોને એક ભાર્યા ક્યારેય, કોઈ પણ સ્થાનમાં જોઈ નથી. માટે કન્યા પોતાને ઈચ્છિત વર પોતે જ વરશે. (૨૬) હે નારદ-પર્વત, આ કન્યાનો સવારમાં સ્વયંવર નિશ્ચિત જ કરાવીશ. તે સ્વયંવરમાં તમારે બન્નેએ આવવું. (૨૭) હે ભક્તો ! આ પ્રકારે રાજાએ કહેલા નારદ અને પર્વત, કન્યાને પોતાના મનમાં ચિન્તવન કરતાં કરતાં રાજભવનથી ગયા. પછી રાજા પણ સ્વયંવરની સભા કરાવતા હતા. (૨૮) કન્યા રૂપને ઈચ્છે છે, બીજું દાનાદિક ઈચ્છતી નથી, માતા ધન, પિતા (વિદ્યા) શાસ્ત્ર-શ્રવણ, બંધુ જનો કુળ અને બીજાં લોકો મિષ્ટાન્ન ઈચ્છે છે : આવો પોતાના મનમાં નિશ્ચય કરી, બન્ને ઋષિઓ પરસ્પર, મનથી બીજાનું રૂપ વિરૂપ કરવા અને પોતાનું રૂપ સર્વથી અતિ રમણીય કરવા પોતાના મનમાં ઈચ્છતા હતા. (૨૯) હે જનો ! કન્યા એકને વરશે જ, માટે કામનાથી યુક્ત મનવાળા નારદ અને પર્વત બન્નેને પરસ્પર મહા ઈર્ષ્યા થઈ. (૩૦) બીજાનું રૂપ, વિરૂપ થાય પોતાનું રૂપ અતિ રમણીય થાય : આ પ્રમાણે ગુપ્ત અભિપ્રાયવાળા બન્ને ઋષિઓ પરસ્પર બોલતા ન હતા. (૩૧) બન્ને ઋષિઓ એક એકને ઠગીને પોતાના રમણીય રૂપ માટે વૈકુંઠલોકમાં ભક્તોને અભીષ્ટ આપનારા પોતાના સ્વામી વિષ્ણુ ભગવાનને શરણે ગયા. (૩૨) તે બેમાં નારદ તત્કાલ, પ્રથમ જ જઈને વિષ્ણુને નમસ્કાર કરી; પોતાને સ્ત્રી પરણવાની ઈચ્છાને તો ગુપ્ત રાખતા હતા. તે ભગવાનને કહેવા લાગ્યા : (૩૩)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

अम्बरीषस्य कन्याया भविता श्वः स्वयंवरः। विनोदार्थं तत्र किञ्चिदागतोऽस्म्यत्र याचितुम् ॥३४॥ भगवन्नद्य मे रूपं भवेत् स्त्रीणां मनोहरम् । तपःकृशं च मे गात्रं पुष्टं च बलवद्भवेत् ॥३५॥ स्वयंवरात्तथारभ्य हरे ! सहचरस्य मे । वानरास्येन वैरूप्यं पर्वतस्य भवेदिति ॥३६॥ तथास्त्विति हरिः प्राह नारदोऽपि मुनिस्तदा । अनङ्गमोहनं रूपं सद्यो लब्ध्वा भुवं ययौ ॥३७॥ तावत्पर्वत आगत्य तथैवाभ्यार्थयद्धरिम् । सौरूप्यं स्वस्य देवर्षेः कप्यास्यत्वं स्वयंवरात् ॥३८॥ तथास्त्विति तमप्याह सोऽच्युतः प्रहसंस्तदा । स्त्रीपाशबन्धनं माभूद्भक्तस्येति दयानिधिः ॥३९॥ स पर्वतोऽपि सम्प्राप्य रूपमत्यद्भुतं ततः । नारदं भुवि सम्प्रापज्जयन्तीभजने रतम् ॥४०॥ गूढेङ्गितौ सुरूपौ तौ प्रोचतुश्च परस्परम् । सुरूपोऽसि त्वमेवेति त्वां वरिष्यति सा वधूः ॥४१॥ इत्थं वदन्तौ तौ रात्रिं तां तु दुःखेन निन्यतुः । वैशाखशर्वरी जाता तयोः कल्पनिशासमा ॥४२॥ चक्रतू राजकन्याया निशि तौ गुणकीर्तनम्। अहो तस्या वपुः कान्तमहो तस्या नवं वयः ॥४३॥ अहो भुजलता तस्या अहो तस्या मितं स्मितम् । तस्या मुक्ताफलानीव मधुराण्यक्षराण्यहो ॥४४॥ पर्वतो नारदं प्राह जयन्त्या वदनाम्बुजम् । त्वया पूर्णेन्दुवद्दृष्टं किं वा फुल्लाम्बुजोपमम् ॥४५॥ नारदः प्राह तं तस्या निष्कलङ्केन्दुराननम् । तत्पुरः क्व कलङ्कीन्दुः क्व वा तज्जलजं जडम् ॥४६॥ एतां दशां च तौ प्राप्तावृषी स्त्र्यवयवेक्षणात् । प्रातरेवाम्बरीषस्य पुरमागत्य तस्थतुः ॥४७॥ तद्रूपदर्शनादेव मुमुहुः पुरयोषितः । पौराश्च विस्मिताः सर्वे तावेवैक्षन्त यूथशः ॥४८॥

---

હે ભગવન્ ! અંબરીષ રાજાની કન્યાનો સ્વયંવર આવતી કાલે થશે, તે સ્વયંવરમાં મારે તો કન્યા પરણવાની ઈચ્છા નથી, પરંતુ ત્યાં ભેગા થયેલા રાજાઓના પરિહાસ કરવા માટે કંઈ પણ યાચના કરવા તમારા સમીપમાં આવેલો છું. (૩૪) હે ભગવન્ ! આ સમયમાં મારું રૂપ સ્ત્રીઓને દર્શન માત્રથી ચિત્તને ખેંચનાર થાય. અને તપથી દુર્બલ મારું શરીર સર્વ પ્રકારે યથાયોગ્ય પુષ્ટ અવયવો યુક્ત અને સામર્થ્ય યુક્ત થાય. (૩૫) હે હરે ! તે જ પ્રકારે સ્વયંવરથી આરંભી મારી સાથે ફરનાર પર્વતનું મુખ વાનરાના મુખ જેવું થાય. આ પ્રમાણે યાચના કરવા માટે આવેલો છું. (૩૬) હે ભક્તો ! નારદે આ પ્રમાણે પ્રાર્થના કરાયેલા વિષ્ણુએ 'તમારા કહ્યા પ્રમાણે થાઓ' એમ કહ્યું, તે સમયે નારદ મુનિ પણ કામદેવના ગર્વને નાશ કરનાર રૂપ પામીને તત્કાળ ભૂમિલોકમાં આવ્યા. (૩૭) તેટલામાં નારદજીની જેમ પર્વતમુનિ પણ ભગવાન પાસે જઈને પ્રણામ કરવા પૂર્વક પોતાનું સુંદર રૂપ તેમજ સ્વયંવરથી આરંભીને નારદનું વાનર જેવા મુખથી વિરૂપપણું વિષ્ણુની પાસે માગતા હતા. (૩૮) તે સમયે ભક્તને સ્ત્રી બંધનરૂપ ન થાઓ, આવો વિચાર કરી, દયા સાગર અચ્યુત ભગવાને હસતા હસતા પર્વતને પણ 'તથાઽસ્તુ' તમો કહો છો તેમ થશે, એમ કહ્યું. (૩૯) પછી પર્વત, કામદેવને મોહ પમાડે તેવું રૂપ પામીને પૃથ્વીમાં 'જયંતિ'ના ચિંતનમાં આસક્ત નારદને મળ્યા. (૪૦) ગુપ્ત અભિપ્રાયવાળા, સુન્દર રૂપવાળા નારદ અને પર્વત પરસ્પર બોલતા હતા - સારા રૂપવાળા તમે છો, માટે 'જયંતિ તમોને વરશે.' (૪૧) આ પ્રમાણે પરસ્પર બોલતા નારદ - પર્વત બન્ને જણાએ તે રાત્રિ દુઃખથી વિતાવી. વૈશાખ માસની રાત્રિ પણ બન્ને મુનિઓને બ્રહ્માની રાત્રિ સમાન થઈ. (૪૨) બન્ને મુનિઓ રાત્રિમાં રાજકન્યા જયંતિના પરસ્પર ગુણકીર્તન કરતા હતા. તે 'જયંતિ' નું રૂપાળું શરીર અહો આશ્ચર્યકારી રૂપ તેનું નવીન યૌવન પણ આશ્ચર્ય પમાડે છે. (૪૩) તે 'જયંતિ' ની ભુજ લતાઓ આશ્ચર્યકારી છે. તેનું મંદહાસ્ય આશ્ચર્ય કારક છે. તેના મધુર કર્ણપ્રિય ઉચ્ચારણ કરેલા શબ્દો શુદ્ધ મોતીઓની માફક આશ્ચર્યકારી છે. (૪૪) પર્વત નારદને કહે છે, હે નારદ ! તમોએ જયંતિનું મુખકમળ પૂર્ણ ચન્દ્રમાની સમાન જોયું ? કે વિકસેલા સુંદર કમળ સમાન જોયું ? (૪૫) નારદજી જવાબ આપે છે - હે પર્વત ! જયંતિનું મુખ કલંકે રહિત પ્રત્યક્ષ પૂર્ણચન્દ્ર જ છે. તેની આગળ કલંકવાળો ચન્દ્રમા કંઈ વિસાતમાં નથી. તે પ્રસિદ્ધ, મધુર આલાપ સહિત જયંતિનું મુખ ક્યાં ? અને વાક્ ઈન્દ્રિય રહિત જડ કમળ ક્યાં ? આ બન્નેમાં તો ઘણો ફેર છે. (૪૬) હે ભક્તો ! નારદ અને પર્વત સ્ત્રીના અવયવોનાં દર્શનથી, ઉપરોક્ત દશાને પામ્યા. આહ્નિક વિધિથી પરવારીને સવારમાં જ અંબરીષના પુરમાં આવીને ઊભા રહ્યા. (૪૭) નગરની નારીઓ તે બન્નેના અલૌકિક રૂપને જોઈને મોહ પામી, સર્વે નગરજનો વિસ્મય પામ્યાં અને ભેગાં થઈને મુનિઓને જોવા લાગ્યાં. (૪૮)

स्वयंवरस्य वेलायां जग्मतुर्नृपसंसदि । तत्राहूता नृपेणान्ये राजानोऽपि समाययुः ॥४९॥ कन्याप्रवेशनद्वारसमीपे तावुभावृषी। निषेदतुः शीघ्रमेव कन्यालाभाय कामुकौ ॥५०॥ अम्बरीषोऽपि नृपतिर्मानयित्वा सभागतान् । उपावेशयदानम्य तौ तु वीक्ष्याऽऽप विस्मयम् ॥५१॥ सभासदस्तत्र सर्वे दृष्ट्वा रूपं तयोर्नृपाः । सन्त्यज्यैव जयन्त्याशां तावेवैक्षन्त विस्मयात् ॥५२॥ उभौ समानरूपौ हि मन्मथस्यापि मोहनौ । कं वरिष्यति सा कन्या त्विति संशिशियिरेऽखिलाः ॥५३॥ गृहीतवरमालाऽथ जयन्ती राजकन्यका । प्रविवेश सभां तां च हरन्त्येव मनो नृणाम् ॥५४॥ तदैव तावुभौ जातौ मर्कटास्यावृषी नराः! । परस्परं वीक्षमाणौ परमां मुदमापतुः ॥५५॥ बुबुधे नारदश्चित्ते पर्वतं न वरिष्यति । अवैच्च पर्वतः कन्या नारदं न वरिष्यति ॥५६॥ कन्या तु तावुभौ दृष्ट्वा भीता चक्रे पलायनम् । बोधिताऽप्यम्बरीषेण नाऽऽगच्छत्सा पुनः सदः ॥५७॥ ततो राजा तावुपेत्य प्राह कन्या तु मे मुनी! । भीता भवद्भ्यां नायाति गच्छतं तद्युवामिति ॥५८॥ स्वस्ववक्त्रस्य वैकृत्यमजानन्तौ हि तावुभौ । प्रकल्प्य राज्ञः कापट्यं हताशाविदमूचतुः ॥५९॥ आवां तपस्विनौ ज्ञात्वा राज्यैश्वर्यमदोद्धतः । कन्यां नैव ददासीति जानीवस्तव चेष्टितम् ॥६०॥ आत्मज्ञत्वाभिमानेन मुनीनप्यवमानयन् । देहात्मबुद्धिस्त्वं मूढ ! भविष्यसि न संशयः ॥६१॥ एवं निरपराधं तं राजानं भगवत्प्रियम् । शप्त्वा तस्य गृहात्क्रुद्धौ बहिर्निर्ययतुर्मुनी ॥६२॥ विष्णुना भक्तरक्षार्थं तद्गृहे स्थापितं त्वथ । चक्रं सुदर्शनं शापाद्ररक्ष नृपतिं तु तम् ॥६३॥

---

સ્વયંવરના સમયમાં અંબરીષે કરાવેલી સ્વયંવરની સભામાં બન્ને મુનિઓ આવ્યા. અંબરીષે બોલાવેલા બીજા રાજાઓ પણ સ્વયંવરની સભામાં આવ્યા. (૪૯) નારદ અને પર્વત બન્ને કામદેવથી આક્રાન્ત મનવાળા થઈને તત્કાલ કન્યા-લાભ માટે કન્યાના પ્રવેશદ્વારમાં જ બેઠા. (૫૦) અંબરીષ રાજાએ પણ સ્વયંવરની સભામાં આવેલાઓને વાણીથી સત્કાર કરીને અને નમસ્કાર કરીને યથાયોગ્ય બેસાડ્યા. ત્યાં બેઠેલા નારદ અને પર્વતને જોઈને તો રાજા આશ્ચર્ય પામ્યા. (૫૧) તે સમયે સભામાં બેઠેલા સર્વે રાજાઓ બન્ને મુનિઓનું રૂપ જોઈને 'જયંતિ' કન્યાની પ્રાપ્તિના મનોરથનો ત્યાગ કરીને જ બે મુનિઓને જ આશ્ચર્યથી જોતા હતા. (૫૨) બન્ને સમાન રૂપવાળા, કામદેવને પણ મોહ પમાડનારા છે. તે કન્યા બેમાંથી કયા મુનિને વરશે ? એ પ્રમાણે સર્વ રાજાઓ સંશય પામ્યા. (૫૩) પછી વરમાળા હાથમાં લઈને રાજકન્યા જયંતિ મનુષ્યોના મનને હરતી, સભામાં પ્રવેશ પામી. (૫૪) હે ભક્તજનો ! જ્યારે કન્યા સ્વયંવરની સભામાં આવી ત્યારે જ તે બન્ને ઋષિઓ વાનરના મુખોવાળા થયા. એકબીજાને જોતાં જોતાં પરમ આનંદ પામતા હતા. (૫૫) કન્યા પર્વતને નહીં વરે એમ નારદ પોતાના મનમાં જાણતા હતા. અને નારદને નહીં વરે એમ પર્વત પોતાના મનમાં જાણતા હતા. (૫૬) જયંતિ કન્યા તો વાનરના મુખવાળા બંને મુનિઓને જોઈને ભય પામી નાસી ગઈ. અંબરીષે શા માટે નાસી જાય છે, આ બંને તો ઋષિ છે એમ જણાવી છતાં તે ફરીથી સભામાં ન આવી. (૫૭) પછી રાજા અંબરીષે બન્ને મુનિઓને કહ્યું કે તમારા બન્નેથી ભય પામીને મારી કન્યા સ્વયંવરની સભામાં આવતી નથી. માટે તમે બન્ને ભગવદ્ ભજન માટે અહીંથી ચાલ્યા જાઓ. આ પ્રમાણે રાજાએ બન્નેને કહ્યું. (૫૮) પોત-પોતાના મુખની વિકૃતિને નહિ જાણનારા બન્ને મર્કટ રૂપ મુનિઓ, રાજાનું કપટ જાણીને નિરાશ થયા અને કહેવા લાગ્યા : (૫૯) હે મૂઢ ! રાજ્યઐશ્વર્યના મદથી ઉદ્ધત થયેલો તું, અમો બન્નેને તપસ્વી (ગરીબરૂપ) જાણીને, કન્યા આપવી નથી આવી વૃત્તિ ધરાવે છે તે અમો બન્ને જાણીએ છીએ. (૬૦) 'હે મૂઢ ! આત્મનિષ્ઠાના અભિમાનથી, અમારી ઋષિઓની પણ અવજ્ઞા કરતો તું (પશુઓની સમાન) દેહાત્મબુદ્ધિવાળો થઈશ, એમાં સંશય નથી'. (૬૧) હે ભક્તો ! આ પ્રકારે અપરાધ વિના, ભગવાનને પ્રિય રાજાને શાપ આપીને, કામના ભંગથી ક્રોધ પામેલા બન્ને મુનિઓ અંબરીષની સભામાંથી બહાર નીકળી ગયા. (૬૨) પછી વિષ્ણુ ભગવાને ભક્તની રક્ષા કરવા માટે અંબરીષના ભવને મૂકેલું સુદર્શન ચક્ર તે નૃપતિને ધૂમ-(કાળા) વર્ણવાળા શાપ પુરુષથી રક્ષણ કરતું હતું. (૬૩)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

प्रतिहत्य गृहाच्छापं कामक्रोधाग्निदग्धयोः । तयोर्मुन्योः पृष्ठलग्नं तं कृत्वा चक्रमन्वगात् ॥६४॥ सहसा तावुभौ दृष्ट्वा स्वपृष्ठे धूमराशिवत् । कृष्णवर्णं स्वशापं च विस्मयं प्रापतुस्तदा ॥६५॥ प्रलयाग्निनिभं तावज्ज्वालामालाभयङ्करम् । चक्रं सुदर्शनं दृष्ट्वा चक्राते स्म पलायनम् ॥६६॥ मर्कटास्यावुभावग्रे मध्ये तत्पृष्ठवल्गितः । शापस्तमोमयस्तस्य पश्चाच्चक्रमभूत्पथि ॥६७॥ विवर्णौ म्लानवदनौ श्रमस्विन्नशरीरकौ । भक्तद्रोहगतज्ञानौ पलायेते स्म तावुभौ ॥६८॥ भुवि सर्वेषु देशेषु प्रतिग्रामं गृहं गृहम् । पलायमानौ तौ यातौ पाहि पाहीति वादिनौ ॥६९॥ निर्मानौ निर्मदौ चोभौ निर्लज्जौ यत्र यत्र तौ । पलाय्य गच्छतश्चक्रं तत्र तत्रान्वगाद्द्रुतम् ॥७०॥ रथाङ्गदह्यमानाङ्गौ द्विजौ नारदपर्वतौ । दृष्ट्वा नरा मर्कटास्यौ नोचुः किञ्चिदतद्विदः ॥७१॥ अदृष्टाश्रुतपूर्वां तां सम्प्राप्तावतिवेदनाम् । अधोलोकेषु सर्वत्र तौ च बभ्रमतुर्मुनी ॥७२॥ अप्राप्य कञ्चित्त्रातारं तत्रापि च ततो मुनी । जग्मतुर्देवलोकांश्च क्रोशन्तावुच्चकैर्भृशम् ॥७३॥ ऐन्द्रं वाह्नं च याम्यं च नैर्ऋतं वारुणं तथा । मारुतं तौ च कौबेरं लोकमैशं च जग्मतुः ॥७४॥ सविस्मयं तेऽपि देवास्तत्रस्थाश्च तयोर्दशाम् । विलोक्य तादृशीं किञ्चिन्नोचुश्चक्रभयाद्वचः ॥७५॥ तावृषी सकलान्देवान्ब्रह्माणं शङ्करं तथा । नमन्तावपि न स्वस्य त्रातारं कञ्चिदापतुः ॥७६॥ वैकुण्ठं च ततो यातौ पाहि पाहि हरे! इति। आक्रोशन्तौ दूरतस्तौ नेमतुर्विष्णुमव्ययम् ॥७७॥ दयालुः स हरिश्चक्रात्कृपया रक्षणं तयोः । कृत्वा भक्तस्य तं शापं स्वयं चाङ्गीचकार ह ॥७८॥ एवं पुरा नारदेन पर्वतेन च भो नराः ! । सम्प्राप्तमतुलं कष्टं स्त्रिया ह्यवयवेक्षणात् ॥७९॥

---

સુદર્શન ચક્ર, સભામંડપના આંગણાથી શાપને પાછો વાળીને તે શાપને કામ ક્રોધ રૂપી અગ્નિથી બળતા બન્ને મુનિઓની પાછળ કરીને પોતે પણ પાછળ ગયું. (૬૪) તે સમયે બન્ને મુનિઓ પોતાની પાછળ આવતા ધૂમરાશિની માફક કૃષ્ણવર્ણવાળો, પોતે રાજાને આપેલો શાપ તત્કાલ જ જોઈને વિસ્મય પામતા હતા. (૬૫) તેટલામાં પ્રલયના અગ્નિ સમાન જ્વાળાઓની પંક્તિઓથી ભયંકર કિરણોવાળું સુદર્શન ચક્ર પણ જોઈને અતિ વિસ્મય પામીને બંને તત્કાળ પલાયન કરતા હતા. (૬૬) માર્ગમાં મર્કટના મુખવાળા બન્ને મુનિઓ આગળ હતા પછી તેમની પછવાડે પાછળ પડેલો અંધકાર રૂપ શાપ હતો અને તેની પાછળ સુદર્શન ચક્ર થયું હતું. (૬૭) તેજ વિનાના કરમાઈ ગયેલા મુખવાળા, દોડવાના પ્રયાસથી પરસેવા યુક્ત શરીરવાળા બન્ને, વિષ્ણુભક્ત-અંબરીષ રાજાના દ્રોહથી જેમનું જ્ઞાન નાશ પામ્યું છે એવા બન્ને મુનિઓ આમ તેમ અહીં તહીં જ્યાં ત્યાં દોડતા હતા. (૬૮) બન્ને જણ દોડતા દોડતા 'પાહિ પાહિ' 'રક્ષણ કરો, રક્ષણ કરો' આ પ્રમાણે બોલતા હતા અને પૃથ્વીમાં સર્વ દેશમાં ઘર ઘર પ્રત્યે જતા હતા. (૬૯) માને રહિત અને અહંકારે રહિત, લજ્જાએ રહિત બન્ને મુનિઓ પલાયન કરીને જે જે સ્થળમાં જાય, તે તે સ્થાનમાં સુદર્શન તત્કાલ પછવાડે જતું હતું. (૭૦) બન્ને મુનિઓનાં શરીર સુદર્શન ચક્રથી દાઝતાં હતા, આ મુનિઓને માંકડાના મુખવાળા જોઈને, પલાયનનું કારણ નહિ જાણનારા કંઈ પણ બોલતા ન હતા. (૭૧) પૂર્વે નહિ જોયેલા અને નહિ સાંભળેલા, અતિદુઃખ પામેલા નારદ અને પર્વત બન્ને સર્વ પાતાલ આદિ લોકમાં ભ્રમતા હતા. (૭૨) અધોલોકમાં પણ કોઈ રક્ષણકર્તા મળ્યું નહિ. પછી ઊંચા સ્વરથી બૂમો પાડતા, 'રક્ષણ કરો, રક્ષણ કરો' એમ બોલતા બન્ને મુનિઓ દેવલોકમાં ગયા. (૭૩) ઈન્દ્રલોક, અગ્નિલોક, યમલોક, નૈર્ઋતલોક, વરુણલોક, વાયુલોક, ધનપતિનો લોક તથા રૂદ્રલોકમાં બન્ને મુનિઓ ગયા. (૭૪) તે તે લોકમાં રહેલા ઈન્દ્રાદિ દેવતાઓ પણ આશ્ચર્ય પૂર્વક બન્ને મુનિઓની આવી દુર્દશા જોઈને સુદર્શન ચક્રની બીકથી કંઈ પણ વચન બોલ્યા નહિ. (૭૫) બન્ને ઋષિઓ ઈન્દ્રાદિ દિગ્પતિઓને, બ્રહ્માને, શંકરને નમસ્કાર કરતા હતા છતાં કોઈ રક્ષણ કરનાર મળ્યા નહિ. (૭૬) પછી બન્ને મુનિઓ વૈકુંઠ લોકમાં ગયા ત્યાં 'હે હરે ! 'રક્ષણ કરો, રક્ષણ કરો' એમ દૂરથી બૂમો પાડતા, અવિનાશી વિષ્ણુને નમસ્કાર કરતા હતા. (૭૭) દયાળુ શ્રીહરિએ કૃપાથી બન્ને મુનિઓની ચક્રથી રક્ષા કરીને, અંબરીષ રાજા સંબંધી પૂર્વે કહેલો જે શાપ, તે પોતે અંગીકાર કર્યો. (૭૮) હે ભક્તો ! આ પ્રકારે પૂર્વે નારદ અને પર્વતે સ્ત્રીના અવયવના દર્શનથી અતિશય દુઃખ પ્રાપ્ત કર્યું હતું. (૭૯)

**तस्मान्मुमुक्षुर्मुक्तो वा मद्भक्तः क्वापि योषितः । प्रसङ्गं न प्रकुर्वीत सर्वथा स्वहिताय हि ॥८०॥ तथा मिथुनसक्तानां तिरश्चामपि दर्शनम् । मुक्तेनापि न कर्तव्यं किं पुनश्च मुमुक्षुणा ॥८१॥ ऋषिः प्राक् सौभरिर्मुक्तो ब्रह्मनिष्ठो जितेन्द्रियः । बृहद्व्रतादभूद्भ्रष्टो मीनमैथुनदर्शनात् ॥८२॥ ज्ञानस्य भक्तेरथवा बलेन मद्वाक्यमुल्लङ्घ्य मनोभवार्तः ॥ यः स्वैरवर्ती भविता नरोऽसौ धर्मच्युतः प्राप्स्यति भूरि कष्टम् ॥८३॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे वृत्तालयदोलोत्सवे जनशिक्षायां स्त्रीप्रसङ्गान्नारदपर्वतयोर्दुर्दशाप्राप्तिनिरूपणनामा षष्टितमोऽध्यायः ॥६०॥

श्रीनारायणमुनिरुवाच – **नारीणां ब्रह्मनिष्ठानामपि पातित्यकृत्किल । निरीक्षणादिकं पुंसः स्त्रीभिस्त्याज्यं हि तत्ततः ॥१॥ अत्र वः कथयिष्यामि कथां भक्ताः! पुरातनीम् । यथा भ्रष्टाऽभवत्पूर्वं नैष्ठिकी देवयान्यपि ॥२॥ आसीत्पुरा देवयानी कन्या शुक्रस्य शोभना । पितुः प्रसादात्सम्प्राप्ता बाल्य एवात्मनिष्ठताम् ॥३॥ सम्यग्योगकलायां च निपुणा धर्मशास्त्रवित्। प्रगल्भा नूतनं काव्यं कर्तुं स्वयमुदारधीः ॥४॥ स्वशिष्यतामुपेतानामासुरीणां सहस्रशः । कन्यानां बोधने दक्षा शुक्रवद्बहुयुक्तिभिः ॥५॥ शुक्रश्च स्वां दुहितरं प्राणेभ्योऽप्यतिवल्लभाम् । अनेकगुणसम्पन्नां प्रेम्णैवालालयत्सदा ॥६॥ अथैकदा कविस्तां च प्राप्तां दशमवत्सरम् । दृष्ट्वा वराय योग्याय दातुमैच्छद्यथाविधि ॥७॥ ततो दुहितरं प्राह सोऽतिस्नेहेन भार्गवः । कन्ये ! बुद्धिमति ! प्रेष्ठे ! शृणु मे परमं वचः ॥८॥ प्राप्ता त्वं दशमं वर्षं दानकालस्ततोऽधुना । वर्तते तव तस्मात्त्वं ब्रूहि मे स्वेप्सितं वरम् ॥९॥**

માટે મુમુક્ષુ ભક્તો અથવા તો મુક્તોએ પણ પોતાના હિતને માટે ક્યારેય પણ સ્ત્રીનો પ્રસંગ કરવો નહિ. (૮૦) તે જ પ્રકારે મૈથુનાસક્ત પશુપક્ષી આદિક પ્રાણીઓનાં દર્શન મુક્તોએ પણ કરવાં નહિ; તો મુમુક્ષુઓ દર્શન ન કરે, તેમાં શું કહેવું ? (૮૧) પૂર્વે બ્રહ્મનિષ્ઠ, જિતેન્દ્રિય સૌભરિઋષિ મીનમૈથુનના દર્શનથી નૈષ્ઠિક બ્રહ્મચર્યથી ભ્રષ્ટ થયા હતા. (૮૨) આત્મા-પરમાત્માના સાક્ષાત્કારના બળથી અથવા તો સપ્રેમ, શ્રવણાદિ નવ પ્રકારની શ્રીકૃષ્ણની ઉપાસનાના બળથી આ મારા વચનનું ઉલ્લંઘન કરીને, જે મારો ભક્તજન સ્વેચ્છાચારી થશે, તે મનુષ્ય કામદેવથી પીડાયેલો માટે જ ધર્મ ભ્રષ્ટ થઈ ઘણાં દુઃખને પામશે. (૮૩)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે વૃત્તાલયદોલોત્સવે જનશિક્ષાયાં સ્ત્રીપ્રસંગાન્નારદ પર્વતયો દુર્દશાપ્રાપ્તિનિરૂપણ નામા ષષ્ટિતમોઽધ્યાયઃ (૬૦)*

## અધ્યાય : ૬૧

## શુક્રાચાર્યની પુત્રી દેવયાનીને પુરુષ પ્રસંગથી આશ્ચર્યજનક મહાદુર્દશાની પ્રાપ્તિ થઈ તેનું નિરૂપણ કર્યું છે.

**શ્રીનારાયણ મુનિ બોલ્યા** : હે ભક્તજનો ! બ્રહ્મનિષ્ઠા એવી નારીઓને પણ પુરુષના નિરીક્ષણ વગેરે પોતાના પતિવ્રતાના ધર્મથી પાડે છે એ નિશ્ચિત છે, માટે બ્રહ્મનિષ્ઠ મારી આશ્રિત સ્ત્રીઓએ પણ પુરુષને જોવાનો દૂરથી ત્યાગ કરવો (૧) હે ભક્તો, આ વિષયમાં પુરાણમાં કહેલી કથા હું કહીશ. જે પ્રકારે પૂર્વે જીવનપર્યંત બ્રહ્મચર્યવ્રત પાળવાના સંકલ્પવાળી દેવયાની પણ પોતાના બ્રહ્મચર્યવ્રતથી ભ્રષ્ટ થઈ હતીઃ (૨) પૂર્વે શુભ લક્ષણા શુક્રની કન્યા દેવયાની હતી. પિતા શુક્રના અનુગ્રહથી બાલ્યાવસ્થામાં જ આત્મનિષ્ઠાને પામેલી હતી. અષ્ટાંગ યોગના સાધનમાં સારી, પ્રવીણા, ધર્મશાસ્ત્રના અર્થોને જાણનારી પોતે નવીન ગ્રંથ રચવામાં શક્તિમતી ઉદાર બુદ્ધિવાળી હતી. (૩-૪) પોતાના શિષ્યભાવને પ્રાપ્ત થયેલી હજારો અસુરોની કન્યાઓને ઘણી યુક્તિઓથી જ્ઞાન આપવામાં શુક્રની માફક નિપુણા હતી. (૫) શુક્ર, પ્રાણથી પણ અત્યંત પ્રિય, અને ગુણ સંપન્ના પોતાની પુત્રીને પ્રેમથી સદૈવ, લાલન-પાલન કરતા હતા. (૬) પછી એક સમયે દશમા વર્ષને પામેલી પોતાની પુત્રીને વિવાહ યોગ્ય વયમાં વર્તતી જોઈને યોગ્ય વરને યથાવિધિ આપવા ઈચ્છતા શુક્ર અતિ સ્નેહથી કન્યાને કહેવા લાગ્યા : હે પુત્રી ! હે બુદ્ધિમતી ! હે અતિપ્રેષ્ઠ ! મારું અત્યુત્તમ વચન સાંભળ, કન્યાદાનને યોગ્ય દશમું વર્ષ તને હવે બેઠું છે માટે તને જેવા વરની અભિલાષા હોય તે મને કહે. (૭-૮-૯)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

महर्षये वा देवाय नृषु वा ब्राह्मणाय वै । ददामि त्वामहं कन्ये ! ब्रूहि सत्यं मनोगतम् ॥१०॥ दानकाले न यः कन्यां ददाति ब्राह्मणो भुवि । उचिताय वरायासौ ब्रह्महत्यामवाप्नुयात् ॥११॥ तस्माद्वरं कथय मां यस्मै रोचेत ते मनः । अथवा स्वेच्छयैवाहं ददामि त्वां महर्षये ॥१२॥ इत्युक्ता देवयानी सा पितरं प्राह सस्मितम् । मम नास्त्येव हि प्रीतिः कस्मिंश्चित्पुरुषे पितः ! ॥१३॥ तपो मे रोचतेऽत्यन्तं पुनःसंसृतिनाशनम् । यावज्जीवं तपः कर्तुं निश्चयो हि मया कृतः ॥१४॥ तस्मान्मद्दानसङ्कल्पं त्यक्त्वा स्वमनसः पितः ! । स्वस्थो भव महाप्राज्ञ ! मच्चिन्तां मा कृथा वृथा ॥१५॥ इच्छा यस्या भवेत्पुंसि तददाने महर्षिभिः । दोषः स्मृतोऽस्ति शास्त्रेषु विरक्ताया न वै क्वचित् ॥१६॥ कन्यावाक्यमिति श्रुत्वा स तु शुक्रो महामतिः । नैष्ठिकव्रतमाहात्म्यं जानन्नोवाच किञ्चन ॥१७॥ बाल्य एव विरक्तिं च तस्या योगस्थितिं तथा । दृष्ट्वा प्रसन्नः शुक्रोऽभूत्तत्प्रियं यच्चकार तत् ॥१८॥ अथ काले च कियति व्यतिक्रान्ते कवेर्गृहे । कचो बृहस्पतेः पुत्रो विद्यां अध्येतुमागमत् ॥१९॥ शुक्राज्ञया स्थितस्तत्र विद्या अध्यैत सोऽपि च । दृष्ट्वा तद्रूपसौन्दर्यं देवयानी मुमोह सा ॥२०॥ दिने दिने निजं धर्मं योगाभ्यासात्मचिन्तने । त्यक्त्वा शनैः शनैः सा च तच्छुश्रूषारताऽभवत् ॥२१॥ पीडिता मन्मथेनाथ प्रार्थयामास तं रहः । स्वाङ्गप्रदर्शनाद्यैश्च लोभयन्ती गतत्रपा ॥२२॥ त्वं मे भव पतिर्वीर ! तव योग्यास्मि सर्वथा । त्वयि मे रमते चित्तं न मां त्वं त्यक्तुमर्हसि ॥२३॥ गुरुपुत्र्याऽर्थितस्त्वेवं कामविह्वलया कचः । धर्मविच्च महाधीरस्तामुवाचाविवेकिनीम् ॥२४॥ अवाच्यं किमिदं भद्रे ! भाषसे मां मुधा वचः । भगिनी गुरुपुत्री त्वं लोकशास्त्रविगर्हितम् ॥२५॥ इति प्रत्युदिता सापि तेन धर्मविदा तदा । पुनः पुनस्तमेकान्ते एवमेवाऽऽर्थयत्कुधीः ॥२६॥

---

હે કન્યે ! હું તને કોઈ મહર્ષિને આપું ? અથવા દેવને આપું કે મનુષ્યોમાં કોઈ બ્રાહ્મણને આપું ? તારા અંતઃકરણમાં જેવું હોય, તેવું સત્ય બોલ. (૧૦) પૃથ્વીમાં જે બ્રાહ્મણ દાન સમયમાં યોગ્ય વરને કન્યા નથી આપતો, તે બ્રાહ્મણ બ્રહ્મહત્યા સમાન દોષ પામે છે. (૧૧) માટે તારું મન જે વરની ઉપર હોય, તે વર મને કહે અથવા હું મારી ઈચ્છાથી તને મહર્ષિને આપું. (૧૨) હે ભક્તો ! આ પ્રમાણે પોતાના પિતાએ કહેલી દેવયાની મંદહાસ્ય સહિત પિતાના પ્રત્યે બોલી : હે પિતાજી, કોઈ પુરુષને વિષે મારે પ્રીતિ થતી જ નથી. (૧૩) ફરીથી સંસૃતિનાશ કરનાર તપ મને અત્યંત રુચે છે. માટે મેં જીવન પર્યન્ત તપ કરવાનો નિશ્ચય જ કર્યો છે. (૧૪) માટે હે મહાપ્રાજ્ઞ પિતાજી ! તમો મારા દાનનો સંકલ્પ તમારા મનથી ત્યાગ કરીને ચિંતા રહિત થાઓ. પ્રયોજન વગરની મારી ચિન્તા કરશો નહિ. (૧૫) જે કન્યાને પુરુષમાં ઈચ્છા હોય, તેનું દાન ના કરે તો મહર્ષિઓએ શાસ્ત્રમાં બ્રહ્મહત્યાનું પાપ કહેલું છે. વૈરાગ્યવાળી કન્યાનું કન્યાદાન ન કરવામાં દોષ, કોઈ શાસ્ત્રમાં કહ્યો નથી. (૧૬) હે ભક્તો ! આવું પોતાની કન્યા, દેવયાનીનું વચન સાંભળી, મહા બુદ્ધિશાળી શુક્ર નૈષ્ઠિક વ્રતનું માહાત્મ્ય જાણતા હોવાથી કંઈ પણ બોલ્યા નહિ. (૧૭) બાલ્યાવસ્થામાં દેવયાનીનો વૈરાગ્ય તથા દૃઢ અષ્ટાંગયોગની સ્થિતિ જોઈને શુક્રાચાર્ય પ્રસન્ન થયા. જે કન્યાને અભીષ્ટ હોય તેમ તે કરતા હતા. (૧૮) પછી કેટલોક સમય ગયો ત્યારે બૃહસ્પતિનો પુત્ર કચ, સંજીવની વગેરે વિદ્યા ભણવા માટે શુક્રને ઘેર આવ્યો. (૧૯) શુક્રની આજ્ઞાથી શુક્રને ઘેર રહેલો કચ પણ વિદ્યા ભણતો હતો. તેથી દેવયાની કચનું રૂપલાવણ્ય જોઈને તેનાથી મોહ પામી. (૨૦) દિવસે દિવસે પોતાનો ધર્મ, યોગાભ્યાસ અને આત્મચિન્તનને ત્યાગીને કચની સેવા પરાયણ થતી આસક્તિને પામી. (૨૧) પછી કામદેવથી પીડા પામેલી, માટે જ પોતાનાં અંગો બતાવવા વગેરેથી કચના મનને અભિલાષા ઉત્પન્ન કરતી, લાજ વિનાની દેવયાની એકાંતમાં કચને પ્રાર્થના કરવા લાગી. (૨૨) હે વીર ! તમે મારા પતિ થાઓ. સર્વ પ્રકારે હું તમોને યોગ્ય છું. મારું ચિત્ત તમારામાં રમે છે. તમે મને ત્યાગ કરવાને યોગ્ય નથી. (૨૩) આ પ્રકારે કામથી આસક્ત થયેલી- ગુરુપુત્રી દેવયાનીએ પ્રાર્થના કરાયેલો, ધર્મજ્ઞ, મહા ધીરજવાળો કચ, ધર્મ અને અધર્મના વિવેક રહિત દેવયાનીને કહેવા લાગ્યો : (૨૪) હે ભદ્રે ! ગુરુપુત્રી માટે બહેન, તમે લોક અને શાસ્ત્ર નિંદિત, માટે જ ન બોલવા યોગ્ય આ વચન મને વૃથા શા માટે કહો છો ? (૨૫) આ પ્રમાણે દેવયાનીના મોહની ઉત્પત્તિ સમયમાં ધર્મજ્ઞ કચે નિષેધ કર્યો, તો પણ દેવયાની દુર્બુદ્ધિવાળી હોવાથી એકાંતમાં વારંવાર કચને પ્રાર્થના કરતી હતી. (૨૬)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી **શ્રી સ્વા. મંદિર - સરધાર**

प्रत्याख्यानं प्रकुर्वन्तं मुहुस्तं काममोहिता । क्रुधा शशाप सा मूढा विद्या ते निष्फलाऽस्त्विति ॥२७॥ प्रतिशप्ता तेन सापि मा ते विप्रो वरोऽस्त्विति । स्वर्गं जगामाथ कचो विमना विफलश्रमः ॥२८॥ अष्टोत्तरसहस्त्राब्दा वयसा देवयान्यपि । वव्रे ययातिं नृपतिं क्षत्रियं स्वैरिणी यथा ॥२९॥ एवं सा ह्यात्मनिष्ठापि पुरुषस्येक्षणादिभिः । भ्रष्टा बृहद्व्रताज्जाता कुलटेवातिनिस्त्रपा ॥३०॥ पितुः शिष्यं भ्रातृतुल्यं मैथुनायाऽऽर्थयत्तथा । धर्मज्ञं ब्राह्मणं धीरमधर्मेण शशाप च ॥३१॥ स्वतश्च नीचजातीयं चकार पतिमात्मनः । दुर्लभं ब्राह्मणत्वं च त्यक्त्वा क्षत्रत्वमाप सा ॥३२॥ सर्वोत्कृष्टं भृगुकुलं लाञ्छयामास साऽबला । तपःकृच्छ्रादिकं तस्याः श्रममात्रफलं ह्यभूत् ॥३३॥ तथैव रेणुका भार्या जमदग्नेः पतिव्रता । गन्धर्वराजमद्राक्षीदुदकार्थं नदीं गता ॥३४॥ तद्रूपदर्शनात्सापि चक्रे स्वहृदि तत्स्पृहाम् । पत्युः क्रोधेन सा प्रापदपमृत्युव्यथां ततः ॥३५॥ तस्माद्धि ब्रह्मनिष्ठाभिरपि स्त्रीभिः कदाचन । पुंवीक्षणादिकं नैव कर्तव्यं स्वविनाशकृत् ॥३६॥ मुमुक्षवः स्युर्या नार्यस्तास्तु सत्सङ्गिनो मुखात् । भ्रातुः पत्युः पितुर्वापि शृणुयुः श्रीपतेः कथाम् ॥३७॥ मातामहान्मातुलाद्वा पुत्राद्वाऽपि पितामहात् । तद्वार्तां शृणुयुर्भक्त्या श्रुतां तैश्च सतां मुखात् ॥३८॥ श्रुत्वा च तत्कथा स्त्रीभिः कीर्तनीया परस्परम् । संशये सति पुंद्वारा प्रष्टव्याः सन्त एव च ॥३९॥ विधवाभिस्तथा स्त्रीभिः कथा पौराणिकी हरेः । विप्रेण वाच्यमानाऽग्रे पुंसां श्रव्या च दूरतः ॥४०॥ श्रीकृष्णगुणसम्बद्धगीतपद्यादिपाठनम् । समीपसम्बन्धवतः पित्रादेः कार्यमेव तत् ॥४१॥ स्वग्रामे वा परग्रामे धर्मवैराग्यभक्तिभिः । वृद्धा या योषितः स्युस्ता मान्या राधा रमा यथा ॥४२॥ तासां समागमः कार्यः प्रायशोऽत्र मुमुक्षुभिः । नारीभिः श्रेयसे स्वासां स्थेयं तत्प्रोक्तवर्त्मनि ॥४३॥

---

વારંવાર કહેવા છતાં તેની વાતનું ખંડન કરનાર કચને કામથી મોહ પામેલી, મૂઢ બુદ્ધિવાળી દેવયાનીએ ક્રોધ પામીને "તારી વિદ્યા નિષ્ફળ થાઓ" એવો શાપ આપ્યો. (૨૭) કચે દેવયાનીને પણ "તારો વિપ્ર વર ના થાઓ" આ પ્રમાણે સામો શાપ આપ્યો. પછી ઉદ્વિગ્ન મનવાળો વિદ્યાભ્યાસનો પરિશ્રમ વિફલ ગયો છે એવો કચ સ્વર્ગમાં ગયો. (૨૮) એક હજારને આઠ વર્ષની દેવયાની સ્વૈરિણીની માફક ક્ષત્રિય જાતિના યયાતિ રાજાને વરી. (૨૯) આ પ્રમાણે આત્મનિષ્ઠા દેવયાની પણ પુરુષના દર્શન વગેરેથી નૈષ્ઠિક બ્રહ્મચર્યવ્રતથી ભ્રષ્ટ થઈ સ્વૈરિણીની માફક અત્યંત નિર્લજ્જા થઈ. (૩૦) પોતાના પિતાના શિષ્યને, માટે જ ભાઈ તુલ્ય કચને મૈથુન માટે પ્રાર્થના કરતી હતી તથા ધર્મજ્ઞ, ધીર કચને અધર્મથી શાપ આપ્યો. (૩૧) દેવયાનીએ પોતાની જાતિથી નીચી જાતિમાં ઉત્પન્ન થયેલાને પોતાનો પતિ કર્યો. દુર્લભ બ્રાહ્મણપણું ત્યાગ કરી ક્ષત્રિય ભાવને પામી. (૩૨) અબલા દેવયાનીએ સર્વોત્તમ ભૃગુકુળને કલંક લગાડ્યું. તેનું તપ-કૃચ્છ્રચાંદ્રાયણાદિ યોગસિદ્ધિને માટે કરેલો શ્રમ, એ શ્રમ માત્ર જેને ફળસ્વરૂપે રહ્યો, તેવું નિષ્ફળ થયું. (૩૩) તેજ પ્રકારે જમદગ્નિ મુનિની ભાર્યા રેણુકા, જળ ભરવા માટે ગંગામાં ગઈ હતી. ત્યાં ગંધર્વરાજ ચિત્રરથને જોતી હતી. (૩૪) તે રેણુકા પણ તેના રૂપદર્શનથી પોતાના અંતઃકરણમાં તેના ઉપભોગની ઈચ્છાવાળી થઈ. માટે રેણુકા, પતિ જમદગ્નિના ક્રોધથી, પરશુના પ્રહાર પામી, મૃત્યુપીડાને પામી. (૩૫) માટે બ્રહ્મનિષ્ઠ સ્ત્રીઓએ પણ પોતાનો વિનાશ કરનાર પુરુષનું દર્શન, વાણીવ્યવહાર વગેરે ક્યારેય ન કરવાં. (૩૬) જે સ્ત્રીઓ મુમુક્ષુઓ હોય, તેમણે તો સત્પુરુષોનો જેમને સમાગમ હોય તેવા; (સત્પુરુષોથી કથાવાર્તા સાંભળીને આવેલા;) પોતાના ભાઈ, પતિ અથવા પિતાના મુખથી શ્રીકૃષ્ણની કથાવાર્તા પ્રીતિથી સાંભળવી. (૩૭) તેમજ માતાનાં પિતા, મામા, પુત્ર કે પિતાના પિતા વગેરે સંબંધીઓના મુખ થકી તેઓએ સંતોના મુખ થકી સાંભળેલી ભગવાનની કથાવાર્તા પણ સ્ત્રીઓએ ભક્તિપૂર્વક સાંભળવી.(૩૮) સ્ત્રીઓએ સાંભળેલી શ્રીકૃષ્ણની કથા, પરસ્પર કહેવી. તેમાં સંશય થાય, તો પોતાના સંબંધી પુરુષ દ્વારા સંતોને પુછાવવું. (૩૯) તે પ્રકારે વિધવા સ્ત્રીઓએ, પોતાના સંબંધી પુરુષોની આગળ, સત્સંગી બ્રાહ્મણ દ્વારા વંચાતી શ્રીહરિની પુરાણકથા દૂરથી સાંભળવી. (૪૦) શ્રીકૃષ્ણના ગુણોથી ગ્રંથિત કરેલાં કીર્તનો તથા પદ્યો વગેરેનું પઠન-પાઠન રૂપ અધ્યયન, પોતાના સંબંધી પિતા વગેરેથી કરવું. (૪૧) પોતાના ગામમાં અથવા પરગામમાં ધર્મ, જ્ઞાન, વૈરાગ્ય અને ભક્તિથી વૃદ્ધા (અર્થાત્ ધર્માદિના અધિકપણાથી શ્રેષ્ઠ) જે સ્ત્રીઓ હોય, તેમને રાધા અને રમા જેમ માન્ય છે તેમ માનવી. (૪૨) આ લોકમાં મુમુક્ષુ સ્ત્રીઓએ પોતાના કલ્યાણ માટે ધર્મવૃદ્ધ સ્ત્રીઓનો ઘણું કરીને સમાગમ કરવો. તેમજ તેમણે કહેલા સ્ત્રીઓના ધર્મમાર્ગમાં રહેવું. (૪૩)

जन्माष्टम्यादिषु हरेरुत्सवेषु तु यज्जनाः !। कार्यं स्त्रीभिः शृणुत तत् सन्मण्डलसमागमे ।।४४।। सतां वासस्थलं वप्रवृत्याद्यैश्छेदनावृतम् । तर्हि पित्रादिभिः साकं योषाभिस्तत्र गम्यताम् ।।४५।। अनेकशो जनानां च समुदायेऽथ तत्स्थले । स्त्रीभिः स्त्रीषूपवेष्टव्यं पुम्भिः पुंसु न चान्यथा ।।४६।। तत्र पुंसः प्रति हरेः कुर्वतां च कथाः सताम् । मुखाद्दूरस्थिताभिस्ताः श्रोतव्याः स्त्रीभिरादरात् ।।४७।। एवमेव निजग्रामे विनाप्युत्सववासरम् । आगच्छेयुर्यदा सन्तो महान्तो हि तपस्विनः ।।४८।। तदानीमपि योषाभिर्जनसङ्घे यथा पुरा । स्वजनैः सह गन्तव्यं स्थातव्यं च यथोचितम् ।।४९।। वृतिवप्रावृते स्थाने सतां स्त्रीभिः कदाचन । न प्रवेष्टव्यमित्याज्ञा मामिका सर्वयोषिताम् ।।५०।। मदाज्ञां या समुल्लङ्घ्य प्रविशेत्तत्र निर्भया । कृत्यैव सा तु विज्ञेया नारी पापात्मिका भुवि ।।५१।। दर्शनार्थमपि स्त्रीभिः स्वेष्टदेवस्य कर्हिचित् । गन्तव्यं नैव रात्रौ तु विना द्वावुत्सवौ जनाः ! ।।५२।। जन्माष्टम्युत्सवो यर्हि मम जन्मोत्सवस्तथा । तदा स्त्रीभिर्दर्शनार्थं निशि गम्यं सह स्वकैः ।।५३।। राक्षसाः कामरूपा हि धर्मभ्रंशकरा निशि। चरन्तीति तदा गम्यं सावधानाभिरेव हि ।।५४।। सतां समागमस्त्वेवं स्त्रीणां निःश्रेयसाय हि । पारम्पर्येण साक्षाच्च कर्तव्यत्वेन वर्णितः ।।५५।। या आचरिष्यन्ति युवत्य इत्थमेधिष्यते प्रेम हरौ हि तासाम् । स्थितिश्च धर्मेऽपि भविष्यतीति ता ब्रूत यूयं वनिताः समस्ताः ।।५६।। इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे वृत्तालयदोलोत्सवे जनशिक्षायां पुरुषप्रसङ्गाद्देवयानीदुर्दशानिरूपणनामैकषष्टितमोऽध्यायः ।।६१।।

---

હે જનો ! શ્રીહરિના જન્માષ્ટમી આદિ ઉત્સવોમાં સત્પુરુષોનો સમાગમ થતાં, સ્ત્રીઓએ જે કરવાનું છે તે સાંભળો. (૪૪) જો સ્વધર્મનિષ્ઠ સાધુઓનું નિવાસસ્થાન વંડો કે વાડ વગેરેથી આવરણ રહિત હોય તો સ્ત્રીઓએ પિતા વગેરેની સાથે, તેમના નિવાસ સ્થાનમાં કથા સાંભળવા જવું. (૪૫) પછી તે સ્થાનમાં, ઘણા જનોના સમુદાયમાં, સ્ત્રીઓએ સ્ત્રીઓની સભામાં, અને પુરુષોએ પુરુષોની સભામાં યથાયોગ્ય બેસવું. બીજા પ્રકારે બેસવું નહિ. (૪૬) તે સ્થાનમાં પુરુષોને ઉદ્દેશીને શ્રીહરિની કથા કરતા સાધુઓના મુખથી કથાવાર્તા દૂર રહેલી સ્ત્રીઓએ ભક્તિપૂર્વક સાંભળવી. (૪૭) આવી રીતે ઉત્સવોમાં અને ઉત્સવ વિના પણ પોતાના ગામમાં જ્યારે ધર્મવૃદ્ધ સંતો આવે ત્યારે પણ, જન્માષ્ટમી-આદિક ઉત્સવોની જેમ જ જનસમુદાયમાં સ્ત્રીઓએ પોતાનાં સંબંધીજનોની સાથે જવું અને યથાયોગ્ય પોતપોતાની મર્યાદાથી બેસવું. (૪૮-૪૯) સાધુઓના વાડ્ય કે કોટથી આવરણવાળા સ્થાનમાં સ્ત્રીઓએ ક્યારેય પ્રવેશ કરવો નહિ. આ પ્રકારે સ્ત્રીઓને મારી આજ્ઞા છે. (૫૦) જે સ્ત્રી, આ મેં કહેલી આજ્ઞાનું ઉલ્લંઘન કરી, ભય રહિત થઈ, વાડ-વંડાવાળી જગ્યામાં પ્રવેશ કરશે તે સ્ત્રી, પૃથ્વીમાં પાપરૂપ પિશાચિની જાણવી. (૫૧) હે જનો ! સ્ત્રીઓએ પોતાના ઈષ્ટદેવ શ્રીકૃષ્ણના ઉત્સવમાં દર્શન માટે પણ બે ઉત્સવો વિના રાત્રિમાં ક્યારેય પણ જવું નહિ. (૫૨) જ્યારે જન્માષ્ટમી ઉત્સવ તથા મારો પ્રાદુર્ભાવ (ચૈત્ર સુદ-૯ દશ ઘડી રાત્રિ બાદ) છે. તે સમયે પોતાના ઈષ્ટદેવનાં દર્શન કરવા માટે, પોતાના પિતા વગેરેની સાથે રાત્રિમાં જવું. (૫૩) ઈચ્છા પ્રમાણે રૂપ ધરનારા, ધર્મભ્રષ્ટ કરનારા રાક્ષસો રાત્રિમાં ફરે છે. માટે રાત્રિમાં સ્ત્રીઓએ સાવધાનપણે શ્રીકૃષ્ણદર્શન માટે જવું. (૫૪) આ પ્રકારે સ્ત્રીઓના કલ્યાણ માટે સત્પુરુષોનો સમાગમ, ભાઈ વગેરે દ્વારા પરંપરાથી અને સાક્ષાત્ (ભાઈ વગેરેની સાથે રહીને મર્યાદાથી) કરવાપણે વર્ણન કર્યું છે. (૫૫)

હે ભક્તો ! મારા કહ્યા પ્રમાણે જે યુવતિઓ, સ્ત્રીઓ આચરણ કરશે, તેઓને શ્રીહરિમાં પ્રેમવૃદ્ધિ થશે અને પોતાના ધર્મમાં પણ સ્થિતિ થશે. આ પ્રકારે તમો સર્વે તમારા દ્વારા પ્રશ્ન કરનારી, તમારી સંબંધી સ્ત્રીઓને, મેં કહેલા પ્રશ્નોના ઉત્તરોને કહો. (૫૬)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણ ચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે વૃત્તાલયદોલોત્સવે જનશિક્ષાયાં પુરુષપ્રસંગાદ્ દેવયાની દુર્દશાનિરૂપણ નામૈકષષ્ટિતમોऽध्यायः (૬૧)*



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

श्रीनारायणमुनिरुवाच – गृहस्थाः पुरुषा ये स्युः परस्त्रीसङ्गवर्जनम् । सर्वथा तैः प्रकर्तव्यमिहामुत्र सुखेप्सुभिः ॥१॥ गृहिणां च स्त्रियो याः स्युस्ताभिः पुंसः परस्य तु । प्रसङ्गः सर्वथा त्याज्य उद्वाह्याभिर्विशेषतः ॥२॥ गृहस्थैरपि संत्याज्यः संसर्गो मद्यमांसयोः । पलाण्डुलशुनादेश्च तथा मादकवस्तुनः ॥३॥ चातुर्वर्ण्यजनैर्भक्ताः! स्वज्ञातेरपि कर्हिचित् । नैवोच्छिष्टं भक्षणीयमग्निपक्वादिकं विना ॥४॥ भङ्गागञ्जाहिफेनानि तमालं त्रिविधं तथा । मच्छ्रितो नैव सेवेत द्यूतं स्तेयं तथानृतम् ॥५॥ दुग्धं घृतं च पानीयं नैव प्राश्यमगालितम् । क्रोधेर्ष्यामानहिंसाश्च हातव्या गृहिणापि च ॥६॥ देवार्थं वापि पित्र्र्थं न कार्यं जीवहिंसनम् । स्वर्गार्थमपि तीर्थादौ नात्मघातश्च कर्हिचित् ॥७॥ मत्स्यग्राहस्य यत् पापं षण्मासाभ्यन्तरे भवेत् । एकाहे तत्समं ज्ञेयमपूतं यो जलं पिबेत् ॥८॥ अपूतजलपाने हि मांसभक्षणसम्भवात् । पुराणे दोष इत्युक्तः पेयं तद्गालितं जलम् ॥९॥ सांसारिकपदार्थेषु न विषज्जेत मूढवत् । सत्सु स्नेहं प्रकुर्वीत विशेषेण गृहाश्रमी ॥१०॥ अच्छेद्यैरपि शस्त्राद्यैः पाशैः सांसारिकैर्दृढम् । निबद्धमपि सन्तोऽत्र मोचयन्ति जनं किल ॥११॥ स्वधर्मस्थगृहस्थेभ्यस्त्यागिभ्यश्च विशेषतः । कृष्णवार्ताश्रुतिः कार्या गृहस्थैस्तु मुमुक्षुभिः ॥१२॥ गृह्णीयाद्यो धनं त्यागी वार्ता कुर्याच्च यः स्त्रिया । तस्माद्वार्ता हरेः श्रुत्वा गृही चान्द्रायणं चरेत् ॥१३॥ स्वग्रामे धर्मवृद्धस्य गृहे सायं समेत्य च । तन्नामकीर्तनं कार्यं तत्कथाश्रवणं तथा ॥१४॥

## અધ્યાય : ૬૨

## ગૃહસ્થોના ધર્મો સંક્ષેપથી કહેવાપૂર્વક પ્રાયશ્ચિત્તનો વિધિ અને શ્રીકૃષ્ણમાં પ્રીતિનું સાધન કહ્યું છે.

**શ્રી નારાયણ મુનિ બોલ્યા :** હે ભક્તો ! આ લોકમાં અને પરલોકમાં સુખને ઈચ્છનારા મારા આશ્રિત ગૃહસ્થ પુરુષોએ પરસ્ત્રીનો સંગ સર્વ પ્રકારે ત્યાગવો. (૧) ગૃહસ્થ પુરુષોની જે સધવા સ્ત્રીઓ હોય તેમણે પરપુરુષનો પ્રસંગ સર્વ પ્રકારે ત્યાગવો. વિવાહ યોગ્ય કન્યાવસ્થામાં વર્તતી કન્યાઓએ-વિશેષપણે ત્યાગ કરવો. અને વિધવાઓએ પણ પુરુષોનો પ્રસંગ સર્વ પ્રકારે ત્યાગવો. (૨) ગૃહસ્થજનોએ પણ મદ્ય-માંસ, ડુંગળી, લસણ તથા માદક વસ્તુઓના સંસર્ગનો ત્યાગ કરવો. (૩) હે ભક્તો ! ચાર વર્ણનાં જનોએ પોતાની જ્ઞાતિના સંબંધીઓનું પણ ઉચ્છિષ્ટ (જમતા બાકી રહેલું અન્નાદિ) કેવળ અગ્નિથી પકવેલા ધાણી વગેરે તથા ઘીમાં પકવેલું તથા ફળાદિ સિવાય ક્યારેય ભક્ષણ કરવું નહિ. (૪) મારા આશ્રિત ગૃહસ્થ પુરુષે ભાંગ-ગાંજો, અફીણ તથા ત્રણેય પ્રકારની તમાકુ-ખાવાની, પીવાની તથા સૂંઘવાની, તેનું સેવન કરવું નહિ. દ્યુત-પાસાથી રમવું નહીં. ચોરીનું કર્મ તથા અસત્ય ભાષણ કરવું નહિ. (૫) ગાય વગેરેનું દૂધ, ઘી અને જળ, ગાળ્યા વિનાનું પીવું નહીં. ગૃહસ્થોએ પણ ક્રોધ, માન, ઈર્ષા, હિંસા વગેરે ત્યાગવા. (૬) દેવતાઓ અથવા પિતૃઓને ઉદ્દેશીને બકરા વગેરે પશુઓની હિંસા કરવી નહીં. સ્વર્ગની પ્રાપ્તિને માટે પણ પ્રયાગાદિ તીર્થોમાં પણ આત્મઘાત ક્યારેય પણ ન કરવો. (૭) એક દિવસ પણ ગાળ્યા વિનાનું જળ પીનારને, છ માસમાં મત્સ્યજીવીને (મચ્છીમારને) જે પાપ લાગે, તેવું પાપ લાગે છે એમ જાણવું. (૮) ગાળ્યા વિનાના જળપાનમાં માંસભક્ષણનો સંભવ છે. માટે પુરાણમાં આટલો દોષ કહેલો છે, માટે જળ ગાળીને પીવું. (૯) મારો આશ્રિત ગૃહસ્થાશ્રમી, સ્ત્રી દ્રવ્યાદિ વસ્તુઓમાં મૂઢની માફક આસક્તિવાળો થાય નહીં. મારા આશ્રિત સાધુઓમાં વિશેષપણે સ્નેહ કરવો. (૧૦) તરવાર વગેરે આયુધોથી પણ છેદી ન શકાય એવા સાંસારિક પાશો જે પુત્ર, સ્ત્રી વગેરેમાં સ્નેહાત્મિકા જે દોરડીઓથી દઢ જેમ હોય તેમ બંધાયેલા માણસને આ લોકમાં સાધુઓ તેનાથી મુકાવે છે, જ. (૧૧) મુમુક્ષુ ગૃહસ્થોએ તો સ્વધર્મનિષ્ઠ પુરુષો અને સ્વધર્મનિષ્ઠ ત્યાગીઓથી વિશેષપણે કૃષ્ણની વાર્તાઓનું શ્રવણ કરવું. (૧૨) જે ત્યાગી ધનને ગ્રહણ કરે, અને જે ત્યાગી નારીની સાથે વાર્તા કરે તે ત્યાગીથી શ્રીહરિની વાર્તા સાંભળીને મારો આશ્રિત ગૃહસ્થ ભક્ત ચાન્દ્રાયણ વ્રત કરે. (ત્યારબાદ તેવા ત્યાગીથી કથા સાંભળે નહીં એવો ભાવાર્થ છે.) (૧૩) પોતાના ગામમાં ધર્મમાં વૃદ્ધ ગૃહસ્થના ભવનમાં અથવા સાધુઓને નિવાસ યોગ્ય મંદિર અથવા ધર્મશાળા હોય તો ત્યાં બધા સત્સંગીઓએ સાયંકાળે ભેગા થઈને શ્રીકૃષ્ણના નામનો ધ્વનિ કરવો તથા તેમની કથાનું શ્રવણ કરવું. (૧૪)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

तन्मन्त्रजपमालानां यथाशक्ति निरन्तरम् । सङ्ख्याया नियमः कार्यः सर्वैरपि गृहस्थितैः ॥१५॥ उपविश्य तथैकान्ते ध्यात्वा प्रत्यहमेव तम् । कर्तव्या मानसी पूजा मनोमलविशोधनी ॥१६॥ वर्णाश्रमोचितं स्वस्य वेदेन विहितं तु यत् । कर्मषट्कं द्विजैस्तच्च कार्यं भक्तिसमन्वितम् ॥१७॥ स्वधर्मस्य च्युतौ क्वापि जाते वा पापकर्मणि । निष्कृतिस्तस्य कर्तव्या सर्वैरपि मदाश्रितैः ॥१८॥ अज्ञानात्तु सकृत्पापे कृते कर्मणि वै जनाः! । मन्वादिभिः स्मृतः पूर्वैः प्रायश्चित्तविधिर्नृणाम् ॥१९॥ प्रायश्चित्तं चिकीर्षुर्यो धर्मभङ्गस्य वैनसः । स्नात्वा स शरणं गच्छेत्पर्षदं संयताञ्जलिः ॥२०॥ दश वा सप्त पञ्चापि त्रयो वाऽध्यात्मवित्तमः । धर्मनिष्ठाः सत्यपराः सन्तः पर्षत्प्रकीर्तिता ॥२१॥ नैव लक्षेण मूर्खाणां नचैवाधर्मवादिनाम् । पर्षद्भवेन्न लुब्धानां न चापि पक्षपातिनाम् ॥२२॥ न सा वृद्धैर्न तरुणैर्न सुरूपैर्धनान्वितैः। त्रिभिरेकेन पर्षत्स्याद्विद्वद्भिर्विदुषापि वा ॥२३॥ श्रुताध्ययनसम्पन्नः सत्यवादी जितेन्द्रियः । सदा धर्मरतः शान्तो यः स पर्षत्त्वमर्हति ॥२४॥ वयसा तनवोऽपि स्युर्यदि धर्मविदो द्विजाः । त एव वृद्धा विज्ञेया न मूर्खाः पलिता वृथा ॥२५॥ यत्र सत्यं तत्र धर्मो ह्यधर्मस्त्वितरत्र च । धर्मो जयति नाधर्मः सत्यं जयति नानृतम् ॥२६॥ निष्कृतौ व्यवहारे च व्रतस्यादेशने तथा । धर्मं वा यदि वाऽधर्मं पर्षद्यत्प्राह तद्भवेत् ॥२७॥ ज्योतिषं व्यवहारं च प्रायश्चित्तं चिकित्सितम् । अजानन्योऽन्यथा ब्रूयात्स महापातकी भवेत् ॥२८॥

સર્વ ગૃહસ્થજનોએ પોતાના સામર્થ્યને અનુસારે નિત્ય શ્રીકૃષ્ણના અષ્ટાક્ષર મંત્રની જપમાળા, જે એક સો આઠ મણકાથી ગૂંથાયેલી હોય, તે વડે જપ કરવો. શ્રીકૃષ્ણના અષ્ટાક્ષર મંત્રની આટલી માળા કરીશ, એવો નિયમ કરવો. (૧૫) તથા દરરોજ એકાંતમાં જ બેસીને, શ્રીકૃષ્ણનું ધ્યાન ધરીને પોતાના મનના દોષોનો નાશ કરનારી માનસથી કલ્પેલા ઉપચારોથી શ્રીકૃષ્ણની પૂજા કરવી. (૧૬) વર્ણાશ્રમોચિત વેદે કહેલા જે સ્નાનાદિ ષટ્ કર્મ તે પણ ત્રણ વર્ણના ગૃહસ્થોએ ભક્તિ સહિત કરવા. (૧૭) ક્યારેય પોતાના ધર્મના નિયમનો ભંગ થયો હોય ત્યારે અથવા પાપકર્મ થયું હોય ત્યારે મારા આશ્રિત સર્વ જનોએ પણ પોતાના ધર્મના ભંગનું અને પાપકર્મનું પ્રાયશ્ચિત્ત કરવું. (૧૮) હે જનો ! અજ્ઞાનથી એક વાર પાપ કર્મ થયે સતે પ્રાચીન મનુ આદિએ મનુષ્યોને પ્રાયશ્ચિત્તવિધિ કહેલો છે. (૧૯) ધર્મભંગ અથવા કોઈ પણ પાપનું પ્રાયશ્ચિત્ત કરવા ઈચ્છનાર પુરુષ હોય, તે પુરુષ સ્નાન કરીને, બંને હાથ જોડીને સભાને શરણે જાય. (૨૦) સ્વધર્મમાં નિષ્ઠાવાળા, સત્યપરાયણ, સાધુ સ્વભાવવાળા, દશ બ્રાહ્મણો અથવા સાત કે પાંચ કે ત્રણ બ્રાહ્મણોની સભા કહેવાય અને અધ્યાત્મતત્ત્વને જાણનારાઓમાં શ્રેષ્ઠ-ધર્મશાસ્ત્રને જાણનાર એકની પણ સભા કહેવાય. (૨૧) મૂર્ખાઓ લાખ ભેગા થાય તો પણ સભા ન કહેવાય. અને અધર્મ બોલનારા લાખ હોય તો પણ તેની સભા કહેવાય નહીં. ધનાદિ લોભવાળા લાખથી પણ સભા કહેવાય નહીં. (૨૨) વયથી વૃદ્ધમાત્રથી અર્થાત્ કેવળ વૃદ્ધોથી સભા થાય નહિ અથવા કેવળ રમણીય રૂપવાળાઓથી પણ સભા થાય નહીં. ત્રણ ધર્મનિષ્ઠ પંડિતોથી સભા થાય અથવા એક ધર્મનિષ્ઠ પંડિતથી પણ સભા થાય. (૨૩) ધર્મશાસ્ત્રાદિના અધ્યયન યુક્ત સત્યવાદી, જિતેન્દ્રિય નિરંતર ધર્મમાં નિષ્ઠાવાળો, શાંત જે હોય તે સભાસદપણાને યોગ્ય છે. (૨૪) જે ધર્મજ્ઞ બ્રાહ્મણો ઉંમરથી નાના હોય, તોપણ તે વૃદ્ધ છે, એમ જાણવું. ઉંમર માત્રથી ધોળા વાળ હોય પણ ધર્મ-અધર્મને જાણતા ન હોય, તે સભાને યોગ્ય નથી. (૨૫) જે સભામાં સત્ય છે ત્યાં ધર્મ છે. સત્ય વિનાની સભામાં અધર્મ છે. ધર્મ જય પામે છે. અધર્મ જય પામતો નથી. (૨૬) પ્રાયશ્ચિત્તના ઉપદેશમાં, વ્યવહારમાં તથા એકાદશી, જન્માષ્ટમી, રામનવમી આદિક વ્રતનાં નિર્ણયમાં સભાસદ બ્રાહ્મણ જ્યારે જે ધર્મ કહે અથવા અધર્મ કહે તે થાય. અર્થાત્ પ્રાયશ્ચિત્તથી વ્યવહાર કરવા યોગ્ય છે. (૨૭) માટે જ સભાએ પણ નિર્ણય કરીને બોલવું જોઈએ. અન્યથા દોષવાળો થાય. જ્યોતિષશાસ્ત્રમાં કહેલા મુહૂર્તાદિ, તથા વ્યવહારમાં ઋણનું લેવું, વગેરે-વ્યવહાર નિર્ણય; પ્રાયશ્ચિત્ત-બ્રહ્મહત્યાદિ પાપના નિવારણનો ઉપદેશ અને રોગીને રોગના નાશ માટે ઔષધને જે પુરુષ જાણતો ન હોય ને બીજે પ્રકારે કહે, તે પુરુષ બ્રહ્મહત્યાદિ મહાપાપ યુક્ત થાય. (૨૮)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

पर्षदुक्तक्रियाचारात्पातकी तु भवेच्छुचिः । तत्रोक्तो यद्यधर्मः स्यात्पर्षत्तेन तु लिप्यते ॥२९॥ तस्मात्सत्यं समाश्रित्य धार्मिकैः पापभीरुभिः । धर्म एव हि वक्तव्यः पर्षद्विप्रैर्न चेतरः ॥३०॥ स्त्रीणां च बालवृद्धानां क्षीणानां कुशरीरिणाम् । उपवासाद्यशक्तानां कर्तव्योऽनुग्रहश्च तैः ॥३१॥ ज्ञात्वा देशं च कालं च वयः सामर्थ्यमेव च । कर्तव्योऽनुग्रहः सद्भिर्ब्राह्मणैर्धर्मवेदिभिः ॥३२॥ लोभान्मोहाद्भयान्मैत्र्याद्यदि कुर्युरनुग्रहम् । नरकान् यान्ति ते मूढा रौरवान्नात्र संशयः ॥३३॥ धार्मिकैरेव मन्वाद्यैर्धर्मविद्भिः पुरातनैः । धर्मः प्रोक्तोऽस्ति न त्वन्यैस्ततो वाच्यो विचार्य सः ॥३४॥ देशाचारं कुलाचारं ग्रामाचारं विबुध्य च । शास्त्राचारः प्रवक्तव्यः सहसा न तु कर्हिचित् ॥३५॥ पर्षदुक्तप्रकारेण पातकी व्रतमाचरेत् । तेनैव हि भवेच्छुद्धस्त्वन्यथा नरकं व्रजेत् ॥३६॥ रहस्यपापकर्मा तु शास्त्रं दृष्ट्वा स्वयं बुधः । यथोक्तनिष्कृतिं कुर्यादन्यस्त्वापृच्छ्य सद्बुधम् ॥३७॥ बालस्य नैव षष्ठाब्दात्पूर्वं पातकमस्ति हि । न राजदण्डस्तस्यास्ति प्रायश्चित्तं न विद्यते ॥३८॥ ऊनैकादशवर्षस्य पञ्चवर्षात्परस्य च । प्रायश्चित्तं चरेद्भ्राता पित्रादिर्वा गुरुः स्वयम् ॥३९॥ एकादशाब्दतो बालः षोडशाब्दावधि स्वयम् । प्रायश्चित्तार्धं कुर्वीत वृद्धरोगिस्त्रियस्तथा ॥४०॥ पापनिष्कृतिकर्तैव पुमान् स्त्री चैति सद्गतिम् । तदकर्ता तु निरयान्नीचयोनीश्च याति हि ॥४१॥ कृत्वा यो दुष्कृतं तस्य नैव कुर्वीत निष्कृतिम् । तत्सङ्गादपि पापं स्यादतः कार्यो न सोऽपि च ॥४२॥ गृहस्थैस्त्यागिभिश्चापि योषाभिश्च यथोचितम् । स्वपापनिष्कृतिं कृत्वा पाल्याः स्वनियमा दृढम् ॥४३॥

પાપનો કરનારો તો સભાએ કહેલા પ્રમાણે પ્રાયશ્ચિત્ત કરવાથી શુદ્ધ થાય છે. પ્રાયશ્ચિત્તના ઉપદેશમાં ધર્મશાસ્ત્રથી વિરુદ્ધ હોય તો તે અધર્મની સભા લેખાય છે. (૨૯) માટે ધાર્મિક, અધર્મના આચરણથી ભય પામેલા બ્રાહ્મણોએ સભાસદપણાને પામેલા બ્રાહ્મણોએ સત્યનો આશ્રય કરીને જ બોલવું. અધર્મનો આશ્રય કરવો નહીં. (૩૦) અબળાઓ, દશ વર્ષનાં બાળકો અને એંશી વર્ષના વૃદ્ધો અને રોગાદિથી ક્ષીણ થયેલા, ગળતો કોઢ વગેરેથી કુત્સિત શરીરવાળા, ઉપવાસ આદિ કરવામાં અશક્તોની ઉપર સભાસદ બ્રાહ્મણોએ અનુગ્રહ કરવો. (૩૧) ધર્મજ્ઞ, સદ્ધર્મનિષ્ઠ બ્રાહ્મણોએ દેશ, કાલ, ઉંમર, શક્તિ, (ધન,દાન, તપશ્ચર્યાદિ શક્તિ) જાણીને અનુગ્રહ કરવો. (૩૨) બ્રાહ્મણો જો ધનાદિકના લોભથી, મોહથી, શાસ્ત્રાર્થ નહિ જાણવાથી, બળવાનથી ભય પામીને, અને મિત્રભાવથી અનુગ્રહ કરે, તો પોતાના શ્રેયમાં વિમૂઢ થયેલા સભાસદ બ્રાહ્મણો રૌરવ નરકમાં પડે છે, એમાં સંશય નથી. (૩૩) ધર્મનિષ્ઠ, ધર્મશાસ્ત્રના અર્થને યથાર્થ જાણનારા, પૂર્વે થયેલા મનુ આદિ સ્મૃતિકારોએ ધર્મ કહેલો છે. બીજા અધર્મીઓએ કહ્યો નથી. માટે ધર્મનો વિચાર કરીને જ (વિવેકીજનોએ) ધર્મ કહેવા યોગ્ય છે. પરંતુ તત્કાલ કહેવા યોગ્ય નથી. (૩૪) દેશાચાર, કુલાચાર અને ગ્રામાચારને વિશેષપણે જાણીને શાસ્ત્રાચાર કહેવો. ક્યારેય પણ દેશાચાર આદિ જાણ્યા વિના તત્કાલ શાસ્ત્રાચાર કહેવો નહિ. (૩૫) પાપકર્તા માણસ, સભાએ કહેલા વ્રતના આચરણથી જ શુદ્ધ થાય. એમ ના કરે તો નરકમાં જાય. (૩૬) જેનું પાપ પ્રસિદ્ધ થયું નથી, એવો પુરુષ પોતે ધર્મશાસ્ત્રમાં કુશળ હોય ત્યારે તો ધર્મશાસ્ત્રમાં જોઈને પોતે કરેલા પાપનું યથાયોગ્ય પ્રાયશ્ચિત્ત કરે. બીજો તો પોતાને અનુકૂળ સત્પુરુષને પૂછીને તેમણે કહ્યા પ્રમાણે પ્રાયશ્ચિત્ત કરે. (૩૭) છઠ્ઠા વર્ષ થકી પૂર્વ વયમાં વર્તતાં, અર્થાત્ પાંચ વર્ષ સુધીના બાળકને પાપનો પ્રસંગ નથી. અને રાજદંડનો પણ પ્રસંગ નથી. માટે તેવા બાળકને પ્રાયશ્ચિત્ત છે જ નહિ. (૩૮) પાંચમા વર્ષથી ઉપરની ને દશમા વર્ષની અંત સુધીની વયમાં વર્તતા બાળકને તો પાપનો પ્રસંગ પ્રાપ્ત થતાં તે પાપનું પ્રાયશ્ચિત્ત તે બાળકનો પિતા, ભ્રાતા કે ગુરુ તેને માટે કરે. (ગૃહસ્થને પિતા, ભ્રાતા, અને ત્યાગીને ગુરુ એમ અર્થ જાણવો.) (૩૯) અગિયાર વર્ષથી આરંભીને પંદર વર્ષના અંત સુધી બાળક પોતે અર્ધું પ્રાયશ્ચિત્ત કરે. તથા એંશી વર્ષનો વૃદ્ધ અને રોગી તથા અબલાઓ અર્ધું પ્રાયશ્ચિત્ત કરે. (૪૦) પ્રાયશ્ચિત્ત કરનાર પુરુષ અને તેવા પ્રકારની સ્ત્રી શુભ ગતિને પામે જ છે. પાપનું પ્રાયશ્ચિત્ત નહિ કરનાર પુરુષ અથવા સ્ત્રીઓ પણ નિશ્ચે નરક અને નીચ યોનિને પામે છે. (૪૧) જે પુરુષ પાપ કરીને પ્રાયશ્ચિત્ત કરતો જ નથી, તેના સંગથી પણ પાપ થાય; માટે પાપી પુરુષોનો સંગ પણ કરવો નહિ. (૪૨) મારા આશ્રિત ગૃહસ્થોએ અને મારા આશ્રિત ત્યાગીઓએ તેમજ નરનારીઓએ પણ યથાયોગ્ય પોતાના પાપનું નિવારણ કરી, પોતપોતાના નિયમો દૃઢ જેમ હોય તેમ, આચરણ કરવા. (આ પ્રાયશ્ચિત્તનો વિસ્તાર પાંચમા પ્રકરણના ધર્મોપદેશથી જાણવો.) (૪૩)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सांसारिके सुखे तुच्छे त्यक्त्वाऽऽसक्तिं सदा जनैः । वासुदेवे विधातव्या रतिः सर्वैर्मदाश्रितैः ॥४४॥ सा तु स्याच्छ्रद्धया नित्यं स्वधर्माचरणेन च । जिज्ञासया तन्महिम्नो योगेनाध्यात्मिकेन च ॥४५॥ तद्भक्तानां सेवनेन तत्कथाश्रवणेन च । स्त्रीद्रव्यरससक्तानां सङ्गत्यागेन सर्वथा ॥४६॥ अन्यत्र तद्गुणेभ्यश्च सन्तोषेणाप्यहिंसया । तत्कीर्तनेन च यमैर्नियमैश्चाप्यनिन्दया ॥४७॥ तितिक्षया च द्वन्द्वानां तन्नामस्मरणेन च । रतिः कृष्णे भवेन्नृणां तद्भक्त्या तु विशेषतः ॥४८॥ संसृतेः स्याद्व्यवच्छेदो भक्त्यैव परया हरौ । वैराग्यं च दृढं ज्ञानं भक्त्यैव लभते पुमान् ॥४९॥ भक्त्यैव स प्रसन्नः स्यान्नान्योपायेन केनचित् । तस्मान्निष्कपटा यूयं भक्तिं कुरुत सर्वथा ॥५०॥ सुव्रत उवाच-इत्थं निजाश्रितजनानुपदिश्य धर्मं भक्तिं च भक्तितनयो नृपते! प्रसन्नः । स प्रैरयन्मुनिगणान् गुणगायनार्थं विष्णोर्जनाश्च जगृहुः शिरसा तदुक्तीः ॥५१॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे वृत्तालयदोलोत्सवे जनशिक्षायां प्रायश्चित्तविधिनिरूपणनामा द्विषष्टितमोऽध्यायः ॥६२॥

सुव्रत उवाच - मुक्तानन्दस्तदा वीणां वादयन् षट्पदीं जगौ । गुर्जरीसंज्ञरागेण तालो यत्रैकतालिका ॥१॥ रमतां सततं सततमखे त्वयि मानसं मम सखे ! । ध्रुवपदम् । अशरणशरणे भवभयहरणे बहुतरकरुणालये । सुखकरचरिते मुनिवरविदिते गुणगणवरुणालये रमतां० ॥२॥

---

મારા આશ્રિતોએ તુચ્છ સાંસારિક, માયિક પંચવિષયમાં સુખની આસક્તિનો ત્યાગ કરી, નિરંતર શ્રીકૃષ્ણ ભગવાનમાં પ્રીતિ કરવી. (૪૪) તે પ્રીતિ તો શ્રદ્ધાથી નિત્ય પોતાના ધર્માચરણથી, શ્રી વાસુદેવ ભગવાનના મહિમાના જ્ઞાનની જિજ્ઞાસાથી અને આત્માઅનાત્માના અભ્યાસથી થાય. (૪૫) તથા શ્રી વાસુદેવ ભગવાનના એકાંતિક ભક્તજનોની પોતાના ધર્મને અનુસરીને સેવા કરવાથી, અને પોતાના ધર્મમાં રહેલા ભગવાનના ભક્તના મુખથી કથા સાંભળવાથી, સ્ત્રી-દ્રવ્ય અને રસાસ્વાદમાં આસક્તિવાળા પુરુષોના સંગનો સર્વ પ્રકારે ત્યાગ કરવાથી શ્રીકૃષ્ણમાં પ્રીતિ થાય છે. (૪૬) તેમજ ભગવાનના ગુણો થકી અન્યત્ર-શબ્દાદિ વિષયોમાં સંતોષથી અર્થાત્ વૈતૃષ્ણાથી, તથા અહિંસા, પ્રાણીમાત્રમાં સૌહાર્દથી તથા ભગવાનના ગુણકીર્તનથી તથા અહિંસાદિ બાર યમો અને શૌચાદિ બાર નિયમો અને અનિંદા વડે પણ શ્રીકૃષ્ણમાં પ્રીતિ થાય છે. (૪૭) શીત-ઉષ્ણ વગેરે દ્વંદ્વો સહન કરવાથી, ભગવાનના નામ-સ્મરણથી, આ સોળ સાધનોથી ભગવાનના ભક્તોને શ્રીકૃષ્ણમાં પ્રીતિ થાય. ભગવાનની નવધા ભક્તિથી તો વિશેષ પ્રીતિ થાય છે. (૪૮) શ્રીહરિમાં પરા ભક્તિથી અર્થાત્ શ્રદ્ધાદિ સોળ સાધનોથી ઉત્પન્ન થયેલી પ્રીતિથી જ સંસારનો સર્વ પ્રકારે નાશ થાય, તેમજ ભગવાનનો ભક્ત ભક્તિથી જ દૃઢ વૈરાગ્ય અને આત્મા-પરમાત્માના સ્વરૂપના યથાર્થ જ્ઞાનને પણ પામે છે. (૪૯) ભગવાન શ્રીકૃષ્ણ ભક્તિથી જ અત્યંત પ્રસન્ન થાય છે; બીજા કોઈ પણ ઉપાયથી તેવા પ્રસન્ન થતા નથી. માટે હે ભક્તો ! તમે દંભે રહિત થઈને સર્વ પ્રકારે ભક્તિ કરો. (૫૦)

**સુવ્રત મુનિ કહે છે :** હે રાજન્, ભક્તિતનય શ્રીહરિ આ પ્રકારે પોતાનાં આશ્રિતજનોને ધર્મ માર્ગનો અને સાધને સહિત પોતાને વિષે કરવા યોગ્ય ભક્તિનો ઉપદેશ કરી, પ્રસન્ન થઈ શ્રીકૃષ્ણના ગુણ ગાવા માટે મુક્તાનંદાદિ મુનિવૃંદોને પ્રેરણા કરતા હતા. શ્રી હરિએ ઉપદેશ આપેલા હરિભક્તો, શ્રીહરિનાં વાક્યો મસ્તકથી ધારણ કરતા હતા. (૫૧)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે વૃત્તાલયદોલોત્સવે જનશિક્ષાયાં પ્રાયશ્ચિત્તવિધિનિરૂપણ નામા દ્વિષષ્ટિતમોऽધ્યાયઃ (૬૨)*

## અધ્યાય : ૬૩

## શ્રીહરિના ઐશ્વર્યપ્રકાશ અને નાના પ્રકારના તિથિના ચરિત્રવાળું મુક્તાનંદમુનિકૃત ષટ્પદીનું ગાન કહેલું છે.

**સુવ્રત મુનિ બોલ્યા :** હે રાજન્ ! તે સમયે ભગવાનના ગુણકીર્તન માટે શ્રીહરિએ પ્રેરણા કરાયેલા સમયમાં મુક્તાનંદ મુનિ વીણા સુંદર સ્વરે વગાડતા હતા. જે રાગમાં એક તાલ છે, એવા ગુર્જરી નામના રાગથી છ પદોથી રચેલ ગીતો ગાતા હતા. (૧) હે સખે ! નિરંતર વિષ્ણુયાગાદિ યજ્ઞોવાળા, હંમેશા પૂજા પ્રવાહ જેને છે એવા, તમારા વિષે મારુ મન નિરંતર ક્રીડા કરો. અશરણના શરણ, સ્વાશ્રિતોના સંસારભયને નાશ કરનારા, અતિશય કરુણાનિધિ, સુખકારી ચરિત્રોવાળા, મરીચ્યાદિ મુનિઓએ યથાર્થપણે જાણેલા, સત્ય શૌચાદિ ગુણ સમુદાયોના સાગર એવા; તમારે વિષે મારું મન હંમેશા રમો. (૨)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

धृतसितवसने कृतमितहसने रुचिरचिकुराजिते । शशिनिभवदने द्युतिजितमदने सकलसुरसभाजिते रमतां० ॥३॥ प्रविततनयने क्षणजितजयने विविधकुसुमहारके । तततरदलिके कृतवरतिलके निजजनसुखकारके रमतां० ॥४॥ परसुखनिलये परदरविलये सुररिपुमतिमोहने । अघचयहरणे सुखचयकरणे निगमगरसदोहने रमतां० ॥५॥ हृतसुरशमले करधृतकमले परिधृतपुरुभूषणे । कलिबलकदने शुभमतिसदने परिहृतनिजदूषणे रमतां० ॥६॥ प्रशमितकोपे कृतमदलोपे मुनिवरगणनन्दिते । अतिमृदुहृदये निजजनसदये सुरनरमुनिवन्दिते रमतां० ॥७॥ गीत्वेति षट्पदीमादौ पद्यैः स प्राकृतैस्ततः । गायति स्म गुणान्भक्त्या वासुदेवस्य भूपते ! ॥८॥ ब्रह्मानन्दादयश्चान्ये मुनयो गानकोविदाः । तमेवानुजगुः प्रीत्या कुर्वन्तः स्वरपूरणम् ॥९॥ आरब्धे गायने तैश्च हरिः सदयया दृशा । पर्यैक्षत निजान्भक्तान्ददत्तालं करेण च ॥१०॥ सहस्रशस्तत्र नराश्च नार्यः समाधिमापुः कृपयैव तस्य । अलौकिके ह्यक्षरधाम्नि ते च तमेव कोट्यर्करुचिं ह्यपश्यन् ॥११॥ चतुर्भुजं चाष्टभुजं च केचित्तं वै द्विबाहुं ददृशुश्च केचित् । तत्तन्महाधामसु तत्तदीयैः संसेवितं शक्तिसमृद्धिभृत्यैः ॥१२॥ व्युत्थाय ते यद्यदलौकिकं स्वे हृदम्बरेऽचक्षत तत्तदेव । सम्पृच्छ्यमानान्बहुधा स्वबन्धून्यथावदूचुः किल तत्र तत्तत् ॥१३॥ सन्दिग्धचित्ताश्च तदीश्वरत्वे ये केचिदासन्प्रथमं जनास्ते । आश्चर्यमालोक्य निशम्य चैतत् सर्वेश्वरं तं विविदुर्यथावत् ॥१४॥

---

શ્વેત વસ્ત્રો ધારણ કરનારા, સદા મંદહાસ્ય યુક્ત મુખવાળા, અતિ મનોહર, મસ્તકના કેશોથી શોભાયમાન, શરદ ઋતુના પૂર્ણ ચન્દ્રમા સમાન મુખવાળા, શરીરની કાંતિથી જીત્યો છે કામદેવ જેણે એવા, બ્રહ્માદિ સમસ્ત દેવોએ અતિ પ્રીતિથી સેવાયેલા, શ્રીકૃષ્ણ; તમારે વિષે મારું મન નિરંતર રમો. (૩) કર્ણ પર્યંત વિસ્તારયુક્ત નેત્રોવાળા, જેણે વિશાળ ભાલમાં કેસર-કુમકુમ આદિ યુક્ત ઊર્ધ્વપુંડ્ર તિલક કર્યું છે એવાં, પોતાનાં જનોને સુખ આપનારા, વિશાળ અને લગારેક ઊપડતું છે ભાલ જેનું એવા, નાના પ્રકારના ઉત્તમ પુષ્પોના હાર હૃદય ઉપર વિરાજમાન છે એવા તમારે વિષે મારું મન નિરંતર રમો. (૪) સર્વોપરિ સુખના સાગર, કાળરૂપી સર્પના ભયની નિવૃત્તિ કરાવનારા, મનુષ્યચરિત્રોથી અસુરોની બુદ્ધિને મોહ પમાડનારા, સ્વભક્તોના પાપસમુદાયનો નાશ કરનારા, વેદોમાં રહેલા સારનું દોહન કરનારા એવા તમારે વિષે મારું મન નિરંતર રમો. (૫) પોતાના ભક્તજનોનાં દૈવસંબંધી દુઃખોનું નિવારણ કરનારા,લીલા માટે જમણા હાથમાં જેમણે કમળ ધારણ કર્યું છે, જેમણે પૂજા સમયે ઘણાં આભૂષણો અંગીકાર કર્યાં છે, કલિયુગના બલને પોતાના જનના અંતઃકરણોથી નિવૃત્તિ પમાડનારા, પોતાના ભક્તોને શુભ મતિ આપનારા, પોતાના પ્રતાપથી, પોતાના ભક્તજનોના દોષો નાશ કરનારા, એવા શ્રીહરિ, તમારે વિષે મારું મન અખંડ રમો. (૬) પોતાના ભક્તોના મનમાંથી ક્રોધનું શમન કરાવનારા, અસુર ગુરુઓના ગર્વનો નાશ કરનારા, મુનિવરોના સમૂહને આનંદ પમાડનારા, અત્યંત કોમળ હૃદયવાળા, પોતાના આશ્રિતજનોમાં દયાવાળા, બ્રહ્માદિ દેવો, મનુષ્યો અને મુનિઓ દ્વારા નમસ્કાર કરાયેલા એવા તમારે વિષે મારું મન નિરંતર નિવાસ કરો. (૭) હે ભૂપતે ! આ પ્રકારે મુક્તાનંદ મુનિ પ્રથમ ષટ્પદીનું ગાન કરીને પછી પ્રાકૃત ભાષાથી રચેલાં પદોથી શ્રીહરિના ગુણોને ભક્તિપૂર્વક ગાતા હતા. (૮) અને ગાવામાં કુશળ, બ્રહ્માનંદાદિ મુનિઓ સ્વરની પૂર્તિ કરતાં મુક્તાનંદ મુનિની પાછળ જ ગાતા હતા. (૯) મુક્તાનંદ મુનિએ ગાયનનો આરંભ કર્યો ત્યારે, શ્રી નારાયણ મુનિ, પોતાના કરકમળથી ચપટીએ સહિત તાલ આપતાં, અતિ કરુણાએ સહિત દૃષ્ટિથી પોતાના ભક્તોને સભામાં ચોતરફ જોતા હતા. (૧૦) તે સમયે હજારો પુરુષો અને સ્ત્રીઓ શ્રીહરિની કૃપાથી જ સમાધિ પામી ગયાં. સમાધિ પામેલાં પુરુષો અને સ્ત્રીઓ પણ માયાથી પર, અક્ષરધામમાં કોટિ સૂર્ય અને ચન્દ્ર આદિનાં તેજના સમાન તેજસ્વી શ્રીહરિને જોતા હતા. (૧૧) કેટલાક માણસો સર્વદા દ્વિભુજ શ્રીહરિને તે તે વૈકુંઠ, શ્વેતદ્વીપ, ગોલોક આદિ લોકમાં રહેલી તે તે શક્તિઓ, લક્ષ્મી વગેરે, અણિમાદિ ઐશ્વર્યો અને વિશ્વક્સેનાદિ પાર્ષદોએ સેવાયેલા ચતુર્ભુજ ભગવાનને જોતા હતા. (૧૨) તે સમાધિવાળાં જનો, પોતાના હૃદયાકાશમાં, જે જે શ્રીહરિનું ઐશ્વર્ય જે સમાધિમાં જોયેલું હોય તેને પૂછતા, પોતાના સંબંધીઓને તે સભામાં પોતે જોયેલું શ્રીહરિનું ઐશ્વર્ય ઘણે પ્રકારે યથાર્થ જ કહેતા હતા. (૧૩) કેટલાંક જનો શ્રીહરિના પરમેશ્વરપણામાં સંશય યુક્ત ચિત્તવાળા હતા, તે જનો આ આશ્ચર્યરૂપ શ્રીહરિના ઐશ્વર્ય ચરિત્ર જોઈને અને સાંભળીને શ્રીહરિને ઈશ્વરોના ઈશ્વર, પરમેશ્વર યથાર્થપણે જાણતા હતા. (૧૪)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

सम्बन्धिनः स्वान्भगवत्सकाशान्नेतुं गृहांस्तत्र समागता ये । ते दुष्टजीवा अपि तत्प्रतापं दृष्ट्वैव तस्याश्रयमाशु चक्रुः ॥१५॥
आनन्दयित्वेति जनाञ्जनेशः स्वं स्वं निवासं प्रति गन्तुमेव । आदिश्य रम्यं पटमण्डपं स्वं समेत्य तस्मिन्निषसाद दैविः ॥१६॥ स एवमेव प्रतिवासरं स्वानानन्दयन्भक्तजनान् समेतान् । उवास तत्राखिलसौख्यकारी यशः स्वकीयं प्रथयन्पृथिव्याम् ॥१७॥ यावन्त्यहानि भगवान्यवात्सीत्तत्र पत्तने । दिने दिनेऽधिकं तत्र स्नेहो नृणामवर्धत ॥१८॥ तत्तद्देशीयलोकानां तत्र पाकक्रिया अपि । प्रत्यहं नूतना आसन्नुत्तरोत्तरसद्रसाः ॥१९॥ क्वचिद्दिने सभायां स प्रोचे वर्णाश्रमोचितान् । धर्मान्वेदेन विहितान् कृष्णभक्तिसमन्वितान् ॥२०॥ कस्मिंश्चिद्दिवसे ज्ञानं वैराग्यं च क्वचित्प्रभुः । भक्तिं निरूपयामास क्वचित्सदसि लक्षणैः ॥२१॥ राजनीतिं क्वचित्प्राह दानधर्मांश्च कुत्रचित् । मोक्षधर्मान् क्वचित्प्राह स्त्रीधर्मांश्च स ईश्वरः ॥२२॥ क्वचित्साङ्ख्यं क्वचिद्योगं पञ्चरात्रं च कर्हिचित् । धर्मान् परमहंसानां क्वचित्सदसि सोऽब्रवीत् ॥२३॥ प्रायश्चित्तविधिं प्राह क्वचित् पापापनुत्तये । आपद्धर्मांश्च सर्वेषां स जगाद क्वचित्प्रभुः ॥२४॥ पूर्णकामोऽपि भगवाननुकुर्वन्नृनाटनम् । वर्णाश्रमोचितं धर्ममाचचार स्वयं सदा ॥२५॥ व्रतोपवासनियमान् यथाकालं यथोचितम् । जनानां शिक्षणार्थं वै चकार स्वयमीश्वरः॥२६॥ चैत्रशुक्लप्रतिपदि वत्सरारम्भवासरे । ब्रह्मात्मवासुदेवस्य कारयामास पूजनम् ॥२७॥ गोदानं स्वर्णदानं च विप्रसन्तर्पणं तथा । मन्वादितिथिमुख्यायां तृतीयायामचीकरत् ॥२८॥

---

જે દુર્જન લોકો, બલાત્કારે ભગવાનનાં દર્શન માટે આવેલા-પોતાના સંબંધીઓને ભગવાનની સમીપથી પોતાનાં ભવનોમાં લઈ જવા માટે વૃત્તાલયમાં આવેલા તે દુર્જનો પણ શ્રીહરિનો અલૌકિક મહિમા જોઈને તત્કાલ શ્રીહરિનો આશ્રય કરતા હતા. (૧૫) આ પ્રમાણે સર્વ લોકના એક સ્વામી શ્રીહરિ પોતાના ભક્તોને આનંદ આપીને પોતપોતાના નિવાસસ્થાને જવા માટે આજ્ઞા આપીને પોતે રમણીય જે પટમંડપે જઈને તેમાં પોતાના પલંગ ઉપર બેઠા. (૧૬) સમગ્ર જનોને સુખ કરનારા શ્રીહરિ આ પ્રમાણે જ દરરોજ પુષ્પદોલોત્સવમાં ભેગાં થયેલાં પોતાનાં ભક્તજનોને આનંદ આપતા અને પૃથ્વીમાં પોતાનો યશ વિસ્તારતા થકા વૃત્તાલયમાં નિવાસ કરતા હતા. (૧૭) શ્રીહરિ વૃત્તાલયપુરમાં જેટલા દિવસ નિવાસ કરતા હતા તેટલા દિવસોમાં દરરોજ ભક્તજનોનો ભગવાનના દર્શનાદિકમાં પ્રેમ અધિક અધિક વૃદ્ધિ પામતો હતો. (૧૮) વૃત્તાલયપુરમાં તે તે દેશના ભક્તજનોની શ્રીહરિ અને તેમના મુનિજનોને જમાડવા માટે પણ દરરોજ નવીન નવીન, ઉત્તરોત્તર, અતિશય સુખ આપનાર રસો જેમાં છે, એવી રસોઈઓ થતી હતી. (૧૯) શ્રીહરિ કોઈ દિવસ સભામાં, વેદમાં કહેલા-વર્ણાશ્રમને યોગ્ય અને શ્રીકૃષ્ણ ભગવાનની ભક્તિ સહિત ધર્મોનો પોતાના ભક્તોને ઉપદેશ કરતા હતા. (૨૦) શ્રીહરિ કોઈ દિવસે સભામાં જીવ, ઈશ્વર, માયા, બ્રહ્મ અને પરબ્રહ્મનું યથાર્થ જ્ઞાન -લક્ષણોથી નિરૂપણ કરતા હતા. (૨૧) શ્રીહરિ કોઈ દિવસે સભામાં રાજનીતિ કહેતા હતા. કોઈ દિવસે દાનધર્મોને કહેતા હતા. કોઈ દિવસે મોક્ષધર્મોને કહેતા હતા. કોઈ દિવસે સ્ત્રીઓના ધર્મ કહેતા હતા. (૨૨) શ્રીહરિ, કોઈ દિવસે સભામાં સબીજ સાંખ્યશાસ્ત્ર સંબંધી જ્ઞાન, કોઈ દિવસે સબીજ, યમાદિ અષ્ટાંગ સહિત યોગશાસ્ત્ર સંબંધી જ્ઞાન અને કોઈ દિવસ પંચરાત્રમાં કહેલું જ્ઞાન અને કોઈ દિવસે પરમહંસોના ધર્મોને કહેતા હતા. (૨૩) શ્રીહરિ, કોઈ દિવસે પાપના નાશ માટે ધર્મશાસ્ત્રમાં કહેલી પ્રાયશ્ચિત્તવિધિ કહેતા હતા. તો ક્યારેક સર્વ જનોના આપદ્ધર્મોને કહેતા હતા. (૨૪) ભગવાન, સ્વયં શ્રીહરિ પૂર્ણકામ હોવા છતાં પણ મનુષ્ય નાટ્યનું અનુકરણ કરતાં, વર્ણાશ્રમ ધર્મનું આચરણ કરતા હતા. (૨૫) સ્વયં શ્રીહરિ, સ્વભક્તોના શિક્ષણ માટે સમય પ્રમાણે, યથાયોગ્ય વ્રત-ઉપવાસના નિયમોનું પાલન કરતા હતા. (૨૬) વર્ષારંભે, અર્થાત્ ચૈત્ર સુદી પ્રતિપદાને દિવસે જગતના આદિ સ્રષ્ટા બ્રહ્માસ્વરૂપ વાસુદેવનું પૂજન કરાવતા હતા તથા શ્રીહરિ બ્રહ્મભોજન કરાવતા હતા. (૨૭) મનુ આદિ તિથિઓમાં મુખ્ય એવી ચૈત્ર સુદી તૃતીયા તિથિમાં ગોદાન, સુવર્ણદાન તથા બ્રહ્મભોજન કરાવતા હતા. (૨૮)



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર

**तस्यां तिथौ भगवतः स च मत्स्यमूर्तेः पूजामहोत्सवमपि क्षितिपाल ! सम्यक् । शास्त्रोदितेन विधिनैव विधाप्य भुक्त्वा गन्तुं च दुर्गपुरमीश्वर उद्यतोऽभूत् ॥२९॥** इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे वृत्तालयदोलोत्सवे नानातिथिकृतचरित्रनिरूपणनामा त्रिषष्टितमोऽध्यायः ॥६३॥

सुव्रत उवाच – **तावद्राजन्पुरादेत्य गोस्वामी भक्तिमान् द्रुतम् । नाम्ना नारायणगिरिः प्रार्थयामास तं प्रभुम् ॥१॥ आतिथ्यं कर्तुमिच्छामि श्वोऽहं सह मुनेस्तव । मनोरथमिमं स्वामिन्मम सम्पूरय प्रभो! ॥२॥ इति सम्प्रार्थितस्तेन भक्तवत्सल ईश्वरः । तथेत्युवाच तावत्तं पौरा अन्येऽप्युपाययुः ॥३॥ कुबेरो यौवनाश्वश्च जूषमूलजिदादयः । नमश्चक्रुः प्रभुं भक्त्या तं कुबेर उवाच च ॥४॥ अत्रागतस्य ते स्वामिंस्त्रयोविंशतिवासराः । गतास्तत्राऽऽद्यदिवसे यौवनाश्वमनोरथः ॥५॥ पाकस्वीकरणेनैव त्वया सम्पूरितः प्रभो! । देशान्तरीयलोकाश्च ततः सन्तोषितास्त्वया ॥६॥ भक्ता वयमपि स्वामिन्भवामस्तव सेवकाः । अननुगृह्य तान् यानं तव नैवोचितं किल ॥७॥ किञ्च जन्मोत्सवतिथिर्निकटेऽस्त्यागता तव । तत्र त्वदर्चनं स्वामिन्कर्तुमिच्छाऽस्ति नो हृदि ॥८॥ विमलोत्सवपर्यन्तं ततः स्थातुमिहार्हसि । इति सम्प्रार्थितो भक्तैस्तथेत्याह हसन्प्रभुः ॥९॥ ततः स न्यवसत्तत्र भक्तान्सन्तोषयन्निजान् । उपावसन्नवम्यां च मध्याह्ने राममार्चयत् ॥१०॥ तेऽथ भक्तजनाः सर्वे तस्य जन्मदिनं हि तत् । विदन्तः परया प्रीत्या तमानर्चुः समुत्सुकाः ॥११॥**

હે રાજન્ ! શ્રીહરિ તૃતીયાને દિવસે મત્સ્યમૂર્તિ ભગવાનનો પૂજા મહોત્સવ પણ શાસ્ત્રમાં કહેલા વિધિથી સારી રીતે કરાવીને પૂજનાન્તે, અનુક્રમથી પ્રાપ્ત ઈચ્છારામના ગૃહમાં ભોજન કરીને ગઢપુરમાં જવા માટે તત્પર થયા. (૨૯)

*ઈતિ શ્રીસત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે, તૃતીય પ્રકરણે વૃત્તાલય દોલોત્સવે નાનાતિથિકૃત ચરિત્રનિરૂપણ નામા ત્રિષષ્ટિતમોઽધ્યાયઃ (૬૩)*

## અધ્યાય : ૬૪

## વૃત્તપુરમાં પુષ્પદોલોત્સવ કરીને ફરીથી શ્રીહરિનું ગઢપુરમાં આગમન કહ્યું છે.

**સુવ્રત મુનિ બોલ્યા** : હે રાજન્ ! શ્રીહરિ ગઢપુર જવા તૈયાર થયા, તેટલામાં શ્રીહરિ ને વિષે ભક્તિમાન-સેવાપરાયણ, નારાયણગિરિ નામે ગોસ્વામી પુર થકી તત્કાલ શ્રીહરિ સમીપે આવ્યા.(૧) તેઓ શ્રીહરિની પ્રાર્થના કરવા લાગ્યા : હે સ્વામિન્ ! હે પ્રભો ! હું આવતી કાલે મુનિઓએ સહિત તમારો આતિથ્યસત્કાર કરવા ઈચ્છું છું. આ મારો મનોરથ પૂર્ણ કરો. (૨) હે રાજન્ ! આ પ્રકારે ગોસ્વામી નારાયણગિરિએ પ્રાર્થના કરાયેલા ભક્તવત્સલ શ્રીહરિએ 'તમારી ઈચ્છા પ્રમાણે થાઓ' એમ કહી પ્રાર્થના સ્વીકારી, તેટલામાં બીજા પણ ભક્તો પુરમાંથી શ્રીહરિ સમીપે આવ્યા. (૩) કુબેર,જોબન, જૂખો પગી, મૂળજી ભક્ત વગેરે શ્રીહરિને ભક્તિપૂર્વક નમસ્કાર કરતા હતા. કુબેરજીએ શ્રીહરિને કહ્યું, હે સ્વામિન્ ! આ પુરમાં આવ્યે તમારે ત્રેવીસ દિવસ થયા. તે દિવસોમાં પહેલે દિવસે, ફાગણ સુદી દશમને દિવસે જોબન પગીનો મનોરથ પૂર્ણ કર્યો. (૪-૫) હે પ્રભો ! પાક સ્વીકાર કરવાથી જોબનપગીનો મનોરથ પૂર્ણ કર્યા પછી તમોએ દેશાન્તરના જનોને રસોઈ સ્વીકાર કરવાથી સંતોષ પમાડ્યાં છે. (૬) હે સ્વામિન્ ! તમારા ભક્તો, અમો પણ તમારા સેવકો તમારી કૃપાથી મુનિમંડળે સહિત આપની રસોઈ કરાવવાથી સેવા કરવા યોગ્ય છીએ. માટે તમોએ આ પ્રમાણે અમારા ઉપર રસોઈ સ્વીકાર કરવારૂપ અનુગ્રહ કર્યા વિના ગઢપુર જવું યોગ્ય નથી. (૭) વળી હે સ્વામિન્ ! તમારી જન્મોત્સવતિથિ ચૈત્ર સુદી નવમી, સમીપમાં જ આવે છે. તમારી જન્મોત્સવ તિથિમાં તમારું પૂજન કરવા માટે અમારા હૃદયમાં ઘણા સમયથી ઈચ્છા છે. (૮) માટે ચૈત્ર સુદી એકાદશી, વિમલા એકાદશીનો ઉત્સવ આવે ત્યાં સુધી આ પુરમાં નિવાસ કરવો તે યોગ્ય છે. હે રાજન્ ! આ પ્રકારે કુબેરાદિ ભક્તજનોએ સંપ્રાર્થના કરી ત્યારે શ્રીહરિ હસતા હસતા કહે છે, તમો કહો છો તેમ કરીશું. (૯) પછી શ્રીહરિએ પોતાના ભક્તોને સંતોષ પમાડતા થકા વૃત્તાલયમાં નિવાસ કર્યો. ચૈત્ર સુદી નવમી તિથિમાં ઉપવાસ કરતાં, શ્રીહરિએ મધ્યાહ્ને શ્રીરામનું શાસ્ત્રોક્ત વિધિથી પૂજન કર્યું. (૧૦) પછી સર્વ ભક્તજનો, પુરવાસીઓ અને દેશાંતરના હરિભક્તો રામનવમીને દિવસે શ્રીહરિનો જન્મ દિવસ જાણતા હતા, માટે જ ઉત્સાહવાળા થઈને પરમ પ્રીતિથી શ્રીહરિને પૂજતા હતા. (૧૧)

वस्त्रैर्नवीनैश्चानर्घ्यैश्चन्दनेन सुगन्धिना । पौष्पैर्मनोहरैर्हारैर्हेमरत्नविभूषणैः ॥१२॥ नीराजनेन महता स्तुत्या नत्या च सादरम् । तं सम्पूज्य निराहारं व्रतं चक्रुः सजागरम् ॥१३॥ तत्प्रीतये दशम्यां ते साधून् विप्रान् यथाधनम् । सद्भोज्यैस्तर्पयामासुर्दानानि च ददुर्नृप! ॥१४॥ हरिश्च बहुशो विप्रान्सम्भोज्याकृत पारणाम् । महान्तमुत्सवं चक्रे ततस्त्वेकादशीदिने ॥१५॥ लक्ष्म्या युतं वासुदेवं सौवर्णं भद्रमण्डले । राजोपचारैर्विविधैर्यथाविधि पुपूज सः ॥१६॥ उपवेश्याथ दोलायां पुनः सम्पूज्य तं ततः । महानीराजनं कृत्वा समान्दोलयति स्म सः ॥१७॥ मुहूर्तान्ते च तां पूजां समाप्याभ्यर्च्य वाडवान् । चकारोपोषणं स्वामी भक्तैः सह च जागरम् ॥१८॥ द्वादश्यां विधिवत्कृत्वा पारणां प्रातरेव सः । प्रयाणायाश्ववारान्स्वान् पद्मांश्चाज्ञापयद्द्रुतम् ॥१९॥ कतिचिन्मुनियूथानि गन्तुं देशान्तराणि सः । आदिदेशाथ कतिचित्सह स्वेनागमाय च ॥२०॥ आज्ञाप्य भृत्यान् सहयायिनः स्वान्स उच्चपीठे ह्युपविश्य हैमे । सम्पूज्यमानोऽखिलभक्तसङ्घैर्भक्तप्रियस्तान्प्रभुरादिदेश ॥२१॥ शृण्वन्तु सर्वे पुरुषाश्च योषा निजं निजं देशमितो भवन्तः । गच्छन्तु मार्गे ह्यतिसावधाना भवन्तु कृष्णं हृदि धारयन्तः ॥२२॥ एवमादिश्य तान्सर्वान्भगवान्करुणानिधिः । जय श्रीसच्चिदानन्देत्युच्चार्य हयमारुहत् ॥२३॥ पाश्चात्यैरश्ववारैश्चपलतरहयैरन्वितो वेष्टनेऽसौ पुष्पापीडान्विचित्रान्सिततिलकवरे कौङ्कुमं चन्द्रकं च । कण्ठे हारानेकान् दधदखिलजनैर्वीक्ष्यमाणोऽश्रुनेत्रैः शृण्वन् गीतं सवाद्यं शशिनिभवदनो निर्ययौ भक्तसङ्घात् ॥२४॥ अनुयातो नरान्नारीर्दृष्ट्वाथ च हरिर्बहून् । न निवर्तयितुं शक्तो बभूव करसंज्ञया ॥२५॥ पार्ष्णिस्पर्शद्रावितेन ततोऽश्वेनैकलः स्वयम् । जगाम भक्तदृष्टीनामतिदूरे स सत्वरम् ॥२६॥

નવીન અમૂલ્ય વસ્ત્રો, સુગંધી ચંદન, મનોહર પુષ્પહારો અને સુવર્ણ તેમજ રત્નજડિત અલંકારોથી અને આરતી-સ્તુતિ-નમસ્કારથી આદર સહિત શ્રીહરિની પૂજા કરી, જાગરણે સહિત નિરાહારવ્રત પાળતા હતા. (૧૨-૧૩) હે રાજન્! તે ભક્તો દશમીને દિવસે શ્રીહરિની પ્રસન્નતા માટે ધન પ્રમાણે સુંદર ભોજનોથી સાધુઓ અને બ્રાહ્મણોને તૃપ્ત કરતા હતા, દાનો આપતા હતા. (૧૪) શ્રી નારાયણ મુનિ પણ ઘણા બ્રાહ્મણોને ભોજન કરાવી, પારણાં કરતા હતા. પછી એકાદશીને દિવસે મોટો ઉત્સવ કરતા હતા. (૧૫) શ્રીહરિ સર્વતોભદ્ર મંડલમાં લક્ષ્મીએ સહિત સુવર્ણની શ્રીકૃષ્ણની મૂર્તિને નાના પ્રકારના રાજોપચારોથી વિધિપૂર્વક પૂજતા હતા. (૧૬) પછી શ્રીહરિ વાસુદેવને હિંડોળામાં પધરાવીને ફરીથી પૂજન કરી, મહા-આરતી કરી, પછી સારી રીતે હિંચકાથી ઝૂલાવતા હતા. (૧૭) ભગવાન શ્રીહરિ બે ઘડી વાર પછી પૂજાની સમાપ્તિ કરી, બ્રાહ્મણોની પૂજા કરી, ભક્તોની સાથે ઉપવાસ અને જાગરણ કરતા હતા. (૧૮) શ્રીહરિ, દ્વાદશીમાં પ્રાતઃકાળે શાસ્ત્ર પ્રમાણે પારણાં કરીને તત્કાલ પ્રયાણ કરવા માટે પોતાના પાર્ષદો અને અસવારોને 'તમો તૈયાર થાઓ' એમ આજ્ઞા કરતા હતા. (૧૯) પછી શ્રીહરિએ કેટલાંક મુનિમંડળોને દેશાંતરમાં અજ્ઞાનીજનોને બોધ આપવા માટે જવાની આજ્ઞા આપી. (૨૦) શ્રીહરિ, પોતાની સાથે આવનાર સેવકોને આજ્ઞા આપીને સુવર્ણના ઊંચા સિંહાસનમાં બેસીને, સમગ્ર ભક્તજનોએ પૂજનીય, ભક્તપ્રિય શ્રીહરિએ સમગ્ર ભક્તવૃંદોને આજ્ઞા આપી : (૨૧) હે ભક્તો ! સર્વે પુરુષો અને સર્વે સ્ત્રીઓ, સાંભળો. આ વૃત્તાલયપુરથી પોતપોતાના દેશમાં જાઓ. હૃદયમાં શ્રીકૃષ્ણનું ચિંતન કરતા રહેજો. અને માર્ગમાં અતિ સાવધાન રહેજો. (૨૨) હે રાજન્! આ પ્રમાણે કરુણાસાગર ભગવાન શ્રીહરિ સર્વ ભક્તસમૂહોને આજ્ઞા આપી, ' જય શ્રી સચ્ચિદાનંદ' એ પ્રમાણે ઉચ્ચાર કરીને પોતાના ઘોડા ઉપર બેઠા. (૨૩) (પ્રયાણ સમયની શોભા વર્ણવે છે.) અતિ ચંચળ ઘોડાવાળા, પશ્ચિમદેશના ભક્તજનો સોમા ખાચર, સૂરા ખાચર અને નાજો ભક્ત વગેરે અસવારોથી વીંટાયેલા, મસ્તકના મોળિયામાં નાના પ્રકારના વર્ણવાળા પુષ્પના તોરાઓ સાથે, કેસરે યુક્ત ઊર્ધ્વપુંડ્ર શ્રેષ્ઠ તિલકમાં કુંકુમનો ચાંલ્લો, કંઠમાં અનેક પુષ્પો તેમજ મોતીઓના હારોને ધારણ કરતા, અશ્રુ સહિત નેત્રોથી સમગ્ર જનોએ દર્શન કરાયેલા, તાસાદિ વાદ્યો સહિત, ભક્તોએ કરેલું પોતાનું યશોગાન સાંભળતા, શરદ ઋતુના પૂર્ણ ચન્દ્રમા સમાન મુખારવિન્દવાળા શ્રીહરિ, ભક્તોના સમૂહથી નીકળ્યા. (૨૪) પછી શ્રીહરિ, પોતાની પછવાડે આવતા ઘણા પુરુષો અને સ્ત્રીઓને જોઈને હાથના સંકેતથી પાછા વાળવા માટે શક્તિમાન થયા નહિ. (૨૫) પછી શ્રીહરિ પહેનીના સ્પર્શથી દોડાવેલા ઘોડાથી પોતે એકલા તત્કાલ, પોતાની પછવાડે આવતા ભક્તજનોની આંખોથી અતિ દૂર પ્રદેશમાં ગયા. (૨૬)

यावद्दृष्टिबलं दृष्ट्वा न्यवर्तन्त च ते जनाः । ध्यायन्तस्तं साश्रुनेत्राः स्वं स्वं देशं ततो ययुः ॥२७॥ रामप्रतापमुख्यास्तु तदा साकेतवासिनः । आज्ञयैव हरेर्जग्मुर्वाहनैः किञ्चिदग्रतः ॥२८॥ पाश्चात्यानश्ववारादीन्समेत्याथ हरिः स च । गच्छन्दुर्गपुरं मार्गे भाल्लदेशमुपाययौ ॥२९॥ तत्र बद्धाञ्जलिपुटान्मार्गमाबध्य संस्थितान् । जनान्सहस्रशोऽपश्यद्भगवान्प्रहसन्मुखः ॥३०॥ नमस्कृत्य प्रभुं तेऽथ वल्गां तस्य च वाजिनः । धृत्वा स्वं स्वं पुरं नेतुं हरिं सम्प्रार्थयन्भृशम् ॥३१॥ तान्निर्भर्त्स्य हरिर्गन्तुं नाशकद्भक्तवत्सलः । ततस्तेषां प्रियं कर्तुं तत्तत्पुरमगाच्च सः ॥३२॥ क्वचिदर्धं क्वचिच्चैकं क्वचिद्द्वे त्रीण्यपि क्वचित् । दिनान्युवास भगवान्भक्तानां प्रियकाम्यया ॥३३॥ एवं निवसतस्तस्य मास एकः क्षणो यथा । व्यतिचक्राम भक्तान्स्वान्भृशं तोषयतो हरेः ॥३४॥ अथोत्तमस्तु नृपतिर्निवसन्दुर्गपत्तने। हरेः प्रतीक्षया मासं दुःखेन महताऽनयत् ॥३५॥ अद्य श्वो वा परश्वो वा सायं वा प्रातरेव वा । हरिरायास्यतीत्येवं चिन्तयाऽन्यं निनाय च ॥३६॥ तृतीये मासि तु प्राप्ते भृशं चिन्तातुरो नृपः । भगवद्विरहं सोढुं नाशकत्क्षणमप्यसौ ॥३७॥ खानपानविहीनश्च चिन्तातप्तवपुर्नृपः । भूरिप्रजागरः पत्रीं लिलेखैकमनाः शनैः ॥३८॥ लिखित्वा स्वप्रणामादि लिलेख प्रार्थनां ततः । अतिक्रान्तैव मर्यादा भगवन् ! या त्वया कृता ॥३९॥ एतावत्कालपर्यन्तं प्राणा देहे कथञ्चन । स्थिता अतः परं त्वेते न स्थास्यन्तीति भाति मे ॥४०॥ सहनं त्वद्वियोगस्य नाहं कर्तुं क्षमः प्रभो ! । अत्रायाहि ततः शीघ्रं मामाकारय तत्र वा ॥४१॥

---

તે જનો જ્યાં સુધી દૃષ્ટિ પહોંચી ત્યાં સુધી શ્રીહરિને જોઈને પાછા ગયા. પછી શ્રીહરિનું પોતપોતાના મનમાં ચિન્તવન કરતા ભગવાનના વિરહથી આંખમાં આંસુવાળા, પોતપોતાના દેશમાં ગયા. (૨૭) તે સમયે અયોધ્યા નિવાસી શ્રીહરિના મોટાભાઈ રામપ્રતાપ વગેરે શ્રીહરિની આજ્ઞાથી જ રથાદિ વાહનોથી લગારેક આગળથી જતા હતા. (૨૮) પછી ઘોડાને દોડાવવાથી આગળ ગયેલા શ્રીહરિ, પાશ્ચાત્ય દેશના અસવારોની ભેગા થઈને દુર્ગપત્તન જતાં જતાં માર્ગમાં ભાલ પ્રદેશ ગયા. (૨૯) ભાલ પ્રદેશમાં બન્ને હાથ જોડીને, માર્ગ રોકીને રહેલા હજારો પોતાના ભક્તજનોને મંદહાસ્યપૂર્વક શ્રીહરિ જોતા હતા. (૩૦) પછી જનો શ્રીહરિને નમસ્કાર કરી, શ્રીહરિના અશ્વની લગામ ગ્રહણ કરી, પોતાના પુરમાં લઈ જવા માટે શ્રીહરિને અતિશય પ્રાર્થના કરતા હતા. (૩૧) ભક્તવત્સલ શ્રીહરિ પોતાના ભક્તોને તિરસ્કાર કરીને ગઢપુર જવા માટે શક્તિમાન થયા નહિ, માટે શ્રીહરિ પોતાના ભક્તોનું પ્રિય કરવા માટે તેમના નગરમાં જતા હતા. (૩૨) ભગવાન શ્રીહરિ, ભાલ દેશના ભક્તોનું પ્રિય કરવાની ઈચ્છાથી કોઈ પુરમાં અર્ધો દિવસ, કોઈ પુરમાં એક દિવસ,બે દિવસ, અને ક્યારેક કોઈ ગામમાં ત્રણ દિવસ પણ નિવાસ કરતા હતા. (૩૩) આ પ્રકારે નિવાસ કરતા પોતાના ભક્તોને અત્યંત આનંદ કરાવતા શ્રીહરિને એક માસ ક્ષણની માફક ચાલ્યો ગયો. (૩૪) આ સમયે દુર્ગપત્તનમાં નિવાસ કરતા, ઉત્તમ રાજાએ શ્રીહરિની પ્રતીક્ષાના મહાદ્દુઃખથી એક માસ વિતાવ્યો હતો. (૩૫) ‘મારા નાથ, શ્રીહરિ આજે અથવા કાલે કે પરમ દિવસે, સાયંકાળે કે સવારે જ જરૂર આવશે’ આ પ્રકારે ચિંતાથી બીજો માસ પણ ચાલ્યો ગયો. (૩૬) ત્રીજો માસ પ્રાપ્ત થયો ત્યારે તો આ ઉત્તમ રાજા ક્ષણ માત્ર પણ વિરહ સહન કરવા માટે શક્તિમાન થયા નહિ. (૩૭) અન્ન-જળાદિ ભોજન પાનથી રહિત, ચિંતાથી સંતાપવાળું શરીર જેનું છે એવા, ઘણા ઉજાગરા જેને છે એવા, ઉત્તમ રાજા, એકાગ્ર મનવાળા થઈને ધીમે ધીમે પત્ર લખતા હતા. (૩૮) પછી પ્રણામ વગેરે ઉપમાઓ લખીને પોતે પ્રાર્થના લખતા હતા : હે ભગવાન ! તમોએ મારી આગળ કરેલી એક માસે ફરી પાછા આવવાની જે શરતની મર્યાદા તે વીતી ગઈ છે, જ. (૩૯) આટલા સમય સુધી મારા શરીરમાં પ્રાણો મહાદ્દુઃખથી રહ્યા છે. પરંતુ આ પ્રાણો મારા શરીરમાં હવે પછી રહેશે નહીં, એવું મને જણાય છે. (૪૦) હે પ્રભો ! તમારા વિયોગને સહન કરવા માટે હું શક્તિમાન નથી જ. માટે આ દુર્ગપુરમાં તત્કાલ પધારો. અથવા તમારા સમીપમાં મને બોલાવી લ્યો. (૪૧)

सविस्तरैतदर्थां तु लिखित्वा पत्रिकां नृपः । दूतेन प्रेषयामास सद्योऽसौ शीघ्रगामिना ॥४२॥ तस्मिन्नेव दिने दूतो गुम्फाख्यपुरमागमत् । हरिं प्राप्य ददौ तां च वाचयामास स प्रभुः ॥४३॥ सकलां वाचयित्वा तां भगवान्करुणानिधिः । असह्यं स्वस्य विरहं तेनाबुध्यत निश्चितम् ॥४४॥ ततः सर्वाननुज्ञाप्य तस्मिन्नेव दिने निशि । अश्ववारैः कतिपयैः सहायाद्दुर्गपत्तनम् ॥४५॥ अरुणोदयवेलायां प्राप तत्पुरमीश्वरः । उपविष्टो बहिर्वेद्यां तच्छुश्रावोत्तमो नृपः ॥४६॥ अभ्यधावत्तदैवासावनुपानत्पदोऽपि च । प्राणं वपुरिव प्राप्य तमानन्दमवाप सः ॥४७॥ उत्तीर्याश्वाद्धरिरपि परिरेभे तमानतम् । कृशीभूतं च तद्देहं दृष्ट्वा विस्मयमाप च ॥४८॥ ततः साकं तेन हरिर्वेष्टितो निजपार्षदैः । प्राप्य स्ववसतिं स्थानं न्यवसत्तन्निषेवितः ॥४९॥ मानयित्वा भगवतो बन्धूंस्तमिव सादरम् । प्रासादे वासयामास स्वकीये स च भूपतिः ॥५०॥ एवं स भगवांश्चक्रे पुरि तत्र नृपोत्सवम् । अन्यानपीदृशानेव तत्र चक्रे स चोत्सवान् ॥५१॥ महोत्सवं यः परमं पवित्रं हरेरिमं संशृणुयात्पठेद्वा । तौ वाञ्छितार्थं सकलं लभेतां हरेः प्रसादात्परमं पदं च ॥५२॥ इति श्रीसत्सङ्गिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे वृत्तालयदोलोत्सवे भगवतो दुर्गपत्तनप्रत्यागमननामा चतुःषष्टितमोऽध्यायः ॥६४॥

## इति तृतीयप्रकरणं समाप्तम् ।

---

હે રાજન્ ! ઉત્તમરાજાએ વિસ્તારે સહિત પૂર્વે કહેલો અર્થ જેમાં છે એવી પત્રિકા લખીને તત્કાલ ચાલનારા દૂત દ્વારા તત્કાલ જ મોકલી. (૪૨) દૂત જે દિવસે ગઢપુરથી નીકળ્યો, તે દિવસે જ ગાંફ ગામમાં આવ્યો. તે દિવસે ત્યાં આવેલ શ્રીહરિને રાજભવનમાં મળીને ઉત્તમરાજાએ આપેલી પત્રિકા પ્રણામ પૂર્વક આપી. શ્રીહરિએ તેને વંચાવી. (૪૩) કરુણાનિધિ ભગવાન શ્રીહરિએ સમગ્ર પત્રિકા વંચાવી 'પોતાના વિરહનું અસહ્ય દુઃખ ઉત્તમ રાજાને છે' એમ જાણ્યું. (૪૪) પછી ભાલ દેશના સર્વ ભક્તોને પોતપોતાના ગામોમાં જાઓ, એમ આજ્ઞા આપીને, તે જ દિવસે, રાત્રિમાં પોતાના પાર્ષદ સોમવર્મા આદિ અસવારોની સાથે દુર્ગપત્તન જતા હતા. (૪૫) શ્રીહરિ અરુણોદય સમયે શ્રી ગઢપુરમાં આવ્યા.બહાર ઓટલા ઉપર (દરબાર ગઢની ડેલીએ) બેઠેલા ઉત્તમ રાજા શ્રીહરિનું આગમન,શ્રીહરિએ આગળ મોકલેલા અશ્વારનાં મુખ થકી સાંભળતા હતા. (૪૬) તે જ સમયે ઉત્તમ રાજા જોડાં પહેર્યા વગર જ શ્રીહરિની સન્મુખ દોડતા હતા. ઉત્તમ રાજા, પ્રાણને પામીને શરીરમાં જેમ (ચૈતન્ય આવે) તેમ શ્રીહરિને પામીને આનંદ પામ્યા. (૪૭) શ્રી નારાયણ મુનિ પણ પોતાના અશ્વથી ઊતરીને પોતાના ચરણકમળમાં પ્રણામ કરતા, ઉત્તમ રાજાને ભેટ્યા. અને પોતાના વિરહથી સૂકાઈ ગયેલા શરીરને જોઈને આશ્ચર્ય પામ્યા. (૪૮) પછી શ્રીહરિ પોતાના પાર્ષદોથી વીંટાયેલા થકા ઉત્તમ રાજાની સાથે પોતાના નિવાસસ્થાનમાં જઈને ઉત્તમ રાજાએ અખંડ સેવાયેલા સતા ત્યાં નિવાસ કરતા હતા. (૪૯) હે રાજન્ ! ઉત્તમ રાજા શ્રીહરિના બંધુઓ જે રામપ્રતાપ અને ઈચ્છારામ વગેરેને શ્રીહરિની માફક સત્કાર કરીને પોતાના મહેલમાં આદરપૂર્વક નિવાસ કરાવતા હતા. (૫૦) હે રાજન્ ! આવી રીતે ભગવાન શ્રીહરિ વૃત્તાલય નગરમાં પુષ્પદોલોત્સવ કરતા હતા. શ્રીહરિએ આ પ્રકારે કહેલા ઉત્સવની સમાન જ બીજા પણ ઘણા ઉત્સવો વૃત્તાલયપુરમાં કર્યા હતાં. (૫૧)

જે મનુષ્ય શ્રીહરિનો આ સર્વોત્તમ, પવિત્ર, શ્રોતા-વક્તાને પવિત્ર કરનારો મહોત્સવ સાંભળે અને પાઠ કરે તે શ્રોતા અને વક્તા બન્ને શ્રીહરિની પ્રસન્નતાથી સમગ્ર પોતાને ઈચ્છિત પુરુષાર્થની સિદ્ધિ અને શ્રીહરિનું ધામ પામે. (૫૨)

ઈતિ શ્રી સત્સંગિજીવને નારાયણચરિત્રે ધર્મશાસ્ત્રે તૃતીય પ્રકરણે વૃત્તાલયદોલોત્સવે ભગવતો દુર્ગપત્તનપ્રત્યાગમનનામા ચતુઃ ષષ્ટિતમોડધ્યાયઃ (૬૪)

स्वभक्तांस्तोषयामास यः कृपावारिधिर्बहून् ।
कृत्वा नानोत्सवान्भूमौ श्रीहरिः सोऽस्तु मद्धृदि ॥१॥

**ઈતિ તૃતીય પ્રકરણમ્ સમાપ્તમ્ ।**



પ્રસિદ્ધ કર્તા :- શ્રી સ્વા. સંપ્રદાયસ્ય શ્રી લક્ષ્મી. દેવ પીઠસ્થાન સંસ્થાન - વડતાલ વતી શ્રી સ્વા. મંદિર - સરધાર